The Department of Public Instruction, Bombay.

ATHARVAVEDASAMHITÂ

WITH THE

COMMENTARY OF SÂYAṆÂCHÂRYA.

EDITED BY

SHANKAR PÂNDURANG PANDIT M. A.

Registered for Copy-right under Act XXV of 1867.

Vol. I.

Bombay:

GOVERNMENT CENTRAL BOOK DEPÔT.

1895.

All rights reserved.

Price 10 Rupees.

Atharvaveda
1
36 g

BIBLIOTHECA
REGIA
MONACENSIS

BOMBAY:

PRINTED AT JAVAJI DADAJI'S "NIRNAYA-SAGAR" PRESS.

अथर्ववेदसंहिता

सायणाचार्यविरचितेन भाष्येण सहिता.

पण्डितोपाभिधेन पाण्डुरङ्गसूनुना शंकरेण

संशोधिता.

सा च

मुंबय्यां

जावजी दादाजी

इत्येतेषां "निर्णयसागराख्य" मुद्रणयन्त्रालये मुद्रिता.

गवर्नमेन्ट सेन्ट्रल बुक डिपो.

अस्य च ग्रन्थस्य स्वामित्वं (१८६७) सप्तषष्ट्युत्तराष्टादशशतस्य पञ्चविंशं स्वनियममनुसृत्य संगृहीतम्।

१८९५.

मूल्यं १० रूप्यकाः

Bayerische
Staatsbibliothek
MÜNCHEN

ABBREVIATIONS & SYMBOLS.

संक्षिप्तसंज्ञा.	ग्रन्थनाम.
अ० को०	अमरकोशः.
अ० शि० उ०	अथर्वशिरउपनिषत्.
आप० गृ०	आपस्तम्बगृह्यसूत्रम्.
आप० ध०	आपस्तम्बधर्मसूत्रम्.
आप० सू० अथवा आप०	आपस्तम्बश्रौतसूत्रम्.
आश्व०	आश्वलायनश्रौत-सूत्रम्.
आश्व० गृ०	आश्वलायनगृह्य-सूत्रम्.
आश्व० प०	आश्वलायनश्रौत-सूत्रपरिशिष्टम्.
उ० अथवा उ० पा०	उणादिसूत्रम्.
ऋ० अथवा ऋ० सं०	ऋक्संहिता.
ऐ० आ०	ऐतरेयारण्यकम्.
ऐ० उ०	ऐतरेयोपनिषत्.
ऐ० ब्रा०	ऐतरेयब्राह्मणम्.
क० व०	कठवल्ली.
कु०	कुन्तापसूक्तम्.
के०	केशवी गृह्यपद्धतिः.
कौ०	कौशिकसूत्रम्.
कौ० उ० अथवा कौ० ब्रा०	कौषीतकिब्राह्मणोपनिषत्.
गो० ब्रा०	गोपथब्राह्मणम्.
गौ० सू०	गौतमन्यायसूत्रम्.
छा० उ० अथवा छा०	छान्दोग्योपनिषत्.
जा० उ०	जाबालोपनिषत्.
जै०	जैमिनिसूत्रम्.
तै० आ०	तैत्तिरीयारण्यकम्.

संक्षिप्तसंज्ञा.	ग्रन्थनाम.
तै० ब्रा०	तैत्तिरीयब्राह्मणम्.
तै० सं०	तैत्तिरीयसंहिता.
न० क०	नक्षत्रकल्पः.
नि०	निरुक्तम्.
निघ०	निघण्टुः.
नि० प०	निरुक्तपरिशिष्टम्.
निवि०	निवित्.
नृ० पू० अथवा नृ० पू० ता०	नृसिंहपूर्वतापिनी.
प० अथवा अ० प०	अथर्वपरिशिष्टम्.
पा०	पाणिनीयम्.
पा० सू०	पातञ्जलसूत्रम्.
प्र० उ०	प्रश्नोपनिषत्.
फि०	फिट्सूत्रम्.
वा०	वादरायणसूत्रम्.
बृ०	बृहद्देवतानुक्रमणी.
बृ० आ०	बृहदारण्यकोपनिषत्.
ब्रह्मवि० उ०	ब्रह्मविदा°उपनिषत्.
भ० गी०	भगवद्गीता.
भा०	श्रीमद्भागवतम्.
म० स्मृ०	मनुस्मृतिः.
महोप०	महोपनिषत्.
मी० भा० वि०	मीमांसाभाष्यविवरणम्.
मु०	मुण्डकम्.
या० स्मृ०	याज्ञवल्क्यस्मृतिः.
वा० सं०, In notes, V. S.	वाजसनेयिसंहिता.
वि०	विष्णुपुराणम्.

संक्षिप्तसंज्ञा.	ग्रन्थनाम.
वै०	वैतानसूत्रम्.
श० ब्रा० अथवा श० प०	शतपथब्राह्मणम्.
शा० क०	शान्तिकल्पः.
शि०	शिक्षा.
श्वे० उ० अथवा श्वे०	श्वेताश्वतरोपनिषत्.
स० अ०	सर्वानुक्रम ऋक्सं-हितायाः.
स० अ० परि०	सर्वानुक्रमपरिभाषा ऋक्संहितायाः.
सत्या० सू०	सत्याषाढसूत्रम्.
हिर० सू०	हिरण्यकेशिसूत्रम्.

Where figures are given in brackets without the initials of books they represent the Kâṇḍa, Sûkta and Ṛik of Atharwaveda.

An asterisk in Saṁhita or padas means that the text adopted is different from that of the reciting Brâhmaṇas and of MSS. but is supported by Sâyaṇa's Bhâshya

An asterisk in the Bhâshya means that the text adopted by Sâyaṇa is different from that adopted in the present edition on the strength of the reciting Brâhmaṇas and MSS.

An asterisk in a quotation means that there is some slight difference between the passage in the original and as quoted. Such instances, however, are few and unimportant.

⧖ This mark points out the beginning and the end of the technical grammatical part of Sâyaṇa's commentary.

CORRECTIONS.

पृष्ठे	पङ्क्तौ	अशुद्धम्.	शुद्धम्.
[४]	१	४.४.१०	२.४.१०
[७]	२१	भविःतु	भवितुः
[२२]	६	एकं पदम् एकं	एकं पदम् एकं
[२८]	२८	प्रदाना०	प्रधाना०
[३०]	८	६५	६८
१	२३,२४	Read Kd for S′, and vice versa.	
२	२४	मेधाजनन आयु०	मेधाजननायु०
५	१४	बली०	वली०
१०	२०	[नृ० पू० १.]	[नृ० पू० १. ७]
११	१३	प्रयोक्तरि"	प्रयोक्तरि०"
१४	४	इषगमि०	इषुगमि०
१५	२५	द्रुह्या०	°द्रुह्या०
१९	३	आद्युदात्तत्वम्	आद्युदात्तत्वम्
२१	२	व्रश्चि०	[स्रु] व्रश्चि०
,,	१६	शरुं	शॅरुं
२३	९	बन्धनम् । मूषि०	बन्धनम् मूषि०
२४	५	साहि०	सांहि०
२५	२५	विघ्न ।	विघ्न ।
२६	१४	जगद् विधात्रा	जगद्विधात्रा
३०	१९	°सूक्तानि[४.२३–२९]उत्तमं वर्जयित्वा	°सूक्तानि उत्तमं वर्जयित्वा [४.२३-२९]
३१	२,६	[११. ६]	[११. ८]
,,	२७	Read Kd for S′, and vice versa.	
३४	२६	,,	
३६	२६	,,	
३७	२२	[४. १]	[४. १] [५. ६]
,,	,,	[९. ९]	[९. १४]
,,	,,	[१३. १]	[१३. १. २५, २६]

पृष्ठे	पङ्क्तौ	अशुद्धम्.	शुद्धम्.
४०	८	सार्वधातुकम्०" अनुदात्तम्	सार्वधातुकमनुदात्तम्०"
४४	२७	Read Kd for **S′**, and vice versa.	
४६	२७	WR	Rw
४९	२६	WR	Rw
५०	२०	धात्वर्थे	धात्वर्थं
५१	१९	राभस्ये ⧗ । राभस्यं कार्योपक्रमः।	राभस्ये । राभस्यं कार्योपक्रमः ⧗ ।
५३	११	" अस्ताति " च	" अस्ताति च "
५५	५	प्रापयति । तद्वद्	प्रापयति तद्वद्
५६	१	युष्मद्विषया	युष्मद्विषयां
५८	१४	अत्रिणो	अत्त्रिणो
५९	१३	[११. ४]	[११. ६]
६०	२७	Read Kd for **S′** *&* vice versa in both places.	
६६	२७	सत्यधर्मणो मुञ्चामि वरुणादहम्।	सत्यधर्मणो मुञ्चामि वरुणादहम् ।
६८	२७	Read Kd for **S′** & vice versa.	
६९	९	ऊं इति ।	ऊं इति ।
,,	२६	Read Kd for S′ & vice versa.	
७०	१९	व्यूर्णुवन्तु	व्यूर्णुवन्तु
७१	१२	व्यूर्णोंतु	व्यूर्णोंतु
,,	१४	टापयामसि ।	ह्रापयामसि ।
७६	१२	मत्त्वर्थीयो	मत्वर्थीयो
७८	१	त्वा त्वा	त्वा त्वां
८०	१७	(७. ११)	[७. १२]
८७	२४	आसता	°ष्वासता
८९	८	उपासिच्य	उपासेचं
,,	२५	Omit 2 **S′** Kd **उपा** &c.	
९०	२७	Read Kd for **S′** & vice versa.	
९४	२१	१. ३१.	१. ११. ३१. २१
,,	२७	TS.	तै° सं°
१००	१३	शतसंख्याना	शतसंख्यानां
१०७	१	केशाना	केशानां
१०९	२१	निाघतः	निघातः

पृष्ठे	पङ्क्तौ	अशुद्धम्.	शुद्धम्.
११४	२४	अमतः	अमुतः
११७	१३	अविनाशि नाम	अविनाशिनाम
१२२	१०	हिर°स°	हिर°सू°
१२४	४	°तक्षुष्वन्तः°	°तक्षुःष्वन्तः°
१३३	५	चिकित्सकाना	चिकित्सकानां
१४०	२०	पिनाकमिव	पिनाकमिव
१४१	२०	ऋदो°	ऋदो°
१४८	२७	माहेन्दीम्	माहेन्द्रीम्
१५१	२२	सपत्नाना	सपत्नानां
१५५	१२	आदित्याः ।	आदित्याः ।
१६०	२१	मृत्यु°	[अति]मृत्यु°
१६१	२०,२१,२२	[११. ६	[११. ८
१६८	७	१	१.२.
,,	१७	°तक्षुष्वन्तः°	तक्षुःष्वन्तः°
१७२	१७	यासा	यासां
१७३	१	पापिना	पापिनां
१८०	१	अग्नेः	"अग्नेः
१८१	१८	रेवा°	देवा°
१८२	७	अन्येषामपि	अन्येष्वपि
,,	२२	स्यो	स्यो*
१८४	३	°प्रभृतीना	°प्रभृतीनां
१८८	१०	°स्पर्शनेन मरि°	स्पर्शनेन [बहुचारिणी भविष्यति श्मशानलोष्टस्पर्शनेन] मरि°
१८९	२०	घञर्थे कविधानम् "स्था°	"घञर्थे कविधानम् स्था°
१९३	१८	पुत्रा°	पित्रा° [S'. Kd have पत्रा°]
१९९	१४	रेव ।	देव ।
२००	२७	3	3 S'kd
२०१	६	११४	११०
२०३	१४	पुर्ववद्	पूर्ववद्
२०४	२६	टित्वाद्	टित्त्वाद्
२०५	५	कमेर्णिच्	कमेर्णिङ्

पृष्ठे	पङ्क्तौ	अशुद्धम्.	शुद्धम्.
२०६	६	धाव् आदेशः	धावादेशः
२०७	४	°पूवात्	°पूर्वात्
२११	२४	मयःभुवां	मयःऽभुवां
२१५	७	उपचार०	उपाचार०
२२०	५	७.८२	७.८७
,,	२५	भवंति	भवति
२२७	१४	ता	तां
२२८	२६	45. 9.	45. 1.
२२९	१	°लोष्टं	°लोष्टं
,,	२३	▒ तथा च	तथा च
२३०	४	इति ▒	इति
२३६	१४	°त्करति''	°त्करति°''
२३९	५	भवन्तु ।	भवन्तु ।
२४५	६	°पदेषु	°पदेषु''
२४७	२३	तप्यतां	तंप्यतां
,,	२५	Read Kd for S' & vice versa.	
२४८	१२	५. ७. २	३. ७. २
२५५	२	आतिष्टेति	आ तिष्टेति
२५८	१७	°तक्षुष्वन्तः०	°तक्षुःष्वन्तः°
२६२	२५	तिष्ठतु ।	तिष्ठतु ।
२६७	९	५. ४. ७	५. २४. ७
२६८	३	द्यावा°	द्यावा°
२७०	२५	1 S'	1 Kd.
२७२	१	आसा	आसां
२७८	१	यत् ते ।	यत् । ते ।
२८१	१८	मासा°	मांसा°
२८४	१९	°विशेषाणा	°विशेषाणां
२८७	२६	T B.	तै० ब्रा०
२९३	२४	Read Kd for S' and vice versa.	
२९९	१०	दीर्घायुष	दीर्घायुषं
,,	१३	इट	इटः

पृष्ठे	पङ्क्तौ	अशुद्धम्.	शुद्धम्.
३०२	५	संज्ञाया	संज्ञाया।
३०९	१८	हन्यते	हन्यँते
३१३	२६	क्रिमिन्	क्रिमिंन्
३१८	१४	९. ८	९. १३
३३३	१	संपातवत्या	संपातवत्यां
३३४	९	च छन्दसि	च च्छन्दसि
,,	२६	Read in note No. 1 S′ for Kd and vice versa.	
३४४	१३	मूढा	मूढां
,,	१९	°रजि°	°राजि°
३५०	२४	BBBp.	BBp.
३५१	१	च छन्दां°	च च्छन्दां°
३५४	१२	[३. ३]	[वै० ३. ३]
३५५	२६	I पूर्व°	I S′Kd पूर्व°
३५७	१२	त्वा त्वा	त्वा त्वां
,,	२५	P P	P $\hat{P}$
३५९	२०	पररूपत्वम्	परपूर्वत्वम्
,,	२६	Omit line 26.	
३६४	२६	On ग्रामण्यः add the v. l. J ग्राम°न्यः; P ग्राम°ण्यन्यः.	
३६५	१९	"तत्र पुमान्	तत्र "पुमान्
३६८	१२	भिन्द्धि*	भिन्धि*
३७१	११	°णाग्रे म°	णाग्रे (अ?) म°
३८५	११	यर्यं	यूयं
३९६	९	°सुपसा	°सुपसां
३९७	२०	नित्वात्	नित्त्वात्
३९८	४	कर्मणा	कर्मणां
,,	१५	एकाष्टकाया	एकाष्टकायां
४००	१६	नीत	नीति
४०६	४	°सहिता	°सहितां
,,	२५	°कृष्टे । दक्षि°	°कृष्टे दक्षि°
४०७	१७	प्रियसत्व°	प्रियसत्य°
४१०	२७	$\hat{P}$ J	$\hat{P}$ (as corrected) and Cp.

पृष्ठे	पङ्क्तौ	अशुद्धम्.	शुद्धम्.
४११	२७	समत्समिधां	मत्समिधां
४१९	१८	९. ७	९. १२
४२२	१	समृद्धाना	समृद्धानां
४२४	१३	सम्ऽचरंन्ति ।	सम्ऽचरंन्ति ।
४२५	२१	अनुदात्तेत्वात्	अनुदात्तेत्त्वात्
४२६	७	च ।	च ।
,,	१४	द्विषां ।	हविषां ।
,,	१९	मे ।	मे ।
४३०	२५	भक्षि ।	भक्षि ।

At the end of page 430 add the following as v. l. $\overset{2}{P}$ भक्षि CP भक्षि we with PJ भक्षि.

४३५	१५	यथा वितानं	यथावितानं
४४३	१२	स्वर्हस्वती इति ।	सर्हस्वती इति ।
४५२	२३	वृहता	बृहतां
४५७	५	द्धातु ।	द्धातु ।
४७४	२२	भरेयं	भरेयम्
४८१	२३	सूक्ताभ्या	सूक्ताभ्यां
४८४	२५	येस्यां	येस्यां
४९४	१	नाभ्या	नाभ्यां
५०३	२६	Read **K**d for **S**′ and vice versa regarding **स्नेहपाशे.**	
५१४	१६	यत्तं	यत्
५१७	२६	$\overset{h}{B}$ J S	$B^{hla}S$
५३१	२१	IV. 56.	II. 56.
५३२	२१	J K V	K V
,,	,,	P J.	P $\overset{2}{P}$ J.
५३३	१६	वृक्षाणा	वृक्षाणां
५५९	२३	सर्वा ज°	सर्वा ज°
,,	,,	°यंत्स°	°यंत्स°
५८५	१	दकारः	दंकारः
५९३	११	सर्मद्धि	सर्मद्धि
,,	१४	अद्धि	अद्धि

पृष्ठे	पङ्क्तौ	अशुद्धम्.	शुद्धम्.
,,	१९	समद्धि	समद्धि॰
५९६	६	प्र्यायता	प्र्यायतां
६०४	९	शतेन्	शतेन्
६०७	२१	१२८. ३	१. २८, ३.
६११	९	कृत्या	कृत्यां
६१३	५	या	यां
६२४	२३	[७. ८]	[७] [७. ७९]
६२५	४	,,	,,
,,	४	९. ७	९. १२
६३७	२१	P J R.	P R.
६४०	२०	मीढ्वा॰	मीढ्वां॰
६४५	१३	३. ७. ७.	३. ७. ३
६५२	१५	ते ।	ते इति ।
६५८	१६	४. ४	कौ० ४. ४
६६९	२०	ता मा	तां मा
६७०	२०	४. १. ३१	४. ३. ३२
६७९	३,४.	अनवाना	अनवानां
७००	१३	ऋदो॰	ऋदो॰
७०१	१	निशाया	निशायां
७०५	१	°ख्याया	°ख्यायां
७१४	२७	After 6 Read Kd for S′ and vice versa.	
७२१	१७	२. २. ५	२. २. ३
७३०	२१	अजुर्यम्	अजुर्यम् ।
७४६	२०	एनान् ।	एनान् ।
,,	२१	एनान् ।	एनान् ।
७४७	१४	द्यावापृथि॰	द्यावापृथि॰
,,	२१	गोपा ।	गोपा ।
,,	२३	द्वितीये॰	इति द्वितीये॰
७४८	१९	°दासात् ।	°दासात् ।
७४९	१०	दक्षिणा	दक्षिणां
७५०	१६	पृश्नि	पृश्नि

पृष्ठे	पङ्क्तौ	अशुद्धम्.	शुद्धम्.
७५८	१६	"एका च" मे	"एका च मे"
७६७	१९	दुच्छुना ॥	दुच्छुनां ॥
,,	२०	सेधन्ति छा°	सेधन्ति च्छा°
७८०	१४	°मस्या प्रतिष्ठायामस्या	°मस्यां प्रतिष्ठायामस्यां
७९४	२४	मासे	मांसे
७९५	१६	शालाया	शालायां
७९६	११	जभारैणां	जंभारैणां

CRITICAL NOTICE.

The text of the Atharva Veda Saṁhitâ given in the following edition is based upon the materials specified below.

A. A very old MS. of the Saṁhitâ belonging to and in the possession of an Atharva-Vedî Brâhmaṇ of Ahmedâbâd named Jais'ankar Haris'ankar. It is a MS. of a small size written in Devanâgarî characters. No date is given, but the MS. must be at least three or four hundred years old. It is accented throughout, but the only accent shown is the Udâtta by a red ink dot on the head of the proper syllable. The XVIIIth Kâṇḍa is not accented. It is a beautiful little MS., and generally very correct. It has been returned to the owner. A loan of it was obtained for me by my venerable friend the late Rao Bâhâdur Bholânâth Sârâbhâi, of the Ahmedâbâd Prârthanâ Samâj. It contained all the Kâṇḍas except the twentieth.

B is a small MS. belonging to a priest of the Atharva Veda named Bâpujî Jîvaṇrâm, a Visanagarâ Nâgar of Lûṇâvâdâ. It is a correctly written manuscript, containing all the Kâṇḍas except the XIXth and sûktas 29 to 33 both inclusive of the XXth, and subsequently revised according to the changes introduced by Gaṇes' Bhaṭ Dâdâ, about whom see further on. It is the MS. which Bâpujî used when he learned the Saṁhitâ by rote at Gwalior. It always indicates the anusvâra on a syllable before य, र, ल, व, श, ष, स, ह by ँ, *i. e.* turns it into an anunâsika as required by the *Chaturâdhyâyî* (I. 67-69). Thus, एवँ वेद for एवं वेद (IX.10.3), पृथिव्याँ विश्वरूपम् for पृथिव्यां विश्वरूपम् (IX. 11. 7), अयँ सोमो for अयं सोमो (IX. 15.14), माँस्त for मांस्त (XI.2.8), वृक्षँ यद् for वृक्षं यद् (I.2.3), ददेहँ रायस्पोषं° for ददेहं रायस्पोषं° (I. 9. 4), विलीढ्यँ ललाम्यं° for विलीढ्यं ललाम्यं° (I. 18. 4), सँ श्रुतेन for सं श्रुतेन (I. 1. 4), कर्त्वँ हविः for कर्त्वं हविः (I. 4. 3), दँष्ट्रौ for दंष्ट्रौ (VIII. 3. 3). It contains 485 folios of eight lines to the page of about twenty-six to twenty-nine letters to a line. Kâṇḍas XI and XII are written by a different hand from the rest of the

MS., and are not so correct as the other Kâṇḍas. Like the rest they are also subsequently corrected but not always rightly, several of the corrections being quite wrong as in the other Kâṇḍas. From the date given at the end as the time when the MS. was written, it appears to be about two hundred and twenty-eight years old. It has the following colophon: संवत् १७२० वर्षे आश्वनमासे शुक्लपक्षे ३ तृतीयायां तिथौ सोमवासरे अद्य श्रीअणहिलपुरपटणवास्तव्यं आभ्यंतर नागरं ज्ञाति ॥ पंचोली श्रीविश्रुपसुतपंचो०वसीष्टसुतपंचो०लहूआसुतपंचो०वासणसुतपंचो०नारायणसुतपंचो०वच्यांसुतपंचालीवाछासुतभवांनीदासलिखितं ॥ शुभं भवतु कल्याणमस्तु ॥ छ ॥

Bp. This was the Vaidika Bâpujî Jîvaṇrâm mentioned in the foregoing paragraph. He knows the Saṁhitâ text by heart except the latter half in the recitation of which he had to be assisted by his MS. and parts of which he could only read from the latter. He also knows the Pada text and the Krama text of the first four Kâṇḍas. I went over the whole Saṁhitâ text with him as with a MS. and noted down all varieties of reading. He is considered one of the best Vaidikas in Gujarât, and had been a pupil of Gaṇes' Bhaṭ Dâdâ of Mâhulî of whom more will be said hereafter. Kâṇḍa XVIII he doe, not know, not having learned it owing to its inauspicious character as relating to the funeral ceremonies. So great was his prejudice against that Kâṇḍa, that he would not even read it from a MS. or hear it read by others in the houses but I had to go with him to an Araṇya for the purpose, of which there being little in Bombay we considered the *Victoria Gardens* would answer the purpose, and there we read the Kâṇḍa under an as'oka tree.

$\overset{h}{B}$. A modern MS. consisting of two parts, the first containing the first ten Kâṇḍas on two hundred and one folios written on thick Ahmedâbâd paper, $10\frac{1}{2}'' \times 6''$, with ten lines to the page and twenty-seven letters to the line. The second part contains the remaining Kâṇḍas except the unlucky XVIIIth, and is written on one hundred and seventy-four folios, $10\frac{1}{6}'' \times 5''$, of eight lines to the page with about thirty-six letters to the line. This part is written on old paper. The MS. belonged to the late Mr. Veṇilâl Udes'ankar, brother of the late Divân Gauris'ankar Udes'ankar of Bhâvanagar. The first part ends thus: छा १६ अर्थसूक्त १ ऋचा ३४ अनुवाके अर्थसूक्त २ ऋचा ६१ चतस्रः ६१ कांडे सूक्त ३५ इति दशमं कांडं समाप्तः छ संपूर्णः समाप्तः संवत् १८८४ ना श्रावण मासे शुक्लपक्षे चतुर्दस्यायां १४ रविवासरे लखितं गः

संपूर्णः श्रीः. The second part ends thus: अनुवाके सूक्त ४७ ऋचा ३०९ ॥ इत्याथर्वणसंहितायां विंशतितमं कांडं समाप्तं ॥ ॥ एवं कांडे अनुवाक ९ ॥ सूक्त १४३ ऋचा ॥ ९३६ ॥ आथर्वणसंहितायां सर्वेषु कांडेषु ऋचां संख्या ॥ ६०१५ ॥ ॥ छ ॥ शुभमस्तु ॥ ॥ वासुदेवप्रसादोस्तु ॥ मरुस्थल्यंतर्गतप्रदेशविशेषयोधपुरांतर्गतसुरपुरवास्तव्यं नांदीमुखाज्ञातीय ओझाकेलासुत वोहोरागिरिधरेण ब्राह्मणेन रेवांतर्गतराजनगरवास्तव्यं रा । बाह्यनागरविसल्लगरा अथर्वण आप्पु ॥ ॥ श्रीरस्तु ॥ ॥ छ ॥ ॥ श्री ॥ ॥ छ ॥ ॥ श्री ॥ ॥ छ ॥ ॥ श्री ॥ ॥ छ ॥ ॥ श्री ॥ ॥ छ ॥ ॥ श्री ॥ ॥ The MS. bears the marks of having been thoroughly revised by Ganes' Bhaṭ Dâdâ, but not always correctly, his corrections consisting of alterations of the traditional readings so as to make them conform to Sâyaṇa's readings, he having obtained and wrongly read the commentary of that scholar on the first four Kâṇḍas of the Saṁhitâ. This MS. has been returned to its present owner Mr. Gaṇpatrâm Veṇilâl Ojhâ at Bhâvanagar.

C. This is an old MS. containing Kâṇḍas XI to XX, and belonging to the Government collection of MSS. at the Deccan College, Poona. Kâṇḍas XI to XIX are on 149 folios and Kâṇḍa XX is on 57 folios separately numbered. The whole MS., however, is in one hand, beautifully written and in perfect preservation. It is nearly 10 inches by about 4 inches and has 6 to 8 lines on each page, each line containing about 34 letters. It is very correctly written. The accents are marked not by horizontal and perpendicular strokes, but by round dots in red ink at the foot of a syllable to mark the anudâṭṭatara, and in the middle of the syllable towards the right hand side to mark the svarita. The jâtya and other true svaritas are indicated by a straight line beginning from the south-west corner of the syllable and passing on to the north-east of it, thus संतूक्ष्यः. The date of the genesis of the MS. is not given, but its appearance would show that it is between three and four hundred years old. At the end of folio 54, there are the following interpolations in a different handwriting from that of the MS. પચલી ગોવીંદજી ॥ છ ॥ ભરયત્મજ શીરરતુ ॥ છ ॥ સં. ૧૭૩૮ ના ચૈત્ર શુદ ૧૦ લ. બલરામ. શ્રી સંવત ૧૭૪૬ વરખે જેઠ શુદ ૧૨. લ. ધનેશ્વર. On the second page of folio 72 at the end of Kâṇḍa XX are scribbled the letters પચા. ગોવંદજની વીમે. On the first page of the first folio on which Kâṇḍa XX begins and which is kept blank are written the following words in careless Gujaráti and Devanâgarî characters: પંચા. ગોવંદજની પોથી છે. पंचा गावंदजनी पाथी छे. In St. 1738 and 1746 Balarâm and Dhaneśvar respectively must have used the MS. to read from, while Govindjî Pancholî must

have been the owner at some other time. Like **B** this MS. gives the anunâsika instead of the anusvâra before य, र, ल, व, श, ष, स, ह. It begins: ॐ नमः । ॐ अग्ने जायस्वादि.तिर्ना॰. It ends: इति नवमोनुवाकः । अनुवाके सूक्तानि ४७ ऋचः ३०९ ॥ इत्याथर्वणसंहितायां विंशतिमं कांडं समाप्तं ॥ ॥ शुभं भवतु ॥ ऋक्संख्या ६०१५ ॥ ग्रंथसंख्या ६६८० ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

D. This is also from the Government collection of MSS. at the Deccan College, Poona. It contains all the Kâṇḍas of the Saṁhitâ except the unlucky XVIIIth Kâṇḍa. The first seventeen Kâṇḍas are written on 442 folios; the XIXth and the XXth Kâṇḍas are contained in 40 and 77 folios respectively, each separately numbered. The whole MS. thus contains 559 leaves, 9 inches long by 4 inches broad, with six or seven lines to the page, each line containing 22 to 32 letters; the handwriting is the same throughout, but differs in size in different parts. The MS. is written correctly and does not appear to have been subsequently corrected. Some corners of the paper have been eaten away by moths, but the writing itself is in a good state of preservation. Like **B** and **C, D** writes the anunâsika instead of the anusvâra before य, र, ल, व, श, ष, स, ह; and indicates the real svarita by a diagonal line from the south-west to the north-east corner of the letter, considerably bent about the middle. The MS. has apparently been much used, and also ill-used, parts appearing to have been under water or subjected to damp; and the whole bears an appearance of being very old. But the date given at the end is only St. 1748, so that it would appear to be just two hundred years old. It should be added, however, that the concluding part in which the date occurs, appears to be in a different hand from that of the rest of the MS. If so, the date refers to the time when the man who gives his name as S'ivadeva as writer and mentions the fact that Paṇḍyâ S'rîpushîmjî Nṛisiṁha presented the MS. to Pancholî Kṛishṇadeva and his brother S'ivadeva and S'ankara, scribbled the concluding portion on the last page, and the MS. itself might be much older than St. 1748. The concluding portion is as follows: कल्याणमस्तु ॥ ॥ स्वस्ति संवत् १७४८ वर्षे पौष शुदि ५ दिने लि. शिवदेव ॥ पंड्या श्रीपुषीमजी नृंसिहे पंचोली कृष्णदेव तथा भ्रातृशिवदेव त. शंकरने शिवार्पणबुद्धे आपी ॥ ॥ शिवार्पणमस्तु ॥ ॥ श्रीरस्तु ॥ कल्याणमस्तु ॥ ॥ श्री ॥ श्री ॥ श्रीचंडिनाथनी कृपा छे ॥ ॥ श्री ॥ श्री ॥ यादृश पुस्तकं दृष्ट्वा तादृशं लिपितं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ श्री ॥ श्रीअंबाजी आरासुरीनी कृपा छे ॥ शिव । Over the top of the same page in a different hand and written with a much paler ink occurs the following, पानां ४० ते स्वर्वदत् पंचोली कृष्णराम रावरामे, which

might refer to a Kṛishṇa Râma Pancholî surnamed Sûryadatta having borrowed or read forty leaves at some unspecified time. On the first page of the first leaf of the XIXth Kâṇḍa, which is left blank occurs the following compliment to a Vaishṇava: तुलशिकाष्टधरो विप्रा स्वछिद्रं तिलंकं धृता ॥ तस्य दरशणमात्रेण ब्रंह्महत्या पदेपदे ॥१॥

E is a fragment of a very old MS. containing Kâṇḍas XI to XVII. It has also the last three and half mantras beginning with श्रद्धा चापो ब्रह्म समाहिताः (475. 11) of Kâṇḍa X. It also contains Kâṇḍa XX of which, however, the first four hymns and the first mantra of the fifth hymn and the second mantra up to सुबाहुरन्धं are wanting. It is wanting in Kâṇḍas XVIII and XIX except that it has the first two mantras and the third up to मर्त्यस्य ॥ of the former Kâṇḍa. It contained 273 folios of which the first 136 are wanting, as are also folios 199 to 235, both inclusive. It is written by one hand throughout. The udâtta is indicated by a red dot on the top of the proper syllable, the svarita by a red dot to the right hand of the syllable, and the anudâtta or the anudâttatara by a similar dot at the foot of the letter. It comes from the Deccan College Government Collection of MSS. It contains 100 folios about $9\frac{1}{2}$ inches by 4 inches with 10 lines to the page, and sometimes 11, each line having 31 to 38 letters. The date is given on the last page in the colophon and is St. 1541 or A. D. 1485. The colophon runs as follows: इति शस्त्रकांडं समाप्तं ॥ ॥ श्रीः ॥ संवत् १५४१ वर्षे भाद्रपद वदि --। सोमे ॥ अद्येह वीरमग्रामवास्तव्ये ॥ श्रीः ॥ पंचुली लक्ष्मीधरसुत ॥ पंचुली मा--नपठनार्थं पुत्रपौत्रादीनां तथा शिष्यादीनां परोपकारर्थं इदं पुस्तकं लिखितं । ॥ -- मस्तु ॥ श्रीरस्तु ॥ शुभं भवतु ॥ श्रीः ॥ लेखकपाठकयोः कल्याणं वूयात् ॥ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ यादशं पुस्तके दृष्टमिति ॥ श्रीः ॥ श्रीः ॥ --- जलाद्रक्षद्रक्षेः श्रथलवंधनात् ॥ याचिकात्सततं रक्षे एवं वदतु पुस्तिका श्रीः ॥ श्रीः पंचोलीविद्याधरने भागे तेमा कोनो अलापो नही ॥ पंचोली गणेशनी पोथी णेशनी पोथी. The edges on the right and left are crumbling away, but the MS. on the whole is in a good state of preservation, except in the case of two or three pages at the end where pieces of the paper have fallen off with portions of the writing.

K. A Vaidika of the Atharva Veda from Mâhulî; his full name is Kes'ava Bhaṭ bin Dâjî Bhaṭ. He knew the Saṁhitâ and Pada texts by heart as also the Krama of the first four Kâṇḍas. He knew the whole Saṁhitâ except the inauspicious XVIIIth Kâṇḍa. His memory of the last two anuvâkas of Kâṇḍa X was defective and his mastery of Kâṇḍa XIX was also im-

perfect. With these exceptions, his memory of the whole Saṁhitâ text was thorough. I made him recite each verse line by line and collated my text so recited with the basis of my collations. He was recommended to me by S'rîmant S'rînivâs Rao Paras'urâm Paṇḍit, the Pant Pratinidhi of Aundh, who is well-known as a pious patron of Vedic learning in the Deccan. Kes'ava Bhaṭ remained with me for about a year, assisting me in the collation of MSS. He was about fifty-five years old, very dark and tall, and one of the only four good Vaidikas of the Atharva Veda in the Deccan. Surprised as he was to see that the sacred Saṁhitâ of his Veda had already been published (he saw Roth and Whitney's beautifully printed text in my hand), he was more shocked that the several MSS. of that Veda, which were with me, exhibited numerous varieties of reading, and still more horrified when he found that the text he knew by heart and which was as it had been improved by Gaṇes' Bhaṭ Dâdâ was the worse for the improvements. His great anxiety at first was that the text I was going to publish should not show that his pâṭha was incorrect. But when he saw that the improvements made by Gaṇes' Bhaṭ Dâdâ were only one source of incorrectness and variety in reciting or reading, and that in the end in hundreds of instances the traditional text must be admitted to be quite corrupt, he resigned himself to the necessities of the situation and came to change his view of my duties as editor of a sacred text, and wished that with all materials available, as good a text as could be constructed should be obtained for the interpretation of the Veda, though he little hoped the Vaidikas would exchange their corruptions for our corrections. He was anxious to see my text published without any foot-notes in English, which he thought vulgarised the sacred text. It is very much to be regretted that Kes'ava Bhaṭ died about six years ago and saw no portion of my edition in type.

$\tilde{\mathrm{m}}$**K.** A small-sized modern MS. belonging to and used by Kes'ava Bhaṭ, written on modern green paper. It closely followed the version recited by **K**, and embodied the improvements made by Gaṇes' Bhaṭ Dâdâ. The MS. was returned to Kes'ava Bhaṭ.

R. This is a beautifully written old MS. belonging to Sundarjî Durgâ-s'ankar of Junâgadh. It contains the whole of the Saṁhitâ text, the first ten

Kâṇḍas on 240 folios, and the latter ten Kâṇḍas on 224 folios, separately numbered. The writing, however, is the same throughout, beautifully clear and perfectly well preserved. The first two Kâṇḍas as also part of Kâṇḍa XX (up to hymn 683,3) have the udâtta indicated by a red dot on the top of the letter, the svarita on the right side and the anudâttatara or anudâtta by a similar dot at the foot. The rest of the MS. has the marking of the accents in the usual way by horizontal lines at the foot, and on the right side of letters having the anudâttatara or anudâtta and svarita respectively, the udâtta being left unmarked. The original svarita is marked by a bent line from the south-west corner of the letter to the north-east throughout. The MS. is 10 by $4\frac{1}{4}$ inches with 7 lines to each page and about 30 letters to a line. It begins thus: ६० ॥ ॐनमोऽथर्वांगिरसे ॥ ॐये त्रि.पक्षाः परियंति &c. The date is given in two colophons, one at the end of Kâṇḍa X and another at the end of Kâṇḍa XX. The colophons are respectively, as follows:

दशमं कांडं समाप्तं ॥ सूक्त ३५ ॥ ऋचा ३४९ ॥ ॥ स्वस्ति श्री संवत् १६५१ वर्षे आखाढ शुक्ल द्वितीया रविवासरे । अद्य अहनलपुरपत्तनमध्यवास्तव्यं । आभ्यंत्तरनागरज्ञातियपंचुली श्रीविश्रुप । सुत पं० । वसीष्ट । सुत पं० । लहूआ । सुत पं० वासण । सुत पं० । नारायण । सुत पंचुली शिवा लिपावितं पुत्रपौत्रादिकपठनार्थं ॥ ॥ लेपकपाठकजयोस्तु ॥ अपरं पुस्तकं वीक्ष्यं । शोधनीयं सदा बुधैः ॥ हिनाधिक्यै स्वरैर्वर्णै ॥ रस्माकं दूषणं नहि ॥१॥ ओ० रुद्रलिखितं

इति विंशतिमं काण्डं समाप्तं ॥ शुभं भवतु ॥ शस्त्रकं[डं] ॥ दशमो अनुवाकः समाप्तः ॥ छ ॥ ऋ०९३६ संवत १६५२ वर्षे आषाढ वदि पडवो [श]निवासरे ओझारुद्रलिखितं । लेपकपाठकजयोस्तु ॥ कल्याणमस्तु ॥ छ ॥ अद्य अहनलपुरपत्तनमध्यवास्तव्यं । आभ्यंत्तरनागरज्ञातिपंचुलीश्रीविश्रु[प]सुत पं० । वसीष्ट । सुत पं० । लहूआ । सुत पं० । वासण । सुत पं० । नारायण । सुत पंचुली शिवा लिपावितं ॥ पुत्रपौत्रादिकपठनार्थं ॥ शुभं भवतु ॥ अपरं पुस्तकं वीक्ष्य । शोधनीयं सदा बुधैः ॥ हीनाधिक्यै स्वरैर्वर्णैः । रस्माकं दूषणं [नहि] ॥ The MS. is therefore 297 years old. S'ivâ of the family of Panchuli Vis'rupa caused it to be written by Rudra Ojhâ. It is interesting to note that this MS. was caused to be written by the ancestors of the man who wrote **B** as appears from a comparison of the colophons of the two MSS.

$\overset{m}{\mathbf{S}}$ is a MS. containing the whole Saṁhitâ except the XVIIIth Kâṇḍa which appears to have been abstracted from it. It contained 294 folios, out of which folios 216 to 232, both inclusive, containing the XVIIIth Kâṇḍa are wanting as also folio 293 containing from गूल्हे द्यावापृथिवी (753, 10) up to मर्त्येभ्यः (758,1). It belongs to one Sadâs'ankar Dhanas'ankar of Junâgaḍh. The folios are

about 10½ inches long by 4½ inches broad and have 10 lines to a page with about 36 letters to a line. The MS. is written by one hand throughout, beautiful, large, bold and correct. The edges on the right and left have considerably suffered from the ravages of time, but the lower and upper edges are in good preservation. The last two leaves that are extant (leaves 292 and 294) are torn away at the right and left ends, especially the former. With these exceptions, the writing is well preserved throughout. The accents marked are the anudâttatara or anudâtta and the svarita by horizontal and perpendicular strokes respectively as usual, the true svarita being shown by a diagonal crooked line as in **C, D, E** and **R.** The beginning is: श्रीशिवो जयतु ॥ ॐ नमो ब्रह्मवेदाय ॥ ॐ शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवंतु पी॒तये॑ । शं योर॒भि स्र॑वंतु नः ॥ १ ॥ ये त्रि-प॒ता॒ः प-रि॒यंति॒ विश्वा-रू॒पाणि॒ बिभ्र-तः। वा॒चस्पति॒र्बला॒ तेषां-त॒न्वो॒ अ॒द्य द-धातु मे ॥ २ ॥ The colophon is: इति नवमोनुवाकः ॥ अनुसूक्त १५ इति विंशतिमं कांडं । अनुवाक ९ सूक्त १४३ ॥ ऋचा ९३६ ॥ ॥ इति अथर्वणसंहिता समाप्त ॥ छ ॥ ॥ छ ॥ ९ संवत् १६ ५ वर्षे फाल्गुण ज्येष्ट वदि २ गरौ अदेह पंभातबंदरेन लपीतं ॥ छ ॥ शुभं भवतु ॥ छ । The date is thus unfortunately mutilated by the loss of the penultimate figure, and might therefore be any between St. 1605 and St. 1695 having the unit figure 5. The look of the MS. is very old and worn out. It was written at the port of Cambay.

V. This is Venkaṇ Bhaṭjî otherwise known as Venku Dâjî, the most celebrated Atharva Vaidika in the Deccan, living under the patronage of S'rîmant Dhuṇḍîrâj Tâtyâ Sâheb, Chief of Sânglî in the Southern Maratha country. He was not only an excellent reciter of the Veda, but was also an Agnihotrî of the same, and practised much of the daily ceremonial as prescribed by the Atharva-Vedins. He knew the whole of the Saṁhitâ and the Pada text by heart and a considerable portion in the form of Krama and Jaṭâ. He was a cousin of Gaṇes' Bhaṭ Dâdâ from whom he had learned his texts of the Atharva Veda. Unlike Kes'ava Bhaṭ he had a slight acquaintance with the Sanskṛit language and had all the Saṁhitâ text vividly before his mind's eye. His version contained of course the improvements made by Gaṇes' Bhaṭ Dâdâ, though in each case he knew also the older reading which he used to give as a variant. He knew besides the Gṛihyasûtra of Kaus'ika and was supposed to practise the charms prescribed therein, a reputation that doubtless made him much sought after by those who appreciated him at Sânglî. He was about sixty years old eight or nine years ago when I collated my text with him. As in the case of

Kes'ava Bhaṭ, I have to regret that he died about three or four years ago before seeing my edition in print, to which he was looking forward with great expectation. He had lost his eyesight for a time before his death.

Dc is a comparatively modern MS. containing all the twenty Kâṇḍas of the Saṁhitâ clearly written on 312 folios of thick paper differently numbered as follows: 51 leaves, the first four Kâṇḍas; 21, Kâṇḍa V; 24, Kâṇḍa VI; 71, Kâṇḍas VII, VIII, IX and X; 73, Kâṇḍas XI to XVIII; 26, Kâṇḍa XIX; 46, Kâṇḍa XX. The writing, however, is of the same hand throughout the whole MS. The leaves are $9\frac{1}{2}$ by $4\frac{1}{2}$ inches, with 9 lines to the page, there being 34 to 41 letters to a line. The first seventeen leaves have the anudâtta or anudâttatara marked by a slightly concave horizontal line and the svarita by a perpendicular stroke, the true svarita being what appears to be a combination of two signs, thus, कुन्या᳖नां विश्वरूपाणां. The MS. is subsequently carefully revised throughout and contains some of the improvements attempted by Gaṇes' Bhaṭ Dâdâ. It apparently comes from the Mâhulî school of Atharva-vedins and was obtained by me from the Deccan College collection of the Government Sanskṛit MSS. It begins as follows: ॐ श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ श्रीअथर्वणेभ्यः ॥ ॐ ये त्रिषप्ताः परियंति विश्वा रूपाणि बिभ्रतः॥ At the end of Kâṇḍa XIX occurs the following: षष्ठोनुवाकः॥ ॥ एकोनविंशतिमं कांडं समाप्तं॥ छा ॥ श्रीसंवत् १८५५ वर्षे कार्तिक शुक्ल १४ गुरुवासरे. The following is at the end of Kâṇḍa XX: इति नवमोनुवाकः॥ सूक्त ४७ ऋचा ३०९॥ इत्याथर्वणसंहितायां विंशतिमं काण्डं समाप्तं एवं कांडे अनुवाक ९ सूक्त १४३ ऋचा ९३६॥ श्री संवत् १८५५.

Cs. This is an old MS. containing 435 folios, numbered differently as follows: the first seventeen Kâṇḍas, on 346 leaves, continuously numbered; the sequel begins with a new paging. But the first 21 leaves containing Kâṇḍa XVIII are missing, except that the last nineteen verses beginning with अग्नये कव्यवाहनाय स्वधा नमः are preserved on leaf 22, at the end of which Kâṇḍa XIX begins. The paging ends by 110, so that 89 leaves of the second set are extant, making up 435 folios in all. The first set of 346 folios containing the first seventeen Kâṇḍas appears to be in one hand and the subsequent portion from leaf 22 to 110 in a different hand. The MS. appears to have been corrected in places but not much. It is a very correct MS. and comes from Gujarât. The accents are marked with horizontal and perpendicular strokes, the true svarita being

indicated by a crooked combination of the two, as in the other MSS. The MS. is $9\frac{1}{2}$ inches in length and $4\frac{1}{4}$ in breadth, and in the first set has 8 lines to the page, and between 22 and 30 letters to the line. The second part has 9 lines to the page, each line having 25 to 30 letters. It begins thus: श्रीगणेशाय नमः ॥ अथर्ववेदाय ॥ ॐ ये त्रि-पक्षाः प-रि यंति विश्वा- रूपाणि बिभ्र-तः ॥ At the end of Kâṇḍa X is the following colophon: इति दशमं कांडं समाप्तं ॥ छ ॥ श्री छ भवांनी सत्य छे ॥ श्रीमाहादेव सत्य छे ॥ श्री श्री ॥ कांड दशमु गांगेड माहे आश्वन नवरात्र माहे रांणा श्रीरामशंघनी मेडीये लषु छे ॥ ते सहि ॥ ॥ श्री ॥ शुभं भवतु ॥ श्री ॥ छ ॥ कल्याणमस्तु ॥ श्री ॥ छ ॥ ॥ श्री ॥ छ ॥ ॥ श्री ॥ श्री ॥ ॥ छ ॥ ॥ श्री ॥ ॥ छ ॥ ॥ श्री ॥ छ ॥ ॥ श्री ॥ The twentieth Kâṇḍa ends thus: इति विंशतिमं कांडं समाप्तं ॥ छ ॥ इति अथर्वणसंहितायां शस्त्रकांडे अनुवाक ॥ ९ ॥ ॥ सूक्त १४३ ॥ ऋचा ९३६ ॥ ॥ छ ॥ संवत् १७१९ वर्षे शाके १५८५ प्रवृत्तमाने ॥ मासो. The abrupt end shows that there must have been another leaf containing one or two lines more of the colophon, probably giving the name of the month, the day, and the name of the writer with perhaps the name of the person who caused the MS. to be written. The MS. belongs to the collection of Sanskṛit MSS. made in Bombay by Dr. Peterson.

S. This is Sâyaṇa's text, *viz*, as given in his commentary. It is in Nandî Nâgarî and extends to the Kâṇḍas on which his commentary has been found. It is not accented and, as will be seen in places, often differs from the text adopted by him for explanation.

LASTLY —

Rw. This is the text of Atharva Veda Saṁhitâ published by Professors R. Roth and W. D. Whitney at Berlin in 1856. I have not considered it as one of my authorities, but it was the text from which I started my collation of the Saṁhitâ except as regards Kâṇḍa XIX and the whole of the Pada text. In the former I found collation of the MSS. with the printed text well nigh impossible, because it varies very considerably indeed with the tradition of the MSS. The collation of my MSS. and other authorities was, therefore, made with a transcript which I specially caused to be made of the MS. **A** already described. **Rw** has been of great use to me, as shewing not only the result of the labours of the two illustrious scholars but as the representative of a collection of other MSS. The text as finally corrected in places in Prof. Whitney's *Index verborum* has been to me of great importance as showing what

has been achieved up to date by the labours of the two scholars in bringing to light a correct version of the Atharva Saṁhitâ.

MSS. OF THE PADA TEXT.

K. This is Kes'ava Bhaṭ bin Dâjî Bhaṭ, the Vaidika from Mâhulî, about whom particulars have already been given. He knew by heart the pada text as well as the Saṁhitâ and was made to recite the same, and all variety of reading was carefully noted down.

P. This is a MS. containing the whole of the pada text. Kâṇḍa XVIII is not accented, as also the last seven leaves containing hymns 743 to 752 and hymns 753 to 759 at the end of Kâṇḍa XX, except the first five mantras of hymn 743. It contains 346 folios numbered consecutively from the first Kâṇḍa. It is 11 inches long by $5\frac{1}{4}$ inches broad, and is written by one hand throughout. It begins thus: ॥ ॐ ॥ नमः श्रीगणेशाय ॥ श्रीसरस्वत्यैभ्यो नमः ॥ अथर्ववेदसहिंतायां पद लखिते ॥ ये । त्रि ० सप्ताः । परि ० यंति–। विश्वा–। रूपाणि–। बिभ्र-तः ॥ It ends as follows: सूक्त १४३ ॥ छ ॥ अनुवाक ९ ॥ इति विंशतिमं कांडं समाप्तं ॥ ॥ श्रीरस्तु कल्याणमस्तु ॥ ॥ इति अथर्ववेदे सहिंतायां पद समाप्तं ॥ छ ॥ शुभंवतु ॥ कल्याणमस्तु ॥ ॥ छ ॥ * ॥ स्वस्ति श्री संवत १७२० वर्षे ज्येष्टमासे कृष्णपक्षे सप्तम्यां तिथो रविवासरे ॥ इदं पूस्तकं सहिंतायां पद संपूर्णं समाप्तमं ॥ श्री ॥ श्री ॥ श्री ॥ ॥ छ ॥ ॥ छ ॥ अद्य श्री गूर्ज्जरखंडे उत्तरविभागे अणहिलपुरपतनवास्तव्यं आभ्यंत्तर नागरं ज्ञाति पंचोली श्री विश्नुपसुत पंचोलि वसीष्टसुत पंचो० । लहूआसुत पंचो० । वासणसुत पंचोली श्री नारायण सुत पंचोली वच्यांसुत पंचोली वाछा सुत भवांनीदास पठनार्थे सहिंत्तायां पद लखिते ॥ श्री ॥ शुभं भवतु ॥ कल्याणमस्तु ॥ छ ॥ छ ॥ छ ॥. Each page contains 11 lines with 25 to 32 letters to the line. The anudâtta or anudâttatara is marked by a horizontal red line below the letter, and the svarita by a similar line half way to the right of the letter, the true svarita being shown as usual by a crooked combination of the horizontal and perpendicular lines. The sign of avagraha is not shown as in the *Ṛigveda* MSS. in the form of the letter *s*, but by a hollow cipher between the words separated, thus: अभि ० वर्त्तेन–। The Visarga always consists of two hollow ciphers thus: वाचः । and the anusvâra standing for a nasal is also generally expressed by a hollow cipher thus: इंद्र ॥ हिंसीत् । The anusvâra proper is sometimes changed into an anunâsika thus: मा॰सानि–। अँह-सः ॥. Excepting the first leaf where on the left hand lower corner a few letters have dropped off with the paper, the rest of the MS. is in good preservation. The

MS. belongs to the Government collection of Sanskṛit MSS. in the Deccan College at Poona, acquired in 1881 and is marked No. 82.

$\dot{P}$. This also contains the Pada text of all the Kâṇḍas. The whole text is accented except Kâṇḍa XVIII. The MS. begins thus: ॥ ऍनमः ॥ ॐ नमो-श्रीगणेशायः ॥ ॐ नमोऽथर्ववेदायः ॥ ॐ य । त्रि ० सप्ताः । परि ० यंति-॥ विश्वा-। रूपाणि-। बिभ्र-तः ॥ It ends thus: इति नवमोनुवाकः ॥ अनुसूक्त ४७ ॥ इति विंशतिमं कांडं समाप्तं ॥ अनुवाक ९ सूक्त ॥ १४३ ॥ ऋचा ९३६ ॥ संवत् कुवेदसेंदु । श्रावणे शुक्लपक्षके । तृतीया मंदवारे हि । लेखिता पत्तने पुरे ॥१॥ संवत् १७४१ वर्षे शाके १६०६ प्रथमश्रावणशुदि ३ शनिवारेमिदं पुस्तकं लिखितं ॥ शुभं भवतु ॥ इति मंगलं भवति ॥ It is written throughout by one hand and generally is very correct. The visarga and the sign of avagraha consist of two hollow ciphers and one hollow cipher respectively, but the anusvâra is generally turned into anunâsika, except where it stands for a nasal consonant, in which case the ordinary sign of anusvâra is retained as जायंते. The accent is shown by horizontal lines, the anudâtta or anudâttatara below the letter and the svarita to the north-east corner of the letter, the true svarita being indicated by a crooked combination of the two. Though more modern than **P** it wears the appearance of being older, probably owing to the nature of the paper. The corners of the page have already begun to crumble, the materials being more brittle. The whole of the writing is thoroughly well-preserved. The MS. comes from the Government collection of Sanskṛit MSS. at the Deccan College, Poona. It contains 435 leaves, about $9\frac{1}{4}$ inches long by $4\frac{1}{4}$ inches broad, each page containing 8 lines with about 32 letters to the line.

J. This MS. belongs to a Vaidika named Sundarjî Durgâs'ankar of Junâgaḍh. It contains all the Kâṇḍas except Kâṇḍa XVIII. It consists of 480 folios in all, Kâṇḍas I to XVII containing 367; Kâṇḍa XIX, 31; and Kâṇḍa XX, 82; the three sets being separately numbered. The MS. is $9\frac{1}{2}$ inches in length and nearly $4\frac{1}{2}$ inches in breadth, there being 8 lines to the page in the first seventeen Kâṇḍas, 8 to 10 in Kâṇḍa XIX, and 7 in Kâṇḍa XX, with 24 to 28 letters to the line. It is accented throughout with the exception of Sûktas 743 to 752, the Kuntâpa Sûktas, which are not accented. The anudâtta or anudâttatara is indicated by a red horizontal line below the letter, the svarita by a similar line half way to the right of the letter, the true svarita being shown by a crooked combination of the horizontal and the perpendicular strokes.

The visarga is indicated by two hollow ciphers and the sign of avagraha by one hollow cipher. The Anusvâra proper is generally shown as anunâsika and the sign of the anusvâra does duty for the nasal consonants. Though the XIXth Kâṇḍa was written at Âgrâ, the first seventeen and the XXth Kâṇḍas were written at Anhilpur, and the whole is a Gujarâtî MS. It is very correct on the whole, carefully revised, and in a good state of preservation. At the end of Kâṇḍa XVII on leaf 367, occurs the following colophon: कांडे सूक्त ३ ॥ ऋचा ३० ॥ इत्येतत्समनुक्रांतमृचत्रिंशद्विपासहिः ॥ इति श्रीअथर्ववेदे सहितायां पदस्य ॥ सप्तदशमं कांडं समाप्तः ॥ छ ॥ श्रीरस्तु ॥ कल्यांणमस्तु ॥ स्वस्ति संवत १७०६ वर्षे ज्येष्ठ शुद ३ गुरुवासरे श्रीअणहिलपुरपत्तने वास्तव्यं वृद्धनागरन्यातीयपंचोलीन्यांन्यासुत सोमजी भ्रात वामणचिंतांमण अनंतजी पठनार्थं ॥ लिपितं वांमण ॥ श्रीरस्तु ॥ कल्याणमस्तु ॥ शुभं भवतु ॥ श्री छ ॥ श्री ॥ छ ॥ श्री ॥ मंगलं लेपकानां च पाठकानां च मंगलं ॥ मंगलं सर्वलोकानां भूमिभूपतिमंगलं ॥ १ ॥ श्री ॥ पंचोलीन्यान्यात्मजगोविंदजी वांमणकेन पद संहितायां सूरदत्तापथीपाटन । सहस्राणि तु चत्वारि तथैवोष्टशतानि च ॥ श्लोकाश्चस्वप्त पंचाशत् सप्तदशभिश्च संख्यया १७ मूल सहिता कांड १७ नी संखा छे.

अनंतजीने भाग्य छे.

Kâṇḍa XIX ends thus: सप्तमोनुवाकः ॥ छ ॥ अनुवाके सूक्त ॥ १८ ॥ ऋचा ५५ ॥ एकोनविंशमं कांडं समाप्तः ॥ एवं कांडे अनुवाक ७ ॥ ऋचा ४५७ ॥ शुभं भवतु ॥ कल्याणमस्तु ॥ संवत १७०२ वर्षे ज्येष्ठ वदे ४ शनिदिने आगरामध्ये पोथी ल्यपी छे ॥ ल्यपितं वांमण ॥ शुभं भवतु ॥ कल्याणमस्तु ॥ श्रीरस्तु ॥ श्री छ ॥ छ ॥ श्री छ ॥ पंचोलीन्यांन्यापुत्र सोमजीवांमणसमस्तभ्रातपठनार्थं ॥ मंगलमस्तु ॥ कल्याणमस्तु ॥ मंगलं लेपकानां च पाठकानां च मंगलं ॥ मंगलं सर्वलोकानां भूमिभूपतिमंगलं ॥ १ ॥

वांमणे स्वर दीधा छे ॥ श्रीरस्तु ॥ कल्यांणमस्तु । शुभं भवतु ॥ श्रीः ॥

अनंतजीने भाग्य छे.

And Kâṇḍa XX ends thus: इति नवमोनुवाकः ॥ अनुवाके सूक्त ॥ ४७ ॥ ऋचा ३०९ ॥ इत्यथर्वणसंहितायां विंशतिमं कांडं समाप्तः ॥ एवं कांडे अनुवाके ९ ॥ सूक्त ॥ १४३ ॥ छ ॥ एवं सर्वेषु कांडेषु ऋचा सख्या ६०१५ ॥ श्री ॥ छ ॥ संवत १७०२ वर्षे आश्वनमासे शुक्लपक्षे ३ गुरुवारेण लिखितं इदं पुस्तकं ॥ ल्याखितं वांमण ॥ श्री ॥ छ ॥ कल्यांणमस्तु ॥ शुभं भवतु ॥ श्रीरस्तु ॥ पंचोलीन्यांन्या सोमजी वांमण भ्रात चिंतामण समस्तभ्रातपठनार्थं ॥ श्री छ ॥ मंगलं लेखकानां च पाठकानां च मंगलं ॥ मंगलं सर्वलोकानां भूमिभूपतिमंगलं ॥ १ ॥ श्रीईश्वरी महान छे ॥ श्रीगणेशाएनमः श्री मातरजी सत्य छे ॥ श्रीरस्तुः अनंतजीने भाग्य छे श्रीमातर सत्य छे ॥ छ ॥

Cp. This MS. belongs to the Government collection of Sanskṛit MSS. made by Dr. Peterson in Bombay, and contains the Pada text of all the Kâṇḍas, the leaves being differently numbered as follows: the first ten Kâṇḍas on 197 leaves consecutively numbered from 1 to 197; Kâṇḍas XI to XVIII on 113 from 1 to 113; and Kâṇḍas XIX and XX on 89 leaves from 349 to 437, and written in a different hand from the rest of the MS. It may be inferred that Kâṇḍas XIX and XX formed part of some other MS. That the portion

forming Kâṇḍas XIX and XX did not form originally a part of this MS. is further probable from this that after leaf 113, where Kâṇḍa XVIII ends, the MS. goes on up to leaf 137, but not with the XIXth Kâṇḍa, but with Kâṇḍa XX of which it contains up to अस्मान् । वृणीष्व । युज्याय । तस्मै, Sûkta 37, 9, all without accents, and then it drops off. The conclusion is that the writer did not mean to copy Kâṇḍa XIX, but that after Kâṇḍa XVIII began Kâṇḍa XX which, however, was not finished; and that therefore Kâṇḍas XIX and XX were taken from some other MS. and added on to the first XVIII Kâṇḍas. **Cp** thus consists of 399 folios, disregarding those 114 to 137 or 24 leaves containing the fragment of Kâṇḍa XX. It is $9\frac{1}{2}$ inches long by nearly $4\frac{1}{2}$ inches broad in the case of the first eighteen Kâṇḍas, and 10 by $4\frac{3}{4}$ inches in the case of the last two Kâṇḍas, there being 9 to 12 lines to the page and 25 to 31 letters to the line in the first eighteen Kâṇḍas and 8 lines to the page and 29 to 32 letters to the line in Kâṇḍas XIX and XX. The MS. is accented throughout except Kâṇḍa XIX and the Kuntâpa Sûktas, (Sûktas 743 to 752, both inclusive) of Kâṇḍa XX, which are not accented. The anudâtta or anudâttatara is indicated by a red horizontal line below the letter, and the svarita by a perpendicular line on the head of the letter, the true svarita being indicated by a crooked combination of the two. The Visarga is expressed by two hollow ciphers and the sign of avagraha by one hollow cipher, the true anusvâra being generally turned into an anunâsika. Kâṇḍa X ends thus: इति दशमं कांडं ॥ शुभं भवतु ॥ श्रीदक्षिणामूर्त्तये नमः ॥ श्रीरस्तु Kâṇḍa XVIII ends thus: अनुवाके । सूक्त १ ऋचा ८९ ॥ एकोननवतिश्चैव यमेषु विहिता ऋचः ॥ चतुर्थोनुवाकः ॥ अष्टादशमं कांडं समाप्तम् ॥ ॐ ॥ श्रीदक्षिणामूर्त्तये नमः ॥ श्रीगुरुभ्यो नमः । राउल श्रीसोमेश्वरचरणकमलेभ्यो नमः । वीरेश्वरस्य तथा ॥ Kâṇḍa XX ends as follows: नवमोनुवाकः ॥ इति श्रीशस्त्रकांडाभिधानं नाम विंशतिमं कांडं समाप्तं ॥ संवत् १७६६ वर्षे ज्येष्टवदि ७ बुद्धे समाप्तं ॥ स्तंभतीर्थवासी उदीच्यटलकीआभट्टवकात्मजआत्मारामेण लिखितं ॥ ॥ छ ॥ शिवप्रसन्नोऽस्तु लेखकपाठवयोः पार्वतीयुतः ॥ ॥ छ ॥ ॥ शुभं ॥ As compared with Kâṇḍas XIX and XX, the first eighteen Kâṇḍas look much older and must be at least 250 years old. On the whole the MS. is correctly written, though not always.

V. Venkaṇ Bhaṭ Dâjî of Mâhulî has already been mentioned as one of the referees used for the Saṁhitâ text. He knew the Pada text also exceedingly well. I did not compare the whole of my Pada text with him, but consulted him in places where difference of reading had already been noticed.

Besides the authorities above set forth, I have occasionally consulted Hirâlâl Parikshita of Karnâḷî near Baroda, who told me that he had a MS. of the Pada text, at the beginning of the XIXth Kâṇḍa of which there is a remark made by his ninth ancestor Nâgjî, who lived more than two hundred years ago, to the effect that he accented the Padas of that Kâṇḍa after seeing the Svara-S'âstra. I also consulted Jais'ankar (Js.) Bhaṭ of Lûnâvâdâ an old Vaidika who came with Bâpujî; also Jasbhâi Janamejaya of Karnâḷî, a relation of Hirâlâl already mentioned. It may be noted here that among Gujarâti Atharva-Vaidikas, Jasbhâi Janamejaya and Hirâlâl Parikshita are by far the best.

The collation with the Pada MSS. and other authorities was made with a transcript of the MS. P, which was the first of the Pada MSS. that came to my hand, though not the best of the group to which it belongs.

The order in which the several collations were made is as follows: **Bp** or Bâpujî, and **B** his MS. These were followed by **K** the Vaidika from Mâhulî and $\overset{m}{\mathbf{K}}$ his MS. Then came $\overset{h}{\mathbf{B}}$, the MS. from Bhâvnagar. This was followed by **A** the MS. from Ahmedâbâd. After **A**, were collated **C, D, E, R** and $\overset{m}{\mathbf{S}}$. Then came **V,** the Mâhulî Vaidika from Sânglî. **Dc** and **Cs** followed. The Pada text of **J** and $\overset{2}{\mathbf{P}}$ was collated with that of **P** together, and **Cp** was taken last. Sâyaṇa's text was not regularly collated like that of the other MSS., but was compared in the course of the preparation of the copy for the press of his commentary.

Looking to the nature of the several MSS. I group them as follows: **A, B, C, D, E, R,** $\overset{m}{\mathbf{S}}$, **Cs, P,** $\overset{2}{\mathbf{P}}$, **J,** and **Cp,** come from Gujarât, though not from the same original source. They are untainted by any attempts to revise the tradition of the text, and probably represent the original form of the true tradition of the text. **Bp,** $\overset{h}{\mathbf{B}}$, **K,** $\overset{m}{\mathbf{K}}$, **V,** and **Dc,** are on the other hand representatives of the tradition of the Atharva-Veda as it was revised in the Deccan; where it was introduced about 160 years ago, under the influences of the school of the Ṛigvedins and was further subjected to changes in relation to the text of Sâyaṇâchârya by Ganes' Bhaṭ Dâdâ after his visit to S'ṛingerî, and his discovery there of part of Sâyaṇa's Commentary. The third group consists of Sâyaṇa's text as found in the MSS. of his commentary. This text shows considerable variety of

reading from that which prevails in Gujarât and in the Deccan. It will be more convenient to speak of it on a future occasion when we come to refer to the commentary of Sâyaṇa, where my reasons for considering the text as the representative of a separate group will be set forth in detail.

The text given in this edition is chiefly that of the first group except where sufficient authority existed for deviating from the Gujarât tradition, in which cases my authorities for the deviation and the reasons for following them are set forth in foot-notes. Except in the 19th Kâṇḍa, the traditional readings of the MSS. and Vaidikas, have been generally followed, Sâyaṇa's reading being rarely adopted. In cases where preference is given to the readings of Sâyaṇa over the readings of the MSS. the fact is shown by an asterisk placed on the word or letter which exhibits the reading adopted from Sâyaṇa. In the XIXth Kâṇḍa of which I propose to write more at length further on, the tradition preserved by the MSS. appeared imperfect, and preference had often to be given to the reading explained by the commentator.

The orthography followed is of course essentially the same as that found in the MSS., except where preference had to be given to the universal application of obvious grammatical rules often violated by the MSS. In such cases the careless though well-known ways of writing found in MSS. were neglected in favour of those which are more correct and which are generally adopted by accurate scholarship: for example, the writing of a nasal consonant in a conjunct instead of representing it by the anusvâra on the foregoing vowel, as इन्द्र for इंद्र; च्छ for छ; दत्त्वा for दत्वा; भिन्द्धि for भिन्धि; चिद्वेषः for चिद्वेषः; बद्ध्वेव for बध्वेव; अस्थाद्यौः for अस्थाद्यौः; धरद्ध्वम् for धरध्वम्; मज्ज्ञः for मज्ञः; मज्ज्ञा for मज्ञा; मृज्महे for मृग्महे; तद्यामेति for तद्यामेति; यद्यावः for यद्यावः; इदमुच्छ्रेयो for इदमुच्छ्रेयो; जगच्छन्दः for जगछन्दः; बृहच्छन्दः for बृहछन्दः; समृज्ध्या for समृध्या; शिङ्क्ते for शिङ्क्ते; पङ्क्ति for पङ्क्ति; अङ्क्ति for अङ्क्ति; भङ्क्ति for भङ्क्ति.

Another point to which it is necessary to refer is the division of chapters or adhyâyas into Sûktas. I have had to adopt a division and therefore a numbering of the hymns and verses in the VIIth, VIIIth, IXth, XIth, XIIth, XIIIth, XVth and XVIth Kâṇḍas, which results in a slight difference from the division and numbering adopted by Professors Roth and Whitney. This is to be regretted, as the numbering and division of these scholars have been adopted

in the *St. Petersburg Dictionary*, and the *Index Verborum* of Prof. Whitney, and is also the one which has naturally been in use since the publication of their text. I at first much hesitated to deviate from their enumeration as the deviation was calculated to introduce an element of uncertainty in reference, and it was not lightly that I determined upon the deviation after all. The authority of the *Sarvânukramaṇikâ*, which is supreme in such matters as also that of other authorities left no choice. It may be further added that wherever Sâyaṇa's commentary was available, Sâyaṇa too countenanced the deviation from the enumeration of Professors Roth and Whitney.

After consulting therefore the MSS., the *Sarvânukramaṇikâ*, the *Pañchapaṭalikâ*, and the commentary of Sâyaṇa wherever available, I adopted the deviation referred to, as in each case authorised by them all or by some of them.

Thus the seventh Kâṇḍa is divided by me into one hundred and twenty three instead of one hundred and eighteen Sûktas, as in Professors Roth and Whitney's edition. The increase of five Sûktas occurs as follows. The sixth Sûkta in **Rw**'s edition becomes Nos. 6 and 7 with us on the authority of the *Sarvânukramaṇikâ*, which says पञ्चमं पञ्चर्चम्। आत्मदेवताकम्। षष्ठं ब्रूचम्। तथापरम्॥ 5 Paṭala, 1 Kaṇḍikâ. Sûkta 45 in **Rw**'s edition becomes two Sûktas with us, 46 and 47 on the authority of the *Sarvânukramaṇikâ:* जनाद् विश्वजनीनादिति भैषज्यम्। आनुष्टुभम्। * * * अग्नेरिवास्येति मन्त्रोक्तदेवत्यम्। * * * सिनीवालि पृथुष्टुक इति तृचम्। अथर्वा। मन्त्रोक्तदेवत्यम्। आनुष्टुभम्॥ 5, 5. Sûktas 54 and 55 in **Rw** consist of two Ṛiks and one Ṛik respectively. We make them of one and two respectively by *Sarvânukramaṇikâ:* ऋचं साम यजामह इत्यृक्। सामदेवत्यम्। आनुष्टुभम्। ऋचं साम यदिति भृगुः। ब्रूचम्। ऐन्द्रम्। आनुष्टुभम्। द्वितीया विराट्परोष्णिक्। तिरश्चिराजेरिति सूक्तम् अष्टर्चम्। अथर्वा। मन्त्रोक्तवृश्चिकदेवताकम्। आनुष्टुभम्॥ 5, 7. Sûkta 68 in **Rw** consists of three Ṛiks. We divide it into two Sûktas, 70 and 71, by the *Sarvânukramaṇikâ:* सरस्वति व्रतेष्विति ब्रूचम्। शिवा न इति सारस्वते उभे। शं न इति सुखदेवताकं शंतातिः। पूर्वस्य पूर्वानुष्टुप् परा त्रिष्टुप्। शिवा न इति गायत्री। शं नो वात इति पथ्यापङ्क्तिः। यत्किंचासाविति पञ्चर्चम्। अथर्वा। मन्त्रोक्तदेवत्यम्॥ 5, 9. Sûkta 72 in **Rw** consists of three Ṛiks. We make two Sûktas out of it, 75 and 76, by the *Sarvânukramaṇikâ:* उत्तिष्ठतेत्यैन्द्रम्। ब्रूचम्। प्रथमानुष्टुप्। द्वितीया त्रिष्टुप्। श्रातं मन्य इत्यैन्द्रम्। त्रैष्टुभम्। समिद्धो अग्निर्वृषणेत्येकादशर्चम्॥ 5, 9. Sûkta 76 in **Rw** consists of six Ṛiks, which we make into two Sûktas, 80 and 81, as the *Sarvânukramaṇikâ* says: आ सुस्रस इति चतुर्ऋचम्। अथर्वा। अपचिद्वैपज्यदेवत्यम्। आनुष्टुभम्।

आद्या विराट् । * * * विश्व वा इति द्यृचम् । जायान्यः । ऐन्द्रदेवतम् । त्रैष्टुभम् । सांतपना इदमिति तृचम् । अङ्गिराः । मन्त्रोक्तमरुद्देवताकम् ॥ 5, 10. None of the MSS. exhibit the division into the smaller Sûktas whether 118 or, 123. They divide the whole Kâṇḍa into 28 larger Sûktas and 10 anuvâkas, though some of them add words at the end of each Anuvâka to show how many sub-Sûktas it contains, and that these sub-Sûktas make up a total of 118. But the MSS. do not show how the number of Sûktas given at the end of each anuvâka is made up. Sâyaṇa adopts the division into 28 Sûktas, not that into the smaller Sûktas. The *Pañchapaṭalikâ* mentions the number of Ṛiks in the several Anuvâkas of which the seventh Kâṇḍa consists, thus:

अष्टावाद्ये (२८) द्वे द्वितीये तु कुर्याद् (२२)
अष्टौ तिस्रश्चाथ वोध्यास्तृतीये (३१) ।
द्वौ पञ्चर्चौ संनिविष्टौ चतुर्थे (३०)
पञ्चैवोर्ध्वं विंशतेः पञ्चमे (२५) स्युः ॥
द्विरेकविंशतिः षष्टस् (४२) त्रिंशदेका च सप्तमः (३१) ।
चतुर्विंशैकविंशद्भ्यां *(sic)* (२४,२१) परो द्वात्रिंश (३२) उच्यते ॥

It is necessary to state, however, that the *Pañchapaṭalikâ* in another part (2) states ऋक्सूक्ता एकर्चेषु, *i. e.* the anuvâkas in the seventh Kâṇḍa consist of Sûktas made of one Ṛik each. Lower down specifying the exceptions to this general feature of the Kâṇḍa it goes on: एकर्चेषु प्रथमचतुर्थौ त्रयोदशसूक्तौ । द्वितीयाष्टमौ नव । तृतीयान्त्यौ षोडश । पञ्चमसप्तमावष्टौ । षष्ठश्चतुर्दश । नवमो द्वादश ॥ It further enumerates the Sûktas which contain more than one Ṛik each as follows: धीती वा ये । यथा सूर्यः । प्र नभस्व । अयं सहस्रम् । ययोरोजसा । अग्नाविष्णू महि । यस्य व्रतम् । अतिधन्वानि इति द्वे । जनाद्विश्वजनीनात् । कुहूं देवीम् इति त्रीणि । संज्ञानं नः । ऋचं साम । यदाशसा इति द्वे । यदग्ने तपसा । इदं यत् कृष्णः । प्रजावती । वि ते मुञ्चामि । यो नस्तायत् । शुम्भनी इति त्रीणि । नमो रूराय । इति द्यृचानि एकर्चेषु ॥ प्रान्यात् । सिनीवालि । प्रतीचीनफलः । सरस्वति व्रतेषु । उत्तिष्ठताव । सांतपनाः । अनाधृष्यः । अपि वृश्च । उदस्य श्यावौ । अग्न इन्द्रश्च । इति तृचानि ॥ अदितिर्द्यौः । प्रपथे पथाम् । सभा च मा । अभि त्यं देवम् । धाता दधातु नः । यत्ते देवा अकृण्वन् । पूर्णा पश्चादित्यत्रैकर्चम् प्राजापत्यम् । अप्सु ते राजन् । अपो दिव्याः । प्र पतेतः । इति चतुर्ऋचानि ॥ यज्ञेन यज्ञम् । इदं खनामि । यत्किंचासौ । इति पञ्चर्चानि ॥ अन्वद्य नः । पूर्वापरम् । अभ्यर्चत । इति षडर्चानि ॥ अमुत्र भूयात् । ऊर्जं बिभ्रत् । इदमुग्राय । इति सप्तर्चानि ॥ विष्णोर्नु कम् । तिरश्चिराजेः । यदद्य त्वा । इत्यष्टर्चानि ॥ यथा वृक्षम् । इति नवर्चं सूक्तम् ॥ समिद्धो अग्निर्वृषणा इत्येकादशर्चं घर्मसूक्तम् ॥ अपचितामितब्द (मिति द्वे अ ?) र्थसूक्तानि चत्वारि अपचित्तेषजम् । ईर्ष्यापनयनम् । व्रतोपायनम् । गोष्टव्रजीयं च ॥

If the omission of आ सुस्रसः (80) is accidental, the above supports the numbering adopted by Professors Roth and Whitney. But the *Sarvânukrama-*

ṇikā, as has already been shown, is clear and more exhaustive in its analysis We have therefore followed it in preference to the other authorities.

The second variation which should be explained is that of what are called the Paryâyas at the end of the 8th Kâṇḍa. Professors Roth and Whitney have reckoned the six Paryâyas as forming one Sûkta and numbered the sub-divisions of each Paryâya not separately but consecutively. I have numbered the six Paryâyas as so many different Sûktas and subdivided each into its own Avasânas or Vachanas separately and also differently in some places from the subdivision adopted by those scholars. My authority is derived from the *Sarvânukramaṇikâ* as also from the *Pañchapaṭalikâ*. The former says: विराड् वा इति पड् पर्याया विराड्देवत्यास्तत्राद्यं त्रयोदशकम् । प्रथमा त्रिपदार्चीपङ्क्तिः । सोदक्रामदिति पड् याजुषीजगत्यः । गृहमेधी यन्त्यस्य सभामिति साम्न्यनुष्टुभौ । यन्त्यस्य देवा आर्च्यनुष्टुप् । यज्ञतों यन्त्यस्यामत्रणं विराड्गायत्र्यौ । यन्त्यस्य समितिं साम्नीबृहती ॥ सान्तरिक्ष इति दशकम् । आद्या त्रिपदो (दौ?)पधीरेवास्मा इति साम्न्यनुष्टुभौ । तां देवमनुष्या उष्णिग्गर्भा चतुष्पदोपरिष्टाद्विराड्बृहती । तामुपेत्येकपदा याजुषीगायत्री । ऊर्ज एह्येकपदा । ओषधीरेवेति साम्नां पङ्क्तिः । तस्या इन्द्रो [विरा]ड्गायत्री । बृहच्च रथंतरं चार्च्यनुष्टुप् । अपो वामदेव्येनासुरीगायत्री । अपो वामदेव्यं साम्नां बृहती ॥ सा वनस्पतीनित्यष्टौ । प्रथमा चतुष्पदा विराडनुष्टुप् । तस्माद्वनस्पतीनामार्चीत्रिष्टुप् । सा पितृनिति तिस्रश्चतुष्पादः प्राजापत्यापङ्क्तयः । तस्मात्पितृभ्यो देवेभ्यो मनुष्येभ्य इति तिस्र आर्चीबृहत्यः ॥ सासुरानिति द्वे षोडशके । तत्राद्या सा पितॄन् सा देवान् सा सर्पानिति चतुष्पादः साम्नां जगत्यः । तस्या विरोचनो यमो मनुः कुवेरस्तक्षक इति साम्नां बृहत्यः । तां देवो द्विमूर्धेति साम्न्युष्णिहौ । तां मायां स्वधामूर्जां तद्विषमित्यार्च्यनुष्टुभः । अन्तक आसुरीगायत्री । सा मनुष्यान् सा [स]सर्पान् सेतरजनानिति चतुष्पाद उष्णिहः । तां पृथी प्राजापत्यानुष्टुप् । ते कृपिं तद्ब्रह्म तं पुण्यमित्यार्चीत्रिष्टुभः । तस्याः सोम इन्द्र इति साम्न्युष्णिहौ । तां बृहस्पतिवसुरुची रजतनाभिरिति विराड्गायत्र्यः । सा गन्धर्वाप्सरस इति चतुष्पदा प्राजापत्याजगती । तस्याश्चित्ररथः साम्नां त्रिष्टुप् । तां तिरोधां त्रिपदा ब्राह्मीभुरिग्गायत्री । तां धृतराष्ट्रः साम्न्यनुष्टुप् ॥ तद्यस्मा इति चतुष्कम् * * * ॥ 6. 8. The *Pañchapaṭalikâ* says:

त्रयोदश दशाष्टौ च ततः षोडश षोडश ।
विराड्वायां चतुष्कस्तु षट् पर्यायास्तु निश्चिताः ॥

The MSS. vary in their numbering and sub-division and Professors Roth and Whitney appear to have followed some of their MSS. in the figures adopted by them.

The third variation refers to the six or rather seven Paryâyas in the 9th Kâṇḍa. My authority for deviating from Professors Roth and Whitney's numbering and subdivision is again derived from the *Sarvânukramaṇikā* and the *Pañchapaṭalikâ*. The former has: यो विद्यादिति षड् पर्याया ब्रह्मातिथ्या उत विद्यादेवत्यास्तत्र यो विद्यादित्याद्यं दश सप्त । * * * । यजमानब्राह्मणं वा इति त्रयोदश । * * * । इष्टं च वा इति नवकम् ।

* * *। स य एवम् तस्या उपा इति द्वौ दशकौ। पूर्वस्याद्याश्चतस्रः स[य] एवमिति शब्दरूपाः प्राजापत्यानुष्टुभः। स [य] एवं विद्वानुदकमिति भुरिक्। यावदग्निष्टोमेनेति चतस्रो यावच्छब्दरूपास्त्रिपादो गायत्र्यः। प्रजानां प्रजननायेति चतुष्पात्प्रस्तारपङ्क्तिः॥ उत्तरस्याद्या साम्न्युष्णिक्। बृहस्पतिरूर्जयेति पुरउष्णिक्। निधनं भूत्याः साम्नां भुरिग्बृहती। तस्या उद्यन्नभ्र उप हरति साम्नामनुष्टुभः। मध्यंदिनस्त्रिपदा निचृद्विपमा नाम गायत्री। विद्योतमानस्त्रिपदा विराड्विपमा नाम गायत्री। अतिथीन् प्रति त्रिपाद् विराडनुष्टुप्॥ यत्क्षत्तारमिति चतुर्दशकम्। * * *॥ प्रजापतिश्चैकः षड्विंशो गव्यः * * * ॥ 6. 17. The *Pañchapatalikâ* says: यो विद्यायाम्।

दश सप्त च पूर्वः स्याद् द्वितीयः स्यात् त्रयोदश।

तृतीयो नवको दृष्टस्तस्माद् द्वौ दशकौ परौ॥

षष्ठं तु चतुर्दशकमाहुः षड्विंशो ब्राह्मणोगवः॥

It has to be noted that the verse which begins with निधनं भूत्याः and which is mentioned only once in the above quotation from *Sarvânukramaṇikâ* occurs twice in the text; once after बृहस्पतिरू० and again after उपहरति०; these two, with the eight other verses, make up the ten of the second Das'aka. It has to be borne in mind that in *Sarvânukramaṇikâ* recurring passages are mentioned only once; and that if the exact numbers given in the quotations are to be seen a reference should be made to the passages in the text.

The fourth variation to be explained is with reference to the three Paryâyas at the beginning of the 2nd anuvâka of the 11th Kâṇḍa. Professors Roth and Whitney consider the three Paryâyas as equivalent to one hymn, and have numbered the hymns of the XIth Kâṇḍa accordingly, and also subdivided the 2nd Paryâya into 18 Avasânas numbered consecutively with 31 of the previous Paryâya instead of into 72 as it ought to be and as we should have done had we not inadvertently followed Sâyaṇa's subdivision into 18 Daṇḍakas. The *Sarvânukramaṇikâ* has: तस्यौदनस्येति त्रयः पर्यायाः। तत्र पूर्वम् एकत्रिंशत्। बार्हस्पत्यौदनदेवत्याः। * * * ततश्चैनमिति द्वासप्ततिर्मन्त्रोक्तदेवत्याः। प्रथमा सर्वाङ्ग एवैनमन्यैः प्राणापानैरन्येनोरसेति च साम्नीत्रिष्टुभः। ज्येष्ठतस्तं वा अहं ताभ्यामेनं मुखतस्त उदर एकपदासुरीगायत्र्यः। बृहस्पतिना समुद्रेणेति दैवीजगत्यौ। तेनैनं तयैनं तैरेनं प्राणापानास्त्वोरू ते बहुचायेंकपदा आसुर्यनुष्टुभः। एष वा ओदन इति साम्न्यनुष्टुप्। एनमन्याभ्यां श्रोत्राभ्यामित्यादितः सप्तदशार्च्यनुष्टुभः। तत्र-एनमन्यैर्दन्तैरिति साम्नीपङ्क्तिः। बधिरो भविष्यसि जिह्वा ते विद्युत्त्वा सर्पस्त्वा ब्राह्मणं हनिष्यसीत्यासुरीजगत्यः। अन्धो भविष्यसि दन्तास्ते कृष्या न रात्स्यस्यप्सु मरिष्यसि स्वामो भविष्यसीत्यासुरीपङ्क्त्यः। सूर्याचन्द्रमसाभ्यामासुरीत्रिष्टुप्। ब्रह्मणा मुखेनाश्विनोः पादाभ्यामृतस्य हस्ताभ्यामिति याजुषीगायत्र्यः। अग्नेर्जिह्वया ऋतुभिर्दन्तैर्दिवा पृष्टेनेति दैवीपङ्क्त्यः। सप्तर्षिभिः प्राणापानैरन्तरिक्षेण व्यचसेति प्राजापत्या गायत्र्यः। राजयक्ष्मस्त्वासुर्युष्णिक्। पृथिव्योरसा सवितुः प्रपदाभ्यां दैवीजगत्यौ। सत्येनोदरेण त्वष्टुरष्टीवद्भ्यां सत्ये प्रतिष्ठायेति दैवीत्रिष्टुभः। अप्रतिष्ठान एकपदा भुरिक्साम्नीबृहतीति॥ यदैते पर्यायसूक्तमन्त्रा जपकर्मणि प्रयुज्यन्ते

तदाधिकारान्ताता(त्ता?)नेतान्विजानीयात्। तदा (?) तथा छन्दस्येता अष्टादश दण्डका भवन्ति॥ एतद्वै ब्रह्मस्येति सप्तको मन्त्रोक्तदेवत्यः। * * *॥ 7. 13. The *Pañchapaṭalika* enumerates:

एकत्रिंशद् भवेत्पूर्वस्तस्माद् द्वासप्ततिः परः।
तृतीयः सप्तको दृष्टो बृहस्पतिशिरस्यपि॥

At the end of volume III the reader will find the second Paryâya of the second Anuvâka of the eleventh Kâṇḍa divided in accordance with *Sarvanukramaṇikâ.*

The fifth deviaton is in the XIIth Kâṇḍa where the Berlin Edition reckons the seven Paryâyas as one Sûkta and where the editors reckon the subdivisions consecutively instead of separately. My authority from the *Sarvânukramaṇikâ* is: श्रमेण तपसेति सप्त पर्यायाः प्रागुक्तर्षिब्रह्मगव्यीदेवताः। तत्राद्यः षट्। * * * ओजश्चेति पञ्च। * * * सैषा भीमेति षोडश। * * * वैरं विकृत्यमानेत्येकादश। * * * तस्या आहननमित्यष्ट। * * * क्षिप्रं वै तस्येति पञ्चदश। * * * वृश्च प्र वृश्चेति द्वादशकः। * * *॥ 8. 8. The *Pañchapaṭalikâ* agrees:

वचनानि च षट् पञ्च षोडशैकादशाष्ट च।
ब्रह्मगव्यां पञ्चदश तस्माद् द्वादशकः परः॥

The sixth variation occurs at the beginning of the fourth anuvâka of the XIIIth Kâṇḍa and is similar to that in the XIIth Kâṇḍa. *The Sarvânukramaṇikâ* has: स एतीति षट् पर्याया मन्त्रोक्तदेवत्याः। तत्राद्यस्त्रयोदश। * * *। कीर्तिश्चेत्यष्टौ। * * * ब्रह्म चेति सप्त। * * * स वा अह्न इति सप्तदश। * * * भूयानिति षट्। * * * उरुः पृथुरिति पञ्च। * * *॥ 8. 16. The *Pañchapaṭalikâ* says: रोहित।

चतुर्थस्यावसानानि वक्ष्यमाणानि तानि शृणु।
त्रयोदशाष्टौ च ततः परः
सप्त सप्तदश षट् च बोध्याः।
षष्ठः पञ्चक उच्यते॥

The seventh variation is in regard to the XVth Kâṇḍa, where the subdivisions of Paryâyas 2,4,5,6,13, and 14 with me differ from those of the Berlin Edition. We have the following from the *Sarvânukramaṇikâ:* व्रात्य आसीदिति काण्डम्। अष्टादश पर्यायाः। अध्यात्मकम्। मन्त्रोक्तदेवत्याः। उत व्रात्यदैवतम्। आद्योष्टौ। * * * स उदिति द्यूना त्रिंशत्। आद्या स दक्षिणां स प्रतीचीं स उदीचीं भूतं च श्रुतं च साम्न्यनुष्टुभः। तं बृहच्च तं वैरूपं तं श्यैतं साम्नीत्रिष्टुप्। बृहते च द्विपदार्षीपङ्क्तिः। बृहतश्च वैरूपस्य श्यैतस्य च द्विपदा ब्राह्मीगायत्री। श्रद्धा पुंश्चली उषा इरा विद्युदिति द्विपदा आर्चीजगत्यः। अमावास्या च साम्नीपङ्क्तिः। अहश्चासुरीगायत्री। मातरिश्वा च पदपङ्क्तिः। कीर्तिश्च त्रिपदा प्राजापत्या त्रिष्टुप्। यज्ञायज्ञियमेकपदोष्णिक्। यज्ञायज्ञियाय च द्विपदार्षी भुरिक् त्रिष्टुप्। यज्ञायज्ञियस्य चार्षीपरानुष्टुप्। वैरूपाय

च द्विपदा विराडार्षीपङ्क्तिः । श्यैताय च निचृदार्षीपङ्क्तिः ॥ स संवत्सरमेकादश । * * * तस्मै प्राच्या इति ब्यूना विंशतिः । प्रथमा तस्मै प्राच्या ध्रुवाया ऊर्ध्वाया दैवीजगत्यः । दक्षिणायाः प्रतीच्या उदीच्याः प्राजापत्या-गायत्र्यः । वासन्तौ मासौ वार्षिकौ मासावार्च्यनुष्टुभौ । वासन्तावेनं शारदावेनं द्विपदा प्राजापत्याजगती । ग्रैष्मौ मासौ प्राजापत्यापङ्क्तिः । ग्रैष्मावेनमार्चीजगती । वार्षिकावेनं भौमार्चीत्रिष्टुप् । शारदौ मासौ साम्नीत्रिष्टुप् । हैमनौ मासौ प्राजापत्यावृहती । हैमनावेनं शैशिरावेनमिति द्विपदे आर्चीपङ्क्ती । शैशिरौ मासावार्च्युष्णिगिति ॥ तस्मै प्राच्या दिशो अन्तर्देशादिति षोडश मन्त्रोक्तरुद्रदेवत्याः । प्रथमा त्रिपदा समविषमा गायत्री । भव एनं त्रिपदा भुरिगार्चीत्रिष्टुप् । नास्य पशून् द्विपदा प्राजापत्यानुष्टुप् । तस्मै दक्षिणायास्त्रिपदा स्वराट्प्राजापत्यापङ्क्तिः । शर्वः पशुपतिरुग्रो महादेव एनं त्रिपदा ब्राह्मीगायत्र्यः । तस्मै प्रतीच्यास्तस्या उदीच्यास्तस्या ऊर्ध्वाया इति त्रिपदाः ककुभः । तस्मै ध्रुवायास्तस्मै सर्वेभ्य इति भुरिग्विषमागायत्र्यौ । रुद्र एनं निचृद्ब्राह्मीगायत्री । ईशान एनं विराडिति ॥ स ध्रुवामिति पञ्चविंशतिः । आद्या स ऊर्ध्वामासुरीपङ्क्तिः । स उत्तमां स बृहतीं स परमां सोनादिष्टां स सर्वानित्यासुरीबृहत्यः । स दिशः परो-ष्णिक् । तं भूमिस्तमृतव इत्यार्चीपङ्क्तिः । सोनावृत्तमार्च्युष्णिक् । तमृतं च तमितिहासः साम्नीत्रिष्टुभौ । तमृतवश्च साम्नीपङ्क्तिः । तमाहवनीयो विराजश्चार्चीत्रिष्टुभौ । तं दिनिः साम्न्यनुष्टुप् । तं प्रजापतिरार्च्यनुष्टुप् । भूमेश्च वा आर्षी पङ्क्तिः । ऋतस्य चेतिहासस्य च निचृद्बृहत्यौ । ऋचां च वै प्राजापत्यात्रिष्टुप् । आहवनीयस्य चर्तूनां च विराड्जगत्यौ । दिनेश्च वा आर्चीबृहती । प्रजापतेश्च विराड्बृहतीति ॥ स महिमेति पञ्चकः । * * * सोरज्यत स विश इति द्वौ त्रिकौ । * * * तद्यस्येति त्रयः पर्याया एकादशकाः । * * * व्रात्य एकामिति चतुर्दश । आद्या साम्न्युष्णिक् । ये पृथिव्यां ये दिवि प्राजापत्यानुष्टुभौ । व्रात्यो द्वितीयां तृतीयां चतुर्थीमासुरीगायत्र्यः । येन्तरिक्षे ये पुण्यानां साम्नीबृहत्यौ । तद्यस्यैवं विद्वान् व्रात्योपरिमिता इति द्विपदा निचृद्गायत्री । य एवापरिमिता द्विपदा विराड्गा-यत्री । अथ यस्या व्रात्यः प्राजापत्यापङ्क्तिः । कर्षेदेनमासुरीजगती । अस्यै देवताया उदकं सतःपङ्क्तिः । तस्यामेवाक्षर-पङ्क्तिरिति ॥ स यत्प्राचीमिति चत्वारि विंशतिश्चैव सप्तमः । प्रथमा त्रिपदानुष्टुप् । मनसान्नादेनप्रभृति सर्वा उत्तरा द्विपदा आसुरीगायत्र्योष्टौ । शेषाश्चतस्र ओषधीभिरित्याद्या वषट्कारेणान्ताः प्राजापत्यानुष्टुभो भुरिजः । स यद्दक्षिणां ध्रुवां पुरउष्णिहौ । प्रतीचीमनुष्टुप् । उदीचीं प्रस्तारपङ्क्तिः । स यत्पशून्स्वराड्गायत्री । यत्पितॄन् यन्मनुष्यानार्चीपङ्क्ती । यद्देवान् भुरिङ्नागीगायत्री । यत्प्रजाः प्राजापत्यात्रिष्टुविति ॥ तस्य व्रात्यस्येत्यष्टमं नवकम् । * * * प्रथमोपान इति [सप्तकः] । * * * * अस्य प्रथमो व्यान इति दश दशमम् । * * * * तस्य व्रात्यस्येति पञ्चको दशमात्परः । * * * ॥ 9. 4.

The *Pañchapaṭalikâ* has:

अष्टौ ब्यूना ततस्त्रिंशदेकादश परो भवेत् ।
ब्यूना तु विंशतिस्तुर्यः पञ्चमः षोडश स्मृतः ।
विंशतिः षट् च षष्टश्च सप्तमः पञ्चक उच्यते ।
एकादशकास्त्रयोत्र बोध्याः
द्वावाद्यावथ निश्चितौ त्रिकौ तौ ।
षष्ठं तु चतुर्दशात्र विद्याद्
दश दशमं नवमस्तु सप्तकः स्यात् ।
चत्वारि विंशतिश्चैव सप्तमे वचनानि तु ।
अष्टमं नवकं विद्यात्पञ्चको दशमात्परः ॥

The eighth variation refers to the XVI Kâṇḍa, where we divide the fifth Paryâya into ten parts instead of into six, and the eighth Paryâya into

thirty-three instead of into twenty-seven as is done by the editors of the Berlin Edition: The *Sarvânukramaṇikâ* is: अतिसृष्टो अपामिति प्राजापत्यस्य नव पर्यायाः । तत्र त्रयोदशाद्यं विजानीयात् । * * * निर्दुरमण्य इति द्वौ षट्कौ । सप्तकः परः । * * * विश्वेति त्रयो दुःस्वप्ननाशनदेवत्याः । आद्यं दशकम् । तस्यादित आद्याः षड् विराड्गायत्र्यः । पञ्चमी भुरिक् । षष्ठी स्वराट् । अन्तकोसि प्राजापत्यागायत्री । तं त्वा स्वप्न द्विपदा साम्नीबृहती ॥ अजैष्माद्येत्येकादश । उपोदेवत्याः । * * * तेनैनमिति द्व्यधिकं विहितम् । * * * जितमस्माकम् इत्येकादश वै त्रिगुणानि । आद्यैकपदा यजुर्ब्राह्म्यनुष्टुप् । तस्मादमुं निर्भजामोमुं त्रिपदा निचृद्गायत्री । स ग्राह्याः पाशात् प्राजापत्यागायत्री । तस्येदं वर्चस्तेजस्त्रिपदा प्राजापत्या-त्रिष्टुप् । स निर्ऋत्या इति तिस्रः स ऋषीणां स ऋतूनां स मासानां स इन्द्राद्र्योः आसुरीजगत्यः । स पराभूत्याः स बृहस्पतेः स प्रजापतेः सोङ्गिरसां सोथर्वणां स आर्तवानां स आर्षेयाणाम् आसुरीत्रिष्टुभः । स देवजामीनां स आङ्गिरसानां स आथ-र्वणानां स वनस्पतीनां स वानस्पत्यानां सोर्धमासानां चत्वारः स मृत्योः आसुरीपङ्क्त्यः । स मित्रावरुणयोर्द्वे आसुरीबृह-त्याविति ॥ जितमस्माकमिति परश्च[*Sarvânukramaṇikâ*: पराश्च]त्वारि वै वचनानि । * * * ॥ 9. 17.

The *Pañchapaṭalikâ* has:

प्राजापत्यस्य पूर्वस्य परमस्य पुनः शृणु ।
त्रयोदशाद्यं विजानीयाद् द्वौ षट्कौ सप्तकः परः ।
आद्यं दशकं ह्येकादशकं
तस्माच्च परं व्यधिकं विहितम् ।
एकादश वै त्रिगुणान्यपर-
श्चत्वारि वै वचनानि परश्चत्वारि वै वचनानि परः ॥

The *Pañchapaṭalikâ* may be quoted further to shew that the Sub-division of Paryâyas should be into separate Vachanas or Avasânas even as Sûktas are subdivided into Ṛiks:

पर्यायाणामृचां वापि तद् वक्ष्यामो यथाक्रमम् ।
* * * पर्यायेष्ववसानानामृग्भिस्तुल्यो विधिर्भवेत् ।
सर्वदा क्षिप्रमित्येते विद्यादत्र निदर्शनम् ।
गणास्तु येवसानानां संबन्धार्थाः पृथक् पृथक् ।
तेष्वर्थावि(दि?)विधिर्बोध्यः सोदक्रामन्निदर्शनम् ॥

That the different Paryâyas do not group themselves into larger sec-tions of a Kâṇḍa will appear from the following:

विराड्वै तु षट् पर्याया (8th Kâṇḍa) यो विद्यादिति षट् स्मृताः ।
प्रजापतिस्तथैकः (9th) स्याद्वयस्तस्यौदनो भवेत् । (11th) * * *
बह्वृगवी सप्त पर्यायाः । (12th) * * * षट् पर्यायाः । (13th) * * *
द्व्यात्याद्यः सप्त पर्याया एकादश परो भवेत् (15th)
प्राजापत्यो ह चतुष्कः पञ्चपर्याय उत्तरः (16th) ॥

The ninth variation occurs in the number of Ṛiks into which the 47th Sûkta of the XIXth Kàṇḍa is divided. I make it of nine Ṛiks instead of ten, which the Berlin Edition has, on the authority of the *Sarvânukramaṇikâ* which lays down: आ रात्रि पार्थिवम् इति चत्वारि सूक्तानि । पूर्वं नवकमुत्तरं .....माश्वानाम् इति व्यवसाना॥ 10, 26.

The tenth variation is at the end of the 54th Sûkta, where I make the last Ṛik consist of three lines instead of two, and thus turn the Sûkta into one of five Ṛiks only. On this the *Sarvânukramaṇikâ* is: कालो अश्व इति द्वे । पूर्वं दशकम् । उत्तरं पञ्चकम् । एवं पञ्चदश । .....कालेयमङ्गिरा इति व्यवसाना पङ्क्तदा विराडष्टिः ॥ 10, 28.

The eleventh variation is in the Sûkta next following, which with us is of six Ṛiks and not of seven as in the Berlin Edition. The *Sarvânukramaṇikâ* on the Sûkta is: रात्रिंरात्रिमप्रयावम् इति षडर्चम् आग्नेयं त्रैष्टुभम् । * * * अपश्चादग्धान्नस्येति व्यवसाना पञ्चपदा पुरस्ताज्ज्योतिष्मती ॥ 10, 29. Sâyaṇa omits the line रायस्पोषेण समिषा मदन्तो &c. added by Professors Roth and Whitney to the last Ṛik and so do all my authorities without exception.

The twelth variation is in regard to the number of Ṛiks in the 57th Sûkta of the Kâṇḍa. My authority for dividing it as we have done into five Ṛiks is the following description in the *Sarvânukramaṇikâ*: यमस्य लोका इति द्वे । पूर्वं षट्कम् । उत्तरं पञ्चकम् । एवम् एकादश । * * * देवानां पत्नीनाम् इति व्यवसाना चतुष्पदा त्रिष्टुप् । तं त्वा स्वग्नेति षट्पदोष्णिग्बृहतीगर्भा विराट्शक्करी । अनास्माकस्तद्देव इति व्यवसाना पं[चप]दा शाक्करातिजगती ॥ 10, 30.

The *Pañchapaṭalikâ* omits the nineteenth and twentieth Kâṇḍas from its analysis and is not available for corroboration of the *Sarvânukramaṇikâ* as regards the last four variations.

As regards the text of the commentary, it is based upon the following MSS.

S'. This is a MS. written on palm-leaves. It consists of four Veshṭaṇas or volumes: the first Veshṭaṇa contains 250 leaves, 1′ 5″ long by 2″ in width in the middle, each page containing 8 to 10 lines with 60 to 101 letters to a line, the smaller numbers being across the square blank spaces kept round the string holes. It contains the commentary on the first four Kâṇḍas. The first part of the first leaf is

worn away. The beginning is: --णाधप----श्रासरस्वत्य नमः । श्रागुरुभ्या नमः । आवघ्नमस्तु ॥ वागाशाद्याः सुमनसः सवाथानामुपक्रमे । यं नत्वा कृतकृत्या स्युस्तं नमामि गजाननं ॥ यस्य निश्वासत वदा या वेदेभ्योखिलं जगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ The MS. ends: पंचमं सूक्तं ॥——॥ अष्टमोनुवाकः ॥ श्रीमद्राजाधिराजराजपरमेश्वरश्रीवीरहरिहरमहाराजसाम्राज्यधुरंधरेण सायणार्येण विरचिते अथर्वसंहिताभाष्ये चतर्थकांडे अष्टमोनुवाकः ॥——॥ The last leaf too is much worn away in the last line. On a blank leaf at the end occur the words अथर्वसंहिताभाष्य वोले ७५०. The writing is engraved on the leaves with a stylus or steel-pen and then blackened with ink, the engraved parts alone taking the ink and leaving all other spaces clean. The leaves are bored on the right and left hands at points equidistant from the extremities for the strings to pass through. Two slips of teak-board of a size slightly greater than that of the leaves hold the latter between them and keep the whole Veshṭaṇa by means of the strings well bound and compact. No date is given. The writing is all in good preservation. From the appearance of the leaves which though not very old are decidedly old, it is difficult to say how old the MS. is. The leaves are of what is called the S'îtâl-palm, which are very much more durable than those of the Karitâl-palm, the common belief, perhaps exaggerated, being that the former last for two thousand years. A native scholar of Mysore who is well versed with MSS. written on similar materials is of opinion that the present volume cannot be less than three hundred years old.

The second volume consists of one hundred and eighty S'îtâl-palm leaves, 1′ $8\frac{1}{2}$″ long by $1\frac{7}{8}$″ in width, with seven to eight lines to the page containing 95 to 112 letters to the line. It contains the commentary on the sixth and the seventh Kâṇḍas and that on the eighth Kâṇḍa up to the end of the third Anuvâka. The sixth ends on leaf No. 92, thus: षष्ठकांडे त्रयोदशेनुवाके नवमं सूक्तं ॥———॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥——॥ श्रीमद्राजाधिराजराजपरमेश्वरश्रीवीरप्रतापहरिहरमहाराजकारिते अथर्वसंहिताभाष्ये षष्ठकांडं संपूर्णं ॥———॥ श्रीविद्याशंकराय नमः ॥———॥ श्रीशारदापरमेश्वर्यै नमः ॥———॥ श्रीगणाधिपतये नमः ॥——॥——॥ श्रीगुरुभ्यो नमः ॥———॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥———॥ अबद्धो वा सुबद्धो वा मम दोषो न विद्यते ॥———॥ करकृतमपराधः क्षंतमर्हंति संतः ॥———॥ विसर्गबिंदुमात्राणि पदपादाक्षराणि च ॥———॥ न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥———॥ शुभमस्तु ॥———॥ अथर्वणवेदभाष्य ६ कांड ८ के वोले ८७ वोले ८ के ४७ ग्रंथद रीतिलि ४८४० ऐवत्तु । The seventh Kâṇḍa begins on leaf No. 93. It ends on leaf No. 158 and has the following colophon: सप्तमकांडे दशमोनुवाकः ॥———॥———॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ।——॥ श्रीमद्राजाधिराजराजपरमेश्वरश्रीवीरहरिहरमहाराजधुरंधरेण

सायणार्येण विरचिते अथर्वसंहिताभाष्ये सप्तमकांडः समाप्तः ॥———॥ श्रीगणाधिपतये नमः ॥———॥———॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥———॥ अवद्धो वा सुबद्धो वा मम दोषो न विद्यते ॥———॥ करकृतमपराधः क्षंतमर्हंति संतः ॥———॥ श्रीसरस्वत्यै नमः ॥——॥ श्रीगुरुभ्यो नमः ॥——॥——॥——॥

एळने कांडतके वोले ६४ ग्रंथ ४४८० The eighth begins: श्रीगणाधिपतयें नमः । श्रीसरस्वत्यै नमः । निर्विघ्नमस्तु । यस्य निःश्वसितं वेदा &c., and ends: इत्यष्टमकांडे तृतीयोनुवाके पंचमं सूक्तं ॥———॥ समाप्तश्च तृतीयोनुवाकः ॥———॥ श्री ॥ एंटने कांड वोले ७७ के ग्रंथ ८७०० उभयं ग्रंथ ७४०० This volume appears to be very well preserved and fresh. The native scholar of Mysore already referred to estimates that it is about one hundred and fifty years old.

The third volume contains the commentary on the eleventh Kâṇḍa and consists of 54 palm leaves numbered 101 to 154, 1′ 10″ long by $2\frac{1}{4}$″ broad, each page containing generally 8 lines with 84 to 116 letters to the line. It begins: श्रीगणाधिपतये नमः ॥ निर्विघ्नमस्तु ॥ यस्य निश्वसितं वेदा &c. and ends thus: पंचमेनुवाके षष्ठं सूक्तं ॥———॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो वेदाद्विद्यातीर्थमहेश्वरः ॥———॥ श्रीमद्राजाधिराजराजपरमेश्वरश्रीवीरहरिहरमहाराजसाम्र (here the leaf is broken off) प्ये एकादशकांडः समाप्तः ॥——॥ श्री ॥——॥ श्री ॥ The age of this volume may be about the same as that of the previous volume. The handwriting appears different and is bolder. From the fact that the numbering of the leaves begins from 101 and not from 1 it is plain that the previous 100 leaves must have contained the commentary on the ninth and tenth Kâṇḍas.

The fourth volume contains the commentary on the XVIIth, XVIIIth and XIXth Kâṇḍas and the first four Anuvâkas of the XXth Kâṇḍa. It contains 195 palm leaves 1′ $8\frac{1}{2}$″ in length by $1\frac{6}{8}$″ in width, with 7 lines to the page each line containing 94 to 117 letters. It begins: श्रीगणाधिपतये नमः । श्रीगुरुभ्यों नमः । श्रीसरस्वत्यै नमः । निर्विघ्नमस्तु । यस्य निश्वसितं वेदा &c. At the end of the XVIIth Kâṇḍa which occurs on leaf No. 10 is to be seen: सप्तदशकांडं समाप्तं ॥———॥ ग्रंथ ४०० ॥———॥ श्रीगणाधिपतये नमः । The end of the XVIIIth Kâṇḍa occurs on leaf No. 64 and has: श्रीविद्याशंकराय नमः ॥ श्रीकृष्णार्पणमस्तु ॥———॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥ अवद्धो वा सुबद्धो वा मम दोषो न विद्यते ॥——॥ करकृतमपराधः क्षंतुमर्हंति संतः ॥——॥ ई अष्टादशकांड वंदके ग्रंथसंखे ७६१० प्राक् हदिनेळ कांडके ग्रंथ ४००० ॥———॥ उभयं कांड यरडक्के वोले ६४ के ग्रंथ ८८४० मूरू साविरदनूर ऐवत्तु ग्रंथ ॥——॥ श्रीगणाधिपतये नमः ॥ श्रीसरस्वत्यै नमः ॥ ———॥ श्रीशारदागुरुभ्यों नमः ॥ ——॥ श्रीविद्याशंकराय नमः ॥———॥ शुभमस्तु ॥ श्रीसरस्वत्यै नमः । श्रीशारदापरमेश्वर्यै नमः । The nineteenth Kâṇḍa ends on leaf No. 144 thus: सप्तमोनुवाकः समाप्तः ॥———॥ वेदार्थस्य

प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥———॥ इति श्रीमद्राजाधिराजराजपरमेश्वरश्रीवीरहरिहरमहाराजसाम्राज्यधुरंधरेण सायणार्यविरचिते माधवीये अथर्ववेदसंहिताभाष्ये वेदार्थप्रकाशे एकोनविंशं कांडं समाप्तं ॥———॥ श्रीविद्याशंकरार्पणमस्तु ॥———॥ श्रीगणाधिपतये नमः ॥———॥ श्रीगुरुभ्यो नमः ॥———॥ श्रीशारदापरमेश्वर्यै नमः ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥———॥ अबद्धो वा सुबद्धो वा मम दोषो न विद्यते ॥——॥ करकृतमपराधः क्षंतमर्हंति संतः ॥——॥ एकोनविंशति-कांड वंदके वोले ८० के ग्रंथसंखे ४६०० ॥——॥ सप्तदशकांड अष्टादशकांड एकोनविंशकांड सह कांड ४ मूरंके ग्रंथ ६२४० आरु सावरिद येळु नूर्व ऐवत्तु ॥ ॥ At the close of the volume which occurs on leaf No. 195 ends the fourth Anuvâka of the XXth Kâṇḍa thus : नोस्मान् पात रक्षत ॥———॥———॥ इप्पत्तने कांड वोले ३० के ग्रंथ ४ ता ७८०० . The writing in this volume is smaller than in the previous ones but is equally legible and well-formed. In age there is not much to distinguish between this and the second volume and is believed to be about one hundred and fifty years old.

All the four volumes come from the celebrated Maṭha of S′rî S′ankarâchârya at S′ṛingerî in the Mysore Dominions.

Kd. This comes from the Maṭha at Kûḍle in the same territory. It contains the commentary on the first four Kâṇḍas and consists of 276 palm leaves 1′ $7\frac{7}{8}$″ by 2″, there being 8 to 9 lines to the page of between 60 and 90 letters to the line. Like S′ this is also engraved on the leaves with a steel-pen in the Nandî Nâgarî characters. In appearance it is more modern than any of the four Veshṭaṇas of S′. It begins thus : श्रीगुरुभ्यो नमः । श्रीसरस्वत्यै नमः । अविघ्नमस्तु वागीशाद्याः सुमनसः सर्वार्थानमुपक्रमे । यं नत्वा कृतकृत्या स्युस्त नमामि गजाननं । यस्य निश्वसितं वदा या वदभ्या खलं जगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं । It ends : पंचमं सूक्तं अष्टमोनुवाकः ॥ श्रीमद्राजाधिराजराजपरमेश्वरश्रीवीरहरिहरमहाराजसाम्राज्यधुरंधरेण सायणार्येण विरचिते अथर्वसंहिताभाष्ये चतुर्थकांडे अष्टमोनुवाकः । समाप्तः ॥ The first and last pages have been worn away so that parts of a few letters have been lost but the rest of the writing is thoroughly well preserved.

Both **S′** and **Kd** have the edges of their leaves and the wooden boards much blackened apparently by exposure to smoke, though this is less in the case of **Kd** than in that of the four volumes constituting S′. Both are written or rather engraved in the Nandî Nâgarî characters, and both on the leaves of the S′îtâl, thick, pliable and durable. The text in either case is not accented and is generally devoid of the figures (1 & 3) of the kampita and the pluta.

It will thus be seen that except the portion on the first four Kâṇḍas the text of the commentary has been edited from a single MS. And even the first four Kâṇḍas have not derived much benefit from collation with the other

MS., **Kd**, as the latter appears clearly to be copied from the S'ṛingerî MS. The blunders, omissions, inaccuracies and special peculiarities of the one are found in the other. As a consequence of this I have often had to restore passages, and adopt conjectural emendations which appeared inevitable, with such extraneous help as was available from the Sûtras with their commentators and from Sâyaṇa's own commentary on parallel passages in other parts of the Saṁhitâ. To the paucity of materials was added the difficulty created by the fact that the two MSS. were written in an alphabet which though not foreign was not easily legible except after considerable practice. Though, therefore, I have endeavoured to do my best in settling the text of the commentary I am sensible that the scantiness of the materials available to me cannot but have affected the character of the Edition, and left much to be desired.

ओम्

श्रीगुरुभ्यो नमः । श्रीसरस्वत्यै नमः । अविघ्नम् अस्तु ॥

वागीशाद्याः सुमनसः सर्वार्थानाम् उपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत् ।
निर्ममे तम् अहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
अविद्याभानुसंतप्तो विद्यारण्यम् अहं भजे ।
यदर्ककरतप्तानाम् अरण्यं प्रीतिकारणम् ॥ ३ ॥
तत्कटाक्षेण तद्रूपं दधतो बुक्कभूपतेः ।
अभूद्धरिहरो राजा क्षीराब्धेरिव चन्द्रमाः ॥ ४ ॥
विजितारातिव्रातो वीरश्रीहरिहरक्षमाधीशः ।
धर्मब्रह्माध्वन्यः कलिं स्वचरितेन कृतयुगं कुरुते ॥ ५ ॥
साधयित्वा महीं सर्वां श्रीमान् हरिहरेश्वरः ।
भुङ्क्ते बहुविधान् भोगान् असक्तो रामवत् सुधीः ॥ ६ ॥
विजयी हरिहरभूपः समुद्वहन् सकलभूभारम् ।
षोडश[1] महान्ति दानान्यनिशं सर्वस्य तुष्टये कुर्वन् ॥ ७ ॥
तन्मूलभूतम् आलोच्य वेदम् आथर्वणाभिधम् ।
आदिशत् सायणाचार्यं तदर्थस्य प्रकाशने ॥ ८ ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुः सायणाचार्यो वेदार्थं वक्तुम् उद्यतः ॥ ९ ॥
व्याख्याय वेदत्रितयम् आमुष्मिकफलप्रदम् ।
ऐहिकामुष्मिकफलं चतुर्थं व्याचिकीर्षति ॥ १० ॥

ननु "यज्ञं व्याख्यास्यामः । स त्रिभिर्वेदैर्विधीयते[2]" [सत्या° सू° १, १]

---

1 S'Kd षोडशि. 2 S'Kd विधीयते.

इति स्मरणाद् ऋग्यजुःसाम्नामेव फलवत्कर्मशेषत्वम् अवसीयते । प्रादुर्भावोपि त्रयाणामेव श्रूयते । "त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्" इति [ऐ० ब्रा० ५. ३२] । "ऋचः सामानि जज्ञिरे । यजुस्तस्माद् अजायत" इति [ऋ० १०. ९०. ९] च ॥ संख्यानियमश्च श्रूयते । "वेदैरशून्यस्त्रिभिरेति सूर्यः" [तै० ब्रा० ३. १२. ९. १] । "यम् ऋषयस्त्रयीविदा विदुः । ऋचः सामानि यजूंषि" इति [तै० ब्रा० १. २. १. २६] ॥ धर्मविशेषश्रवणाच्च त्रित्वम् अवगम्यते । "उच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्ना" इति [सत्या० सू० १. १. १] । "यद् वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं [तद्] यद् ऋचा तद् दृढम्" इति [तै० सं० ६. ५. १०. ३] ॥ ते च ऋगादयो विस्तरेण व्याख्याताः । अस्य तु वेदस्य त्रयीव्यतिरिक्तत्वेन कर्मशेषत्वाभावाद् न व्याख्यानार्हता । अथोच्येत । ऋग्वेदेन हौत्रमेव प्रतिपाद्यते यजुषा आध्वर्यवम् साम्ना औद्गात्रम् इति वेदत्रयस्य प्रतिनियतप्रयोगप्रतिपादनपरत्वात् [1]अवशिष्टब्रह्मकर्तव्यताप्रतिपादकश्चतुर्थो वेदो व्याख्येयः । तदभावे यज्ञशरीरस्य अनिष्पत्तेरिति ॥ मैवम् । उक्तैरेव त्रिभिर्वेदैः ऋत्वपेक्षितस्य ब्रह्मकर्तव्यस्यापि सिद्धेः । तथा च ऐतरेयब्राह्मणे । "यद् ऋचैव "[2]हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवति अथ केन "ब्रह्मत्वं क्रियत इति त्रय्या विद्ययेति ब्रूयात्" इति [ऐ० ब्रा० ५. ३३] । स्मर्यते च । "ऋग्वेदेन होता करोति सामवेदेनोद्गाता यजुर्वेदेनाध्वर्युः सर्वैर्ब्रह्मा" इति । अतश्चतुर्णां होत्रादीनाम् ऋत्विजाम् अपेक्षितस्य क्रियाकलापस्य [3]त्रय्यैव सिद्धत्वात् न चतुर्थस्य वेदस्याकाङ्क्षास्ति कुतस्तस्य व्याख्यानचिन्तेति ॥

अत्रोच्यते । हौत्रम् आध्वर्यवम् औद्गात्रमिति [4]संज्ञाख्यया त्रयाणामपि वेदानां प्रतिनियतहोत्रादिकर्तव्यप्रतिपादनपरत्वावगमात् न ब्रह्मकर्तव्यप्रतिपादने तात्पर्यं संभवति । यथा अन्यपरस्य यजुर्वेदस्य होतृकर्तव्यतायाम् यथा वा तथाविधस्य ऋग्वेदस्य अग्निहोत्रे । एवं त्रय्यां तत्रतत्र प्रतिपादितं यद् ब्रह्मत्वम् तद् अथर्ववेदसिद्धमेव लेशेनोक्तम् इति अतात्पर्यविषयत्वात् अकृत्स्नत्वाच्च नादरणी-

---

1 S′Kd अविवशिष्ट° for अवशिष्ट°. 2 S′Kd होत्रं for हौत्रं. 3 S′Kd त्रय्येव for त्रय्यैव. 4 S′Kd सामाख्यया.

यम् । अकृत्स्नत्वमेव अभिप्रेत्य शाखान्तरोक्तं हौत्रं नानुष्ठेयम इति आश्वलायनेनोक्तम् । "तद्ये केचन छान्दोग्ये वाध्वर्यवे वा हौत्रामर्शाः समाम्नाता न तान् कुर्याद् अकृत्स्नत्वाद्धौत्रस्य" इति [आश्व० ८. १३] ॥ अत एव वाङ्मनसनिर्वर्त्यस्य यज्ञशरीरस्य अर्धमेव त्रिभिर्वेदैर्निष्पाद्यते । अर्धान्तरं तु अथर्ववेदेनैवेति श्रूयते । "प्रजापतिर्यज्ञम् अतनुत । स ऋचैव हौत्रम् अकरोद् । यजुषाध्वर्यवं साम्नौद्गात्रम् अथर्वाङ्गिरोभिर्ब्रह्मत्वम्" इति प्रक्रम्य "स वा एष "त्रिभिर्वेदैर्यज्ञस्यान्यतरः पक्षः संस्क्रियते । मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं "संस्करोति" इति [गो० ब्रा० ३. २] । ऐतरेयब्राह्मणेपि त्रयीनिष्पाद्य एकः पक्षः मनोनिष्पाद्यः परः पक्ष इति श्रुतम् । "अयं वै यज्ञो योयं पवते । तस्य "वाक् च मनश्च वर्तन्यौ । वाचा च हि मनसा च यज्ञोवर्तत । इयं वै वाग् । "अदो मनः । तद् वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति । मनसैव ब्रह्मा संस्क-"रोति" इति [ऐ० ब्रा० ५. ३३] ॥ एतदेवाभिप्रेत्य गोपथब्राह्मणे पूर्वभागे प्रश्नपूर्वकम् अथर्वविद एव ब्रह्मत्वम् आम्नातम् । "अथ [ह] प्रजापतिः सोमेन "यक्ष्यमाणो वेदान् उवाच । कं वो होतारं वृणीयाम । कम् अध्वर्युम । कम् "उद्गातारम । कं ब्रह्माणम् इति । त ऊचुः । ऋग्विदमेव होतारं वृणीष्व । य-"जुर्विदम् अध्वर्युम । सामविदम् उद्गातारम । अथर्वाङ्गिरोविदं ब्रह्माणम् । "तथा हास्य यज्ञः चतुष्पात् प्रतितिष्ठति" इति [गो० ब्रा० २. २४] ॥ तत्रैव विपक्षबाधश्च श्रुतः । "अथ चेद् नैवंविदं ब्रह्माणं वृणुते दक्षिणत एवैषां यज्ञो रिच्यते" इति [गो० ब्रा० २. २४] । "यथैकपात् पुरुषो यन् अनुभयचक्रो वा रथो वर्तमानो भ्रेषं न्येति एवमेवास्य यज्ञो भ्रेषं न्येति" इति [गो० ब्रा० ३. २] च ॥

"स त्रिभिर्वेदैर्विधीयते" इति स्मृतिस्तु उदाहृतश्रुत्यनुसारेण मुख्यस्य अथर्वविदोऽसंभवे तत्तच्छाखासु यावदुक्तब्रह्मत्वमात्रेणापि क्रतुशरीरनिष्पत्तिर्भवति इत्येवमभिप्राया ॥

"त्रय्या विद्ययेति ब्रूयात्" इति [ऐ० ब्रा० ५. ३३] श्रुतिरपि प्रकृतव्याहृतित्रयापेक्षत्वाद् अविरुद्धा । "अस्य महतो भूतस्य निश्वसितम् एतद् यद् ऋ-

---

1 S′Kd होत्रम् for हौत्रम्. 2 S′Kd प्रकृति° for प्रकृत°.

"ग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरसः" इति [बृ० आ० ४. ४. १०] वाजसनेयकश्रुत्यनुसारेण त्रयाणाम् उत्पत्तिश्रुतिः उपलक्षणतया व्याख्येया ॥

"वेदैरश्नून्यस्त्रिभिरेति सूर्यः" इति च श्रुतिः "ऋग्भिः पूर्वाह्णे" [तै० ब्रा० ३. १२. ९. १] इति प्रकृतकालत्रयाभिप्रायेण । वेदानां चतुष्ट्वस्य सर्वत्र श्रुतत्वात् । तथा चाग्रे तापनीयोपनिषदि आम्नास्यते । "ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः" इति [नृ० पू० ता० १] । मुण्डके च । "तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोथर्ववेदः" इति [मु० १. १] ॥

"यम् ऋषयस्त्रयिविदा विदुः । ऋचः सामानि यजूंषि" इति [तै० ब्रा० १. २. १. २६] त्रैविध्यं तु वेदगतमन्त्राभिप्रायम् । तद् उक्तं जैमिनिना । "तच्चोदकेषु मन्त्राख्या" [जै० २. १. ३२] । "तेषाम् ऋग् यत्रार्थवशेन पादव्यवस्था" [जै० २. १. ३५] । "गीतिषु सामाख्या" [जै० २. १. ३६] । "शेषे यजुःशब्दः" [जै० २. १. ३७] इति । तद् अस्मिन्नपि वेदे विद्यत इति न चतुष्ट्वव्याकोपः ॥

उच्चैष्ट्वादिधर्मनियमोपि अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात् सामवेद इत्युपक्रमवाक्यगतवेदत्रयापेक्ष इति न विरोधः ॥

ननु अस्मिन् वेदे मन्त्राणाम् ऋगाद्युक्तलक्षणयोगात् तदन्यतमव्यपदेशभाक्त्वं युक्तम् ॥ नैष दोषः । अथर्वाख्येन ब्रह्मणा दृष्टत्वात् तन्नाम्ना अयं वेदो व्यपदिश्यते । तथा हि । पुरा खलु सृष्ट्यर्थं स्वयंभु ब्रह्म तपस्तेपे । तस्मात् तप्यमानात् सर्वेभ्यो रोमकूपेभ्यः स्वेदधारा अजायन्त । तासु स्वेदजातासु अप्सु स्वां छायां पश्यतो रेतश्चस्कन्द । तद्रेतःसहिता आपो द्विरूपा अभवन् । तत्रैकतःस्थितं रेतो भृज्ज्यमानं सत् भृगुर्नाम महर्षिरभवत् । स एव भृगुः स्वोत्पादकस्य तिरोहितस्य ब्रह्मणो दर्शनाय "अथार्वाग् एनम् एतास्वेवाप्स्वन्विच्छ" इति [गो० ब्रा० १. ४] अशरीरया वाचोक्तत्वात् अथर्वाख्योप्यभवत् । अवशिष्टरेतोयुक्ताभिरङ्गिरावृतस्य वरुणशब्दवाच्यस्य ब्रह्मणस्तप्तस्य सर्वेभ्योङ्गेभ्यो रसोक्षरत् । सोङ्गरसभूतत्वात् अङ्गिरा नाम महर्षिरभवत् । ततस्तत्कारणं ब्रह्म तम् अथर्वाणम् अङ्गिरसं चाभ्यतपत् । ततः एकर्चब्यृचादिमन्त्रद्रष्टारो विंशतिसं-

---

1 S′Kd °स्त्रैविदा. 2 S′Kd तत्रोदकेषु. 3 S′Kd अविशिष्ट°. 4 S′Kd चाभ्यतत्.

ख्याका अथर्वाणोङ्गिरसश्चोत्पन्नाः । तेभ्यस्तेभ्य ऋषिभ्यः सकाशात् स्वयंभु ब्रह्म यान् मन्त्रान् अद्राक्षीत् सोथर्वाङ्गिरःशब्दवाच्यो वेदोऽभवत् । अत एकर्चादीनाम ऋषीणां विंशतिसंख्याकत्वाद् वेदोपि विंशतिकाण्डात्मकः संपन्नः । अत एव सर्वसारत्वाद् अयं वेदः श्रेष्ठः ॥ श्रूयते हि । "श्रेष्ठो हि वेदस्तपसोधि जातो ब्रह्मज्ञानां हृदये संबभूव" इति [गो० ब्रा० १. ९] । तथा "एतद् वै "भूयिष्ठं ब्रह्म यद् भृग्वङ्गिरसः । येङ्गिरसः स रसः । येथर्वाणस्तद् भेषजम् । यद् "भेषजं तद् अमृतम् । यद् अमृतं तद् ब्रह्म" इति [गो० ब्रा० ३. ४] ॥ एवं सारभूतब्रह्मात्मकत्वाद् ब्रह्मकर्तव्यप्रतिपादनाच्च अयं ब्रह्मवेद इत्यप्याख्यायते ॥

तथा च श्रुतिः । "चत्वारो वा इमे वेदा ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेदः" इति [गो० ब्रा० २. १६] । अत एव सारवत्त्वात् सिद्धमन्त्रता समाम्नायते ।

न तिथिर्न च नक्षत्रं न ग्रहो न च चन्द्रमाः ।
अथर्वमन्त्रसंप्राप्त्या सर्वसिद्धिर्भविष्यति । [प० २. ५]

इति । तथा स्कान्दे कमलालयखण्डे आथर्वणमन्त्राणां जपमात्रेणाभिमतफलसाधनत्वम् उक्तम् ।

यस्तत्राथर्वणान् मन्त्रान् जपेच्छ्रद्धासमन्वितः ।
तेषाम् अर्थोद्भवं कृत्स्नं फलं प्राप्नोति स ध्रुवम् । इति ॥

अस्य वेदस्य सर्पवेदादयः पञ्चोपवेदा अङ्गत्वेन समनन्तरं ब्रह्मणा सृष्टाः । तथा च ब्राह्मणम् । "स दिशोन्वैक्षत प्राचीं दक्षिणां प्रतीचीम् उदीचीं ध्रुवाम् ऊर्ध्वाम्" इति प्रक्रम्य "पञ्च वेदान् निरमिमीत सर्पवेदम् पिशाचवेदम् असुरवेदम् इतिहासवेदम् पुराणवेदम्" इति [गो० ब्रा० १. १०] ॥ तदेवम् आमुष्मिकफलेषु दर्शपूर्णमासादिषु अयनान्तेषु त्रयीविहितकर्मसु अपेक्षितं ब्रह्मत्वम् अनन्यलभ्यत्वाद् अथर्ववेदैकसमधिगम्यम् इति स्थितम् ॥ तद्वदेव ऐहिकफलानि शान्तिकपौष्टिकानि कर्माणि राजकर्माणि अपरिमितफलानि तुलापुरुषादिमहादानानि च अथर्ववेद एव प्रतिपादितानि ॥ पौरोहित्यं च अ-

---

1 S′Kd एतद्वपि for एतद् वै, doubtless meant for एतद्वयि=एतद्वै.

थर्वविदैव कार्यम् । तत्कर्तृकाणां कर्मणां राजाभिषेकादीनां तत्रैव विस्तरेण प्रतिपादितत्वात् । तथा च विष्णुपुराणे

"पौरोहित्यं शान्तिकपौष्टिकानि राज्ञाम् अथर्ववेदेन कारयेद् ब्रह्मत्वं च" इति । भट्टाचार्यैरप्युक्तम्

शान्तिपुष्ट्यभिचारार्था एकब्रह्मर्त्विगाश्रयाः ।
क्रियन्तेथर्ववेदेन त्रय्येवात्मीयगोचराः ।

इति । नीतिशास्त्रेपि

त्रय्यां च दण्डनीत्यां च कुशलः स्यात् पुरोहितः ।
अथर्वविहितं कर्म कुर्याच्छान्तिकपौष्टिकम् ।

इति । मत्स्यपुराणे

पुरोहितं तथाथर्वमन्त्रब्राह्मणपारगम् ।

इति । मार्कण्डेयपुराणे

अभिषिक्तोथर्वमन्त्रैर्महीं भुङ्क्ते ससागराम् ।

इति । अथर्वपरिशिष्टे

यस्य राज्ञो जनपदे अथर्वा शान्तिपारगः ।
निवसत्यपि तद् राष्ट्रं वर्धते निरुपद्रवम् ॥
तस्माद् राजा विशेषेण अथर्वाणं जितेन्द्रियम् ।
दानसंमानसत्कारैर्नित्यं समभिपूजयेत् [प० ४. ६] । इति ॥

स्याद् एवम् । यद्यस्य अर्थवत्त्वं स्यात् तदास्य व्याख्यानम् उपपन्नं स्यात् । तदेव कुत इति चेत् । उच्यते । "स्वाध्यायोध्येतव्यः" [तै० आ० २. १५] इत्यनेन विधिना कृत्स्नस्यापि वेदराशेः अर्थावबोधपर्यन्तं तस्य बोधितत्वात् । तथा हि । "स्वाध्यायोध्येतव्यः" इत्यत्र विध्यविरुद्धा भावना प्रतीयते । सा च द्विविधा । शब्दभावना अर्थभावना चेति । तद् उक्तम् आचार्यैः । "इह हि लिङादियुक्तेषु वाक्येषु द्वे भावने प्रतीयेते । शब्दभावना अर्थभावना च" इति । तत्र शब्दभावनाया अर्थभावना भाव्या । लिङादिः करणम् । अर्थवा-

---

1 S'Kd शाब्दभावनार्थभावना for शब्दभावना अर्थभावना.

द्प्रतिपादिता स्तुतिः इतिकर्तव्यता । अर्थभावनायाः स्वर्गादिर्भाव्यः । धात्वर्थः करणम् । प्रयाजादिः इतिकर्तव्यता ॥ ननु धात्वर्थातिरेकिणीं भावनामेव नोपलभामहे कस्या धात्वर्थः करणं स्यात् । कथं वा तस्या विभागः । भाव्यनिष्ठो [1]भावकव्यापारो भावनेति चेत् न । पचियजिगमि[2]प्रभृतिषु धातुषु अधिश्रयणसंकल्पचलनादयो [3]धात्वर्था एवेति अतिरिक्तस्य भावकव्यापारस्य अभावात् । प्रयत्नो भावकव्यापार इति चेत् न । वृक्षश्चलति काष्ठानि पचन्ति नौर्याति इत्येवमादिषु अचेतनकर्तृकव्यापारेषु तदभावात् । स्पन्दः स इति चेत् [न] । आत्मकर्तृकव्यापारेषु यजतिददातिजुहोतीत्यादिषु तदभावात् । तर्हि उभयानुगतम् औदासीन्यप्रच्युतिसामान्यमेव भावकव्यापारो भविष्यतीति चेत् न । [4]अचेतने [5]शब्दे स्पन्दप्रयत्नयोरभावेन तदुभयसामान्यरूपस्य तस्य अभावात् ॥ सत्यम् धात्वर्थाद् अत्यन्तातिरेकिणी भावना नास्तीति । धात्वर्थानामेव पाको यागः प्रयत्नः संकल्पः अधिश्रयणम् विक्लेदनम् अभिधानम् चोदनम् इति प्रातिस्विकं धात्वभिधेयम् अक्रियात्मकं सिद्धस्वभावम् एकं रूपम् । सर्वधात्वर्थानुगतं करोतिप्रत्ययवेद्यं क्रियात्मकं साध्य[6]स्वभावम् अन्योत्पादनानुकूलात्मकम् आख्यातप्रत्ययवेद्यम् अपरं रूपम् । तथा हि । यः स्पन्दते यो यजते यश्चरति यो विदधाति ते सर्वे करोतिप्रत्ययम् अनुभवन्ति । स्पन्दते स्पन्दनं करोति यजते यागं करोति इत्येवं सर्वत्र करोत्यर्थस्यानुगतिः । तद् उक्तम् आचार्यैः

> सिद्धकर्तृक्रियावाचिन्याख्यातप्रत्यये सति ।
> सामानाधिकरण्येन करोत्यर्थोवगम्यते । [मी० भा० वि० २. १. १]

इति ॥ भिन्नेषु विविध[7]धात्वर्थेषु उत्पाद्यवस्त्वन्तरकर्मकम् एतदेवापरं रूपं भवितृ प्रयोजकव्यापारत्वाद् भावनेत्युच्यते । तच्च यजेत दद्यात् जुहुयात् इत्याख्यातप्रयोगेष्वेव अवगमात् पाकः त्यागः रागः [8]इत्यादिषु अनवगमाच्च अन्वयव्यतिरेकाभ्याम् आख्यातप्रत्ययाभिधेयम् अङ्गीक्रियते । यथाहुः

---

1 S′Kd भाव्यकव्यापारो. 2 S′Kd °प्रकृतिषु for °प्रभृतिषु. 3 S′Kd धात्वर्था एवेति इत्यतिरिक्तस्य. 4 S′Kd अचेतनौ. 5 S′Kd विभौशब्दे for शब्दे. What can विभौ mean, if it is not a misreading for some other word? 6 S′Kd साध्यस्वभावः. 7 S′Kd विविधत्वर्थेषु. 8 S′Kd इत्यादिष्ववचगमाच्च for इत्यादिषु अनवगमाच्च.

[1]अभिधाभावनाम् आहुरन्यामेव लिङादयः ।
[2]अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते । [मी० भा० वि० २. १. १]

इति । ये प्रयत्नं वा स्पन्दं वा उभयं वा भावनाम् अङ्गीकुर्वते तैरपि तेषां सर्वत्रानुगमाभावात् सर्वधात्वर्थानुगतम् अन्योत्पादनानुकूलरूपमेव भावनेत्यङ्गीकर्तव्यम् । एतदप्युक्तम्

सिद्धसाध्यस्वभावाभ्यां धात्वर्थौ [3]द्विविधो मतः ।
अन्योत्पादानुकूलात्मा भावना साध्यरूपिणी ।

इति । तस्माद् धात्वर्थातिरेकिणी भावनेति सिद्धम् ॥

तथा च अध्ययनविधावपि तव्यप्रत्ययावगताया भावनाया अंशत्रयेण भवितव्यम् । तत्र धात्वर्थः करणत्वेन अन्वेति ॥ भाव्यापेक्षायाम् अत्र तस्यानुपात्तत्वात् "स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात्" इति [जै० ४. ३. १५] विश्वजिन्न्यायेन स्वर्ग एव भाव्यतया अन्वेतीति पूर्वः पक्षः । ननु कथं [4]स्वर्गस्य भाव्यता । समनन्तरपदोपात्तस्य स्वाध्यायस्यैव [5]भाव्यत्वाद् इति चेत् न । तस्य अपुरुषार्थत्वेन भाव्यत्वासंभवात् ॥ तर्हि अर्थज्ञानमेव इष्टप्रयोजनरूपत्वाद् भाव्यं भवत्विति चेत् न । विधिम् अन्तरेणापि पदपदार्थव्युत्पत्तिमताम् अधीतेन [6]स्वाध्यायेन अर्थज्ञानस्य जायमानत्वात् ॥ तर्हि अधीतेनैव स्वाध्यायेन अर्थं जानीयाद् इति अवघातादिवद् नियमार्थो विधिर्भवत्विति चेत् न । अनारभ्याधीतस्य स्वाध्यायविधेः अङ्गत्वार्थत्वेन नियमार्थत्वानुपपत्तेः । अवघातादयोपि [7]क्रतावेव नियम्यन्ते अवघातनिष्पन्नैरेव तण्डुलैः पुरोडाशादिनिष्पादनद्वारा दर्शपूर्णमासापूर्वं संपादयेदिति न तण्डुलादिस्वरूपे । प्रमाणान्तरविरोधात् ॥ मा भूत् स्वाध्यायस्य भाव्यता । मा च भूद् अर्थज्ञानस्य । तथापि "यद् ऋ-
"चोधीते पयसः कृत्या अस्य पितॄन् [8]स्वधा अभिवहन्ति । यद् यजूंषि घृतस्य
"कृत्या । यत् सामानि सोम एभ्यः पवते । यद् अथर्वाङ्गिरसो मधोः कृ-
"त्याः । यद् ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीर्मेदसः

---

1 S′Kd अभिधाभावन°. 2 S′Kd अर्थात्मा°. 3 S′Kd विविधो for द्विविधो which is conjectural. 4 S′Kd स्वर्गस्याभाव्यता. 5 S′Kd भाघत्वादिति चेत्. 6 S′ स्वाध्यायेन नार्थज्ञानस्य. We with Kd. 7 S′Kd क्रतावेवति नि°. 8 S′Kd स्वधया for स्वधा.

"कूल्या अस्य पितॄन् स्वधा अभिवहन्ति" [तै० आ० २. १०] इत्यध्ययनं प्रकृत्य पठितार्थवादोक्तघृतकूल्यादिकमेव भाव्यं भवतिति चेत् न । तस्यापि ब्रह्मयज्ञस्वाध्यायम् अधिकृत्य पठितत्वेन ग्रहणाध्ययनफलसमर्पकत्वानुपपत्तेः । तथापि अतिदेशतः प्राप्तेः अस्यापि फलं भविष्यतीति चेत् न । अर्थवादस्य अनतिदेश्यत्वात् । तस्माद् विश्वजिन्न्यायेन स्वर्ग एव अध्ययनविधेर्भाव्यः । याहुः ।

विनापि विधिना [2]दृष्टलाभान्न हि तदर्थता ।
कल्प्यस्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवत् । इति ॥

अत्रोच्यते । अर्थावबोधार्थमेव अध्ययनं विधीयते ॥ ननु पदपदार्थव्युत्पत्तिमतां पुंसां विधिम् अन्तरेणापि अर्थावबोधो जायत इति विध्यानर्थक्यम् इत्युक्तम् इति चेत् न । अध्ययनसंस्कृतेनैव स्वाध्यायेन अर्थं जानीयात् न पुस्तकादिपठितेनेति नियमार्थत्वाद् विधेः ॥ अक्रत्वर्थेषु नियमानुपपत्तिरिति उक्तम् इति चेत् न । "प्राङ्मुखोन्नानि भुञ्जीत" इत्येवमादिषु अक्रत्वर्थेष्वपि नियमदर्शनात् ॥ "व्रीहीन् प्रोक्षति" इत्यादिविधिवत् संस्कारविधानमात्रपर्यवसायित्वाद् अयं विधिर्न [3]स्वाध्यायस्य अर्थज्ञानार्थतां बोधयतीति चेत् न । "चरुम् उपदधाति" [तै० सं० ५. ६. २. ५] इति चरोरुपधानविधिः संस्कारं [4]विदधद् यथा तत्संस्कृतस्य [5]चरोः स्थलनिष्पत्तिशेषतां विधत्ते [6]तद्वद् अध्ययनविधिरपि स्वाध्यायस्य अध्ययनसंस्कारं विदधत् तत्संस्कृतस्य तस्य अर्थावबोधार्थत्वं विधत्ते ॥ संस्कारविधेः संस्कारविनियोगपर्यन्तत्वेपि [7]फलत्वाविशेषात् स्वर्गार्थतां कुतो न विधत्त इति चेत् [न] । अर्थावबोधस्य दृष्टप्रयोजनस्य संभवे अदृष्टार्थत्वकल्पनाया अन्याय्यत्वात् । तद् उक्तम् ।

लभ्यमाने फले दृष्टे नादृष्टफलकल्पना ।
विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यति । इति ॥

---

1 Kd पठितार्थिवेदोक्त°; S′ पठितार्थवेदोक्त°. 2 S′Kd दृष्टलाभान्निहि. 3 S′Kd स्वस्वाध्यायस्य. 4 S′Kd संस्कारविधिर्यथा for संस्कारं विदधद् which is a conjectural emendation. 5 S′Kd चरौस्थल° for चरोः स्थल°. 6 S′Kd तद्वदध्ययनविधेरपि for तद्वद् अध्ययनविधिरपि. 7 S′Kd °पर्यतत्वेति for °पर्यन्तत्वेपि.

प्राभाकरास्तु

उपनीय तु यः शिष्यं वेदम् अध्यापयेद् द्विजः ।
सकल्पं सरहस्यं च तम् आचार्यं प्रचक्षते [म० स्मृ० २. १४०]

इति स्मृत्यनुमितेन 'उपनीयाध्यापनेनाचार्यकं संपादयेद्' इत्यनेन विधिना लब्धानुष्ठानस्य "स्वाध्यायोध्येतव्यः" इत्यस्याध्ययनविधेः अधिकारपरत्वजिज्ञासायां प्रथमप्रतीतेन आचार्यकाधिकारकत्वम् आशङ्क्य अन्तरङ्गत्वाद् अर्थज्ञानाधिकारपरत्वमेव वर्णयन्ति ॥

तद् अयुक्तम् । आचार्यकरणविधेरेव अभावात् ॥ ननूक्तम् । "उपनीय तु यः शिष्यम्" इत्यनया 'स्मृत्या उपनीयाध्यापनेन आचार्यकं भावयेद्' इत्येवंरूप आचार्यकरणविधिरनुमीयत इति । तन्न । एवंरूपायाः श्रुतेः अनेवंरूपया स्मृत्या अनुमातुम् अशक्यत्वात् । तथा हि । इयं स्मृतिः उपनीयाध्यापयिता आचार्य इति ब्रवीति । न पुनरध्यापनं विदधाति । तद्विधाने योऽध्यापयिता तम् आचार्यं प्रचक्षत इत्यंशेन एकवाक्यताविरोधात् ॥ ननु 'उपनीयाध्यापयेद्' इति अध्यापनं विधाय विधिसिद्धम् अर्थं 'यस्तु' इति अनूद्य तस्याचार्यत्वं प्रतिपादयतीति चेत् न । स्वारस्येन विध्यप्रतीतौ तदाश्रयणेन वाक्यभेदकल्पनायां प्रमाणाभावात् । तद् उक्तम् ।

संभवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते ।

इति ॥ किं च । 'योऽध्यापयेद्' इति यच्छब्दयोगोपि विधिशक्तिम् अपहन्ति । तर्हि "यदाग्नेयोष्टाकपालः" [तै० सं० २. ६. ३. ३] इत्यादावपि यच्छब्दयोगाद् विधिशक्तिरपहन्येतेति चेत् । सत्यम् । तत्रापि यच्छब्दवृत्तस्य विधित्वभङ्गेन "यदाग्नेयोष्टाकपालोमावास्यायां च पौर्णमास्यां चाच्युतो भवति सुवर्गस्य लोकस्याभिजित्यै" [तै० सं० २. ६. ३. ३] इत्यर्थवादेन "यत् स्तूयते तद् विधीयते" इति न्यायेन परिकल्पितस्य अन्यस्यैव विधित्वस्वीकारात् ॥ तस्माद् "उपनीय तु यः शिष्यम्" इत्यादिस्मृत्यनुमिता श्रुतिः नाचार्यकरणविधौ प्रमाणम् ॥

ननु "अष्टवर्षं ब्राह्मणम् उपनयीत तम् अध्यापयीत" इत्यत्र नयतेः "सं-

---

1 S′ Kd उपनीयत for उपनयीत.

"माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः" [पा° १. ३. ३६] इति आचार्यकरणे आत्मनेपदविधानाद् उपनयने आचार्यकरणविधिरपेक्षित एव इति चेत्[1] तद् अयुक्तम् ।

षण्णां तु कर्मणाम् अस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशिष्टाच्च प्रतिग्रहः[2] । [म° स्मृ° १०. ७६]

इति द्रव्यार्जनाद्यर्थतयैव प्राप्तस्य अध्यापनस्य विध्यनर्हत्वात् ॥ ननु तथापि अलौकिकाचार्यकसाधनत्वेन अप्राप्तस्याध्यापनस्य विध्यर्हतेति चेत् न । आचार्यकस्य[3] लोकप्रसिद्धत्वाद् अलौकिकत्वानुपपत्तेः ॥

स्याद् एतत् । "उपनयीत" इत्यात्मनेपदात् सनियमकोपनयनशेषित्वप्रतीतेः आचार्यकम् अलौकिकमिति । न । आचार्यकरणे वर्तमानस्य[4] नयतेः अकर्त्रभिप्राये आत्मनेपदविधानाद् उपनयनाचार्यकयोः[5] परस्परम् अङ्गाङ्गिभावानुपपत्तेः । अन्यथा "स्वरितञितः कर्त्रभिप्राये क्रियाफले" [पा° १. ३. ७२] इति ञित्त्वादेव आत्मनेपदे सिद्धे संमाननादिसूत्रम् अनर्थकं स्यात् ॥

ननु क्रियाफलस्य कर्त्रभिप्रायत्वं नाम न कर्त्रभिलषितत्वं किं तु कर्तृगतत्वमेव । अतः उपनयनक्रियाफलस्य माणवकनिष्ठत्वेन अकर्त्रभिप्रायत्वाद् आचार्यकरण एव नयतेः आत्मनेपदं सिध्यतीति चेत् । एवं सति "वसन्ता[6] ब्राह्मणोऽग्निम् आदधीत" [तै° ब्रा° १. १. २. ६] इत्याधानफलस्य अग्निसंस्कारस्य अग्निगतत्वेन अकर्त्रभिप्रायत्वात् "स्वरितञितः" इत्यात्मनेपदं न स्यात् । न च उपनयनक्रियाफलस्य संस्कारस्य माणवकाभिलषितत्वाद् अकर्त्रभिप्रायत्वम् इति । आचार्यस्यापि अभिलषितम् । आचार्यानभिलषितत्वे तस्य क्रियाफलत्वानुपपत्तेः । न हि क्रियाजन्यं यस्य कस्यचिद् अभिलषितं वा क्रियाफलं किं तु कर्त्रभिलषितं सत् क्रियाजन्यं क्रियाफलम् । अन्यथा श्रमादिकमपि क्रियाजन्यम् अहितस्य यस्य कस्यचिद् अभिलषितं चेति स्वर्गकामो यजेत इत्यादौ क्रियाफलस्य अकर्त्रभिप्रायत्वेन आत्मनेपदं न स्यात् । न[7] च अस्मत्पक्ष इव मा-

---

1 S′Kd चेत्तयुक्तम्. 2 S′Kd यजनाध्यापने. 3 S′Kd आचार्यकत्वस्य for आचार्यकस्य. 4 S′Kd °वर्तमानं for °वर्तमानस्य. 5 S′Kd °चार्यकत्वयोः for °चार्यकयोः. 6 So S′Kd; and so Vaidikas too. 7 S′Kd न चास्मत्पद इव for न च अस्मत्पक्ष इव.

णवकसमीहितसाधनत्वेनैव उपनेतुः उपनयनक्रियाफलम् अभिलषितम् इति भवतां मतम् येन क्रियाफलम् अकर्त्रभिप्रायं स्यात्। आचार्यककामस्य अतत्साधने माणवकाधिकारे समीहानुपपत्तेः। उपपत्तौ वा माणवकाधिकारस्यैव अभिलषितस्य प्रयोजकत्वाद् आचार्यकाधिकारस्य प्रयोजकत्वं न स्यात्। तस्माद् आत्मनेपदादेव क्रियाफलस्य अकर्त्रभिप्रायत्वावगतेर्माणवकसमीहितसाधनत्वेनैव उपनयनस्य प्रतीतिः॥

न च "उपनीय तु यः शिष्यं वेदम् अध्यापयेद्" इति क्त्वाप्रत्ययेन आचार्यकशेषत्वम् उपनयनस्येति मन्तव्यम्। स्मृतिगतो हि क्त्वाप्रत्ययः "समानकर्तृकयोः पूर्वकाले" [पा० ३. ४. २१] इत्यनुशासनाद् उपनयनाध्यापनयोः समानकर्तृकत्वमेव आचष्टे। [1]तच्च एककर्तृप्रयोज्यत्वम्। तच्च अङ्गाङ्गिभावेनैव उपपद्यत इति उपनयनस्य अध्यापनाङ्गत्वप्रतीतिर्विलम्बेन भवति। "वसन्ते ब्राह्मणम् उपनयीत" [आप० ध० १. १. १. १९] इति द्वितीयाश्रुतिः प्रत्यक्षश्रुतिगता। तया द्वितीयाश्रुत्या [2]झटिति उपनयनस्य उपनेयशेषत्वं प्रतीयते। "श्रुतिस्मृत्योर्विरोधे श्रुतिरेव बलीयसी" इत्युपनयनस्य उपनेयशेषत्वमेव अङ्गीकर्तव्यम्॥

ननु उपनयनम् उपनेयशेषोऽस्तु। तथापि उपनेयस्य आचार्यकशेषत्वात् तद्द्वारा उपनयनस्यापि तदङ्गत्वम् इति चेत् न। उपनेयसंस्कारस्य आचार्यकशेषत्वे उपनेयशेषत्वे च सप्रयोजनत्वाविशेषेपि पुरुषान्तरगतत्वेन आचार्यकस्य बहिरङ्गत्वात् एकपुरुषनिष्ठत्वेन अध्ययनस्यान्तरङ्गत्वात् "अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः" इति तस्य अध्ययनाङ्गत्वमेव अङ्गीकर्तव्यम्॥ यदि समानकर्तृकेति[3] विहितस्मार्तक्त्वाप्रत्ययबलादेव अन्तरङ्गत्वं बाध्येत तर्हि भवत्पक्षे अध्यापनविधिप्रयुक्तस्य अध्ययनविधेः किमधिकारपरत्वम् इति जिज्ञासायाम् "अधीत्य स्नायाद्" इति स्मार्तक्त्वाप्रत्ययानुरोधेन अन्तरङ्गत्वयुक्तेर्बाधात् अन्तरङ्गार्थज्ञानपरत्वं परित्यज्य आचार्याधिकारत्वमेव स्यात्। तस्माद् अकर्त्रभिप्रायविहितात्मनेपदबलाद् अन्तरङ्गयुक्तेश्च उपनयनम् अध्ययनाङ्गम् [4]इत्याचार्यकस्य सनियमकोपनयनशेषित्वाभावाद् नास्य अलौकिकत्वसिद्धिः। तदसिद्धौ

---

1 S′Kd तच्चैवकर्तृप्रयोज्यत्वम् for तच्च एककर्तृप्रयोज्यत्वम्. 2 S′Kd झडित्युप°. 3 S′Kd om. °ति in °कर्तृकेति. 4 S′Kd इत्याचार्यकत्वस्य.

च अन्यतः प्राप्तस्य अध्यापनस्य आचार्यकशेषत्वेन विध्यसिद्धिः ॥

कथं तर्हि "अध्यापयीत" इति विधिः । "एतयान्नाद्यकामं याजयेत्" इतिवत् प्रयोजकव्यापारान्तर्गतोपि[1] विधिः प्रयोज्यव्यापारपर इति ब्रूमः ॥ ननु तत्र कामश्रुतिबलात् कामिन एव विध्यपेक्षायां प्रयोज्यव्यापारपरत्वम् अस्तु । अत्र तु तदभावात् तत्परत्वं नेति चेत् न । "निषादस्थपतिं याजयेत्" इत्यत्र कामश्रुतेरभावेपि द्रव्यार्जनार्थत्वेन अन्यतः प्राप्तं याजनं परित्यज्य प्रयोज्यव्यापारस्यैव[2] अप्राप्तस्य विधेयत्वस्वीकारात् ॥ एतेन

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।
वेदम् अध्यापयेद् एनं शौचाचारांश्च शिक्षयेत् [या° स्मृ° १.२.७]

इत्येतदपि नाध्यापनविधिपरम् इत्यवगन्तव्यम् ।

उपनीय ददद् वेदम् आचार्यः स उदाहृतः [या° स्मृ° १.२.२६]

इत्येतदपि क्रियायोगमेव आचार्यशब्दाभिधेयम् इति व्यक्तम् उपदर्शयति । तस्माद् अध्यापनस्य विधिरेव नास्तीति सिद्धम् ॥ तदभावेन स्वविधिप्रयुक्तैव अध्ययनस्य[3] । स च अध्ययनसंस्कृतेनैव स्वाध्यायेन अर्थं जानीयाद् इति विधत्त इति कृत्स्नस्यापि वेदराशेर्विवक्षितार्थत्वेन स्वतःप्रामाण्यात् तदन्तर्गतस्य व्याख्यानं कर्तुं युक्तमेवेति सिद्धम् ॥

वेदस्य स्वतःप्रामाण्यं चोदनासूत्रे आचार्यैरेव उपपादितम् । तत्र बहुधा विवदन्ते वादिनः । प्रामाण्यम् अप्रामाण्यं च उभयं स्वत इति सांख्याः[4] । उभयं परत इति तार्किकाः । प्रामाण्यं स्वतः अप्रामाण्यं परत इति मीमांसकाः । अप्रामाण्यं स्वतः प्रामाण्यं परत इति सौगताः[5] ॥

प्रामाण्यस्य स्वतस्त्वं नाम कार्यकारणादेव कार्येण सह उत्पत्तिः । अत्र सांख्या एवं प्रतिपादयन्ति । स्वतः असताम् असाध्यत्वाद् उभयं स्वत इति । तत्र[6] प्रमाणं च यद् असत् तन्न क्रियते यथा[7] शशविषाणम् । कारकव्यापारात् पूर्वं

---

1 S′Kd °व्यापारांगतोपि. 2 S′Kd प्रयोजनव्यापार° for प्रयोज्यव्यापार°. 3 S′Kd अध्यायनस्य. 4 S′Kd सांख्यः. 5 S′ om. अप्रामाण्यं स्वतः प्रामाण्यं परत इति सौगताः. Kd reads सौगताः प्रामाण्यं स्वतः अप्रामाण्यं परत इति and puts it after °हेतोर° in line 24 at page 14. 6 S′Kd तत्र प्रमाणं प्रमाणं च. 7 S′Kd तथा for यथा after क्रियते.

कार्यम् असच्चेत् तर्हि न [क्रियेत] क्रियते च । अतः सदेव पूर्वमपि । अपि च कार्यं कारणेन प्राक् संवद्धम् असंबद्धं वा । संवद्धं चेद् असतः संबन्धानुपपत्तेः[1] प्रागपि सदेव कार्यम् । असंबद्धं चेत् इदमेवास्य कारणम् इदमेवास्य कार्यम् इति नियमो न स्यात् असत्ताऽसंबन्धयोरविशेषात्[2] । यथाहुः ।

असत्त्वान्नास्ति संबन्धः[3] कारकैः सत्त्वसङ्गिभिः ।
असंबद्धस्य चोत्पत्तिम् इच्छतो न व्यवस्थितिः । इति ॥

किं च कारणाद् अभिन्नत्वात् कार्यस्य प्रागसत्त्वं नोपपद्यते । तथा हि । तन्तुभ्यः पटो न भिद्यते तत्कार्यत्वात् । यद् यतो भिद्यते न तत् तस्य कार्यम् यथा गौरश्वस्य । तन्तुकार्यं पटः । तस्मात् तन्तोर्न भिद्यते । यद् यतो भिद्यते तस्य तेन सह संयोगः अप्राप्तिर्वा[4] स्यात् यथा कुण्डवदरयोर्मेरुविन्ध्ययोर्वा । न हि पटस्य तन्तुभिः सह तद् उभयम् अस्ति । तस्माद् न तन्तुभ्यो भिद्यते पट इत्यभेदसिद्धेः कार्यं प्रागपि सदेव इति सिद्धम् ॥

अत्र ब्रूमः । न च क्रियमाणत्वं सत्त्वसाधनम् । असत्त्वेपि तस्योपपत्तेः हेतोर्विपक्षाद्व्यावृत्तेः संदिग्धत्वात् । तथा हि । न हि सतो घटादेः क्रियमाणत्वं दृष्टम् कृतकरणव्यापारानुपपत्तेः । नाप्यसतः क्रियमाणत्वम् अनुपपन्नम् इति । प्रागसतोपि घटादेः सामग्र्यां सत्याम् उत्पत्तिदर्शनात् ॥ यदप्युक्तम् कारणेन असंबद्धस्य कार्यस्योत्पत्तौ इदमेवास्य कार्यम् इदमेवास्य कारणम् इति नियमानुपपत्तिरिति तदप्यपेशलम् किंचिदेव कारणं कस्मिंश्चिदेव कार्ये शक्तम् इति शक्तितो नियमनसिद्धेः[5] । न च शक्यव्यतिरेकेण शक्तिरेव नास्तीति वक्तव्यम् । अयम् अग्निः अद्विष्ठातीन्द्रियाश्रयः कारणत्वाद् गुरुत्वाश्रयवदिति तत्सिद्धेः । नापि शक्तिरपि शक्येन असंबद्धा[6] न कार्यकारणभावस्य नियामिकेति वाच्यम् । शक्ताश्रयायाः शक्तेश्च प्रतिनियतशक्यानुकूलस्वभावत्वात्[7] । अन्यथा सत्कार्यवादपक्षेपि प्रधानोपादानत्वस्वीकारात्[8] सर्वस्य जगतः सर्वं सर्वस्वरूपेण सर्वत्र सर्वदा सदिति विवेकहेतोरभावात् इदमेवास्य कार्यम् इदमेवास्य कारणम् इति नि-

---

1 S′Kd संवद्धानुपपत्तेः. 2 S′Kd असत्तात्संवद्धयोरविशेषात्. 3 S′Kd संवद्धः. 4 S′Kd अप्राप्तिक for अप्राप्तिर्वा. 5 S′Kd नयनसिद्धेः for नियमनसिद्धेः. 6 Kd शक्येन संवद्धा. We with S′. 7 Kd °शक्ता°. We with S′. 8 S′Kd सकार्य°. 9 S′Kd °दानत्वास्वी°.

यमो न स्यात् ॥ ननु सर्वत्र सर्वदा कार्यस्य सत्त्वाविशेषेपि तत्तदभिव्यञ्जकसामर्थ्यनियमात् तत्तदभिव्यक्तिनियमो भविष्यतीति चेत् । एवं तर्हि असत्पक्षेपि तत्तदुत्पादककारणसामर्थ्यनियमात् तत्तदसत्कार्योत्पत्तिनियमसिद्धिः ॥ यत् पुनः कार्यस्य कारणाद् अभेदसाधकम् अनुमानम् तदपि तन्तुपटयोः प्रत्यक्षेण भेदोपलम्भात् प्रत्यक्षविरुद्धकालात्ययापदिष्टम् ॥ अपि च कारकव्यापारात् प्रागपि कारणे कार्यं सत् स्यात् तर्हि कारणे कार्यम् उपलभ्येत । न चोपलभ्यते । तस्माद् असदेव । प्रागपि सदेव कार्यम् अभिव्यक्तेरभावाद् नोपलभ्यत इति चेत् न । किम् इयम् अभिव्यक्तिः प्रागपि सती उत असती । सती चेत् प्रागपि केवलतन्तुष्वपि तया पटस्योपलब्धिः स्यात् । असती चेद् असत्या एव तस्याः पश्चादुत्पत्तिस्वीकारात् तद्वत् सर्वस्याप्यसतः कार्यस्योत्पत्तिः किं नाङ्गीक्रियते । क्रियेत । इत्यलम् अतिप्रसङ्गेन ॥ तस्मात् सत्कार्यनिषेधात् प्रामाण्याप्रामाण्ययोरुभयोरपि स्वतस्त्वे किंचिदेव प्रमाणं प्रमाणमिति व्यवस्थानुपपत्तेश्च नोभयं स्वतः ॥

अपि तु अप्रामाण्यं स्वतः प्रामाण्यं परत इति अपरे मन्यन्ते । तथा हि । यदि प्रामाण्यं स्वतोऽवसीयेत तर्हि एकतरकोटिनिर्धारणात् इदं प्रमाणम् अप्रमाणं वेति[2] न संदिह्येत । अन्यथा सर्वत्र संदेहस्योपरमो न स्यात् । अतः कारणगुणज्ञानाद् अर्थक्रियासंवादाद् वा प्रामाण्यनिश्चयः ॥ ननु आदावेव अर्थतथात्वानिश्चये उत्तरकालीना प्रवृत्तिः कथं जाघटीति तदुत्तरकालीनस्तन्निश्चयो वा कथम् तदभावे कथं प्रामाण्यनिश्चयः इति चेत् न । कृष्यादाविव अर्थसंदेहादपि प्रवृत्त्युपपत्तेः । प्रवृत्तस्य च अर्थक्रियोपलब्धौ पूर्वावगतस्य अर्थक्रियाकारित्वं सत्यं निश्चीयत इति तद्विषयस्य पूर्वज्ञानस्यापि तदर्थसंबन्धित्वेन पश्चात् प्रामाण्यं निश्चीयते । यथोक्तम् ।

तस्मिन् सदपि [3]मानत्वं विनिश्चेतुं न शक्यते ।
उत्तरार्थक्रियाज्ञानात् केवलं तत् प्रतीयते । इति ॥

नैवम् अर्थक्रियाज्ञानस्यापि स्वविषयार्थक्रियापरिनिश्चये परापेक्षा येन अ-

---

1 S′Kd कारणव्या°. 2 S′Kd चेति न संदिग्धे. The emendation is conjectural. 3 S′Kd मान्यत्वं.

नवस्था भवेत् । तस्य फलरूपत्वात् । फलार्थं वा सर्वं करिष्यते न फलम् अन्यार्थमिति । अतः स्फुटाविकल्परूपत्वाच्च अर्थक्रियाज्ञानं स्वत एव स्वविषय[1]तथात्वावधारकं प्रमाणं च ॥ न चैवं प्रामाण्यावगमस्य प्रवृत्त्यङ्गत्वात् प्रवृत्त्युत्तरकालम् अर्थक्रिया[2]निर्णयो निष्फल इति वाच्यम् । ज्ञानान्तरेषु निःशङ्कप्रवृत्त्यर्थं विसंवादिज्ञानव्यावृत्तप्रमाणप्रतिबन्धरूपविशेषा[3]कलनाय प्रवृत्त्युत्तरकालमपि निर्णयस्योपयोगात् ॥ [4]प्रवृत्तावभ्यासवत्याम् आद्यज्ञाने फलस्याप्रतीतावपि अर्थक्रियारूपं फलमिति विषयीकुर्वतो विज्ञानान्तराद् विसंवादिभ्यो व्यावृत्तं वैलक्षण्यं प्रतीयते । यथोक्तम् ।

[5]वृत्तावभ्यासवत्यां तु वैलक्षण्यं प्रतीयते ।
अतद्विषयविज्ञानाद् आद्येऽप्राप्तेपि[6] तत्फले । इति ॥

तस्मात् [7]झटितिनिःशङ्कप्रवृत्तिरपि तत्र विसंवादिव्यावृत्तप्रमाणप्रतिबन्धरूपविशेषलिङ्गकाद् अनुमानादेवेति न स्वतःप्रामाण्यावगमः ॥

अत्राभिधीयते । [8]वृत्तेः प्रामाण्यम् अर्थयाथार्थ्यनिश्चयाद् भवतु । तन्निश्चयस्तु गुणज्ञानात् संवादाद् वा इति यद् उक्तं तन्न मृष्यामहे ॥ प्रमितिसाधकतमत्वं हि प्रामाण्यम् । प्रमितिश्च अनधिगततथाभूतार्थावधारणम् । नन्वेवम् इन्द्रियादेरेव प्रामाण्यम् न ज्ञानस्य तस्यावधारणरूपत्वेन अवधारणान्तरसाधकतमत्वानुपपत्तेरिति चेत् न । द्विविधं हि अवधारणम् ज्ञानरूपं प्राकट्यरूपं चेति । तत्र [9]अनधिगततथाभूतार्थगोचरत्वेन ज्ञानस्य प्रामाण्यम् । तथा च अनधिगततथाभूतार्थावधारणं प्रमितिः । तत्साधनं ज्ञानं प्रमाणम् । तद्भावः प्रामाण्यमिति नाशब्दार्थत्वम् । अतः प्रमितिलक्षणवाक्यगतावधारणशब्देन ज्ञानप्राकट्ययोः कार्यकारणभावेन अदूरविप्रकृष्टयोरेकरूपप्रामाण्यव्युत्पत्त्यर्थं तन्त्रेणोपादानम् । शक्ती च प्रमाणाप्रमाणगोचरे[10] प्रामाण्याप्रामाण्ये । ते च तथाभूतोयम् अर्थः इत्येवंरूपात् तथात्वावधारणाद् अतथाभूतोयम् अर्थ इत्येवं-

---

1 S′Kd स्वविषयं तथा. The emendation is conjectural. 2 S′Kd क्रियार्थ निर्णयो. The emendation is conjectural. 3 S′Kd om. °ल°. 4 S′Kd प्रवृत्त्यावभ्यासवृत्त्याम्. 5 S′Kd संवृतावभ्यास°. 6 S′Kd °प्राप्तेति. 7 S′Kd झडिति. 8 S′Kd वित्तेः. 9 Kd अधिगत°. We with S′. 10 S′Kd प्रमाणात्प्रमाणागोचरे.

रूपाद् अतथात्वावधारणाच्च चकास्तः। तत्र तथाभूतार्थावधारणम् अर्थक्रिया-ज्ञानादिलक्षणपरानपेक्षत्वेन ज्ञानस्वरूपमात्राधीनम्। तदवसेयं प्रामाण्यं स्व-तोवसीयत इत्युच्यते। अतथाभूतावधारणं तु ज्ञानस्वरूपमात्रा[1]धीनत्वेपि का[2]-रणदोषावगमादिलक्षणपरापेक्षम् इति तदवसेयम् अप्रा[3]माण्यं परतोऽवसीयत इत्युच्यते॥ न च अतथाभूतावधारणमपि ज्ञानस्वभावाधीनम्। भ्रमबाधयोर-संभवप्रसङ्गात्। न हि शुक्तौ रजतम् अतथाभूतमिति गोचरयतो ज्ञानस्य भ्र-मत्वं बाधसंभवो वा। तस्मात् ज्ञानस्वभावाधीनमपि अतथाभूतत्वं कारणदो-षावगमाद् बाधकप्रत्ययाद् वा परत एव निश्चीयत इति अप्रामाण्यं परत ए-वेति सिद्धम्॥

अपरे पुनः एतदप्यसहमाना अप्रामाण्यवत् प्रामाण्यमपि कारणगतगुण-ज्ञानात् संवादाद् वा परत एव ज्ञायत इति वर्णयन्ति साधयन्ति च॥ तथा हि। प्रामाण्यं परतो ज्ञायते। अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवदिति। नैतत् साधनम्। अस्मन्मतेपि तथाभूतोयम् अर्थ इत्येवंरूपावधारणात् परत एव प्रामाण्यं निश्चीयत इति सिद्धसाधनत्वात्॥ ननु ज्ञप्तावनपेक्षत्वेपि उत्पत्तौ प-रापेक्षास्ति। तथा हि। यदि ज्ञानहेतुमात्राधीनं प्रामाण्यं भवेत् तर्हि प्रमाण-परिज्ञानम् अप्रमाणं भवेत् प्रामाण्ये कारणाभावात्। तथा च सति ज्ञानमेव न स्याद् घटादिवत्॥ ननु दोषाभावस्य प्रामाण्यकारणत्वात् सति च दोषे त-[4]दभावाद् नातिप्रसङ्ग इति चेत् तर्हि दोषाभावम् अधिकम् आसाद्य प्रामाण्य-मपि जायत इति कथं ज्ञानहेतुमात्रजन्यत्वं तस्य॥ ननु दोषाभावस्य प्रामाण्य-हेतुत्वेपि गुणस्य प्रामाण्यं प्रति अहेतुत्वात् तदभावेन वेदानां स्वतःप्रामाण्यं सिध्यतीति चेत् तर्हि गुणस्य प्रामाण्यहेतुत्वेन दोषाभावस्य तदहेतुत्वात् तज्ज्ञा-वेपि गुणाभावाद् अप्रामाण्यमपि वेदानां प्रसज्येत। न हि गुणदोषयोः प्रा-माण्याप्रामाण्ये प्रति अन्वयव्यतिरेकयोर्विशेषम् उपलभामहे। तस्माद् उभय-मपि परत इति सिद्धम्॥

अत्राभिधीयते। कार्यशक्तेः असति बाधके कार्यकारणादेव कार्येण सह उ-

---

1 S′Kd °मात्रानधीनत्वेपि. 2 S′Kd करणदोषाव°. 3 S′Kd प्रामाण्यं for अप्रामाण्यं.
4 S′Kd तदभावाभावात्.

त्पत्तिरङ्गीकर्तव्या । अन्यथा वह्निगताया दाहकत्वशक्तेरपि कारणान्तरादेव उत्पत्तिः स्यात् । तथा च उत्पत्तिक्षणे तस्य दाहकत्वं न स्यात् । वह्निश्च स्वाश्रयं दहन्नेव जायते । तत् सिद्धम् एतत् स्वत एव च प्रामाण्यमिति ॥ न च अप्रामाण्यमपि स्वत एवास्त्विति मन्तव्यम् । तस्य दोषान्वयव्यतिरेकानुविधायित्वेन ज्ञानहेतुमात्रजन्यत्वाभावात् ॥ स्याद् एतत् । यदि ज्ञानहेतुमात्राधीनं प्रामाण्यं भवेत् तर्हि स्मृतेरपि प्रामाण्यं स्यात् । तद् न । प्रामाण्यशब्देन तथाभूतार्थावधारकशक्तेरेव विवक्षितत्वात् तस्या एव च ज्ञानहेतुमात्रशब्दाधीनत्वसमर्थनात् । अन्यथा नैयायिकमतेपि अप्रामाण्यस्य दोषाधीनत्वात् तदभावे स्मृतावपि प्रामाण्यसंभवप्रसङ्गात् ॥ यत् पुनः प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्यत्वे सति तद्विशेषत्वात् अप्रमावत् इत्यनुमानम् तद् असाधकम् । प्रमा गुणदोषयोरन्यतराधीना न भवति ज्ञानत्वात् अप्रमावत् इत्यनेन अनुमानेन निर्विशेषणहेतुजत्वेन शीघ्रप्रवृत्तेन विशेषविषयत्वेन च प्रबलेन बाधितविषयत्वात् । तस्य च सविशेषणहेतुजत्वेन विलम्बितप्रवृत्तत्वाद् दौर्बल्यम् । तस्माद् उत्पत्तावपि ज्ञानहेतुमात्राधीनत्वेन प्रामाण्यं स्वत एव । अप्रामाण्यं तु दोषाधीनत्वात् परत इति सिद्धम् ॥

ततश्च वेदानामपि अपौरुषेयत्वेन शब्दगतगुणदोषाणां शङ्कितुमपि अशक्यत्वेन सुतरां स्वत एव प्रामाण्यमिति निरवद्यम् ॥

स्याद् एवं यदि वेदानाम् अपौरुषेयत्वं भवेत् । तदेव असिद्धम् । तथा हि । वेदवाक्यानि पौरुषेयाणि । वाक्यत्वात् । यद् उक्तसाधनं तद् उक्तसाध्यम् यथा भारतादिवाक्यम् । उक्तसाधनानि च वेदवाक्यानि । तस्मात् पौरुषेयाणि वेदवाक्यानि । पौरुषेयत्वं नाम स्वतन्त्रपुरुषपूर्वकत्वम् अभिमतम् । अतः क्रमवन्तो वर्णाः पदम् । क्रमवन्ति च पदानि वाक्यम् । क्रमश्च नित्यवर्णेषु स्वत एवासंभवात् उच्चारणक्रमनिबन्धन एव । उच्चारणक्रमश्च पुरुषप्रयत्नसाध्य एवेति वेदवाक्यान्यपि क्रमवत्त्वेन पुरुषप्रयत्ननिष्पाद्यान्येवेति सिद्धसाध्यत्वं वदताम् अनवकाश एव ॥ ननु किमत्र साक्षात्स्वतन्त्रपुरुषपूर्वकत्वं विवक्षितम् आहो स्वित्

---

1 S′Kd सिद्धे. 2 S′Kd उक्तं साधनं. 3 So S′Kd. 4 S′Kd °विवर्णेषु. 5 S′Kd एवासंभवोउच्चा°. 6 S′Kd साक्षात्कारात् for साक्षात्.

परंपरया । नाद्यः । इदानीम् उच्चार्यमाणेषु बाधितविषयत्वात् अनुवक्तृप्रणीतास्मदादिवाक्येषु अनैकान्तिकत्वाच्च । नापि द्वितीयः । साक्षात्स्वतन्त्रपुरुषप्रणीतेषु अस्मदादिवाक्येषु अनैकान्तिकत्वादिति चेत् मैवम् । साक्षात्परंपरात्वयोः परस्परव्यभिचारेपि साक्षात्परंपरात्वयोरन्यतरस्यैवात्र विवक्षितत्वात् । अन्यथा भारतादिवाक्यान्यपि यानि कृष्णद्वैपायनादिना साक्षात् प्रणीतानि न तानि परंपरया यानि परंपरया न तानि साक्षात् इति उभयानुगतपौरुषेयत्वाभावेन अन्यतरस्य अपौरुषेयत्वप्रसङ्गात् । तस्माद् यद् वाक्यं तत् साक्षात् परंपरया वा स्वतन्त्रपुरुषपूर्वकम् इति साधयतां न क्वचिद् बाधो न व्यभिचारश्चेति सिद्धं वेदाः पौरुषेया इति ॥

तद् इदम् असमञ्जसम् । तथा हि । सर्वत्र वाक्येषु वृद्धव्यवहारावगतपदपदार्थसंबन्धस्य चक्षुरादिजन्यतत्तत्पदार्थविशेषविषयपरस्परविलक्षणक्षणिकज्ञानवतः शरीरिण एव स्वतन्त्रकर्तृत्वं दृष्टमिति वाक्यत्वं तादृशकर्तृत्वेन व्याप्तं सत् स्वव्यापकं पक्षे साधयत् स्वाभिमतम् अशरीरिकर्तृकत्वं विरुणद्धीति विशेषविरुद्धत्वाद्धेतोः । न चास्योत्तरस्य उत्कर्षसमायाम् अन्तर्भावः । सर्वत्र वाक्यत्वस्य हेतोः शरीरिकर्तृकत्वेन व्याप्ततया दृष्टत्वात् ॥

स्याद् एतत् । अस्तु तर्हि अत्रापि अनित्यज्ञानेच्छादिमतः शरीरिण एव कर्तृत्वम् । न च योग्यानुपलब्धिबाधः चिरवृत्ते कर्तरि उपलब्धियोग्यत्वस्यैव[2] अभावात् इति ॥ एतदपि न चतुरचेतसां चेतसि चमत्कारं प्राञ्चति । अपसिद्धान्तापातात् ॥ किं च यदि वेदवाक्यानां शरीरी कर्ता स्यात् तस्य चिरवृत्तत्वेन उपलब्ध्यभावे[3]पि असौ स्मृतिपथम् अवतरेत् । न च स्मर्यते । तस्मान्नास्त्येव कर्तेति निश्चीयते ॥

स्याद् एतत् । केनचिद् अस्मरणं वा हेतुः आहो स्वित् सर्वैरस्मरणम् । नाद्यः । देवदत्तेन अस्मृतस्यापि घटस्य विष्णुमित्रगृहे विद्यमानत्वात् । नापि द्वितीयः । जैमिनीयैरस्मरणेपि कणादाक्षचरणपक्षिलमुनिपक्षिपतिभिः स्मर्यमाणत्वाद् इति ॥ न । तदीयैरपि वृद्धव्यवहारावगतपदपदार्थसंबन्धस्य तदर्थवि-

---

1 Kd उपलब्ध°; S′ उपलब्धि which may be for उपलब्धि°. 2 S′Kd °स्येव. 3 S′Kd उपलब्धाभावे.

षयविलक्षणक्षणिकचक्षुरादिजन्यवेदनस्य मातापितृसंबन्धप्रसूतपार्थिवशरीरस्य कर्तुरस्मरणात् । तदेवं वेदवाक्येषु यादृशस्य स्वतन्त्रपुरुषस्य ते स्मरन्ति तादृशस्य वाक्यत्वम् अस्मत्परिपन्थित्वेन न विरोधकम् । जैमिनीयैस्तु सर्वैः स्मर्तुं योग्यस्यापि अस्मरणाद् योग्यस्मृत्यनुदय एव बाधक इति वाक्यत्वं हेतुः विरुद्धसमस्तसविशेषत्वेन स्वतन्त्रपुरुषपूर्वकत्वमपि साधयितुम् असमर्थ इति सिद्धो विशेषविरोधस्तस्य ॥ स्याद् एतत् ।

"अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।"

"ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्" [ऐ० ब्रा० ५, ३२]।

"तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्माद् अजायत" [ऋ० १०, ९०, ९] ॥

इत्यादयो वेदकारणवादा वेदस्य पौरुषेयत्वे प्रमाणमिति ॥ तद् अयुक्तम् । तेषां परस्परविरुद्धार्थतया प्रमाणान्तरप्रतिहततया च "प्रजापतिरात्मनो वपाम् उदक्खिदत्" [तै० सं० २, १, १, ४] इत्यादिवत् अर्थवादत्वेनापि उपपत्तेः स्वार्थे तात्पर्याभावात् । काठकादिसमाख्यापि प्रवचननिबन्धनैव भविष्यति । इति सिद्धं वेदानाम् अपौरुषेयत्वम् ॥

अत एव च नित्यत्वम् । तन्नित्यत्वम् असहमानाः शुष्कतार्किका वैदिकान् प्रति विवदन्ते प्रयुञ्जते च शब्दानित्यत्वेऽनुमानम् ॥ शब्दोऽनित्यः कृतकत्वात् यत् कृतकं तद् अनित्यं दृष्टम् यथा घटः तथा चायं कृतकः तस्माद् अनित्य एवेति ॥ एतद् अधीरम् । एतच्च पर्वतादौ धर्मिणि प्रत्यक्षे यथा वह्न्याद्यनुमानं तादृशं तार्किकैरङ्गीकरणीयम् । ततश्च एतदनुमानबलादेव शब्दस्य नित्यत्वसिद्धिः । तथा हि । अणवोऽनित्याः मूर्तत्वात् घटवत् इत्यनुमाने यथा धर्मिग्राहकप्रमाणबाधो दोषः तथा शब्दकृतकत्वानुमानेपि । तथा हि । शब्दः कथं प्रत्यक्षो देवानांप्रियस्य यो धर्मी ॥ कृतकस्य अनित्यत्वान्नित्यत्वशून्य इति चेत् ।

---

1 S′Kd °संवद्ध°. 2 S′Kd वाक्यत्वेमस्वपरिपंथित्वेननिरोधकम्. The emendation is mine. 3 S′Kd °निरुद्ध°. 4 S′Kd °मुदत्खिदत्. 5 S′Kd अर्थवेद°. 6 S′Kd वेदिकान्. 7 S′Kd कृतं. 8 S′Kd एतधीरम् for एतद् अधीरम्. 9 S′Kd धर्माणि. 10 S′Kd अनित्यत्वानित्यत्वशून्य.

तर्हि वक्तव्यं किं धर्मद्वयस्य अभाववान् उत तद्भाववान् । उभयथापि बाधः अन्यथा प्रत्यक्षम् अर्थम् अन्यथा साधयतः ॥ ननु वादिबुद्धिविशेषाद् धर्मद्वयम् आपतति न तु वस्तुविशेषात् । वस्तुनि द्वैरूप्यायोगात् । ततश्च यस्मिन् वादिविप्रतिपत्तौ सत्यां धर्मद्वयम् आपतति[1] स शब्दः[2] पक्ष इत्यङ्गीकारे कथं बाधः । एवम् अनङ्गीकारे सर्वानुमानोच्छेदप्रसङ्गः ॥ अस्त्येवम् अन्यत्र । शब्दे तु वैषम्यम् अस्ति । शब्दः किं धर्मित्वेन प्रतीतः प्रत्यक्षव्याप्तिपक्षधर्मतयोराश्रयः उत्पत्तितः उत्तरक्षणेषु स एव तिष्ठति वा न वा । यदि न तिष्ठति । आश्रयासिद्ध्यादिदोषः । यदि तिष्ठति तर्हि अनेकक्षणावस्थायित्वात् क्षणिकत्वभङ्गः ॥ अथ च शब्दत्वजातिमान् शब्दस्तिष्ठतीति चेत् तत्रापि विचारयत्वायुष्मान् । किं जातिस्तिष्ठति उत व्यक्तिरपि । यदि जातिस्तिष्ठति व्यधिकरणासिद्ध्यादिदोषः । न हि शब्दत्वजातिः पक्ष इति भवद्भिरेवोक्तम् । अनित्यव्यक्तेश्चावस्थाने[3] पूर्वोक्तदोषावकाशः ॥ अथ च काचन व्यक्तिस्तिष्ठति । तदापि शब्दव्यक्तीनां[4] धर्मित्वाङ्गीकाराद् भागासिद्धो हेतुः । न हि भविष्यच्छब्दः इदानीं वर्तमानस्य कृतकत्वस्य हेतोराश्रयो भवति ॥ कृतकत्वं नाम करणव्यापारविषयत्वम् । तच्च कालत्रयासंस्पृष्टं सर्वशब्देषु वर्तत इति हेतोर्न भागासिद्धिरिति चेत् । अहो पाण्डित्यं तार्किकस्य । यत्र कालत्रयसंस्पृष्टशब्दबुद्धिः स्वयं कालत्रयातीतं प्रत्यक्षीकृतवान् इति ॥ ततः प्रत्यक्षाभावे अनुमानमपि दूरापास्तम् ॥ ततः अस्मिन्ननुमाने पर्वतादिवत् स्थायी वर्तमानः शब्दः पक्षत्वेनाङ्गीकरणीयः । तस्य धर्मिणः अनित्यत्वसिद्धौ अपरेषां भविष्यदादिशब्दानामपि शब्दत्वेन हेतुना अनित्यत्वं[5] साधनीयम् ॥ एवं च महीमहीधरादिकृतकत्वानुमानवत् शब्दकृतकत्वानुमानमपि परास्तं वेदितव्यम् । शब्दग्राहि च प्रमाणं तं कृतकत्वशून्यमेव गृह्णातीति महीमहीधरवत् इति धर्मिग्राहक[6]प्रमाणबाधस्त्वदुक्तो हेतुः अन्यतरासिद्धश्च । तस्मान्नित्यः शब्दः ॥

सोपि स्फोट इति शाब्दिकाः शब्दायन्ते । तत्रेमां श्रुतिं[7] प्रमाणयन्ति ।

शब्दब्रह्म यद् एकं यच्चैतन्यं [च] सर्वभूतानाम् ।

---

1 S′Kd पतति for आपतति. 2 S′Kd शब्दपक्ष. 3 S′Kd अनित्यत्वव्यक्ते°. 4 S′Kd शक्तिव्यक्तीनां. 5 S′Kd अन्यतत्वं. 6 S′Kd °ग्राहिक°. 7 So S′Kd.

यत्परिणामस्त्रिभुवनम् अखिलम् इदं जयति सा वाणी ।

इति । अस्य अयम् अर्थः । शब्द एव ब्रह्म । तद् एकम् । एकं च स्फोटव्यतिरिक्तम् अन्यन्न संभवति । वर्णानाम् अनेकत्वात् । अत एव न ध्वनयोपि । पदवाक्ययोरेकत्वशङ्कापि नास्त्येव वर्णैर्विरचितत्वात् तेषाम् । ध्वनिवर्णपदवाक्येभ्यो[1] वा नान्यः शब्दः प्रसिद्धोस्ति लोकवेदयोः । शब्दब्रह्मेति पठन्ति लौकिका वैदिकाश्च । पदज्ञा अपि एवम् आहुः । "एकम् अक्षरम् एकं[2] पदम् एकं वाक्यम" इति । उत्पन्नापवर्गिण्वनेकेषु वर्णेषु एकबुद्धेर्विषयः स्फोटः बृहत्त्वाद् ब्रह्मशब्दाभिधेयः । स्फुट्यते अर्थः प्रकाश्यते [अनेन] इति स्फोटः ॥

ननु अर्थाभिव्यञ्जकश्चेच्छब्दस्तर्हि वर्णात्मक[3] एव सः । ज्ञातेषु वर्णेषु अर्थो ज्ञायत[4] इति प्रसिद्धिः । नैतत् वर्णात्मकशब्दः अर्थप्रत्यायक इति कोर्थः । एकैको वर्णः अर्थप्रत्यायकः उत अनेक इति । न तावद् एकैकः । अकारादीनां वर्णानां प्रत्येकं वर्णोच्चारणे अर्थप्रतीतेरभावात् । न च अव्ययानां तिरस्कारार्थप्रत्यायकत्वं दृष्टमिति मन्तव्यम् । "अव्ययाद् आप्सुपः" [पा. २. ४. ८२] इति विभक्तौ लुप्तायां तेषाम् अर्थप्रत्यायकत्वात् न तु प्रातिपदिकावस्थायाम् । ततश्च अ इ उ इति वर्णानां तिरस्काराश्चर्यादरार्थानां तेषां पदात्मकत्वेन अनेकवर्णात्मकत्वात् [अर्थप्रत्यायकत्वम्[5]] । न हि अदर्शनमात्रेण विभक्तिवर्णानाम् असत्त्वम् । तथात्वे संबुद्धिप्रातिपदिकार्थयोरेकत्वप्रसङ्गात् । अनिष्टं च तच्छाब्दिकानाम् । तथा[6] च अव्ययानामेव अर्थप्रत्यायकत्वम् न[7] वर्णानाम् एकैकशः ॥ अव्ययानि च पदविशेषा इत्युक्तम् । एतेन उपसर्गादीनि सर्वाणि व्याख्यातानि[8] ॥ ततः अनेके वर्णा अर्थप्रत्यायका इति वक्तव्यम् । अयमपि पक्षो न कक्षीकरणीयः । अपदात्मकस्य कचटतेत्यादिरूपस्य अर्थप्रत्यायकत्वादर्शनात्[9] । पदात्मकोऽनेको वर्णः अर्थप्रत्यायक[10] इति सारं स्थितम् । पदं च सुबन्तं तिङन्तं

---

1 S′ Kd °वाक्येवाभ्यो for °वाक्येभ्यो वा. 2 Kd एके. We with S′. 3 S′ Kd वर्णात्वाक. 4 S′ Kd जायत इति. 5 The words enclosed in brackets are found in S′ Kd, but mixed up in a wrong place, thus : तिरस्कारार्थप्रत्यायकत्वंश्चर्यादरार्थानां तेषां पदात्मकत्वेनानेकवर्णात्मकत्वात्. 6 S′ Kd तथाव्याधानामेकार्थ° for तथा च अव्ययानामेव अर्थ°. 7 S′ Kd न च for न. 8 S′ Kd व्याख्यानि. 9 S′ Kd दर्शनात्मदात्मको°. 10 Kd इति अयमपि पक्षो ——— कंसितं for इति सारंस्थितम्. S′ confused.

वा । तच्च प्रातिपदिककृत्तद्धितधातुसमासप्रकृतिकम् । तत् सर्वं वर्णस्वरूपमेव । न तु ततोतिरिक्तं पदमस्ति । वर्णेभ्योतिरिक्तस्य पदस्य अदर्शनात् ॥

ननु वर्णगतो धर्मः कश्चन पदमिति । यथा व्यक्तिगतो जातिविशेषो गोत्वमिति । एवं चेत् एकगोव्यक्तिदर्शने गोत्वप्रतीतिवत् एकैकवर्णदर्शने पदप्रतीतिः स्यात् ॥ ततो वर्णानां समुदायविशेषः पदमिति वक्तव्यम् । तच्च अर्थप्रत्यायकमिति वर्णनीयम् । तेन पदसमुदायविशेषो वाक्यम् इत्युपपादितं भवति । वर्णन्यायस्य पदे संचरणात् ॥ ननु अस्त्येवम् । तावता वर्णा एव शब्द इति भवताप्युक्तम् पदवाक्यात्मकानां वर्णानाम् अर्थप्रत्यायकत्वकथनेन[1] भावानवबोधात् ॥ भावश्चायम् । यदि वर्णा नित्या यदि वा अनित्या उभयथापि तेषां समुदायो नोपपन्नः । नित्यानां तु गुणत्वे सर्वगतद्रव्यत्वे वा पञ्चाशत्संख्याकानां तेषां मेलनं केन कर्तुं शक्यम् । न चैवं वर्णानां स्थानप्रयत्नवैयर्थ्यप्रसङ्गः[2] । नित्यानामेव तेषां स्थानप्रयत्नाभ्यामेव अभिव्यज्यमानत्वात् । न च अभिव्यक्तेरपि समुदायः कर्तुं शक्यः । वर्णाभिव्यक्तेर्ज्ञानरूपत्वात् । ज्ञानानां च क्रमेण जायमानत्वात् । "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" [गौ° सू° १. १. १६] इति न्यायात् । क्रमेण जायमानानां क्षणिकानां तेषाम् एकस्मिन् देशे काले वा मेलनस्य कर्तुम् अशक्यत्वात् । न च मेलनाद् अन्यः समुदायोस्ति । तस्माद् वर्णनित्यत्वेपि स्पष्टः समुदायाभावः । कथं वर्णसमुदायः पदं पदसमुदायो वाक्यम् अर्थप्रत्यायकं स्यात् । अस्ति तु अर्थप्रत्ययः शब्दात् । ततः शब्दतत्त्वम् अन्यदेव ॥

ननु एतादृशं शब्दतत्त्वं कुतः प्रतीयते ॥ अनित्येभ्यो वर्णेभ्य इति ब्रूमः न च तत्र उक्तानुपपत्तिः । पूर्वपूर्ववर्णसचिवान्त्यवर्णबुद्धेरिति ब्रूमः । न चैवम् अर्थप्रत्ययोप्येवमस्त्विति वक्तव्यम् । तथात्वे तस्य अशाब्दत्वं स्यात् । अनिष्टं च तत् । ततश्च उक्तबुद्धेः प्रतीयमानं शब्दतत्त्वम् एकबुद्धेर्विषयोर्थप्रत्यायक इति स्थितम् । यच्चार्थप्रत्यायकं स स्फोट इत्युक्तम् ॥

यत् शब्दब्रह्म एकम् एकप्रत्ययविषयः सर्वभूतानां स्थावरजङ्गमानां शरीरिणां चैतन्यम् । तद् उक्तम् "शब्दब्रह्मणो व्यतिरिक्तं न चैतन्यम् अस्ति" इति । ननु

---

1 S′Kd °कथनेन न भावा°. 2 S′Kd °वैयर्थ°.

चैतन्यविवर्ता इमे नानाविधा भावाः सर्वे सशब्दाः । तत् शब्दतत्त्वं स्यात् । न च अधिष्ठानम् अध्यस्तं भवति इत्यत आह यत्परिणामस्त्रिभुवनम् अखिलम् इदमिति । परिणामोत्र विवर्तोऽभिहितः । ननु परिणामविवर्तयोः को भेदः । अयम् । पूर्वरूपापरित्यागेन असत्यनानाकारप्रतिभासो विवर्तः । यथा शुक्तिकायां रजतस्य सर्परज्ज्वां वा सर्पस्य प्रतीतिः । पूर्वरूपपरित्यागे सति नानाकारप्रतिभासः परिणामः । यथा क्षीरस्य दधिप्रतिभासः ॥ त्रिभुवनं यत्परिणाम इत्युक्ते भौतिका भावाः शब्दव्रह्मणः परिणामाः स्युः । तद्व्युदासाय उक्तम् अखिलम् इदम् इति । इदम् जाड्यप्रत्ययविषयः । चैतन्याद् व्यतिरिक्तं सर्वमित्यर्थः । सा स्फोटरूपा वाणी जयति ॥

तेन एतद् उक्तं भवति । शब्दव्रह्मणि चेतने सर्वप्रपञ्चविवर्ताधारे स्फोटे शब्दे शब्दाभिधेयत्वम् न तु वर्णानाम् । तेषामपि स्फोटे अध्यस्तत्वात् । तस्मात् स्फोट एव शब्दः ॥

इति ये मन्यन्ते तेषां दुरन्तं व्यसनम् आपतितम् ॥ अप्रतीतस्यार्थस्य प्रतीतिः । प्रतीतस्यार्थस्य परित्यागः । तथा हि । वर्णात्मकशब्देभ्यो यथा स्फोटः शब्दः प्रतीयते तथैवार्थः प्रतीयताम् । को दोषः । न च ज्ञानव्यवधाने अशाब्दत्वं तस्यार्थस्य । स्फोटोपि शब्द एव । शब्दश्च [2]ज्ञानकरणम् । प्रत्यक्षव्यतिरिक्तानां करणानां [3]ज्ञानकरणत्वाङ्गीकारात् सर्ववादिभिः । ततश्च यः स्फोटपक्षे परिहारः स एव वर्णपक्षे भविष्यति । तथा हि । पूर्वपूर्ववर्णसंस्कारसचिवोन्त्यो वर्णो ज्ञातः सन् अर्थं प्रत्याययिष्यति । किम् अन्तर्गडुना[4] स्फोटेन ॥

तस्माद् अपौरुषेयत्वाद् नित्यत्वाद् विवक्षितार्थत्वाच्च कृत्स्नस्यापि वेदराशेस्तदन्तर्गतस्य व्रह्मवेदस्यापि विवक्षितार्थत्वेन व्याख्येयतासिद्धिः ॥

तथापि कथमस्य अन्ते व्याख्येयता । वेदानां क्रमेण अभिव्यक्तिप्रतिपादकश्रुतिवशात् इति ब्रूमः ॥ सा च अथर्ववेदस्य पूर्वब्राह्मणे प्रणवप्रशंसावसरे श्रूयते । "व्रह्म ह वै[5] व्रह्माणं पुष्करे[6] ससृजे । स खलु व्रह्मा सृष्टश्चिन्ताम् आपे-"दे । केनाहम् एकेनाक्षरेण सर्वांश्च कामान् सर्वांश्च लोकान् सर्वांश्च देवान्

---

1 S′Kd जाड्यं. 2 S′Kd ज्ञातं. 3 S′Kd ज्ञात°. 4 S′Kd °गलुना. 5 S′Kd ह च व्रह्माणं. 6 S′Kd पुष्करं.

"सर्वांश्च वेदान् सर्वांश्च यज्ञान् सर्वांश्च शब्दान् सर्वाश्च वृष्टीः सर्वाणि च भू-
"तानि स्थावरजङ्गमान्यनुभवेयम् इति। स ब्रह्मचर्यम् अचरत्। स ओम् इत्ये-
"तद् अक्षरम् अपश्यत् त्रिवर्णं चतुर्मात्रं सर्वव्यापि" इत्यादि [गो० ब्रा० १. १६] ॥ "तस्य प्रथमया स्वरमात्रया पृथिवीम् अग्निम् ओषधिवनस्पतीन्
"ऋग्वेदं भूरिति व्याहृतिं गायत्रं छन्दः त्रिवृतं स्तोमं प्राचीं दिशं वसन्तम्
"ऋतुम्" [गो० ब्रा० १. १७] इत्यादिना आद्याभिस्तिसृभिः प्रणवमात्रा-
भिराप्तव्यान् ऋगादीन् प्रतिपाद्य अन्ते समाम्नातम्। "तस्य मकारमात्रया-
"पश्चन्द्रमसम् अथर्ववेदं नक्षत्राण्यो३मिति स्वम् आत्मानम् आनुष्टुभं छन्दः
"एकविंशं स्तोमम्" इत्यादि [गो. ब्रा० १. २०]। तथा तैत्तिरीयकेपि ब्रह्म-
यज्ञप्रकरणे श्रूयते। "यद् ऋचोधीते पयसः कूल्या अस्य पितॄन् स्वधा अ-
"भिवहन्ति। यद् यजूंषि घृतस्य कूल्या। यत् सामानि सोम एभ्यः पवते।
"यद् अथर्वाङ्गिरसो मधोः कूल्याः" इति [तै० आ० २. १०]। तद् एवम् उदीरितरीत्या सर्वत्राथर्ववेदस्य चरमभावित्वात् तद्व्याख्यानस्य त्रयीव्याख्याना-
नन्तर्यम् उपपन्नम् ॥

तस्य ऐहिकामुष्मिकसकलपुरुषार्थपरिज्ञानोपायभूतस्य अथर्ववेदस्य नव भेदा भवन्ति। तद् यथा। पैप्पलादास्तौदाः[3] मौदाः शौनकीया जाजला जलदा ब्रह्मवदा देवदर्शाश्चारणवैद्याश्चेति ॥ तत्र शौनकीयादिषु चतसृषु शाखासु अनु-वाकसूक्तऋगादीनां गोपथब्राह्मणानुसारेण पञ्चभिः सूत्रैर्विनियोगोऽभिहितः ॥ तानि च सूत्राणि। कौशिकम् वैतानम् नक्षत्रकल्पः आङ्गिरसकल्पः शान्ति-कल्पश्चेति। तद् उक्तम् उपवर्षाचार्यैः कल्पसूत्राधिकरणे।

नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः।
तुर्य आङ्गिरसः कल्पः शान्तिकल्पस्तु पञ्चमः[4]। इति ॥

तत्र साकल्येन संहितामन्त्राणां शान्तिकपौष्टिकादिषु कर्मसु विनियोगविधा-
नात् संहिताविधिर्नाम कौशिकं सूत्रम् ॥ तदेव इतरैः सूत्रैरुपजीव्यत्वात् प्रधानं च। एतेषु बहुषु सूत्रेषु अथर्ववेदप्रतिपाद्यानि कर्माणि विप्रकीर्णत्वाद् दुर्बोधा-

---

1 So S′Kd. 2 Kd °मान्वभ्रवेयोमिति; S′ °न्वभ्रवेयेमिति. 3 S′Kd तौदो for तौदा which we read with the *Pariśishṭa*. 4 S′Kd पंचकः.

नीति सुखावबोधाय तानीह संगृह्यन्ते ॥ तत्र तावत् कौशिकसूत्रे क्रमेण प्रतिपाद्यान्येतानि कर्माणि ॥

आदौ स्थालीपाकविधानेन दर्शपूर्णमासविधिः । ततो मेधाजननानि । ब्रह्मचारिसांपदानि । ग्रामनगरदुर्गराष्ट्रादिलाभार्थानि । पुत्रपशुधनधान्यप्रजास्त्रीकरितुरगरथान्दोलिकादिसर्वसंपत्साधकानि । जनानाम् ऐकमत्यसंपादकानि सांमनस्यानि ॥ ततो राजकर्माणि । तानि च शत्रुहस्तित्रासनानि संग्रामजयसाधनानि इषुनिवारणार्थानि खड्गादिसर्वशस्त्रनिवारणानि परसेनामोहनोद्वेजनस्तम्भनोच्चाटनादीनि स्वसेनोत्साहपरि[1]रक्षणाभयार्थानि संग्रामे जयपराजयपरीक्षार्थानि सेनापत्यादिप्रधानपुरुषजयकर्माणि परसेनासंचरणप्रदेशेषु अभिमन्त्रितपाशासिकशा[2]प्रक्षेपणादीनि जयकामस्य राज्ञो रथस्यारोहणम् अभिमन्त्रितभेरीपटहादिसर्ववादित्रताडनम् सपत्नक्षयकर्माणि शत्रूत्सादितस्य राज्ञः पुनःस्वराष्ट्रप्रवेशकानि राजाभिषेकः ॥ पापक्षयार्थानि । निर्ऋतिकर्माणि । चित्राकर्मादीनि । पौष्टिकानि । गोसमृद्धिकर्माणि । लक्ष्मीकराणि । पुष्ट्यर्थमणिबन्धनानि । कृषिपुष्टिक[3]राणि । अनडुत्समृद्धिकराणि । गृहसंपत्करणि नवशालाकर्मादीनि । वृषोत्सर्जनम् । आग्रहायणीकर्म ॥ जन्मान्तरकृतपापनिमित्ताचिकित्स्यविविधरोगभैषज्यानि । तत्र प्रथमं सर्वव्याधिभैषज्यम् ज्वरातिसारबहुमूत्रादिभैषज्यानि शस्त्राद्यभिघातजरुधिरप्रवाहनिरोधकानि भूतप्रेतपिशाचापस्मारब्रह्मराक्षसबालग्रहादिनिवारणानि । वातपित्तश्लेष्मभैषज्यानि । हृद्रोगकामिलाश्वित्रनिवारणानि । संततज्वरैकाहिकादिविषमज्वरराजयक्ष्मजलोदरनिवारणानि गवाश्वादीनां क्रिमिहराणि कन्दमूलसर्पवृश्चिकस्थावरजङ्गमविषनिवारणानि शिरोक्षिनासिकाकर्णजिह्वाग्रीवादिरोगभैषज्यानि ब्राह्मणाद्याक्रोशनिवारणानि गण्डमालादिविविधरोगभैषज्यानि ॥ पुत्रादिकामस्त्रीकर्माणि । सुखप्रसवकर्माणि । गर्भाधानगर्भदृंहणपुंसवनादीनि । सौभाग्यकराणानि । राजादिमन्युनिवारणानि । अभीष्टसिद्ध्यसिद्धिविज्ञानानि । दुर्दिनाशन्यतिवृष्टिनिवारणानि । सभाजयविवादजयकलह[5]शमनानि । स्वेच्छातो न-

---

1 Kd om. °परि°. We with S′. 2 S′ Kd कथा[=कषा?]प्रक्षेपणादीनि. We with *Kaus'ika*. 3 Kd °काराणि. We with S′. 4 S′ Kd शास्त्राद्यभि°. 5 S′ Kd °यमनानि for °शमनानि. We with *Kes'avî*.

दीप्रवाहकरणानि । वृष्टिकर्माणि । अर्थोत्थापनकर्म । द्यूतजयकर्म । गोवत्सविरोधनिवारणम् । अश्वशान्तिः । वाणिज्यलाभकर्म । स्त्रियाः पापलक्षणनिवारणम् । वास्तुसंस्कारकर्म । गृहप्रवेशकर्म । कपोतवायसाद्युपहतगृहशान्तिविधिः । दुष्प्रतिग्रहायाज्ययाजनादिदोषनिवारणम् । दुःस्वप्ननिवारणम् । कुमारस्य पापनक्षत्रजननशान्तिः । ऋणापनोदनम् । दुःशकुनशान्तिः ॥ अभिचारिकाणि । परकृताभिचारनिवारणानि ॥ स्वस्त्ययनानि । आयुष्याणि । जातकर्मनामकरणचूडाकरणोपनयनादीनि । एकाग्निसाध्याः काम्या यागाः व्रह्मौदनस्वर्गौदनाद्या द्वाविंशतिः सवयज्ञाः ॥ ऋव्याच्छमनम् । आवसथ्याधानम् । विवाहः ॥ पैतृमेधिकानि । पिण्डपितृयज्ञः ॥ मधुपर्कः ॥ पांसुरुधिरादिवर्षणयक्षराक्षसादिदर्शनभूकम्पधूमकेतुचन्द्रार्कोपप्लवादिवहुविधोत्पातशान्तयः ॥ आज्यतन्त्रविधिः । अष्टकाकर्म । इन्द्रमहः । ततोऽध्ययनविधिरिति ॥

तथा वैतानसूत्रे दर्शपूर्णमासादिषु अयनान्तेषु त्रयीविहितकर्मसु व्रह्मा व्राह्मणाच्छंसी आग्नीध्रः पोतेति चतुर्णाम् ऋत्विजां कर्तव्यं प्रतिपाद्यते । तत्र अनुज्ञानुमन्त्रणादीनि व्रह्मणः । शस्त्रादीनि व्राह्मणाच्छंसिनः । आग्नीध्रस्य अन्वाहार्यश्रपणप्रस्थितयाज्यादीनि । पोतुः प्रस्थितयाज्यादीनि । इति विभागः ॥ तत्र अयं कर्मक्रमः । प्रथमं दर्शपूर्णमासौ । ततोऽग्न्याधानम् । अग्निहोत्रम् । आग्रयणेष्टिः । चातुर्मास्यानि । वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाणि । पशुयागः । अग्निष्टोमोक्थ्यषोडश्यतिरात्रात्मकः प्रकृतिभूतश्चतुःसंस्थः सोमयागः । वाजपेयः । अप्तोर्यामः । [2]अग्निचयनम् । सौत्रामणी । मैत्रावरुण्यामिक्षेष्टिः । गवाम् अयनम् । राजसूयः । अश्वमेधः । पुरुषमेधः । सर्वमेधः । वृहस्पतिसवगोसवादय एकाहाः सोमयागाः । व्युष्टिद्विरात्रप्रकृतयोऽहीनाः । रात्रिसत्राणि । सांवत्सरिकाण्ययनानि । दर्शपूर्णमासायनानीति ॥

नक्षत्रकल्पेपि प्रथमं कृत्तिकादिनक्षत्रपूजाहोमादि । ततोऽद्भुतमहाशान्तिः । नैर्ऋतकर्म । अमृताद्या अभयान्तास्त्रिंशन्महाशान्तयो निमित्तभेदेन प्रतिपादिताः । तत्र दिव्यान्तरिक्षभौमेषु उत्पातेषु अमृताख्या महाशान्तिः । गतायुषां पुनर्जीवनाय वैश्वदेवी । अग्निभयनिवृत्तये सर्वकामावाप्तये चाग्नेयी । नक्षत्रग्रहोप-

---

1 S′Kd °दर्शभू° for दर्शनभू°. 2 Kd om. अग्निचयनम्. We with S′.

सृष्टभयार्तरोगगृहीतानां तच्छान्तये भार्गवी । ब्रह्मवर्चसकामस्य वस्त्रशयनाग्नि-ज्वलने च ब्राह्मी । राज्यश्रीब्रह्मवर्चसकामस्य बार्हस्पत्या । प्रजापश्वन्नलाभाय[1] प्रजाक्षयनिवृत्तये च प्राजापत्या । शुद्धिकामस्य सावित्री । छन्दोब्रह्मवर्चसकाम-स्य गायत्री । संपत्कामस्य अभिचरतोऽभिचर्यमाणस्य च आङ्गिरसी । विजय-बलपुष्टिकामस्य परचक्रोद्वेजनकामस्य च ऐन्द्री । अद्भुतविकारनिवृत्ति[कामस्य] राज्यकामस्य च माहेन्द्री[2] । धनकामस्य धनक्षयनिवृत्तिकामस्य च कौबेरी । विद्यातेजोधनायुष्कामस्य आदित्या । अन्नकामस्य वैष्णवी । भूतिकामवास्तुसं-स्कारकर्मणोर्वास्तोष्पत्या । रोगार्तस्य आपद्ग्रस्तस्य च रौद्री । विजयकामस्य अपराजिता । यमभये याम्या । जलभये वारुणी । वात्याभये वायव्या । कुलक्षय[3]-निवृत्तये संतत्याख्या । वस्त्रक्षयनिवृत्तये त्वाष्ट्री । बालस्य व्याधिनिवृत्तये कौ-मारी । निर्ऋतिगृहीतस्य नैर्ऋती । बलकामस्य मारुद्गणी । अश्वक्षयनिवृत्तये गान्धर्वी । गजक्षयशान्तये पौरावती[4] । भूमिकामस्य पार्थिवी । भयार्तस्य अ-भयाख्या महाशान्तिः । आसां तन्त्रभूता महाशान्तिश्चेति ॥

तथा आङ्गिरसकल्पे आभिचारकर्मादौ कर्तृकारयितृसदस्यानां स्वात्मरक्षा-करणम् । अभिचारोपयुक्तदेशकालमण्डपकर्तृकारयितृ[5]दीक्षादिधर्मसमिदाज्या-दिसंभारनिरूपणादिकम् । ततः आभिचारिक[6]कर्माणि । परकृताभिचारनिवा-रणादीन्यन्यान्यपि कर्माणि ॥

शान्तिकल्पेपि प्रथमं वैनायकग्रहगृहीतलक्षणानि । तच्छान्तये संभाराहर-णम् । अभिषेकवैनायकहोमाः । तत्पूजाविधानम् । आदित्यादिनवग्रहयज्ञा-दिकमिति ॥

एतेषु कल्पेष्वनुक्तानि यानि राजाभिषेकोपयुक्तद्रव्यप्रकृतिद्रव्यपरिग्रहपुरो-हितवरणादीनि परिशिष्टोक्तानि तान्यपि अनुक्रम्यन्ते । प्रथमं राजाभिषेकः । प्रातःप्रातर्वस्त्रगन्धालंकारसिंहासनाश्वगजान्दोलिकाखड्गध्वजच्छत्रचामरादीनां तत्तन्मन्त्राभिमन्त्रितानां राज्ञे प्रदा[7]नादीनि पुरोहितकर्माणि । सुवर्णधेनुतिल-भूमिदानादीनि राज्ञः प्रतिदिवसकर्तव्यानि । पूजितपिष्टमय्या सदीपया रात्रि-

---

1 S′Kd °पश्वन्नस्यालाभाय. 2 After this Kd adds धनकामस्य च माहेन्द्री. We with S′. 3 S′Kd कलक्षय°. 4 S′Kd परावती. 5 S′Kd °मण्डपकर्तृकादीक्षा°. 6 S′Kd °चारिकर्माणि. 7 Kd प्रधानादीनि and S′ प्रदानादीन्युपहितकर्माणि.

प्रतिमया राज्ञो नीराजनम् । रक्षाकरणं च इत्येवमादीनि पुरोहितस्य रात्रिकर्माणि । राज्ञः पुण्याभिषेकः । राज्ञो रात्रौ आरात्रिकविधानम् । प्रातःप्रातर्धृतावेक्षणम् । कपिलादानम् । तिलधेनुदानम् । रसादिधेनवः । कृष्णाजिनदानम् । भूमिदानम् । तुलापुरुषविधिः । आदित्यमण्डलाकारापूपदानम् । हिरण्यगर्भविधिः । हस्तिरथदानम् । कनकाश्वादिदशमहादानानि । अश्वरथदानम् । गोसहस्रविधिः । वृषोत्सर्गः । कोटिहोमः । लक्षहोमः । अयुतहोमः । घृतकम्बलविधिः । तटाकप्रतिष्ठा । पाशुपतव्रतम् । इत्येवमादीनि ॥ अन्यान्यपि दानव्रतादीनि ॥

इति सपरिशिष्टपञ्चकल्पप्रतिपाद्यानां कर्मणां दिङ्मात्रेण अयम् अनुक्रमः । विशेषस्तु[1] तत्तत्सूक्तविनियोगावसरे वक्ष्यते । एतानि च त्रिविधानि नित्यनैमित्तिककाम्यभेदेन । तत्र जातकर्मादीनि नित्यानि । दुर्दिनाशनिनिवारणाश्वशान्त्यद्भुतकर्माणि च नैमित्तिकानि । मेधाजननग्रामसांपदादीनि काम्यानि ॥ अत्र नित्यानां नैमित्तिकानां च अवश्यानुष्ठेयता । अकरणे प्रत्यवायस्मरणात् । तथा हि ।

नित्यनैमित्तिके कुर्यात् प्रत्यवायजिघांसया । इति ॥

काम्यानां तु इच्छातः प्रवृत्तिः ॥

एतेषां ग्रामाद् बहिः प्रागुदग्देशे महानदीतटाकाद्युत्तरकूलेनुष्ठानम् । "पुंरस्तादुत्तरतोऽरण्ये कर्मणां प्रयोग उत्तरत उदकान्ते" इति कौशिकसूत्रात् [कौ° १, ७] ॥ पुंसवनादीनां तु नित्यानां गृह एवेति रुद्रभाष्यकारमतम् ॥ कालस्तु पर्वद्वयं पुण्यनक्षत्रयुक्तं तिथ्यन्तरं वा । अद्भुतकर्मणां तु तत्तन्निमित्तानन्तरमेव । तथा चोक्तम् ।

अमावास्या पौर्णमासी पुण्यनक्षत्रयुक् तिथिः ।
एत एव त्रयः कालाः सर्वेषां कर्मणां स्मृताः ।
अद्भुतानां सदाकालम् आरम्भः सर्वकर्मणाम् । इति ॥

आभिचारिकाणां[3] तु ग्रामाद् दक्षिणदिशि कृष्णपक्षे कृत्तिकानक्षत्रे प्रयोग इति

---

1 S′ Kd विशेषतस्तु. 2 S′ Kd परस्तादुत्तर°. We with *Kaus'ika*. 3 S′ Kd अभिचारिकाणां.

विशेषः । तथा च कौशिकं सूत्रम् । "आभिचारिकेषु दक्षिणतः संभारम् आहृत्य आङ्गिरसम्" इत्यादि [कौ० ६. १] । अत्र आङ्गिरसमिति आङ्गिरसकल्पोक्तमित्यर्थः । एतेषां कर्मणां प्राच्योदीच्याङ्गानि दर्शपूर्णमासवत् कार्याणि । "इमौ दर्शपूर्णमासौ व्याख्यातौ दर्शपूर्णमासाभ्यां पाकयज्ञाः" इति सूत्रकारवचनात् [कौ० १. ६] । अत्र पाकयज्ञशब्देन सर्वम् आथर्वणं कर्मोच्यते । तच्च द्विविधम् । आज्यतन्त्रं पाकतन्त्रं चेति । यत्र प्रधानं हविः आज्यं तद् आज्यतन्त्रम् । यत्र चरुपुरोडाशादिकम् तत् पाकतन्त्रम् ॥ आज्यतन्त्रे अयम् अनुष्ठानक्रमः । प्रथमम् "अव्यसश्च"[1] [१९. ६५] इति कर्तुर्जपः बर्हिर्लवनम् वेदिः उत्तरवेदिः अग्निप्रणयनम् अग्निप्रतिष्ठापनम् व्रतग्रहणम्[2] पवित्रकरणम् पवित्रेणेध्मप्रोक्षणम् इध्मोपसमाधानम् बर्हिःप्रोक्षणम् ब्रह्मासनम् ब्रह्मस्थापनम् स्तरणम् स्तीर्णप्रोक्षणम्[3] आत्मासनम् उदपात्रस्थापनम् आज्यसंस्कारः स्रुवग्रहणम् ग्रहग्रहणम् पुरस्ताद्धोमाः आज्यभागौ । "सविता प्रसवानाम्[4] [५. २४] इति कर्मणि अभितोभ्यातानैराज्यं जुहुयात्" इति [कौ० १४. १] सूत्रकारवचनात् अभ्यातानानि । एतदन्तं पूर्वतन्त्रम् ॥ ततो यथोपदेशं प्रधानहोमः । तत उत्तरतन्त्रम् । अभ्यातानानि पार्वणहोमः समृद्धिहोमाः संनतिहोमाः[5] स्विष्टकृद्धोमः सर्वप्रायश्चित्तीयहोमः स्कन्नहोमः "पुनर्मैत्विन्द्रियम्" [७. ६९] इति होमः स्कन्नास्मृतिहोमौ संस्थितिहोमाः चतुर्गृहीतहोमः बर्हिर्होमः संस्रावहोमः विष्णुक्रमाः व्रतविसर्जनम् दक्षिणादानम् ब्रह्मोत्थापनम् इति ॥ पाकतन्त्रे तु अभ्यातानाभाव एव विशेषः । अन्यत् सर्वं समानम् । तथा च गोपथब्राह्मणम् ।

आज्यभागान्तं प्राक्तन्त्रम् ऊर्ध्वं स्विष्टकृता सह ।
हवींषि यज्ञ[6] आवापो यथा तन्त्रस्य तन्तवः । इति ॥

अद्भुतकर्मणाम् आज्यतन्त्रत्वेपि पाकतन्त्रवद् अभ्यातानाभावः । यद् आह केशवः । "पाकतन्त्रेष्वभ्यातानानि न भवन्ति अद्भुतेषु न भवन्ति अन्यत्र सर्वत्र भवन्ति" इति [के० १४. १] ॥

---

1 S′Kd अव्यवसश्च. We with *Kaus'ika* (XIV. 3). 2 S′Kd वनग्रहणम्. 3 S′Kd स्तीर्णं प्रो°. 4 S′Kd प्रसवितानाम्. 5 S′Kd संनिति°. We with the *Kes'avî* and *Dârila*. 6 Kd यज्ञामावापो. We with S′.

शाखायाः शौनकीयायाः पूर्वोक्तेष्वेव कर्मसु ।
विनियोगाभिधानेन संहितार्थः प्रकाश्यते ॥

तत्र प्रथमकाण्डे षड् अनुवाकाः । प्रथमेनुवाके षट् सूक्तानि । तत्र ये त्रिपन्ना इत्येतत् प्रथमं सूक्तम । अस्य मेधाजननकर्मसु विनियोगः । यद् आह कौशिकः । "पूर्वस्य मेधाजननानि" इति [कौ० २. १.] । अत्र पूर्वशब्देन ये त्रिपन्ना इति सूक्तम् उच्यते । "पूर्वे त्रिपन्नीयम" इति [कौ० १. ७.] परिभाषणात् ॥ तानि च मेधाजननकर्माणि । उदुम्बरपलाशकर्कन्धूसमिदाधानम् व्रीहियवतिलानाम् आवपनम् क्षीरौदनपुरोडाशरसानां भक्षणम् उपाध्यायाय भैक्षदानम् सुप्तस्योपाध्यायस्य कर्णानुमन्त्रणम् उपाध्यायोपसदनकाले जपः आज्यमिश्रधानाहोमः तिलमिश्रधाना हुत्वा तच्छेषभक्षणम् उपाध्यायाय दण्डाजिनधानाः प्रदातुं धानानुमन्त्रणम् तद्वदेव धानाहोमः शुकसारिभारद्वाजानां पक्षिणां जिह्वावन्धनम् तत्प्राशनं च । एतानि कर्माणि अनेन सूक्तेन मेधाकामस्य कार्याणि ॥ तथा च कौशिकं सूत्रम । "शुकशारिकृशानां जिह्वा वभात्याशयत्यौदुम्बरपलाशकर्कन्धूनाम् आदधा-
"त्यावपति भक्षयत्युपाध्यायाय भैक्षं प्रयच्छति सुप्तस्य कर्णम् अनुमन्त्रयत उ-
"पसीदन् जपति धानाः सर्पिर्मिश्राः सर्वहुतास्तिलमिश्रा हुत्वा प्राश्नाति पुर-
"स्तादग्नेः कल्माषं दण्डं निहत्य पश्चादग्नेः कृष्णाजिने धाना अनुमन्त्रयते सू-
"क्तस्य पारं गत्वा प्रयच्छति सकृज्जुहोति दण्डधानाजिनं ददाति" इति [कौ० २. १.] ॥ अस्य अयम् अर्थः । "आश्यवन्ध्यासवनयानभक्ष्याणि संपातवन्ति" इति [कौ० १. ७.] परिभाषणात् शुकादिजिह्वानां संपाताभिहुतानामेव वन्धनं प्राशनं च । "संपातेन होमम् आक्षिपते" इत्यभ्यातानान्ते अनेन सूक्तेन आज्यं हुत्वा संपातानयनम् "सर्वाण्यभिमन्त्र्याणि" इति [कौ० १. ७.] परिभाष-

---

1 S′ Kd क्षीरोदन°. 2 S′ धानहोमः. We with Kd. 3 S′ Kd om. अनु°. We with *Kaus'ika*. 4 Kd होमआक्षिपत इत्य°. We with S′. 5 S′ Kd संपातानानयनं.

णाद् अनेनैव सूक्तेन अभिमन्त्रणं च ॥ कर्कन्धूर्बृहद्बदरी । "समिधम् आदधाति" इति [कौ० १. ७.] परिभाषणात् उदुम्बरादीनां समिध इति योजनीयम् । हस्तहोमत्वात् तन्त्रविकल्पः । "न दर्विहोमे न हस्तहोमे न पूर्णहोमे तन्त्रं क्रियेतेत्येके" [कौ० १४. २.] इति सूत्रात् । "आवपति व्रीहियवतिलान्" इति [कौ० १. ७.] परिभाषणात् आवपतिचोदनायां व्रीहियवतिलाः प्रत्येतव्याः । "सर्वाण्यभिमन्त्र्याणि" इति वचनात् अत्र सर्वे पदार्था अभिमन्त्र्य कर्तव्याः । "भक्षयति क्षीरौदनपुरोडाशरसान्" इति [कौ० १. ७.] वचनाद् भक्षयतिचोदनायां द्रव्यानादेशे क्षीरौदनपुरोडाशरसा वोढव्याः । अत्र रसशब्देन दधिघृतमधूदकानि उच्यन्ते । यद् असूत्रयत् । "दधि घृतं मधूदकमिति रसाः" इति [कौ० १. ८.] । क्षीरौदनादीनां भक्ष्यत्वात् होमसंपातानभिमन्त्रणानि पूर्ववत् कर्तव्यानि । "आश्यवन्ध्यासंवनयानभक्ष्याणि संपातवन्ति सर्वाण्यभिमन्त्र्याणि" इति वचनस्य दर्शितत्वात् । भैक्षं पक्वम् अपक्वं वा अभिमन्त्र्य दद्यात् । अनुमन्त्रणं नाम शेषिणो मन्त्रार्थत्वेन अनुसंधानपुरःसरं मन्त्रजपः । अभिमन्त्रणस्य तु ईक्षणं विशेषः । उक्तं हि ।

मन्त्रम् उच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत् ।
शेषिणं तन्मना भूत्वा स्याद् एतद् अनुमन्त्रणम् ।
एतदेवाभिमन्त्रस्य लक्षणं चेक्षणाधिकम् ॥ इति ।

धानानां सर्वहोमस्य हुतशेषप्राशनस्य च कर्मैक्ये विरोधात् प्रयोगभेदः । अन्यत् निगदसिद्धम् ॥

एतानि कर्माणि अन्योन्यनैरपेक्ष्येण मेधाजननफलसाधनत्वेन चोदितत्वाद् विकल्पेन अनुष्ठेयानि । कर्मभूयस्त्वात् फलभूयस्त्वम् इति न्यायात् समुच्चयेन वा अनुष्ठेयानि । एवम् उत्तरत्रापि द्रष्टव्यम् ॥

उपनयनदिवसेपि मेधाकामस्य ब्रह्मचारिणः अनेन सूक्तेन आज्यहोमः कार्यः । तथा च उपनयनप्रकरणे सूत्रितम् । "मेधाजनन आयुष्यैर्जुहुयाद्" इति [कौ० ७. ८.] । अत्र द्रव्यस्य अनादेशेपि आज्यं होमद्रव्यम् । "आज्यं जुहोति" इति [कौ० १. ७.] जुहोतिचोदनायाम् आज्यस्य द्रव्यत्वपरिभाप-

1 S′ Kd °ग्लावन°. We with *Kaus'ika*.

णात्। तथैव ब्रह्मचारिसंपत्कर्मसु अस्य सूक्तस्य विनियोगः। सूत्रितं हि। "पूर्वस्य ब्रह्मचारिसांपदानि" इति [कौ° २. २.]। तानि च कर्माणि। उदुम्बरपलाशकर्कन्धूसमिधां ब्रह्मचारिगृहोपस्तरणतृणानां च आधानम्। अरण्यपिपीलिकाछिद्रे मेदोमधुश्यामाकेपीकतूलाज्यानि पञ्च द्रव्याणि पृथक् हुत्वा आज्यस्थाल्यां पिपीलिकोद्वापान् ओप्य गृहम् आगत्य अभ्यातानान्ते अनेन सूक्तेन स्थाल्या सकृत् जुहुयात्। अनेन सूक्तेन अन्नम् अभिमन्त्र्य ब्रह्मचारिणो भोजयित्वा धानास्तिलमिश्राः प्रयच्छति। एतैः कर्मभिरनुष्ठितैराचार्यस्य शिष्यसंपत्तिर्भवति। तथा च कौशिकः। "औदुम्बर्यादयो ब्रह्मचार्यावसथादुपस्तरणान्यादधाति" इत्यादि [कौ° २. २.]॥

तथा ग्रामसंपत्कामस्य तत्साधनेष्वेतेषु उदुम्बरपलाशकर्कन्धूतक्षणाधानसभोपस्तरणतृणाधानाभिमन्त्रितान्नासवप्रदानेषु कर्मसु अस्य सूक्तस्य विनियोगः। तथा च सूत्रम्। "ग्रामसांपदानि विकारस्थूणामूलावतक्षणानि सभानाम् उपस्तरणानि ग्रामीणेभ्योन्नं सुरां सुरापेभ्यः" इति [कौ° २. २.]॥ अत्र यद्यपि सूक्तविशेषो न श्रूयते तथापि "ग्रहणम् आ ग्रहणात्" इति [कौ° १. ८.] परिभाषणात् "पूर्वस्य" इत्येतदेव त्रिपक्षीयं संबध्यते॥

तथा सर्वसंपत्कर्मस्वपि अस्य सूक्तस्य विनियोगः। तथा हि। उदुम्बरपलाशकर्कन्धूसमिदाधानम् व्रीहियवतिलानाम् आवपनम् क्षीरौदनपुरोडाशरसानां भक्षणं च इत्येतानि मेधाजननोक्तानि अहनि कालत्रये अग्निप्रज्वालनं तदुपस्थानं च सव्यात् पाणिमध्याद् रुधिरस्य दधिघृतमधूदकमिश्रितस्य संपाताभिमन्त्रितस्य प्राशनम् पृश्निमन्थप्राशनं च इत्येतानि कर्माणि अनेनैव सूक्तेन सर्वसंपत्कामः कुर्यात्। आह च कौशिकः। "औदुम्बर्यादीनि[2] भक्षणान्तानि [सर्वसांपदानि त्रिर्ज्योतिष्कुरुत[3] उपतिष्ठते सव्यात् पाणिहृदयाल्लोहितं रसमिश्रमश्नाति पृश्निमन्थो जिह्वाया उत्साद्यमक्ष्योः परिस्तरणमस्तृहणं हृदयं दूर्श उपनह्य तिस्रो रात्रीः पल्पूलने वासयति[4] चूर्णानि करोति मैश्रधान्ये मन्थ ओप्य दधिमधुमिश्रमश्नाति" इति कौ° २. २.]॥

---

1 S' Kd संपादानीति. We with *Kaus'ika*. 2 S' Kd औदुंवर्यादिभक्ष°. 3 *Kaus'ika*: °कुरुतमुप°. 4 Both the MSS. of *Kaus'ika* read वाचयति for वासयति. But *Dârila* and *Kes'ava* quote and explain वासयति.

[तथा वर्चस्यकर्मणि अनेन सूक्तेन वर्चस्कामः औदुम्वर्यादीनि त्रीणि कुर्यात्। तथा च] वर्चस्कामायाः कुमार्या दक्षिणोरोरभिमन्त्रणम् क्रीतवपाहोमः अग्न्युपस्थानम् इत्येतानि कर्माणि अनेन सूक्तेन तेजस्कामोनुतिष्ठेत्। "पूर्वस्य ममाग्ने वर्च इति वर्चस्यानि" इत्यादि [कौ°२.३.] सूत्रम्॥

तथा शत्रुहस्तित्रासनकर्माण्यपि अनेनैव संग्रामजयकामो राजा कारयेत्। तानि च। संपातोपेतरथचक्रस्य शत्रुहस्त्यभिमुखं प्रवर्तनम् "यानेभक्ष्याणि संपातवन्ति" इति [कौ°१.७.] परिभाषणात् संपाताभिहुतानां स्वकीयहस्त्यश्वादियानानां शत्रुगजाभिमुखप्रेरणम् पटहभेर्यादिवादित्राणाम् अभिमन्त्र्य ताडनम् हतौ शर्कराः प्रक्षिप्य अभिमन्त्र्य तद्युक्तपुरुषप्रस्थापनम् तथैव चर्मपुटयन्त्रेण शर्कराप्रक्षेपः अभिमन्त्रितवालुकाप्रक्षेपणं च इत्येतानि। अत्र सूत्रम्। "पूर्वस्य हस्तित्रासनानि रथचक्रेण संपातवता प्रतिप्रवर्तयति" इत्यादि [कौ°२.५.]॥

तथा पञ्च निर्ऋतिकर्माणि शान्तिकपौष्टिकेषु सर्वत्र अङ्गत्वेन वा पापक्षयार्थं स्वातन्त्र्येण वा कर्तव्यत्वेन सूत्रकारेणोक्तानि। तत्र आद्ययोः कर्मणोः संपातिताभिमन्त्रितभक्तप्राशने आज्यहोमे च एतत् सूक्तं विनियुक्तम्। तथा च सूत्रम्। "पूर्वस्य पूर्वस्यां पौर्णमास्याम् अस्तमित उदकान्ते कृष्णचेलपरिहितो निर्ऋतिकर्माणि प्रयुङ्क्ते" इत्यादि [कौ°३.१.]॥

तथा पौष्टिकविशेषे चित्राकर्मणि संपातितसारूपवत्सौदनप्राशनपलाशादिसमिदाधानरूपे अस्य सूक्तस्य विनियोगः। सूत्रितं हि। "पूर्वस्य चित्राकर्म कुलायस्थृतं हरितवर्हिषम् अश्नाति" इत्यादि [कौ°३.१.]। तत्र "अश्नात्यनादेशे स्थालीपाकः पुष्टिकर्मसु सारूपवत्सः" इति [कौ°१.७.] परिभाषितत्वात् सरूपवत्साया गोर्दुग्धे स्थृतः स्थालीपाकः। ओदन इति गम्यते॥

तेजोव्रते च एतत् सूक्तं विनियुक्तम्। "नाव्ययोः सांवैद्ये" इत्यादि [कौ°३.१.] सूत्रम्॥

तथा "पुष्टिकर्मणाम् उपधानोपस्थानम्" इति [कौ°३.७.] सूत्रात् पौ-

---

1 S′Kd यानि for यान°. 2 S′Kd सांवेद्य इ°. We with *Kaus'ika* and his two commentators *Dârila* and *Kes'ava*, who both explain the word to mean संगमः.

ष्टिकमन्त्राणाम् उपधानोपस्थानयोर्विनियोगविधानेन तन्मध्यपातिनोस्य सूक्तस्य तत्रापि विनियोगः । उपधानं नाम आज्यादित्रयोदशद्रव्यहोमः । "उपदधात्यनादेशे आज्यं समित् पुरोडाशः पयः ओदनं पायसं पशुः व्रीहियवतिलधानाः करम्भः शष्कुल्यः एतानि त्रयोदश हवींषि जानीयाद्" इति पैठीनसिपरिभाषणात् ॥

द्विविधा व्याधयः । आहारनिमित्ता अन्यजन्मपापनिमित्ताश्चेति । तत्र आहारनिमित्तानां वैद्यशास्त्रोक्तचिकित्सया उपशमनम् । पापनिमित्तानां तु आथर्वणैर्होमबन्धनपायनादिभिर्भैषज्यकर्मभिरुपशमनम् । "ओषधिवनस्पतीनाम् अनुक्तान्यप्रतिपिद्धानि भैषज्यानाम् अंहोलिङ्गाभिः" इति [कौ० ४. ८.] सूत्रकारेण "स नो मुञ्चत्वंहसः" [४. २३. १.] इति पापनिवृत्तिप्रतिपादनपराणां मन्त्राणां सर्वत्र भैषज्यकर्मणि विनियुक्तत्वात् । तत्र सर्वव्याधिषु अनेन सूक्तेन आज्यं हुत्वा उदपात्रं संपात्य अनेनैव व्याधितशरीरं संमार्जयेत्। तथाह कौशिकः । "अथ भैषज्यानि" इति प्रक्रम्य "पूर्वस्योदपात्रेण संपातवतान्ते वलीर्विमार्ष्टि" इति [कौ० ४. १.]। भैषज्योक्तसूक्तैस्तत्रतत्र व्याधौ उपधानोपस्थानान्यपि कुर्याद् इति रुद्रभाष्यकारः । उपधानस्वरूपम् उक्तम् ॥

तथा अनेनैव सूक्तेन पुत्रकामायाः स्त्रिया मृतापत्यायाश्च संपातितोदकावसेकम् पुरोडाशभक्षणम् कन्दुकक्रीडनम् अलंकारधारणं वा कारयेत् । "पूर्वस्य पुत्रकामावतोक्तयोः[1]" इत्यादि [कौ० ४. ८.] सूत्रम् ॥

तथा उपाकर्मणि माणवकवाचने विनियुक्तम्[2] । "त्रिपन्नीयं[3] पच्छो वाचयेत्" इति [कौ० १४. ३.] हि सूत्रितम् ॥

तथा राज्ञः पुष्पाभिषेके ये त्रिपन्ना इत्यृचा शाखादिभूतया पयोहोमः कार्यः । तथा च परिशिष्टे पुष्पाभिषेकं प्रक्रम्य उच्यते ।

सप्तरात्रं घृताशी वा[4] ततो होमं प्रयोजयेत् ।
गव्येन पयसा कुर्यात् सौवर्णेन स्रुवेण तु ॥
वेदानाम् आदिमैर्मन्त्रैर्महाव्याहृतिपूर्वकैः इति [प० ५. ३.] ॥

---

1 S′ Kd °वतोक्तयोरि°. 2 S′ Kd विनयुक्तं. 3 The MSS. of *Kaus'ika* read त्रिपर्णीं च. 4 S′ Kd om. वा. We with the *Paris'ishṭa*.

तद् एवम् आथर्वणमन्त्राणां सिद्धमन्त्रत्वेन अपरिमितवीर्यत्वप्रदर्शनार्थम् आदिमसूक्तस्य विस्तरतः सर्वेषु कर्मसु उपलक्षणत्वेन सूत्रकृता विनियोगोभ्यधायि । ततः सर्वेषां मन्त्राणाम् अभिलषितसर्वफलसाधनत्वं प्रत्येतव्यम् ॥ ननु मन्त्राणाम् अनुष्ठेयार्थप्रकाशकत्वस्य "तदर्थशास्त्रात्" [जै० १.२.३१.] इत्यधिकरणेन स्थापितत्वात् तत्तल्लिङ्गानुसारेण विनियोगो वक्तव्यः । इतरथा अग्निना सिञ्चेदितिवत् असमर्थविधानं प्रसज्येत । नायं दोषः । ऐन्द्र्या गार्हपत्यम् उपतिष्ठते इतिवद् वलीयस्या श्रुत्या लिङ्गं वाधित्वा गुणकल्पनयापि विनियोगसंभवात् । तत्र हि ऐन्द्रमन्त्रे इन्द्रशब्दस्य गौणीं वृत्तिम् आश्रित्य गार्हपत्योपस्थाने विनियोगः कृतः । एवम् अत्रापि गोपथब्राह्मणश्रुत्या उदीरितनिखिलकर्मसु विनियोगः कृत इति तत्तत्कर्मानुसारेण मन्त्रलिङ्गानां गौण्यादिवृत्त्याश्रयेण विनियोज्यार्थपरता वोद्धव्या ॥

तत्र प्रथमा ॥

ॐ ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।
वाचस्पतिर्वला तेषां तन्वो अद्य दधातु मे ॥ १ ॥
ये । त्रिऽसप्ताः । परिऽयन्ति । विश्वा । रूपाणि । बिभ्रतः ।
वाचः । पतिः । वला । तेषाम् । तन्वः । अद्य । दधातु । मे ॥ १ ॥

यच्छब्दोत्र प्रसिद्धार्थवाची । "सर्वनाम प्रसिद्धार्थं प्रसाध्यार्थविधातकृत्" इति न्यायात् । ये लोकवेदप्रसिद्धाः त्रिसप्ताः । त्रयो वा सप्त वा भावाः । ⧖ संख्याव्ययासन्नादूराधिकसंख्याः संख्येये इति अन्यपदार्थे बहुव्रीहिः । अन्यपदार्थश्च अत्र वार्थः । स च विकल्पः संशयो वा संभवति । अत्र तु विकल्प एव विवक्षितः । बहुव्रीहौ संख्येये डजबहुगणात् इति डच् समासान्तः । तस्य सतिशिष्टत्वात् सति शिष्टस्वरो बलीयान् इति न्यायेन बहुव्रीहिस्वरं बाधित्वा चितः इति अन्तोदात्तत्वम् ⧖ । तद् अयम् अर्थः । पृथिव्यादयस्त्रयो लोकाः । तेषाम् अधिष्ठातारः अग्निवाय्वादित्याः । सत्त्वरजस्तमोगुणाः । ब्रह्मविष्णुमहेश्वराः इत्येवमाद्यास्त्रिसंख्याक्रान्ता[2] ये सन्ति ते सर्वे अत्र त्रिशब्देन विवक्षिताः ।

1 S′ Kd तल्लिंगानु°. 2 S′ Kd °स्त्रित्वसंख्या°.

तथा सप्त ऋषयः। सप्त ग्रहाः। सप्त मरुद्गणाः। सप्त लोकाः। सप्त च्छन्दांसि इत्याद्या ये सप्तसंख्याक्रान्ताः सन्ति ते सर्वे अत्र सप्तशब्देन अभिमताः। त्रिसंख्याक्रान्ताः सप्तसंख्याक्रान्ता वा इति यावत्॥ यद्वा। त्रिः सप्त त्रिसप्ताः। ⧖ पूर्ववद् वहुव्रीहिः। अत्र सुजर्थः अन्यपदार्थः। स च क्रियाभ्यावृत्त्यात्मकः ⧖। त्रिरावृत्तसप्तसंख्यायुक्ता इत्यर्थः। ⧖ अत्र समासेनैव सुजर्थस्य अभिहितत्वात् संख्यावाचिनस्त्रिशब्दस्यैव समासः न तु सुजन्तस्य इति सुचः श्रवणाभावः। तद् उक्तं वार्तिककृता सुजभावोभिहितार्थत्वात् समासे इति[1] ⧖। ते चैवं द्रष्टव्याः प्रसिद्धसूर्याधिष्ठितप्राचीदिग्व्यतिरिक्ता[2] आरोगादिभिः सप्तभिः[3] सूर्यैरधिष्ठिताः सप्त दिशः। ते च आरोगादयस्तैत्तिरीयैराम्नायन्ते। "आरोगो भ्राजः पटरः पतङ्गः। स्वर्णरो[4] ज्योतिषीमान् विभासः" [तै० आ० १. ७. १.] इति। होतृप्रभृतयो वषट्कर्तारः सप्त ऋत्विजः। "मित्रश्च वरुणश्च। धाता चार्यमा च। अंशश्च भगश्च। इन्द्रश्च विवस्वांश्चेत्येते" [तै० आ० १. १३. ३.] इति श्रुत्यन्तरप्रसिद्धा विवस्वद्व्यतिरिक्ताः सप्तआदित्या इति। तथा च मन्त्रवर्णः। "सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः। देवा आदित्या ये सप्त" [ऋ० ९. ११४. ३.] इति। यद्वा। सप्त सिन्धवः सप्त लोकाः सप्त दिशः इत्येवं त्रिसप्ताः। श्रूयते हि। "यः सप्त सिन्धून् अदधात् पृथिव्याम्। यः सप्त लोकान् अकृणोद् दिशश्च" [तै० ब्रा० २. ८. ३. ८.] इति। सप्त ग्रहाः सप्त ऋषयः सप्त मरुद्गणा इति वा त्रिसप्ताः॥ अथ वा त्रिगुणिता सप्तसंख्या येष्विति वहुव्रीहिः। एकविंशतिसंख्याका इत्यर्थः। ते च "द्वादश मासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंशः" [तै० सं० ७. ३. १०. ५.] इति प्रसिद्धाः परिगृह्यन्ते। यद्वा शरीरारम्भकाणि पञ्च महाभूतानि पञ्च प्राणाः पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि अन्तःकरणं चेति। एवम् एकविंशतिसंख्याकाः प्रत्येतव्याः। एवम् उक्तलक्षणास्त्रिसप्तसंख्या ये देवाः परियन्ति। प्रतिदिनं प्रतिवत्सरं प्रतिकल्पं प्रतिशरीरं यथोचितं पर्यावर्तन्ते। ⧖ परिपूर्वात् इण् गतौ इत्यस्माल्लुटि अदादित्वात् शपो लुक्। इणो यण् इति यणादेशः। यङ्लुक्तान्नित्यम् इति निधा-

1 S′ Kd °भागे°. 2 S′ Kd insert दि before °धि°. 3 S′ Kd अरोगा°. 4 S′ Kd स्वर्ण for स्वर्णरो.

तप्रतिषेधः। उदात्तवता तिङा गतेः समासवचनम् इति परिशब्दस्य तिङन्तेन समासः। तिङि चोदात्तवति इति गतेरनुदात्तत्वम्॥ किं कुर्वाणाः। विश्वा विश्वानि सर्वाणि रूपाणि प्रतिनियताकारान् जगदनुग्रहार्थं विभ्रतः धारयन्तः। यद्वा रूप्यन्त इति रूपाणि चेतनाचेतनात्मकानि वस्तूनि विभ्रतः अभिमतफलप्रदानेन पोषयन्तः॥ विश्वेति। शेश्छन्दसि बहुलम् इति शेर्लोपे प्रत्ययलक्षणेन नुमि उपधादीर्घत्वे न लोपः प्रातिपदिकान्तस्य इति नलोपः। विश्वशब्दः अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् [उ० १. १४९.] इति क्वन्प्रत्ययान्तत्वात् ञ्नित्यादिर्नित्यम् इत्याद्युदात्तः। विभ्रत इति। डुभृञ् धारणपोषणयोः इत्यस्माल्लटः शत्रादेशः। शपः श्लुः। भृञामित् इत्यभ्यासस्य इत्वम्। उगिदचां सर्वनामस्थानेऽधातोः इति प्राप्तस्य नुमो नाभ्यस्ताच्छतुः इति प्रतिषेधः। प्रत्ययस्वरेण शतुरुदात्तत्वे प्राप्ते अभ्यस्तानामादिः इति अभ्यस्तस्य आद्युदात्तत्वम्॥ वाचस्पतिः वाचः वेदात्मिकायाः पतिः पालकः स्वामी। निसर्गसिद्धत्वेन नित्यानामपि वेदानां प्रथमतस्तन्मुखाद् अभिव्यक्तेस्तस्य स्वामित्वव्यपदेशः। पदद्वयमपि परस्परसापेक्षतया एकार्थतावृत्तित्वान्निरूढत्वाच्च ब्रह्मणः संज्ञा॥ सावेकाच इति वाच उत्तरस्या विभक्तेरुदात्तत्वम्। षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वम्॥ तेषां प्रागुदीरितानां त्रिसप्तानां देवानां वला वलानि॥ पूर्ववत् शेश्छन्दसि बहुलम् इति शेर्लोपः॥ तत्तदसाधारणसामर्थ्यानि श्रुतधारणादीनि मे मम मेधादिफलार्थिनः॥ तेमयावेकवचनस्य इति अस्मच्छब्दस्य षष्ठ्येकवचनान्तस्य मेआदेशः। अनुदात्तं सर्वमपादादौ इत्यधिकारात् सर्वानुदात्तत्वम्॥ तन्वः तन्वाः शरीरस्य॥ अनित्यम् आगमशासनम् इति आडभावः॥ अद्य इदानीं मेधाजननादिकर्मकाले दधातु विदधातु करोतु॥ डुधाञ् धारणपोषणयोः। अस्माल्लोटि जुहोत्यादित्वात् शपः श्लुः। श्लौ इति द्विर्वचनम्। तिपः पित्त्वेन सार्वधातुकमपित् इति ङित्त्वस्याभावात् श्नाभ्यस्तयोरातः इति आल्लोपस्याभावः। तिङ्शितिङः इति निघातः॥ अत्र वलाधानरूपाभिमतफलप्रदातृत्वं वाचस्पतिकर्तृकम् अवगम्यते। तद् अयुक्तम् देवताया विग्रहाद्यभावेन फलदातृत्वायोगात्। लोके हि विग्रहादिमत एव सेवितराजादेः फलप्रदातृत्वं दृश्यते। नायं दोषः। देवताया

विग्रहाद्यभावेन फलदातृत्वासंभवेपि तदुद्देशेन क्रियमाणयागहोमादिजनितापूर्वस्यैव फलप्रदातृत्वाङ्गीकारात्। तथा च नवमे देवताधिकरणे निर्णीतम्। "देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्" [जै० ९. १. ६.] इत्यत्र। तथा हि। "यदाग्नेयोष्टाकपालः" [तै० सं० २. ६. ३. ३.] इत्यत्र देवता प्रतीयते। अपूर्वमपि। तत्र प्राकरणिकानाम् अवघातप्रोक्षणादीनां संनिपत्योपकारकाणां प्रयाजादीनाम् आरादुपकारकाणां च अङ्गानां किम् अग्न्यादिदेवता प्रयोजिका उत अपूर्वम् इति विशये देवतैव प्रयोजिकेति तावत् प्राप्तम्। कुतः। यागेन तोषिताया देवतायाः फलप्रदत्वात्। संभवति हि तस्याः फलप्रदत्वम्। मन्त्रार्थवादादिभ्यो विग्रहादिपञ्चकावगमात्। विग्रहः हविःस्वीकारः तद्भोजनम् तृप्तिः प्रसादश्च इत्येतत् चेतनस्योचितं पञ्चकम्। "सहस्राक्षो गोत्रभिद्वज्रबाहुः" [तै० सं० २. ३. १४. ४.] इति विग्रहः। "अग्निरिदं हविरजुषत" [तै० ब्रा० ३. ५. १०. २.] इति हविःस्वीकारः। "अङ्धीदिन्द्र प्रस्थितेमा हवींषि" [ऋ० १०. ११६. ८.] इति हविर्भोजनम्। "तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति" [तै० सं० २. ५. ४. ३.] इति तृप्तिप्रसादौ। ततः सेवितराजादिवत् पूजितदेवतायाः फलप्रदत्वेन प्राधान्यात् सैव धर्माणां प्रयोजिका। तथा सति विकृतिषु सौर्यादिषु प्राकृतानाम् अग्न्यादीनाम् अभावात् तत्संबद्धा धर्मा एव तावत् नातिदिश्यन्ते कुतस्तत्र ऊहस्य प्राप्तिरिति प्राप्ते अभिधीयते। किं देवतायाः फलप्रदातृत्वेन प्राधान्यं शब्दाद् आपाद्यते वस्तुसामर्थ्याद् वा। नाद्यः। "स्वर्गकामो यजेत" इत्यत्र यजेतेति शब्देन विधेयस्य यागस्य फलप्रदत्वावगमात्। द्रव्यदेवते तु सिद्धत्वेन विध्यनर्हे। तत्र यथा द्रव्यस्य विधेयं प्रति गुणत्वम् तथा देवताया अपि। यदा यागस्य कालान्तरभावि फलं प्रति व्यवहितत्वम् तदा तत्साधनभूता देवता ततोपि व्यवहिता। का तर्हि फलस्य गतिः। अपूर्वम् इति वदामः। तच्च श्रुत्या श्रुतार्थापत्त्या वा प्रतीयमानत्वात् शाब्दम् इति तस्य फलप्रदत्वम् उचितम्॥ नापि वस्तुसामर्थ्याद् देवस्य फलप्रदत्वम्। विग्रहादिपञ्चकप्रतिपादकयोर्मन्त्रार्थवादयोः स्वार्थे तात्पर्याभावात्। अन्यथा "वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा" [तै० सं० ७. ३.

---

1 S' Kd प्रयोजयेदतिथिवाद्भो°.
२

२०.] इत्यादिमन्त्रेष्वपि देवत्वं विग्रहादियुक्तत्वं [च] कल्प्येत। तच्च प्रत्यक्षविरुद्धम्। अतो न राजादिवत् फलप्रदत्वम्। किं च। विग्रहादिमद्देवतावाद्यपि न विना कर्मणा फलम् अभ्युपगच्छति। ततः प्राप्ताप्राप्तविवेकेन उभयवादिसिद्धस्य यागस्यैव फलप्रदत्वम् अस्तु। किं च मातापितृगुर्वादिशुश्रूषायाः विनापि देवतां फलप्रदत्वम् उभयवादिसिद्धम्। तस्मात् फलप्रदम् अपूर्वमेव धर्माणां प्रयोजकम्॥ तथा सति सौर्यादिषु अग्न्यादिदेवताभावेपि अपूर्वप्रयुक्तधर्माणाम् अतिदेशाद् अस्ति तत्र ऊहस्यावकाशः। तद् उक्तम्।..... एवं प्रकृतेपि एतत्सूक्तानुष्ठेयाज्यसमिद्धोमादिजनितापूर्वस्यैव अभिमतफलसाधनत्वम्। एवं सति ये त्रिषप्ता इत्यस्य करणमन्त्रत्वात् मन्त्राणां च अनुष्ठेयार्थप्रकाशकत्वात् फलप्रार्थनाव्यपदेशेन कर्मापेक्षितदेवता प्रकाश्यते इति अविरोधः॥ अयं च जैमिनिपक्षोनुक्रान्तः। बादरायणस्तु

विरोधे गुणवादः स्याद् अनुवादोवधारिते।
भूतार्थवादस्तद्ज्ञानाद् अर्थवादस्त्रिधा मतः॥

इति प्रमाणान्तराविरुद्धानां मन्त्रार्थवादादीनां स्वार्थेपि तात्पर्याङ्गीकारेण देवानां विग्रहादिपञ्चकम् अभ्युपगम्य यागहोमादिक्रियातोषितानां तेषां देवानामेव अभिमतफलप्रदानकर्तृत्वम् अङ्गीचकार। तथा च वैयासिकं सूत्रम्। "फलमत उपपत्तेः" [बा० ३. २. ३८.] इति। श्रुतिरपि आराधितस्य देवस्यैव फलप्रदातृत्वं दर्शयति। "स्त्रीपुंसोर्वा य इह स्थातुम् अपेक्ष्यते [तस्मै] सर्वैश्वर्यं ददाति यत्र कुत्रापि म्रियेत देहान्ते देवः परमं ब्रह्म तारकं व्याचष्टे" इति [नृ० पू० १.]। "एष ह्येव साधु कर्म कारयति तं यम एभ्यो लोकेभ्य उन्निनीषते एष ह्येवासाधु कर्म कारयति तं यम अधो निनीषते" [कौ० उ० ३. ८.] इत्यादि॥

अस्य सूक्तस्य मेधाजनने विनियोगाभिधानात् तस्य च अधीतवेदशास्त्रादिधारणसामर्थ्याधानरूपत्वात् वेदानाम् अधिपतिर्ब्रह्मैव तत् कर्तुं शक्नोतीति ब्रह्मप्रार्थनम् अत्र कृतम्। अनेनैवाभिप्रायेण श्रुतिरपि तद्वाचकशब्दान्तरं परिहृत्य वाचस्पतिशब्देन ब्रह्माणं निरदिक्षत्॥

अत्र विहितानि मेधाजननादीनि कर्माणि फलार्थीं स्वयमेव यदि अनु-

तिष्ठेत् तदा मे इति असच्छब्दस्य मुख्य एवार्थः संभवति। [यदा तु] फलभाजो यजमानस्य अशक्तया अनधिकाराद्वा उक्तानि कर्माणि अन्येन कार्यन्ते तदा किम् अयं मन्त्रः प्रत्यगाशीस्त्वलिङ्गात्[1] "आयुर्दा अग्नेस्यायुर्मे देहि" [तै० सं० १, ५, ५, ४.] इतिवत् फलभाजा यजमानेन पठितव्यः उत "ममाग्ने वर्चः" [ऋ० १०, १२८, १.] इतिवत् क्रियाकर्त्रा आचार्येण। द्वितीये पक्षे मन्त्रोच्चारणकर्तुरेव असच्छब्दाभिधेयत्वात् तस्यैव फलसंबन्धप्रतीतेः कथं यजमानस्य फलभाक्त्वम् इति चिन्तायाम् उच्यते। "आयुर्दा अग्ने" इत्यादेः करणतया विधानाभावात् लिङ्गाद् यजमानपाठ्यता[2] निर्णीता "मन्त्राश्चाकर्मकरणास्तद्वत्[3]" [जै० ३, ८, १५.] इत्यस्मिन्नधिकरणे। अस्य तु गोपथब्राह्मणे मेधाजननादिकर्मसु विनियोगाभिधानात् श्रुत्या लिङ्गं बाधित्वा "ममाग्ने वर्चः" इतिवत् अस्यापि मन्त्रस्य क्रियाकर्त्रा आचार्येणैव प्रयोक्तव्यता। तथा च क्रियाकर्तुराचार्यस्य दक्षिणया क्रीतत्वात् तदतिरिक्तफलसंबन्धानुपपत्तेः फलभाक्त्वं यजमानस्यैव। "शास्त्रफलं प्रयोक्तरि" [जै० ३, ७, १८.] इत्युक्तत्वात्। तथा च मे इति संबन्धसामान्ये षष्ठी। मम यो यजमानस्तस्येत्यर्थः। तथा च जैमिनीयं सूत्रम्। "०करणेष्वर्थवत्त्वात्" [जै० ३, ८, २५.] इति। अत्रायं संग्रहश्लोकः।

ममाग्न इति कस्यात्र फलं लिङ्गेन कर्तृगम्।
श्रुत्या स्वामिनि न क्रीते लिङ्गं तत्रोपचर्यताम्। इति॥

द्वितीया॥

पुनरेहि वाचस्पते देवेन मनसा सह।
वसोष्पते नि रमय मय्येवास्तु मयि श्रुतम्॥ २॥

पुनः। आ। इहि। वाचः। पते। देवेन। मनसा। सह।
वसोः। पते। नि। रमय। मयि। एव। अस्तु। मयि। श्रुतम्॥ २॥

हे वाचस्पते वाचः वेदरूपायाः पालयितर्देव। ॥ सुबामन्त्रिते पराङ्गवत् स्वरे इति षष्ठ्यन्तस्य पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य आमन्त्रितस्य च

---

1 S′Kd प्रत्यगाशीष्वलिंगात्. The emendation is conjectural. 2 S′Kd °पाठ्यता. 3 S′Kd मंत्राश्चकर्म°.

इत्याष्टमिकं सर्वानुदात्तत्वम् ॥ । ईदृश हे ब्रह्मन् देवेन द्योतनात्मकेन मनसा अन्तःकरणेन । अनुग्रहबुद्ध्येत्यर्थः । सकलेन्द्रियानुग्राहकत्वात् सत्त्वगुणपरिणामरूपत्वेन स्वच्छत्वाच्च मनसो द्योतनात्मकत्वम् । तादृशेन मनसा सह संगतः सन् पुनरेहि । क्रियाभ्यावृत्त्युपलक्षणार्थोयं पुनःशब्दः । अभिमतफलप्रदानार्थं पुनःपुनर्मत्समीपम् आगच्छेत्यर्थः । ॥ स्वरादिगणे पुनरा-द्युदात्तः इति पाठात् पुनःशब्द आद्युदात्तः ॥ ॥ अत्र वाचस्पतेरागमनं फलप्रदानार्थम् । तच्च फलप्रदानं किं वाचस्पतेरेव उत मनसोपीति विचिकित्सायाम् सहभावश्रवणात् मनसोपीति प्राप्तम् । तच्च अयुक्तम् । "सहैव दशभिः पुत्रैर्भारं वहति गर्दभी" इतिवत् सहशब्दश्रवणेपि अप्राधान्याद् मनसः क्रियानन्वयित्वात् । अप्राधान्यं च "सहयुक्तेऽप्रधाने" इति तृतीयाविधानात् । तथा शेषलक्षणे "त्वष्टारं तूपलक्षयेत् पानात्" [जै. ३. २. ३४.] इत्यधिकरणेपि एवमेव निर्णीतम् । तथा हि "अग्ना३इ पत्नीवा३ः सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा" [तै० सं० १. ४. २७.] इति पात्नीवतग्रहहोममन्त्रे त्वष्टुः पत्नीवदग्निसहभावश्रवणेन पानक्रियान्वयाद् देवतात्वात् तद्ग्रहशेषभक्षणमन्त्रेपि उपलक्षणीयत्वम् आशङ्क्य राद्धान्तितम् त्वष्टुः अप्रधानविभक्त्यभिहितत्वेन सहभावमात्रप्रतीतेः पानक्रियान्वयित्वाभावाद् अदेवतात्वाद् भक्षणमन्त्रे नोपलक्षणीयत्वमिति ॥ अपि च हे वसोष्पते वासकस्य ग्रामपश्वादिरूपस्य धनस्य स्वामिन् । ॥ अन्तर्भावितण्यर्थाद् वस निवासे इत्यस्मात् शॄस्वृस्निहित्रप्यसिवसिहनिक्षिदिबन्धिमनिभ्यश्च [उ० पा० १. १०.] इति उप्रत्ययः । अनित्यम् आगमशासनम् इति नुमभावे घेर्ङिति इति गुणे ङसिङसोश्च इति पूर्वरूपता । षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वम् । पूर्ववत् पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य षाष्ठिकम् आद्युदात्तत्वम् ॥ । यद्वा वसोः वासकस्य प्राणस्य पते स्वामिन् प्रजापते नि रमय अभिमतग्रामादिलक्षणफलप्रदानेन नितराम् अस्मान् क्रीडय । यतस्त्वं वसुपतिः अतस्तव ग्रामादिविविधफलप्रदानशक्तिरस्ति । तस्माद् अस्मदपेक्षितानां विविधफलानां साकल्येन प्रदानात् निरन्तरं सुखयेत्यर्थः ॥ अस्मादेव लिङ्गात् ग्रामसांपदादिषु कर्मसु विनियोग उपपन्नः । ॥ रमु क्रीडायाम् । अस्मात् हेतुमति णिचि उपधावृद्धौ जनीजृष्क्नसुरञ्जोमन्ताश्चेति मित्त्वात् मितां

ह्रस्वः इत्युपधाह्रस्वत्वम्[x]। इदानीं ग्रामादिविविधसंपत्त्या सर्वोत्कृष्टताम् आत्मनः प्रार्थयते। मय्येवास्तु त्वया दत्तं ग्रामादिकम् अनन्यसाधारण्येन मय्येव वर्तताम्। अन्ययोगव्यवच्छेदार्थोयम् एवकारः। यत एवकारस्ततोन्यत्रावधारणम्[1] इति न्यायेन असच्छब्दात् परतो वर्तमानेन एवकारेण ग्रामादीनां नियम्यमानत्वात्॥ मेधाजननस्य प्राधान्यं दर्शयितुं विप्रपरिव्राजकन्यायेन पार्थक्येन निर्दिशति मयि श्रुतमिति। श्रुतम् उपाध्यायाद् विधितोधीतं वेदशास्त्रादिकमपि मय्येव। अस्तु इत्यनुषङ्गः। सम्यगधीतस्यापि वेदादेः प्रायेण विस्मरणसंभवाद् अधीतस्य धारणार्थं मह्यं मेधां प्रयच्छेत्यर्थः॥

तृतीया॥

इ॒हैवाभि वि त॑नूभे आ॑र्ली॒ इव॒ ज्या॑या।
वा॒चस्पति॒र्नि य॑च्छतु मय्ये॒वास्तु॒ मयि॑ श्रुतम्॥ ३॥

इ॒ह। ए॒व। अ॒भि। वि। त॒नु॒। उ॒भे इति॑। आर्ली॒ इ॒वेत्यार्ली॑ऽइव। ज्या॑या। वा॒चः। पति॒रिति॑। नि। य॒च्छ॒तु॒। मयि॑। ए॒व। अ॒स्तु॒। मयि॑। श्रु॒त॒म्॥ ३॥

हे वाचस्पते इहैव अस्मिन्नेव साधके जने। [x]इदमो हः इति सप्तम्यर्थे हप्रत्यये इदम इश् इति इशादेशः[x]। उभे श्रुतधारणलक्षणां मेधां विविधभोगहेतुभूतां ग्रामादिसंपदं च। अनयोः ऐहिकामुष्मिकफलसाधनेन व्यवस्थितत्वात् कोटिद्वयेन निर्देशः। ते उभे अपि फले अभि वि तनु अभितो विस्तीर्णे कुरु। सर्वजनेभ्योपि मय्येव प्रभूते कुर्वित्यर्थः। [x]तनु विस्तारे। तनादिकृञ्भ्य उः इति उप्रत्ययः। उतश्च प्रत्ययादसंयोगपूर्वात् इति हेर्लुक्[x]। तत्र दृष्टान्तः। ज्यया मौर्व्या धनुषि आरोपितया आर्ली इव अटन्याविव। ते यथा अभिवितन्येते तथेत्यर्थः। अनेन स्वरसतः अप्राप्तयोरपि बलात् प्रापणम् उक्तम् इति द्रष्टव्यम्। यद्वा इहैव अभि वि तनु। अभिमतं फलम् इति शेषः। उभे आर्ली इवेति उभशब्दस्य उत्तरत्र संबन्धः। [x]ईदूदेद्विवचनमिति प्रगृह्यसंज्ञा। प्लुतप्रगृह्या अचि इति प्रकृतिभावः। आर्ली इवेति।

---

१ A B आर्ली. We with D R $\overset{m}{S}$ P $\overset{2}{P}$ J S K V.

---

1 S' Kd °धारणार्थं इति for °धारणम् इति.

इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् इति समासः ॥ इदानीं प्राप्तस्य फलस्य स्थैर्यं प्रार्थयते । वाचस्पतिः विधाता नि यच्छतु स्वात्मने दत्तं निखिलं फलं नियमयतु । यथा मां न जहाति तथा स्थिरीकरोतु इत्यर्थः । नि॒पूर्वाद् यमेः शपि इषगमियमां छः इति छत्वम् । तिङ्ङतिङः इति सर्वानुदात्तत्वम् ॥ अभिमतस्य फलस्य अयोगव्यवच्छेदम् उक्त्वा अन्ययोगव्यवच्छेदम् आह । मय्येवास्तु मयि श्रुतमिति । व्याख्यातमेतत् ॥

चतुर्थी ॥

उप॑हूतो वा॒चस्पति॒रुपा॒स्मान् वा॒चस्पति॑र्ह्वयताम् ।
सं श्रु॒तेन॑ गमेमहि॒ मा श्रु॒तेन्॒ वि रा॑धिषि ॥ ४ ॥

उप॑ऽहूतः । वा॒चः । पतिः॑ । उप॑ । अ॒स्मान् । वा॒चः । पतिः॑ । ह्व॒य॒ता॒म् ।
सम् । श्रु॒तेन॑ । ग॒मे॒म॒हि॒ । मा । श्रु॒तेन॑ । वि । रा॒धि॒षि॒ ॥ ४ ॥

वाचस्पतिः वाचः पालयिता देवः उपहूतः समीपम् आहूतः । सत्स्वपि अन्येषु देवेषु असावेव मम अभिलषितफलप्रदातेति अस्माभिः प्रार्थित इत्यर्थः । उपपूर्वात् ह्वयतेः कर्मणि निष्ठा । वचिस्वपीत्यादिना संप्रसारणम् । गतिरनन्तरः इति गतेः प्रकृतिस्वरत्वम् । उपसर्गाश्चाभिवर्जम् [फि० ४. १३.] इत्युपशब्द आद्युदात्तः ॥ यतो मयोपहूतः ततो हेतोर्वाचस्पतिः स देवः अस्मान् मेधाजननादिफलकामान् उप ह्वयतां तत्तत् फलं प्रदातुं स्वसमीपम् आह्वयतु । यद्वा । तत्तत्फलप्राप्तिम् अभ्यनुजानातु । उपपूर्वो ह्वयतिः अभ्यनुज्ञानेपि वर्तते । यथा "उपहूत उपह्वयस्व" इति सोमभक्षणानुज्ञानानुज्ञापनमन्त्रे ॥ तेन उपहूताः सन्तो वयं श्रुतेन विधितोधीतेन वेदशास्त्रादिना सं गमेमहि संगच्छेमहि । वाचस्पतिप्रसादप्राप्तया मेधया कृत्स्नं वेदशास्त्रं प्राप्नवामेति भावः । व्यवहिताश्च इति समः क्रियापदेन संबन्धः । समो गम्यृच्छीति गमेरात्मनेपदम् । अस्माद् आशीर्लिङि लिङ्याशिष्यङ् इति अङ् प्रत्ययः शपोपवादः । लिङः सीयुट् इति सीयुट् । छन्दस्युभयथा इति सार्वधातुकसंज्ञायां लिङः सलोपोनन्त्यस्य इति सलोपे गुणे वलि लोपः ॥ अधीतस्य वेदशास्त्रस्य स्वस्मिन् सर्वदावस्थानं प्रार्थयते मा श्रुतेनेति । श्रुतेन उक्तलक्ष-

णेन मा वि राधिषि विराद्धो वियुक्तो मा भूवम्। सर्वदा वेदशास्त्रादिसहितो भूयासम् इत्यर्थः। ॥ राध साध संसिद्धौ। अस्मात् माङि लुङि व्यत्ययेन आत्मनेपदम् इडागमश्च ॥॥

[इति] प्रथमकाण्डे प्रथमेनुवाके प्रथमं सूक्तम्॥

विद्मा शरस्येत्याद्यनुवाकशेषस्य उपाकर्मणि जपे विनियोगः। तथा च सूत्रम्। "अभिजिति शिष्यानुपनीय" इत्युपाकर्म प्रक्रम्य "त्रिषप्तीयं पच्छो वाचयेच्छेषमनुवाकस्य जपन्ति" इति [कौ०१४, ३,]। तत्र विद्मा शरस्येति प्रथमेन सूक्तेन तस्मिन्नेव उपाकर्मणि आज्यहोमः कर्तव्यः। अपराजितगणे अस्य पठितत्वात् "अभयैरपराजितैराज्यं जुहुयात्" [कौ०१४, ३,] इत्यादिषु विनियोगः॥

एतेनैव संग्रामजयकर्माणि कुर्यात्। तानि च। आज्यहोमः सक्तुहोमः धनुरिध्मेग्नौ धनुःसमिदाधानम् शरेध्मे शरसमिदाधानम् संपातिताभिमन्त्रितधनुःप्रदानं च प्रत्येतव्यानि। एतेषु कर्मस्वनुष्ठितेषु संग्रामे हृष्टमात्रेण शत्रवः पलायन्ते। तद् उक्तं संहिताविधौ। "विद्मा शरस्य [१, २,] मा नो विदन् "[१, १९,] अदारसृत् [१, २०,] स्वस्तिदाः [१, २१,] अव मन्युः [६, ६५,] "निर्हस्तः [६, ६६,] परि वर्त्मानि [६, ६७,] अभिभूः [६, ९७,] इन्द्रो "जयाति [६, ९८,] अभि त्वेन्द्र [६, ९९,] इति सांग्रामिकाणि। आज्यसक्तून् "जुहोति" इत्यादि [कौ०२, ५,]। अयमेव अपराजितगण इत्युच्यते। तथा अनेनैव सूक्तेन संपातयुक्ताभिमन्त्रितद्रुह्यार्ल्लीज्यापाशबन्धनं तद्वद्दूर्वादितृणबन्धनं च इषुनिवारणकामः कुर्यात्। सूत्रितं हि। "प्रथमस्येषुपर्ययणानि" इत्यादि [कौ०२, ५,]॥

तथा ज्वरातिसारातिमूत्रनाडीव्रणेषु तदुपशमनकामस्य अनेनैव सूक्तेन मुञ्जशिरोनिर्मितरज्जुबन्धनम् क्षेत्रमृत्तिकाया वल्मीकमृत्तिकाया वा पायनम् सर्पिर्लेपनम् चर्मखल्वामुखेन अपानशिश्ननाडीव्रणमुखानां धमनं च कार्यम्।

---

1 S′ Kd °द्रह्मीज्या° for द्रुह्यार्ल्लीज्या°. We with *Kaus'ika* and his two commentators.
2 S′ Kd चमखल्वा°. We with *Kaus'ika's* two commentators, who explain the word as meaning चर्मदृतिः.

आह च सूत्रकारः । "विद्मा शरस्य [१.२.] अदो यद् [२.३.] इति मुञ्ज-शिरोरज्ज्वा बध्नाति"इत्यादि "धमति"इत्यन्तम [कौ० ४. १.] ॥ "अपराजितां विजयकामस्य" इति [न०क०१७.] विहितायाम् अपराजिताख्यायां महाशान्तावपि अस्य विनियोगः । तद् उक्तं नक्षत्रकल्पे । "अपराजितगणोपराजितायाम्" इति [न०क०१८.] ॥

पुष्पाभिषेकेपि एतत् सूक्तम् । तद् उक्तं परिशिष्टे ।

शर्मवर्मगणश्चैव तथा स्याद् अपराजितः ।
आयुष्यश्चाभयश्चैव तथा स्वस्ययनो गणः ॥
एतान् पञ्च गणान् हुत्वा । इति [प० ५. ४.] ॥

तत्र प्रथमा ॥

विद्मा शरस्य पितरं पर्जन्यं भूरिधायसम् ।
विद्मो ष्वस्य मातरं पृथिवीं भूरिवर्पसम् ॥ १ ॥
विद्म । शरस्य । पितरम् । पर्जन्यम् । भूरिऽधायसम् ।
विद्मो इति । सु । अस्य । मातरम् । पृथिवीम् । भूरिऽवर्पसम् ॥ १ ॥

संग्रामजये शरस्यैव मुख्यसाधनत्वेन प्रसिद्धत्वात् तज्जयसामर्थ्यं विशिष्टकारणजन्यत्वेन उपपादयति । शरस्य हिंसकस्य बाणस्य शत्रुजयार्थं धनुषि संधीयमानस्य पितरम् उत्पादकं विद्मा जानीमः । विद ज्ञाने । अस्मात् लटि विदो लटो वा इति मसो मादेशः । अदादित्वात् शपो लुक् । प्रत्ययस्वरेण अन्तोदात्तत्वम् । तिङ्तिङः इत्यत्र अनुदात्तं सर्वमपादादौ इत्यधिकारात् अस्य च पादादित्वात् निघाताभावः । द्व्यचोतस्तिङः इति सांहितिको दीर्घः । किंसंज्ञकोयं पिता इत्याह पर्जन्यमिति । तर्पयिता चासौ जन्यश्चेति पर्जन्यः । तृपेर्विचि आद्यन्तयोर्वर्णयोर्विपर्ययः । जनेभ्यो हितो जन्यः । कालेकाले प्रवर्षणेन तर्पयिता सन् जनानां हितकारी भवतीत्यर्थः । यद्वा काले प्रवर्षणार्थं रसान् प्रार्जयतीति[1] पर्जन्यः । तथा च यास्कः । पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता जन्यः प्रार्जयिता वा रसानाम् इति [नि० १०. १०.] । त-

1 S' Kd वर्जयतीति.

स्य सर्वस्माद् अतिशयम् आह। भूरिधायसं भूरि बहुलं दधाति प्रवर्षणेन कृत्स्नं जगत् पोषयतीति भूरिधायाः। यद्वा। भूरीणि स्थावरजङ्गमात्मकानि वस्तूनि यथोचितकाले वृष्टिप्रदानेन दधाति धारयतीति भूरिधायाः। कारणस्य अतिशयितवीर्यत्वप्रतिपादनेन तज्जन्यस्यापि शरस्य अमोघवीर्यत्वम् उक्तं वेदितव्यम्। डुधाञ् धारणपोषणयोः। वहिहाधाञ्भ्यश्छन्दसि [उ० ४. २२०.] इति कर्तरि असुन्। तत्र णिदित्यनुवृत्तेः आतो युक् चिण्कृतोः इति युक्। असुनो नित्त्वात् तदन्तस्य आद्युदात्तत्वम्। समासेपि गतिकारकोपपदात्कृत् इति कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते असुनि गतिकारकयोरपि पूर्व[पद]प्रकृतिस्वरत्वं च [उ० ४. २२६.] इति स्मरणात् पूर्वपदप्रकृतिस्वरत्वम्। तच्च अदिशदिभूशुभिभ्यः क्रिन् [उ० ४. ६५.] इति भूरिशब्दस्य क्रिन्प्रत्ययान्तत्वात् क्नित्यादिर्नित्यम् इति आद्युदात्तत्वम्। तथा अस्य शरस्य[1] मातरं जननीम् सु सुष्ठु विद्मो। उशब्दः एवकारार्थे। विद्मैव तदसाधारणरूपं जानीम एव। ताम् आह। पृथिवीं प्रथितां विस्तीर्णां भूमिम्। श्रूयते हि। "तत् पुष्करपर्णेऽप्रथयत्। यद् अप्रथयत् तत् पृथिव्यै पृथित्वम्" [तै० ब्रा० १. १. ३. ७.] इति। प्रथ विस्तारे। अस्मात् प्रथेः पिवन् संप्रसारणं च [उ० १. १४८.] इति पिवन् प्रत्ययः। तत्संनियोगेन रेफस्य संप्रसारणम्। पिङ्गौरादिभ्यश्च इति ङीष्। प्रत्ययस्वरेण अन्तोदात्तत्वम्॥ तां विशिनष्टि। भूरिवर्पसं भूरीणि बहुविधानि वर्पांसि। रूपनामैतत्। रूपाणि चराचरात्मकानि यस्यां सा तथोक्ता। जनन्याः सर्वरूपोपादानत्वात् कारणगुणानां कार्ये अनुगमदर्शनात् तज्जन्यः शरोपि नानाकारः सन् साधकाभिमतं फलं साधयितुं शक्नोतीत्यर्थः। वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुक् च [उ० ४. २००.] इति वृङोऽसुन् प्रत्ययः तत्संनियोगेन पुगागमश्च। बहुव्रीहौ प्रकृत्या पूर्वपदम् इति प्रकृतिस्वरत्वम्॥

ननु अत्र शरादिशब्दानाम्[2] अनित्यबाणाद्यर्थविशेषवाचकता प्रतीयते। तत्[3]श्च अस्य अर्थविशेषस्य अयं वाचकः शब्द इति पदार्थोत्पत्तिसमनन्तरं तद्वाचकं शब्दं निश्चित्य अनन्तरं पदस्य प्रयोक्तव्यत्वाद् वेदस्य पौरुषेयत्वेन अप्रामाण्यम् अनित्यत्वं च प्राप्नोतीति॥ नायं दोषः। शब्दानाम् अनित्यार्थवाच-

---

1 S'Kd read शरीरस्य. 2 S'Kd अनित°. 3 S'Kd तश्च for ततश्च.

कत्वानभ्युपगमात्। तर्हि कोसौ वाच्योर्थः। आकृतिरिति वदामः। यद् अ-सूत्रयत् जैमिनिः। "आकृतिस्तु क्रियार्थत्वात्" [जै० १. ३. ३३.] इति। तथा हि व्रीहीन् अवहन्ति पशुम् आलभेत गाम् आनय ब्राह्मणो न हन्तव्यः इत्या-दिप्रयोगेषु किं व्यक्तिः शब्दार्थः उत आकृतिरिति। व्यक्तिरिति तावत् प्रा-प्तम्। कुतः। अवहननादिक्रियाभिः व्यक्तेरन्वेतुं योग्यत्वात्। न हि आकृतिः अवहन्तुम् आलब्धुम् आनेतुम् हन्तुं वा योग्या। ननु आनन्त्यव्यभिचाराभ्यां न व्यक्तौ व्युत्पत्तिः संभवति। अनन्ता हि गोव्यक्तयः। अतीतानागतानाम् अनेकदेशवर्तिनां गवाम् इयत्ताया अभावात्। किं च शुक्लव्यक्तौ व्युत्पन्नो गो-शब्दः कृष्णव्यक्तौ प्रयुज्यमानः स्वार्थं व्यभिचरेत् तत्र कथं व्युत्पत्तिरिति चेत्। एवं तर्हि व्युत्पत्तिकाले सा व्यक्तिः आकृत्या उपलक्ष्यताम् इति प्राप्ते

ब्रूमः। अन्वयव्यतिरेकाभ्याम् आकृतेः शक्तिग्रहणनिमित्तत्वात् शब्दार्थत्वं तस्या एवोचितम्। किं च गोशब्दे उच्चरिते व्यक्तिवादिनः संशयो भवेत्। तस्माद् आकृतेरेव अभिधेयत्वम्। यदि आकृतौ अवहननादिक्रिया न पर्य-वस्येत् तर्हि व्यक्तिस्तत्रोपलक्षणीया। किं च "श्येनचितं चिन्वीत" [तै० सं० ५. ४. ११. १.] इत्यादौ आकृतेरेव सादृश्यप्रतियोगितया कार्यान्वयो दृश्यते। तस्माद् आकृतिः शब्दार्थः॥ एवं प्रकृतेपि शरादिशब्दानां नित्य एव आकृ-तिलक्षणोर्थो वाच्यः। ततः शब्दार्थतत्संबन्धानां नित्यत्वेन अपौरुषेयत्वात् पु-रुषबुद्धिप्रभवदोषानुप्रवेशाभावेन वेदानां स्वतःसिद्धं प्रामाण्यं पुरुषप्रयत्लानि-र्वर्त्यत्वेन नित्यत्वं चेति॥

द्वितीया॥

ज्या॑कि॒ परि॑ णो न॒माश्मा॑नं त॒न्वं॑ कृधि।
वी॒डुर्व॒रीयो॒रा॒ती॒रप॒ द्वेषां॒स्या कृ॑धि॥ २॥

ज्याके। परि। नः। नम। अश्मानम। तन्वम्। कृधि।
वीडुः। वरीयः। अरातीः। अप। द्वेषांसि। आ। कृधि॥ २॥

हे ज्याके। कुत्सिता ज्या ज्याका। कुत्सिते इति कुत्सायां कप्रत्य-

---

१ KSV ज्याके. We with A B B^{h} D R S^{m} P P^{2} J.

यः ॥। स्वस्य उपद्रवहेतुत्वात् ज्यां कुत्सितत्वेन निर्दिशति। यद्वा अज्ञाता ज्या ज्याका। ॥ अज्ञातार्थे कप्रत्ययः ॥। शत्रुहस्तगतत्वेन तस्या अज्ञातत्वम्। ॥ आमन्त्रितस्य च इति पाठिकम् आद्युदात्तत्वम् ॥। हे ईदृशि मौर्वि नः अस्मान् परि णम परिहृत्य प्रह्वीभव। आज्यसक्तुहोमादिभिः इन्द्रप्रसादविशिष्टे मयि त्वदीयस्य शरसंधानार्थं नमनस्य निष्फलत्वात् मां विहाय अन्यत्र शरं प्रेरयेत्यर्थः॥ अस्य सूक्तस्य इन्द्रदेवताकत्वात् जयकर्मणः इन्द्रायत्तत्वाच्च अत्र अश्रुतोपि इन्द्र एव संबोध्यः। हे इन्द्र तन्वं तनुम्। ॥ तन्वादीनां छन्दसि बहुलम् इति यण्। उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य इति विभक्तेः स्वरितत्वम् ॥। अस्माकं शरीरम् अश्मानम् अश्मवद्दृढावयवं शस्त्राभेद्यं कृधि कुरु॥

यद्यपि अत्र सामानाधिकरण्येन शरीरस्य अश्मकरणप्रार्थना प्रतीयते तथापि पाङ्क्तौशिकस्य शरीरस्य अत्यन्तविरुद्धपाषाणात्मकत्वानुपपत्त्या "यजमानः प्रस्तरः" [ऐ० ब्रा० २. ३.] इतिवत् तत्संबद्धगुणलक्षणा आश्रीयते। तथा हि "यजमानः प्रस्तरः" इत्यस्मिन् वाक्ये उद्भिदा यागेन इतिवत् सामानाधिकरण्याद् अन्यतरस्य अन्यत् नाम इत्येकः पूर्वः पक्षः। गुणविधिरेष इत्यपरः। तत्रापि यजमानकार्ये जपादौ प्रस्तरस्य अचेतनस्य सामर्थ्याभावात् प्रस्तरकार्ये तु स्रुग्धारणादौ यजमानस्य शक्तत्वात् यजमानरूपो गुणो विधीयते। एवं सति पश्चाच्छ्रुतस्य प्रस्तरशब्दस्य कार्यलक्षकत्वेपि प्रथमश्रुतो यजमानशब्दो मुख्यवृत्तिर्भविष्यति[1]। न चात्र "पूर्ववन्तो[2] विधानार्थास्तत्सामर्थ्यं समाम्नाये" [जै० १. ४. १७.] इति द्वादशकपालन्यायेन स्तुतिः संभवति। अष्टाकपालद्वादशकपालयोरिव प्रस्तरयजमानयोः अंशांशित्वानुपपत्तेः। तस्मात् नामगुणयोरन्यतरत्वम् इति प्राप्ते अभिधीयते। उद्भिदादिशब्दानां हि अप्रसिद्धार्थत्वाद् यजिसामानाधिकरण्येन नामत्वं निर्णीतम्। अत्र तु गोमहिषयोरिव यजमानप्रस्तरशब्दयोः अर्थभेदस्य अत्यन्तप्रसिद्धत्वात् नामत्वं न युक्तम्। गुणविधि[3]पक्षे तु सूक्तवाकेन प्रस्तरं प्रहरति इत्यग्नौ प्रहरणस्यापि प्रस्तरकार्यत्वाद् यजमाने प्रहृते सति कर्मलोपः स्यात्। तस्माद् विधेयः प्रस्तरो यजमानशब्देन

---

1 S′Kd मुख्यावृ°. 2 S′Kd अपूर्व°. 3 S′Kd गुणविषयपक्षे.

स्तूयते । यथा सिंहो देवदत्त इत्यत्र सिंहगुणेन शौर्यादिना उपेतो देवदत्तः सिंहशब्देन स्तूयते तथा यजमानः प्रस्तर इत्यत्रापि यजमानगुणेन यागसाधकत्वेन युक्तः प्रस्तरो यजमानशब्देन लक्षणया प्रतिपाद्यते । एवं प्रकृते अश्मशब्दोपि स्वार्थसहचरितान् दृढावयवत्वशस्त्राभेद्यत्वादिगुणान् लक्षयित्वा प्रार्थ्यमानतद्गुणयोगिनि शरीरे वर्तत इति बोद्धव्यम् ॥

मयि त्वदीयं निरवधिकम् अनुग्रहम् अजानानः शत्रुर्माम् उद्दिश्य यद्यपि शरं प्रहिणुयात् तथापि स शरः अस्मच्छरीरं यथा न विदारयति तथा कुर्वित्यर्थः । डुकृञ् करणे । अस्माल्लोटि बहुलं छन्दसीति विकरणस्य लुक् । श्रुशृणुपृकृवृभ्यश्छन्दसि इति हेर्धिरादेशः । तस्य अपित्त्वेन गुणाभावः । किंच हे इन्द्र वीळुः सेनायाः संस्तम्भकत्वम् । वीळयतिश्च वीळयतिश्च संस्तम्भकर्माणौ इति हि यास्कः [नि० ५.१६.] । अरातीः अरातीन् अस्मच्छत्रून् द्वेषांसि । द्विष अप्रीतौ । भावे असुन् । तत्कृतान्यप्रियाणि च वरीयः । क्रियाविशेषणम् एतत् । उरुतरम् अपा कृधि अपाकुरु अपगमय । यथा पुनःपुनरागत्य अस्मान् नापकुर्वन्ति तथा प्रक्षीणबलान् कुर्वित्यर्थः । वरीय इति । उरुशब्दाद् ईयसुनि प्रियस्थिरेत्यादिना उरुशब्दस्य वरादेशः । क्रियाविशेषणानां कर्मत्वं नपुंसकत्वं चेति नपुंसकलिङ्गता । अरातीरिति । रा दाने । क्तिच्क्तौ च संज्ञायाम् इति क्तिच्प्रत्ययः । न रातयः अरातयः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । तस्माच्छसो नः पुंसि इति नत्वाभावश्छान्दसः ॥

तृतीया ॥

वृक्षं यद्गावः परिषस्वजाना अनुस्फुरं शरमर्चन्त्यृभुम् ।
शरुमस्मद्यावय दिद्युमिन्द्र ॥ ३ ॥

वृक्षम् । यत् । गावः । परिऽसस्वजानाः । अनुऽस्फुरम् । शरम् । अर्चन्ति । ऋभुम् ।

शरुम् । अस्मत् । यवय । दिद्युम् । इन्द्र ॥ ३ ॥

---

१ A °स्फुरं; BhKDV °स्फुरं. We with BRSm.

---

1 S′Kd तथा. 2 S′Kd insert °शब्देन a second time.

वृक्षम्। विकारे प्रकृतिशब्दः। वृक्षविकारं धनुर्दण्डम्। वृश्च्यत इति वृक्षः। ओव्रश्चू छेदने इत्यस्मात् व्रश्चिकृतीत्यादिना [उ० ३. ६६.] क्सप्रत्ययः। किच्चात् ग्रहिज्यादिना संप्रसारणम्। स्कोः संयोगाद्योरिति उपधासकारलोपः। वश्चभ्रस्जेत्यादिना षत्वे षढोः कः सि इति कत्वम्। गावः। गोविकारत्वाद् वा गमयति इपूनिति वा गावो मौर्व्यः। आद्ये तद्धितस्य लुक्। तद् उक्तं यास्केन। ज्यापि गौरुच्यते गव्या चेत् ताद्धितम् अथ चेन्न गव्या गमयतीपूनिति। वृक्षेवृक्षे नियता मीमयन्नौः। वृक्षेवृक्षे धनुषिधनुषीति [नि० २. ६.]। परिषस्वजानाः धनुर्दण्डम् आश्लिष्य धनुष्कोटौ आरोपिताः सत्य इत्यर्थः। ष्वञ्ज परिष्वङ्गे। अस्मात् छन्दसि लिट्[1] इति लिट्। लिटः कानज्वा इति कानजादेशः। उपधानकारलोपे द्विर्वचनम्। चितः इत्यन्तोदात्तत्वम्। अत्र परिष्वङ्गकथनेन स्त्रीपुंसयोरिव ज्याधनुर्दण्डयोरपि अन्योन्यसंसक्तयोरेव यथोचितकार्यकरत्वं सूचितम् इति मन्तव्यम्। ईदृश्यो ज्या यद् यदा अनुस्फुरं प्रतिस्फुरणम्। स्फुर संचलने। अस्माद् घञर्थे कविधानम्। स्थासागापाव्यधिहनियुध्यर्थम् इति परिगणनस्य उपलक्षणार्थत्वात् कम्प्रत्ययः। ऋभुम् उरु भासमानम्। शाणोल्लीढत्वात् निशितमित्यर्थः। ईदृशं शरुं हिंसकं शरम् अर्चन्ति। अर्चतिः अत्र गतिकर्मा। अस्मान् अभिलक्ष्य प्रेरयन्ति। शॄ हिंसायाम्। शॄस्वृस्निहित्रप्यसिवसिहनिक्षिदिबन्धिमनिभ्यश्च [उ० १. १०.] इति उमत्ययः। तदा हे इन्द्र अस्माभिर्दत्तेन हविषा प्रीतस्त्वं दिद्युं द्योतमानं शरुं शरम् अस्मन्निकटम् उपसर्पन्तम् अस्मत् अस्मत्तः सकाशात् यावय पृथक् कुरु। यथा स शरो मां न स्पृशति तथा अन्यत्र अपसारयेत्यर्थः॥ यद्वा शरुं हिंसकं दिद्युम्। वज्रनामैतत्। वज्रवद्भासमानं शस्त्रजातम्। अन्यत् पूर्ववत्॥ यावयेति। यु मिश्रणाभिश्रणयोः। अस्मात् णिचि वृद्धिः। पदकारास्तु संज्ञापूर्वको विधिरनित्यः इति वृद्धेरनित्यत्वाद् यवयेति पदं छिन्दन्ति। दिद्युमिति। द्युत दीप्तौ। अस्माद् द्युतिगमिजुहोतीनां द्वे चेति वक्तव्यम् इति क्विप् प्रत्ययः। तत्संनियोगेन द्विर्वचनम्। द्युतिस्वाप्योः संप्रसारणम् इति अभ्यासस्य संप्रसारणम्। अन्यलोपश्छान्दसः॥ इन्द्रे-

---

1 S′ Kd लिटीति for लिट् इति. 2 S′ Kd om सं°.

ति। इदि परमैश्वर्ये। ऋज्रेन्द्राग्रवज्रविप्रेत्यादिना [उ० २. २८.] इन्द्रशब्दो रन्प्रत्ययान्तो निपातितः। नित्त्वाद् आद्युदात्तत्वे प्राप्ते आमन्त्रितत्वाद् आष्टमिकं सर्वानुदात्तत्वम्। यास्कस्तु बहुधा इन्द्रशब्दं निरवोचत्। इन्द्र इरां दृणातीति वा इरां ददातीति वा इरां दधातीति वा इरां दारयतीति वा इरां धारयतीति वा इन्दवे द्रवत[2] इति वा इन्दौ रमत इति वा इन्धे भूतानीति वा तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वमिति विज्ञायते इदंकरणादित्याग्रायणः इदंदर्शनादित्यौपमन्यवः इन्दतेर्वा ऐश्वर्यकर्मणः [नि० १०. ८.] इत्यादि ॥ यद्वा वृक्षं बहुच्छायं वटादिकं गावः निदाघपीडिताः पशवः यद् यथा आश्लिष्यन्ति तथा तत्तदुचितजीविकाप्रदानेन उपकारकं शत्रुं परिपस्वजानाः परितः सेवमानाः तदीया भटाः अनुस्फुरं स्वामिनः हस्तनेत्रादिव्यापारमात्रम् अनुलक्ष्य। शरुम् अर्चन्तीत्यादि पूर्ववत् ॥

चतुर्थी ॥

यथा द्यां च पृथिवीं चान्तस्तिष्ठति तेजनम्।
एवा रोगं चास्रावं चान्तस्तिष्ठतु मुञ्ज इत् ॥ ४ ॥

यथा। द्याम्। च। पृथिवीम्। च। अन्तः। तिष्ठति। तेजनम्।
एव। रोगम्। च। आऽस्रावम्। च। अन्तः। तिष्ठतु। मुञ्जः। इत् ॥ ४ ॥

यथा येन प्रकारेण द्यां दिवम् आकाशं पृथिवीं भुवम्। परस्परसमुच्चयार्थौ चकारौ। उभयत्रापि व्यत्ययेन द्वितीया। दिवश्च पृथिव्याश्च अन्तः मध्ये अवस्थितं तेजनम् तेजनो वेणुः। ॥ लिङ्गव्यत्ययः। वेणुमस्करतेजना इत्यभिधानात्॥। तिष्ठति स्वकीयेन औन्नत्येन ते उभे अपि अधःकृत्य वर्तते एव एवम्। ॥ अन्त्यलोपश्छान्दसः। निपातस्य च इति सांहितिको दीर्घः॥। रोगं रुज्यते भज्यते पुरुषः अनेनेति रोगः ज्वरातीसारादिरूपः। ॥ हलश्च इति करणे घञ्। चजोः कु घिण्ण्यतोः इति कुत्वम्। ञ्नित्यादिर्नित्यम् इत्यादिरुदात्तः॥। तम् आस्रावम् आ समन्तात् स्रवति अङ्गप्रत्यङ्गेभ्य इत्यास्रावो मूत्रातीसारः। ॥ स्रु गतौ इत्यस्माद् आङ्पूर्वात् श्याद्य-

---

1 S′ Kd धारयतीति. 2 So S′ Kd.

धास्तुसंस्तुइत्यादिना णप्रत्ययः। अचो ञ्णिति इति वृद्धिः। पूर्ववत् षष्ठ्यर्थे द्वितीया। अत्रापि परस्परसमुच्चयार्थौ चकारौ ॥ ज्वरातीसारादिरोगस्य आस्रावस्य च अन्तः मध्ये मुञ्ज इत् मुञ्ज एव। मुञ्जेषीकानिर्मिता रज्जुरित्यर्थः। तिष्ठतु। तौ उभावपि रोगौ अधःकृत्य वर्ततामित्यर्थः॥ यद्यपि अत्र रोगशब्देन व्याधिसामान्यवाचिना आस्रावोपि गृहीतः तथापि एतन्मन्त्रसाध्या क्रिया आस्रावस्य विशेषतो निवर्तिकेति दर्शयितुम् आस्रावस्य पृथगभिधानम्॥

[इति] प्रथमकाण्डे प्रथमेनुवाके द्वितीयं सूक्तम्॥

विद्मा शरस्येति तृतीयसूक्तेन मूत्रपुरीषनिरोधे प्रमेहणसाधनहरीतकीकर्पूरबन्धनम्। मूषिकामृत्तिकापूतीकतृणदधिमथितजरत्प्रमन्ददारुतक्षणशकलानाम् अन्यतमस्य पायनम् हस्त्यश्वादियानारोहणम् शरविसर्जनम् शरेण मूत्रनालविदारणम् लोहशकलस्य मूत्रद्वारे प्रवेशनम् इत्येवमादीन्यपि सूत्रोक्तप्रकारेण व्याधितस्य[1] कुर्यात्। "विपितं ते वस्तिविलम्" इति द्यृचेन मूषिकामृत्तिकाद्युक्तद्रव्येषु निरुद्धमूत्रपुरीषं पुरुषम् आस्थापयेत्। "विद्मा शरस्येति प्रमेहणं बध्नाति" इत्यादि "फाण्टं पाययतीत्युदावर्तिने[2] च" इत्येतदन्तं सूत्रं द्रष्टव्यम् [कौ० ४. १.]॥

तत्र प्रथमा॥

विद्मा शरस्य पितरं पर्जन्यं शतवृष्ण्यम्।
तेना ते तन्वे ३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति॥ १॥
विद्म। शरस्य। पितरम्। पर्जन्यम्। शतऽवृष्ण्यम्।
तेन। ते। तन्वै। शम्। करम्। पृथिव्याम्। ते। निऽसेचनम्। बहिः।
ते। अस्तु। बाल्। इति॥ १॥

शरस्य हिंसकस्य बाणस्य पितरं पालकम् उत्पादकं वा विद्म यथावज्जानीमः। कीदृशम्। शतवृष्ण्यम् अपरिमितवीर्योपेतम्। विचित्रस्य तरुगुल्मादिरूपस्य स्थावरस्य पशुमृगनरादिरूपस्य जङ्गमस्य च उत्पादने पोषणे च समर्थम् इत्यर्थः। ईदृशं पर्जन्यं वृष्टिप्रदं देवम्। पितृत्वेन जानीम इति पूर्वेण सं-

1 S'Kd विव्याधितस्य. 2 S'Kd °वर्तने. We with *Kaus'ika*.

बन्धः । ॥ वर्षतीति वृषा । वृष सेचने । कनिन् युवृषितक्षीत्यादिना [उ० १. १५४.] कनिन् प्रत्ययः । वृष्णि भवं वृष्ण्यम् । भवे छन्दसि इति यत् । अल्लोपोऽनः इत्युपधालोपः । ये चाभावकर्मणोः इति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥ । तेन उक्तलक्षणेन शरेण । ॥ अन्येषामपि दृश्यते इति साहितिको दीर्घः ॥ । हे मूत्रनिरोधादिव्याधिग्रस्त ते तव तन्वे । ॥ आडभावश्छान्दसः । षष्ठ्यर्थे चतुर्थी । तनुशब्दात् ऊङ् उतः इत्यूङ् । उदात्तयणो हल्पूर्वात् इति विभक्त्युदात्तत्वस्य नोङ्धात्वोः इति प्रतिषेधे उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य इति विभक्तिः स्वर्यते ॥ । तन्वाः शरीरस्य शं रोगाणाम् उपशमनम् । ॥ आह च यास्कः । शमनं च रोगाणां यावनं च भयानामिति [नि० ४. २१.] ॥ । करं करोमि । ॥ शमिति । शमु उपशमने । अस्मात् भावे विच् । करम् । डुकृञ् करणे । छन्दसि लुङ्लङ्लिटः इति वर्तमाने लुङ् । कृमृदरुहिभ्यश्छन्दसि इति च्लेरङादेशः । बहुलं छन्दस्यमाङ्योगेपि इति अडभावः । आशंसायां भूतवच्च इति प्रार्थनायां वा लुङ् ॥ । शमनप्रकारमेव दर्शयति । ते तव मूत्ररोगार्तस्य पृथिव्यां भूमौ । ॥ पृथिवीशब्दो ङीपन्तः अन्तोदात्तः । उदात्तयणो हल्पूर्वात् इति विभक्तेरुदात्तत्वम् ॥ । निषेचनं नितरां सेकः प्रस्रावः । अस्त्विति संबन्धः । ॥ निपूर्वात् सिञ्चतेर्भावे ल्युट् । उपसर्गात्सुनोतीत्यादिना षत्वम् । लिति इति प्रत्ययात् पूर्वस्य उदात्तत्वम् । समासेपि कृदुत्तरपदप्रकृतिस्वरत्वेन स एव अवशिष्यते ॥ । निषेचनप्रकारम् आह । ते तव शरीरान्तर्निरुद्धं मूत्रं बाल् । अनुकरणशब्दोयम् । इति अनेन प्रकारेण शब्दं कुर्वत्[2] बहिरस्तु बाह्यप्रदेशे भवतु । मन्त्रसामर्थ्याद् विविधं शब्दं कुर्वत्[3] त्वरया शरीरात् निर्गच्छतु इत्यर्थः । यद्वा बाल् । ॥ बल प्राणने । अस्मात् ण्यन्तात् क्विप् ॥ । इतिहेतौ । अस्य रोगार्तस्य जीवनहेतोः मूत्रं बहिरस्त्विति ॥

द्वितीया ॥

विद्मा शरस्य पितरं मित्रं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥ २ ॥

---

1 S′ Kd भवो for भवं. 2 S′ Kd कुर्वन्. 3 S′ Kd कुर्वन्.

विष्ण। शरस्य। पितरम्। मित्रम्। शतऽवृष्ण्यम्।
तेन। ते। तन्वे। शम। करम। पृथिव्याम। ते। निऽसेचनम। बहिः। ते।
अस्तु। बाल्। इति ॥ २ ॥

अहरभिमानी देवो मित्रः। स च सर्वेषां प्राणिनां हि मित्रवत् हितकारित्वात् मित्र इत्युच्यते। तैत्तिरीयके मित्रस्य वाक्यम् "सर्वस्य वा अहं मित्रमस्मि" [तै० सं० ६. ४. ८. १.] इति। ॥ यास्कस्तु अन्यथा निरवोचत्। मित्रः प्रमीतेस्त्रायते इति [नि० १०. २१.] ॥। सोपि वृष्टिहेतुत्वेन शरस्य उत्पादयितृत्वात् पितृत्वेन व्यपदिश्यते। श्रूयते हि। "मैत्रं वा अहः। वारुणी रात्रिः" [तै० ब्रा० १. ७. १०. १.]। "अहोरात्राभ्यां खलु वै पर्जन्यो वर्षति "मित्रावरुणावेव स्वेन भागधेयेनोपधावति तावेवास्मा अहोरात्राभ्यां पर्जन्यं "वर्षयतः" [तै० सं० २. ४. १०. २.] इति ॥ शेषं पूर्ववद् योज्यम ॥

तृतीया ॥

विष्णा शरस्य पितरं वरुणं शतवृष्ण्यम्।
तेना ते तन्वे ३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥ ३ ॥
विष्ण। शरस्य। पितरम्। वरुणम्। शतऽवृष्ण्यम्।
तेन। ते। तन्वे। शम। करम। पृथिव्याम। ते। निऽसेचनम। बहिः। ते।
अस्तु। बाल्। इति ॥ ३ ॥

वरुणो राज्यभिमानी देवः। वृणोति तमसा पाशैर्वा प्राणिजातम् इति वरुणः। ॥ वरुणो वृणोतीति सत इति यास्कः [नि० १०. ३.]। वृञ् वरणे इत्यस्मात् कृपृवृदारिभ्य उनन् [उ० ३. ५३.] इति उनन् प्रत्ययः। ञ्नित्यादिर्नित्यम् इति आदिरुदात्तः ॥ शेषं पूर्ववद् व्याख्येयम ॥

चतुर्थी ॥

विष्णा शरस्य पितरं चन्द्रं शतवृष्ण्यम्।
तेना ते तन्वे ३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥ ४ ॥
विष्ण। शरस्य। पितरम्। चन्द्रम्। शतऽवृष्ण्यम्।

तेनं । ते । तन्वे᳖ । शम । करम । पृथिव्याम । ते । निऽसेचनम । बहिः ।
ते । अस्तु । बाल् । इतिं ॥ ४ ॥

चन्द्रः । ⁙ चदि आह्लादने । स्फायितञ्चीत्यादिना [उ० २. १३.] रक् प्रत्ययः ⁙ । आह्लादकारी देवः । ⁙ आह च यास्कः । चन्द्रश्चन्दतेः कान्तिकर्मण इति [नि० ११. ५.] ⁙ । अस्य ओपधीशत्वात् शरस्य पितृत्वेन व्यपदेशः ॥

पञ्चमी ॥

विद्मा शरस्यं पितरं सूर्यं शतवृष्ण्यम ।
तेना ते तन्वे ३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालितिं ॥ ५ ॥
विद्म । शरस्यं । पितरंम । सूर्यंम । शतऽवृष्ण्यम ।
तेनं । ते । तन्वे᳖ । शम । करम । पृथिव्याम । ते । निऽसेचनम । बहिः ।
ते । अस्तु । बाल् । इतिं ॥ ५ ॥

सूर्यः । सरति गच्छतीति वा सुवति प्रेरयति तत्तद्व्यापारेषु कृत्स्नं जगद् इति वा सूर्यः । यद्वा सुष्ठु ईर्यते प्रकाशप्रवर्षणादिव्यापारेषु जगद् विधात्रा परमेश्वरेण प्रेर्यत इति सूर्यः । श्रूयते हि । "भीषास्माद् वातः पवते भीषोदेति सूर्यः" [ब्रह्मवि० उ० ८.] इति । ⁙ तद् एतत् सर्वं यास्केनोक्तम । सूर्यः सर्तेर्वा सुवतेर्वा स्वीर्यतेर्वा इति [नि० १२. १४.] ⁙ । अथ वा शोभनं वीर्यम अस्येति सूर्यः । तथा च तैत्तिरीयकम । "सुवीर्योमर्या यथा गोपायत इति । तत् सूर्यस्य सूर्यत्वम" [तै० ब्रा० २. २. १०. ४.] इति । ⁙ पाणिनिना तु राजसूयसूर्येत्यादिना क्यबन्तो निपातितः । क्यपः पित्त्वाद् अनुदात्तत्वे धातुस्वरेण आद्युदात्तत्वम ⁙ । अयमपि वृष्टिद्वारा सर्वेषां पोषकत्वात् पिता । श्रूयते हि । "यदा खलु वा असावादित्यो न्यङ्रश्मिभिः पर्यावर्ततेऽथ वर्षति[1]" [तै० सं० २. ४. १०. २.] इति ॥

अनेन सूक्तेन क्रियमाणेषु कर्मसु पर्जन्यमित्रादयो देवतात्वेन मन्त्रवर्णाद् अवगन्तव्याः । यदाह

---

1 S′Kd पर्यावर्तते अथ.

तद्धितेन चतुर्थ्या वा मन्त्रलिङ्गेन वेष्यते।
देवतासंगतिस्तत्र दुर्बलं तु परं परम् इति॥

यदि इह कर्मसु विनियुज्यमाना मन्त्रा उच्चारणमात्रेण अदृष्टजनकाः स्युः तदा अनुष्ठेयार्थपरत्वाभावाद् देवतानाम् असिद्धिर्भवेत्। न च तथा। मन्त्राणाम् अनुष्ठेयार्थप्रकाशकत्वस्य प्रमाणलक्षणे "तदर्थशास्त्रात्" [जै० १. २. ३१.] इत्यधिकरणे निर्णीतत्वात्। तथा हि। "उरु प्रथस्व" [तै० सं० १. १. ८. १.] इत्यादिमन्त्रोच्चारणस्य किम् अदृष्टं प्रयोजनम् उत अनुष्ठेयार्थप्रतिपत्तिरिति। अदृष्टमेवेति तावत् प्राप्तम् न तु प्रथनादिलक्षणस्यार्थस्य अवगतिः। तस्य ब्राह्मणवाक्येनापि भासमानत्वात्। "उरु प्रथस्वेति पुरोडाशं प्रथयति" इति हि ब्राह्मणवाक्यम्॥ नैतद् युक्तम्। अर्थप्रत्यायनस्य दृष्टप्रयोजनस्य संभवे सति केवलादृष्टस्य कल्पयितुम् अशक्यत्वात्। तस्माद् दृष्टम् अर्थानुस्मरणमेव यागप्रयोगे मन्त्रोच्चारणस्य प्रयोजनम्। ब्राह्मणवाक्येनापि अर्थानुस्मरणसंभवे मन्त्रेणैव अनुस्मरणीयम् इति यो नियमः तस्य दृष्टासंभवात् अदृष्टं प्रयोजनम् अस्तु। यदाहुः

मन्त्रा उरु प्रथस्वेति किम् अदृष्टैकहेतवः।
यागेषूत पुरोडाशप्रथनाद्यवभासकाः॥
ब्राह्मणेनापि तज्ज्ञानान्मन्त्राः पुण्यैकहेतवः।
न तज्ज्ञानस्य दृष्टत्वाद् दृष्टं वरम् अदृष्टतः। इति॥

षष्ठी॥

यदान्त्रेषु गवीन्योर्यद्वस्तावधि संश्रुतम्।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम्॥ ६॥

यत्। आन्त्रेषु। गवीन्योः। यत्। वस्तौ। अधि। समऽश्रुतम्।
एव। ते। मूत्रम्। मुच्यताम्। बहिः। बाल्। इति। सर्वकम्॥ ६॥

---

१ BhBKV °श्रितम्. R °स्रुतम्. We with ABhDmSJ2P.

---

1 S′Kd यदिह for यदि इह. 2 S′Kd उच्चारणामात्रेण.

आन्त्रेषु उदरान्तर्गतेषु पुरीतत्सु। ⁂अधिः सप्तम्यर्थानुवादी⁂। यत् मूत्रं संश्रितं समवस्थितं रोगवशाद् यथाकालं बहिरनिर्गच्छत् निरुद्धम् अभूत् तथा गवीन्योः। आन्त्रेभ्यो विनिर्गतस्य मूत्रस्य मूत्राशयप्राप्तिसाधने पार्श्वद्वयस्थे नाड्यौ गवीन्यौ इत्युच्यते। तयोरपि यत् मूत्रं संश्रितम् तथा वस्तौ। धनुराकारो मूत्राशयो वस्तिरुच्यते। तत्रापि यत् मूत्रं संश्रितम् अस्ति ते तव उक्तस्थानेषु निरुद्धं तत् मूत्रम् एव एवम्। ⁂अन्त्यलोपश्छान्दसः। निपातस्य च इति सांहितिको दीर्घः। एवमादीनामन्तः [फि° ४. १४.] इत्यन्तोदात्तत्वम्⁂। यथापूर्वं मुच्यतां निर्गच्छतु। निर्गमनप्रकारमेव आह। सर्वकं सर्वं तत् मूत्रम्। ⁂अव्ययसर्वनाम्नाम् अकच् प्राक् टेः इति अकच्। चितः सप्रकृतेर्बह्वकजर्थम् इति सप्रकृतिकस्य प्रत्ययस्य चितः इत्यन्तोदात्तता⁂। तत् मूत्रं बाल्। अनुकरणशब्दोयम्। इति एवमात्मकं[2] शब्दं कुर्वत् बहिः शरीराद् वाह्यप्रदेशे। मुच्यताम् इति संबन्धः॥

सप्तमी॥

प्र ते भिनद्मि मेहनं वर्त्रं वेशन्त्या इव।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम्॥ ७॥

प्र। ते। भिनद्मि। मेहनम्। वर्त्रम्। वेशन्त्याःऽइव।
एव। ते। मूत्रम्। मुच्यताम्। बहिः। बाल्। इति। सर्वकम्॥ ७॥

हे मूत्रव्याधिपीडित ते तव मेहनम्। मिह्यति सिञ्चति अनेनेति मेहनं मूत्रनालः। ⁂करणे ल्युट्। लिति इति प्रत्ययात् पूर्वस्य उदात्तः⁂। तत् मेहनं प्र भिनद्मि लोहशलाकया मूत्रनिर्गमनार्थं विदारयामि। ⁂व्यवहिताश्च इति प्रोपसर्गस्य क्रियापदेन संबन्धः⁂। तत्र दृष्टान्तः। वर्तम्। वर्तते प्रवहति जलम् अत्रेति वर्तो मार्गः। ⁂वृतु वर्तने। अस्माद् अधिकरणे घञ्⁂। तं वेशन्त्या इव। विशन्ति तिष्ठन्ति अस्मिन्[3] आप इति वेशन्तः पल्वलम्। ⁂विश प्रवेशने। जृविशिभ्यां झच् [उ° ३. १२६.]

---

१ BKV वर्तं; B वृत्रं. We with ADRRSJP.

---

1 So S′Kd. 2 S′Kd एवमात्मिकं. 3 S′Kd तस्मिन्.

इति झच् प्रत्ययः। झोन्तः इति झस्यान्तादेशः ॥। तत्र भवा आपो वेशन्त्याः। ॥ भवे छन्दसि इति यत् ॥। ता यथा सुनिर्गमनमार्गं विदारयन्ति तथेत्यर्थः। एव एवम् इत्थं मूत्रनिरुद्धनिःसरणाय मार्गस्य कृतत्वात् ते मूत्रं मुच्यताम् इत्यादि पूर्ववद् व्याख्येयम् ॥

अष्टमी ॥

विषितं ते वस्तिबिलं समुद्रस्योदधेरिव।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥ ८ ॥

विऽसितम्। ते। वस्तिऽबिलम्। समुद्रस्य। उदधेःऽइव।
एव। ते। मूत्रम्। मुच्यताम्। बहिः। बाल्। इति। सर्वकम् ॥ ८ ॥

हे मूत्ररोगार्त ते तव वस्तिबिलं वस्तिद्वारं व्याधिवशात् निरुद्धं मूत्रवर्त्म विषितं विमुक्तं मूत्रनिःसरणयोग्यम् अस्तु। ॥ षो अन्तकर्मणि। अस्माद् विपूर्वात् निष्ठा। द्यतिस्यतिमास्थामित्ति किति इति इत्त्वम्। उपसर्गात् सुनोतीत्यादिना षत्वम् ॥। तत्र दृष्टान्तः। समुद्रस्य। समुनत्ति स्वकीयेन जलेन कृत्स्नं जगत् क्लेदयतीति समुद्रः। ॥ उन्दी क्लेदने। स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदपिवन्द्युन्दीत्यादिना [उ० २. १३.] रक् प्रत्ययः। समुद्रं[2] यास्कस्तु बहुधा निरवोचत्। समुद्रः कस्मात्। समुद्रवन्त्यस्मादापः समभिद्रवन्त्येनमापः संमोदन्तेस्मिन् भूतानि समुदको[3] भवति समुनत्तीति वेति [नि० २. १०.] ॥। उदधेः। उदकानि धीयन्ते धार्यन्तेस्मिन्निति उदधिः। अनेन बिलवदवस्थितेषु नदीमुखेषु समुद्रजलस्य निःसरणयोग्यता उक्ता। ॥ डुधाञ् धारणपोषणयोः। अस्मात् कर्मण्यधिकरणे च इति किप्रत्ययः। आतो लोप इटि च इत्याकारलोपः। पेपंवासवाहनधिषु च इत्युदकशब्दस्य उदभावः। गतिकारकोपपदात् कृत् इति कृदुत्तरपदप्रकृतिस्वरत्वेन अन्तोदात्तता ॥। उदकपूर्णसमुद्रस्य नदीमुखलक्षणं जलनिःसरणद्वारं यथा विवृतं भवति एवं वस्तिबिलमपि विवृतं भवत्वित्यर्थः। एव एवम्। उक्तप्रकारेण। वस्तिविले विपिते सतीत्यर्थः ॥ शेषं पूर्ववद् व्याख्येयम् ॥

---

1 S′Kd °क्षुपि° for °क्षुदि°. 2 S′Kd समुद्रः. 3 S′Kd समुद्रको.

नवमी ॥

यथेषुका परापतदवसृष्टाधि धन्वनः ।
एवा ते मूत्रं मुच्यतां बहिर्बालितं सर्वकम् ॥ ९ ॥

यथा । इषुका । पराऽअपतत् । अवऽसृष्टा । अधि । धन्वनः ।
एव । ते । मूत्रम् । मुच्यताम् । बहिः । बाल् । इति । सर्वकम् ॥ ९ ॥

अज्ञाता इषुः इषुका । ॥ प्रागिवात् कः इति अज्ञातार्थे कप्रत्ययः ॥ । अधि धन्वनः । ॥ अधिः पञ्चम्यर्थानुवादी ॥ । आनतज्याद् धनुषः सकाशात् अवसृष्टा विमुक्ता सती यथा येन प्रकारेण परापतत् परापतति अनिरुद्धवेगा शीघ्रं लक्ष्योद्देशं गच्छति । ॥ पत गतौ । छन्दसि लुङ्लङ्लिटः इति वर्तमाने लङ् । अवसृष्टेति । अवपूर्वात् सृज विसर्गे इत्यस्मात् कर्मणि निष्ठा । व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः इति षत्वे ष्टुत्वम् । गतिरनन्तरः इति गतेः प्रकृतिस्वरत्वम् ॥ । एव एवम् ॥ शेषं पूर्ववत् ॥

[इति] प्रथमकाण्डे प्रथमेनुवाके तृतीयं सूक्तम् ॥

अम्बयो यन्तीत्यादिसूक्तत्रयेण प्रातरनुवाकानन्तरं होत्रानूच्यमानम् अपोनप्त्रीयं ब्रह्मा अनुजपति । तद् उक्तं वैताने । "अम्बयो यन्तीति त्रीण्यपोनप्त्रीयम्" इति [वै० ३. ६.] । तत्र अम्बयो यन्तीत्याद्यं सूक्तं बृहद्गणे पठितम् । तथा च सूत्रम् । "अम्बयो यन्ति [१. ४] शंभुमयोभूः [१. ५, ६] हिरण्य-
"वर्णाः [१. ३३] निःसालाम् [२. १४] ये अग्नयो [३. २१] ब्रह्मजज्ञानम्
"इत्येका [४. १. १] उत देवाः [४. १३] मृगारसूक्तानि [४. २३-२९] उत्त-[2]
"मं वर्जयित्वा अप नः शोशुचदघम् [४. ३३] पुनन्तु मा [६. १९] सस्रुपीः
"[६. २३] हिमवतः प्रस्रवन्ति [६. २४] वायोः पूतः पवित्रेण [६. ५१] शं
"च नो मयश्च नः [६. ५७. ३] अनडुह्यस्त्वं प्रथमम् [६. ५९] मह्यमापो
"[६. ६१] वैश्वानरो रश्मिभिः [६. ६२] यमो मृत्युः [६. ९३] विश्वजित्
"[६. १०७] संज्ञानं नो [७. ५४] यद्यन्तरिक्षे [७. ६८] पुनर्मैत्विन्द्रियं

---

1 S' Kd शंभुमयोभू हिरण्य°. 2 Kd S' उत्तमान्. We with *Kaus'ika* and his commentators *Dârila* and *Kes'ava*.

"[७. ६९] शिवा नः [७. ७१.] शं नो वातो वातु [७. ७२] अग्निं "ब्रूमो वनस्पतीन् [११. ६]" इति [कौ० १. ९.] ॥ लघुगणेपि एतत् सूक्तं पठितम् । सूत्रितं हि । "अम्बयो यन्ति [१. ४] शंभुमयोभूः [१. ५, ६] "हिरण्यवर्णाः [१. ३३] शंतातीयं [४. १३] यद्यन्तरिक्षे [७. ६८] पुनर्मै- "त्विन्द्रियं [७. ६९] शिवा नः [७. ७१.] शं नो वातो वातु [७. ७२] "अग्निं ब्रूमो वनस्पतीन् [११. ६]" इति [कौ० १. ९.]। तत्र शन्तातीय-मिति आ त्वागमं शंतातिभिरिति शंतातिशब्दयुक्तत्वात् उत देवा [४. १३] इति । अयमेव बृहद्गणापेक्षया लघुत्वात् लघुगण इत्युच्यते । तथा शंतातीय-सूक्तयोगात् शंतातीयो गण इत्युच्यते । अतः परिशिष्टे "शंतातीयेन तिलान् जुहोति" [प० ८. १.] इत्यत्र अयमेव गणः प्रत्येतव्यः ॥ अपां सूक्तेषु च एतत् सूक्तं पठितम् । अम्बयो यन्ति [१. ४] शंभुमयोभूः [१. ५, ६] हिरण्यवर्णाः [१. ३३] यददः [३. १३] पुनन्तु मा [६. १९] सस्रुषीः [६. २३] इत्या-दीनि अपां सूक्तानि । अतः तेषां गणानां यत्रयत्र विनियोगः तत्र सर्वत्र अस्य विनियोगो द्रष्टव्यः ॥

तथा गवां रोगोपशमनपुष्टिप्रजननकर्मसु अनेनैव सूक्तेन अभिमन्त्रितं स-लवणं केवलं वा उदकं गाः पाययेत् । तद् उक्तं कौशिकसूत्रे । "अम्बयो य-न्ति" इति प्रक्रम्य "गा लवणं पाययत्युपतापिनीः प्रजननकामाः[2] प्रपास् अ-वरुणद्धि" इति [कौ० ३. २.] ॥

तथा सर्वरोगभैषज्यकर्मणि अनेनैव सूक्तेन आज्यहोमं पलाशोदुम्बरादि[3]-शान्तवृक्षसमिदाधानं च कुर्यात् । सूत्रितं च । "अम्बयो यन्ति [१. ४.] वा-योः पूतः [६. ५१.] इति च शान्ताः" इति [कौ० ४. १.] ॥

तथा लाभालाभजयपराजयाद्यभिलषितकर्मणां सिद्ध्यसिद्धिविज्ञानार्थम् अनेनैव सूक्तेन पच्यमानक्षीरौदनेध्माधानकुशस्तम्बपाठा अनुमन्त्रयेत[4] । तत्रौ-

---

1 S′ Kd शंतातीयं च for शंतातीयं. The two MSS. of *Kaus'ika* read शंतातीं च. Is the reading of S′ Kd a wrong emendation of a misreading of *Kaus'ika's* text? If so the mis-emendation must be Sâyaṇa's. 2 S′ Kd °मः for °माः. We with *Kaus'ika* and *Dârila*. *Kes'ava* does not explain the term. 3 S′ पालाशौदु°; Kd पलाशौदु°. 4 S′ Kd °मंत्रयेतत्रौदनादीनां.

दनादीनां क्रमेण पाके प्रसारणे समसंख्यायां विकासे स्वकार्यसिद्धिं जानीयात् इतरथा तु असिद्धिम् । तद्वदेव जयपरिज्ञाने संग्रामभूमिवेदिकापरीक्षणं च अनेनैव कुर्यात् । सूत्रितं च । "अम्बयो यन्तीति क्षीरौदनोलुचस्तम्बपाठाविज्ञानानि सांग्रामिकं[1] वेदिविज्ञानम्" इति [कौ० ५. १.] ॥

तथा अर्थोत्थापनविघ्नशमनकामः अनेन सूक्तेन मरुद्भ्यो मान्तवर्णिकीभ्यो देवताभ्यः क्षीरौदनहोमः आज्यहोमः काशदिविधुवकवेतसाख्या[2] ओषधीरेकस्मिन् पात्रे कृत्वा संपात्य अभिमन्त्र्य जलमध्ये अधोमुखं निनयनम् तासामेव काशादीनां संपातिताभिमन्त्रितानाम् अप्सु स्नावनम् स्वशिरसो मेषशिरसश्च अभिमन्त्रितस्य अप्सु प्रक्षेपणम् मानुषकेशजरदुपानहां वंशाग्रे[3] बन्धनम् तुषसहितम् आमपात्रम् अभिमन्त्रितोदकेन संप्रोक्ष्य त्रिपदे शिक्ये निधाय अप्सु प्रक्षेपणं च इत्येतानि अभिवर्षणकर्माणि संपातिताभिमन्त्रितघटोदकेन आस्नावनम् अवसेचनं च कुर्यात् । अत्र "अर्थम् उत्थास्यन्" इति प्रक्रम्य "अम्बयो यन्ति शंभुमयोभूरित्यादि अभिवर्षणावसेचनानाम्" इत्येतदन्तं सूत्रं द्रष्टव्यम् [कौ० ५. ५.] । अत्र अमूर्या इत्यनया परिहरणानन्तरम्[4] आग्नीध्रीये उपसाद्यमाना वसतीवरीः अनुमन्त्रयते । तद् उक्तं वैताने । "वसतीवरीः परिह्रियमाणाः" इत्युपक्रम्य "आग्नीध्रीयेवस्थाप्यमाना उत्तरया अमूर्या इति च" इति [वै० ३. ६] ॥

तत्र प्रथमा ॥

अम्बयो॑ यन्त्यध्व॑भिर्जा॒मयो॑ अध्वरीय॒ताम् ।
पृञ्च॒तीर्मधु॑ना॒ पय॑ः ॥ १ ॥
अम्ब॑यः । य॒न्ति॒ । अध्व॑ऽभिः । जा॒मय॑ः । अ॒ध्व॒रि॒ऽय॒ताम् ।
पृञ्च॒तीः । मधु॑ना । पय॑ः ॥ १ ॥

अम्बयः । अम्बाशब्दवद् अम्बिशब्दोपि मातृवाचित्वेन वेदे प्रसिद्धः । यथा "अम्बितमे नदीतमे" [ऋ० २. ४१. १६.] इति "अम्बे अम्बाल्यम्बिके" [तै० सं० ७. ४. १९. १.] इति च । कृत्स्नस्य जगतो मातृभूता आपः । "अ-

1 S′ Kd संग्रा°. 2 S′ Kd °साख्य ओ°. 3 S′ Kd वंशांगे. We with *Kaus'ika*. 4 S′ Kd °हारणानंतरम्.

म्बयो यन्त्यध्वभिरित्यापो वा अम्बयः" इति हि कौपीतकिब्राह्मणम्। "इन्द्राय षट् सहस्राण्यपोनं प्रजापतिः प्रायच्छत्ता अम्बयः" इति शाट्यायनकम्। ता आपः। अध्वरीयताम्। ध्वरो हिंसा न विद्यतेस्मिन्निति अध्वरः ज्योतिष्टोमादिर्यागः। तम् आत्मन इच्छताम्—

ननु ज्योतिष्टोमादौ अग्नीषोमीयसवनीयानुबन्ध्याः पशव आलभ्यन्ते कथं तत्र हिंसाऽभाव इति चेत् मैवम्। नात्र हिंसाया अभावं ब्रूमः। किंतु तज्जनितप्रत्यवायाभावम्। तथा हि। "न हिंस्यात् सर्वभूतानि" इति सामान्यशास्त्रं विशेषशास्त्रक्रोडीकृतविषयपरिहारेणैव प्रवर्तत इति हि परीक्षकप्रसिद्धिः। "पञ्चदश सामिधेनीरन्वाह" [तै० सं० २. ५. ८. २.] इति सामान्यविहितस्य सामिधेनीपाञ्चदश्यस्य "सप्तदशानुब्रूयाद्वैश्यस्य" [तै० सं० २. ५. १०. २.] इत्येवं विशेषविहितसामिधेनीसाप्तदश्यस्य विषयाननुप्रवेशेनैव प्रवृत्तेः शास्त्रे निर्णीतत्वात्॥ तथा च "अग्नीषोमीयं पशुम् आलभेत" इति विशेषशास्त्रविहितविषयपरिहारेण "न हिंस्याद्" इति सामान्यशास्त्रं व्यर्थहिंसामेव अवलम्बत इति वैधहिंसाया निषिद्धत्वाभावात् नानर्थहेतुत्वम्। एतदेवाभिप्रेत्य उक्तम् अध्वर इति॥ ननु "अग्नीषोमीयं पशुम् आलभेत" इत्यादिवत् "श्येनेनाभिचरन् यजेत" इत्यादौ अभिचारस्यापि विहितत्वात् नानर्थहेतुत्वम् इति चेत् मैवम्। श्येनादियागस्य विहितत्वेपि तत्साध्यहिंसाया अग्नीषोमीयपशुहिंसावद् विधिविषयत्वाभावेन निषेधशास्त्रानुप्रवेशाद् अनर्थत्वात्। तथा च तत्साधनभूतः श्येनयागोपि तद्द्वारा अनर्थ इति। गुरुमते तु श्येनादेरविधेयत्वम्। तत्र रागत एव प्रवृत्तत्वात्। तथा च श्येनवाक्यस्य अयमर्थः। अभिचारेण शत्रुं यदि जिघांससि तर्हि तव वैदिकोपायः श्येन इति रागप्राप्तायाः शत्रुहिंसायाः साधनमात्रं बोध्यते न तु यागे पुरुषः प्रवर्त्यते श्येनं कुर्विति। तथा चोक्तम्। "साध्यसाधनभावप्रतीतिमात्रपर्यवसितो हि विधिव्यापारो न प्रयोगपर्यवसितः" इति। अतः श्येनयागे विधितः प्रवृत्त्यभावेन "न हिंस्यात् सर्वभूतानि" इति निषेधशास्त्रस्य तत्रानुप्रवेशात् श्येनस्य अनर्थत्वम्॥ एतद्व्युदासार्थमेव "चोदनालक्षणोर्थो धर्मः" [जै० १. १. २.] इत्यत्र भगवता जैमिनिना अर्थपदेन धर्मो विशेषितः॥ नन्वेवं श्येनाङ्गभूताग्नीषोमीयपशुहिंसायाम् अपि अनर्थता प्रसज्येतेति। नैतत्। वैषम्यात्। न हि श्येनया-

गवत् तदितिकर्तव्यतायां रागतः प्रवर्तते पुरुषः किं तु विधित एव। तथा चोक्तम्। कामाधिकारे करणांशे रागतः प्रवृत्तिः अङ्गेषु तु वैधी इति। तद् अलम् अतिप्रसङ्गेन। प्रकृतम् अनुसरामः॥

अध्वरीयताम् अध्वरं सोमयागम् आत्मन इच्छतां यजमानानां जामयो भगिन्यः। क्रियमाणे व्यापारे भगिनीवत् सहायभूता इत्यर्थः। एवंभूता आपः अध्वभिर्मार्गैः चात्वालोत्करमध्यदेशरूपैः प्रसिद्धैर्वा मार्गैः यन्ति आगच्छन्ति। यागभूमिम् इत्यर्थः। ॥ यन्तीति। इण् गतौ। अदादित्वात् शपो लुक्। "इणो यण्" इति यणादेशः। "तिङ्तिङः" इति सर्वानुदात्तत्वम्॥ अध्वरीयतामिति[1]। अध्वरशब्दात् "सुप आत्मनः क्यच्"। "न च्छन्दस्यपुत्रस्य" इत्यत्र "अपुत्रादीनाम् इति वक्तव्यम्" इति स्मरणाद् ईत्वनिषेधाभावात् "क्यचि च" इति ईत्वम्। "कव्यध्वरपृतनस्यर्चिलोपः" इति तु व्यत्ययेन न प्रवर्तते। क्यजन्तात् लटः शत्रादेशः। तत्र शपः पित्त्वाद् अनुदात्तत्वम्। "°अदुपदेशाल्लसार्वधातुकम°" इति शतुरनुदात्तता। क्यजकारेण सह एकादेशे "एकादेश उदात्तेनोदात्तः" इति शतुरुदात्तत्वात् "शतुरनुमः°" इति आम उदात्तत्वम्॥ किं कुर्वत्यः। मधुना स्वकीयेन माधुर्यरसेन पयः सोमरसादिकं होमद्रव्यं पयोविकारभूतम् आज्यं वा। विकारे प्रकृतिशब्दः। पृञ्चतीः पृञ्चत्यः संयोजयन्त्यः। ॥ पृची संपर्के। अस्मात् लट्। "लक्षणहेत्वोः क्रियायाः" इति हेतौ शतृप्रत्ययः। रुधादित्वात् श्नम्। "श्नसोरल्लोपः"। "उगितश्च" इति ङीप्। "वा छन्दसि" इति पूर्वसवर्णदीर्घः। ["शतुरनुमो नद्यजादी"] इति ङीप उदात्तत्वम्॥ संपर्काङ्क्षितोः यन्तीत्यर्थः॥

द्वितीया॥

अमूर्या उप सूर्ये याभिर्वा सूर्यः सह।
ता नो हिन्वन्त्वध्वरम्॥ २॥

---

1 The grammatical note from अध्वरीयतामिति up to पित्त्वाद् अनुदात्तत्वम् is omitted by S'. We with Kd.

अमूः। याः। उप। सूर्ये। याभिः। वा। सूर्यः। सह।
ताः। नः। हिन्वन्तु। अध्वरम् ॥ २ ॥

अमूः वृष्टिरूपेण द्युलोकाद् आगच्छन्त्यो याः जगत्कारणत्वेन प्रसिद्धा आपः सूर्ये सूर्यमण्डले उप। ⁂योग्यक्रियाध्याहारः⁂। उपलक्ष्यन्ते। "आपः सूर्ये समाहिताः" [तै० आ० १. ८. १.] इति हि श्रुतिः। अपां प्राधान्याभिप्रायेणोक्तम्। सूर्यस्यापि तद् आह। याभिः मण्डलसमीपस्थाभिरद्भिः सह। उक्तवैपरीत्यद्योतनार्थो वाशब्दः। सूर्यो वर्तते। ⁂"सहयुक्तेऽप्रधाने" इति विहितया तृतीयया अपाम् अप्राधान्यं गम्यते⁂। ता उक्तलक्षणा आपः नः अस्माकम् अध्वरं यज्ञं[1] क्रियमाणं कर्म हिन्वन्तु प्रीणयन्तु फलदानसमर्थं कुर्वन्तु। ⁂अध्वरमिति। ध्वृ हूर्च्छने। "पुंसि संज्ञायाम्०" इति घः। न विद्यते ध्वरो यस्मिन्निति बहुव्रीहौ "नञ्सुभ्याम्" इति उत्तरपदान्तोदात्तत्वम्। ध्वरतिर्हिंसाकर्मा। तत्प्रतिषेधः [नि० १. ८.] इति हि यास्कः। श्रुतिस्त्वेवं निर्ब्रूते। "अध्वर्तव्या वा इमे देवा अभूवन्निति तदध्वरस्याध्वरत्वम्" [तै० सं० ३. २. २. ३.] इति। हिन्वन्तीति। हिविः प्रीणनार्थः। इदित्त्वात् नुम⁂ ॥

तृतीया ॥

अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः।
सिन्धुभ्यः कर्वं हविः ॥ ३ ॥
अपः। देवीः। उप। ह्वये। यत्र। गावः। पिबन्ति। नः।
सिन्धुऽभ्यः। कर्वम्। हविः ॥ ३ ॥

देवीः द्योतमानाः देवतारूपा वा अपः उदकानि उप ह्वये समीपम् आह्वयामि। क्रियमाणस्य कर्मणः परिपूर्त्यर्थम् इत्यर्थः। यत्र सजलेषु नदीतटाकादिषु नः अस्माकं गावः पिबन्ति। अप इति शेषः। तेभ्य उपह्वयामि इति पूर्वेण संबन्धः। ⁂अप इति। "ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः" इति शस उदात्तत्वम्। पिबन्ति। पा पाने। शपि "पाघ्रा०" इत्यादिना पिबा-

---

1 S' Kd यज्ञक्रियमाणं.

देशः । "निपातैर्यद्यदिहन्त°" इति प्रतिषेधात् "तिङ्तिङः" इति निघातभावः ॥ । आह्वानस्य प्रयोजनम् आह । सिन्धुभ्यः स्यन्दनशीलाभ्यः ताभ्यः अब्देवताभ्यः हविः आज्यादिरूपं कर्त्वे कर्तव्यम् । ॥ "कृत्यार्थे तवैकेन्केन्यत्वनः" इति करोतेस्त्वन् प्रत्ययः । "स्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम् ॥ ॥

चतुर्थी ॥

अप्स्व१न्तरमृतमप्सु भेषजम् ।
अपामुत प्रशस्तिभिरश्वा भवथ वाजिनो गावो भवथ वाजिनीः ॥ ४ ॥

अप्ऽसु । अन्तः । अमृतम् । अप्ऽसु । भेषजम् ।
अपाम् । उत । प्रशस्तिऽभिः । अश्वाः । भवथ । वाजिनः । गावः । भवथ ।
वाजिनीः ॥ ४ ॥

अप्सु उदकेषु अन्तः मध्ये अमृतम् अमरणसाधनं देवोपभोग्यं पीयूषम् । अस्तीति शेषः । समुद्रमथनेन अमृतस्य उत्पन्नत्वात् । यद्वा अमृतम् अमरणसाधनम् अन्नम् । श्रूयते हि । "अद्भ्यो वा अन्नं जायते" [तै° ब्रा° ३. ८. १७. ५.] इति । अथ वा मूर्छितस्य उदकावसेकेन उत्क्रान्तानामपि प्राणानां पुनः शरीरे प्रवेशदर्शनात् अप्सु अमृतम् अमरणसाधनम् अस्तीति गम्यते । अनेनैवाभिप्रायेण तैत्तिरीयके समाम्नायते । "अमृतं वा आपस्तस्मादङ्गिरवतान्तमभिषिञ्चन्ति नार्तिमार्च्छति सर्वम् आयुरेति" इति [तै° सं° ५. ६. २. २.] । ॥ "ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः" इति अप्शब्दाद् उत्तरस्या विभक्तेरुदात्तत्वम् । अन्तःशब्दः स्वरादिषु अन्तोदात्तः पठितः । संहितायाम् "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" इति अन्तर्[2]शब्दाकारस्य स्वरितत्वम् । न विद्यते मृतं मरणं येनेति बहुव्रीहौ "नञ्सुभ्याम्" इत्युत्तरपदान्तोदात्तत्वे प्राप्ते "नञो जरमरमित्रमृताः" इत्युत्तरपदाद्युदात्तत्वम् ॥ । तथा अप्सु उदकेषु मध्ये भेषजं सर्वरोगनिवारकम् औषधम् । अस्तीति शेषः । उदकरसेन प्रवृद्धानाम् ओषधीनां रसस्यैव रो-

---

1 S′ Kd अप° for आप°. 2 S′ अंतरपश°; Kd अंतरश°, which we follow.

गनिवारकत्वात् । ईदृशीनाम् अपाम् उपजीवनेन हे जनाः यूयं सर्वे अमृता अरोगाश्च भवतेत्यर्थः । उत अपि च हे अश्वाः अस्मदीयास्तुरगाः यूयम् अपाम् उदीरितप्रभावोपेतानां प्रशस्तिभिः प्रभाविशेषैः वाजिनः । वाज इति बलनाम । तद्वन्तो भवथ । ॥ वाजशब्दाद् भूम्नि मत्वर्थीय इनिप्रत्ययः ॥ । यद्वा । ॥ वाजी वेजनवान् इति [नि० २. २८.] यास्केनोक्तत्वात् ॥ । वेगयुक्ता भवथेत्यर्थः । तथा हे गावः यूयमपि पीतानाम् अपां प्रभावेन वाजिनीः वाजिन्यः बलयुक्ता भवथ । यद्वा वाजः अन्नं क्षीररूपम् । "अन्नं वै वाजः" [तै० सं० १. ७. ४. २.] इति श्रुतेः । तद्युक्ता भवथ । प्रभूतक्षीरा[1] भवथेत्यर्थः । ॥ वाजिनशब्दात् "ऋन्नेभ्यः०" इति ङीप् । जसि "वा छन्दसि" इति पूर्वसवर्णदीर्घः ॥ ॥

[इति] प्रथमकाण्डे प्रथमेनुवाके चतुर्थं सूक्तम् ॥

"आपो हि ष्ठा" इत्यादिसूक्तद्वयस्य ऐन्द्राग्नपशौ[2] वपाहोमानन्तरं मार्जने विनियोगः । उक्तं वैताने । "शंभुमयोभुभ्यां चात्वाले मार्जयन्ति" [वै० २. ६.] इति ॥

अत्र "आपो हि ष्ठा" इति सूक्तम् अग्निचयने उखार्थम् आहृतस्य मृत्पिण्डस्य पलाशकषायोदकेन संसृज्यमानस्य अनुमन्त्रणे विनियुक्तम् । उक्तं वैताने । "आपो हि ष्ठेति पलाशफाण्टेना[3]भिषिच्यमानम्" इति [वै० ५. १.] ॥

एतदेव बृहद्गणे लघुगणे अपां सूक्तेषु च पठितम् । तेषां यत्रयत्र विनियोगः तत्र सर्वत्र अस्य विनियोगोऽनुसंधेयः ॥

सलिलगणे च एतत् सूक्तं पठितम् । सूत्रितं हि । "शंभुमयोभुभ्याम् [१. "५, ६] ब्रह्मजज्ञानम् [४. १] अस्य वामस्य [९. ९] यो रोहित[4]ः [१३. "१] उदस्य केतवः [१३. २] मूर्धाहम् [१६. ३] विषासहिम्" [१७. १] इति [कौ० ३. १.] । अयं सलिलगणः । अतः "सलिलैः क्षीरौदनम्

---

1 S'Kd °क्षिता. 2 S'Kd ऐंद्राग्नि°. 3 S'Kd °पांटेना°. 4 So S'Kd, though यो रोहितः does not begin the hymn. *Kaus'ika* and his commentators agree with S'Kd.

अश्नाति" [कौ० ३. १] "सलिलैः सर्वकामः" [कौ० ३. ७.] इत्यादौ अस्य विनियोगः ॥

तथा गवां रोगोपशमनपुष्टिप्रजननकर्मसु अर्थोत्थापनविघ्नशमनकर्मणि च पूर्वसूक्तवद् विनियोगः ॥

वास्तुसंस्कारकर्मणि च अनेन सूक्तेन उदकुम्भेन गृहभूमिम्[2] आसिञ्चेत् । तथा च सूत्रम् । "निवेशनानुचरणानि[3]" इति प्रक्रम्य "शंभुमयोभुभ्यां विष्यन्दयति" इति [कौ० ५. ७.] ॥

तथा "आदित्यां श्रीतेजोधनायुष्कामस्य[4]" इति [न० क० १७.] विहितायाम् आदित्याख्यायां महाशान्तौ अस्य विनियोगः । तद् उक्तं नक्षत्रकल्पे । "सलिलगण आदित्यायाम्" इति [न० क० १८.] ॥

तत्र प्रथमा ॥

आपो॒ हि ष्ठा म॑यो॒भुव॒स्ता न॑ ऊ॒र्जे द॑धातन ।
म॒हे रणा॑य॒ चक्ष॑से ॥ १ ॥
आपः॑ । हि । स्थ । म॒यः॒ऽभुवः॑ । ताः । नः॒ । ऊ॒र्जे । द॒धा॒त॒न॒ ।
म॒हे । रणा॑य । चक्ष॑से ॥ १ ॥

हे आपः यूयं हि यस्मात् कारणात् मयोभुवः । मय इति सुखनाम । सुखस्य भावयित्र्यः स्थ भवथ । "आपोमयः प्राणः" [छा० ६. ५. ४.] इति श्रुतेः । अपाम् उपभोगेन प्राणस्थैर्यहेतुत्वात् सुखसाधनभूतविविधान्नाद्युपभोग्यपदार्थजनकत्वेन च सुखहेतुत्वम् । ⧖ अस्तेर्लटि मध्यमपुरुषबहुवचने अदादित्वात् शपो लुक् । "सार्वधातुकमपित्" इति ङिद्वद्भावात् "भ्नसोरलोपः" इति अकारलोपः । "हि च" इति निघातप्रतिषेधः । मयोभुव इति । मयःशब्दोपपदात् भवतेरन्तर्भावितण्यर्थात् क्विप् । "ओः सुपि" इति प्राप्तस्य यणो "न भूसुधियोः" इति प्रतिषेधः । "गतिकारकोपपदात् कृत्" इति कृदुत्तरपदप्रकृतिस्वरत्वम् ⧖ । तस्मात् ताः तथाविधा यूयं नः अ-

---

1 S′Kd क्षीरौदनमश्नातीति for क्षीरौदनम् अश्नाति. 2 S′Kd गृहभूमिंवासिंचेत्. 3 S′Kd °चराणीति. 4 S′Kd शृते for श्री° We with the *Nakshatrakalpa*.

स्मान् अन्नादिजनितसुखकामान् ऊर्जे बलकराय अन्नाय। तदुपभोगजनितसुखायेत्यर्थः। ऊर्ज बलप्राणनयोः। अस्मात् "क्विप् च" इति क्विप्। तादर्थ्ये चतुर्थी। "सावेकाचस्तृतीयादिर्विभक्तिः" इति विभक्तेरुदात्तत्वम्। दधातन धत्त। सुखकरान्नप्रदानेन अस्मान् पोषयतेत्यर्थः। डुधाञ् धारणपोषणयोः। अस्माल्लोटि "तप्तनप्तनथनाश्च" इति तस्य तनबादेशः। तस्य पित्त्वेन ङित्त्वाभावात् "श्नाभ्यस्तयोरातः" इति आलोपाभावः। "तिङ्तिङः" इति निघातः। अपि च महे महते। अच्छन्दलोपश्छान्दसः। यद्वा। मह पूजायाम् इत्यस्मात् क्विप्। महनीयाय पूजनीयाय रणाय रमणाय। विविधोपभोग्यपदार्थेषु क्रीडनायेत्यर्थः। रमतेर्भावे ल्युट्। अन्त्यलोपश्छान्दसः। तथा चक्षसे दर्शनाय। चिरकालजीवनाभिमतफलसाक्षात्कारायेत्यर्थः। चष्टिः पश्यतिकर्मा। चक्षेर्बहुलं शित्त्वेति [उ० ४. २३२.] भावे असुन्। शित्त्वेन सार्वधातुकत्वात् "चक्षिङः ख्याञ्" इति ख्याञादेशाभावः। "श्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम्। यद्वा महते रणाय रमणीयाय चक्षसे। इति सामानाधिकरण्येन संबन्धः। अथवा रणाय रणनीयाय शब्दनीयाय उपनिषदेकसमधिगम्याय चक्षसे। स्वात्मनो निरतिशयानन्दब्रह्मत्वसाक्षात्कारायेत्यर्थः। अण रण वण शब्दार्थाः। "वशिरण्योरुपसंख्यानम्" इति अप्। तस्य पित्त्वाद् अनुदात्तत्वे धातुस्वरः शिष्यते। सर्वत्र तादर्थ्ये चतुर्थी। दधातनेति पूर्वेण संबन्धः॥

द्वितीया॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः।
उशतीरिव मातरः॥ २॥

यः। वः। शिवऽतमः। रसः। तस्य। भाजयत। इह। नः।
उशतीःऽइव। मातरः॥ २॥

हे आपः वः युष्माकं शिवतमः कल्याणतमः प्रसिद्धो [यो] रसः साराभूतः अंशोस्ति। सर्वप्राणिभिः अविसंवादेन उपभोग्यत्वाद् अपां रसस्य

शिवतमत्वम् । श्रूयते हि । "नानामनसः खलु वै पशवो नानाव्रतास्तेऽप एवाभि समनसः" [तै० सं० ५.३.१.३] इति । तस्य । ⌛"क्रियाग्रहणं कर्तव्यम्" इति कर्मणः[1] संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ⌛ । तं रसम् । यद्वा । ⌛भागव्यतिरेकजनिता षष्ठी ⌛ । तस्य रसस्य भागम् इत्यर्थः । इह अस्मिन् लोके हे आपः यूयं नः अस्मान् पुत्रस्थानीयान् भाजयत सेवयत । युष्मदीयरसप्रदानेन अस्मान् पोषयतेत्यर्थः । ⌛भज सेवायाम् । "हेतुमति च" इति णिच् । प्रार्थनायां लोट् । शपः पित्त्वाद् अनुदात्तत्वम् । "०अदुपदेशाल्लसार्वधातुकम०" अनुदात्तम् इति तिङोपि अनुदात्तत्वम् । तथा च णिचश्चित्त्वात् तत्स्वरेण मध्योदात्तत्वे प्राप्तेपि "तिङ्तिङः" इति सर्वानुदात्तत्वम् ⌛ । तत्र दृष्टान्तः । उशतीरिव उशत्यः कामयमानाः । ⌛वश कान्तौ । कान्तिरभिलाषः । अस्मात् लटः शत्रादेशः । अदादित्वात् शपो लुक् । "सार्वधातुकम् अपित्" इति शतुर्ङित्त्वात् "ग्रहिज्या०"आदिना संप्रसारणम् । "उगितश्च" इति ङीप् । शत्रन्तस्य प्रत्ययस्वरेण अन्तोदात्तत्वात् "शतुरनुमो नद्यजादी" इति ङीप उदात्तत्वम् । जसि "वा छन्दसि" इति पूर्वसवर्णदीर्घः । "इवेन विभक्तिलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्" इति समासः ⌛ । कामयमाना मातरः यथा स्वकीयं पुत्रं स्तन्यरसप्रदानेन पोषयन्ति । तथेत्यर्थः ॥

तृतीया ॥

तस्मा॒ अरं॑ गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ ।
आपो॑ ज॒नय॑था च नः ॥ ३ ॥

तस्मै॑ । अर॑म् । ग॒माम॒ । वः॒ । यस्य॑ । क्षया॑य । जिन्व॑थ ॥
आपः॑ । ज॒नय॑थ । च॒ । नः॒ ॥ ३ ॥

तस्मै । ⌛तादर्थ्ये चतुर्थी ⌛ । उपभोग्यत्वेन प्रसिद्धस्य अन्नस्य प्राप्त्यर्थं हे आपः वः युष्मान् अरम् अलं पर्याप्तं गमाम गच्छाम प्राप्नुयाम । ⌛अरम् इति । "वालमूलललघ्वलमङ्कुलीनां वा लो रत्वम् आपद्यत

1 S′Kd ग्रहण: for कर्मण:.

इति वक्तव्यम्" इति लत्वविकल्पः। गमामेति। गम्लृ सृप्लृ गतौ। अस्मात् प्रार्थनायां लोट्। "आडुत्तमस्य पिच्च" इति आडागमः। "बहुलं छन्दसि" इति शपो लुक्। यद्वा। "छन्दसि लुङ्लङ्लिटः" इति लोडर्थे लुङ्। लृदित्त्वात् च्लेः अङादेशः। "बहुलं छन्दस्यमाङ्योगेपि" इति अडभावः। व इति। "बहुवचनस्य वस्नसौ" इति द्वितीयान्तस्य युष्मदो वसादेशः। स च "अनुदात्तं सर्वम् अपादादौ" इत्यनुवृत्तेः सर्वानुदात्तः॥ यस्य अन्नस्य क्षयाय निवासाय। अभिवृद्धय इत्यर्थः। ॥ क्षि निवासगत्योः। "एरच्" इति भावे अच्। "चितः" इति अन्तोदात्तत्वे प्राप्ते "क्षयो निवासे" इति आद्युदात्तत्वम्॥ हे आपः यूयं जिन्वथ तर्पयथ। व्रीह्यादिसस्यविशेषान् इति शेषः। यूयं वृष्टिरूपेण आगत्य सर्वेषां प्राणिनाम् अन्नाद्युपभोग्यसमृद्धये ओषधीः प्रवर्धयथेत्यर्थः। श्रूयते हि। "ते दिवो वृष्टिम् असृजन्त। यावन्तः स्तोका अवापद्यन्त तावतीरोषधयोऽजायन्त" [तै० ब्रा० २. १. १. १] इति। तस्मै इति पूर्वेण संबन्धः। ॥ हि-वि धिवि दिवि [जिवि] प्रीणनार्थाः। इदित्त्वात् नुम्। शपः पित्त्वाद् अनुदात्तत्वम्। तिङश्च लसार्वधातुकस्वरेण धातुस्वरस्य अवशेषात् पदम् आद्युदात्तम्। "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः॥ अपि च हे आपः यूयं नः अस्मान् जनयथ पुत्रपौत्रादिरूपेण उत्पादयथ। स्वात्मन एव पुत्रादिरूपेण उत्पत्तेः एवम् उक्तम्। तथा च ऐतरेयके समाम्नातम्। "पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम्। तस्यां पुनर्नवो भूत्वा द-"शमे मासि जायते। तज्जाया जाया भवति यद् अस्यां जायते पुनः" [ऐ० ब्रा० ७. १३] इति। ॥ जनी प्रादुर्भावे। अस्मात् "हेतुमति च" इति णिच्। "जनीजृष्क्नसुरञ्जोमन्ताश्च" इति मित्संज्ञकत्वात् "मितां ह्रस्वः" इति उपधाह्रस्वत्वम्। शपस्तिङश्च पूर्ववत् अनुदात्तत्वे णित्स्वरः शिष्यते। तेन णिजकारस्य उदात्तत्वम्। आप इति पूर्वामन्त्रितस्य "आमन्त्रितं पूर्वम् अविद्यमानवत्" इति अविद्यमानवद्भावेन अतिङ उत्तरत्वाभावात् "तिङ्ङतिङः" इति निघाताभावः। "अन्येषामपि दृश्यते" इति सांहितिको दीर्घः॥ ॥

चतुर्थी ॥

ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम् ।
अपो याचामि भेषजम् ॥ ४ ॥

ईशानाः । वार्याणाम् । क्षयन्तीः । चर्षणीनाम् ॥
अपः । याचामि । भेषजम् ॥ ४ ॥

वार्याणां वरणीयानां धनानाम् ईशानाः ईश्वराः स्वामित्वेन नियन्त्रीः सर्वधनमूलभूतस्य हिरण्यस्य मातृभूताभ्यः अद्भ्यः उत्पत्तेः श्रवणाद् अपाम् अधिपतित्वम् । तथा हि "आपो वरुणस्य पत्नय आसन् । [ता] अग्निरभ्यध्यायत् । ताः समभवन् । तस्य रेतः परापतत् । तद्धिरण्यम् अभवत्" [तै० ब्रा० १. १. ३. ८] इति । ईश ऐश्वर्ये । अस्मात् "लक्षणहेत्वोः क्रियायाः" इति हेतौ शानच् प्रत्ययः । अदादित्वात् शपो लुक् । अस्य धातोः अनुदात्तेत्त्वात् "तास्यनुदात्तेन्ङिददुपदेशाद्०" इति शानचः अनुदात्तत्वे धातुस्वरेण आदिरुदात्तः । वार्याणाम् इति । वृङ् संभक्तौ । क्यब्विधौ हि वृञो ग्रहणं न वृङः इत्युक्तेः अस्माद्धातोः "ऋहलोर्ण्यत्" इति कर्मणि ण्यत् । "कर्तृकर्मणोः कृति" इति प्राप्तायाः कर्मणिषष्ठ्या "न लोकाव्यय०" इति प्रतिषेधेपि "अधीगर्थदयेशां कर्मणि" इति कर्मणि षष्ठी । "तित् स्वरितम्" इति स्वरितत्वे प्राप्ते "ईडवन्दवृशंसदुहां ण्यतः" इति आद्युदात्तत्वम् । यत ईशाना अतो हेतोः चर्षणीनाम् । मनुष्यनामैतत् । मनुष्याणां क्षयन्तीः निवासयित्रीः । अभिमतधनप्रदानेन स्वस्थाने निवेशयन्तीरित्यर्थः । क्षि निवासगत्योः । अस्माद् अन्तर्भावितण्यर्थात् लटः शत्रादेशः । व्यत्ययेन शप् । "उगितश्च" इति ङीप् । "शप्श्यनोर्नित्यम्" इति नित्यं नुमागमः । शपश्च ङीपश्च पित्त्वाद् अनुदात्तत्वम् । "०अदुपदेशाल्लसार्वधातुकम्०" इति शतुरनुदात्तत्वे धातुस्वरेण आदिरुदात्तः । चर्षणीनाम् इति । "न लोकाव्यय०" इति कर्मणिषष्ठीप्रतिषेधा-

---

१ A B S[m] आपो. We with B[h] D K R J P P[2] V Rw.

---

1 S′ Kd सर्वधनभूतमूलस्य. 2 S′ Kd om. तत्. 3 S′ Kd अस्माद्धेतो°.

भावम्छान्दसः ॥। यद्वा। ॥"चतुर्थ्यर्थे बहुलं छन्दसि" इति तादर्थ्ये षष्ठी ॥। मनुष्यार्थं निवसन्तीरित्यर्थः। ॥"नाम अन्यतरस्याम्" इति नाम उदात्तत्वम ॥। एवंभूता अपः भेषजं व्याध्यादिनिवर्तकम् औषधं याचामि प्रार्थये। उक्तं हि "अप्स्वन्तरमृतमप्सु भेषजम्" [१. ४. ४] इति। ॥"अकथितं च" इति कर्मसंज्ञायाम् अप्शब्दाद् द्वितीया। "ऊडिदम्०"इत्यादिना अप्शब्दाद् उत्तरस्य शस उदात्तत्वम्। याचामि। याचृ याञ्चायाम्। "तिङ्तिङः" इति निघातः ॥॥

[इति] प्रथमकाण्डे प्रथमेनुवाके पञ्चमं सूक्तम्॥

"शं नो देवीः" इति सूक्तस्य "शंभुमयोभुभ्याम्" इति सहैव सूत्रकृता निर्दिष्टत्वात् "आपो हि ष्ठा" इति सूक्तवत् सर्वत्र विनियोगः अनुसंधेयः। लघुगणे बृहद्गणे च आद्यन्तयोः "शं नो देवीः" इति प्रथमा ऋक् प्रयोक्तव्या। "उभयतः सावित्र्युभयतः शंनोदेवी" [कौ० १. ९] इति सूत्रात्॥

इन्द्रमहाख्यकर्मणि आचमनेपि एषा विनियुक्ता। सूत्रितं हि। "शंनोदेव्याः पादैरर्धर्चाभ्याम् ऋचा षट्कृत्व उदकम् आचामतः" इति [कौ० १४. ४]॥

राज्ञः पुष्याभिषेके कलशाभिमन्त्रणेपि एषा। तथा च परिशिष्टे॥

हेमरत्नौषधीबिल्वपुष्पगन्धाधिवासितान्[1]।
आच्छादितान् सितैर्वस्त्रैरभिमन्त्र्य पुरोहितः।
सावित्र्युभयतः कुर्याच्छंनोदेवी[2] तथैव च। इति [प० ५. २]॥

तत्र प्रथमा॥

शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑।
शं योर॒भि स्र॑वन्तु नः॥ १॥

शम्। नः। दे॒वीः। अ॒भिष्ट॑ये। आपः॑। भ॒व॒न्तु॒। पी॒तये॑।
शम्। योः। अ॒भि। स्र॒व॒न्तु॒। नः॥ १॥

देवीः देव्यः द्योतनादिगुणयुक्ताः। ॥दिवु क्रीडाविजिगीषाव्यवहा-

---

1 S'Kd °दिवासितान्. We with the *Paris'ishṭa*. 2 S'Kd देवीं. We with the *Paris'ishṭa*.

द्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु । इगुपधलक्षणे के प्राप्ते "देवसेनमेषादयः पचादिषु द्रष्टव्याः" इति वचनात् "नन्दिग्रहिपचादिभ्यः०" इत्यच् । देवट् इति टित्त्वेन पाठात् "ठिड्ढाणञ्०" इति ङीप् । "यस्य०" इति लोपे "अनुदात्तस्य च यत्रोदात्तलोपः" इति ङीप उदात्तत्वम् । जसि "वा छन्दसि" इति पूर्वसवर्णदीर्घः । यास्कस्तु देवशब्दं बहुधा निरवोचत् । यज्ञश्च । देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा इति [नि० ७. १५] ॥ । एवमात्मिका आपः नः अस्माकम् अभिष्टये अभियजनाय । ॥ यज देवपूजासंगतिकरणदानेषु । अस्माद् अभिपूर्वात् भावे क्तिन् । "ग्रहिज्या०"आदिना संप्रसारणम् । "व्रश्च०"आदिना षत्वे ष्टुत्वम् । "शकन्ध्वादिषु पररूपं वक्तव्यम्" इति पररूपत्वे सवर्णदीर्घाभावः । "तादौ च निति कृत्यतौ" इति गतेः प्रकृतिस्वरत्वे एकादेशस्य उदात्तत्वम् । तादर्थ्ये चतुर्थी ॥ । अभितः सर्वतो यागार्थं शं सुखं भवन्तु । सुखकारिण्यो भवन्तु इत्यर्थः । तथा पीतये पानाय च शं भवन्तु । पीयमाना आपः स्वादुतमाः सुखाय भवन्तु इत्यर्थः । ॥ पा पाने । अस्मात् भावे क्तिन् । "घुमास्था०" इत्यादिना ईत्वम् ॥ । अपि च नः अस्माकं शं प्राप्तानां रोगाणां शमनाय योः अप्राप्तानां रोगाणां पृथक्करणाय च ता आपः अभि स्रवन्तु अस्मदाभिमुख्येन गच्छन्तु । यद्वा शं योरिति रोगाणां शमनं चोरव्याघ्रादिजनितभयानां पृथक्करणं च यथा भवति तथेत्यर्थः । ॥ तदुक्तं यास्केन । शमनं च रोगाणां यावनं च भयानाम् इति [नि० ४. २१] । शमु उपशमने । यु मिश्रणामिश्रणयोः । "अन्येभ्योपि दृश्यन्ते" इत्यत्र दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वाद् आभ्यां धातुभ्यां भावे विच् । योरित्यत्र सलोपाभावश्छान्दसः । यद्वा यौतेरसुनि अवादेशाभावश्छान्दसः ॥ ॥

द्वितीया ॥

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।
अग्निं च विश्वशंभुवम् ॥ २ ॥

---

1 S' यज्ञस्य देनाद्वा दीपनाद्वा &c. Kd यज्ञस्य देनाद्वा दापनाद्वा दीपनाद्वा &c.

अप्ऽसु । मे । सोमः । अब्रवीत् । अन्तः । विश्वानि । भेषजा ।
अग्निम् । च । विश्वऽशंभुवम् ॥ २ ॥

मन्त्रद्रष्टा ब्रूते । अप्सु उदकेषु अन्तः मध्ये विश्वानि सर्वाणि [भेषजा] भेषजानि । ॥ "शेश्छन्दसि बहुलम्" इति शेर्लोपः ॥ । सर्वरोग-निवर्तकानि औषधानि सन्तीति सोमः एतन्नामा देवः मे मह्यं मन्त्रदर्शिने अब्रवीत् उपदिष्टवान् । तथा विश्वशंभुवम् विश्वस्य जगतः सुखकरम् । यद्वा विश्वे[1] सर्वे व्यापाराः शंभुवः सुखस्य भावयितारः उत्पादका यस्य स तथोक्तः । ॥ शंशब्दोपपदाद् भवतेरन्तर्णीतण्यर्थात् "क्विप् च" इति क्विप् । "ओः सुपि" इति प्राप्तस्य यणः "न भूसुधियोः" इति प्रतिषेधे उवङ् । तत्पुरुषपक्षे व्यत्ययेन पूर्वपदान्तोदात्तत्वम् । बहुव्रीहिपक्षे तु अग्निविशेषस्य इयं संज्ञा । तथा च "बहुव्रीहौ विश्वं संज्ञायाम्" इति पूर्वपदान्तोदात्तत्वम् ॥ । एतन्नामानम् अग्निम् अङ्गनादिगुणयुक्तं देवं च । अप्सु अन्तर्वर्तमानं सोमः अब्रवीदित्यर्थः । उदकमध्ये अग्नेः प्रवेशस्तैत्तिरीयके समाम्नातः । "अग्नेस्त्रयो ज्यायांसः" इति प्रकृस्य "स निलायत सोऽपः प्राविशत्" [तै० सं० २. ६. ६. १] इति । यद्वा । [2]और्ववैद्युतरूपेण अग्नेः अप्सु अवस्थानं द्रष्टव्यम् । अनेन अतिशयितवीर्यवत्त्वस्य प्रख्यापितत्वाद् अपां सर्वार्थसाधनसामर्थ्यम् अस्तीत्युक्तं भवति ॥

तृतीया ॥

आपः पृणीत भेषजं वरूथं तन्वे ३ मम ।
ज्योक् च सूर्यं दृशे ॥ ३ ॥

आपः । पृणीत । भेषजम् । वरूथम् । तन्वे । मम ।
ज्योक् । च । सूर्यम् । दृशे ॥ ३ ॥

हे आपः यूयं मम तन्वे मदीयस्य शरीरस्य । ॥ "षष्ठ्यर्थे चतुर्थी वक्तव्या" इति चतुर्थी । "उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य" इति विभक्तिः स्वर्यते । "युष्मदस्मदोर्ङसि" इति ममशब्द आद्युदा-

1 S'Kd सप for सर्वे. 2 S'Kd अर्व° for और्व°. The emendation is conjectural.

त्तः ॥ । वरूथं वारकं ज्वरादिसर्वरोगनिवर्तकम् भेषजम् औषधम् पृणीत पूरयत । यथा मम शरीरं व्याधयो न स्पृशन्ति तथा औषधं प्रयच्छतेत्यर्थः । ॥ पॄ पालनपूरणयोः । अस्मात् लोटि क्र्यादित्वात् श्ना-प्रत्ययः । "ई हल्यघोः" इति ईत्वम् । "प्वादीनां ह्रस्वः" इति धा-तोर्ह्रस्वत्वम् । "सतिशिष्टस्वरबलीयस्त्वम् अन्यत्र विकरणेभ्यः" इति प-रिभाषया सतिशिष्टस्यापि श्नाप्रत्ययस्वरस्य दुर्बलत्वात् तिङ एव उदात्तत्व-म् । "आमन्त्रितं पूर्वम् अविद्यमानवत्" इति आप इत्यस्य अविद्य-मानवत्त्वात् "तिङ्ङतिङः" इति निघाताभावः । वरूथम् इति । वृञ् व-रणे । जृवृञ्भ्यामूथन् [उ० २. ६] इति औणादिक ऊथन् प्रत्ययः । "ञ्नित्यादिर्नित्यम्" इत्याद्युदात्तः ॥ । किमर्थम् । ज्योक् चिरकालं सूर्यं सर्वेषां प्राणप्रदत्वेन प्रेरकम् आदित्यं दृशे द्रष्टुम् । चिरकालं जीवि-तुम् इत्यर्थः । अनुक्तसमुच्चयार्थश्चकारः । व्याध्यादिजनितक्लेशापनोदनार्थं च इति । ॥ दृशिर् प्रेक्षणे । "दृशे विख्ये च" इति तुमर्थे केप्रत्य-यान्तो निपातितः । सूर्यम् इति । षू प्रेरणे । "राजसूयसूर्य०" इति क्यबन्तो निपातितः । क्यपः पित्त्वाद् अनुदात्तत्वे धातुस्वरेण आद्युदात्तत्वम् । "कृ-न्मेजन्तः" इति दृशे इत्यस्य एजन्तत्वेन अव्ययत्वात् "न लोकाव्यय०" इति कर्मणिषष्ठ्याः प्रतिषेधः ॥ ॥

चतुर्थी ॥

शं न॒ आपो॑ धन्व॒न्या॑ः शमु॑ सन्त्वनू॒प्याः॑ ।
शं नः॑ खनि॒त्रिमा॒ आपः॒ शमु॒ याः कु॒म्भ आभृ॑ताः शि॒वा नः॑ सन्तु वार्षि॒कीः॥४॥
शम् । नः॒ । आपः॑ । ध॒न्व॒न्याः॑ । शम् । ऊं॒ इति॑ । स॒न्तु॒ । अ॒नू॒प्याः॑ ।
शम् । नः॒ । ख॒नि॒त्रिमाः॑ । आपः॑ । शम् । ऊं॒ इति॑ । याः । कु॒म्भे । आऽभृ॑ताः ।
शि॒वाः । नः॒ । स॒न्तु॒ । वार्षि॒कीः ॥ ४ ॥

पूर्वं सामान्येनैव अपां प्रार्थना कृता । अधुना स्थानविशेषिता आपः प्रार्थ्यन्ते । नः अस्माकं धन्वन्याः धन्वनि मरुभूमौ भवा आपः शं सन्तु सुखकारिण्यो भवन्तु । ॥ रिवि रवि धवि गत्यर्थाः । इदित्त्वात् नुम् ।

---

१ A B̄ʰ धन्व°. We with B K D R S̄ᵐ V W R.

कनिन् युवृषितक्षिधन्विराजिद्युप्रतिदिवः [उ० १. १५४] इति कनिन् प्रत्ययः। "भवे छन्दसि" इति यत्। "ये चाभावकर्मणोः" इति प्रकृतिभावात् "नस्तद्धिते" इति टिलोपाभावः॥ तथा अनूप्याः अनुगता आपो यस्मिन् देशे सः अनूपो देशः। "ऋक्पूरब्धूः०" इत्यकारः समासान्तः। "ऊद् अनोर्देशे" इति अप्शब्दाकारस्य ऊकारः॥ तत्र भवा आपः अनूप्याः। पूर्ववद् यत्॥ उशब्दः चार्थे। प्रभूतजलप्रदेशस्था आपश्च शं सन्तु सुखहेतवो भवन्तु। तथा खनित्रिमाः खननेन निर्वृत्ताः कूपोद्भवा आपः नः अस्माकं शं भवन्तु। खनु अवदारणे। अस्माच्छान्दसः क्त्रिप्रत्ययः। "आर्धधातुकस्येड्वलादेः" इति इडागमः। "क्त्रेर्मन्नित्यम्" इति मप्॥ कुम्भे घटे आभृताः नदीतटाकादिभ्यः कुम्भेन आनीताः। हृञ् हरणे। अस्मात् कर्मणि निष्ठा। "हृग्रहोर्भः०" इति भत्वम्। "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम्॥ ईदृश्यो याः प्रतिगृहं वर्तमानाः प्रसिद्धा आपः ताश्च शं भवन्तु। तथा वार्षिकीः वार्षिक्यः वर्षर्तौ भवाः। "छन्दसि ठञ्" इति वर्षाशब्दात् ठञ् प्रत्ययः। "टिड्ढाणञ्०" इति ङीप्। "ञ्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम्॥ वृष्टिसंभूता आपश्च नः अस्माकं शिवाः सुखकारिण्यः सन्तु भवन्तु। अस भुवि। अस्मात् लोटि अदादित्वात् शपो लुक्। "श्नसोरल्लोपः" इत्यकारलोपः॥ ॥

[इति] षष्ठं सूक्तम् ॥

इति अथर्वसंहितायां प्रथमकाण्डे प्रथमोनुवाकः ॥

द्वितीयेनुवाके पञ्च सूक्तानि। तत्र "स्तुवानम्" "इदं हविः" इति प्रथमद्वितीये सूक्ते चातनगणे पठिते। तथा च कौशिकः। "स्तुवानम् "[१. ७] इदं हविः[१. ८] निःसालाम्[२. १४] अरायक्षयणम्[२. "१८. ३-५] शं नो देवी पृश्निपर्णी[२. २५] आ पश्यति[४. २०] "तान् सत्यौजाः[४. ३६] त्वया पूर्वम्[४. ३७] पुरस्ताद्युक्तः[५. २९] "रक्षोहणम् इत्यनुवाकः[८. ३, ४] चातनानि" इति [कौ० १. ८]। अतः

---

1 S′Kd आपःश्च for आपः ताश्च.

अस्य "चातनानाम् अपनोदनेन व्याख्यातम्" [कौ० ४. १] "चातनैर्मातृनामभिर्जुहुयात्" [शा० क० १६] इत्यादिसूत्रेण यत्रयत्र विनियोगः क्रियते तत्रतत्र सर्वत्र अनयोः सूक्तयोरपि विनियोगो द्रष्टव्यः ॥ "अपनोदनेन व्याख्यातम्" इति । आविष्टभूतपिशाचाद्युच्चाटनार्थं फलीकरणतुषावतक्षणहोमादीनि "आरेसौ" [१. २६] इत्यपनोदनसूक्तकर्तव्यानि अपनोदनानि कर्माणि अनेन गणेन कुर्यादित्यर्थः ॥

तत्र प्रथमा ॥

स्तुवानमग्न आ वह यातुधानं किमीदिनम् ॥
त्वं हि देव वन्दितो हन्ता दस्योर्बभूविथ ॥ १ ॥

स्तुवानम् । अग्ने । आ । वह । यातुऽधानम् । किमीदिनम् ।
त्वम् । हि । देव । वन्दितः । हन्ता । दस्योः । बभूविथ ॥ १ ॥

अङ्क्ति गच्छति सर्वजाठरवैद्युतादिरूपेण कृत्स्नं जगद् व्याप्नोति इति अग्निः । ॒अगि रगि लगि गत्यर्थाः । अङ्गेर्नलोपश्च [उ० ४. ५०] इति निप्रत्ययः तत्संनियोगेन नलोपश्च ॒ । यद्वा । अग्रणीत्वादिगुणयोगाद् अग्निः । ॒आह च यास्कः । अग्निः कस्मात् । अग्रणीर्भवति अग्रं यज्ञेषु प्रणीयते अङ्गं नयति संनममानः । अक्नोपनो भवतीति स्थौलाष्ठीविः । न क्नोपयति न स्नेहयति । त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः । स खलु एतेः अकारम् आदत्ते गकारम् अनक्तेर्वा दहतेर्वा नीः पर इति [नि० ७. १४] ॒ । ईदृश हे अग्ने स्तुवानं मया दत्तं हविः प्रशंसन्तम् अस्माभिः स्तूयमानं वा देवम् आ वह आनय । मदीयं कर्म प्रापय । ॒वह प्रापणे । अस्मात् लोटि "अतो हेः" इति हेर्लुक् । स्तुवानम् इति । ष्टुञ् स्तुतौ । कर्तरि लटः शानच् आदेशः । कर्मणि लटो वा शानचि यगभावश्छान्दसः । "अचि श्नुधातु०" इत्यादिना उवङ् ॒ । अग्नेः आवहनकर्तृत्वम्[1] अन्यत्रापि आम्नातम् । "अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे" [ऋ० १. १२. ३] इति । "अग्निम् अग्न आवह" [तै० ब्रा० ३. ५. ३. २] इति च । किमीदिनं किम् किम् इदानीं वर्तत इति चरन्तम् । ॒किमीदिने किम्

1 S' Kd आवाहन°.

इदानीमिति चरते इति यास्कः [नि० ६. ११]। जिघांसया प्रच्छन्नचारिणं यातुधानं राक्षसम्। अपसारय इति योग्यक्रियाध्याहारः॥ यद्वा हे अग्ने स्तुवानम्। विभक्तिव्यत्ययः। स्तूयमानः त्वं किमीदिनं यातुधानं राक्षसम् आ वह प्रतीकारार्थम् अस्मिन् जने आवेशय। अथ वा निग्रहार्थं स्वसमीपम् आनयेत्यर्थः॥ यद्वा हे अग्ने त्वत् सकाशाद् भीत्या त्वां स्तुवन्तं तं यातुधानम् इति सामानाधिकरण्येन संबन्धः॥ अपि च हे देव दानादिगुणयुक्त त्वं वन्दितः अस्माभिर्नमस्कारादिना प्रार्थितः सन् दस्योः उपक्षयकारिणो राक्षसादेः। दसु उपक्षये। अस्माद् औणादिको युप्रत्ययः। तस्य हन्ता घातयिता हि यस्मात् कारणात् बभूविथ भवसि तस्माद् आ वहेति पूर्वेण संबन्धः। भू सत्तायाम्। "छन्दसि लुङ्लङ्लिटः" इति वर्तमानेर्थे लिट्। "हि च" इति निघातप्रतिषेधः॥

द्वितीया॥

आज्यस्य परमेष्ठिन् जातवेदस्तनूवशिन्।
अग्ने तौलस्य प्राशान यातुधानान् वि लापय॥ २॥
आज्यस्य। परमेऽस्थिन्। जातऽवेदः। तनूऽवशिन्।
अग्ने। तौलस्य। प्र। अशान्। यातुऽधानान्। वि। लापय॥ २॥

परमे उत्कृष्टस्थाने तिष्ठतीति परमेष्ठी। स्वर्गाद्युत्कृष्टस्थाननिवासिन्। तिष्ठतेः औणादिकः किनिप्रत्ययः। "तत्पुरुषे कृति बहुलम्" इति सप्तम्या अलुक्। "अम्बाम्बगोभूमि०" इत्यादिना षत्वम्। "आमन्त्रितस्य च" इति आष्टमिकं सर्वानुदात्तत्वम्। हे जातवेदः जातानां वेदितः। जातशब्दोपपदात् विद ज्ञाने इत्यस्मात् गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च [उ० ४. २२६] इति असुन्। अस्य पादादित्वाद् आष्टमिकनिघाताभावे "आमन्त्रितस्य च" इति षाष्ठिकम् आद्युदात्तत्वम्॥ यास्कस्तु बहुधा निरवोचत्। जातवेदाः कस्मात्। जातानि वेद जाता-

---

१ B C R W R परमेष्ठिं. We with A D V.

नि वैनं विदुः जातेजाते विद्यत इति वा जातवित्तो वा जातधनो वा जातविद्यो वा जातप्रज्ञो वा यत्तज्जातः पशून् अविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति हि ब्राह्मणम् इति [नि० ७.१९]॥ । हे तनूवशिन् तनूनां सकलप्राणिशरीराणां जाठराग्निरूपेण वशयितः ईदृशमहिमोपेत हे अग्ने तौलस्य । तुलावत् हूयमानद्रव्यस्य परिच्छेदकत्वात् स्रुक्स्रुवादिकम् अत्र तुलाशब्देन उच्यते । तत्र स्रुवादौ स्थितम् आज्यं तौलम् । ॥"तस्येदम्" इति अण्॥ । यद्वा । ॥तुल उन्माने । अस्मात् कर्मणि घञ् । तोल्यते उन्मीयते स्रुवादिना अवदीयत इति तोलम् । स्वार्थिकस्तद्धितः राक्षसवायसादिवत्॥ । अवदीयमानस्य आज्यस्य । ॥"क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी॥ । आज्यं प्राशान अद्धि । आज्यस्य भागम् इति भागपदाध्याहारेण वा संबन्धः । ॥अश भोजने । लोण्मध्यमैकवचने "हलः श्नः शानज्झौ" इति श्नाप्रत्ययस्य शानजादेशः । "अतो हेः" इति हेर्लुक्॥ ॥ अस्माभिर्दत्तं हविः स्वीकृत्य प्राप्तबलः सन् यातुधानान् उपद्रवकारिणो राक्षसान् वि लापय विनाशय । ॥लीङ् श्लेषणे । अस्मात् "हेतुमति च" इति णिच् । "विभाषा लीयतेः" इति आत्त्वम् । "अर्तिह्री०" इत्यादिना पुगागमः । यद्वा रप लप व्यक्तायां वाचि । अस्मात् णिच् । "अत उपधायाः" इति वृद्धिः । वीत्युपसर्गवशाद् अत्र धातुः वचनविशेषं परिदेवनम् आह । तद् उक्तम् ।

धात्वर्थं बाधते कश्चित् कश्चित् तम् अनुवर्तते ।
तमेव विशिनष्ट्येक उपसर्गगतिस्त्रिधा । इति॥ ॥

आर्तस्वरान् कुर्वित्यर्थः ॥

तृतीया ॥

वि लपन्तु यातुधानाः अत्त्रिणो ये किमीदिनः ।
अथेदमग्ने नो हविरिन्द्रश्च प्रति हर्यतम् ॥ ३ ॥

वि । लपन्तु । यातुऽधानाः । अत्त्रिणः । ये । किमीदिनः ।
अथ । इदम् । अग्ने । नः । हविः । इन्द्रः । च । प्रति । हर्यतम् ॥ ३ ॥

अत्त्रिणः अदनशीलाः सर्वेषां भक्षकाः। ॥ अद भक्षणे। अदे-स्त्रिनिश्च [उ० ४. ६८] इति औणादिकस्त्रिनिप्रत्ययः। प्रत्ययस्वरेण अन्तो-दात्तत्वम ॥। किमीदिनः किं [किम्] इदानीं वर्तत इति स्वप्रवृत्तये कालान्वेषणं कुर्वन्तः। अथ वा किम् इदं किम् इदम् इति स्वोचितं पदार्थम् अन्विष्य चरन्तः ये प्रसिद्धा यातुधानाः राक्षसाः सन्ति ते वि लपन्तु परिदेवनं कुर्वन्तु। हे अग्ने त्वया पीडिताः सन्तः विनश्यन्तु इ-त्यर्थः॥ अथ क्रियमाणयागाद्यन्तरायकारिरक्षोविनाशानन्तरम् हे अग्ने त्वम् इन्द्रः परमैश्वर्ययुक्तो देवश्च नः अस्मदीयम् इदम् आज्यादिरूपं हविः प्रति लक्षीकृत्य हर्यतम् आगच्छतम् कामयेथां वा। स्वीकुरुतम् इत्य-र्थः॥ ॥ हर्य गतिकान्त्योः। इन्द्र इति। इदि परमैश्वर्ये। ऋज्रे-न्द्राग्रेत्यादिना [उ० २. २८] रन्प्रत्ययान्तो निपातितः। नित्त्वाद् आ-द्युदात्तत्वम ॥ ॥

चतुर्थी ॥

अग्निः पूर्व आ रभतां प्रेन्द्रो नुदतु बाहुमान्।
ब्रवीतु सर्वो यातुमान् अयमस्मीत्येत्य ॥ ४ ॥

अग्निः। पूर्वः। आ। रभताम्। प्र। इन्द्रः। नुदतु। बाहुऽमान्।
ब्रवीतु। सर्वः। यातुऽमान्। अयम्। अस्मि। इति। आऽइत्य ॥ ४ ॥

अग्निः अङ्गनादिगुणयुक्तो देवः पूर्वः सर्वदेवानां पुरोगामी सन् आ रभ-तां यातुधानान् निग्रहीतुम् उपक्रमताम्। ॥ रभ राभस्ये ॥। रा-भस्यं कार्योपक्रमः। "अग्निः खलु वै रक्षोहा" [तै० सं० ६. १. ४. ६] इति हि तैत्तिरीयकम्। अग्नेः प्राथम्यमपि तत्रैव आम्नातम्। "अ-ग्निरग्रे प्रथमो देवतानाम्" [तै० ब्रा० २. ४. ३. ३] इति ॥ तदनन्तरं बाहुमान् बलवत्त्वेन प्रशस्तबाहुयुक्तः। ॥ भूमनिन्दाप्रशंसासु इति प्रशंसायां बाहुशब्दात् मतुप्। "ह्रस्वनुड्भ्यां मतुप्" इति मतुप उदात्तत्व-म ॥। ईदृश [इन्द्रः] प्र नुदतु यातुधानान् प्रेरयतु अपसारयतु। ॥ नु-द प्रेरणे। तुदादित्वात् शः। शस्य ङित्त्वात् लघूपधगुणाभावः। तिपः

1 S′Kd repeat यातुधानाः.

पित्त्वाद् अनुदात्तत्वे विकरणस्य प्रत्ययस्वरेण उदात्तत्वे प्राप्ते "तिङ्तिङः" इति सर्वानुदात्तत्वम् । "व्यवहिताश्च" इति उपसर्गस्य व्यवहितप्रयोगः ॥ । इन्द्रेण प्रणुद्यमानो यातुमान् । यातूनि रक्षांसि विद्यन्ते अस्मिन्निति यातुमान् राक्षसाधिपतिः । यद्वा यातवो यातनाः । ॥ यत निकारोपस्करयोः इत्यस्मात् औणादिक उण् ॥ । ता अस्मिन् विद्यन्त इति यातुमान् तादृशः सर्वः निखिलो यातुधानः एत्य इमं देशम् आगत्य अयम् अयम् अस्मि एतन्नामकोहं भवामि इति ब्रवीतु कथयतु । आत्मानं प्रकाश्य निर्गच्छतु इत्यर्थः । ॥ एत्येति । आङ्पूर्वाद् इण् गतौ इत्यस्मात् "समासेऽनञ्पूर्वे क्त्वो ल्यप्" इति क्त्वाप्रत्ययस्य ल्यबादेशः । तस्य पित्त्वात् "ह्रस्वस्य पिति कृति०" इति तुक् । ब्रवीत्विति । ब्रूञ् व्यक्तायां वाचि । अदादित्वाच्छपो लुक् । "ब्रुव ईट्" इति ईडागमः ॥ ॥

पञ्चमी ॥

पश्यामं ते वीर्यं जातवेदः प्र णो ब्रूहि यातुधानान् नृचक्षः ।
त्वया सर्वे परितप्ताः पुरस्तात् त आ यन्तु प्रब्रुवाणा उपेदम् ॥ ५ ॥

पश्यामं । ते । वीर्यम् । जातऽवेदः । प्र । नः । ब्रूहि । यातुऽधानान् । नृऽचक्षः ।
त्वया । सर्वे । परिऽतप्ताः । पुरस्तात् । ते । आ । यन्तु । प्रऽब्रुवाणाः । उप ।
इदम् ॥ ५ ॥

हे जातवेदः जातानाम् उत्पन्नानां वेदितरग्ने ते तव वीर्यं सामर्थ्यं पश्याम द्रक्ष्यामः । ॥ दृशिर् प्रेक्षणे । अस्मात् लोटि उत्तमबहुवचने "आडुत्तमस्य पिच्च" इति आडागमः । "शपि पाघ्रा०" इत्यादिना धातोः पश्यादेशः । मसः पिद्वद्भावात् शपश्च पित्त्वात् अनुदात्तत्वे धातुस्वरेण आद्युदात्तत्वम् । वीर्यम् इति । बिल्वभक्ष्यवीर्याणि छन्दसि [फि० ४. ९] इति अन्तस्वरितत्वम् ॥ ॥ हे नृचक्षः नॄन् मनुष्यान् चष्टे पश्यतीति नृचक्षाः । अतिरोहितज्ञानतया सर्वं साक्षात् कर्तुं शक्त इत्यर्थः । यद्वा नृभिर्मनुष्यैः ख्यायते दृश्यते उपास्यत्वेन साक्षात् क्रियत इति नृचक्षाः । ॥ चष्टिः पश्यतिकर्मेति यास्कः [निघ० ३. ११] । चक्षिङ् व्यक्तायां वाचि । नृश-

ब्दोपपदाद् अस्मात् कर्तरि कर्मणि वा असुन्। "असनयोश्च प्रतिषेधो वक्तव्यः" इति ख्याञादेशाभावः ॥ हे तथाविध अग्ने नः अस्माकं बाधकान् यातुधानान् राक्षसान् प्र ब्रूहि प्रकथय। यथा अस्मान् पुनःपुनर्न बाधन्ते तथा यातुधानान् आज्ञापयेत्यर्थः। ॥ ब्रूहि। ब्रूञ् व्यक्तायां वाचि। अदादित्वात् शपो लुक्। "सेर्ह्यपिच्च" इति हेः अपित्त्वेन ङित्त्वात् "कृति च" इति गुणप्रतिषेधः ॥ ॥ अपि च त्वया एवम् आज्ञापयता पुरस्तात् पूर्वस्मिन् काले परितप्ताः परितः समन्ताद् दग्धाः ते सर्वे यातुधानाः प्रब्रुवाणाः स्वस्वनामादिकं कथयन्तः प्रलपन्तो वा इदं क्रियमाणं कर्म उप आ यन्तु उप समीपम् आयन्तु आगच्छन्तु। आगत्य विनश्यन्तु इत्यर्थः। ॥ पुरस्तादिति। "पूर्वाधरावराणामसि पुरधवश्चैषाम्"। "अस्ताति" च इति पूर्वशब्दात् अस्तातिप्रत्ययः तत्संनियोगेन पुरादेशश्च। प्रब्रुवाणा इति। प्रपूर्वात् ब्रूञः लटः शानच्। चित्त्वाद् अन्तोदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वेनापि स एव शिष्यते ॥ ॥

षष्ठी ॥

आ रभस्व जातवेदोस्माकार्थाय जज्ञिषे।
दूतो नो अग्ने भूत्वा यातुधानान् वि लापय ॥ ६ ॥

आ। रभस्व। जातऽवेदः। अस्माकं। अर्थाय। जज्ञिषे ॥
दूतः। नः। अग्ने। भूत्वा। यातुऽधानान्। वि। लापय ॥ ६ ॥

हे जातवेदः जातानां वेदितरग्ने आ रभस्व राक्षसापनोदनकर्म कर्तुम् उपक्रमस्व ॥ तत्र कारणम् आह। अस्माक। ॥ अस्मदः षष्ठीबहुवचनस्य "साम आकम्" इति आकम् आदेशः। शेषे लोपे अन्त्यलोपश्छान्दसः। यदा हि शेषे लोपष्टिलोप इष्यते तदा "अनुदात्तस्य च यत्रोदात्तलोपः" इति आकम आदेरुदात्तत्वम्। यदा तु अन्त्यलोपः [तदा] "एकादेश उदात्तेनोदात्तः" इति उदात्तत्वम् ॥। ग्रहरोगादिपीडितानाम् अस्माकम् अर्थाय प्रयोजनाय। प्रेप्सितं प्रयोजनं संपादयितुम् इत्यर्थः ॥

---

1 S′Kd लोके for काले.

यद्वा अर्थशब्दो निवृत्तिवचनः । अनर्थनिवृत्तये यतस्त्वं जज्ञिषे जातवानसि । ॥ जनी प्रादुर्भावे । अस्मात् लिटि "असंयोगाल्लिट् कित्" इति लिटः कित्त्वे "गमहन०" इत्युपधालोपः । तस्य "द्विर्वचनेऽचि" इति स्थानिवद्भावात् साच्कस्य द्विर्वचनम् । "आर्धधातुकस्येड्वलादेः" इति इडागमः ॥ ततः हे अग्ने नः अस्माकं दूतः यथोक्तकर्मकरो भूत्वा । अभूततद्भावद्योतकेन भूत्वा इत्यनेन स्वयम् अदूतः सन्नपि दूतवत् संनिहितो भूत्वा मदभिलषितं कुरु इत्युक्तं भवति । यातुधानान् राक्षसान् वि लापय विनाशय ॥

सप्तमी ॥

त्वमग्ने यातुधानान् उपबद्धाँ इहा वह ।
अथैषामिन्द्रो वज्रेणापि शीर्षाणि वृश्चतु ॥ ७ ॥

त्वम् । अग्ने । यातुऽधानान् । उपऽबद्धान् । इह । आ । वह ।
अथ । एषाम् । इन्द्रः । वज्रेण । अपि । शीर्षाणि । वृश्चतु ॥ ७ ॥

हे अग्ने त्वं यातुधानान् राक्षसान् उपबद्धान् रज्वादिबद्धहस्तपादाद्यवयवान् कृत्वा इह अस्मिन् देशे आ वह आनय ॥ अथ अनन्तरमेव इन्द्रो देवानाम् अधिपतिः एषां यातुधानानां शीर्षाणि शिरांस्यपि वज्रेण कुलिशेन वृश्चतु छिनत्तु । ॥ ओव्रश्चू छेदने । तुदादित्वात् शः । तस्य "सार्वधातुकम् अपित्" इति ङित्त्वात् "ग्रहिज्या०"आदिना संप्रसारणम् ॥

[इति] द्वितीयेनुवाके प्रथमं सूक्तम् ॥

"इदं हविः" इति सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः । सूत्रमपि तत्रैव उदाहृतम् ॥

तत्र प्रथमा ॥

इदं हविर्यातुधानान् नदी फेनमिवा वहत् ।
य इदं स्त्री पुमानकरिह स स्तुवतां जनः ॥ १ ॥

इदम् । हविः । यातुऽधानान् । नदी । फेनम्ऽइव । आ । वहत् ।
यः । इदम् । स्त्री । पुमान् । अकः । इह । सः । स्तुवताम् । जनः ।

इदं मया अन्न्यादिदेवेभ्यो दीयमानं हविः आज्यादिरूपं यातुधानान् रक्षःपिशाचादीन् आ वहत् आसमन्ताद् गमयतु । अस्मात् स्थानात् प्रच्यावयतु इत्यर्थः । ॥ वह प्रापणे । "छन्दसि लुङ्लङ्लिटः" इति प्रार्थनायां लङ् ॥ । तत्र दृष्टान्तः । नदी तरङ्गिणी फेनमिव । सा यथा स्वकीयेन प्रवाहेण फेनं देशाद् देशान्तरं प्रापयति । तद्वद् इत्यर्थः । ॥ नद ध्वन शब्दे । नदति ध्वनतीति नदी । पचाद्यच् । तत्र नदट् इति टित्त्वेन पाठात् "टिड्ढाणञ्॰" इति ङीप् । "यस्य॰" इति लोपे उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम् । नदनान्नद्य इति यास्कः [नि॰२.२४] । मन्त्रवर्णश्च "यददः संप्रयतीरहावनदता हते । तस्मादा नद्यो नाम स्थ" [३.१३.१] इति ॥ ॥ तदनन्तरम् इदम् अभिचारकर्म यो जनः स्त्री[1] वा पुमान् वा अकः अकार्षीत् । ॥ डुकृञ् करणे । अस्मात् लुङि "मन्त्रे घस॰" इति च्लेर्लुक् । गुणे "हल्ङ्याब्भ्यः॰" इति तिलोप[2]ः । "यङ्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ॥ । स जनः स्वकीयस्य अभिचारकर्मणो निष्फलत्वेन अनाप्तकामः सन् इह अस्मिन् देशे मत्समीपे स्थित्वा स्तुवतां स्तुतिं करोतु । मामेव शरणं प्राप्य सेवताम् इत्यर्थः ॥ यद्वा यः[3] स्त्री वा पुमान् वा जनः इदम् उक्तं हविः परकृतोपद्रवनिवृत्तये अकः अकार्षीत् हे अन्न्यादिदेव स जनः निवृत्तोपद्रवः सन् स्तुवताम् । त्वां स्तुत्यादिना परिचरतु इत्यर्थः । ॥ ष्टुञ् स्तुतौ । अस्मात् लोटि व्यत्ययेन शः । "तिङ्तिङः" इति निघातः ॥ ॥

द्वितीया ॥

अयं स्तुवान आगमदिमं स्म प्रति हर्यत ।
बृहस्पते वशे लब्ध्वाग्नीषोमा वि विध्यतम् ॥ २ ॥

अयम् । स्तुवानः । आ । अगमत् । इमम् । स्म । प्रति । हर्यत ।
बृहस्पते । वशे । लब्ध्वा । अग्नीषोमा । वि । विध्यतम् ॥ २ ॥

बृहस्पत्यादयो वक्ष्यमाणा [हे] देवाः अयं राक्षसपीडितो जनः स्तु-

---

1 S′Kd स्त्री वा पुमाकार्षीत्. 2 S′Kd insert इति after °लोपः. 3 S′Kd या.

वानः युष्मद्विषया स्तुतिं कुर्वाणः आगमत् आगतवान् । बहुविधोपद्रवनिवृत्तये संरक्षकान् युष्मानेव प्राप्त[1] इत्यर्थः । ॥ गम्लृ सृमृ गतौ । लुङि "पुषादिद्युताद्यृदितः परस्मैपदेषु" इति च्लेः अङादेशः । स्तुवान इति । लटः शानच् । अदादित्वात् शपो लुक् । शानचो ङिद्वद्भावाद् गुणाभावे उवङ् । "चितः" इति अन्तोदात्तत्वम ॥ यत एवम् आगमत् अतो हेतोः इमं युष्मत्समीपं प्राप्तं जनं हे देवाः प्रति हर्यत स्म प्रतिकामयध्वम् । स्वकीयत्वेन परिगृह्णीतेत्यर्थः । ॥ हर्य गतिकान्त्योः । "स्मे लोट्" । "अधीष्टे च" इति लोट् ॥ हे बृहस्पते बृहतां महतां देवानां पालयितर्देव । ॥ "तद्बृहतोः करपत्योश्चोरदेवतयोः०" इति सुट्तलोपौ । "आमन्त्रितस्य च" इति षाष्ठिकम् आद्युदात्तत्वम ॥ । त्वत्समीपं प्राप्तस्य अस्य उपद्रवकारिणः सर्वान् वशे लब्ध्वा स्वाधीनान् कृत्वा तिष्ठ । ते यथा इमं जनं नोपसर्पन्ति तथा निरुध्य वर्तस्वेत्यर्थः ॥ अपि च हे अग्नीषोमा अग्नीषोमौ । ॥ अग्निश्च सोमश्चेति द्वन्द्वे "ईदग्नेः सोमवरुणयोः" इति पूर्वपदस्य ईत्त्वम् । "अग्नेः स्तुत्स्तोमसोमाः" इति षत्वम् । "सुपां सुलुक्०" इति पूर्वसवर्णदीर्घः । पादादित्वाद् आष्टमिकनिघाताभावे षाष्ठिकम् आमन्त्रिताद्युदात्तत्वम ॥ । युवां वि विध्यतं तान् उपद्रवकारिणो विविधं ताडयतम् । मारयतम् इत्यर्थः । अग्नीषोमौ हि राजत्वात् शिक्षाधिकारिणौ इति तयोरेवात्र प्रार्थनम् । राजत्वं च तयोस्तैत्तिरीयके समाम्नायते । "राजानौ वा एतौ देवतानां यद् अग्नीषोमौ" [तै० सं० २. ६. २. १.] इति । ॥ व्यध ताडने । अस्माद् विपूर्वात् लोटि दिवादित्वात् श्यन् । तस्य ङिद्वद्भावात् "ग्रहिज्या०"आदिना संप्रसारणम ॥ ॥ यद्वा अयं यातुधानः युष्मत्तः अत्यर्थं भीतः सन् स्तुवानः युष्मान् स्तुवन् आगमत् युष्मन्निकटं प्राप्तवान् । इमम् आगतं यूयं प्रति हर्यत स्म अस्माकं प्रतिकूलम् अवगच्छत । हे बृहस्पते इमं वशे लब्ध्वा इत्यादि पूर्ववद् योज्यम ॥

तृतीया ॥

यातुधानस्य सोमप जहि प्रजां नयस्व च ।

---

1 S' Kd प्राप्तम्.

निं स्तुवानस्य पातय परमक्ष्युतावरम् ॥ ३ ॥
यातुऽधानस्य। सोमऽप। जहि। मऽजाम। नयस्व। च।
निः। स्तुवानस्य। पातय। परम। अक्षि। उत। अवरम ॥ ३ ॥

हे सोमप सोमरसस्य पातरग्ने। कर्मणि उपपदे पिबतेः कप्रत्ययः। त्रपौत्रादिलक्षणां संततिं जहि नाशय। स्मात् लोटि "सेर्ह्यपिच्च" इति हिरादेशः। "हन्तेर्जः" इति धातोर्जादेशः। तस्य "असिद्धवदत्रा भात्" इति असिद्धत्वाद् "अतो हेः" इति लुगभावः। यद्वा। यातुधानस्य इति कर्मणि षष्ठी। यातुधानम् अस्मदुपद्रवकारिणं राक्षसं जहि। प्रजाम् अस्मदीयां नयस्व च अभिमतफलं प्रापय च। अनिष्टपरिहारम् इष्टप्राप्तिं च कुरु इत्यर्थः॥ अपि च स्तुवानस्य भीत्या त्वद्विषयां स्तुतिं कुर्वतः शत्रोः परम् उत्कृष्टं दक्षिणम् अक्षि। उतशब्दः अप्यर्थे। अवरम् निकृष्टं वामाक्ष्यपि। उभे अपि चक्षुषी निष्पातय स्वस्थानात् प्रच्यावय। विनाशयेत्यर्थः। "तस्माद् दक्षिणोर्ध आत्मनो वीर्यावत्तरः" [तै० सं० १. ७. ६. ३] इति श्रुत्या पुरुषशरीरे दक्षिणभागस्य अतिशयितवीर्यवत्त्वप्रतिपादनात् तद्भागवर्तिनश्चक्षुषः परत्वम् उक्तम्। तदपेक्षया च इतरस्य अवरत्वम् उन्नेयम॥

चतुर्थी॥

यत्रैषामग्ने जनिमानि वेत्थ गुहा सतामत्त्रिणां जातवेदः।
तांस्त्वं ब्रह्मणा वावृधानो जह्येषां शततर्हमग्ने ॥ ४ ॥
यत्र। एषाम। अग्ने। जनिमानि। वेत्थ। गुहा। सताम। अत्त्रिणाम। जातऽवेदः।
तान्। त्वम। ब्रह्मणा। ववृधानः। जहि। एषाम। शतऽतर्हम। अग्ने ॥ ४ ॥

हे जातवेदः जातानां वेदितरग्ने गुहा सताम् गुहायां निवसताम् अत्त्रिणाम् अदनशीलानाम् एषाम् रक्षसां यत्र यस्मिन् स्थानविशेषे विद्यमा-

---

१ RV निः. We with ABBhDKSmRw.

---

1 S'Kd °शालिनाम्.

नानि जनिमानि जन्मानि वेत्थ जानासि। ॥ यत्रेति। "सप्तम्यास्त्रल्"। "प्राग्दिशो विभक्तिः" इति विभक्तिसंज्ञायां "त्यदादीनामः" इति अत्वम्। "लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वम्। जनिमानीति। जनी प्रादुर्भावे। अस्माद् भावे औणादिक इमनिन् प्रत्ययः। वेत्थेति। विद ज्ञाने। "विदो लटो वा" इति सिपस्थलादेशः। लित्स्वरेण आद्युदात्तत्वम्। "निपातैर्यद्यदिहन्त°" इति निघातप्रतिषेधः। सताम् इति। अस्तेर्लटः शत्रादेशः। अदादित्वात् शपो लुक्। "श्नसोरल्लोपः" इत्यकारलोपः। अत्रिणाम् इति। अदेस्त्रिनिश्च [उ° ४. ६८] इति त्रिनिप्रत्ययः ॥। अतो हेतोः हे अग्ने त्वम् ब्रह्मणा मन्त्रेण वावृधानः वर्धमानः सन्। ॥ वृधु वृद्धौ। अस्मात् लिटः कानच् ॥। तान् तत्र स्वस्थाने वर्तमानान् राक्षसान् जहि नाशय। तथा एषाम् यातुधानानां शततर्हम् शतप्रकारं बहुविधं हिंसनं च निवर्तय। तत्कृतोपद्रवजातमपि नाशयेत्यर्थः॥ यद्वा ब्रह्मणा परिवृढेन अस्माभिर्दत्तेन हविषा वावृधानः वर्धमानः प्रवृद्धबलस्त्वम् तान् अत्रिणो राक्षसान् एषाम् रक्षसां त्वया ज्ञातानि पुत्रपौत्रादिरूपाणि जन्मानि च शततर्हम्। क्रियाविशेषणम् एतत्। शतशो बहुशस्तर्हणं हिंसनं यथा भवति तथा जहि। निरवशेषं नाशयेत्यर्थः॥ ॥ तृह हिंसि हिंसायाम्। अस्माद् भावे घञ् ॥॥

[इति] प्रथमकाण्डे द्वितीयेनुवाके द्वितीयं सूक्तम्॥

"अस्मिन् वसु" इति सूक्तेन सर्वसंपत्कर्मसु वासितयुग्मकृष्णलमणिबन्धनम् सारूपवत्सौदने पुरुषाकृतिम् आलिख्य तत्प्राशनं च कुर्यात्। तथा च सूत्रम्। "अस्मिन् वसु * * इति युग्मकृष्णलं वासितं बध्नाति सारूपवत्सं पुरुषगात्रम्" इत्यादि [कौ°२.२]॥ अत्र वासितम् इत्यस्य अयम् अर्थः। "त्रयोदश्यादयस्तिस्रो दधिमधुनि वासयित्वा बध्नात्याशयति" इति [कौ° १.७] परिभाषणात् त्रयोदश्याद्दिषु दिवसेषु दधिमधुपूर्णे पात्रे मणिं प्रक्षिप्य चतुर्थेहनि तन्मणिबन्धनं तद्दधिमधुप्राशनं [च] कुर्याद् इति॥

तथा शत्रुणा राष्ट्रात् प्रच्यावितस्य राज्ञः पुनः स्वराष्ट्रप्रवेशार्थं छेदन-

प्रदेशात् पुनःप्ररूढैः काम्पीलकाष्ठैः शृतं लूनपुनरुत्थितव्रीहिजम् ओदनम् अनेनैव सूक्तेन प्राशयेत् । तथा च संहिताविधौ । "अस्मिन् वस्विति राष्ट्रावगमनम् आनुशूकानां व्रीहीणाम् आम्रस्कजैः काम्पीलैः शृतं सारूपवत्सम् आशयति" इति [कौ० २. ७.] ॥

तथा आयुष्कामः युग्मकृष्णलमणिं स्थालीपाके प्रक्षिप्य तन्मणिबन्धनम् तदोदनप्राशनं च अनेनैव सूक्तेन कुर्यात् । तथा च कौशिकः । "अस्मिन् वसु * * इति युग्मकृष्णलम् आदिष्टानां स्थालीपाक आधाय बभात्याशयति" इति [कौ० ७. ३] ॥

तथा उपनयनकर्मणि माणवकानुमन्त्रणेपि एतत् सूक्तं विनियुक्तम् । "उपनयनम्" प्रक्रम्य सूत्रितम् । "प्राञ्चम् अवस्थाप्य दक्षिणेन पाणिना नाभि- "देशे संस्तभ्य जपति अस्मिन् वसु वसवो धारयन्तु [१. ९] विश्वे देवा "वसवः [१. ३०] आ यातु मित्रः [३. ८] अमुत्र भूयात् [७. ५५] "अन्तकाय मृत्यवे [८. १] आ रभस्व [८. २] प्राणाय नमः [११. ४] "विषासहिम् [१७. १] इत्यनुमन्त्रयते" इति [कौ० ७. ६] ॥

एतेषामेव आयुष्यगणत्वात् "आयुष्यस्वस्त्ययनैराज्यं जुहुयात्" इति [कौ० १४. ३] सूत्राद् उपाकर्मादिष्वपि एतत् सूक्तं द्रष्टव्यम् ॥

तथा "ऐरावतीं गजक्षये" इति [न० क० १७] विहितायाम् ऐरावत्याख्यायां महाशान्तावपि अस्य विनियोगः । तथा [च] नक्षत्रकल्पे । "आयुष्यशान्तिस्वस्तिगण ऐरावत्याम्" इति [न० क० १८] ॥

तथा "बार्हस्पत्यां राज्यश्रीब्रह्मवर्चसकामस्य" [न० क० १७] इत्युक्तायाम् "अस्मिन् वस्विति युग्मकृष्णलं बार्हस्पत्यायाम्" [न० क० १९] इत्युक्तत्वाद् बार्हस्पत्याख्यायां महाशान्तौ युग्मकृष्णलमणिबन्धनेपि एतत् सूक्तं द्रष्टव्यम् ॥

पुष्याभिषेककर्मणि एतत् सूक्तम् । तथा च परिशिष्टे ।

---

1 S′ Kd प्रवेशात्. 2 S′ Kd कापील°. 3 S′ Kd om. °व°. We with *Kaus'ika*. 4 S′ Kd °नुषूकारणां. We with *Kaus'ika*. 5 S′ Kd कंपीलैः. We with *Kaus'ika*. 6 S′ Kd जपतीति. We with *Kaus'ika*. 7 So S′ Kd. *Kaus'ika* has अभिमंत्रयते for अनुमन्त्रयते. 8 S′ Kd आयुष्यः शां°. We with the *Nakshatrakalpa*.

शर्मवर्मगणश्चैव तथा स्याद् अपराजितः ।
आयुष्यश्चाभयश्चैव तथा स्वस्त्ययनो गणः ।
एतान् पञ्च गणान् हुत्वा वाचयेत द्विजोत्तमान् । इति [प० ५. ३] ॥

तत्र प्रथमा ॥

अस्मिन् वसु वसवो धारयन्त्विन्द्रः पूषा वरुणो मित्रो अग्निः ।
इममादित्या उत विश्वे च देवा उत्तरस्मिन् ज्योतिषि धारयन्तु ॥ १ ॥

अस्मिन् । वसु । वसवः । धारयन्तु । इन्द्रः । पूषा । वरुणः । मित्रः । अग्निः । इमम् । आदित्याः । उत । विश्वे । च । देवाः । उत्ऽतरस्मिन् । ज्योतिषि । धारयन्तु ॥ १ ॥

अस्मिन् जने सर्वसंपदादिफलकामे वसवः निवासहेतुभूता एतत्संज्ञा देवाः वसु अभिलषितं धनं धारयन्तु स्थापयन्तु । ✕ धृञ् धारणे । अस्मात् णिच् । वसव इति । वस निवासे । शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च [उ० १. १०] इति उप्रत्ययः । तत्र धान्ये नित् [उ० १. ९] इत्यनुवृत्तेः "ञ्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम् ✕ ॥ न केवलं वसवः अपि तु इन्द्रः परमैश्वर्ययुक्तो देवानाम् अधिपतिर्देवः ॥ ✕ इदि परमैश्वर्ये । ऋज्रेन्द्राग्रेत्यादिना [उ० २. २८] रन्प्रत्ययान्तो निपातितः । नित्त्वाद् आद्युदात्तत्वम् । यद्वा इदंकारास्पदं विश्वं कारणभूतब्रह्मात्मना अद्राक्षीदिति इन्द्रः । श्रूयते हि ऐतरेयके । "स एतमेव पुरुषं ब्रह्म ततमम् अ- "पश्यद् इदम् अदर्शमितीं ३ तस्माद् इदन्द्रो नाम इदन्द्रो ह वै नाम त- "म इदन्द्रं सन्तम् इन्द्र इत्याचक्षते परोक्षेण" [ऐ० आ० २. ४. ३] इति ✕ । पूषा पोषकः एतन्नामा देवः । "पूष्णः पोषेण मह्यम्" [तै० ब्रा० १. २. १. १९] "पूषापोषयत्" [तै० ब्रा० १. ६. २. २] इत्यादिश्रुतेः । ✕ पुष पुष्टौ । श्वन्नुक्षन्नित्यादिना [उ० १. १५६.] कनिन्प्रत्ययान्तो निपातितः । प्रत्ययस्वरेण अन्तोदात्तत्वम् ✕ । वरुणः वृणोति सर्वं जगत् निग्रहीतुं पाशजालेन व्याप्नोतीति वरुणो रात्र्यभिमानी देवः । तथा च श्रूयते । "ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितताः[2] पुरु-

---

1 Kd पूष्णः पूषं पोषेण. We with S'. 2 S' seems to read वितस्ताः. We with Kd.

त्रा"। "उदुत्तमं वरुण पाशम् अस्मद् अवाधमं वि मध्यमं श्रथाय" [ऋ० १. २४. १५] इति च। ॥ वृञ् वरणे। कृपृवृदारिभ्य उनन् [उ० ३. ५३] इति उनन् प्रत्ययः। नित्त्वाद् आद्युदात्तत्वम् ॥। मित्रः अहरभिमानी देवः। "अहोरात्रे वै मित्रावरुणौ" [तै० सं० २. ४. १०. १] इत्यादिश्रुतेः। सर्वस्य मरणत्रायकत्वेन सर्वजनमित्रत्वात् मित्र इत्युच्यते। "सर्वस्य वा अहं मित्रम् अस्मि" [तै० सं० ६. ४. ८. १] इति हि तैत्तिरीयकम्। ॥ मित्रः प्रमीतेस्त्रायते [नि० १०. २१] इति यास्कः ॥। अग्निः एतेषाम् इन्द्रादीनाम् अग्रणीः मुख्यभूतो वा देवः। "अग्निरग्रे प्रथमो देवतानाम्" [तै० ब्रा० २. ४. ३. ३] "अग्निर्मुखं प्रथमो देवतानाम्" [ऐ० ब्रा० १. ४] इति च श्रुतेः। एतेपि अस्मिन् वसु धारयन्तु इति संबन्धः॥ उत अपि च आदित्याः। अदितिः अदीना देवमाता तस्याः पुत्रा आदित्याः धात्रर्यमादयो देवाः। श्रूयते हि तैत्तिरीयके। "अदितिः पुत्रकामा" इत्यारभ्य "तस्यै धाता चार्यमा चाजायेताम्" [तै० ब्रा० १. १. ९. १] इत्यादि। ॥ "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" इति अदितिशब्दात् षष्ठीसमर्थाद् अपत्येर्थे प्राग्दीव्यतीयो ण्यप्रत्ययः। प्रत्ययस्वरेण अन्तोदात्तत्वम् ॥। विश्वे सर्वे अन्ये देवाश्च। यद्वा विश्वे देवाः एतत्संज्ञका गणदेवाः इमम् पुरुषम् उत्तरस्मिन् उत्कृष्टतरे ज्योतिषि तेजसि धारयन्तु स्थापयन्तु। तेजसा सर्वोत्कृष्टं कुर्वन्तु इत्यर्थः॥

द्वितीया॥

अस्य देवाः प्रदिशि ज्योतिरस्तु सूर्यो अग्निरुत वा हिरण्यम्।
सपत्ना अस्मदधरे भवन्तूत्तमं नाकमधि रोहयेमम्॥ २॥

अस्य। देवाः। प्रऽदिशि। ज्योतिः। अस्तु। सूर्यः। अग्निः। उत। वा। हिरण्यम्। सऽपत्नाः। अस्मत्। अधरे। भवन्तु। उत्ऽतमम्। नाकम्। अधि। रोहय। इमम्॥ २॥

हे देवाः इन्द्रादयः युष्मदाज्ञया अस्य ग्रामादिफलकामस्य पुरुषस्य। ॥ कर्तरि कर्मणि वा षष्ठी ॥। प्रदिशि प्रदेशने प्रशासने।

---

1 S′Kd अहरभिमानी देवो मित्रः.

आज्ञायाम् इत्यर्थः । ज्योतिरस्तु भवतु । किं तज्ज्योतिरिति तद् आह । सूर्यः मार्ताण्डः सर्वस्य प्रकाशको देवः । अग्निः और्वजाठरवैद्युतादिरूपः अङ्गनादिगुणयुक्तो देवः । एतत् चन्द्रादीनामपि उपलक्षणम् । उतशब्दः अप्यर्थे । वाशब्दः चार्थे । अपि च हिरण्यम् सुवर्णम् । अस्य सितभास्वररूपत्वात् ज्योतिष्ट्वम् । श्रुतं च "ज्योतिर्वै हिरण्यं ज्योतिषैव तमोपहते" [तै० सं० ५. ७. ५. २] इति । सूर्यादिकं ज्योतिः प्रकाशप्रवर्षणादिना अस्य उपकरोतु । निखिलसंपन्मूलभूतं धनमपि अस्य वशे वर्तताम् इत्यर्थः । ॥ प्रदिशीति । दिश अतिसर्जने । असात् प्रपूर्वात् संपदादिलक्षणो भावे क्विप् ॥ ॥ यत एवम् अतः सपत्नाः शत्रवः । सपत्नशब्दः शत्रुपर्यायः अव्युत्पन्नं प्रातिपदिकम् । यद्वा । सपत्नीव सपत्नः । ॥ "व्यन्तसपत्ने" इति निपातनात् सपत्नीशब्दाद् इवार्थे अकारप्रत्ययः ॥ । असत् असदीयात् पुरुषात् । यद्वा । असत् असात् । ॥ छान्दसं ह्रस्वत्वम ॥ । अधरे निकृष्टा भवन्तु । उपक्षीणा भवन्तु इत्यर्थः ॥ अपि च न केवलम् ऐहिकमेव आमुष्मिकमपि सुखं प्रार्थयते । उत्तमम् उत्कृष्टतमम् । ॥ उपसृष्टाद् उच्छब्दक्रियावचनाद् आतिशायनिकस्तमप् । "उत्तमशश्वत्तमौ सर्वत्र" इति उच्छादिषु पाठाद् "उच्छादीनां च" इति अन्तोदात्तत्वम ॥ । तादृशं नाकम । कं सुखम् अकं दुःखम् । न विद्यतेस्मिन् अकम् इति नाकः स्वर्गः । श्रूयते हि । "सुवर्गो[1] वै लोको नाको यस्यैता उपधीयन्ते नास्मा अकं भवति" [तै० सं० ५. ३. ७. १] इति । ॥ "नभ्राण्नपाद्०" इत्यादिना नञः प्रकृतिभावात् नलोपाभावः । "बहुव्रीहौ प्रकृत्या०" इति पूर्वपदप्रकृतिस्वरत्वम् । "नञ्सुभ्याम्" इति व्यत्ययेन न प्रवर्तते ॥ । दुःखलेशेनापि असंस्पृष्टं लोकम् इमम् पुरुषम् अधि रोहय । ॥ व्यत्ययेन एकवचनम ॥ । हे देवाः अधिरोहयत प्रापयत । ऐहिकम् आमुष्मिकं च सुखं प्रयच्छतेत्यर्थः ॥

तृतीया ॥

येनेन्द्राय समभरः पयांस्युत्तमेन ब्रह्मणा जातवेदः ।

---

1 S′ Kd स्वर्गो.

तेन॒ त्वमग्न इ॒ह व॑र्धयेमं सजा॒तानां॒ श्रैष्ठ्य॒ आ धे॑ह्येनम् ॥ ३ ॥
येन॑। इन्द्रा॑य। समऽअभ॑रः। पयां॑सि। उ॒त्ऽत॒मेन॑। ब्रह्म॑णा। जा॒त॒ऽवे॒दः॒।
तेन॑। त्वम्। अग्ने॑। इ॒ह। व॒र्ध॒य॒। इ॒मम्। स॒ऽजा॒ताना॑म्। श्रैष्ठ्ये॑। आ।
धे॒हि॒। ए॒न॒म् ॥ ३ ॥

हे जातवेदः जातानां वेदितरग्ने येन अतिशयितवीर्यवता उत्तमेन उत्कृष्टतमेन ब्रह्मणा मन्त्रेण करणभूतेन पयांसि क्षीराज्यादिरूपाणि हवींषि इन्द्राय देवानाम् अधिपतये समभरः समहरः प्रापितवान् असि। हृञ् हरणे अस्मात् लङि सिप्। हृग्रहोर्भश्छन्दसि इति भत्वम्। "लुङ्लङ्लृङ्क्ष्वड् उदात्तः" इति अडागम उदात्तः। "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः। "तिङि चोदात्तवति" इति गतेरनुदात्तत्वम्। हे अग्ने त्वं तेन तथाविधेन ब्रह्मणा इमम् संपदादिफलकामं पुरुषम् इह[1] अस्मिन् लोके स्वकीये अवस्थाने वर्धय समर्धय। अस्य अभिमतफलसमृद्धिं कुर्वित्यर्थः॥ अपि च। सजातानाम् समानजन्मनां पुरुषाणां मध्ये श्रैष्ठ्ये श्रेष्ठत्वे एनम्[2] पुरुषम् आ धेहि निधेहि स्थापय। ज्ञातीनां मध्ये एनम् उत्कृष्टतमं कुर्वित्यर्थः। डुधाञ् धारणपोषणयोः। अस्मात् लोट्। "सेर्ह्यपिच्च" इति हिरादेशः। "ध्वसोरेद्धावभ्यासलोपश्च" इति एत्वाभ्यासलोपौ। श्रैष्ठ्य इति। प्रशस्यशब्दाद् आतिशायनिक इष्ठन् प्रत्ययः। "प्रशस्यस्य श्रः" इति प्रशस्यशब्दस्य श्रादेशः। अस्मादेव आदेशविधानसामर्थ्याद् "अजादी गुणवचनादेव" इति नियमस्य बाधितत्वाद् अगुणवचनादपि इष्ठन् प्रत्ययः। "प्रकृत्यैकाच्" इति प्रकृतिभावात् टिलोपयस्येतिचलोपयोरभावः। श्रेष्ठस्य भावः श्रैष्ठ्यम्॥ ब्राह्मणादेराकृतिगणत्वाद् "गुणवचनब्राह्मणादिभ्यः कर्मणि च" इति ष्यञ्। ञ्नित्यादिर्नित्यम् इति आद्युदात्तत्वम्॥

चतुर्थी॥

ऐषां॑ य॒ज्ञमु॒त वर्चो॑ ददे॒हं रा॒यस्पोषं॑मु॒त चि॒त्तान्य॑ग्ने।
स॒पत्ना॑ अ॒स्मद॑धरे भवन्तू॒त्तमं नाक॒मधि॑ रोहयेमम् ॥ ४ ॥

---

1 S′Kd इह इह. 2 S′Kd एनं श्रैष्ठ्ये श्रेष्ठत्वे एनं पुरुषं.

आ । एषाम् । यज्ञम् । उत । वर्चः । ददे । अहम् । रायः । पोषम् । उत । चित्तानि । अग्ने ।
सऽपत्नाः । अस्मत् । अधरे । भवन्तु । उत्ऽउत्तमम् । नाकम् । अधि । रोहय । इमम् ॥ ४ ॥

हे अग्ने त्वत्प्रसादाद् एषाम् शत्रूणां संबन्धिनं[1] यज्ञम् स्वर्गादिसाधनं पुण्यकर्म अहम् त्वदुपासकः आ ददे स्वीकरोमि । अपहरामीत्यर्थः । ⌛"आङो दोनास्यविहरणे" इति आत्मने पदम् । "व्यवहिताश्च" इति आङो व्यवहितप्रयोगः⌛ । उत अपि च वर्चः राज्यादिनिमित्तं शत्रुसंबन्धि तेजः । तथा रायः धनस्य पोषम् पुष्टिम् । शत्रूणां संबन्धि समृद्धं धनम् इत्यर्थः । उत चित्तानि मनांस्यपि । आ ददे इति प्रत्येकं संबन्धः । शत्रुसंबन्धि ऐहिकामुष्मिकसुखोपायभूतं यज्ञधनादिकं तन्निर्वर्तिकां बुद्धिं च स्वात्मसात्करोमीत्यर्थः । ⌛रायस्पोषम इति । "ऊडिदंपदादि°" इति रैशब्दात् परस्याः षष्ठ्या उदात्तत्वम् । "षष्ठ्याः पतिपुत्र°" इति विसर्जनीयस्य सत्वम⌛ । यत एवम् अतः सपत्ना अस्मदधरे भवन्तु इत्यादि पूर्ववद् योज्यम ॥

[इति] प्रथमकाण्डे द्वितीयेनुवाके तृतीयं सूक्तम ॥

"अयं देवानाम" इति सूक्तेन जलोदररोगनिवृत्तये गृहतृणदर्भपिञ्जूलीयुक्तघटजलेन अभिषेकं कुर्यात् । सूत्रितं हि । "अयं देवानाम इति एकविंशत्या दर्भपिञ्जूलीभिर्वलीकैः सार्धम अधिशिरोऽवसिञ्चति" इति [कौ° ४.१.]॥

तत्र प्रथमा ॥

अयं देवानामसुरो वि राजति वशा हि सत्या वरुणस्य राज्ञः ।
ततस्परि ब्रह्मणा शाशदान उग्रस्य मन्योरुदिमं नयामि ॥ १ ॥

अयम् । देवानाम् । असुरः । वि । राजति । वशा । हि । सत्या । वरुणस्य । राज्ञः ।
ततः । परि । ब्रह्मणा । शाशदानः । उग्रस्य । मन्योः । उत् । इमम् । नयामि ॥ १ ॥

---

1 S′Kd संबंधियज्ञं for संबन्धिनं यज्ञं.

देवानाम् इन्द्रादीनां मध्ये असुरः क्षेप्ता पापिनां निग्रहीता। ॥ असु क्षेपणे। असेरुरन् [उ०१. ४२] इति उरन् प्रत्ययः। ञ्नित्यादिर्नित्यम् इति आद्युदात्तत्वम्॥। ईदृशः अयम् वरुणो वि राजति विशेषेण दीप्यते। सर्वनियन्तृत्वात् सर्वोत्कृष्टतया वर्तत इत्यर्थः। ॥ राजृ दीप्तौ॥॥ तत्र हेतुम् आह। हि यस्मात् कारणात् सत्या सत्यानि सद्रूपं प्राप्तानि पदार्थजातानि। ॥ "शेश्छन्दसि बहुलम्" इति शेर्लोपः॥। राज्ञः राजमानस्य वरुणस्य देवस्य वशा वशानि स्ववशेन[1] स्वाधीनानि। नियम्यत्वेन स्वाधीनानि भवन्तीत्यर्थः॥ यद्वा राज्ञः वरुणस्य सत्यानि यथार्थभाषणानि स्ववशानि भवन्ति। सर्वदा सत्यभाषणशील इत्यर्थः। आम्नास्यते हि "राज्ञस्वा सत्यधर्मणः" [१. १०. ३] इति॥ ततः तस्मात् कारणात् परि परितः सर्वतः ब्रह्मणा मन्त्रेण वरुणविषयस्तुतिरूपेण हविषा वा शाशदानः अत्यर्थं तीक्ष्णैः[2] स्तोत्रादिना तोषितस्य वरुणस्य अनुग्रहेण प्राप्तबलः। ॥ शदॢ शातने। अस्मात् यङ्लुगन्ताद् व्यत्ययेन लटः शानच्। "अभ्यस्तानाम् आदिः" इति आद्युदात्तत्वम्॥। ईदृशोहम् उग्रस्य उद्गूर्णबलस्य दुष्प्रधर्षस्य वरुणस्य मन्योः क्रोधात् अनृतभाषणादिपापजनितात् जलोदररोगहेतुभूतात् इमम् जलोदररोगार्तं पुरुषम् उन्नयामि उद्गमयामि। रोगाद् उन्मोचयामीत्यर्थः॥

द्वितीया॥

नमस्ते राजन् वरुणास्तु मन्यवे विश्वं ह्युग्र निचिकेषि द्रुग्धम्।
सहस्रमन्यान् प्र सुवामि साकं शतं जीवाति शरदस्तवायम्॥ २॥

नमः। ते। राजन्। वरुण। अस्तु। मन्यवे। विश्वम्। हि। उग्र। निऽचिकेषि। द्रुग्धम्।
सहस्रम्। अन्यान्। प्र। सुवामि। साकम्। शतम्। जीवाति। शरदः।
तव। अयम्॥ २॥

हे राजन् द्योतमान वरुण ते तव मन्यवे क्रोधाय नमः नमस्कारः

---

1 S'Kd स्ववशनास्वा°. 2 S'Kd तीक्ष्णस्तोत्रा°.

अस्तु भवतु । सर्वत्र हिंसनस्य मन्युपूर्वकत्वाद् अत्र मन्योर्नमस्कार्यतया निर्देशः । यथा "नमस्ते रुद्र मन्यवे" [तै० सं० ४. ५. १. १] इति । ॥ "नमःस्वस्तिस्वाहा०" इति मन्युशब्दात् चतुर्थी ॥ ॥ तत्र हेतुम् आह । [हि यस्मात् कारणात् त्वं] हे उग्र उद्गूर्णबल वरुण विश्वम् कृत्स्नं द्रुग्धम् द्रोहम् । ॥ भावे क्तः ॥ । समस्तप्राणिकृतम् अपराधं निचिकेषि जानासि । अपराधज्ञानात् हि मन्युरुत्पद्यते अतः तदुत्पत्तिर्मा भूद् इति मन्योः अत्र नमस्कारः कृत इति द्रष्टव्यम् । यद्वा । उत्तरशेषोयम् । हे वरुण द्रुग्धम् द्रोहकर्तृ अपकारकम् । ॥ द्रुह जिघांसायाम् । कर्तरि क्तः । रधादित्वेन विकल्पितेट्त्वात् "यस्य विभाषा" इति इट्प्रतिषेधः । "वा द्रुहमुहष्णुहष्णिहाम्" इति हकारस्य धत्वम् । "झषस्तथोर्धोधः" इति निष्ठातकारस्य धत्वम् । प्रत्ययस्वरेण अन्तोदात्तता ॥ । ईदृशं विश्वम् प्राणिजातं हि यस्मात् निचिकेषि जानासि । ॥ कित ज्ञाने । अस्मात् लट् । जुहोत्यादित्वात् शपः श्लुः ॥ । तस्मात् कारणात् सहस्रम् सहस्रसंख्याकान् अन्यान् सापराधान् द्वेष्यान् जनान् साकम् सह । युगपदेव इत्यर्थः । प्र सुवामि प्रेरयामि । अस्य प्रतिनिधित्वेन प्रयच्छामीत्यर्थः । वरुणस्य सकाशात् प्रतिनिधिप्रदानेन आत्मनो निष्क्रयणम् ऐतरेयके समाम्नातम् । "ऋषेहं ते शतं ददाम्यहम् एषाम् एकेनात्मानं निष्क्रीणै" [ऐ० ब्रा० ७. १५] इति । ॥ षू प्रेरणे । तुदादित्वात् शः । तस्य ङित्त्वात् गुणप्रतिषेधे उवङ् । "तिङ्तिङः" इति निघातः ॥ । तस्मात् कारणात् अयम् व्याधिपीडितो जनः तव अनुग्रहात् शतं शरदः शतसंख्याकान् संवत्सरान् जीवाति जीवतु । सापराधान् अन्यान् अपरिमितान् जनान् स्वीकृत्य एनं नीरोगं कृत्वा शतसंवत्सरं जीवयेत्यर्थः । ॥ "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया । जीव प्राणधारणे इत्यस्मात् लेटि आडागमः ॥ ॥

तृतीया ॥

यदु॑वक्थानृ॒तं जि॒ह्वया॑ वृजि॒नं ब॒हु ।
राज्ञ॑स्त्वा सत्यध॒र्मणो मु॒ञ्चामि॑ वरु॒णादहम् ॥ ३ ॥

यत्। उवक्थं। अनृतम्। जिह्वया। वृजिनम्। बहु।
राज्ञः। त्वा। सत्यऽधर्मणः। मुञ्चामि। वरुणात्। अहम् ॥ ३ ॥

हे जलोदररोगग्रस्त पुरुष जिह्वया अभिवदनसाधनेन इन्द्रियेण यत् रोगनिदानभूतम् अनृतम् असत्यम् उवक्त उवक्थ। अयथार्थकथनं कृतवानसीत्यर्थः। वच् व्यक्तायां वाचि। "ब्रुवो वचिः" इति लिटि वच्यादेशः। "लिट्यभ्यासस्योभयेषाम्" इति अभ्यासस्य संप्रसारणम्। छान्दसो वर्णव्यत्ययः। अनृतस्य रोगहेतुत्वम् उपपादयन् विशिनष्टि। बहु अधिकं वृजिनम् पापम्। हेतुहेतुमतोरभेदेन सामानाधिकरण्यम्। अन्यस्मात् पापकर्मणः अधिकतरपापहेतुः अनृतवदनम् इत्यर्थः। वृजी वर्जने। तस्माद् औणादिक इनच् प्रत्ययः। "चितः" इति अन्तोदात्तत्वम्। अनृतस्य वृजिनरूपत्वं तैत्तिरीयकेपि आम्नातम्। "वृजिनम् अनृतं दुश्चरितम्। ऋजुकर्म सत्यं सुचरितम्" [तै०ब्रा०३.३.७.१०] इति। यस्माद् अनृतं पापरूपं तस्माद् रोगनिदानम् इत्यर्थः। उक्तं हि।

जन्मान्तरकृतं पापं व्याधिरूपेण जायते।
तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः। इति ॥

यद्यपि अनृतवदनरूपं पापं कृतवान् असि तथापि सत्यधर्मणः सत्यं धर्मो यस्यासौ सत्यधर्मा। "धर्माद् अनिच् केवलात्" इति अनिच् प्रत्ययः समासान्तः। सत्यभाषणस्वभावात्। विवक्षितविशेषणम् एतत्। यतोयं वरुणः सत्यधर्मा अतः असौ अनृतभाषणं न सहत इत्यर्थः। श्रूयते हि। "अनृते खलु वै क्रियमाणे वरुणो गृह्णाति" [तै०ब्रा०१.७.२.६] इति। ईदृशात् राज्ञः राजमानात् नियामकाद् वरुणात् हे रोगग्रस्त [अहं त्वा] त्वां मुञ्चामि मोचयामि। तस्माद् अनृतवदनसंभूतात् जलोदररूपाद् वरुणपाशात् मन्त्रप्रभावेन त्वां वियोजयामीत्यर्थः ॥ मुचॢ मोक्षणे। तुदादित्वात् शः। "शे मुचादीनाम्" इति नुम् ॥

चतुर्थी ॥

मुञ्चामि त्वा वैश्वानरादर्णवान्महतस्परि।

---

1 S′Kd ते for जायते.

सजातानुग्रेहा वद ब्रह्म चार्प चिकीहि नः ॥ ४ ॥

मुञ्चामि । त्वा । वैश्वानरात् । अर्णवात् । महतः । परि ।

सऽजातान् । उग्र । इह । आ । वद । ब्रह्म । च । अर्प । चिकीहि । नः ॥४॥

हे रोगग्रस्त त्वा त्वाम् । ॥ "त्वामौ द्वितीयायाः" इति युष्मदस्वादेशः । "अनुदात्तं सर्वम् अपादादौ" इति अनुवृत्तेः स च अनुदात्तः ॥ वैश्वानरात् विश्वनरहितात् महतः प्रभूताद् अर्णवात् । ॥ अर्ण इत्युदकनाम । तद् अस्मिन् बहुलम् अस्तीत्येतस्मिन् अर्थे "अर्णसो लोपश्च" इति वप्रत्ययः तत्संनियोगेन सकारलोपश्च ॥ । तथाविधात् समुद्रात् । अनेन च तदभिमानी देवो लक्ष्यते । समुद्राभिमानिनो वरुणात् मुञ्चामि । तत्कृतात् जलोदररोगाद् मुञ्चामीत्यर्थः । ॥ परिः पञ्चम्यर्थानुवादी ॥ ॥ यद्वा वैश्वानरः विश्वनरहितो जाठराग्निः तस्य आवरकत्वेन संबन्धी सोपि वैश्वानरः । ॥ "तस्येदम" इत्यण् ॥ । तथाविधात् महतः अधिकाद् दुश्चिकित्स्याद् अर्णवात् उदकसहितात् जलमयाद् रोगात् त्वां मुञ्चामि ॥ हे उग्र उज्जूर्णबल वरुण त्वमपि सजातान् सहचारिणः शिक्षकान् भटान् इह अस्मिन् पुरुषविषये आ वद आसमन्तात् कथय । यथा पुनःपुनरागत्य एनं पुरुषं न निघ्नन्ति तथा कथयेत्यर्थः ॥ तत्र हेतुम् आह । नः अस्मदीयं ब्रह्म हवीरूपम् अन्नम् । यद्वा । ब्रह्म अस्माभिः प्रयुज्यमानां मन्त्ररूपां स्तुतिम् अप । ॥ योग्यक्रियाध्याहारः ॥ । अपहाय । अनृतभाषणादिनिमित्तम् अपराधं विस्मृत्येत्यर्थः । चिकीहि जानीहि । अनुक्तसमुच्चयार्थश्चकारः । मदीयया स्तुत्या परितुष्टः सन् भयादि नाशयेत्यर्थः । ॥ चिकीहि । कित ज्ञाने । अस्मात् लोटि जुहोत्यादित्वात् शपः श्लुः । छान्दसो दीर्घः ॥ ॥

[इति] प्रथमकाण्डे द्वितीयेनुवाके चतुर्थं सूक्तम् ॥

"वषट् ते पूषन्" इति सूक्तेन गर्भिण्याः शिरसि संपाताभिहुतोष्णजलेन आस्रावनम् शालाग्रन्थिविमोचनम् योक्त्रबन्धनम् इत्येवमादीनि

---

1 Kd inserts वेदाह after ब्रह्म. We with S′. 2 S′ Kd उक्त° for अनुक्त°.

सुखप्रसवकर्माणि पुत्रजननविज्ञानकर्मान्तानि कुर्यात्। तत्र "वषट् ते पूषन्निति चतुर[1] उदपात्रे संपातान् आनय[2]ति" इत्यादि "पुंना[3]मधेये कुमारः" इत्येतदन्तं सूत्रं [कौ० ४. ९] द्रष्टव्यम् ॥

तत्र प्रथमा ॥

वषट् ते पूषन्नस्मिन्त्सूतावर्यमा होता कृणोतु वेधाः।
सिस्रतां नार्यृतप्रजाता वि पर्वाणि जिहतां सूतवा उ ॥ १ ॥
वषट्। ते। पूषन्। अस्मिन्। सूतौ। अर्यमा। होता। कृणोतु। वेधाः।
सिस्रताम्। नारीं। ऋतऽप्रजाता। वि। पर्वाणि। जिहताम्। सूतवै।
ॐ इति ॥ १ ॥

हे पूषन् सकलप्राणिजातस्य पोषक देव। "पूषापोषयत्" [तै० ब्रा० १. ६. २. २] इति श्रुतेः। ते तुभ्यम्। "नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च" इति चतुर्थी। "तेमयावेकवचनस्य" इति युष्मदस्ते आदेशः। "अनुदात्तं सर्वम् अपादादौ" इति अनुवृत्तेः स च अनुदात्तः। अस्मिन् सूतौ इदानीं संप्राप्ते[4] सुखप्रसवकर्मणि। षूङ् प्राणिप्रसवे इत्यस्मात् भावे क्तिन्। अस्मिन्निति। लिङ्गव्यत्ययः। होता देवानाम् आह्वाता ऋत्विक् अर्यमा प्राणिजातस्य प्रेरको देवः आदित्यः तदात्मको भूत्वा वषट् कृणोतु। वषट्कारेण हविः प्रयच्छतु ॥ तथा वेधाः धाता सकलजगतो निर्माता देवः ध्यानविशेषेण तदात्मकश्च भूत्वा वषट् कृणोतु ॥ यद्वा। अर्यमा वेधाश्च होता भूत्वा तुभ्यं वषट् कृणोतु। देवैरेव क्रियमाणम् इदं कर्म सुखप्रसवलक्षणं फलं दातुं शक्नोतीत्यर्थः। कृवि हिंसाकरणयोश्च। इदित्त्वात् नुम्। अस्मात् लोटि शपि प्राप्ते "धिन्विकृण्व्योर च" इति उप्रत्ययः तत्संनियोगेन धात्वन्तस्य अकारादेशश्च। "अतो लोपः" इति तस्य लोपे "अचः परस्मिन् पूर्वविधौ" इति स्थानिवद्भावेन ऋकारस्य उपधात्वविघातात् लघूपधगुणाभावः ॥ हविः-

---

1 S' Kd चतुरुद° for चतुर उद°, which we read with *Kaus'ika*. 2 So S' Kd. *Kaus'ika:* आनीय. 3 S' Kd °नामधेयः for °नामधेये, which is read by *Kaus'ika*. 4 S' संप्राप्त. We with Kd.

स्वीकारेण तुष्टस्य पूष्णः प्रसादात् नारी गर्भिणी स्त्री । ⧖"नृनर-योर्वृद्धिश्च" इति शार्ङ्गरवादिषु पाठात् ङीन् प्रत्ययः तत्संनियोगेन वृद्धि-श्च⧖ । ऋतप्रजाता सत्यप्रसवा जीवदपत्या सती सिस्रताम् प्रसवज-नितक्लेशाद् विनिःसृता भवतु । अक्लेशेन प्रसूता भवतु इत्यर्थः । ⧖सृ गतौ । अस्मात् लोटि व्यत्ययेन आत्मनेपदम् । जुहोत्यादित्वात् शपः श्लुः । "श्लौ" इति द्विर्वचनम् । "अर्तिपिपर्त्योश्च" । "बहुलं छन्दसि" इति अभ्यासस्य इत्त्वम् । "द्विविकरणा अपि धातवो भवन्ति" इति पुनरपि विकरणः शः । तस्य ङित्त्वाद् गुणाभावे यण् । "अभ्यस्तानाम् आदिः" इत्याद्युदात्तत्वम्⧖ ॥ उ अपि च सूतवै सुखप्रसवार्थम् । ⧖षूङ् प्राणिगर्भविमोचने । "कृत्यार्थे तवैकेन्केन्यत्वनः" इति भावे तवै प्रत्य-यः⧖ । यद्वा सूतवै प्रसवितुम् । ⧖"तुमर्थे सेसेन्°" इति तवैप्रत्ययः । "अन्तश्च तवै युगपत्" इति आद्यन्तयोर्यौगपद्येन उदात्तत्वम्⧖ । प-र्वाणि प्रसवनिरोधकाः संधि[2]बन्धाः वि जिहताम् विगच्छन्तु । विश्लथा भ-वन्तु इत्यर्थः । ⧖ओहाङ् गतौ । लोटि जुहोत्यादित्वात् शपः श्लुः । "श्लौ" इति द्विर्वचनम् । "भृञामित्" इति अभ्यासस्य इत्त्वम् । "श्ना-भ्यस्तयोरातः" इति आकारलोपः⧖ ॥

द्वितीया ॥

चतस्रो दिवः प्रदिशश्चतस्रो भूम्या उत ।
देवा गर्भं समैरयन् तं व्यूर्णुवन्तु सूतवे ॥ २ ॥

चतस्रः । दिवः । प्रऽदिशः । चतस्रः । भूम्याः । उत ।
देवाः । गर्भम् । सम् । ऐरयन् । तम् । वि । ऊर्णुवन्तु । सूतवे ॥ २ ॥

दिवः द्युलोकस्य संबन्धिन्यः याश्चतस्रः चतुःसंख्याकाः प्रदिशः प्रकृ-ष्टा दिशः प्राच्याद्याः प्रधानदिशः सन्ति । उत अपि च भूम्याः भू-लोकस्य याश्चतस्रः प्रदिशः सन्ति । ⧖चतुर्शब्दस्य जसि "त्रिचतुरोः

---

१ A समैरयंतं, changed to समैरयंतां ; B[h] D K V समैरयंतां. We with J R S[m].

---

1 S′ Kd तवेनिति for सेसेनिति. 2 S′ Kd संबंधाः.

स्त्रियां तिसृचतसृ" इति चतस्रादेशः। "अचि र ऋतः" इति रेफादेशः। त्रः संख्यायाः [फि० २. ५] इति चतुर्शब्द आद्युदात्तः। स्थानिवद्भावात् तदादेशोपि आद्युदात्त एव ॥ । ता दिग्देवताः देवाः इन्द्रादयश्च गर्भम् पूर्वं समैरयन् संगतम् अकुर्वन्। गर्भम् उदपादयन्नित्यर्थः। इदानीं ते[1] देवाः सूतवे प्रसवितुं गर्भाशयाद् विनिर्गन्तुं [तम्] उदरस्थं गर्भं व्यूर्णवन्तु विगताच्छादनं कुर्वन्तु। जरायोः सकाशाद् विमुक्तं कुर्वन्तु इत्यर्थः। ॥ ऊर्णुञ् आच्छादने। लोटि अदादित्वात् शपो लुक्। छान्दसो गुणः। विः उपसर्गः। उपसर्गाश्चाभिवर्जम् [फि० ४. १३] इति उदात्तः। यणादेशे "उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य" इति परऊकारः स्वर्यते ॥ ॥

तृतीया ॥

सूषा व्यूर्णोतु वि योनिं हापयामसि।
अथयां सूषणे त्वमव त्वं बिष्कले सृज ॥ ३ ॥

सूषा। वि। ऊर्णोतु। वि। योनिम्। हापयामसि।
अथयं। सूषणे। त्वम। अव। त्वम। विष्कले। सृज ॥ ३ ॥

सूषा सवित्री प्रजनयित्री देवता। ॥ षूङ् प्राणिगर्भविमोचने। अस्माद् औणादिकः क्सप्रत्ययः ॥ । यद्वा सूः सवनम् उत्पत्तिः। ॥ संपदादिलक्षणो भावे क्विप् ॥ । सुवं सनोति प्रयच्छतीति सूषा[3]। ॥ षणु दाने। "जनसनखनक्रमगमो विट्" इति विट् प्रत्ययः। "विड्वनोरनुनासिकस्यात्" इति आत्त्वम्। छान्दसः सुलोपः ॥ । यद्वा शोभना उषाः सूषा। ॥ "सुपां सुलुक्०" इति सोर्डादेशः। भसंज्ञाऽभावेपि डित्करणसामर्थ्यात् टिलोपः ॥ । एवंभूता देवता व्यूर्णोतु गर्भं विगतावरणं करोतु। जरायुबन्धनं विश्लेषयतु इत्यर्थः। ॥ ऊर्णुञ् आच्छादने। अस्मात् लोटि अदादित्वात् शपो लुक्। "ऊर्णोतेर्विभाषा" इति वृद्धिविकल्पनाद् गुणः ॥ ॥ वयमपि सुखप्रसवाय योनिम् गर्भनिर्गममार्गं वि हापयामसि विहापयामः। यथा

---

1 S′ Kd तदेवाः for ते देवाः. 2 S′ Kd विनिर्गतम्. 3 S′ Kd सूपाः.

गर्भः सुखेन निपतति तथा विवृतं कारयाम इत्यर्थः । ओहाङ् गतौ । अस्मात् णिच् । "अर्तिह्री०" इत्यादिना पुगागमः । "इदन्तो मसिः" ॥ हे सूषणे । सुवं सनोति प्रयच्छतीति सूषणिः सुखप्रसवकारिणी देवता । "छन्दसि वनसनरक्षिमथाम्" इति सनोतेः इन् प्रत्ययः । तस्याः संबोधनम् । त्वमपि मदीयेन अनेन सुखप्रसवकर्मणा प्रीता सती अथय योनिं विश्लेषय । यद्वा । अथय गर्भिण्याः संधिबन्धान् विमुञ्च । सार कृप अथ दौर्बल्ये । चुरादित्वात् स्वार्थिको णिच् । अदन्तत्वाद् उपधावृद्ध्यभावः ॥ तथा हे बिप्कले । बिप्क इत्यनुकरणशब्दः । तं लाति आदत्ते करोतीति बिप्कलिः सूतिमारुतः । ला आदाने । अस्माद् औणादिकः किप्रत्ययः । "आतो लोप इटि च" इति आकारलोपः । यद्वा । विट् व्याप्ता सती कलयति प्रेरयतीति विप्कला । विप्लृ व्याप्तौ । "क्विप् च" इति कर्तरि क्विप् । कल गतौ इत्यस्मात् पचाद्यच् । विट् चासौ कला चेति विप्कला । हे तथाविधे देवते त्वम् अव सृज गर्भम् अवाङ्मुखं प्रेरय । सृज विसर्गे । तुदादित्वात् शः ॥

चतुर्थी ॥

नेव मांसे न पीवसि नेव मज्जस्वाहतम् ।
अवैतु पृश्नि शेवलं शुने जराय्वत्तवेव जरायु पद्यताम् ॥ ४ ॥

नऽइव । मांसे । न । पीवसि । नऽइव । मज्जऽसु । आऽहतम् ।
अव । एतु । पृश्नि । शेवलम् । शुने । जरायु । अत्तवे । अव । जरायु ।
पद्यताम् ॥ ४ ॥

हे प्रसवित्रि त्वं मांसेन* उदरगतेन नेव पीवसि । इवशब्दो भिन्नक्रमः । मांसेनेव न पीवसि । यथा मांसेन शरीरगतेन स्थवीयसी भव-

---

१ $\overset{h}{B}$ न् corrected into न; $\overset{m}{S}$ न्. We with **A D R K V.** २ **A D R** $\overset{m}{S}$ **P** $\overset{2}{P}$ **J** पीव°. We with **K** $\overset{h}{B}$.

---

1 S′ Kd प्रसनोति. 2 S′ Kd गर्भिगर्भिण्याः. Is it meant for गर्भगर्भिण्योः?

सि न तथा अनेन जरायुणा। किंतु[1] तत् जरायु शल्यकल्पम्। ॥ पीव मीव णीव स्थौल्ये इति धातुः ॥ एतत्पतने शरीरबाधो नास्ति इत्याह। मज्जसु मज्जोपलक्षितेषु धातुषु एतत् जरायु आहतम् आबद्धं स्नाय्वादिकमिव न भवति। किंतु तदसंबद्धमेव[2] वर्तत इत्यर्थः॥ यद्वा हे जरायु त्वं मांसेन शरीरगतेन संबद्धं सत् नेव पीवसि। इवशब्दः अवधारणे। नैव प्रवृद्धं भवसि। तथा त्वं मज्जसु नेव आहतम् नैव संबद्धम् असि। तथा च निगमान्तरम्। "स्वित्[3]यवपद्यस्व न मांसेषु न स्नावसु न बद्धम् असि मज्जसु" इति॥ अतः कारणात् शेवलम् जलस्योपरि स्थितशैवालवत् आन्तरावयवासंबद्धं पृश्नि शुभ्रवर्णं तत् जरायु गर्भवेष्टनम् अवैतु। अवाक् पततु॥ तस्य मलवत्त्याज्यताम् आह। शुने अत्तवे। ॥ षष्ठ्यर्थे चतुर्थी। "श्वयुवमघोनाम् अतद्धिते" इति संप्रसारणम ॥। शुनो भक्षणाय। अव पततु इति संबन्धः। ॥ अद भक्षणे इत्यस्मात् "तुमर्थे सेसेन्०" इति तवेन्[4] प्रत्ययः ॥॥ आदरार्थं पुनस्तदेवाह। जरायु अव पद्यताम् अवाग् भूमौ निपततु। ॥ पद गतौ। दिवादित्वात् श्यन्। नित्त्वाद् आद्युदात्तत्वे प्राप्ते "तिङ्तिङः" इति निघातः ॥॥

पञ्चमी॥

वि ते भिनद्मि मेहनं वि योनिं वि गवीनिके।
वि मातरं च पुत्रं च वि कुमारं जरायुणावं जरायुं पद्यताम्॥ ५॥

वि। ते। भिनद्मि। मेहनम्। वि। योनिम्। वि। गवीनिके इति।
वि। मातरम्। च। पुत्रम्। च। वि। कुमारम्। जरायुणा। अवं। जरायुं। पद्यताम्॥ ५॥

हे गर्भिणि ते तव मेहनम् मूत्रावसेकद्वारं वि भिनद्मि विदारयामि। ॥ भिदिर् विदारणे। रुधादित्वात् श्नम् प्रत्ययः ॥॥ न केवलं मेहनम् अपि तु तदाधारभूतां योनिं वि भिनद्मि शिशुनिर्गम-

---

1 S′Kd किंतेतज्जरायु, which we conjecturally emend. 2 S′Kd तसंबंधमेव. 3 So S′Kd. I have not been able to verify the quotation. 4 S′Kd तवेङ्.

नयोग्यां करोमि ॥ तथा गवीनिके योनेः पार्श्ववर्तिन्यौ निर्गमनप्रतिबन्धिके नाड्यौ वि भिनद्मि ॥ मेहनादिविभेदनस्य प्रयोजनं दर्शयति वि मातरम् इति । मातरम् जननीं पुत्रम् । पुंनाम्नो नरकात् त्रायत इति पुत्रः । पुरु बहुलं त्रायत इति [वा] पुत्रः । तद् उक्तं यास्केन । पुत्रः पुरु त्रायते निपरणाद्वा पुं नरकं ततस्त्रायत इति वा [नि० २, ११] इति । परस्परसमुच्चयार्थौ चकारौ । तौ उभौ वि भिनद्मि विश्लेषयामि । गर्भाशयात् पुत्रं निर्गमयामीत्यर्थः ॥ तथा जरायुणा उल्बेन कुमारम् पुत्रं वि भिनद्मि । जरायुकुमारावपि परस्परं विश्लिष्टौ करोमीत्यर्थः । अनन्तरं जराय्वपि उदरस्थम् उल्बम् अव पद्यताम् अवपतनु ॥

षष्ठी ॥

यथा वातो यथा मनो यथा पतन्ति पक्षिणः ।
एवा त्वं दशमास्य साकं जरायुणा पतावं जरायु पद्यताम् ॥ ६ ॥

यथा । वातः । यथा । मनः । यथा । पतन्ति । पक्षिणः ।
एव । त्वम् । दशऽमास्य । साकम् । जरायुणा । पत । अव । जरायु ।
पद्यताम् ॥ ६ ॥

गर्भस्य अविलम्बेन निर्गमनं दृष्टान्तैः समर्थयते । यथा येन प्रकारेण वातः वायुः शीघ्रं गच्छति । यथा वा मनः ज्ञानसाधनम् अन्तःकरणम् अप्रतिबन्धं सत् शीघ्रतरं गच्छति । यथा वा पक्षिणः विहगाः सशरीरा अपि अप्रतिबद्धगतयः सन्तः [पतन्ति] आकाशे उड्डीयन्ते । पत्लृ गतौ । लटि "कर्तरि शप्" इति शप् । "तास्यनुदात्तेन्ङिददुपदेशात्०" इति लसार्वधातुकस्य अनुदात्तत्वम् । शपश्च पित्त्वाद् अनुदात्तत्वम् । धातुस्वरेण आदिरुदात्तः । "तिङ्ङतिङः" इति निघातस्य "यावद्यथाभ्याम्" इति प्रतिषेधः । एव एवम् । "निपातस्य च" इति सांहितिको दीर्घः । हे दशमास्य दशसु मासेषु मात्रा पोषित शिशो । दश मासान् भृत इति विगृह्य "तद्धितार्थोत्तरपदसमाहारे च" इति तद्धितार्थे विषयभूते समासः । "संख्यापूर्वो द्विगुः" इति द्विगुसंज्ञायां "द्विगो-

1 S′Kd तदि for तथा.

र्यप्" इति भरणार्थे यप्। "आमन्त्रितस्य च" इति आष्टमिकं सर्वानुदात्तत्वम्। एवंभूत शिशो त्वं जरायुणा गर्भवेष्टनेन साकम् सह पत गर्भाशयात् शीघ्रं निर्गच्छ॥ "सहयुक्तेऽप्रधाने" इति सहार्थेन साकंशब्देन योगे जरायुणा इति अप्राधान्ये तृतीया॥ अप्राधान्येनोक्तं जरायुपतनं प्राधान्येनापि निर्दिशति अव जरायु पद्यतामिति। व्याख्यातम्॥

इति प्रथमकाण्डे द्वितीयेनुवाके पञ्चमं सूक्तम्॥

इति द्वितीयोनुवाकः समाप्तः॥

तृतीयेनुवाके पञ्च सूक्तानि। तत्र "जरायुजः" इत्येतत् प्रथमं सूक्तम्। तस्य वातपित्तश्लेष्मविकारजेषु रोगेषु यथोचितमेदोमधुसर्पिस्तैलपायनादिकर्मसु विनियोगः। "जरायुज इति मेदो मधु सर्पिस्तैलं पाययति" इत्यादि सूत्रम् [कौ० ४. २]॥

तथा दुर्दिननिवारणे अतिवृष्टेर्निवारणे च "जरायुज इति दुर्दिनम् आयन् प्रत्युत्तिष्ठत्यन्वृचम" [कौ० ५. २] इत्यादिसूत्रोक्तानि सूर्योपस्थानोदकप्रक्षेपादीनि कर्माणि अनेन सूक्तेन कुर्यात्॥

अस्य "मुञ्च शीर्षक्त्याः" इति तृतीयया ऋचा सर्वेषु व्याधिषु संपाताभिमन्त्रणसंस्कृतेन उदकघटेन व्याधितम् अभिषिञ्चेत्। "मुञ्चेत्यात्मावयति" इति [कौ० ४. ३] सूत्रात्॥

तत्र प्रथमा॥

जरायुजः प्रथम उस्रियो वृषा वातभ्रजा स्तनयन्नेति वृष्ट्या।
स नो मृडाति तन्वे ऋजुगो रुजन् य एकमोजस्त्रेधा विचक्रमे॥ १॥

जरायुऽजः। प्रथमः। उस्रियः। वृषा। वातऽभ्रजाः। स्तनयन्। एति। वृष्ट्या। सः। नः। मृडाति। तन्वे। ऋजुऽगः। रुजन्। यः। एकम्। ओजः। त्रेधा। विऽचक्रमे॥ १॥

जरायुजः जरायोः सकाशाद् उत्पन्नः। अदितिपुत्रत्वात् जरायुजत्व-

---

१ K V वातंवजा. We with A B[h] D K S[m] P P[2] J.

म् । श्रूयते हि । "अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनम्[1] "अपचत् । तस्या उच्छेषणम् अददुः । तत् प्राश्नात् । सा रेतोऽधत्त । "तस्यै चत्वार आदित्या अजायन्त" [तै० सं० ६. ५. ६. १] इति । यद्वा । दिवि जरायुस्थानानि नक्षत्राणि अभिभूय उद्भूतत्वात् जरायुजः । आम्नायते हि । "द्यौर्वशा स्तनयित्नुर्गर्भौ नक्षत्राणि जरायु सूर्यो वत्सो वृष्टिः पीयूषः" इति । ॥ जनी प्रादुर्भावे । अस्मात् "पञ्चम्याम् अजातौ" इति डप्रत्ययः । "टेः" इति टिलोपः । प्रत्ययस्वरेण अन्तोदात्तत्वम् ॥ । प्रथमः सर्वस्मात् जगतः पूर्वम् उद्भूतः । उस्रियः । उस्राः किरणाः । वसन्ति निवसन्ति एभिर्जना इति व्युत्पत्तेः । ॥ वस निवासे इत्यस्मात् स्फायितञ्चीत्यादिना [उ० २. १३] रक् प्रत्ययः । "वचिस्वपि०" इत्यादिना संप्रसारणम् ॥ । ते अस्य सन्तीत्युस्रियः । ॥ मत्वर्थीयो घः ॥ । वृषा वर्षप्रदः सूर्यः । ॥ वृष सेचने । कनिन् युवृषितक्षीत्यादिना [उ० १. १५४] कनिन् प्रत्ययः ॥ । वातव्रजाः वातवत् शीघ्रं व्रजति गच्छतीति वातव्रजाः । ॥ व्रज गतौ । अस्माद् असुन् प्रत्ययः ॥ । यद्वा वातानां व्रजः समूहो यस्यासौ वातव्रजाः । प्रयाणसमये[2] बहुतरवायुयुक्तत्वात् । ॥ "सुपां सुपो भवन्ति" इति सोर्जसादेशः ॥ । ईदृशः सूर्यः स्तनयन् मेघान् गर्जयन् वृष्ट्या महत्तरेण प्रवर्षणेन सह एति आगच्छति । ॥ स्तनयन्[3] इति । स्तन देवशब्दे । चुरादिः अदन्तोयम् ॥ । श्रूयते हि । "यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेथ वर्षति" [तै० सं० २. ४. १०. २] इति ।

अग्नौ प्रास्ताहुतिः सम्यग् आदित्यम् उपतिष्ठते ।
आदित्याज्जायते वृष्टिः [म० स्मृ० ३. ७६] ॥

इति स्मृतेश्च ॥ सः आदित्यः नः अस्माकं तन्वे तनूं शरीरम् । ॥ क्रियाग्रहणं कर्तव्यम् इति कर्मणः संप्रदानत्वात् चतुर्थी ॥ । मृडाति मृडयतु । ॥ मृडाति[4] । मृड सुखने । अस्मात् लेटि आडागमः ॥ । किं

---

1 S′ Kd ब्रह्मोदन°. 2 S′ Kd प्रवाण°. 3 S′ Kd स्तनयान्. 4 S′ Kd मृडयतु.

कुर्वन्। रुजन् त्रिदोषजनितरोगादिकं भञ्जन् निवर्तयन्। ⧖ रुजो भङ्गे। तुदादित्वात् शः ⧖। तमेव आदित्यं विशिनष्टि। ऋजुगः ऋजु अकुटिलं गच्छतीति ऋजुगः। ⧖ "डोन्यत्रापि दृश्यते" इति गमेर्डप्रत्ययः ⧖। यः सूर्यः एकम् अभिन्नम् ओजः आत्मीयं तेजः त्रेधा त्रिप्रकारेण अग्निवायुसूर्यात्मना विचक्रमे विविधम् आक्रान्तवान्। पृथिव्यादिलोकत्रयम् आक्रम्य अधिपतित्वेन स्थितवान् इत्यर्थः। स सूर्यः मृडातीति पूर्वेण संबन्धः। ⧖ क्रमु पादविक्षेपे। "वेः पादविहरणे" इति आत्मनेपदम् ⧖। यद्वा। यः सूर्यः एकमेव स्वकीयम् ओजः तेजः त्रेधा त्रिप्रकारेण वाय्वग्निचन्द्रात्मना विचक्रमे कृत्स्नशरीराणि आक्रम्य वर्तते। वातपित्तश्लेष्मलक्षणदोषत्रयकारिदेवतात्मना सर्वत्र अयमेव वर्तत इत्यर्थः॥ अतः सूर्यप्रार्थनया दोषत्रयोद्भूतस्य रोगजातस्य निवृत्तिरुपपन्ना॥

द्वितीया॥

अङ्गेऽअङ्गे शोचिषा शिश्रियाणं नमस्यन्तस्त्वा हविषा विधेम।
अङ्कान्त्समङ्कान् हविषा विधेम यो अग्रभीत् पर्वास्या ग्रभीता॥ २॥

अङ्गेऽअङ्गे। शोचिषा। शिश्रियाणम्। नमस्यन्तः। त्वा। हविषा। विधेम। अङ्कान्। समऽअङ्कान्। हविषा। विधेम। यः। अग्रभीत्। पर्वं। अस्य। ग्रभीता॥ २॥

अङ्गेअङ्गे सर्वेष्वङ्गेषु। ⧖ "नित्यवीप्सयोः" इति द्विर्वचनम। "अङ्ग इत्यादौ च" इति प्रकृतिभावात् "एङः पदान्तादति" इति पूर्वरूपत्वाभावः। "तस्य परम् आम्रेडितम्"। "अनुदात्तं च" इति परस्य अङ्गशब्दस्य अनुदात्तत्वम् ⧖। सर्वप्राणिशरीरेषु शोचिषा दीप्त्या शिश्रियाणम् व्याप्य वर्तमानम्। प्राणात्मना व्याप्य वर्तमानम् इत्यर्थः। श्रूयते हि। "प्राणः प्रजानाम् उदयत्येष सूर्यः" [प्र० उ० १. ८] इति। ⧖ श्रिञ् सेवायाम्। अस्मात् "छन्दसि लिट्" इति वर्तमाने लिट्। "लिटः कानज्वा" इति तस्य कानजादेशः। "अचि श्नुधातु०" इत्यादिना इयङादेशः। "चितः" इति अन्तोदात्तत्वम्। न च "अभ्यस्तानामादिः" इति आद्युदात्तत्वं शङ्क-

1 S' Kd मृळात्विति.

नीयम् । तस्य सार्वधातुकविषयत्वात् । हे सूर्य ईदृशं त्वा त्वा नमस्यन्तः नमः कुर्वन्तः । स्तुतिनमस्कारादिभिः पूजयन्त इत्यर्थः । हविषा चर्वाज्यसमिदादिना विधेम परिचरेम । विधतिः परिचरणकर्मा । विध विधाने । तुदादित्वात् शः । शस्य ङित्त्वात् लघूपधगुणाभावः । नमस्यन्त इति । "नमोवरिवश्चित्रङः क्यच्" इत्यत्र "नमसः पूजायाम्" इति विशेषितत्वात् पूजार्थे क्यच् । "नः क्ये" इति पदसंज्ञाया नियमितत्वात् अत्र पदसंज्ञाया अभावेन रुत्वाद्यभावः । तदन्तात् लटः शत्रादेशः । शपः पित्त्वाद् अनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण । अतः चित्स्वरेण क्यजन्तस्य अन्तोदात्तत्त्वे शवकारेण सह एकादेशस्यापि "एकादेश उदात्तेनोदात्तः" इति उदात्तत्वम् । तथा अङ्कान् अञ्चनशीलान् गमनशीलान् सूर्यस्य अनुचरान् समङ्कान् समञ्चनशीलान् समीपे वर्तमानान् अन्तरङ्गानपि परिवारभूतान् देवान् हविषा विधेम परिचरेम । अञ्चु गतिपूजनयोः । अस्मात् "हलश्च" इति कर्तरि बाहुलकाद् घञ् । "चजोः कु घिण्ण्यतोः" इति कुत्वम् ॥ हविःप्रदानस्य प्रयोजनम् आह यो अग्रभीदिति । ग्रभीता ग्रहीता ग्राहको[1] यः ज्वरादिरूपो रोगः अस्य पुरुषस्य पर्व पर्वाणि शरीरावयवसंधीन् अग्रभीत् अग्रहीत् । व्याप्य बाधत इत्यर्थः । तस्य रोगजातस्य निवृत्तये हविषा विधेमेति पूर्वेण संबन्धः । ग्रह उपादाने । अस्मात् लुङि "ह्लेः सिच्" । "अतो हलादेः०" इति माङ्माया वृद्धेः "ह्यन्तक्षण०" इति प्रतिषेधः । "हृग्रहोर्भश्छन्दसि" इति भत्वम् । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ॥

तृतीया ॥

मुञ्च शीर्षक्त्या उत कास एनं परुष्परुराविवेशा यो अस्य ।
यो अभ्रजा वातजा यश्च शुष्मो वनस्पतींस्तत्सचतां पर्वतांश्च ॥ ३ ॥

मुञ्च । शीर्षक्त्याः । उत । कासः । एनम् । परुःऽपरुः । आऽविवेश । यः । अस्य ।
यः । अभ्रऽजाः । वातऽजाः । यः । च । शुष्मः । वनस्पतीन् । सचताम् । पर्वतान् । च ॥ ३ ॥

---

1 S' Kd ग्रहको.

हे सूर्य शीर्षक्त्याः शीर्षं शिरः अञ्चति गच्छति व्याप्य बाधत इति शीर्षक्तिः शिरोरोगः । तस्मात् सकाशाद् एनं पुरुषं मुञ्च मोचय । शिरोरोगं निवर्तयेत्यर्थः । उत अपि च यः कासः हृत्कण्ठमध्यवर्ती प्रसिद्धः श्लेष्मरोगविशेषः एनं पुरुषम् आविवेश प्रविष्टवान् । प्रवेशन-प्रकारमेव आह । अस्य पुरुषस्य [1]परुःपरुः सर्वान् संधि[2]बन्धान् आ-विवेश । ☒ विश प्रवेशने । अस्मात् लिट् ☒ । तथाविधात् कासरोगाद् एनं मोचयेति पूर्वेण संबन्धः । इदानीं वातपित्तश्लेष्मविका-रजनितानां सर्वेषामपि व्याधीनाम् अस्मात् पुरुषाद् अन्यत्रावस्थानं प्रा-र्थयते यो अभ्रजा इति । यो रोगः अभ्रजाः । अपो बिभर्तीत्यभ्रं प्र-वर्षको मेघसंघः तस्मात् जायते प्रवर्षणोदकसंसर्गेण उत्पद्यत इति अभ्रजाः श्लेष्मरोगः । ☒ "जनसनखनक्रमगमो विट्" इति विट् प्रत्ययः । "वि-ड्वनोरनुनासिकस्यात्" इति आत्त्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् ☒ । त-था यो वातजाः वातात् कौष्ठ्यात् वायोर्जात उत्पन्नो रोगः यश्च शुष्मः शोषकः पित्तविकारजनितो ज्वरादिरोगोस्ति दोषत्रयोद्भूतः स सर्वोपि रो-गः एनं पुरुषं विहाय वनस्पतीन् काननस्थान् वृक्षान् पर्वतांश्च मनुष्य-संचाररहितान् शिलोच्चयांश्च सचतां समवैतु । आश्रयतु इत्यर्थः । ☒ ष-च समवाये । शुष्म इति । शुष शोषणे । अस्मात् अविसिविसिशुषि-भ्यः कित् [उ० १. १४१] इति मन् प्रत्ययः । तस्य किद्वद्भावात् ल-घूपधगुणाभावः । नित्स्वरेण आद्युदात्तत्वम् । वनस्पतीन् इति । वनानां पतिः वनस्पतिः । "पारस्करप्रभृतीनि च संज्ञायाम्" इति सुडागमः । "उभे वनस्पत्यादिषु युगपत्" इति उभयपदप्रकृतिस्वरत्वम् ☒ ॥

चतुर्थी ॥

शं मे॑ पर॑स्मै गात्रा॑य शम॒स्त्ववरा॑य मे ।
शं मे॑ चतु॒र्भ्यो॑ अङ्गे॑भ्यः शम॑स्तु त॒न्वे॒३॒ मम॑ ॥ ४ ॥
शम् । मे॒ । पर॑स्मै । गात्रा॑य । शम् । अ॒स्तु॒ । अव॑राय । मे॒ ।
शम् । मे॒ । चतुः॑ऽभ्यः । अङ्गे॑भ्यः । शम् । अ॒स्तु॒ । त॒न्वे॑ । मम॑ ॥ ४ ॥

1 S' Kd पुरुःपुरुः. 2 S' Kd संवंधान् for संधिवन्धान्.

अधुना रोगार्तः स्वस्य आरोग्यं स्वयमेव आशास्ते । मे मम परस्मै परस्ताद् उपरि वर्तमानाय शिरोरूपाय गात्राय शरीरावयवाय शम् तत्र-त्यरोगशमनेन सुखम् अस्तु भवतु । तथा मे मम अवराय अवस्ताद् वर्तमानाय चरणलक्षणाय अङ्गाय शम् सुखम् अस्तु भवतु । तथा मे मम चतुर्भ्यः द्वौ पादौ द्वौ हस्तौ इति चत्वारि । तेभ्यः अङ्गेभ्यः अवयवेभ्यः शम् सुखम् अस्तु । ⁂ "झल्युपोत्तमम्" इति भ्यसः पूर्वस्य अचः उ-दात्तत्वम् ⁂ । तथा मे मम तन्वे मध्यशरीराय सर्वसमष्टिरूपाय शरी-राय वा शम् सुखम् अस्तु भवतु । ⁂ तनुशब्दाद् "ऊङ् उतः" इति ऊङ् प्रत्ययः । ततश्चतुर्थ्येकवचने यण् । "उदात्तयणो हल्पूर्वात्" इति प्राप्तस्य विभक्त्युदात्तत्वस्य "नोङ्धात्वोः" इति प्रतिषेधः । "उदात्तस्वरि-तयोर्यणः स्वरितोऽनुदात्तस्य" इति विभक्तेः स्वरितत्वम् । "युष्मदस्मदो-र्ङसि" इति ममशब्द आद्युदात्तः ⁂ ॥

[इति] तृतीयेनुवाके प्रथमं सूक्तम् ॥

"नमस्ते अस्तु विद्युते" इति सूक्तम् अशनिनिवारणकर्मणि अश-न्युपस्थानादौ सोमदर्भकुष्ठलोष्ठमञ्जिष्ठादिद्रव्याणां गृहक्षेत्रादिषु निखनने च विनियुक्तम् । उक्तं संहिताविधौ । "नमस्ते अस्तु[१.१३] यस्ते पृथु "स्तनयित्नुः[७.११] इत्यशनियुक्तम्[2] उपादाय प्रथमस्य सोमदर्भ०" इत्यादि [कौ० ५.२] ॥

तथा उपाकर्मणि अनेन सूक्तेन आज्यं जुहुयात् । सूत्रितं च । "अ-भिजिति शिष्यान्" इत्युपक्रम्य[3] "नमस्ते अस्तु विद्युते [१.१३] आरे-सावस्मदस्तु" [१.२६] इति [कौ०१४.३] ॥

तत्र प्रथमा ॥

नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे ।
नमस्ते अस्त्वश्मने येना दूडाशे अस्यसि ॥ १ ॥
नमः । ते । अस्तु । विऽद्युते । नमः । ते । स्तनयित्नवे ।
नमः । ते । अस्तु । अश्मने । येन । दुःऽदाशे । अस्यसि ॥ १ ॥

---

1 S′ Kd अरण° for चरण°. 2 S′ Kd अशनियुक्त°. We with *Dârila*. 3 S′ Kd om. इति

हे पर्जन्य ते तव संबन्धिन्यै विद्युते विद्योतमानायै सौदामिन्यै नमः अस्तु मया क्रियमाणो नमस्कारो भवतु । यद्वा । नम इत्यन्ननाम । मया हूयमानं हविर्लक्षणम् अन्नं भवतु । "नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च" इति चतुर्थी । द्युत दीप्तौ । अस्माद् विपूर्वात् "क्विप् च" इति क्विप् ॥ तथा ते तव संबन्धिने स्तनयित्नवे स्तनितं ध्वनिं कुर्वते अशनये नमः अस्तु । स्तन देवशब्दे । अस्मात् चुरादित्वात् णिच् । अदन्तत्वाद् उपधावृद्ध्यभावः । स्तनिहृषिपुषिगदिमदिभ्योणेरित्नुच् [उ० ३. २९] इति ण्यन्ताद्धातोः इत्नुच् प्रत्ययः । "अयामन्ताल्वाय्येत्न्विष्णुषु" इति णेरयादेशः ॥ तथा ते तव संबन्धिने अश्मने । मेघनामैतत् । व्यापनशीलाय मेघाय नमः अस्तु भवतु ॥ कुतो हेतोर्नमस्कार इत्यत आह येनेति । येन कारणेन दूडाशे दुःखेन दाश्यते दाप्यते इति दूडाशो लुब्धः । स्तुतिनमस्कारहविरादीनाम् अप्रदातेत्यर्थः । दाशृ दाने । अस्माद् अन्तर्भावितण्यर्थात् कर्मणि घञि "दुरो दाशनाशदभध्येष्विति वक्तव्यम्" इति दुरो रेफस्य उत्वम् उत्तरपदादेः ष्टुत्वं च । तादृशे पुरुषे अस्यसि क्षिपसि अशनिं प्रक्षिपसि । अतो हेतोः अशनिभयनिवृत्तये नमस्करोमीत्यर्थः । असु क्षेपणे । "दिवादिभ्यः श्यन्" इति श्यन् प्रत्ययः । "श्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम् । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ॥

द्वितीया ॥

नमस्ते प्रवतो नपाद् यतस्तपः समूहसि ।
मृडया नस्तनूभ्यो मयस्तोकेभ्यस्कृधि ॥ २ ॥

नमः । ते । प्रऽवतः । नपात् । यतः । तपः । सम्ऽऊहसि ।
मृडय । नः । तनूभ्यः । मयः । तोकेभ्यः । कृधि ॥ २ ॥

न केवलं विद्युदादिभ्यो नमस्कारः अपि तु पर्जन्यस्यापि नमस्कारः क्रियते । हे प्रवतो नपात् प्रवतः प्रगतस्य स्वस्मात् प्रच्युतस्य त्वद्विषयस्तुतिनमस्काराद्यकर्तुः पुरुषस्य नपात् न पातः न पालक । असेवकस्य

अशनिभयप्रदातरित्यर्थः । ॥ "उपसर्गाच्छन्दसि धात्वर्थे" इति प्रशब्दाद् गम्यर्थे अभिधेये वतिप्रत्ययः । ननु "वत्यन्ताश्च" इति अव्ययसंज्ञायां कथं लिङ्गसंख्याभ्यां योगः । उच्यते । उपसर्गाच्छन्दसि धातौ इत्येव उच्यमानेपि धातोः अभिधेयत्वासंभवेन सामर्थ्यात् धात्वर्थः सेत्स्यति । तथापि क्रियमाणम् अर्थग्रहणम् एतत् ज्ञापयति ससाधने धात्वर्थे अभिधेये उपसर्गाद् वतिर्भवतीति । तथा च साधनस्य लिङ्गसंख्यायोगित्वात् तदभिधायिनो वत्यन्तस्यापि लिङ्गसंख्यायोगित्वेन अनव्ययत्वम् । आह च महाभाष्यकारः । कः पुनर्धात्वनुकृतोर्थ इति । साधनम् । साधने भवन् लिङ्गसंख्याभ्यां योज्यत इति । पा रक्षणे । पातीति पात् । अस्मात् लटः शत्रादेशः । नञ्समासे "नलोपो नञः" इति नलोपे प्राप्ते "नभ्राण्नपात्०" इति नञः प्रकृतिभावः । "सुबामन्त्रिते पराङ्गवत् स्वरे" इति षष्ठ्यन्तस्य पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य आष्टमिकं सर्वानुदात्तत्वम ॥ । यद्वा । प्रवतः प्रगतस्य भुवः सकाशात् प्रचण्डैः सूर्यकिरणैरुद्धृतस्य उदकस्य नपात् न पातयितः । अकाले उदकं यथा अधो न पतति तथा उपरिष्टात् मेघमण्डले धारयितरित्यर्थः । ॥ पातयतेः क्विप् ॥ । हे ईदृश पर्जन्य ते तुभ्यं नमः नमस्कारः भवतु ॥ तस्य नमस्कार्यत्वम् आह । यतः यस्मात् कारणात् तपः पातकदाहकं तेजः समूहसि संहतं करोषि । अशनिरूपेण प्रक्षिपसीत्यर्थः । ॥ ऊह वितर्के । अत्र उपसर्गवशात् संधीकरणम् अर्थः ॥ ॥ हे पर्जन्य नः अस्माकं तनूभ्यः शरीरेभ्यः । ॥ तादर्थ्ये चतुर्थी ॥ । मृडय । अशनिनिवारणेन शरीरस्य सुखं जनयेत्यर्थः ॥ तथा तोकेभ्यः । अपत्यनामैतत् । अस्माकम् अपत्येभ्यः पुत्रपौत्रादिरूपेभ्यः मयः । सुखनामैतत् । सुखं कृधि कुरु । नमस्कारादिना प्रीतः सन् अशनिम् अस्मदीयेभ्यः सर्वेभ्यो निवारयेत्यर्थः । ॥ करोतेर्लोटि "सेर्ह्यपिच्च" इति हिरादेशः । "बहुलं छन्दसि" इति विकरणस्य लुक् । "श्रुशृणुपृकृवृभ्यश्छन्दसि" इति हेर्धिरादेशः । "कःकरत्करतिकृधिकृतेष्वनदितेः" इति विसर्जनीयस्य सत्वम ॥ ॥

---

1 S/Kd उपशब्दा°.

तृतीया ॥

प्रवतो नपान्नम एवास्तु तुभ्यं नमस्ते हेतये तपुषे च कृण्मः ।
विद्म ते धाम परमं गुहा यत् समुद्रे अन्तर्निहितासि नाभिः ॥ ३ ॥

प्रऽवतः । नपात् । नमः । एव । अस्तु । तुभ्यम् । नमः । ते । हेतये । तपुषे ।
च । कृण्मः ।
विद्म । ते । धाम । परमम् । गुहा । यत् । समुद्रे । अन्तः । निऽहिता । अ-
सि । नाभिः ॥ ३ ॥

हे प्रवतो नपात् । व्याख्यातम् एतत् । स्वरे तु विशेषः । पादादित्वात् षष्ठ्यामन्त्रितसमुदायस्य "आमन्त्रितस्य च" इति षाष्ठिकम् आद्युदात्तत्वम् । हे पर्जन्य तुभ्यं नम एव नमस्कार एव अस्तु भवतु । तदतिरिक्तं परिचरणं न कर्तुं प्रभवाम इत्यर्थः ॥ तथा ते तव हेतये हन्त्यनेनेति हेतिः आयुधम् । "ऊतियूतिजूतिसातिहेतिकीर्तयश्च" इति हन्तेः क्तिनि अन्तोदात्तो निपात्यते । तामेव विशिनष्टि । तपुषे तापकारिण्यै । तप संतापे । अर्तिपृवपियजितनिधनितपित्रपिभ्यो नित् [उ० २. ११६] इति उस् प्रत्ययः । तस्य निद्वद्भावाद् आद्युदात्तत्वम् । संतापकारिणे अशनिरूपाय आयुधाय च नमः कृण्मः कुर्मः । कृवि हिंसाकरणयोश्च । अस्मात् लटि "धिन्विकृण्व्योर च" इति उप्रत्ययः अकारश्चान्तादेशः । तस्य "अतो लोपः" इति लोपे सति "अचः परस्मिन् पूर्वविधौ" इति स्थानिवद्भावात् लघूपधगुणाभावः । "लोपश्चास्यान्यतरस्यां म्वोः" इति अङ्गान्तस्य उकारस्य लोपः ॥ पर्जन्यस्य निवासस्थानापरिज्ञाने नमस्कारायोगम् आशङ्क्य तदपि जानीम इत्याह । हे पर्जन्य ते तव संबन्धि गुहा गुहायाम् । "सुपां सुलुक्०" इति सप्तम्या लुक् । गुहावत् परैरगम्ये प्रदेशविशेषे परमम् उत्कृष्टं यत् प्रसिद्धं धाम निवासस्थानं तद् विद्म वयं जानीमः । विद ज्ञाने । "विदो लटो वा" इति मसो मादेशः । किं पुनस्तद् इत्याह । समुद्रे । अन्तरिक्षनामैतत् । समुद्रवन्ति अस्माद् उदकानि इति समुद्रः । आह च यास्कः । समुद्रः कस्मात् । समुद्रवन्त्यस्मादापः

समभिद्रवन्त्येनमापः संमोदन्तेसिन् भूतानि समुदको भवति समुनत्तीति वा [नि० २. १०] इति ॥ ईदृशे अन्तरिक्षे अन्तः मध्ये नाभिः । यथा देहमध्ये नाभिचक्रे सर्वा नाड्यो बद्धा भवन्ति तथा पर्जन्ये कृत्स्नं मेघमण्डलं बद्धं वर्तत इति नाभित्वव्यपदेशः । हे पर्जन्य त्वं तत्र निहिता स्थापिता नाभिः असि भवसि । नाभिचक्रवत् कृत्स्नस्य मेघमण्डलस्य धारकत्वेन अन्तरिक्षमध्ये अवस्थितो भवसीत्यर्थः । ॥ निपूर्वात् धाञः कर्मणि निष्ठा । "दधातेर्हिः" इति हिरादेशः । "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम् । नाभ्यपेक्षया स्त्रीलिङ्गता । णह बन्धने । नहो भश्च [उ० ४. १२५] इति इञ्प्रत्ययान्त आद्युदात्तो नाभिशब्दः ॥ ॥

चतुर्थी ॥

यां त्वा देवा असृजन्त विश्व इषुं कृण्वाना असनाय धृष्णुम् ।
सा नो मृड विदथे गृणाना तस्यै ते नमो अस्तु देवि ॥ ४ ॥

याम् । त्वा । देवाः । असृजन्त । विश्वे । इषुम् । कृण्वानाः । असनाय । धृष्णुम् ।
सा । नः । मृड । विदथे । गृणाना । तस्यै । ते । नमः । अस्तु । देवि ॥४॥

पूर्वत्र पर्जन्यस्य प्राधान्येन प्रार्थना कृता । अधुना अशनिमेव प्राधान्येन प्रार्थयते । हे अशने [यां] त्वा त्वां विश्वे सर्वे देवाः दानादिगुणयुक्ता इन्द्रादयः असृजन्त सृष्टवन्तः । किमर्थम् इत्यत आह । असनाय क्षेपणाय अनभिमतेषु पुरुषेषु प्रक्षेप्तुम् । ॥ असु क्षेपणे । भावे ल्युट् ॥ । धृष्णुम् धर्षिकां शत्रूणां हिंसने प्रगल्भाम् । ॥ ञिधृषा प्रागल्भ्ये । "त्रसिगृधिधृषिक्षिपेः क्नुः" इति क्नुप्रत्ययः ॥ । इषुम् शरं कृण्वानाः कुर्वाणाः । इषुकरणाद्धेतोः असृजन्तेत्यर्थः । ॥ कृवि हिंसाकरणयोश्च । "लक्षणहेत्वोः क्रियायाः" इति हेतौ शानच् । "धिन्विकृण्व्योर च" इति उप्रत्ययः अकारश्चान्तादेशः ॥ । सा तथाविधा त्वं विदथे । यज्ञनामैतत् । विन्दन्ति प्राप्नुवन्ति अनेन फलम् इति विदथो यज्ञः । ॥ विदॢ लाभे । रुदिविदिभ्यां कित् [उ० ३. ११५] इति करणे अथप्रत्ययः । कित्त्वात्

---

1 S' Kd समुद्रको.

लघूपधगुणाभावः । प्रत्ययाद्युदात्तत्वम् ॥ । अधुना मया क्रियमाणे कर्मणीत्यर्थः । गृणाना स्तूयमाना । ॥ गॄ शब्दे । कर्मणि लटः शानच् । यकि प्राप्ते व्यत्ययेन श्नाप्रत्ययः । "श्नाभ्यस्तयोरातः" इत्याल्लोपः । "चितः" इत्यन्तोदात्तत्वम् ॥ । यद्वा । विद्यन्ते ज्ञायन्ते नक्षत्राणि अस्मिन् इति विदथम् अन्तरिक्षम् तस्मिन् गृणाना शब्दायमाना । गर्जन्तीत्यर्थः । नः अस्मान् मृळ* मृडय । त्वन्निमित्तभयनिवारणेन सुखयेत्यर्थः ॥ तत्र हेतुम् आह । हे देवि अन्तरिक्षे विद्योतमाने अशने तस्यै तादृश्यै उक्तमहिमोपेतायै ते तुभ्यं नमः नमस्कारः अस्तु भवतु । ॥ तस्या इति । "सावेकाचः०" इति प्राप्तस्य विभक्तयुदात्तत्वस्य "न गोश्वन्त्साववर्ण०" इति प्रतिषेधात् प्रातिपदिकस्वरेण आदिरुदात्तः ॥ ॥

[इति] तृतीयेनुवाके द्वितीयं सूक्तम् ॥

"भगम अस्या वर्चः" इति सूक्तेन स्त्रियाः पुरुषस्य वा दौर्भाग्यकरणे तदुपभुक्तमाल्यकन्दुकदन्तधावनकेशानां सूत्रोक्तप्रकारेण [नि]खननादिकर्माणि कुर्यात् । तथा च कौशिकः । "भगम् अस्या वर्च इति मालानिष्प्रमन्ददन्तधावनकेशान् ईशानहतायाः" इत्यादि [कौ० ४. १२] ॥

तत्र प्रथमा ॥

भगमस्या वर्च आदिष्यधि वृक्षादिव स्रजम् ।
महाबुध्न इव पर्वतो ज्योक् पितृष्वास्ताम् ॥ १ ॥

भगम् । अस्याः । वर्चः । आ । अदिषि । अधि । वृक्षात्ऽइव । स्रजम् ।
महाबुध्नःऽइव । पर्वतः । ज्योक् । पितृषु । आस्ताम् ॥ १ ॥

अस्याः अनभिमतायाः स्त्रियाः भगम् भाग्यं वर्चः तद्धेतुभूतं शारीरम् असाधारणं तेजश्च आदिषि आददे । मन्त्रप्रभावात् स्वीकरोमीत्यर्थः । ॥ डुदाञ् दाने । "आङो दोऽनास्यविहरणे" इति आत्मनेपदम् । "छन्दसि लुङ्लङ्लिटः" इति लुङ् । "स्याश्वोरिच्च" इति सिचः कित्त्वम् तत्सं-

---

1 S' Kd मालाप्रमंद°. We with *Kaus'ika*. 2 S' Kd °हरातायाः. The two commentators of *Kaus'ika* explain ईशानहतायाः by ज्वरहतायाः. We with *Kaus'ika*. 3 S' Kd स्त्रियः.

नियोगेन धातोराकारस्य इत्वम् । सिचः कित्त्वाद् गुणाभावः । भगम् इति । भज सेवायाम् । "पुंसि संज्ञायां घः प्रायेण" इति करणे घः । "चजोः कु घिण्ण्यतोः" इति कुत्वम् । वृषादेः आकृतिगणत्वाद् आद्युदात्तत्वम् । वर्च इति । वर्च दीप्तौ इत्यस्माद् भावे असुन् । तस्य नित्त्वाद् आद्युदात्तत्वम् । वर्चस आदाने दृष्टान्तः । वृक्षादिव महीरुहादिव । अधिः पञ्चम्यर्थानुवादी । पुष्पिताद् वृक्षाद् यथा स्रजं पुष्पनिकरं जना आददते तथेति पूर्वेण संबन्धः । सृज विसर्गे । "ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च" इति क्विन्नन्तो निपातितः । वृक्षादिवेति । "इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्" इति समासः ॥ एवम् अपहृतवर्चस्का सा स्त्री किं करोतु इत्यत आह । महाबुध्न इव महान् दीर्घतरो बुध्नो मूलं यस्य स महाबुध्नः । भूम्याम् अधिकतरं निखात इत्यर्थः । बन्ध बन्धने । बन्धेर्ब्रधिबुधी च [उ० ३. ५] इति नक् प्रत्ययः तत्संनियोगेन धातोर्बुधादेशश्च । "आन्महतः समानाधिकरणजातीययोः" इति महच्छब्दस्य आकारः । ताद्दशः पर्वतः पर्ववान् शिलोच्चयः । पर्ववान् पर्वत इति हि निरुक्तम् [नि० १. २०] । स यथा स्वस्थानात् न चलति तथा इयमपि दुर्भगा स्त्री ज्योक् चिरकालं पितृषु वक्ष्यमाणेषु पितृमात्रादिगृहेषु आस्तां निवसतु[1] । पित्रादिगृहात् न कदाचित् पत्युर्मुखम् अवलोकयतु इत्यर्थः । आस उपवेशने । "अनुदात्तङित आत्मनेपदम्" इति तङ् । लोटि अदादित्वात् शपो लुक् । "तिङ्तिङः" इति सर्वानुदात्तत्वम् ॥

द्वितीया ॥

एषा ते राजन् कन्या वधूर्नि धूयतां यम ।
सा मातुर्बध्यतां गृहेथो भ्रातुरथो पितुः ॥ २ ॥

एषा । ते । राजन् । कन्या । वधूः । नि । धूयताम् । यम ।
सा । मातुः । बध्यताम् । गृहे । अथो इति । भ्रातुः । अथो इति । पितुः ॥ २ ॥

---

1 S′Kd निवेसतु.

हे राजन् राजमान सोम। प्रथमातिथित्वेन नियामकत्वात् यमेति तस्यैव विशेषणम्। श्रूयते हि। "सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः" [ऋ० १०. ८५. ४०] इति। हे ईदृश सोम एषा कन्या स्त्री ते तव वधूः जाया। प्रथमतस्त्वया परिगृहीतत्वाद् इत्यर्थः। सा वधूः नि धूयताम्। दौर्भाग्येन पतिगृहात् निःसार्यताम् इत्यर्थः। धूञ् कम्पने। कर्मणि लोट्॥ एवं भवता पतिगृहात् निःसारिता सा वधूः मातुः जनन्या गृहे बध्यताम्। बद्धेव तत्रैव चिरं वर्तताम् इत्यर्थः। बन्ध बन्धने। "अनिदिताम्०" इति उपधालोपः॥ अथो अपि च भ्रातुः सोदरस्य गृहे बध्यताम् इति संबन्धः॥ अथो अपि च पितुः जनकस्य गृहे बध्यताम्। एषा वधूः दुर्भगा सती यावज्जीवं मात्रादि[2]गृहेष्वेव यथे[3]च्छं वर्ततां न कदाचित् पतिगृहं प्रविशतु इत्यर्थः॥

तृतीया॥

एषा ते कुलपा राजन् तामु ते परि दद्मसि।
ज्योक् पितृष्वासाता आ शीर्ष्णः सम[*]ओप्यात्॥ ३॥

एषा। ते। कुलऽपाः। राजन्। ताम्। ऊं इति। ते। परि। दद्मसि।
ज्योक्। पितृषु। आसातै। आ। शीर्ष्णः। सम[*]ऽओप्यात्॥ ३॥

हे राजन् सोम एषा स्त्री ते तव कुलपा[*] पातिव्रत्येन कुलस्य पालयित्री या। विवाहकाले प्रथमतस्त्वया परिगृहीतत्वात्। पा रक्षणे। "आतोनुपसर्गे कः" इति कर्मण्युपपदे कप्रत्ययः। ताम् स्त्रियम्। उशब्दः अवधारणे स च भिन्नक्रमः। ते तुभ्यमेव परि दद्मसि परिदद्मः। रक्षणार्थं दानं परिदानम्। एतावन्तं कालं पतिसमीपे स्थिताम् एनां रक्षणार्थं पुनस्त्वदायत्तामेव करोमीत्यर्थः। डुदाञ् दाने। जुहोत्या-

---

१ B Br आसता. We with D K A D R S[m] V Rw. २ B B[h] D K A R S[m] V P P[2] J and Rw all read शमोप्यात्, P P[2] dividing शम्ऽओप्यात्. We with Sâyaṇa.

---

1 S' Kd नियमक°. 2 S' Kd मात्रामादि°. 3 S' Kd तथेच्छं.

दित्वात् शपः श्लुः । "श्नाभ्यस्तयोरातः" इति आकारलोपः । "इदन्तो मसिः" इति मस इदन्तत्वम् ॥ तस्या निवासस्थानम् आह । ज्योक् चिरकालं पितृषु पित्रादिगृहेषु उक्तेषु आसाते आस्तां निवसतु । आस उपवेशने । अस्मात् लेटि आडागमः । टेः एत्वे "वैतोन्यत्र" इति ऐकारः । पितृकुलवासस्य अवधिम् आह । शीर्ष्णः शिरसः समोप्यात् संवपनात् भूमौ संपतनात् । आङ् अभिविधौ । शिरसो निपातावधीति यावत् । मरणपर्यन्तं पित्रादिगृहेष्वेव वर्तताम् इत्यर्थः । समाङ्पूर्वाद् वपेर्भावे छान्दसः क्यप् । "शीर्षश्छन्दसि" इति शिरःशब्दस्य शीर्षन् आदेशः । "अल्लोपोऽनः" इति अकारलोपे "अनुदात्तस्य च यत्रोदात्तलोपः" इति षष्ठ्येकवचनस्य उदात्तत्वम् । "आङ् मर्यादावचने" इति आङः कर्मप्रवचनीयसंज्ञा । "पञ्चम्यपाङ्परिभिः" इति समोप्यशब्दात् पञ्चमी ॥

चतुर्थी ॥

असितस्य ते ब्रह्मणा कश्यपस्य गयस्य च ।
अन्तःकोशमिव जामयोपि नह्यामि ते भगम् ॥ ४ ॥

असितस्य । ते । ब्रह्मणा । कश्यपस्य । गयस्य । च ।
अन्तःकोशमऽइव । जामयः । अपि । नह्यामि । ते । भगम् ॥ ४ ॥

हे नारि ते तव भगम् भाग्यम् असितस्य एतन्नाम्न ऋषेः ब्रह्मणा मन्त्रेण अपि नह्यामि । अपिनद्धं पिहितं करोमि । त्वत् सकाशाद् निवर्तयामीत्यर्थः । तथा कश्यपस्य ऋषेः गयस्य च । परस्परसमुच्चयार्थश्चकारः । एतयोरपि संबन्धिना ब्रह्मणा मन्त्रेण ते तव भगम् भाग्यम् अपि नह्यामि । णह बन्धने । दिवादित्वात् श्यन् प्रत्ययः । तत्र दृष्टान्तः । जामयः । जायन्ते आसु अपत्यानीति जामयः स्त्रियः भगिन्यादिरूपाः । तद् उक्तं यास्केन । न जामये भगिन्यै जामिरन्येऽस्यां

---

१ B Bp अन्तष्को°. We with A $\overset{h}{B}$ D $\overset{m}{S}$ K V Rw.

---

1 S′ Kd विवास°.

जनयन्ति जाम् अपत्यम् इति [नि० ३. ६.]॥। ताः अन्तः गृहमध्ये अवस्थितं कोशमिव धनवस्त्रादिस्थापनार्थम् आवृतं स्थानमिव। तादृशं स्थानं यथा पिहितं कुर्वन्ति तद्वद् इत्यर्थः। ॥"इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्" इति समासः॥ ॥

[इति] तृतीयं सूक्तम् ॥

"सं सं स्रवन्तु" इति सूक्तं सर्वपुष्टिकर्मणि संपाताभिमन्त्रितमैश्रधान्यचरुप्राशने दधिमधुमिश्रसक्तुमन्थप्राशने च विनियुक्तम्। सूत्रितं हि। "सं सं स्रवन्त्विति नाव्याभ्याम[1] उदकम् आहरतः सर्वत उपासिच्य[2] तस्मिन् मैश्रधान्यं शृतम् अश्नाति" इत्यादि [कौ० ३. २]। व्रीहियवादीनि मिश्रधान्यानि। "व्रीहियवगोधूमोपवाकतिलप्रियंगुश्यामाका इति मिश्रधान्यानि" इति [कौ० १. ८] परिभाषासूत्रात् ॥

तथा लक्ष्मीकरणे च एतत् सूक्तम्। सूत्रितं हि। "यस्य श्रियं कामयते ततो व्रीह्याज्यपय आहार्यं क्षीरौदनम्[3] अश्नाति" इत्यादि [कौ. ३. २]॥

तत्र प्रथमा ॥

सं सं स्रवन्तु सिन्धवः सं वाताः सं पतत्रिणः।
इमं यज्ञं प्रदिवो मे जुषन्तां संस्राव्येण हविषा जुहोमि ॥ १ ॥

सम्। सम्। स्रवन्तु। सिन्धवः। सम्। वाताः। सम्। पतत्रिणः।
इमम्। यज्ञम्। प्रऽदिवः। मे। जुषन्ताम्। सम्ऽस्राव्येण। हविषा।
जुहोमि॥ १ ॥

सिन्धवः स्यन्दनशीला नद्यः सं सं स्रवन्तु। सम्यक् अस्मदनुकूलाः प्रवहन्तु। ॥सृ गतौ। लोटि शब्गुणावादेशाः। "प्रसमुपोदः पादपूरणे" इति समो द्विर्वचनम्। "तस्य परम् आम्रेडितम्" इति परस्य आम्रेडितसंज्ञा। "अनुदात्तं च" इति तस्य अनुदात्तत्वम्॥। तथा वाताः गमनशीला वायवः। ॥वा गतिगन्धनयोः। हसिमृ-

---

1 S′Kd वाक्या° for नाव्या°. We with *Kaus'ika*. 2 S′Kd उपासेचं for उपासिच्य.
3 S′Kd क्षीरोदन°.

ग्रिण्वामिदमिलूपूधूर्विभ्यस्तन् [उ० ३. ८६] इति तन् प्रत्ययः । नित्त्वाद् आद्युदात्तत्वम् ॥ । तेपि । उपसर्गवशात् स्रवन्तु इति सर्वत्र अनुषज्यते । सं सं स्रवन्तु आनुकूल्येन प्रवर्तन्ताम् ॥ तथा पतत्रिणः । पतत्राणि पक्षा एषां सन्तीति पतत्रिणः । ॥ पतॢ गतौ । पतेरत्रन् [उ० ३. १०५] इति पतत्रशब्दः अत्रन्प्रत्ययान्तः । "अत इनिठनौ" इति मत्वर्थीय इनिप्रत्ययः ॥ । तदुपलक्षिताः सर्वे प्राणिनः सं सं स्रवन्तु सम्यग् अनुकूलाश्चरन्तु ॥ यद्वा एते सिन्धुप्रभृतयः सं स्रवन्तु अस्मदभिलषितं फलं संप्रयच्छन्तु ॥ तथा प्रदिवः । पुराणनामैतत् । पुरातना देवाः मे मदीयम् इमं यज्ञम् यागं जुषन्ताम् सेवन्ताम् । अत्र संनिहिता भूत्वा हविः स्वीकुर्वन्तु इत्यर्थः । ॥ जुषी प्रीतिसेवनयोः । तुदादित्वात् शप्रत्ययः । तस्य ङित्त्वात् लघूपधगुणाभावः ॥ अत्र हविषः सङ्गावम् आह संस्राव्येणेति । सम्यक् स्रवणं संस्रावः । ॥ सृ गतौ । भावे घञ् ॥ । संस्रावम् अर्हतीति संस्राव्यम् आज्यपयःप्रभृति । ॥ "तद् अर्हति" इति यत् प्रत्ययः ॥ । यद्वा संस्रावणीयेन । ॥ संपूर्वात् स्रवतेर्ण्यन्तात् "अचो यत्" इति यत् ॥ । तादृशेन हविषा आज्यादिना जुहोमि । आज्यादिकं हविः देवान् उद्दिश्य अग्नौ प्रक्षिपामीत्यर्थः । ॥ "तृतीया च होश्छन्दसि" इति हविषा इति कर्मणि तृतीया ॥

द्वितीया ॥

इ॒हैव ह॒वमा या॑त म इ॒ह सं॑स्रावणा उ॒तेमं व॑र्धयता गिरः ।
इ॒हैतु॒ सर्वो॑ यः प॒शुर॒स्मिन् ति॑ष्ठतु या र॒यिः ॥ २ ॥

इ॒ह । ए॒व । ह॒वम् । आ । या॒त॒ । मे॒ । इ॒ह । सम॑ऽस्रावणाः । उ॒त । इ॒मम् ।
व॒र्धय॒त॒ । गिरः ।
इ॒ह । आ । ए॒तु॒ । सर्वः॑ । यः । प॒शुः । अ॒स्मिन् । ति॒ष्ठ॒तु॒ । यो । र॒यिः ॥ २ ॥

हे देवाः मे मम संबन्धिनं हवम् आह्वानम् उद्दिश्य इहैव अस्मिन् मत्समीपदेश एव आ यात आगच्छत । अन्यान् सर्वान् परित्यज्य मत्स-

---

१ P °स्रवणाः. We with P̂ J K.　२ P P̂ J K या:.

---

1 Kd सर्वान् सर्वान्. We with S'.

मीपमेव आगच्छतेत्यर्थः । ॥ या प्रापणे । लोटि अदादित्वात् शपो लुक् ॥ तत्र हेतुरुच्यते । इह अस्मिन् कर्मणि संस्रावणाः संस्रावणीयाज्यादिसाध्या होमाः । सन्तीति शेषः । ॥ स्रवतेर्ण्यन्तात् कर्मणि ल्युट् ॥ तद्धविःस्वीकरणार्थम् आ यातेति पूर्वेण संबन्धः ॥ उत अपि च गिरः गीर्यन्ते स्तूयन्त इति गिरः । ॥ कर्मणि क्विप् । "ऋत इद्धातोः" इति इत्वम् ॥ । हे देवाः स्तूयमाना यूयम् इमम् हविःप्रदं यजमानं वर्धयत प्रजापश्वादिभिः समृद्धं कुरुत । ॥ वृधु वृद्धौ । अस्मात् ण्यन्तात् लोटि मध्यमपुरुषबहुवचनस्य थस्य तादेशः । "ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्" इति सांहितिको दीर्घः ॥ ॥ यद्वा हे देवाः यूयं गिरः अस्माभिः क्रियमाणाः स्तुतिरूपा वाचः । प्राप्य इत्यध्याहृत्य योज्यम् ॥ हे देवाः युष्मत्प्रसादात् यः लोके प्रसिद्धः गवाश्वमहिषादिरूपः पशुरस्ति स सर्वोपि इह अस्मदीये सदने ऐतु आगच्छतु ॥ तथा या प्रसिद्धा धान्यकनकादिरूपा रयिः धनम् अस्ति सा सर्वापि अस्मिन् मदीये गृहे तिष्ठतु निवसतु । मम पशुधनादिसर्वसमृद्धिर्भवतु इत्यर्थः ॥

तृतीया ॥

ये नदीनां संस्रवन्त्युत्सासः सदमक्षिताः ।
तेभिर्मे सर्वैः संस्रावैर्धनं सं स्रावयामसि ॥ ३ ॥

ये । नदीनाम् । सम्ऽस्रवन्ति । उत्सासः । सदम् । अक्षिताः ।
तेभिः । मे । सर्वैः । सम्ऽस्रावैः । धनम् । सम् । स्रावयामसि ॥ ३ ॥

नदीनाम् नदनशीलानां गङ्गादीनाम् । ॥ नदनान्नद्य इति या-

---

1 Both **S'** and **Kd** repeat the *rich*, and have another version of the commentary on the first half of it in addition to that given above. Thus:

तृतीया ॥

ये नदीनां संस्रवन्त्युत्सासः सदमक्षिताः ।
तेभिर्मे सर्वैः संस्रावैर्धनं संस्रावयामसि ॥ ३ ॥

नदीनां नदनशीलानां गङ्गादीनाम् । नदनान्नद्य इति यास्कः । अहावनदता हते तस्मादा नद्यो नाम स्थेत्यग्रे वक्ष्यते च । नद अव्यक्ते शब्दे । पचाद्यच् । नदद् इति पाठात् टिड्ढाणञ् इति ङीप् । ये प्रसिद्धा दृढा उत्सासः उत्साः गिरिकुहरनिर्गता निर्झराः । आज्ञसेरसुक् । सदं सदा अविच्छेदेन

स्कः [नि०२.२४.]। तथा च अग्रे निर्वक्ष्यते। "यददः संप्रयतीरहावनदता हते। तस्मादा नद्यो नाम स्थ" [३.१३.१] इति। नद अव्यक्ते शब्दे। अस्मात् पचाद्यच्। तत्र गणे नदट् इति पाठात् टित्त्वात् ङीप् प्रत्ययः। "अनुदात्तस्य च यत्रोदात्तलोपः" इति ङीप उदात्तत्वम्। तासां संबन्धिनो ये प्रसिद्धाः सदम् सदा अविच्छेदेन वर्तमाना अक्षिताः क्षयरहिता अक्षीयमाणा वा। यद्वा सदम् अक्षिताः सर्वदा ग्रीष्मादावपि क्षयरहिताः। क्षि क्षये। अस्माद् भावे कर्मणि वा क्तः। "निष्ठायाम् अण्यदर्थे" इति भावकर्मणोः पर्युदस्तत्वाद् दीर्घाभावः। अत एव "क्षियो दीर्घात्" इति विहितस्य निष्ठानत्वस्यापि अभावः। तथाविधा उत्सासः उत्साः भूमेरुन्नच्छन्तो जलप्रवाहाः। "आज्जसेरसुक्"। संस्रवन्ति संभूय प्रवहन्ति। महानदीनां जलप्रवाहाः सर्वदा क्षयरहिताः प्रवहन्तीत्यर्थः। तेभिः तैः। "बहुलं छन्दसि" इति भिसः ऐसभावे "बहुवचने झल्येत्" इति एत्वम्। सर्वैः निखिलैः संस्रावैः जलप्रवाहैः। स्रु स्रवणे। भावे घञ्। "थाथघञ्क्ताजबित्रकाणाम्" इति उत्तरपदान्तोदात्तत्वम्। धनम् गोहिरण्यादिरूपं मे मम संस्रावयामसि संस्रावयामः संप्रवाहयामः। अविच्छिन्नैर्नदीनां प्रवाहैः सस्याद्यभिवृद्धिद्वारा अभिलषितं धनं प्राप्नुयामेत्यर्थः। यद्वा नदीनाम् अविच्छिन्नप्रवाहवत् ममापि धनम् अविच्छेदेन

अक्षिताः क्षयरहिताः अक्षीयमाणा वा। क्षि क्षये। अस्माद् भावे कर्मणि वा क्तः। निष्ठायाम् अण्यदर्थे इति अर्थविशेषे दीर्घस्य पर्युदस्तत्वात् क्षियो दीर्घात् इति विहितस्य णत्वस्यापि अभावः। संस्रवन्ति सम्यक् प्रवहन्ति। स्रु गतौ। यङ्वृत्तान्नित्यम् इति निघातप्रतिषेधः॥

There is no doubt, the double version is due to the fact that the author, having begun his explanation of the *rich*, explained the first half; then, having left it unfinished for some time, he returned to it; but instead of taking it up where he had left it, he began his Bhâshya of the *rich* as if he had not begun it at all, and did not revise the whole afterwards; so that we have actually two versions of the same line by the same author. This is clear evidence to show, that Sâyaṇa did not revise his commentary, and that it has not been studied much after his time. We shall notice many proofs of this fact hereafter as we proceed.

समृद्धं भवतु इत्यर्थः। ॥ स्रु स्रवणे। अस्मात् ण्यन्तात् लटि "इदन्तो मसिः" इति मस इदन्तत्वम् ॥

चतुर्थी ॥

ये सर्पिषः संस्रवन्ति क्षीरस्य चोदकस्य च।
तेभिर्मे सर्वैः संस्रावैर्धनं सं स्रावयामसि ॥ ४ ॥

ये। सर्पिषः। समऽस्रवन्ति। क्षीरस्य। च। उदकस्य। च।
तेभिः। मे। सर्वैः। समऽस्रावैः। धनम्। सम्। स्रावयामसि ॥ ४ ॥

सर्पिषः सर्पणशीलस्य आज्यस्य। "यद् असर्पत् तत् सर्पिरभवत्" [तै० सं० २. ३. १०. १] इति हि तैत्तिरीयकम्। ये अवयवाः संस्रवन्ति नदीरूपेण प्रवहन्ति। यद्वा पूर्वमन्त्रात् उत्सास इति विशेष्यम् अनुषज्य योजनीयम्। सर्पिषोपि द्रवणस्वभावं द्रव्यम् उदाहरति। क्षीरस्य क्षरणशीलस्य पयसः ततोपि द्रवणशीलस्य उदकस्य। ॥ उदननात् परितो गमनाद् उदकम्। तथा च निगमः। "उदानिषुर्महीरिति तस्माद् उदकम् उच्यते [तै० सं० ५. ६. १. ३]" इति। परस्परसमुच्चयार्थौ चकारौ ॥। तयोर्ये उत्साः संस्रवन्ति तेभिरित्यादि पूर्वं व्याख्यातम् ॥

[इति] चतुर्थं सूक्तम् ॥

"येमावास्यां रात्रिम्" इति सूक्तेन द्वेष्यमरणार्थम् अभिमन्त्रितसीसचूर्णमिश्रान्नप्रदानम् तद्गात्रस्थाभरणसंस्पर्शनम् स्वयंछिन्नवेणुयष्ट्या ताडनं च कुर्यात्। सूत्रं च। "येमावास्यां रात्रिम् इति संनह्य सीसचूर्णानि" इत्यादि [कौ० ६. १]। अत्र सीसशब्देन "सीसनदीसीसे अयोरजांसि कृकलाशशिरः सीसानि" इति [कौ० १. ८] परिभाषासूत्रोक्तानि प्रत्येतव्यानि ॥ अत्र नदीसीसम् इति नदीफेनम् उच्यते ॥

तत्र प्रथमा ॥

येमावास्यां ३ रात्रिमुदस्थुर्व्रजमत्तिणः।
अग्निस्तुरीयो यातुहा सो अस्मभ्यमधि ब्रवत् ॥ १ ॥

---

1 So S'Kd always.

ये । अमाऽवास्यामि । रात्रिम् । उत्ऽअस्थुः । व्राजम् । अक्तिणः ।
अग्निः । तुरीयः । यातुऽहा । सः । अस्मभ्यम् । अधि । ब्रवत् ॥ १ ॥

ये प्रसिद्धा अक्तिणः अदनशीला रक्षःपिशाचादयः । अद भक्षणे इत्यस्माद् अदेस्त्रिनिश्च [उ० ४. ६८] इति औणादिकस्त्रिनिप्रत्ययः । अमावास्याम । अमा सह वसतः अस्यां तिथौ सूर्याचन्द्रमसौ इति अमावास्या । वस निवासे । अस्मात् ण्यति "अमावस्यद् अन्यतरस्याम्" इति वृद्ध्यभावनिपातनस्य पाक्षिकत्वाद् अत्र वृद्धिः । "तस्येदम्" अर्थे विहितस्य अणः छान्दसो लुक् । "तित् स्वरितम्" इति अन्तस्वरितत्वम् । अमावास्यासंबन्धिनीम् इत्यर्थः । यद्वा । "सुपां सुपो भवन्ति" इति षष्ठ्या अमादेशः । अमावास्याया इत्यर्थः । रात्रिम् रजनीं भ्राजम् भ्राजमानां तारकाभिर्दीप्यमानाम् । भ्राजृ दीप्तौ । "भ्राजभास०" इत्यादिना क्विप् । रात्रिम् इति । "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया । सर्वस्यां रात्रौ उदस्थुः उत्तिष्ठन्ति । मनुष्यान् हिंसितुं रात्रौ संचरन्तीत्यर्थः । यद्वा । भ्राजं भ्राजमानं रोगाद्यभावेन पुष्टाङ्गं पुरुषं हिंसितुम् उदस्थुः । अत एव अमावास्यासंबन्धिन्यां रात्रौ रक्षसां संचरणं निमित्तीकृत्य राक्षोघ्नेष्टिर्विहिता । "अग्नये रक्षोघ्ने पुरोडाशम् अष्टाकपालम् अमावास्यायां निशायां निर्वपेत्[2]" इति । तथैव तेषां संचरणमेव निमित्तीकृत्य तस्यां रात्रौ आत्मरक्षा कर्तव्येति तेनैव आपस्तम्बेनोक्तम् । "दिवादित्यः सत्त्वानि गोपायति नक्तं चन्द्रमास्तस्माद् अमावास्यायां निशायां स्वाधीन आत्मनो गुप्तिम् इच्छेत्" इति [आप० ध० १. ३१] । अस्थुरिति । ष्ठा गतिनिवृत्तौ । "छन्दसि लुङ्लङ्लिटः" इति वर्तमाने लुङ् । अत्र च ऊर्ध्वगमनस्य विवक्षितत्वात् "उदोऽनूर्ध्वकर्मणि" इति ऊर्ध्वकर्मणः पर्युदस्तत्वाद् आत्मनेपदाभावः । "गातिस्था०" इति सिचो लुक् । "आतः" इति झेर्जुस् । "उस्यपदान्तात्" इति पररूपत्वम् । यत एवं रक्षांसि[3] अस्याम् उत्तिष्ठन्ति अतः कारणात् तुरीयः चतुर्थः अग्निः । पूर्वं देवानां हव्यवाहकास्त्रयः

---

1 S′ Kd आमा°. 2 See TS. 2,2,2,2. 3 S′ Kd रक्षांस्यमुत्ति° for रक्षांसि अस्याम् उत्ति°.

अग्नयो मृताः। तदपेक्षया अस्य वर्तमानस्य अग्नेस्तुरीयत्वम्। श्रूयते हि तैत्तिरीयके। "अग्नेस्त्रयो ज्यायांसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त" [तै० सं० २. ६. ६. १] इति। यद्वा वैतानाग्नयस्त्रयः। तदपेक्षया गार्ह्योग्निश्चतुर्थः। अथ वा वैतानिकः गार्ह्यः सांग्रामिकश्चेति त्रयः अग्नयः। तदपेक्षया आङ्गिरसोग्निश्चतुर्थः। ॥ पूरणेर्थे "चतुरश्छयतावाद्यक्षरलोपश्च" इति छप्रत्ययः। तत्संनियोगेन चकारस्य लोपः ॥। सोग्निः यातुहा यातूनां रक्षसां हन्ता। "अग्निः खलु वै रक्षोहा" [तै० सं० ६. १. ४. ६] इति तैत्तिरीयकम्। ॥ हन हिंसागत्योः। अस्माद् यातुशब्दोपपदात् "बहुलं छन्दसि" इति क्विप् ॥। स तथाविधोग्निः अस्मभ्यम् अस्मदर्थम् अधि ब्रवत् अधिब्रवीतु। अस्मान् स्वकीयत्वेन स्वीकृत्य तेभ्यो रक्षःपिशाचेभ्यः प्राप्तां भीतिं निवर्तयतु इत्यर्थः। ॥ ब्रूञ् व्यक्तायां वाचि। अस्मात् लेटि अडागमः ॥ ॥

द्वितीया ॥

सीसायाध्याह वरुणः सीसायाग्निरुपावति।
सीसं म इन्द्रः प्रायच्छत् तदङ्ग यातुचातनम् ॥ २ ॥

सीसाय। अधि। आह। वरुणः। सीसाय। अग्निः। उप। अवति।
सीसम्। मे। इन्द्रः। प्र। अयच्छत्। तत्। अङ्ग। यातुऽचातनम् ॥ २ ॥

अनया प्रयोगसाधनं द्रव्यं स्तूयते। सीसाय प्राक् सूत्रपरिभाषया प्रदर्शिताय नदीफेनादिरूपाय। ॥ तादर्थ्ये चतुर्थी ॥। तदर्थं वरुणः जलाधिपतिर्देवः अध्याह अधिब्रवीति। मदीयम् एतद् इत्यभिमन्यते। अस्य सीसस्य रक्षःपिशाचाद्यनभिमतनिवृत्तिसाधनत्वेन इतरपदार्थेभ्यो विशिष्टत्वात् अत्रैव असाधारण्येन पक्षपातं करोतीत्यर्थः। ॥ आहेति। ब्रूञ् व्यक्तायां वाचि "ब्रुवः पञ्चानाम् आदित आहो ब्रुवः" इति तिपो णलादेशः तत्संनियोगेन प्रकृतेः आहादेशश्च ॥ ॥ तथा सीसाय उक्तद्रव्यार्थम् अग्निः अङ्गनादिगुणयुक्तो देवः उप अवति उपरक्षति। निरन्तरम् एतत् सीसं समीपे स्थापयित्वा रक्षोनिबर्हणसामर्थ्याधा-

1 S' Kd अत्रैवसाधारण्येन.

नेन पालयतीत्यर्थः ॥ यद्वा । ⁂ सीसायेति । "क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वात् चतुर्थी ⁂ । सीसम् उक्तप्रकारेण रक्षतीत्यर्थः ॥ उदीरितसामर्थ्योपेतं सीसं मे मह्यं द्वेष्यादिनिरसनकामाय इन्द्रः परमैश्वर्ययुक्तो देवानां पतिः प्रायच्छत् प्रादात् । अनेन त्वदभिमतं साधयेति प्रदत्तवान् इत्यर्थः । ⁂ दाण् दाने । लङि "पाघ्रा°" इत्यादिना यच्छादेशः ⁂ ॥ सत्सु अन्येषु उत्कृष्टेषु द्रव्येषु किम अनेन निकृष्टेन द्रव्येणेत्याह तदङ्गेति । अङ्ग इति आभिमुख्यकरणे । हे साधक देवदत्त तत् खलु उक्तसामर्थ्योपेतं सीसं यातुचातनम् यातूनां रक्षःपिशाचादीनां नाशकम् । ⁂ चातयतिर्नाशने इति हि यास्कः [नि° ६.३०] ⁂ ॥

तृतीया ॥

इदं विष्कन्धं सहत इदं बाधते अत्त्रिणः ।
अनेन विश्वा ससहे या जातानि पिशाच्याः ॥ ३ ॥

इदम् । विऽस्कन्धम् । सहते । इदम् । बाधते । अत्त्रिणः ।
अनेन । विश्वा । ससहे । या । जातानि । पिशाच्याः ॥ ३ ॥

अपि च इदम् सीसं विष्कन्धम् गतिप्रतिबन्धकम्[2] । रक्षःपिशाचादिकृतं विघ्नजातम् इत्यर्थः । सहते अभिभवति निःसारयति । ⁂ षह अभिभवे इति धातुः । विष्कन्धम् इति । स्कन्दिर्गतिशोषणयोः । भावे घञ् । प्रादिसमासे "वेः स्कन्देरनिष्ठायाम्" इति षत्वम् । व्यत्ययेन धकारः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् ⁂ ॥ तथा इदम् सीसम् अत्त्रिणः अदनशीलान् राक्षसान् बाधते हिनस्ति । न केवलं रक्षःपिशाचादिकृतं विघ्नं निवर्तयति अपि तु विघ्नोत्पादकान् रक्षःप्रभृतीनपि विनाशयतीत्यर्थः ॥ यत एवम् अतः अनेन उक्तप्रभावोपेतेन सीसेन विश्वा विश्वानि सर्वाणि । ⁂ "शेश्छन्दसि बहुलम्" इति शेर्लोपः ⁂ । सहे अभिभवामि । ⁂ सह अभिभवे । लटि उत्तमैकवचने "बहुलं छन्दसि" इति शपः श्लुः ⁂ । कानि पुनस्तानि इत्याह । पिशाच्याः पिशिताशिन्या राक्षस्याः अस्याः सकाशात् जातानि उत्पन्नानि या

1 S′Kd देवदत्तत्खलु. 2 S′Kd °प्रबंधकम्.

यानि पीडाकराणि उपद्रवजातानि । सन्तीति शेषः । तानीति पूर्वेण संबन्धः । पिशितम् अश्नातीति पिशिताशः । "पृषोदरादीनि यथोपदिष्टम्" इत्यत्र गणे पिशाचशब्दस्य पाठात् पिशिताशशब्दस्य पिशाचादेशः । जातिलक्षणो ङीष् ॥

चतुर्थी ॥

यदि॑ नो॒ गां हंसि॒ यद्यश्वं॒ यदि॒ पूरु॑षम् ।
तं त्वा॒ सीसे॑न विध्यामो॒ यथा॒ नोसो॒ अवी॑रहा ॥ ४ ॥

यदि॑ । नः॒ । गाम् । हंसि॑ । यदि॑ । अश्व॑म् । यदि॑ । पुरु॑षम् ॥
तम् । त्वा॒ । सीसे॑न । वि॒ध्या॒मः॒ । यथा॑ । नः॒ । असः॑ । अवी॑रऽहा ॥ ४ ॥

हे शत्रो त्वं नः अस्माकं संबन्धिनीं गाम् गोजातं यदि हंसि मारयसि । हन हिंसागत्योः । लटि शपि अदादित्वात् शपो लुक् । तथा अश्वं यदि हंसि । पुरुषम् अस्मदीयं भृत्यादिरूपं यदि हंसि । अत्र सर्वत्र यदिशब्दप्रयोगाद् अपकर्तुरेव हिंस्यत्वम् न अनपकर्तुः इति द्योत्यते । तम् तथाविधं मदीयगवाश्वादिहननेन अपकर्तारं त्वा त्वां शत्रुभूतम् । "त्वामौ द्वितीयायाः" इति युष्मदस्त्वादेशः । "अनुदात्तं सर्वम् अपादादौ" इत्यनुवृत्तेः अनुदात्तत्वम् । सीसेन उक्तमहिमोपेतेन विध्यामः ताडयामः मारयामः । व्यध ताडने । दिवादित्वात् श्यन् । "ग्रहिज्यावयिव्यधि०" इत्यादिना संप्रसारणम् । शत्रुणा घातितानां गवादीनां पुनरुज्जीवासंभवात् किमिति शत्रुहिंसा क्रियत इत्यत आह यथेति । इतः परमपि यथा येन प्रकारेण हे शत्रो त्वं नः अस्माकम् अवीरहा । वीर्याज्जायन्त इति वीराः पुत्राः तेषां हन्ता वीरहा । न वीरहा अवीरहा । असः भवसि । अस्तेर्लेटि अडागमः । इतः परमपि अस्मदीयान् पुत्रपश्वादीन् यथा न बाधसे तथा ताडयाम इति पूर्वेण संबन्धः ॥

[इति] पञ्चमं सूक्तम् ॥

[इति] प्रथमकाण्डे तृतीयोनुवाकः ॥

---

1 S' Kd इत्यत इत्याह for इत्यत आह.

चतुर्थेऽनुवाके पञ्च सूक्तानि । तत्र "अमूर्याः" इति प्रथमं सूक्तम् । तेन शस्त्रघातादिजरुधिरप्रवाहस्य स्त्रीरजसः अतिवर्तनस्य [च] निवृत्तये पञ्चपर्वणा[1] दण्डेन रुधिरवहनस्थानाभिमन्त्रणम् व्रणमुखे रथ्यापांसुसिकताप्रक्षेपणादिकम् अर्मकपालिकाबन्धनं च इत्येवमादि कुर्यात् । सूत्रं च । "अ- "मूर्या इति पञ्चपर्वणा पांसुसिकताभिः परिकिरत्यर्मकपालिकां[2] बध्नाति पाययति" इत्यादि [कौ० ४. २] ॥ अर्मकपालिका नाम शुष्कपङ्कमृत्तिका केदारमृत्तिका वा ॥

तत्र प्रथमा ॥

अमूर्या यन्ति योषितो हिरा लोहितवाससः ।
अभ्रातर इव जामयस्तिष्ठन्तु हतवर्चसः ॥ १ ॥

अमूः । याः । यन्ति । योषितः । हिराः । लोहितऽवाससः ।
अभ्रातरःऽइव । जामयः । तिष्ठन्तु । हतऽवर्चसः ॥ १ ॥

योषितः स्त्रियाः संबन्धिन्यः अमूः एताः पुरतो दृश्यमानाः लोहितवाससः लोहितवर्णवस्त्राः[3] । लोहितवर्णा इत्यर्थः । यद्वा लोहितस्य रुधिरस्य निवासभूताः । ✕वस आच्छादने । वस निवासे । इत्यनयोः अन्यतरस्माद् वसेर्णित् [उ० ४. २१७] इति औणादिकः असुन् प्रत्ययः । तस्य णिद्वद्भावाद् उपधावृद्धिः ✕ । ईदृश्यो या हिराः सिराः रजोवहननाड्यः यन्ति गच्छन्ति । व्याधिवशात् सर्वदा प्रवहन्तीत्यर्थः । ✕इण् गतौ । "इणो यण्" इति यणादेशः । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ✕ । ताः सिराः क्रियमाणेन अनेन भैषज्यकर्मणा हतवर्चसः हततेजस्काः प्रनष्टरोगवीर्याः सत्यः तिष्ठन्तु स्थेयासुः । मा प्रवाक्षुरित्यर्थः । ✕तिष्ठन्तु । ष्ठा गतिनिवृत्तौ । लोटि "पाघ्रा०" इत्यादिना तिष्ठादेशः । स च आद्युदात्तो निपातितः । अन्यथा धातुस्वरेण अन्तोदात्तत्वे सति शपा सह एकादेशे "अतो गुणे" [इति] पररूपे "[4]एकादेश उदात्तेनोदात्तः" इति उदात्तत्वे कृते ति-

---

1 S′Kd पंचमपर्वणा. 2 S′Kd °कपालकां. 3 S′Kd °वर्णस्यत्यः. 4 S′Kd read एकादेश उदात्तेनोदात्त इति before शपा सह एकादेशे &c.

ष्ठन्ति इति मध्योदात्तं पदं स्यात् । आद्युदात्तं चेष्यते । तस्माद् आद्युदात्तो निपात्यते । स निपातस्वरो धातुस्वरस्य बाधको यथा स्यात् । पादादित्वात् निघाताभावः ॥ तत्र दृष्टान्तः । अभ्रातर इव । न विद्यन्ते भ्रातरो यासां ता अभ्रातरः । "नद्यृतश्च" इति प्राप्तस्य कपः "ऋतश्छन्दसि" इति निषेधः । यथा अभ्रातृका जामयः भगिन्यः । आह च यास्कः । न जामये भगिन्यै जामिरन्येस्यां जनयन्ति जाम अपत्यम् इति [नि० ३. ६] । ता यत उत्पन्नास्तत्रैव पितृकुले संतानकर्मणे पिण्डदानाय च तिष्ठन्ति तद्वद् इत्यर्थः ॥

द्वितीया ॥

तिष्ठावरे तिष्ठ पर उत त्वं तिष्ठ मध्यमे ।
कनिष्ठिका च तिष्ठति तिष्ठादिड्मानिर्मही ॥ २ ॥

तिष्ठ । अवरे । तिष्ठ । परे । उत । त्वम् । तिष्ठ । मध्यमे ।
कनिष्ठिका । च । तिष्ठति । तिष्ठात् । इत् । धमनिः । मही ॥ २ ॥

इदानीं धमनीः प्रार्थयते । हे अवरे शरीरस्य अधोभागवर्तिनि सिरे त्वं तिष्ठ शस्त्राद्यभिघातजनितरुधिरस्रावाद् निवृत्ता भव ॥ तथा हे परे ऊर्ध्वाङ्गवर्तिनि सिरे त्वमपि तिष्ठ । अवरे इत्यस्य आमन्त्रितस्य "आमन्त्रितं पूर्वम् अविद्यमानवत्" इति अविद्यमानवद्भावेन अतिङ उत्तरत्वाभावात् तिष्ठेत्यस्य निघाताभावः ॥ उत अपि च हे मध्यमे । मध्ये भवा मध्यमा । "मध्यान्मः" इति मप्रत्ययः । शरीरस्य मध्यभागवर्तिनि सिरे त्वमपि तिष्ठ ॥ पूर्वार्धे प्रत्यक्षेण धमनीनां स्थानभेदभिन्नानां प्रार्थना कृता । अधुना परिमाणतो भिन्नानां तासामेव पारोक्ष्येण प्रार्थना क्रियते । कनिष्ठिका । अतिशयेन अल्पा कनिष्ठा । "युवाल्पयोः कन् अन्यतरस्याम्" इति इष्ठनि अल्पशब्दस्य कन् आदेशः । स्वार्थिकः कप्रत्ययः । "प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः" इति इत्वम् । सूक्ष्मतरा च नाडी तिष्ठति । तत्र यत्नविशेषो

---

1 S' Kd प्रधमनीनां.

न कर्तव्य इत्यर्थः । अस्मिन् पक्षे चकारः त्वर्थे । यद्वा पञ्चमलकारोयम् । कनिष्ठिका च तिष्ठतु महती चेति । ॥ परस्परसमुच्चयार्थश्चकारः । "चवायोगे प्रथमा" इति प्रथमा तिङ्विभक्तिर्न निहन्यते ॥ । मही महती स्थूलतरा धमनिः सिरा तिष्ठादित् तिष्ठत्वेव । अनेन प्रयोगेण निवृत्तरुधिरस्रावा अवतिष्ठताम् । ॥ ष्ठा गतिनिवृत्तौ । "लेटोडाटौ" इत्यडागमः । "इतश्च लोपः परस्मैपदेषु" इति इकारलोपः । पादादित्वात् निघाताभावः । महीति । महतीशब्दे छान्दसः अच्छब्दलोपः ॥ ॥

तृतीया ॥

शतस्य धमनीनां सहस्रस्य हिराणाम् ।
अस्थुरिन्मध्यमा इमाः साकमन्ता अरंसत ॥ ३ ॥

शतस्य । धमनीनाम् । सहस्रस्य । हिराणाम् ।
अस्थुः । इत् । मध्यमाः । इमाः । साकम् । अन्ताः । अरंसत ॥ ३ ॥

शतस्य शतसंख्याना धमनीनाम् हृदयगतानां प्रधाननाडीनाम् । तथा च मुण्डकोपनिषदि अग्रे समाम्नायते । "शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानम् अभिनिःसृतैका" [क० उ० ६. १६] इति । तथा सहस्रस्य सहस्रसंख्याकानां हिराणाम् सिराणां शाखानाडीनाम् । सहस्रशब्दस्य अपरिमितपर्यायत्वात् श्रुतिप्रसिद्धानां सर्वासां शाखानाडीनाम् एतद् उपलक्षणम् । तथा च प्रश्नोपनिषदि वक्ष्यति । "अत्रैतद् एकशतं नाडीनां तासां द्वासप्ततिंद्वासप्ततिं प्रति शाखानाडीसहस्राण्यासु व्यानश्चरति" [प्र० उ० ३. ६] इति । आचार्यैरपि प्राधान्यविवक्षया काश्चन नाड्यः परिगणिताः ।

मध्यस्थायाः सुषुम्नायाः पर्वपञ्चकसंभवाः ।
शाखोपशाखतां प्राप्ताः सिरा लक्षत्रयात् परम् ।
अर्धलक्षम इति प्राहुः शरीरार्थविचारकाः । इति ।

तासाम् उभयविधानां नाडीनां मध्यमाः मध्ये भवाः इमाः पूर्वं व्याधिवशात् स्रवन्त्यो नाड्यः अस्थुरित् । इच्छब्दः अवधारणे । अतिष्ठन्नेव ।

---

1 So S'Kd. Sâyaṇa was, of course, quoting from memory.

अधुना मन्त्रप्रभावात् निवृत्तरुधिरस्रावा भवन्त्येवेत्यर्थः । अतः परं निवृत्तरुधिरस्रावाभिर्नाडीभिः साकम् सार्धम् अन्ताः अन्तिमा अवशिष्टाः सर्वा नाड्यः अरंसत यथापूर्वं रमन्ते स्म । रमु क्रीडायाम् । अनुदात्तेत्वाद् आत्मनेपदम् । लुङि "च्लेः सिच्" ॥

चतुर्थी ॥

परि॑ वः सिक॑तावती ध॒नूर्बृ॑ह॒त्यक्र॑मीत् ।
तिष्ठ॑ते॒लय॑ता सु क॑म् ॥ ४ ॥

परि॑ । वः । सिक॑ताऽवती । ध॒नूः । बृ॒ह॒ती । अक्र॑मीत् ।
तिष्ठ॑त । इ॒लय॑त । सु । क॒म् । ॥ ४ ॥

हे नाड्यः वः युष्मान् । "बहुवचनस्य वस्नसौ" इति द्वितीयान्तस्य युष्मदः वसादेशः । सिकतावती सिकताः रजांसि तद्वती तदाधारभूता नाडी । यद्वा अश्मर्याख्यो व्याधिविशेषो यस्माद् उत्पद्यते सा नाडी सिकतावती । धनूः धनुर्वद् वक्रो[1] मूत्राशयो नाडीविशेषः । धन धान्ये । कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः [उ० १. ८१] इति ऊप्रत्ययः । स्मर्यते हि ।

मूत्राशयो धनुर्वक्रो वस्तिरित्यभिधीयते । इति ॥

तथा बृहती महती । "वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च" इति शतृवद्भावाद् "उगितश्च" इति ङीप् । "बृहन्महतोरुपसंख्यानम्" इति ङीप उदात्तत्वम् । उक्ता सा नाडी पर्यक्रमीत् परितो व्याप्नोत् । सर्वान् रुधिरप्रवहणमार्गान् निरुध्य वर्तत इत्यर्थः । क्रमु पादविक्षेपे । अस्मात् लुङि सिचि "ह्यन्तक्षणश्वसजागृणिश्व्येदिताम्" इति वृद्धिप्रतिषेधः ॥ अस्माद्धेतोः हे नाड्यः यूयं तिष्ठत निवृत्तस्रावा भवत ॥ कम् सुखम् अस्य जनस्य सु सुष्ठु इलयत प्रेरयत । स्रवव्याधिविनिर्मुक्ताः सुखं प्रयच्छतेत्यर्थः । इल प्रेरणे इति धातुः ॥

[इति] प्रथमं सूक्तम् ॥

---

1 S′Kd वक्रा.

"निर्लक्ष्मम्" इति सूक्तेन मुखहस्तपादाद्यङ्गेषु सामुद्रिकोक्तदुर्लक्षणयुक्तायाः स्त्रियास्तद्दोषनिवृत्तये मुखप्रक्षालनम् अभिषेकः फलीकरणतुषावतक्षणानां होमो वा कार्यः । सूत्रितं हि । "निर्लक्ष्म्यमिति पापलक्षणाया मुखम् उक्षत्यन्वृचं दक्षिणात् केशस्तुकात्" इत्यादि [कौ० ५. ६] ॥

तथा शान्तिकल्पेपि महाशान्तौ एतत् सूक्तम् ॥

तत्र प्रथमा ॥

निर्लक्ष्म्यं[1] ललाम्यं[1] निररातिं सुवामसि ।
अथ या भद्रा तानि नः प्रजाया अरातिं नयामसि ॥ १ ॥

निः । लक्ष्म्यम् । ललाम्यम् । निः । अरातिम् । सुवामसि ।
अथ । या । भद्रा । तानि । नः । प्रऽजायै । अरातिम् । नयामसि ॥ १ ॥

ललाम्यम् ललामे भवं तिलकस्थानगतम् । ✕"शरीरावयवाच्च" इति भवार्थे यत् प्रत्ययः । "तित् स्वरितम्" इति स्वरितत्वम् ✕ । लक्ष्मम् लक्ष्म असौभाग्यकरं चिह्नम् । ✕ लक्ष दर्शनाङ्कनयोः । बाहुलकाद् औणादिको मक् प्रत्ययः ✕ । निः सुवामसि निःसुवामः । अस्माच्छरीराद् निरवशेषम् उत्सारयामः । ✕ षू प्रेरणे । तुदादित्वात् शप्रत्ययः । "अचि श्नुधातु०" इत्यादिना उवङ् । "इदन्तो मसिः" इति मस इदन्तत्वम् । "व्यवहिताश्च" इति निसो व्यवहितप्रयोगः । "तिङ्तिङः" इति निघातः ✕ ॥ अरातिम्[2] । राति ददाति इष्टं वस्त्विति रातिर्मित्रम् न रातिः अरातिः शत्रुः । अरातिवद् अनिष्टकरम् अवयवान्तरगतं दुर्लक्षणं निःसुवामः । ✕ रा दाने । "क्तिच्क्तौ च संज्ञायाम्" इति क्तिच् । नञ्समासे "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः" इत्यत्र "अव्यये नञ्कुनिपातानाम् इति वक्तव्यम्" इति परिगणनाद् अव्ययपूर्वपदप्रकृतिस्वरत्वम् ✕ ॥ दुर्लक्षणनिरसनरूपाम् अनिष्टनिवृत्तिम् अभिधाय सुलक्षणस्थापनरूपाम् इष्टप्राप्ति-

---

१ A R B $\overset{h}{B}$ D ललाम्यं ३. We with K V.

---

1 S' Kd निर्लक्ष्ममिति. We with *Kaus'ika*. 2 S' Kd insert अथ before अरातिम्.

म आह अथ येति। अथ दुर्लक्षणनिरसनानन्तरं या यानि सामुद्रिकशास्त्रप्रसिद्धानि भद्रा भद्राणि कल्याणानि सौभाग्यकराणि चिह्नानि सन्ति। ॥ भदि कल्याणे सुखे च। इदिखाद् नुम्। भन्देर्नलोपश्च [उ० ३. १३०] इति रक् प्रत्ययः नलोपश्च। उभयत्रापि "शेश्छन्दसि बहुलम्" इति शेर्लोपः। प्रत्ययलक्षणेन नुमि कृते "सर्वनामस्थाने चासंबुद्धौ" इति उपधादीर्घः। "न लोपः प्रातिपदिकान्तस्य" इति नलोपः ॥। तानि उदीरितानि चिह्नानि नः अस्माकं प्रजायै पुत्रपौत्रादिरूपायै। भवन्तु इति शेषः। ॥ प्रकर्षेण जायत इति प्रजा। जनी प्रादुर्भावे। "उपसर्गे च संज्ञायाम्" इति जनेर्डप्रत्ययः। डित्करणसामर्थ्यात् "टेः" इति टिलोपः। प्रत्ययस्वरेण अन्तोदात्तत्वम्। ततो गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव स्वरः शिष्यते। ततष्टापि कृते "एकादेश उदात्तेनोदात्तः" इति एकादेश उदात्तः ॥ ॥ यानि पूर्वं निःसारितानि असौभाग्यकराणि चिह्नानि सन्ति तेषाम् आश्रयम् आह अरातिम् इति। उक्तानि दौर्भाग्यकराणि चिह्नानि अरातिम् शत्रुं नयामसि नयामः प्रापयामः। ॥ णीञ् प्रापणे। पूर्ववद् मस इदन्तत्वम् ॥ ॥

द्वितीया ॥

निर्१ररणिं सविता सा२विषक्३ पदोर्निर्हस्तयोर्वरुणो मित्रो अर्यमा।
निरस्मभ्यम् अनुमती रराणा प्रेमां देवा असाविषुः सौभगाय ॥ २ ॥

निः। अरणिम्। सविता। साविषक्। पदोः। निः। हस्तयोः। वरुणः। मित्रः। अर्यमा।

निः। अस्मभ्यम्। अनुऽमतिः। रराणा। प्र। इमाम्। देवाः। असाविषुः। सौभगाय ॥ २ ॥

सविता सर्वस्य प्रेरको देवः अरणीम् अरमणीम् अलक्ष्मीम्। दौर्भाग्यकरं चिह्नम् इत्यर्थः। ॥ मकारलोपश्छान्दसः ॥। यद्वा। अरणी-

---

१ A B $\overset{h}{B}$ D K R $\overset{m}{S}$ P $\overset{2}{P}$ J V all read निरर॑णिं. २ We read सा॑विषक् with A B $\overset{h}{B}$ K D P $\overset{2}{P}$ J R $\overset{m}{S}$ and V. Conf. also *Kâṇvasaṁhitâ* X. 2. 1, where even Sâyaṇa adopts that reading.

म् सर्वदा पर्यटनकारिणीम् आर्तिकरीं वा अलक्ष्मीम् । ऋतेः औणादिकः अनिप्रत्ययः । "कृदिकाराद् अक्तिनः" इति ङीष् प्रत्ययः ऋ । एवंभूताम् अलक्ष्मीं पदोः पादयोः । वर्तमानाम् इति शेषः । ऋ "पद्दन्नोमास्°" इत्यादिना पादशब्दस्य पद् आदेशः । "ऊडिदंपदाद्यप्पुम्रैद्युभ्यः" इति विभक्तेरुदात्तत्वम् ऋ । निः साविषत्* निःसुवतु निःसारयतु । ऋ षू प्रेरणे । अस्मात् पञ्चमलकारे "लेटोडाटौ" इति अडागमः । "सिब्बहुलम्°" इति सिप् । "स च णिद् वक्तव्यः" इति वचनात् "अचो ञ्णिति" इति वृद्धिः । "आर्धधातुकस्येड्वलादेः" इति सिप इडागमः ऋ ॥ तथा वरुणः वारको देवः । मित्रः सर्वेषां मित्रभूतो देवः । अर्यमा अभिमतफलप्रदाता देवः । "अर्यमेति तम् आहुर्यो ददाति" [तै°ब्रा°१.१.२.४] इति श्रुतेः । एते देवाः प्रत्येकं हस्तयोर्वर्तमानाम् अरणीम् अलक्ष्मीं निःसुवन्तु । हस्तपादयोर्वर्तमानम् असौभाग्यकरं लक्षणम् एते सर्वे देवा निर्गमयन्तु इत्यर्थः ॥ तथा अनुमतिः सर्वेषाम् अनुमन्त्री देवता अस्मभ्यम् अस्मदर्थं रराणा मा भैषीरिति शब्दायमाना अस्माभिः स्तूयमाना वा । ऋ रै शब्दे । कर्तरि कर्मणि वा लिट् । "लिटः कानज्वा" इति कानजादेशः । "चितः" इति अन्तोदात्तत्वम्* ऋ । यद्वा । ऋ रा दाने ऋ । राति ददाति अभिमतफलम् इति रराणा । ऋ पूर्ववत् कानजादेशः ऋ । एवंभूता सती देवी सर्वेषु शरीरावयवेषु वर्तमानं दुर्लक्षणं निःसुवतु । ऋ निसः श्रवणात् तत्सहचरितसाविषत् इति क्रियापदस्य अनुषङ्गः ऋ ॥ सतीष्वपि अन्यासु देवतासु अस्या एव प्रार्थनायां हेतुम् आह प्रेमाम् इति । देवाः इन्द्रादयः इमाम् उक्ताम् अनुमतिं सौभगाय सौभाग्याय अस्माकं सौभाग्यं दातुं प्रासाविषुः प्रेरितवन्तः । यत एवम् अत इति पूर्वत्र संबन्धः । ऋ षू प्रेरणे । अस्मात् लुङि "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः । "व्यवहिताश्च" इति प्रोपसर्गस्य व्यवहितप्रयोगः । सौभगायेति । शोभनो भगोस्य अस्तीति सुभगः । तस्य भावः सौभगम् । उन्नात्रादिगणे "सुभग मन्त्रे" इति पाठात् "प्राणभृज्जातिवयोवचनोन्नात्रादिभ्योञ्" इति अञ् । "ञ्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम् ऋ ॥

तृतीया ॥

यत्त आत्मनि तन्वां॑ घोरम् अस्ति॒ यद्वा केशे॑षु प्रति॒चक्ष॑णे वा।
सर्वं॒ तद्वाचाप॑ हन्मो व॒यं दे॒वस्त्वा॑ सवि॒ता सू॑दयतु ॥ ३ ॥

यत्। ते॒। आत्मनि। तन्वा॑म्। घोरम्। अस्ति। यत्। वा॒। केशे॑षु। प्र-
ति॒ऽचक्ष॑णे। वा॒।

सर्व॑म्। तत्। वा॒चा। अप॑। ह॒न्म॒। व॒यम्। दे॒वः। त्वा॒। स॒वि॒ता। सू-
द॒य॒तु ॥ ३ ॥

हे दुर्लक्ष्मोपेत पुरुष ते तव आत्मनि आत्मीयायां तन्वाम् शरीरे घोरम् भयंकरं दुर्लक्षणं [यद्] अस्ति। यद्वा। आत्मनि शरीरोपहिते पुरुषे घोरम् भयंकरं पापं तन्वाम् शरीरे दुर्लक्षणं यद् अस्ति। वा अथ वा केशेषु शिरोरुहेषु अथ वा प्रतिचक्षणे दर्शनसाधने चक्षुषि यद् घोरम् अस्ति। ☒ चष्टिः पश्यतिकर्मा। करणे ल्युट्। "असंनयोश्च" इति ख्याञादेशप्रतिषेधः ☒। तद् आभ्यन्तरं बाह्यं च सर्वम् घोरजातं वयम् प्रयोगकुशलाः वाचा मन्त्ररूपया अप हन्मः हिंस्मः। ☒ हन हिंसागत्योः। अदादित्वात् शपो लुक्। "सावेकाचस्तृतीयादिर्विभक्तिः" इति वाच उत्तरस्यास्तृतीयाया उदात्तत्वम् ☒ ॥ अनिष्टनिवृत्तिं विधाय इष्टप्राप्तिं प्रार्थयते। देवः द्योतनात्मकः सविता प्रेरको देवः त्वा त्वां सूदयतु श्रेयसे प्रेरयतु। दूरगतदुर्लक्षणं त्वां श्रेयसा संबद्धं करोतु इत्यर्थः। ☒ षूद क्षरणे ☒ ॥

चतुर्थी ॥

रि॑श्यपदीं॑ वृषदतीं॑ गोषु॑धां वि॑धु॒मामु॒त।
वि॒ली॒ढ्यं॑ ल॒ला॒म्यं॑ १ ता अ॒स्मन्ना॑शयामसि ॥ ४ ॥

---

१ So we read with **D K A R S^{m} P P^{2} J** and **R**w. ऋश्य° is what **S V B^{h}** read.
२ **B B^{h} D A R S^{m}** have ललाम्यं ३. We with **K V.**

---

1 **S′ K**d अशन°. 2 **S′ K**d दुर्गत°. The emendation is conjectural.

रिश्यंऽपदीम् । वृषंऽदतीम् । गोऽसेधाम् । विऽधमाम् । उत ।
विऽलीढ्यम् । ललाम्यम् । ताः । अस्मत् । नाशयामसि ॥ ४ ॥

ऋँश्यपदीम् ऋश्यस्य सारङ्गस्येव पादौ यस्याः सा ऋश्यपदी ईदृश-दुर्लक्षणोपेता स्त्री ताम् । ॥ "सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाचोत्तरपदलोपश्च" इति बहुव्रीहिसमासे "पादस्य लोपोऽहस्त्यादिभ्यः" इति पादशब्दस्य अन्त्यलोपः । "पादोऽन्यतरस्याम्" इति ङीप् । भसंज्ञायां "पादः पत्" इति पद्भावः ॥ । तथा वृषदतीम् । वृषस्येव दन्ता यस्याः सा वृषदती स्थूलदन्ता नारी [ताम्] । ॥ पूर्ववद् बहुव्रीहौ "अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च" इति दन्तशब्दस्य दत् आदेशः । "उगितश्च" इति ङीप् ॥ । तथा गोसेधाम् गौरिव सेधति गच्छतीति गोसेधा स्त्री ताम् । ॥ षिधु गत्याम् । पचाद्यच् ॥ । तथा विधमाम् विकृतं धमति शब्दायते इति विधमा [ताम्] । ॥ ध्मा शब्दाग्निवक्त्रसंयोगयोः । अस्मात् "पाघ्राध्माधेड्दृशः शः" इति शप्रत्ययः । "पाघ्राध्मास्थाम्नादाण्-दृश्यर्ति°" इत्यादिना धमादेशः ॥ । फूत्कारादिविविधशब्दकारिणीम् इत्यर्थः । यद्वा । ॥ धमतिर्गतिकर्मा इति यास्कः [नि° ६.२] ॥ । विकृतगमनाम् । उतशब्दः अप्यर्थे । ताः सर्वा ऋँश्यपद्याद्याः अस्मत् अस्मत्तः सकाशात् नाशयामसि नाशयामः । अस्मत्संबन्धिनीनां स्त्रीणाम् ऋँश्यपदीत्वादिरूपं यद् दुर्लक्ष्म तद् मन्त्रप्रभावात् निवर्तयाम इत्यर्थः । ॥ णश अदर्शने । "इदन्तो मसिः" ॥ । तथा ललाम्यम् ललामस्थाने ललाटप्रान्ते भवम् । ॥ "शरीरावयवाच्च" इति यत् । "तित् स्वरितः" इति स्वरितत्वम् ॥ । तथाविधं विलीढ्यम् विशेषेण लीढं विलीढम् । ॥ लिह आस्वादने । भावे निष्ठा । "हो ढः" इति ढत्वम् । "झषस्तथोर्धोऽधः" इति धत्वम् । ततः ष्टुत्वे कृते "ढो ढे लोपः" इति ढलोपे "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति दीर्घः ॥ । विलीढे भवं विलीढ्यम् । ॥ "भवे छन्दसि" इति यत् । पूर्ववत् स्व-

1 So S'Kd. Sâyaṇa invariably reads तित् स्वरितः instead of तित् स्वरितम्, which is the general reading. The *Mahâbhâshya* reads तित् स्वरितम्. See the Benares Edition VI. 1. 1, folio 67.

रितत्वम् ॥ । विलीढमिव स्थितं केशाना प्रातिलोम्यरूपं ललाटप्रान्ते वर्तमानं यद् दुर्लक्ष्म तदपि नाशयाम इत्यर्थः । अत्र ऋश्यपदीत्वादीनि स्त्रीणामेव दुर्लक्षणानि न पुरुषाणाम् इत्यभिप्रायेण तत्र स्त्रीलिङ्गनिर्देशः । [यद्] विलीढ्यरूपं तद् दुर्लक्षणं स्त्रीपुरुषोभयसाधारणम् इति ततः पार्थक्येन निर्देशः ॥

[इति] चतुर्थेनुवाके द्वितीयं सूक्तम् ॥

मा नो विदन्[१. १९] अदारसृत्[१. २०] स्वस्तिदाः[१. २१] इति सूक्तत्रयस्य अपराजितगणे पाठात् तद्गणसाध्येषु[1] सांग्रामिकादिकर्मसु विश्वा शरस्येति प्रथम[१. २]सूक्तवद् विनियोगोनुसंधेयः ॥

अत्र "मा नो विदन्" इति सूक्तस्य ब्राह्मणायुधधारणदेवताप्रतिमानर्तनहसनाद्यद्भुतेषु आज्यहोमे विनियोगः । "अथ यत्रैतद् ब्राह्मणा आयुधिनो भवन्ति" इति [कौ० १३. १२] प्रक्रम्य सूत्रितम् । "मा "नो विदन्[१. १९] नमो देववधेभ्यः[६. १३] इत्येताभ्यां सूक्ताभ्यां जु- "हुयात् । सा तत्र प्रायश्चित्तिः । अथ[2] यत्रैतद् दैवतानि नृत्यन्ति" इत्यादि [कौ० १३. १३] ॥

तथा अनड्वान् यदि धेनोः स्तन्यं पिबेत् तदा एतेन आज्यं जुहुयात् । तथा च कौशिकः । "अथ यत्रैतद् अनड्वान् धेनुं धयति" इति प्रक्रम्य "मा नो विदन् नमो देववधेभ्यः इत्येताभ्यां जुहुयात्" इति [कौ० १३. २१] ॥

तत्र प्रथमा ॥

मा नो॑ विदन् विव्या॒धिनो॒ मो अ॑भिव्या॒धिनो॑ विदन् ।
आरा॒च्छर॑व्या॒ अस॒द्विषू॑चीरिन्द्र पातय ॥ १ ॥

मा । नः । विदन् । विऽव्याधिनः । मो इति । अभिऽव्याधिनः । विदन् ।
आरात् । शरव्याः । असत् । विषूचीः । इन्द्र । पातय ॥ १ ॥

विव्याधिनः विशेषेण अस्त्रादिभिस्ताडनशीलाः शत्रवः नः अस्मान् युध्यमानान् मा विदन् मा लभन्तां मा प्राप्नुवन्तु । ॥ विदॢ लाभे ।

---

1 S'Kd तद्गतासाध्येषु. 2 S'Kd अथात्रैतद्देवताविनृत्यति. We with *Kaus'ika*, except that he has देवतानि.

अस्मात् माङि लुङि "पुषादिद्युताद्यूदितः परस्मैपदेषु" इति च्लेः अङ् आदेशः । "न माङ्योगे" इति अडभावः । विव्याधिन इति । व्यध ताडने । अस्माद् विपूर्वात् "सुप्यजातौ णिनिस्ताच्छील्ये" इति णिनिः ॥ तथा अभिव्याधिनः अभिमुखम् आगत्य विध्यन्ति हिंसन्तीत्यभिव्याधिनः प्रत्यर्थिनः संनिहिता भटाः । पूर्ववद् णिनिः । तेपि मो विदन् मैव लभन्ताम । दूरस्थाः संनिहिताश्च भटा न अस्मान् स्पृशन्तु इत्यर्थः ॥ अधुना शत्रुसंबन्धीनि शस्त्राण्यपि न अस्मत्समीपदेशं प्राप्नुवन्तु इति प्रार्थयते । हे इन्द्र परमैश्वर्ययुक्त देव शरव्याः शत्रुभिर्बहुशो विनिर्मुक्ताः शरसंहतीः विषूचीः विष्वक् नानामुखम् अञ्चनशीलाः सतीः अस्मत् आरात् अस्मत्तो दूरदेशे पातय प्रक्षिप । शरव्या इति । शॄस्वृस्निहित्रप्यसीत्यादिना [उ० १. १०] औणादिक उप्रत्ययः । शरुशब्दात् "उगवादिभ्यो यत्" इति यत् । "ओर्गुणः" इति गुणे "वान्तो यि प्रत्यये" इति अव् आदेशः । "तित् स्वरितः" इति स्वरितत्वम् । "अन्यारादितरर्ते०" इति अस्मच्छब्दात् पञ्चमी । विषूचीरिति । अञ्चु गतिपूजनयोः । अस्माद् विपुशब्दोपपदात् "ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाम०" इति क्विन् । "अनिदिताम०" इति नलोपः । "अञ्चतेश्चोपसंख्यानम्" इति ङीपि भसंज्ञायाम् "अचः" इत्यकारलोपे "चौ" इति दीर्घत्वम् ॥

द्वितीया ॥

विष्वञ्चो अस्मच्छरवः पतन्तु ये अस्ता ये चास्याः ।
दैवीर्मनुष्येषवो ममामित्रान् वि विध्यत ॥ २ ॥

विष्वञ्चः । अस्मत् । शरवः । पतन्तु । ये । अस्ताः । ये । च । आस्याः ।
दैवीः । मनुष्यऽइषवः । मम । अमित्रान् । वि । विध्यत ॥ २ ॥

शरवः शराः हिंसकाः । शॄ हिंसायाम् । शॄस्वृस्निहि० [उ० १. १०] इत्यौणादिक उप्रत्ययः । तत्र धान्ये नित् [उ० १. ९] इत्य-

---

१ So we read with **A** $\overset{h}{\mathbf{B}}$ **D R** $\overset{m}{\mathbf{S}}$ **P** $\overset{2}{\mathbf{P}}$ **J V** and **R**w. ² So **P** $\overset{2}{\mathbf{P}}$ **J S**.

नुवृत्तेः "ञ्नित्यादिर्नित्यम्" इत्याद्युदात्तत्वम्॥ । ते अस्मत् अस्मत्तः सकाशात् विष्वञ्चः विविधगमनाः पतन्तु निपतन्तु । अस्मान् परित्यज्य अन्यत्र गच्छन्तु इत्यर्थः । तान् शरान् विशिनष्टि । ये शरा अस्ताः शत्रुभिर्धनुर्यन्त्रेण विनिर्मुक्ताः । ॥असु क्षेपणे । कर्मणि निष्ठा । "यस्य विभाषा" इति इट्प्रतिषेधः॥ । तथा ये च शराः आस्याः क्षेप्तव्याः तूणीरे संगृहीताः । ते सर्वे निपतन्तु इति योजना । ॥असु क्षेपणे इत्यस्मात् "ऋहलोर्ण्यत्" इति ण्यत् प्रत्ययः॥ ॥ पूर्वं शत्रुशराणां लक्ष्यावेधलक्षणं वैयर्थ्यं प्रार्थ्य अधुना स्वीयानां शराणां शत्रुरूपस्य [लक्ष्यस्य] हिंसकत्वं प्रार्थयते । दैवीः देवसंबन्धिन्यः आग्नेयवारुणादिरूपाणि अस्त्राणि । ॥देवशब्दात् "तस्येदम्" अर्थे "देवाद् यञञौ" इति अञ् प्रत्ययः । "टिड्ढाणञ्०" इत्यादिना ङीप् । "[वा] छन्दसि" इति जसि पूर्वसवर्णदीर्घः । "ञ्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम्॥ । तथा मनुष्येषवः मनुष्याणाम् अस्मदीयानां संबन्धिन्य इषवः शस्त्राणि उभयविधास्ता इषवः अस्मदीयैर्यौद्धृभिः मनुष्यैर्विमुच्यमानाः मम मदीयान् अमित्रान् न विद्यते मित्रम् एषाम् इति अमित्राः शत्रवः । ॥बहुव्रीहौ "नञ्सुभ्याम्" इति उत्तरपदान्तोदात्तत्वे प्राप्ते "नञो जरमरमित्रमृताः" इति उत्तरपदाद्युदात्तत्वम्॥ । तान् शत्रून् विविध्यँतु विविध्यन्तु मारयन्तु । ॥व्यध ताडने । लोटि दिवादित्वात् श्यन् । तस्य ङित्त्वात् "ग्रहिज्यावयिव्यधिवष्टि०" इत्यादिना संप्रसारणम् । "तिङां तिङो भवन्तीति वक्तव्यम्" इति झेस्तिप् । "तिङ्तिङः" इति निघतः॥ ॥

तृतीया ॥

यो नः स्वो यो अरणः सजात उत निष्ट्यो यो अस्माँ अभिदासति ।
रुद्रः शरव्यया तान् ममामित्रान् वि विध्यतु ॥ ३ ॥

---

१ **A B** omit the visarga. We with $\overset{h}{B}$ **D K R** $\overset{m}{S}$ **V**.

---

1 **S′ Kd** लक्ष्यवेध°.

यः । नः । स्वः । यः । अरणः । सऽजातः । उत । निष्ट्यः । यः । अस्मान् ।
अभिऽदासति ।
रुद्रः । शरव्यया । एतान् । मम । अमित्रान् । वि । विध्यतु ॥ ३ ॥

नः अस्माकं संबन्धी यः स्वः ज्ञातिः अधिकबलः सन् अस्मान् अनपकर्तॄन्[1] अभिदासति उपक्षपयति । क्षेत्रधनादिकम् अपहृत्य पीडयतीत्यर्थः । दसु उपक्षये । अस्मात् ण्यन्तात् लट् । शपः "छन्दस्युभयथा" इति आर्धधातुकत्वात् "णेरनिटि" इति णिलोपः । शन्निपोः पित्त्वाद् अनुदात्तत्वे धातुस्वरः शिष्यते । "यङ्वृत्तान्नित्यम्" इति निघातप्रतिषेधः । तथा अरणः अरणनीय[2]ः संभाष्यो न भवतीत्यरणः शत्रुः । रण शब्दार्थः इत्यस्माद्धातोः "वशिरण्योरप्युपसंख्यानम्" इति कर्मणि अप् । ततो नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । एवंभूतो यः शत्रुः अस्मान् अभिदासति उपक्षपयति[3] । तथा अन्योपि सजातः समानजन्मा समबलः ज्ञातिः अरातिर्वा । उत अपि च निष्ट्यः निर्गतवीर्यो निकृष्टबलो यः शत्रुः अस्मान् अभिदासति क्षुद्रोपद्रवैः पीडयति । सजात इति । जनेः कर्तरि निष्ठा । "श्वीदितो निष्ठायाम्" इति इट्प्रतिषेधः । "जनसनखनां सञ्झलोः" इति आत्वम् । ततः समानशब्देन समासे "समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु" इति समानशब्दस्य सभावः । निष्ट्य इति । "अव्ययात् त्यप्" इत्यत्र "निसो गते" इति वचनात् निस्शब्दात् त्यप् प्रत्ययः । "ह्रस्वात् तादौ तद्धिते" इति सकारस्य मूर्धन्यादेशः । एतान् ज्ञातिप्रभृतीन् मम मदीयान् अमित्रान् शत्रून् रुद्रः । रोदयति सर्वम् अन्तकाले इति रुद्रः संहर्ता देवः । रुदिर् अश्रुविमोचने । अस्मात् ण्यन्तात् "रोदेर्णिलुक् च [उ०२.२२] इति रक् प्रत्ययः । शरव्यया शरूणां हिंसकानाम् आयुधानां संहतिः शरव्या । "पाशादिभ्यो यः" इति समूहेर्थे यप्रत्ययः । "ओर्गुणः" इति गुणे "वान्तो यि प्रत्यये" इति

---

१ P J शरव्यया. We with P[2].

---

1 S′ Kd अनपिकर्तॄन्. 2 S′ Kd अनीयः for अरणनीयः. 3 S′ Kd उपक्षयति.

अव् आदेशः ॥ । तया वि विध्यतु विनिहन्तु । ॥ व्यध ताडने । श्यनि "ग्रहिज्या०"आदिना संप्रसारणम् ॥ ॥

चतुर्थी ॥

यः सपत्नो योऽसपत्नो यश्च द्विषन्छपाति नः ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥ ४ ॥
यः । सऽपत्नः । यः । असपत्नः । यः । च । द्विषन् । शपाति । नः ।
देवाः । तम् । सर्वे । धूर्वन्तु । ब्रह्म । वर्म । मम । अन्तरम् ॥ ४ ॥

यः सपत्नः ज्ञातिरूपः शत्रुः यः असपत्नः ज्ञातिव्यतिरिक्तः शत्रुः अस्मान् बाधते । तथा यश्च शत्रुः द्विषन् द्वेषं कुर्वन् । ॥ द्विष अप्रीतौ । "द्विषोऽमित्रे" इति शतृप्रत्ययः ॥ । नः अस्मान् अनागसः शपाति शपेत् । निग्रहरूपया वाचा नाशयेत् । ॥ शप आक्रोशे । अस्मात् लेटि आडागमः । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ॥ । तं सर्वं पूर्वोक्तं शत्रुं सर्वे निखिला देवाः इन्द्रादयो धूर्वन्तु हिंसन्तु । ॥ धुर्वी हिंसायाम् ॥ ॥ शत्रुकृतशापस्य असंस्पर्शनोपायम् आह ब्रह्मेति । मम मन्त्रप्रयोक्तुः ब्रह्म प्रयुज्यमानं मन्त्रजालम् अन्तरम् व्यवधायकं वर्म कवचं भवतु । यथा शत्रुकृता वाक्शस्त्रादयः अस्मान् न स्पृशन्ति तथा अयं मन्त्रः अस्मान् छादयतु इत्यर्थः ॥

[इति] तृतीयं सूक्तम् ॥

"अदारसृत्" इत्यस्य उक्तः पूर्वसूक्तेन विनियोगः ॥

तस्य आद्याया दर्शपूर्णमासयोः शृतहविर्निरीक्षणे विनियोगः । "अदारसृदित्यवेक्षते" इति [कौ० १. २] हि सूत्रम् ॥

तत्र प्रथमा ॥

अदारसृद् भवतु देव सोमास्मिन् यज्ञे मरुतो मृडता नः ।
मा नो विददभिभा मो अशस्तिर्मा नो विदद् वृजिना द्वेष्या या ॥ १ ॥

---

१ $\overset{h}{B}$ R द्विषं. We with A $\overset{m}{S}$ D V.

---

1 S′Kd जाति°. 2 S′Kd छदय°.

अदारऽसृत्। भवतु। देव। सोम। अस्मिन्। यज्ञे। मरुतः। मृडत। नः। मा। नः। विदत्। अभिऽभाः। मो इति। अशस्तिः। मा। नः। विद्-त। वृजिना। द्वेष्या। या ॥ १ ॥

हे देव द्योतनात्मक सोम अस्मदीयः शत्रुः अदारसृत् भवतु । दार-यन्ति पुरुषहृदयं विदारयन्तीति दाराः स्त्रियः । दृ विदारणे । "दा-रजारौ कर्तरि णिलुक् च" इति ण्यन्तात् कर्तरि घञ् । दारान् स-रति गच्छतीति दारसृत् । सृ गतौ । "क्विप् च" इति क्विप् । न दारसृत् अदारसृत् इति नञ्समासे "अव्यये नञ्कुनिपातानाम् इति वक्त-व्यम्" इति अव्ययपूर्वपदप्रकृतिस्वरत्वम् । मदीयः शत्रुः स्वस्थानात् प्रच्युतः सन् न कदाचिदपि स्वस्त्रीसमीपं प्राप्नोतु इत्यर्थः ॥ हे मरुतः स-प्तगणात्मका एकोनपंचाशत्संख्याका देवाः । "आमन्त्रितस्य च" इति आष्टमिकं सर्वानुदात्तत्वम् । अस्मिन् मया अनुष्ठीयमाने यज्ञे दर्शपूर्णमासात्मके संग्रामरूपे वा नः अस्मान् मृडत मृडयत[1] । इष्टफल-प्रापणेन जयप्रदानेन च सुखयतेत्यर्थः । मृड सुखने । तुदादित्वा-त् शप्रत्ययः । अस्मिन्निति । इदमः त्यदाद्यत्वे "हलि लोपः" । "ऊ-डिदंपदाद्यप्पुम्रैद्युभ्यः" इति विभक्तेरुदात्तत्वम् । यज्ञ इति । यज देवपू-जासंगतिकरणदानेषु । "यजयाचयतविच्छप्रच्छरक्षो नङ्" इति नङ् प्रत्य-यः । चुत्वेन जकारः । प्रत्ययस्वरेण अन्तोदात्तत्वम् ॥ अपि च अभिभाः आभिमुख्येन प्रवर्तमानं शात्रवं तेजः । यद्वा आभिमुख्येन भाति रणरङ्गे दीप्यत इति अभिभाः शत्रुः । भा दीप्तौ । अस्मात् "क्विप् च" इति क्विप् । स च नः अस्मान् मा विदत् मा लभ्य । मा प्राप्नोतु इत्यर्थः । विदॢ लाभे । अस्मात् माङि लुङि "पुषादिद्यु-ताद्यृदितः०" इति च्लेः अङ् आदेशः ॥ तथा अशस्तिः अकीर्तिः । मो मैव विदत् । शंसु स्तुतौ । भावे क्तिन् । "अनिदिताम्०" इति नलोपः । "तितुत्र०" इत्यादिना इट्प्रतिषेधः । नञ्समासे अव्ययपूर्वप-दप्रकृतिस्वरत्वम् ॥ तथा द्वेष्या द्वेष्याणि द्वेषणीयानि । द्विष

1 S' Kd मृळयत.

अप्रीतौ। "ऋहलोर्ण्यत्" इति कर्मणि ण्यत्। या यानि वृजिना वृजिनानि पापानि पराजयनिमित्तानि अभिमतफलप्रतिबन्धकानि सन्ति। सर्वत्र "शेश्छन्दसि बहुलम्" इति शेर्लोपः। तानि नः अस्मान् मो विदत्। व्ययेन एकवचनम्। मा विदन् मा प्रापुवन्तु॥ यद्वा। वृजिना वृजिनं पापम् अस्याम् अस्तीति वृजिना। अर्शआदित्वाद् अच्। हिंसादिपापोपेता अत एव द्वेष्या अस्माभिर्द्वेषणीया [या] शात्रवी सेनास्ति सापि नः अस्मान् मा विदत्॥

द्वितीया॥

यो अद्य सेन्यो वधोऽघायूनामुदीरते।
युवं तं मित्रावरुणावस्मद्यावयतं परि॥ २॥

यः। अद्य। सेन्यः। वधः। अघऽयूनाम्। उत्ऽईरते।
युवम्। तम्। मित्रावरुणौ। अस्मत्। यवयतम्। परि॥ २॥

अद्य इदानीं युद्धकाले सेन्यः सेनायां भवः। "भवे छन्दसि" इति सेनाशब्दाद् यत् प्रत्ययः। "यतोऽनावः" इति आद्युदात्तत्वम्। तथाविधः। अघायूनाम्। अघम् हिंसालक्षणं पापं परेषाम् इच्छन्तीति अघायवः शत्रवः। "छन्दसि परेच्छायामपि" इति अघशब्दात् क्यच्। "अश्वाघस्यात्" इति आत्वम्। "क्याच्छन्दसि" इति उप्रत्ययः। प्रत्ययस्वरेण अन्तोदात्तत्वे "नाम् अन्यतरस्याम्" इति नाम उदात्तत्वम्। तेषां शत्रूणां संबन्धी यो वधः हननम् तेन तत्साधनम् आयुधं लक्ष्यते। हन हिंसागत्योः। "हनश्च वधः" इति भावे अप् प्रत्ययः तत्संनियोगेन हन्तेर्वधादेशश्च। स च अन्तोदात्तः। अतो लोपे "अनुदात्तस्य च यत्रोदात्तलोपः" इति अप उदात्तत्वम्। तथाविधम् आयुधजालम् उदीरते उद्गच्छति अस्मदभिमुखं प्राप्नोति। ईर गतौ। "बहुलं छन्दसि" इति शपो लुगभावः। "यङ्वृत्तान्नित्यम्"

---

१ A D R S̃ सेन्यो omitting the sign of accent. We with B B̃ K V.

---

1 S′ Kd °फलप्रवंध°.

इति निघातप्रतिषेधः । शपः पित्त्वाद् अनुदात्तत्वम् । "°अदुपदेशाल्लसार्वधातुक°" [इति] अनुदात्तत्वे धातुस्वरः शिष्यते । "तिङि चोदात्तवति" इति गतेर्निघातः । मित्रावरुणौ मित्रश्च वरुणश्च । "देवताद्वन्द्वे च" इति पूर्वपदस्य आनङ् आदेशः । "देवताद्वन्द्वे च" इति उभयपदप्रकृतिस्वरत्वे प्राप्ते "आमन्त्रितस्य च" इति आष्टमिकं सर्वानुदात्तत्वम् । हे देवौ युवम् युवाम् । "प्रथमायाश्च द्विवचने भाषायाम्" इति आत्वस्य भाषाविषयत्वाद् अत्र अभावः । तम् शत्रुभिर्विनिर्मुक्तं वधम् अस्मत् अस्मतः सकाशात् परि परितः यावयतम् वियोजयतम् । अस्मान् यथा न स्पृशति तथा कुरुतम् इत्यर्थः । युमिश्रणामिश्रणयोः । अस्मात् ण्यन्तात् लोटि रूपम् । "छन्दसि परेपि" इति परेः परप्रयोगः । "तिङ्तिङः" इति निघातः । "उपसर्गाश्चाभिवर्जम् [फि° ४.१३] इति परेः आद्युदात्तत्वम् ॥

तृतीया ॥

इतश्चि यदमुतश्चि यद् वधं वरुण यावय ।
वि महच्छर्म यच्छ वरीयो यावया वधम् ॥ ३ ॥

इतः । च । यत् । अमुतः । च । यत् । वधम् । वरुण । यवय ।
वि । महत् । शर्म । यच्छ । वरीयः । यवय । वधम् ॥ ३ ॥

अनया वरुणम् अवयुत्य प्रार्थयते ॥ इतः अस्मात् संनिहितात् शत्रोः सकाशाद् [यद् वधम्] हननसाधनम् आयुधं माम् उद्दिश्य प्राप्नोति । इदमः "पञ्चम्यास्तसिल्" इति तसिल् प्रत्ययः । तसिलः "प्राग् दिशो विभक्तिः" इति विभक्तिसंज्ञा । "इदम इश्" इति इश् आदेशः । "लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वे प्राप्ते "ऊडिदंपदाद्यप्पुम्रैद्युभ्यः" इति विभक्तिसंज्ञकत्वात् तसिल उदात्तत्वम् । तथा अमुतः अमुष्मात् दूरे दृश्यमानात् शत्रोः सकाशाद् यद् आयुधं प्राप्नोति । अदःशब्दात् पूर्ववत् तसिल् । तस्य विभक्तिसंज्ञकत्वात् "त्यदादीनाम् अः" इति अत्वम् । "अदसोऽसेर्दाद् उ दो मः" इति उत्वमत्वे ।

---

1 S′ Kd वंध°.

"लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वम्॥। तत् सर्वं वधम् शत्रुभिर्विनिर्मुक्तं हननसाधनम् आयुधम्। ॥हन्तेर्व्यत्ययेन "हनश्च वधः" इति करणे अप्। यस्तु करणाधिकरणयोः स तु त्रिलिङ्गः इति न्यायात् नपुंसकत्वम्॥। तद् आयुधम् हे वरुण त्वं यावय अस्मत्तो वियोजय। ॥यु मिश्रणामिश्रणयोः॥॥ न केवलम् अनिष्टनिवृत्तिः इष्टप्राप्तिरपि मे स्याद् इत्याह। हे वरुण महत् अधिकम् अस्मद्वैप्यैरलभ्यं शर्म सुखं वि यच्छ विशेषेण प्रयच्छ। ॥दाण् दाने। शपि "पाघ्रा०" इत्यादिना यच्छादेशः। "तिङ्तिङः" इति निघातः। उपसर्गस्य "व्यवहिताश्च" इति व्यवहितप्रयोगः॥॥ अपि च वरीयः उरुतरं मन्त्रप्रयोगादिना प्रवृद्धं दुष्परिहरं वधम् हननसाधनं शस्त्रास्त्रजालम् हे वरुण त्वं यवय वियोजय। ॥वरीय इति। उरुशब्दाद् ईयसुनि "प्रियस्थिरस्फिरोरुबहुल०" इत्यादिना वर् आदेशः। "ञ्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम्। यवया वधम् इति। "अन्येषामपि दृश्यते" इति सांहितिको दीर्घः॥॥

चतुर्थी॥

शासॱइत्था महाँ अंस्यमित्रसाहो अंस्तृतः।
न यस्यं हन्यतेॱ सखा न जीयतेॱ कदा चन॥ ४॥

शासः। इत्था। महान्। असि। अमित्रऽसहः। अस्तृतः।
न। यस्य। हन्यते। सखा। न। जीयते। कदा। चन॥ ४॥

हे इन्द्र त्वं शासः शासको नियन्ता। ॥शासु अनुशिष्टौ। पचाद्यच्॥। [इत्था] इत्थम् अनेन प्रकारेण महान् महत्त्वगुणोपेतः सर्वोत्कृष्टः असि भवसि। ॥इदमशब्दात् "था हेतौ च च्छन्दसि" इति प्रकारेर्थे था प्रत्ययः। "एतेतौ रथोः" इति इदम इत् आदेशः। प्रत्ययस्वरेण अन्तोदात्तता। महाँ असीत्यत्र संहितायां "दीर्घाद् अटि समानपादे" इति नकारस्य रुत्वम्। "आतोऽटि नित्यम्" इति आकारस्य अनुनासिकादेशः। "भोभगोअघोअपूर्वस्य योऽशि" इति

रोर्यत्वम् । तस्य "लोपः शाकल्यस्य" इति लोपः । "पूर्वत्रासिद्धम्" इति असिद्धवद्भावात् सवर्णदीर्घाभावः ॥ तमेव इन्द्रं विशिनष्टि । अमित्रसाहः अमित्राणां शत्रूणां सोढा अभिभविता । षह अभिभवे । पचाद्यच् । "चितः" इति अन्तोदात्तत्वम् । समासेपि कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते । तथा अस्तृतः शत्रुभिरहिंसितः । स्तृञ् हिंसायाम् । कर्मणि निष्ठा । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ अहिंसितत्वं कैमुतिकन्यायेनापि आह न यस्येति । यस्य उक्तमहिमोपेतस्य इन्द्रस्य सखा शरणागतो मित्रत्वं प्राप्तः पुरुषो न हन्यते शत्रुभिर्न हिंस्यते । हिंस्यत्वं तस्य दूरापास्तं पराजयोपि नास्तीत्याह । चनशब्दः अप्यर्थे । कदा चन कदाचिदपि न जीयते शत्रुभिर्नाभिभूयते । इन्द्रस्य सख्युरपि एवं किल किमु वक्तव्यम् इन्द्रस्य अस्तृतत्वम् इति पूर्वेण संबन्धः । एवम् अतिशयितमहिमोपेतस्य इन्द्रस्य प्रसादाद् वयमपि शत्रून् जयेम इति वाक्यशेषः । हन्यत इति । हन हिंसागत्योः । "सार्वधातुके यक्" । "०अदुपदेशाल्लसार्वधातुक०" [इति] अनुदात्तत्वे यक्स्वरः शिष्यते । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः । जीयत इति । जि जये । पूर्ववद् यक् । "अकृत्सार्वधातुकयोः०" इति दीर्घः । यच्छब्दस्य अत्रापि संबन्धात् पूर्ववद् निघाताभावः । कदेति । किंशब्दात् "सर्वैकान्यकिंयत्तदः काले दा" इति दा प्रत्ययः । "प्राग् दिशो विभक्तिः" इति विभक्तिसंज्ञायां "किमः कः" इति कादेशः ॥

[इति] चतुर्थेनुवाके चतुर्थं सूक्तम् ॥

"स्वस्तिदाः" इत्यस्य अपराजितगणे पाठात् सांग्रामिकादिकर्मसु गणप्रयुक्तो विनियोग उक्तः ॥

तथा ग्रामगमनादिषु स्वस्त्ययनकामः एतेन सूक्तेन प्रथमं दक्षिणपादप्रक्रमणम् शर्करातृणप्रक्षेपणम् इन्द्रोपस्थानं च कुर्यात् । सूत्रितं हि । "स्वस्तिदाः[१.२१] ये ते पन्थानः[७.५७.२] इत्यध्वानं दक्षिणेन प्रक्रामत्यसंख्याताः शर्करास्तृणानि क्षिप्त्वोपतिष्ठते" इति [कौ०७.१] ॥

एवं पिशाचादिनिवारणकर्मणि उद्वेगविनाशने च एतत् सूक्तम् । "स्वस्त्याद्यं कुरुते" [कौ० ४. १] इति सूत्रकृता अतिदिष्टत्वात् ॥

तथा वेदिकरणस्यादावपि एतत् सूक्तं जपेत् ॥

"वि न इन्द्र" [१. २१. २] इत्यनया पुरीषच्छन्नां[1] चितिं ब्रह्मा अनुमन्त्रयते । तद् उक्तं वैताने । "वि न इन्द्र [१. २१. २] मृगो न "भीमः [७. ८९. ३] वैश्वानरो न ऊतये [६. ३५] इति चितिं पुरीषच्छ[2]-न्नाम" इति [वै० ५. २] ॥

तत्र प्रथमा ॥

स्वस्तिदा विशां पतिर्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः सोमपा अभयंकरः ॥ १ ॥

स्वस्तिऽदाः । विशाम् । पतिः । वृत्रऽहा । विऽमृधः । वशी ।
वृषा । इन्द्रः । पुरः । एतु । नः । सोमऽपाः । अभयम्ऽकरः ॥ १ ॥

स्वस्ति इति अविनाशि नाम । विनाशरहितं शोभनं फलं ददाति प्रयच्छतीति स्वस्तिदाः । ॥ स्वस्तीत्यविनाशिनाम । सु अस्तीति यास्कः [नि० ३. २१] । डुदाञ् दाने । "क्विप् च" इति क्विप् । "समासस्य" इति अन्तोदात्तत्वम् ॥ । विशाम् सर्वासां प्रजानां पतिः पालयिता । ॥ "सावेकाच०" इति विश्शब्दाद् उत्तरस्य आम उदात्तत्वम् ॥ । वृत्रहा । वृत्रो नाम जलाधारभूतो मेघः । तं मेघं वृष्ट्यर्थं हतवान् वृत्रहा ॥ यद्वा वृत्रो नाम त्वष्ट्रा उत्पादितः असुरः । तं हतवान् । ॥ आह च यास्कः । तत् को वृत्रः । मेघ इति नैरुक्तास्त्वाष्ट्रोसुर इत्यैतिहासिकाः [नि० २. १६] इति । तन्नामनिर्वचनं श्रुत्यैव द्वेधा दर्शितम् । "यद् अवर्तयत तद् वृत्रस्य वृत्रत्वम" [तै० सं० २. ५. २. १] इति "यद् इमांल्लोकान् अवृणोत् तद् वृत्रस्य वृत्रत्वम" [तै० सं० २. ५. २. २] इति च । हन हिंसागत्योः । वृत्रशब्दोपपदाद् असाद् भूते काले

---

1 So **S'K**d. 2 So **S'K**d. The *Vaitâna* has: इति चितिंचितिं पुरीषाच्छन्नाम्. The commentator Somâditya adopts and explains the same reading in his *Âkshepa*. See also Dr. Garbe's *Vaitâna*, *in Loc.*

"ब्रह्मभ्रूणवृत्रेषु क्विप्" इति क्विप् । उपपदसमासे "गतिकारकोपपदात् कृत्" इति उत्तरपदप्रकृतिस्वरत्वम् । विमृधः विशेषेण मर्धयिता शत्रूणाम् । मृध हिंसायाम् । "इगुपधज्ञाप्रीकिरः कः" इति कप्रत्ययः । वशी सर्वस्य प्राणिजातस्य वशयिता । वश कान्तौ । "वशिरण्योरप्युपसंख्यानम्" इति भावे अप् । वशोस्यास्तीति वशी । "अत इनिठनौ" इति मत्वर्थीय इनिः । वृषा कामानां वर्षिता । वृषु सेचने इत्यस्मात् कनिन् युवृषितक्षीत्यादिना [उ०१.१५४] औणादिकः कनिन् प्रत्ययः । "ञ्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम् । सोमपाः सोमस्य पाता । पा पाने । अस्मात् सोमशब्दोपपदात् "आतो मनिन्क्वनिब्वनिपश्च" इति विच् । एवम् उक्तमहिमोपेत इन्द्रः अभयंकरः भयराहित्यस्य कर्ता सन् नः अस्माकं संग्रामादौ पुरः पुरस्तात् पूर्वभागे एतु गच्छतु । अभयंकर इति । "उपपदविधौ भयाद्यादिग्रहणं तदन्तविधिं प्रयोजयति" इति वचनात् "मेघर्तिभयेषु कृञः" इति अभयशब्दोपपदादपि करोतेः खच् प्रत्ययः । "अरुर्द्विषदजन्तस्य मुम्" इति पूर्वपदस्य मुम् आगमः । "चितः" इति अन्तोदात्तत्वम् । उपपदसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते । पुर इति । "पूर्वाधरावराणाम् असि पुरधवश्चैषाम्" इति पूर्वशब्दात् असिप्रत्ययः प्रकृतेः पुर् आदेशश्च ॥

द्वितीया ॥

वि न॑ इन्द्र मृधो॑ जहि नी॒चा य॑च्छ पृतन्य॒तः ।
अ॒धमं॑ गमया॒ तमो॒ यो अ॒स्माँ अ॑भि॒दास॑ति ॥ २ ॥

वि । नः॒ । इ॒न्द्र॒ । मृधः॑ । ज॒हि॒ । नी॒चा । य॒च्छ॒ । पृ॒त॒न्य॒तः ।
अधमम् । गमय । तमः॑ । यः । अस्मान् । अभिऽदास॑ति ॥ २ ॥

हे इन्द्र परमैश्वर्ययुक्त देव नः अस्मभ्यम् । "बहुवचनस्य वस्नसौ" इति अस्मदश्चतुर्थ्यन्तस्य नस् आदेशः । तादर्थ्ये चतुर्थी । अस्मदर्थं मृधः । संग्रामनामैतत् । संग्रामान् । मृधेः संपदादिलक्षणः क्विप् । वि जहि विनाशय । अस्मद्विजयार्थं संग्रामकारिणः

शत्रून् मारयेत्यर्थः । ⁂ हन हिंसागत्योः । लोटि "सेर्ह्यपिच्च" इति हिः आदेशः । "हन्तेर्जः" इति जादेशः । तस्य "असिद्धवद् अत्रा भात्" इति असिद्धत्वात् "अतो हेः" इति लुगभावः ⁂ ॥ तथा पृतन्यतः पृतनां सेनाम् आत्मन इच्छतः युद्धोद्योगकारिणः शत्रून् नीचा नीचैः यच्छ नियमय । युद्धार्थं संधीभावत्यागेन न्यग्भूतान् कुर्वित्यर्थः । ⁂ पृतन्यतः । पृतनाशब्दात् "सुप आत्मनः क्यच्" इति क्यच् । "कव्यध्वरपृतनस्यर्चि लोपः" इति आकारलोपः । तदन्तस्य धातुसंज्ञायां लटः शत्रादेशः । क्यजकारेण उदात्तेन सह शपः शतुश्चैकादेशे "एकादेश उदात्तेनोदात्तः" इति शतुरुदात्तत्वात् "शतुरनुमो नद्यजादी" इति अजादिविभक्तेः उदात्तत्वम् । नीचैःशब्दाद् उत्तरस्य सुपः "सुपां सुलुक्०" इत्यादिना डादेशः । डित्करणसामर्थ्यात् टिलोपः ⁂ ॥ अपि च यः शत्रुः अस्मान् अभिदासति क्षेत्रधनाद्यपहारेण उपक्षपयति । ⁂ दसु उपक्षये ⁂ । तं शत्रुम् अधमम् पुनरुत्थानशून्यं निकृष्टं तमः मरणात्मकं गमय प्रापय । ⁂ गमॢ सृपॢ गतौ । अस्मात् णिजन्तात् "जनीजृष्क्नसुरञ्जोऽमन्ताश्च" इति मित्संज्ञायां "मितां ह्रस्वः" इति उपधाह्रस्वत्वम् । "अन्येषामपि दृश्यते" इति सांहितिको दीर्घः ⁂ ॥

तृतीया ॥

वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज ।
वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः ॥ ३ ॥

वि । रक्षः । वि । मृधः । जहि । वि । वृत्रस्य । हनू इति । रुज ।
वि । मन्युम । इन्द्र । वृत्रऽहन् । अमित्रस्य । अभिऽदासतः ॥ ३ ॥

हे वृत्रहन् वृत्रस्य हन्तरिन्द्र त्वं रक्षः । जातावेकवचनम् । बाधकानि रक्षांसि । ⁂ वीत्युपसर्गश्रवणात् जहीति क्रिया अत्रापि संबध्यते ⁂ । वि जहि विनाशय । ⁂ रक्षणीयः अस्मात् सर्वो जन इत्यपादानेर्थे औणादिकः असुन् प्रत्ययः । "ञ्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम् । रक्षो रक्षितव्यम् अस्मात् इति यास्कोपि [नि० ४. १८] ⁂ ॥ तथा मृधः संग्रामान् वि जहि ॥ तथा वृत्रस्य वृत्रवत् प्रवलस्य शत्रोः हनू कपोलौ

वि रुज विभङ्ग्धि । विदारयेत्यर्थः । रुजो भङ्गे । तुदादित्वात् श-प्रत्ययः । "अतो हेः" इति हेर्लुक् । अभिदासतः अभितः अस्मान् उपक्षपयतः अमित्रस्य शत्रोर्मन्युम् क्रोधमपि । अत्रापि उपसर्गश्रवणात् जहीति संबध्यते । वि जहि । स्वस्थानस्थितोपि यथा मद्विषये मन्युं न करोति तथा कुर्वित्यर्थः । मन ज्ञाने । यजिमनिशुन्धिदसिजनिभ्यो युच् [उ०३.२०] इति औणादिको युच् प्रत्ययः । यास्कोप्याह । मन्युर्मन्यतेः कान्तिकर्मणः [नि०१०.२९] इति ॥

चतुर्थी ॥

अपेन्द्र द्विषतो मनोप जिज्यासतो वधम् ।
वि महच्छर्म यच्छ वरीयो यावया वधम् ॥ ४ ॥

अप । इन्द्र । द्विषतः । मनः । अप । जिज्यासतः । वधम् ।
वि । महत् । शर्म । यच्छ । वरीयः । यवय । वधम् ॥ ४ ॥

हे इन्द्र परमैश्वर्ययुक्त देव द्विषतः शत्रोर्मनः हिंसकं क्रूरं मानसम् । अपेत्युपसर्गश्रवणात् योग्या प्रकृता जहीति क्रिया संबध्यते । अप जहि अपहतं कुरु । द्विष अप्रीतौ । अस्मात् लटः शत्रादेशः । "अदिप्रभृतिभ्यः शपः" इति शपो लुक् । "शतुरनुमो नद्यजादी" इति ङस उदात्तत्वम् ॥ तथा जिज्यासतः वयोहानिं तदुपलक्षितं मरणं कर्तुम इच्छतः शत्रोः संबन्धिनं वधम् हननसाधनम् आयुधम् । पूर्ववत् क्रियाध्याहारः । अप जहि । ज्या वयोहानौ । "धातोः कर्मणः समानकर्तृकाद् इच्छायां वा" इति सन् प्रत्ययः । "सन्यङोः" इति द्विर्वचने हलादिःशेषे ह्रस्वे च कृते "सन्यतः" इति अभ्यासाकारस्य इत्वम् । सन्नन्तस्य धातुसंज्ञायां लटः शत्रादेशः । शपः पित्त्वाद् अनुदात्तत्वे शतुर्लसार्वधातुकस्वरेण ङसश्च सुत्वाद् अनुदात्तत्वे "ञ्नित्यादिर्नित्यम्" इति सन्नन्तस्य यद् आद्युदात्तत्वं तदेव शिष्यते ॥ उत्तरोर्धर्चो व्याख्यातः ॥

[इति] पञ्चमं सूक्तम् ॥

[इति] प्रथमकाण्डे चतुर्थोनुवाकः ॥

पञ्चमेनुवाके सप्त सूक्तानि । तत्र "अनु सूर्यम्" इत्येतत् प्रथमं सूक्तम् । तेन हृद्रोगकामिलादिरोगोपशान्तये रक्तवृषभरोममिश्रोदकं पाययेत् । तथा तेनैव रक्तगोचर्मच्छिद्रमणिं गोक्षीरे प्रक्षिप्य संपात्य अभिमन्त्र्य तन्मणिबन्धनम् तत्क्षीरपानं च कारयेत् । तथा रोहिणं हरिद्रौदनं भोजयित्वा तदुच्छिष्टानुच्छिष्टेन आम्रपदं प्रलिप्य खट्वायाम् उपवेश्य तदधः शुकाष्ठशुकगोपीतनकाख्यानां त्रयाणां पक्षिणां सव्यजङ्घायां हरितसूत्रेण आबन्धनम् इत्येवमादिकं सूत्रोक्तं कुर्यात् । सूत्रं च । "अनु सूर्यमिति मन्त्रोक्तस्य लोममिश्रम् आचामयति०" इत्यादि "जातरूपेणापिधाप्य बध्नाति" इत्यन्तम् [कौ० ४. २] ॥

तत्र प्रथमा ॥

अनु सूर्यमुदयतां हृद्द्योतो हरिमा च ते ।
गो रोहितस्य वर्णेन तेन त्वा परि दध्मसि ॥ १ ॥

अनु । सूर्यम् । उत् । अयताम् । हृत्ऽद्योतः । हरिमा । च । ते ।
गोः । रोहितस्य । वर्णेन । तेन । त्वा । परि । दध्मसि ॥ १ ॥

हे व्याधित पुरुष ते तव हृद्द्योतः । हृदयं द्योतयति दीपयति संतापयतीति हृद्द्योतः हृद्रोगः । ✕ द्युत दीप्तौ । अस्मात् हृच्छब्दोपपदात् "कर्मण्यण्" इति अण् प्रत्ययः । उपपदसमासे कृदुत्तरपदप्रकृतिस्वरत्वम् ✕ । यद्वा हृद्रोगजनितः संतापो हृद्द्योतः । ✕ द्युतेर्भावे घञ् ✕ । तथा हरिमा कामिलादिरोगजनितः शारीरो हरिद्वर्णः । ✕ हरिच्छब्दात् "वर्णहढादिभ्यः ष्यञ् च" इति चकाराद् भावे इमनिच् प्रत्ययः । "यचि भम्" इति भसंज्ञायाम् "टेः" इति टिलोपः । "चितः" इति अन्तोदात्तत्वम् ✕ । व्याधिद्वयमपि सूर्यम् गच्छन्तं भानुम् अनुलक्षीकृत्य उदयताम् उद्गच्छतु । उक्तः संतापो हरिद्वर्णश्च अस्माच्छरीराद् उक्रम्य संतापकं हरिद्वर्णं सूर्यमेव प्राप्नोतु इत्यर्थः । ✕ सरतेः सुवतेर्वा क्यपि "राजसूयसूर्य०" इत्यादिना निपा-

---

१ P P² J हृद्द्योतः.

त्यते । क्यपः पित्त्वाद् अनुदात्तत्वे धातुस्वरेण आद्युदात्तत्वम् । "अनुर्लक्षणे" इति लक्षणेर्थे अनोः कर्मप्रवचनीयत्वम् । "कर्मप्रवचनीययुक्ते द्वितीया" इति सूर्यशब्दाद् द्वितीया । अयताम् इति । अय पय गतौ । अनुदात्तेत्त्वाद् आत्मनेपदम् ॥ अनभिमतरोगजनितवर्णापगमानन्तरम् इष्टवर्णसंयोजनम् आह गोरिति । रोहितस्य लोहितवर्णस्य गोः गोजातीयस्य वर्णेन लौहित्येन तेन प्रसिद्धेन तस्मात् पृथक्कृतेन हे रुग्ण त्वा त्वां परि दध्मसि परिदध्मः आच्छादयामः । तव शरीरं प्रकृष्टवर्णोपेतं कुर्म इत्यर्थः । परिपूर्वो दधातिः आच्छादने वर्तते । तथा च निगमः । "परिधत्त धत्त वाससैनम्" इति । "जरां गच्छासि परिधत्स्व वासः" [हिर० स० १९.१.४] इति च । "इदन्तो मसिः" इति मस इदन्तत्वम् । "तिङ्तिङः" इति निघातः ॥

द्वितीया ॥

परि॑ त्वा रोहि॑तैर्व॒र्णैर्दी॑र्घायु॒त्वाय॑ दध्मसि ।
यथा॒यम॑र॒पा अस॒दथो॒ अह॑रितो॒ भुव॑त् ॥ २ ॥

परि॑ । त्वा । रोहि॑तैः । व॒र्णैः । दी॒र्घा॒यु॒ऽत्वाय॑ । द॒ध्म॒सि॒ ।
यथा॑ । अ॒यम् । अ॒र॒पाः । अस॑त् । अथो॒ इति॑ । अह॑रितः । भुव॑त् ॥२॥

उक्तमेव लोहितवर्णपरिधानफलप्रकटनार्थं पुनराह । हे व्याधित त्वा त्वां रोहितैः लोहितैः वर्णैः प्रागुक्तैर्गोसंबन्धिभिः परि दध्मसि परिदध्मः । "व्यवहिताश्च" इति परेरुपसर्गस्य व्यवहितः प्रयोगः । किमर्थम् इति तदाह । दीर्घायुत्वाय दीर्घं शतसंवत्सरपरिमितम् आयुर्जीवनकालो यस्यासौ दीर्घायुः । तस्य भावस्तत्त्वम् । सकारलोपश्छान्दसः । तादर्थ्ये चतुर्थी । सति शिष्टत्वात् समासस्वरत्वं बाधित्वा त्वप्रत्ययस्वरेण अन्तोदात्तत्वम् । तदेव कथम् इत्यत आह । यथा येन प्रकारेण अयम् चिकित्सितः पुरुषः अरपाः । रप इति पाप नाम । रपो रिप्रम् इति पापनामनी भवतः [नि० ४.२१] इति हि यास्कः । न विद्यते रपः पापं यस्यासौ अरपाः । बहु-

1 S′ Kd अनभिमतेरोगजनितेवर्णा°.

व्रीहौ "नञ्सुभ्याम्" इति उत्तरपदान्तोदात्तत्वम् । अपगतपापः असत् भवेत् । अस्तेर्लेटि अडागमः ॥ अथो पापक्षयानन्तरमेव अहरितः कामिलादिरोगजनितहरिद्वर्णरहितः भुवत् भवेत् । रोगनिदानभूतपापक्षये सति तच्छान्तौ सत्याम् यथा दीर्घायुर्भवति तथा परिदध्म इति वाक्यार्थः । भू सत्तायाम् । अस्मात् लेटि अडागमः । "इतश्च लोपः परस्मैपदेषु" इति इकारलोपः । "बहुलं छन्दसि" इति शपो लुक् । "भूसुवोस्तिङि" इति गुणप्रतिषेधे उवङ् ॥

तृतीया ॥

या रोहिणीर्देवत्या३ गावो या उत रोहिणीः ।
रूपंरूपं वयोवयस्ताभिष्ट्वा परि दध्मसि ॥ ३ ॥

याः । रोहिणीः । देवत्याः । गावः । याः । उत । रोहिणीः ।
रूपमऽरूपम् । वयःऽवयः । ताभिः । त्वा । परि । दध्मसि ॥ ३ ॥

देवत्याः देवतासु भवाः । "भवे छन्दसि" इति यत् प्रत्ययः । देवसंबन्धिन्यो रोहिणीः रोहिण्यः लोहितवर्णाः । रुह बीजजन्मनि प्रादुर्भावे [च] इत्यस्मात् रुहे रश्च लो वा [उ० ३. ९४] इति औणादिक इतन् प्रत्ययः । नित्त्वाद् आद्युदात्तत्वम् । ततो "वर्णाद् अनुदात्तात् तोपधात् तो नः" इति ङीप् । तत्संनियोगेन तकारस्य नकारः । ङीपः पित्त्वाद् अनुदात्तत्वे नित्स्वर एव शिष्यते । जसि "वा छन्दसि" इति पूर्वसवर्णदीर्घः । उक्तवर्णा याः कामधेन्वादयो गावः सन्ति । उत अपि च याः मनुष्यसंबन्धिन्यो रोहिणीः रोहिण्यः लोहितवर्णा गावः सन्ति ताभिः उभयविधाभिर्गोभिः रूपंरूपम् सर्वगोव्यक्तिगतं कृत्स्नम् अरुणरूपं तथा वयोवयः सर्वव्यक्तिगतं कृत्स्नं यौवनम् । उभयत्र "नित्यवीप्सयोः" इति द्विर्वचनम् । "तस्य परम् आम्रेडितम्" इति परस्य आम्रेडितसंज्ञायाम् "अनुदात्तं च" इति अनुदात्तत्वम् । तत् सर्वम् आहृत्य हे रुग्ण त्वा त्वां परि दध्मसि परिदध्मः । गोगतवर्णवद् उज्ज्वलैर्वर्णवयोविशेषैस्त्वदीयं शरीरं संयोजयाम इत्यर्थः ॥ यद्वा ।

ताभिः उक्तवर्णोपेताभिर्गोभिः हे रुग्ण त्वां परि दध्मसि । परिधानप्रकारमेव आह । रूपंरूपम् रोगविशेषेण दूषितं सर्वशरीरगतं रूपं वयोवयः उक्तप्रकारं वयश्च परि दध्मसि । ताभिष्ट्वेति । "त्वामौ द्वितीयायाः" इति युष्मदस्त्वादेशः । "युष्मत्तत्ततक्षुष्वन्तः पादम्" इति सकारस्य षत्वम् ॥

चतुर्थी ॥

सुकेषु ते हरिमाणं रोपणाकासु दध्मसि ।
अथो हारिद्रवेषु ते हरिमाणं नि दध्मसि ॥ ४ ॥

सुकेषु । ते । हरिमाणम् । रोपणाकासु । दध्मसि ।
अथो इति । हारिद्रवेषु । ते । हरिमाणम् । नि । दध्मसि ॥ ४ ॥

पूर्वं गवादिगतस्य उज्ज्वलस्य रक्तवर्णस्य रुग्णशरीरे प्रवेशोभिहितः । तच्छरीरे पूर्वम् अवस्थितस्य रोगजनितस्य हरिद्वर्णस्य का तर्हि गतिरिति तद् उच्यते । हे रोगार्त ते तव शरीरगतं हरिमाणम् रोगजनितं हरिद्वर्णम् । "वर्णदृढादिभ्यः ष्यञ् च" इति हरिच्छब्दाद् भावेर्थे इमनिच् । "यचि भम्" इति भसंज्ञायाम् "टेः" इति टिलोपः । "चितः" इत्यन्तोदात्तत्वम् । तद्वर्णं शुकेषु कीरेषु तथा रोपणाकासु काष्ठशुकाख्येषु हरिद्वर्णेषु पक्षिषु नि दध्मसि निदध्मः । वर्णतः समानाकृतिषु पक्षिविशेषेषु स्थापयाम इत्यर्थः । "इदन्तो मसिः" इति मस इदन्तत्वम् ॥ अथो अपि च हारिद्रवेषु गोपीतनकाख्येषु हरिद्वर्णेषु पक्षिविशेषेषु ते त्वदीयं हरिमाणम् हरिद्वर्णं नि दध्मसि निदध्मः स्थापयामः ॥

[इति] पञ्चमेनुवाके प्रथमं सूक्तम् ॥

"नक्तंजाता" "सुपर्णो जातः" इति सूक्तद्वयेन श्वेतकुष्ठापनोदनाय भृङ्गराजहरिद्रेन्द्रवारुणीनीलिकाः पिष्ट्वा शुष्कगोमयेन श्वित्रप्रदेशम् आलोहि-

---

१ K V S शुकेषु. We with A B Bp B^{h} D R S^{m}. २ So P P^{3} J. K V recite शु°.

---

1 Here S′ Kd read इदन्तो मसीति.

तदर्शनं प्रघृष्य लेपयेत् ॥ पलितनाशनेपि पलितानि आच्छिद्य सूक्तद्वयेन पूर्ववद् विलिम्पेत् ॥ उक्तरोगद्वयशान्तये अनेनैव सूक्तद्वयेन आज्यहोमादीनि मारुतकर्माणि च वृष्टिकर्मोक्तवत् कुर्यात् ॥ सूत्रितं च। "नक्तंजाता[१.२३] सुपर्णो जातः[१.२४] इति मन्त्रोक्तं शकृता आलोहितं प्रघृष्य आलिम्पति पलितान्याच्छिद्य मारुतान्यपिहितः" इति [कौ० ४. २] ॥

तत्र प्रथमा ॥

नक्तंजातास्योषधे रामे कृष्णे असिक्नि च।
इदं रजनि रजय किलासं पलितं च यत् ॥ १ ॥

नक्तमऽजाता। असि। ओषधे। रामे। कृष्णे। असिक्नि। च।
इदम्। रजनि। रजय। किलासम्। पलितम्। च। यत् ॥ १ ॥

हे ओषधे। ओषः फलपाकः अस्यां धीयत इति ओषधिः। डुधाञ् धारणपोषणयोः। तस्मात् "कर्मण्यधिकरणे च" इति अधिकरणे किप्रत्ययः। ततस्तत्पुरुषसमासे कृदुत्तरपदप्रकृतिस्वरेण अन्तोदात्तत्वे प्राप्ते दासीभारादिषु पाठात् पूर्वपदप्रकृतिस्वरत्वम्। पूर्वपदं च घञन्तत्वाद् आद्युदात्तम्। अत्र तु संबुद्ध्यन्तत्वाद् "आमन्त्रितस्य च" इति आष्टमिकं सर्वानुदात्तत्वमेव। हे ओषधे हरिद्राख्ये त्वं नक्तं रात्रौ जाता उत्पन्ना असि भवसि। अतस्त्वं श्वैत्यनिवर्तनेन कार्ष्यम् आपादयितुं शक्ता भवसीत्यर्थः ॥ तथा हे रामे। व्याधितो जनः अनया ओषध्या रमत इति रामा भृङ्गराजाख्या ओषधिः। रमु क्रीडायाम्। अस्मात् करणे घञ्। "कर्षात्वतो घञोन्त उदात्तः" इत्यन्तोदात्तत्वे प्राप्ते अस्य आमन्त्रितस्य पादादित्वेन आष्टमिकस्य सर्वानुदात्तस्य अप्राप्तेः "आमन्त्रितस्य च" इति षाष्ठिकम् आद्युदात्तत्वम्। तथा हे कृष्णे कृष्णवर्णे कृष्णवर्णापादिके वा इन्द्रवारुणि हे असिक्नि असितवर्णे असितवर्णापादिके वा नीलि। सर्वसमुच्चयार्थश्चकारः। असितशब्दात् "वर्णाद् अनुदात्तात् तोपधात् तो नः" इति प्राप्तयोर्ङीब्नकारयोः "असितपलितयोः

1 S' Kd वृष्टिकर्मणोर्मोक्तवत्.

प्रतिषेधो वक्तव्यः" इति प्रतिषेधे "छन्दसि क्रम एक इच्छन्ति" इति वचनात् ङीप्। तत्संनियोगेन तकारस्य क्रादेशः। कृण्णे असिक्नि इत्यनयोः "आमन्त्रितं पूर्वम् अविद्यमानवत्" इति पूर्वपूर्वामन्त्रितस्य अविद्यमानवद्भावेन पादादित्वात् षाष्ठिकम् आद्युदात्तत्वमेव। न च "नामन्त्रिते समानाधिकरणे सामान्यवचनम्" इति अविद्यमानवद्भावनिषेधः। भिन्नार्थवृत्तित्वेन व्याख्यातत्वात्। पूर्वम् ओषधिशब्देन निर्दिष्टाया हरिद्राया जननक्रियासंबन्धित्वेन कुण्ठितशक्तित्वात् रञ्जनक्रियायामपि संबन्धं दर्शयितुं पुनराह रजनीति। यद्वा। अत्र निर्दिष्टानां रामादीनां चतसृणाम् ओषधीनामपि उत्पत्तिरुच्यते नक्तंजातास्योषध इति। हे ओषधे रामादिरूपे त्वं नक्तंजातासि। इत्यतो न पुनरुक्तिशङ्कावकाशः। हे रजनि। रञ्जयति स्वसंसृष्टं वस्त्रादिकम् अर्थम् इति रजनी। रञ्ज रागे। कर्तरि ल्युट्। "रजकरजनरजःसूपसंख्यानम्" इति उपधानकारलोपः। टित्वात् ङीप्। पदात् परत्वाद् "आमन्त्रितस्य च" इति आष्टमिकं सर्वानुदात्तत्वम्। हे रामाद्योषधे त्वम् इदम् वक्ष्यमाणम् अङ्गं रजय श्वित्रादिदोषनिबर्हणेन स्वकीयं रागं संश्लेषय। अत्र रागापादिकानाम् ओषधीनां बहुत्वेपि प्रत्येकापेक्षया एकवचनम्। रञ्ज रागे। अस्मात् णिचि "रञ्जेर्णौ मृगरमण उपसंख्यानम्" इति विहितो नलोपश्छान्दसत्वाद् अत्रापि भवति। "आमन्त्रितं पूर्वम् अविद्यमानवत्" इति रजनिशब्दस्य अविद्यमानवद्भावेपि इदंशब्दापेक्षया "तिङ्तिङः" इति निघातः। तदेवाङ्गम् आह। किलासः कुष्ठरोगः। तद्युक्तम् अङ्गम् तथा पलितम् जरावस्थाप्राप्तं केशानां शौक्ल्यं तद्युक्तम् अङ्गं च। उभयत्रापि अर्शआदित्वाद् अच्। ईदृशं यद् अङ्गम् अस्ति इदम् इति पूर्वेण संबन्धः॥

द्वितीया॥

किलासं च पलितं च निरितो नाशया पृषत्।
आ त्वा स्वो विशतां वर्णः परा शुक्लानि पातय॥ २॥

---

१ $\overset{h}{B}$ K S V पृथक्. $\overset{h}{B}$ once read पृषत्. We with A B Br D R $\overset{m}{S}$ P $\overset{2}{P}$ J and Rw.

किलासम्। च। पलितम्। च। निः। इतः। नाशय। पृषत्।
आ। त्वा। स्वः। विशताम्। वर्णः। परा। शुक्लानि। पातय॥ २॥

किलासम् पलितम् उक्तलक्षणम्। परस्परसमुच्चयार्थौ चकारौ। इतः अस्मात् व्याधिदूषितात् शरीरात् पृथक् पृथक्कृत्य हे ओषधे त्वं निर्णाशय निरवशेषं घातय। ॥ "व्यवहिताश्च" इति निसो व्यवहितक्रियया संबन्धः ॥ अनन्तरम् हे रुग्ण त्वा त्वां स्वः स्वकीयः प्राग् अवस्थितो वर्णः लौहित्यादिरूपः आ विशताम् प्रविशताम्॥ शौक्ल्यस्य पुनरुद्भवपरिहाराय आह। शुक्लानि शरीरकेशगतशुक्लरूपाणि परा पातय पराचीनं दूरं प्रेरय। यथा पुनरेनं पुरुषं न स्पृशन्ति तथा कुरु इत्यर्थः॥

तृतीया॥

असितं ते प्रलयनमास्थानमासितं तव।
असिन्नयस्योषधे निरितो नाशया पृषत्॥ ३॥

असितम्। ते। प्रऽलयनम्। आऽस्थानम्। असितम्। तव।
असिन्नी। असि। ओषधे। निः। इतः। नाशय। पृषत्॥ ३॥

अनया नीलीमेव अवयुत्य प्रार्थयते। हे नीलि[2] ते तव प्रलयनम्। प्रकर्षेण लीयते संश्लिष्यते अत्रेति प्रलयनम् उत्पत्तिस्थानम्। असितम् कृष्णवर्णं भवति॥ तथा तव आस्थानम्। पुरुषैः आनीता आ समन्तात् तिष्ठत्यत्रेति आस्थानम् प्रक्षेपणभाजनादिरूपम्। असितम् कृष्णं भवति। प्र-पूर्वात् लीङ् श्लेषणे इत्यस्मात् आङ्पूर्वात् तिष्ठतेश्च "करणाधिकरणयोश्च" इति अधिकरणे ल्युटि "लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वम॥ कुत एतद् इत्यत आह। हे ओषधे नीलि त्वम् असिन्नी असितवर्णा असि भवसि। यतस्तव अयं स्वभावः अतः इतः अस्मात् श्वित्रादिरोगदूषिताद् अङ्गात् आलेपादिना त्वत्संबद्धात्[3] पृथक्* किलासं पलितं च पृथक्कृत्य निर्णाशय[4] निःशेषेण विनष्टं कुरु॥

---

१ See foot-note १ on the previous page. २ So P P J.

---

1 S' Kd नीलमेव. 2 S' Kd नील. 3 S' Kd त्वत्संबंधात्. 4 S' Kd निर्नाशय.

चतुर्थी ॥

अस्थिजस्य किलासस्य तनूजस्य च यत् त्वचि ।
दूष्या कृतस्य ब्रह्मणा लक्ष्म श्वेतमनीनशम् ॥ ४ ॥
अस्थिऽजस्य । किलासस्य । तनूऽजस्य । च । यत् । त्वचि ।
दूष्या । कृतस्य । ब्रह्मणा । लक्ष्म । श्वेतम् । अनीनशम् ॥ ४ ॥

अनया अस्थ्यादिधातुगतस्य उत्साद्यस्य[1] किलासस्यैव निवृत्तिम् आह । अस्थिजस्य तथा तनूजस्य । अत्र तनूशब्देन त्वगस्थ्नोर्मध्यवर्ती मांसधातुः उच्यते । तस्माद् यज्जातं तस्य । जनी प्रादुर्भावे । अस्माद् अस्थिशब्दोपपदात् तनूशब्दोपपदाच्च "पञ्चम्याम् अजातौ" इति डप्रत्ययः । "टेः" इति टिलोपः । कृदुत्तरपदप्रकृतिस्वरेण अन्तोदात्तत्वम् । तथा त्वचि त्वग्धातौ यद् वर्तमानं तस्य सर्वस्य किलासस्य कुष्ठव्याधेः तथा दूष्या । दूषयति प्राणिनं हिनस्तीति दूषिः शत्रूत्पादिता कृत्या । तया कृतस्य उत्पादितस्य च किलासस्य [लक्ष्म] लक्ष्मभूतं चिह्नं श्वेतम् शरीरावयवगतं श्वैत्यम् । ब्रह्मणा अनेन प्रयुज्यमानेन मन्त्रेण अनीनशम् नाशितवान् अस्मि । नश अदर्शने । अस्मात् ण्यन्तात् लुङि "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति च्लेश्चङ् । "चङि" इति द्विर्वचने "सन्वल्लघुनि चङ्परेऽनग्लोपे" इति सन्वद्भावः । "सन्यतः" इति अभ्यासस्य इत्वम् । "दीर्घो लघोः" इति दीर्घः । "तिङ्तिङः" इति निघातः ॥

[इति] पञ्चमेनुवाके द्वितीयं सूक्तम् ॥

"सुपर्णो जातः" इति सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः ॥

तत्र प्रथमा ॥

सुपर्णो जातः प्रथमस्तस्य त्वं पित्तम् आसिथ ।
तद् आसुरी युधा जिता रूपं चक्रे वनस्पतीन् ॥ १ ॥
सुऽपर्णः । जातः । प्रथमः । तस्य । त्वम् । पित्तम् । आसिथ ।

---

1 S' Kd उत्साधस्य. The emendation is conjectural.

तत्। आसुरी। युधा। जिता। रूपम्। चक्रे। वनस्पतीन्॥ १॥

अस्य औषधस्य वीर्यातिशयं प्रकटयितुम् आख्यायिकया उत्पत्तिम् आह। सुपर्णः शोभनपक्षोपेतो गरुत्मान्। बहुव्रीहौ समासे "नञ्सुभ्याम्" इति उत्तरपदान्तोदात्तत्वम्। प्रथमः आदिभूतः सन् जातः उत्पन्नः॥ हे नील्याद्योषधे त्वं तस्य गरुत्मतः पित्तम् शरीरगतः पित्ताख्यो दोषः आसिथ पूर्वं बभूविथ। अस्तेर्लिटि "छन्दस्युभयथा" इति लिटः सार्वधातुकसंज्ञायाम् "अस्तेर्भूः" इति भूभावाभावः। आर्धधातुकसंज्ञाया अपि सद्भावाद् इडागमश्च॥ तत् तथाविधं पित्तम् आसुरी असुराणां माया काचन स्त्री। "मायायाम् अण्" इति अण् प्रत्ययः। "टिड्ढाणञ्०" इति ङीप्। सा युधा युद्धेन। युध संप्रहारे। "क्विप् च" इति क्विप्। सुपर्णेन सह संग्रामं कृत्वा जिता जितवती। जि जये। अस्मात् कर्तरि क्तः॥ जयेन लब्धं तत् पित्तं रूपं चक्रे। ओषध्यात्मना सेव्यम् आकारम् अकार्षीत्। तदेव रूपम् आह। वनस्पतीन् नील्यादीन्॥ एतेषां नील्यादीनां सुपर्णपित्तकार्यत्वरूपप्रतिपादनेन अमोघवीर्यत्वम् उक्तं भवति॥

द्वितीया॥

आसुरी चक्रे प्रथमेदं किलासभेषजम् इदं किलासनाशनम्।
अनीनशत् किलासं सरूपाम् अकरत् त्वचम्॥ २॥

आसुरी। चक्रे। प्रथमा। इदम्। किलासऽभेषजम्। इदम्। किलासऽनाशनम्।
अनीनशत्। किलासम्। सऽरूपाम्। अकरत्। त्वचम्॥ २॥

आसुरी पूर्वमन्त्रोक्ता असुरमायारूपा स्त्री प्रथमा श्वित्रचिकित्सकानाम् आदिभूता सती इदम् सुपर्णपित्तेन निर्मितं नील्यादिकं किलासभेषजम् किलासस्य श्वित्रस्य निवर्तकम् औषधं चक्रे कृतवती॥ अतः इदम् नील्यादि-

---

१ P J चक्रे. We with $\overset{2}{P}$ K.

---

1 S' Kd श्वित्रसचिकि°.

कम् इदानीमपि लोके किलासनाशनम् किलासस्य रोगस्य निवर्तकं भवति । ॒नश अदर्शने । "कृत्यल्युटो बहुलम्" इति कर्तरि ल्युट् ॒ ॥ तद् नील्याद्यौषधं प्रयुज्यमानं सत् किलासम् श्वित्ररोगम् अनीनशत् नाशयति स्म । ॒नशेर्ण्यन्तात् लुङि चङि रूपम ॒ ॥ तथा त्वचम् त्वग्धातुं श्वित्रदूषितं सरूपाम् समानरूपाम् । ॒"ज्योतिर्जनपद०" इत्यादिना समानशब्दस्य सभावः ॒ । श्वित्ररहितत्वचा समानवर्णाम् अकरत् अकार्षीत् । ॒डुकृञ् करणे । अस्मात् लुङि "कृमृदरुहिभ्यश्छन्दसि" इति च्लेः अङ् आदेशः । "ऋदृशोऽङि गुणः" इति गुणः ॒ ॥

तृतीया ॥

सरू॑पा नाम॑ ते मा॒ता सरू॑पो नाम॑ ते पि॒ता ।
स॒रू॒प॒कृत् त्वमो॑षधे॒ सा सरू॑पमि॒दं कृ॑धि ॥ ३ ॥

सऽरू॑पा । नाम॑ । ते॒ । मा॒ता । सऽरू॑पः । नाम॑ । ते॒ । पि॒ता ।
स॒रू॒पऽकृत् । त्वम् । ओ॒ष॒धे॒ । सा । सऽरू॑पम् । इ॒दम् । कृ॒धि॒ ॥ ३ ॥

हे ओषधे ते तव माता जननी भूमिः सरूपा त्वया समानरूपा कृष्णवर्णैव ॥ तथा ते तव पिता द्यौः । "द्यौः पिता पृथिवी माता" [तै॰ ब्रा॰ ३.७.५.४] इति हि निगमः । बीजविशेषो वा पितृशब्देन विवक्षितः । सोपि सरूपः समानवर्णः ॥ उभयत्रापि नामशब्दः प्रसिद्धपरः ॥ हे ओषधे नील्यादिरूपे त्वम् सरूपकृत् । स्वसंसृष्टं पदार्थम् आत्मना समानवर्णं करोति सा सरूपकृत् । तादृश्यसि । ॒करोतेः "क्विप् च" इति क्विप् ॒ ॥ सा समानरूपमातापितृजाता त्वम् इदम् श्वित्ररोगदूषितम् अङ्गं सरूपं कृधि त्वया समानवर्णं कुरु । ॒करोतेर्लोटि "श्रुशृणुपृकृवृभ्यश्छन्दसि" इति हेर्धिरादेशः ॒ ॥

चतुर्थी ॥

श्यामा॑ सं॒रू॒पं॒क॒र॒णी पृ॒थि॒व्या अध्यु॑द्भृता ।

---

१ $\overset{h}{B}$DKRP$\overset{2}{P}$JV श्॒यामा. We with A$\overset{m}{S}$. २ $\overset{m}{S}$ अध्युद्भृता. We with A$\overset{h}{B}$DKR P$\overset{2}{P}$JV.

इदमू षु म्र सांधय पुनां रूपाणिं कल्पय ॥ ४ ॥
श्यामा । सरूपमऽकरंणी । पृथिव्याः । अधिं । उत्ऽभृंता ।
इदम् । ऊं इतिं । सु । म्र । साधय । पुनंः । रूपाणिं । कल्पय ॥ ४ ॥

श्यामा श्यामवर्णा सरूपंकरणी । असरूपं सरूपं क्रियते अनयेति विगृह्य उपपदान्तरेपि "आढ्यसुभग०" इत्यादिना व्यत्ययेन कृञः करणे ख्युन् । "खित्यनव्ययस्य" इति पूर्वपदस्य मुम् आगमः । यद्वा । सरूपं क्रियते अनयेति "करणाधिकरणयोश्च" इति कृञः करणे ल्युट् । पूर्वपदे सुपो लुगभावश्छान्दसः । उभयत्रापि "टिड्ढाणञ्०" इति ङीप् । तादृशी त्वम् पृथिव्या अधि भूमेरुपरि उद्भृता[1] आसुर्या मायया उत्पादिता ॥ अतः कारणात् हे ओषधे त्वम् इदम् किलासाक्रान्तम् अङ्गं सु म्र साधय सुष्ठु रोगविनिर्मुक्तं कुरु । उशब्दः पादपूरणः । पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिदु इति हि यास्कः [नि. १. ९] ॥ तथा रूपाणि व्याधिसंभवात् पूर्वम् अवस्थितानि पुनः व्याधिनिबर्हणानन्तरमपि कल्पय संपादय । कृपू सामर्थ्ये । असाद् णिच् । "कृपो रो लः" इति लत्वम् । पुनरिति । रेफस्य "रो रि" इति लोपे कृते "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति दीर्घः ॥

[इति] पञ्चमेनुवाके तृतीयं सूक्तम् ॥

ऐकाहिकादिशीतज्वरसंततज्वरवेलाज्वरादिशान्तये "यदग्निरापः" इति सूक्तं जपेत् । लोहकुठारम् अग्नौ संताप्य उष्णोदकमध्ये स्थापयित्वा तेनोदकेन व्याधितम् अभिषिञ्चेत् । तथा च कौशिकः । "यदग्निरिति जपति परशुं तापयति क्वाथयत्यवसिञ्चति" इति [कौ० ४. २] ॥

तत्र प्रथमा ॥

यदग्निरापो अदहत् प्रविश्य यत्राकृण्वन् धर्मधृतो नमांसि ।
तत्र त आहुः परमं जनित्रं स नः संविद्वान् परि वृङ्ग्धि तक्मन् ॥ १ ॥

---

1 S' Kd °परिशब्दउद्भता for °परि उद्भृता.

यत् । अग्निः । आपः । अदहत् । प्रऽविश्य । यत्र । अकृण्वन् । धर्मऽधृतः । नमांसि ।
तत्र । ते । आहुः । परमम् । जनित्रम् । सः । नः । सम्ऽविद्वान् । परि । वृङ्धि । तक्मन् ॥ १ ॥

अग्निः अङ्गनादिगुणयुक्तो देवः आपः अपः । ॐ व्यत्ययेन जस् ॐ । उदकानि प्रविश्य तप्तपरशुद्वारा अन्तरनुप्रविश्य अदहत् काष्ठम् अकार्षीत् । ॐ दह भस्मीकरणे । "निपातैर्यद्यदिहन्त०" इति निघातप्रतिषेधः ॐ । ततः उदकेषु औष्ण्यगुणविशिष्टोग्निर्वर्तत इत्यर्थः । अग्निविशिष्टेन उष्णोदकेन ज्वरितः अवसिच्यते इति यत् तस्मात् कारणात् हे तक्मन् कृच्छ्रजीवनकारिन् । ॐ तकि कृच्छ्रजीवने । अस्माद् औणादिको मनिन् प्रत्ययः ॐ । तथाविध ज्वर संविद्वान् सम्यक् स्वकारणम् अग्निं जानन् । ॐ विद ज्ञाने इत्यस्मात् लटः शत्रादेशः । "विदेः शतुर्वसुः" इति वस्वादेशः ॐ । स त्वं नः अस्मान् उष्णोदकसिक्तगात्रान् परि वृङ्धि परिवर्जय । अस्मच्छरीरं विहाय स्वकारणभूतेन अग्निना सह निर्गच्छेत्यर्थः । ॐ वृजी वर्जने । अस्मात् लोटि "हुझल्भ्यो हेर्धिः" इति हेर्धिरादेशः । रुधादित्वात् श्नम् । "चोः कुः" इति कुत्वम् । "श्नसोरल्लोपः" इति अकारलोपे अनुस्वारपरसवर्णौ ॐ ॥ अग्नेः कारणत्वे भवेद् एवम् तदेव कुत इत्यत आह यत्रेति । धर्मधृतः । धर्मशब्देन अत्र यागदानादिरुच्यते । तं धारयन्ति अनुतिष्ठन्तीति धर्मधृतः । ॐ धृञ् धारणे । अस्माद् धर्मशब्दोपपदात् "क्विप् च" इति क्विप् । उपपदसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन धातुस्वर एव शिष्यते ॐ । तथाविधा यजमाना यत्र यस्मिन्नग्नौ नमांसि । अन्ननामैतत् । हविर्लक्षणानि अन्नानि । ॐ नम प्रह्वत्वे । अस्मात्[1] औणादिकः असुन् प्रत्ययः । "ञ्नित्यादिर्नित्यम्" इति आद्युदात्तत्वम ॐ । अकृण्वन् अकुर्वन् अयजन्[2] अजुहवुर्वा । ॐ कृवि हिंसाकरणयोश्च । इदित्त्वाद् नुम् । लङि "धिन्विकृण्व्योर च" इति उप्रत्ययः तत्सं-

1 S′Kd नमप्रह्व for नम प्रह्वत्वे. 2 S′Kd अपतन् for अयजन् which is my conjecture.

नियोगेन अकारश्च अन्तादेशः । तस्य अन्त्यलोपे स्थानिवद्भावात् लघूपध-गुणाभावः । "लुङ्लङ्लृङ्क्ष्वडुदात्तः" इति अडागम उदात्तः । "निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्" इति निघातप्रतिषेधः ॥ । तत्र तथाविधे अग्नौ हे ज्वर ते तव परमम् उत्कृष्टं जनित्रम् जन्म आहुः कथयन्ति । दोषवशाज्जाठराग्नेरेवायं ज्वरो विकार इति हि चिकित्सकाना प्रसिद्धिः । ॥ ब्रूञ् व्यक्तायां वाचि । "ब्रुवः पञ्चानाम् आदित आहो ब्रुवः" इति झेः उस् आदेशः प्रकृतेः आहादेशश्च । जनित्र-म इति । जनी प्रादुर्भावे । अस्माद् भावे औणादिक इत्रप्रत्ययः । प्रत्ययाद्युदात्तत्वम् ॥ । यद्वा हे तक्मन् सेकसाधनभूता अपः प्रविश्य अग्निस्त्वाम् अदहत् धक्ष्यतीति यत् । ॥ "छन्दसि लुङ्लङ्लिटः" इति भविष्यदर्थे लङ् ॥ । अतो हेतोः अस्मान् परित्यज्य सेकोदकग-ताग्निना स्वकारणभूतेन सह निर्गच्छेत्यर्थः ॥ अन्यत् पूर्ववद् योज्यम् ॥

द्वितीया ॥

यद्यर्चिर्यदि वासि शोचिः शकल्येषि यदि वा ते जनित्रम् ।
हूडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्ग्धि तक्मन् ॥ २ ॥

यदि । अर्चिः । यदि । वा । असि । शोचिः । शकल्यडेषि । यदि । वा ।
ते । जनित्रम् ।
हूडुः । नाम । असि । हरितस्य । देव । सः । नः । सम्ऽविद्वान् । परि ।
वृङ्ग्धि । तक्मन् ॥ २ ॥

हे तक्मन् कृच्छ्रजीवनकारिन् ज्वर त्वं यदि अर्चिः अर्चिष्मान् औ-ष्णयगुणयुक्तोसि भवसि । यदि वा शोचिः शोचकः शरीरसंतापकोसि । यदि वा ते तव जनित्रम् जन्म शकल्येपि । शकलानां समूहः शक-ल्यः । ॥ समूहार्थे यप्रत्ययः ॥ । शकल्यं दाह्यं काष्ठसमूहम् इ-

---

१ S^{m} हूढु°. Bp हूडु° or रूढु°. V S रूढु°. We with A B B^{h} D K R Rw. २ P^{2} हुडुः; P^{2} J हूडुः: which we adopt.

---

1 S′ Kd ज्वरि for ज्वर.

च्छतीति शकल्येट् अग्निः । ✕ इषु इच्छायाम् । अस्मात् "अन्येभ्योपि दृश्यन्ते" इति विच् प्रत्ययः ✕ । अग्नौ । तव जन्मेत्यर्थः । तथापि हे देव दीप्यमान ज्वर त्वं हरितस्य पीतवर्णस्य रूँढुः रोहकः पुरुषशरीरे उत्पादकः । ✕ रुह बीजजन्मनि प्रादुर्भावे[च] । अस्माद् औणादिकस्तुन् प्रत्ययः । "हो ढः" इति ढत्वम् । "झषस्तथोर्धोऽधः" इति तकारस्य धत्वम् । ततष्टुत्वे ढो ढे लोपे च कृते "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति धातोरुकारस्य दीर्घः ✕ । नामशब्दः प्रसिद्धौ । रूढुः इति प्रसिद्धः असि भवसि । यद्यपि ते बहूनि नामानि सन्ति तथापि इदमेव नाम प्रसिद्धम् इत्यर्थः ॥ व्याख्यातम् अन्यत् ॥

तृतीया ॥

यदि शोको यदि वाभिशोको यदि वा राज्ञो वरुणस्यासि पुत्रः ।
हूडुर्नामासि हरितस्य देव स नः संविज्ञान् परि वृङ्ग्धि तक्मन् ॥ ३ ॥

यदि । शोकः । यदि । वा । अभिऽशोकः । यदि । वा । राज्ञः । वरुणस्य । असि । पुत्रः ।
हूडुः । नाम । असि । हरितस्य । देव । सः । नः । सम्ऽविज्ञान् । परि । वृङ्ग्धि । तक्मन् ॥ ३ ॥

हे तक्मन् शीतज्वर त्वं यदि शोकः शरीरस्यान्तःशोचकः । यदिशब्दयोगात् असीति क्रिया अत्रापि संबध्यते । तापकोसि भवसि । यदि वा अभिशोकः अभितः सर्वतः कृत्स्नस्य शरीरस्य शोचकोसि । ✕ शुच शोके । बाहुलकात् कर्तरि घञ् । "चजोः कुघिण्ण्यतोः" इति कुत्वम् ✕ । यदि वा राज्ञः राजमानस्य वरुणस्य पापकारिणां शिक्षकस्य । "अनृते खलु वै क्रियमाणे[वरुणो] गृह्णाति" [तै० ब्रा० १. ७. २. ६] इति हि श्रुतिः । तथाविधस्य देवस्य पुत्रः असि भवसि । अनेन शीतज्वरस्य उत्पत्तिरुक्ता ॥ अन्यत् पूर्ववद् योज्यम् ॥

---

१ See footnote १ to previous *rich*. २ See footnote २ to previous *rich*.

---

1 S′ Kd °जन्मप्रादुर्भावे.

चतुर्थी ॥

नमः शीताय तक्मने नमो रूराय शोचिषे कृणोमि ।
यो अन्येद्युरुभयद्युरभ्येति तृतीयकाय नमो अस्तु तक्मने ॥ ४ ॥

नमः । शीताय । तक्मने । नमः । रूराय । शोचिषे । कृणोमि ।
यः । अन्येद्युः । उभयद्युः । अभिऽएति । तृतीयकाय । नमः । अस्तु ।
तक्मने ॥ ४ ॥

शीताय शीतजनकाय तक्मने कृच्छ्रजीवनकारिणे रोगाय नमः नमस्कारं कृणोमि । ‘‘नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च’’ इति चतुर्थी ॥ तथा रूराय शीतानन्तरभाविने ज्वराय शोचिषे शोचकाय[1] नमस्कृणोमि करोमि । कृवि हिंसाकरणयोश्च । शीतरूरौ शाखान्तरे स्पष्टम् आम्नायेते । ‘‘स इन्द्र आत्मनः शीतरूरावजनयत् तच्छीतरूरयोर्जन्म’’ [तै० सं० २. ५. २. ३] इति ॥ शीतज्वरविशेषान् आह । अन्येद्युः अन्यस्मिन् परदिने यः शीतज्वरः अभ्येति आगच्छति । ‘‘यङ्वृत्तान्नित्यम्’’ इति तिङो निघाताभावः । तथा उभयद्युः उभयस्मिन् द्वितीयेहनि यः शीतज्वर आयाति । ‘‘सद्यः परुत्परारि०’’ इत्यादिना अन्येद्युः उभयेद्युः इति शब्दौ निपातितौ । उभयद्युः इत्यत्र एत्वाभावश्छान्दसः । तस्मै ऐकाहिकाय द्याहिकाय च ज्वराय तृतीयकाय तृतीयदिवसे आगच्छते त्र्याहिकाय ज्वराय । चातुर्थिकादीनामपि उपलक्षणम् एतत् । सर्वस्मै तक्मने शीतज्वराय नमः अस्तु नमस्कारो भवतु ॥ एवं नमस्कारेण प्रीतः सन् सर्वो ज्वरः अस्मान् परिवर्जयतु इत्यर्थः ॥

[इति] पञ्चमेनुवाके चतुर्थं सूक्तम् ॥

‘‘आरेसौ’’ इति सूक्तेन खड्गादिसर्वशस्त्रनिवारणकर्मणि फलीकरणतुपावतक्षणानां होमः कार्यः ॥

तथैव प्रहरणोद्यतं शत्रुं दृष्ट्वा एतत् सूक्तं जपेत् । सूत्रं च । ‘‘आरेसा-

---

1 S' Kd शोचिकाय.

"वित्यपनोदनानि फलीकरणतुष[बुसा]वतक्षणानि" इत्यादि [कौ० २. ५] ॥

तथा दुःशकुनदर्शनकाकमैथुनादिविरुद्धदर्शने अद्भुतादिदर्शने च एतत् सूक्तं जपेत् । सूत्रितं च । "अपनोदनापाघाभ्याम् [१. २६, ४. ३३] अन्वीक्षन् प्रतिजपति" इति [कौ० ५. ६] ॥ अत्र अपनोदनशब्देन अपनोदनकर्मसाधनत्वात् "आरेसौ" इति सूक्तम् उच्यते ॥

तथा विजयस्वस्त्ययनकर्मणि अनेन सूक्तेन आज्यं हुत्वा खड्गादि शस्त्रं संपात्य अभिमन्त्र्य प्रयच्छेत् ॥

तथैव स्वस्त्ययनकामो रात्रौ शयनकाले एतत् सूक्तं जपित्वा प्रादेशेन मुखं प्रमाय स्वप्यात् ॥

तथैव सुप्तोत्थितः स्वस्त्ययनार्थम् एतेन सूक्तेन त्रीणि पदानि तिस्रो दिष्टीर्वा प्रमाय उत्तिष्ठेत् ॥

सूत्रं च । "आरे[१. २६] अमूः पारे[१. २७] पातं नः[६. ३] "य एनं परिषीदन्ति[६. ७६] इति यद् आयुधं दण्डेन व्याख्यातं दिष्ट्या मुखं विमाय संविशति त्रीणि पदानि प्रमाय उत्तिष्ठति तिस्रो "दिष्टीः" इति[कौ० ७. १] ॥ दिष्टिः प्रादेश इत्यर्थः ॥

तथैव उपाकर्मणि एतत् सूक्तम् आज्यहोमे विनियुक्तम् । "आरेसावस्मदस्तु[१. २६] यस्ते पृथु स्तनयित्नुः[७. १२]" इति हि सूत्रम् [कौ० १४. ३] ॥

तत्र प्रथमा ॥

आरे३सावस्मदस्तु हेतिर्देवासो असत् ।
आरे अश्मा यमस्यथ ॥ १ ॥

आरे । असौ । अस्मत् । अस्तु । हेतिः । देवासः । असत् ।
आरे । अश्मा । यम् । अस्यथ ॥ १ ॥

हे देवासः देवाः । "आज्जसेरसुक्" इति असुक् आगमः । युष्मत्प्रसादात् असौ दूरे परिदृश्यमाना हेतिः हननसाधनं

---

१ **A D B S V** have १ for ३ after आरे. We with **K.**

शत्रुभिः प्रयुक्तं खड्गाद्यायुधम्। "ऊतियूतिजूतिसातिहेतिकीर्तयश्च" इति क्तिनि एत्वम् उदात्तत्वं च निपात्यते। तद् आयुधम् अस्मत् अस्मत्तः सकाशात् आरे दूरे अस्तु भवतु। अस्मान् अस्पृष्ट्वैव दूरे निपततु इत्यर्थः॥ तथा हे शत्रवः यूयं यम् अश्मानम् अस्यथ अस्मद्धननाय क्षिपथ। असु क्षेपणे। दिवादित्वात् श्यन्। "न्यादिर्नित्यम्" इति आद्युदात्तत्वम्। "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः। [सः] अश्मा यन्त्रादिविनिर्मुक्तः पाषाणः। आरे अस्मद्दूरदेशे असत् भवतु। अस्तेर्लेटि अडागमः॥

द्वितीया॥

सखासावस्मभ्यमस्तु रातिः सखेन्द्रो भगः सविता चित्रराधाः॥ २॥

सखा। असौ। अस्मभ्यम्। अस्तु। रातिः। सखा। इन्द्रः। भगः। सविता। चित्रऽराधाः॥ २॥

पूर्वत्र शस्त्रनिवारकत्वेन देवाः प्रार्थिताः। तत्सिद्ध्यर्थं तेषां नामग्रहणपूर्वकं सख्यित्वं प्रार्थ्यते॥ असौ दिवि दृश्यमानो रातिः मित्रः सूर्यः अस्मभ्यम् अस्मत्कार्यसिद्धये सखा समानख्यानो मित्रम् अस्तु भवतु। "अनङ् सौ" इति सखिशब्दस्य अनङ् आदेशः। रातिरिति। रा दाने। "क्तिच्क्तौ च संज्ञायाम्" इति कर्तरि क्तिच्। "चितः" इत्यन्तोदात्तत्वम्॥ तथा इन्द्रः परमैश्वर्ययुक्तो देवानाम् अधिपतिः भगः भजनीयः भाग्यस्य प्रदाता देवः। "भगो ह दाता भग इत् प्रदाता" [तै० ब्रा० ३. १. १. ८] इति हि श्रुतिः। सविता सर्वस्य प्राणिजातस्य प्रेरको देवः। यद्वा अभिमतसाधनस्य प्रदाता। श्रूयते हि। "सवितारमेव स्वेन भागधेयेनोपधावति स एवास्मै सानिं प्रसुवति" [तै० सं० २. १. ६. ३] इति॥ तमेव विशिनष्टि। चित्रराधाः। राध इति धननाम राध्नुवन्त्यनेन इति यास्कः [नि० ४. ४]। चित्रं व-

---

१ We omit to show सविता चित्रराधाः as a separate pâda on the authority of A B ^{h}B D K R ^{m}S V.

हुविधं राधो धनं यस्य स तथोक्तः । ऋराध साध संसिद्धौ । अस्मात् करणे असुन् प्रत्ययः । "बहुव्रीहौ प्रकृत्या०" इति पूर्वपदप्रकृतिस्वरत्वम् ऋ ॥ [स च सखा अस्तु] ॥ एते सर्वे देवाः अस्माकं सखायो भूत्वा शात्रवं शस्त्रनिकरं निवारयन्तु इत्यर्थः ॥

तृतीया ॥

यूयं नः प्रवतो नपान्मरुतः सूर्यत्वचसः ।
शर्म यच्छाथ सप्रथाः ॥ ३ ॥

यूयम् । नः । प्रऽवतः । नपात् । मरुतः । सूर्यऽत्वचसः ।
शर्म । यच्छाथ । सऽप्रथाः ॥ ३ ॥

हे प्रवतो नपात् । प्रव[तः प्रग]तस्य भुवः सकाशात् प्रचण्डैः सूर्यकिरणैः उद्धृतस्य उदकस्य नपात् न पातयितः अकाले उदकं यथा अधो न पतति तथा उपरिष्टाद् मेघमण्डले धारयितः पर्जन्य । ऋ"उपसर्गाच्छन्दसि धात्वर्थे" इति प्रोपसर्गाद् गमिधात्वर्थे वतिप्रत्ययः । "वत्यन्ताश्च" इत्यव्ययत्वेपि लिङ्गसंख्याभ्यां योगः पूर्वत्र समर्थितः । नञ्पूर्वात् पातयतेः क्विप् । "नभ्राण्नपात्०" इत्यादिना नञः प्रकृतिभावः । "सुवामन्त्रिते पराङ्गवत् स्वरे" इति षष्ठ्यन्तस्य पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य "आमन्त्रितस्य च" इत्याष्टमिकं सर्वानुदात्तत्वम् ऋ । हे मरुतः एतत्संज्ञकाः सप्तगणात्मका देवाः । ऋपादादित्वाद् आष्टमिकनिघाताभावे षाष्ठिकम् "आमन्त्रितस्य च" इत्याद्युदात्तत्वम् ऋ । तान् विशिनष्टि । सूर्यत्वचसः । सूर्यस्य त्वगिव त्वग् येषां ते तथोक्ताः । सूर्यसमानतेजस्का इत्यर्थः । ते सर्वे यूयं नः अस्मभ्यं सप्रथः प्रथसा विस्तारेण सहितं शर्म । गृहनामैतत् । शरणं गृहं सुखं वा यच्छात यच्छत । ऋदाण् दाने । अस्मात् लेटि आडागमः । शपि "पाघ्रा०" इत्यादिना यच्छादेशः । "तिङ्तिङः" इति निघातः ऋ ॥

---

१ So we with **A B B̥ D K R S̥ P P̊ J V.** The MSS. of **R**w also appear to have read with our MSS.

चतुर्थी ॥

सुषूदत॑ मृडत॑ मृडया॑ नस्त॒नूभ्यो॒ मय॑स्तो॒केभ्य॑स्कृधि ॥ ४ ॥
सुसूदत॑ । मृडत॑ । मृडय॑ । नः॒ । त॒नूभ्यः॑ । मय॑ः । तो॒केभ्य॑ः । कृ॒धि॒ ॥ ४ ॥

हे इन्द्रादयो देवाः यूयं सुषूदत सूदयत शत्रुमुक्तानि आयुधानि अस्तोन्यत्र प्रेरयत । ष्वद क्षरणे । अस्माद् ण्यन्तात् लोटि शप् । "छन्दस्युभयथा" इति शप आर्धधातुकत्वात् "णेरनिटि" इति णिलोपः ॥ तथा मृडत सुखयत । मृड सुखने ॥ सर्वापेक्षया बहुवद् उक्त्वा प्रत्येकं कर्तव्यतां दर्शयितुम् एकवद् आह । हे इन्द्रादिदेव त्वं नः अस्मान् मृडय सुखय । अनिष्टविनिबर्हणेन प्रीतिं जनयेत्यर्थः ॥ तथा अस्माकं तनूभ्यः शरीरेभ्यः तोकेभ्यः । अपत्यनामैतत् । पुत्रेभ्यश्च मयः । सुखनामैतत् । सुखं कृधि कुरु । डुकृञ् करणे । लोटि "श्रुशृणुपृकृवृभ्यश्छन्दसि" इति हेर्धिरादेशः "अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य" इति विसर्जनीयस्य सत्वम् ॥

[इति] पञ्चमेनुवाके पञ्चमं सूक्तम् ॥

"अमूः पारे" इति सूक्तेन विजयार्थायुधप्रदानादीनि स्वस्त्ययनानि पूर्वसूक्तवत् कुर्यात् । सूत्रं तु पूर्वसूक्तोदाहृतं द्रष्टव्यम् ॥

"प्रेतं पादौ" इति ऋचा मार्गस्वस्त्ययने पादम् अभिमन्त्र्य दद्यात् ॥

तत्र प्रथमा ॥

अमूः पारे पृदाकवस्त्रिषन्ना निर्जरायवः ।
तासां जरायुभिर्वयमस्या इवपि व्ययामस्यघायोः परिपन्थिनः ॥ १ ॥
अमूः । पारे । पृदाकवः । त्रिऽसन्नाः । निःऽजरायवः ।

---

१ We नस्तनूभ्यो मय° with A B Br B D K K R SV.

---

1 S' Kd insert स्वस्त्ययनादीनि before स्वस्त्ययनानि. 2 S' Kd read the words सूत्रं तु पूर्वसूक्तोदाहृतं द्रष्टव्यम् after अभिमन्त्र्य दद्यात् in the next line. 3 S' Kd पाप° for पाद°. 4 The Sûtra applicable here is that which follows the portion quoted on the previous Sûkta. That is, the sentence beginning with प्रेतं पादावित्य° &c.

तासा॑म् । ज॒रायु॑ऽभिः । व॒यम् । अ॒क्ष्यौ॑ । अपि॑ । व्य॒या॒म॒सि॒ । अ॒घ॒ऽयोः । प॒रि॒ऽप॒न्थिन॑ः ॥ १ ॥

अमूः परिदृश्यमानाः पृदाकः सर्पजातयः त्रिषप्ताः त्रिगुणितसप्तसंख्याकाः "ये त्रिषप्ताः" इत्यत्रोक्ताः निर्जरा* इ॑व जराया निर्गताः । "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति गतिसमासः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । "इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च" इति इवशब्दस्य समासः । जरारहिता देवा इव पारे भूम्याः पारदेशे[1] नागलोके । वर्तन्त इति शेषः ॥ तासाम् पृदाकूनां जरायुभिः । जरायुवत् शरीरस्य वेष्टकास्त्वचो जरायवः सर्पकञ्चुकाः । तैः साधनैः अघायोः । अघं हिंसनं परेषाम् इच्छतीति अघायुः । "छन्दसि परेच्छायामपि" इति अघशब्दात् कर्मणः क्यच् । "अश्वाघस्यात्" इति आत्वम् । "क्याच्छन्दसि" इति उप्रत्ययः । प्रत्ययस्वरेण अन्तोदात्तत्वम् । तथाविधस्य परिपन्थिनः युद्धादौ प्रत्यवस्थातुः शत्रोः । "छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि" इति निपात्यते । तस्य अक्ष्यौ अक्षिणी [वयम्] अपि व्ययामसि अपिव्ययामः अपिनह्यामः । यथा युद्धादौ शत्रुरस्मान् हिंसितुं न पश्यति तथा तस्य चक्षुषी महासर्पनिर्मोकैः आच्छादयाम इत्यर्थः । व्येञ्[2] संवरणे । "इदन्तो मसि" इति मस इदन्तत्वम् । "तिङ्तिङः" इति निघातः ॥

द्वितीया ॥

विषू॑च्येतु कृन्त॒ती पिना॑कमिव बिभ्र॒ती ।
विष्व॑क् पुन॑र्भुवा॒ मनोस॑मृद्धा अघा॒यव॑ः ॥ २ ॥

विषू॑ची । ए॒तु॒ । कृ॒न्त॒ती । पिना॑कम्ऽइव । बि॒भ्र॒ती ।
विष्व॑क् । पुन॒:ऽभुवा॑: । मन॑: । अस॑मऽऋद्धाः । अ॒घ॒ऽयव॑: ॥ २ ॥

---

१ S D °भवा. We with A B[h] K K[m] R S[m] P P[2] J V and Rw. २ So P P[2] J.

---

1 S′ Kd पारा°. 2 S′ Kd चेञ्.

पिनाकमिव । ऐश्वरं धनुः पिनाकम् । तद्वत् शत्रुनिहननक्षमम् आयुधं बिभ्रती धारयन्ती । ✕ डुभृञ् धारणपोषणयोः । अस्मात् लटः शत्रादेशः । जुहोत्यादित्वात् शपः श्लुः । "भृञामित्" इत्यभ्यासस्य इत्वम् । "उगितश्च" इति ङीप् । "अभ्यस्तानाम् आदिः" इत्याद्युदात्तत्वम् ✕ । अत एव कृन्तती छिन्दती खड्गाद्यायुधैः शत्रून् विदारयन्ती । ✕ कृती छेदने । अस्मात् लटः शत्रादेशः । "तुदादिभ्यः शः" इति शप्रत्ययः । "शे मुचादीनाम्" इति नुम् । "उगितश्च" इति ङीप् । "०अदुपदेशाल्लसार्वधातुकम् अनुदात्तम्०" इति शतुरनुदात्तत्वे विकरणस्य प्रत्ययस्वरेण उदात्तत्वम् । "अतो गुणे" इति शत्रा सह एकादेशे "एकादेश उदात्तेनोदात्तः" इति एकादेशस्य उदात्तता । "शतुरनुमो नद्यजादी" इत्यन्तोदात्तात् शत्रन्ताद् उत्तरस्य ङीप उदात्तत्वम् ✕ । ईदृशी[1] शात्रवी सेना विषूची विषु नाना अञ्चन्ती[2] गच्छन्ती विप्रकीर्णा एतु गच्छतु । नानामुखं वित्रस्ता धावतु इत्यर्थः । ✕ विषुशब्दोपपदाद् अञ्चतेः "ऋत्विग्०" इत्यादिना क्विन् । "अनिदिताम्०" इति नलोपः । "अञ्चतेश्चोपसंख्यानम्" इति ङीप् । भसंज्ञायाम् "अचः" इत्यकारलोपे "चौ" इति दीर्घत्वम् ✕ ॥ तथाविधा सेना यदि पुनर्भवा पुनः संघीभूता भवेत् तर्हि[3] मनः तत्सेनासंबन्धि मानसं विष्वक् नानामुखम् अनवस्थितं भवतु । पुनः संघश आगतानां शत्रुसेनाभटानां मनांसि कार्याकार्यविचारशून्यानि संभ्रान्तानि भवन्तु इत्यर्थः । ✕ भू सत्तायाम् । अस्मात् "ऋदोरप्" इति अप् प्रत्ययः । ततः पुनःशब्देन बहुव्रीहिः । यद्वा कर्तरि पचाद्यच् ✕ । यद्वा पुनर्भवायाः सेनायाः संबन्धि मन इति योजना । ✕ "सुपां सुलुक्०" इति षष्ठ्येकवचनस्य सुः आदेशः ✕ ॥ एवं सेनायां संभ्रान्तायां तदधिष्ठातारः अघायवः अघं परेषाम् इच्छन्तः शत्रवः असमृद्धाः समृद्धिरहिताः राष्ट्रकोशादिभ्रष्टाः । भवन्तु इति शेषः ॥

---

1 S′Kd ईदृशी यात्रवी शात्रवी for ईदृशी शात्रवी. 2 S′Kd अंचती. 3 S′Kd तर्हि त्वं मनः for तर्हि मनः.

तृतीया ॥

न व॒हव॒: सम॑शक॒न् नार्भ॑का अ॒भि दा॑धृषुः ।
वे॒णोरज्रा॑ इवा॒भितो॑स॑मृङ्गा अघा॒यव॑: ॥ ३ ॥

न । ब॒हव॑: । सम् । अ॒श॒क॒न् । न । अ॒र्भ॑काः । अ॒भि । द॒धृ॒षुः ।
वे॒णोः । अज्रा॑:ऽइव । अ॒भित॑: । अस॑म्ऽऋङ्गाः । अ॒घ॒ऽय॑वः ॥ ३ ॥

बहवः हस्त्यश्वरथपदातियुक्ता बहुलाः शत्रवः न सम अशकन् न संशक्नुवन्तु । बहवोपि युद्धरङ्गे अस्मान् जेतुम् अशक्ताः पराजिता भवन्तु इत्यर्थः । शकॢ शक्तौ । अस्मात् "छन्दसि लुङ्लङ्लिटः" इति प्रार्थनायां लुङ् । "पुषादिद्युताद्यॢदितः०" इति च्लेः अङ् आदेशः ॥ तथा अर्भकाः अल्पाः । दभ्रम् अर्भकम् इत्यल्पस्य इति यास्कः [नि० ३.२०] । परिमिताः शत्रवः न अभि दार्ँशुः आभिमुख्येन अस्मान् न पश्यन्तु । युद्धार्थम् अस्मान् द्रष्टुमपि असमर्था दूरत एव पलायन्ताम् इत्यर्थः । दृशिर् प्रेक्षणे । अस्मात् पूर्वोक्तसूत्रेण लिट् । तुजादित्वाद् अभ्यासदीर्घत्वम् ॥ पराजितानां शत्रूणाम् अवस्थानप्रकारम् आह उत्तरार्धेन । वेणोः वंशकाण्डस्य पँरितः परितो वर्तमाना उँज्ञा इव । उज्झन्तीति उज्ञाः शाखाः । "डोन्यत्रापि दृश्यते" इति उदुपसृष्टाद् गमेर्डप्रत्ययः । "टेः" इति टिलोपः । तथाविधाः शाखा इव अघायवः शत्रवः असमृङ्गाः समृङ्गिरहिता भवन्तु । यथा परितो वर्तमाना वेणुशाखा असंहताः कृशाश्च दृश्यन्ते तथा युद्धभूमौ पराजिताः शत्रवः सेनादिरहिता राज्यभ्रष्टास्तुच्छा भवन्तु इत्यर्थः । ऋधु वृद्धौ । "क्तोधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः" इति कर्तरि क्तप्रत्ययः । "यस्य विभाषा" इति इट्प्रतिषेधः । ततो नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

चतुर्थी ॥

प्रेतं॑ पादौ॒ प्र स्फु॑रतं॒ वह॑तं पृणतो गृ॒हान् ।

---

1 S' Kd तथा.

इन्द्राण्येतु प्रथमाजीतामुषिता पुरः ॥ ४ ॥

प्र । इतम् । पादौ । प्र । स्फुरतम् । वहतम् । पृणतः । गृहान् ।
इन्द्राणी । एतु । प्रथमा । अजीता । अमुषिता । पुरः ॥ ४ ॥

हे पादौ जिगमिषतो जनस्य संबन्धिनौ युवां प्रेतम् प्रकर्षेण गच्छतम् । ✕ इण् गतौ । लोटि थसस्तम् आदेशः ✕ । तदर्थं प्र स्फुरतम् । पुनःपुनः शीघ्रचलनेन गमनं निष्पादयतम् इत्यर्थः ॥ गमनस्य अवधिम् आह । पृणतः इष्टफलदानेन अस्मान् प्रीणयतः गन्तव्यत्वेन उद्दिष्टपुरुषस्य गृहान् वहतम् प्रापयतम् ॥ यद्वा पृणतः पालकस्य परराष्ट्राधीशस्य शत्रोः गृहान् वहतम् अस्मदीयां सेनां प्रापयतम् । ✕ पॄ पालनपूरणयोः । अस्मात् लटः शत्रादेशः । ऋयादित्वात् श्नाप्रत्ययः । "प्वादीनां ह्रस्वः" इति ह्रस्वत्वम् । "श्नाभ्यस्तयोरातः" इति आल्लोपः । "शतुरनुम०" इति विभक्तेरुदात्तत्वम् ✕ ॥ गन्तृजनरक्षार्थं पुरः पुरस्तात् पूर्वभागे । ✕ "पूर्वाधरावराणाम् असि पुरधवश्चैषाम्" इति असिप्रत्ययः पूर्वशब्दस्य पुरादेशश्च ✕ । इन्द्राणी इन्द्रस्य पत्नी । ✕ "इन्द्रवरुणभवशर्व०" इत्यादिना ङीष् प्रत्ययः आनुगागमश्च । प्रत्ययस्वरेण अन्तोदात्तत्वम् । ततो यणादेशे "उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य" इति परोनुदात्तः स्वर्यते ✕ । [एतु गच्छतु] । तामेव विशिनष्टि । प्रथमा प्रथमभाविनी अजिता केनचिदपि अनिर्जिता । तथा अमुषिता अनपहृता । सेनाभिमानिदेवतात्वेन सर्वैरनभिभाव्येत्यर्थः । श्रूयते हि । "इन्द्राणी वै सेनायै देवता" [तै० सं० २. २. ८. १] इति । पुरोगामिन्या सेनाभिमानिन्या इन्द्राण्या देवतया अनुगृहीता अस्मदीया सेना शत्रून् निर्जित्य तद्गृहानपि आक्रामतु इत्यर्थः ॥

[इति] पञ्चमेनुवाके षष्ठं सूक्तम् ॥

"उप प्रागात्" इति सूक्तेन उद्विग्नस्य उद्वेगनिवृत्तये शुक्रवीरिणेषीका-

---

1 S′ Kd सर्वैरनभिहिताव्येत्यर्थः. 2 S′ Kd शुक्रवीरणे°. We with the two MSS. of *Kaus'ika* and his two commentators.

कृतमणिबन्धनम् उल्मुकद्वयघर्षणं च कुर्यात् । सूत्रं च । "उप प्रागा-
"दित्युद्विजमानस्य शुक्रप्रसूतस्य वीरिणस्य चतसृणाम् इषीकाणाम् उभय-
"तः" इत्यादि [कौ० ४. २] ॥

तत्र प्रथमा ॥

उप॑ प्रागा॑द्देवो अग्नी रक्षो॒हामी॑वचात॑नः ।
दह॒न्नप॑ द्व॒याविनो॑ यातु॒धान॑ान् किमी॒दिन॑ः ॥ १ ॥
उप॑ । प्र । अ॒गा॒त् । दे॒वः । अ॒ग्निः । रक्षः॑ऽहा । अ॒मी॒व॒ऽचात॑नः ।
दह॑न् । अप॑ । द्व॒याविन॑ः । या॒तु॒ऽधान॑ान् । कि॒मी॒दिन॑ः ॥ १ ॥

देवः द्योतमानः दानादिगुणयुक्तो वा । आह च यास्कः । देवो दानाद् वा दीपनाद् वा द्योतनाद् वा द्युस्थानो भवतीति वा [नि० ७. १५] इति । तथाविधः अग्निः अङ्गनादिगुणयुक्तः उप प्रागात् उद्विजमानं पुरुषम् उपागमत् । उद्वेगकारिणो रक्षःप्रभृतीन् विनाशयितुं प्राप्त इत्यर्थः । इण् गतौ । "इणो गा लुङि" इति गादेशः । "गातिस्था०" इति सिचो लुक् । तस्य तथाविधं सामर्थ्यं कुत इत्यत आह । रक्षोहा रक्षसां हिंसकानां पिशाचादीनां हन्ता । रक्षो रक्षितव्यम् अस्मात् इति यास्कः [नि० ४. १८] । रक्ष पालने इत्यस्माद् अपादाने असुन् प्रत्ययः । रक्षःशब्दोपपदात् "हन्तेर्बहुलं छन्दसि" इति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । अग्निः खलु वै रक्षोहा [तै० सं० ६. १. ४. ६] इति हि तैत्तिरीयकम् । तथा अमीवचातनः अमीवानां रोगाणां चातयिता नाशयिता । चातयतिर्नाशने इति हि यास्कः [नि० ६. ३०] । उपागतस्य अग्नेः उद्वेगकारिणां रक्षसां नाशने कालव्यवायाभावम् आह दहन्निति । द्वयाविनः द्वयं वाचिकं क्रौर्यं कायिकं हिंसनं च येषाम् अस्तीति द्वयाविनः । यद्वा मायामयं सौम्यरूपं स्वाभाविकं हिंस्रूपं च द्वयम् एषाम् अस्तीति द्वयाविनः । "बहुलं

---

१ D उ॒प॒प्रा°. We with A B $\overset{h}{B}$ K R $\overset{m}{S}$ P $\overset{2}{P}$ J V.

---

1 S′ Kd °प्रसूनस्य. We with *Kaus'ika*.

छन्दसि" इत्यत्र विनिप्रकरणे "अष्ट्रामेखलाङ्ग्योभयरुजाहृदयानां दीर्घश्च" इति वचनाद् विनिप्रत्ययः तत्संनियोगेन दीर्घश्च ॥ । किमीदिनः किम् इदानीं किम् इदानीं वर्तत इति रन्ध्रान्वेषणबुद्ध्या चरणशीलान् । ॥ किमीदिने किम् इदानीम् इति चरते इति यास्कः [नि० ६. ११] ॥ । यातुधानान् । यातवो यातनाः पीडाविशेषाः धीयन्ते विधीयन्ते क्रियन्त एभिरिति यातुधानाः । ॥ यत निकारोपस्करयोः । अस्मात् ण्यन्ताद् औणादिके उप्रत्यये यातुशब्दः । डुधाञ् धारणे इत्यस्मात् "कृत्यल्युटो बहुलम्" इति कर्तरि ल्युट् । "लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वम् । ततः समासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते ॥ । एवंभूतान् राक्षसान् अप दहन् अपकर्षन् दहन् भस्मसात् कुर्वन् । उपागात् इति पूर्वेण संबन्धः । यद्वा । ॥ दह भस्मीकरणे इत्यस्मात् "लक्षणहेत्वोः क्रियायाः" इति हेतौ शतृप्रत्ययः ॥ । यातुधानानां दहनाङ्गेतोरुपागाद् इत्यर्थः ॥

द्वितीया ॥

प्रति॑ दह यातु॒धाना॒न् प्रति॑ देव किमी॒दिनः॑ ।
प्र॒तीचीः॑ कृ॒ष्णव॑र्तने॒ सं द॑ह यातु॒ध्यः॑ ॥ २ ॥

प्रति॑ । द॒ह॒ । या॒तु॒ऽधाना॑न् । प्रति॑ । दे॒व॒ । किमी॒दिनः॑ ।
प्र॒तीचीः॑ । कृ॒ष्णऽव॑र्तने । सम् । द॒ह॒ । या॒तु॒ऽध्यः॑ ॥ २ ॥

पूर्वस्याम् ऋचि दहन्नुपागाद् इति आगमनशेषत्वेन दहनम् अभिहितम् । अनया तु रक्षसां दहनमेव प्राधान्येन अभिधीयते । हे अग्ने यातुधानान् यातूनां यातनानां विधातॄन् राक्षसान् प्रति दह प्रत्येकं प्रतिमुखं [वा] भस्मसात् कुरु ॥ तथा हे देव द्योतनात्मक अग्ने किमीदिनः किम् [इदानीं किम्] इदानीम् इति चरणशीलान् रन्ध्रान्वेषणपरान् पिशाचविशेषान् । प्रति इत्युपसर्गश्रवणाद् अत्रापि दहेत्यनुषङ्गः ॥

---

१ $\overset{h}{\mathbf{B}}$ S V कृष्णवर्त्मने. We with A D K R $\overset{m}{\mathbf{S}}$ P $\overset{2}{\mathbf{P}}$ J and Rw.

---

1 Kd omits the second किम् इदानीं. We with S'. 2 S' Kd भावस्मसात्.

कृष्णवर्त्मने हे कृष्णवर्त्मन् अग्ने प्रतीचीः प्राणिजातस्य प्रतिकूलम् अञ्चन्नीः । प्रतिपूर्वाद् अञ्चतेः "ऋत्विग्०" इत्यादिना क्विन् । "अनिदिताम्०" इति नलोपः । "अञ्चतेश्चोपसंख्यानम्" इति ङीप् । ततो भसंज्ञायाम् "अचः" इत्यकारलोपः । "चौ" इति दीर्घत्वम् । "अनिगन्तोञ्चतावप्रत्यये" इति प्रतेरिगन्तत्वेन पर्युदस्तत्वात् "चौ" इति पूर्वपदस्यान्तोदात्तत्वम् । तादृशीः यातुधान्यः यातुधानीः । यातुधानशब्दात् "पुंयोगाद् आख्यायाम्" इति ङीष् । शसि "वा छन्दसि" इति पूर्वसवर्णदीर्घाभावे यण् । ताꣳश्च सं दह सम्यक् निरवशेषं दह ॥

तृतीया ॥

या शशाप शपनेन याघं मूरमादधे ।
या रसस्य हरणाय जातमारेभे तोकमत्तु सा ॥ ३ ॥

या । शशाप । शपनेन । या । अघम् । मूरम् । आऽदधे ।
या । रसस्य । हरणाय । जातम् । आऽरेभे । तोकम् । अत्तु । सा ॥३॥

सं दह यातुधान्य इति पूर्वत्र सामान्येन उक्ता एव राक्षस्यः अत्र विशेषतो निर्दिश्यन्ते । या यातुधानी शपनेन आक्रोशेन । शप आक्रोशे । करणे ल्युट् । नाशहेतुभूतेन परुषवाक्येन शशाप शापं कृतवती । शप आक्रोशे इत्यस्मादेव लिटि तिपो णल् आदेशः । "लिति" इति प्रत्ययात् पूर्वस्योदात्तत्वम् । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः । तथा या अन्या यातुधानी मूरम् मूलम् । "वारमूररध्वरमुसराङ्कुरीणां वा रो लम् आपद्यते" इति लत्वस्य विकल्पितत्वाद् अत्राभावः । सर्वेषां दुरितानाम् आदिभूतम् अघम् हिंसारूपं पापम् आददे परिजग्राह । कृतवतीत्यर्थः । डुदाञ् दाने । "आङो दोऽनास्यविहरणे" इत्यात्मनेपदम् । लिटि "लि-

---

१ KSV °द्दे. We with A B Br R S P P J and Rw.

---

1 S′Kd गताश्च for ताश्च. 2 S′Kd पुरुष°. 3 S′Kd संकृत°. Meant for स्वीकृत°?

टस्तझयोरेश् इरेच्" इति तशब्दस्य एश् आदेशः। प्रत्ययस्वरेण अन्तोदात्तत्वम्। पूर्ववद् निघातप्रतिषेधः॥ यद्वा मूरम् मूर्छाकरम् अघम्। ॥ मुर्छा मोहसमुच्छ्राययोः। "क्विप् च" इति क्विप्। "राल्लोपः" इति छकारस्य लोपः॥ तथा या अपरा यातुधानी जातम् अपत्यम् उद्दिश्य रसस्य असृगादिरूपस्य शरीरगतस्य हरणाय अपहरणाय पानाय आरेभे उपचक्रमे। ॥ रभ राभस्ये। लिटि "अत एकहल्मध्ये०" इति एत्वाभ्यासलोपौ। पूर्वस्वरः। निघातप्रतिषेधः॥। तासां सर्वासां हिंस्यं दर्शयति। सा। प्रत्येकापेक्षया समुदायापेक्षया वा एकवचनम्। सा सर्वा यातुधानी तोकम्। अपत्यनामैतत्। स्वकीयम् अपत्यम् असच्छत्रुसंबन्धि वा अत्तु भक्षयतु। ॥ अद भक्षणे॥॥

चतुर्थी॥

पुत्रमत्तु यातुधानीः स्वसारमुत नप्त्यम्॥
अधा मिथो विकेश्यो३ वि घ्नतां यातुधान्यो३ वि तृह्यन्तामराय्यः॥ ४॥

पुत्रम्। अत्तु। यातुऽधानीः। स्वसारम्। उत। नप्त्यम्।
अध। मिथः। विऽकेश्यः। वि। घ्नताम्। यातुऽधान्यः। वि। तृह्यन्ताम्।
अराय्यः॥ ४॥

सपुत्रबान्धवानां यातुधानीनां नाशम् आह। यातुधानी काचन उदीरितलक्षणा राक्षसी पुत्रम् स्वकीयमेव तनयम् अत्तु भक्षयतु॥ तथा स्वसारम् भगिनीम्। अत्तु इत्यनुषङ्गः। ॥ सुपूर्वाद् असु क्षेपणे इत्यस्मात् सावसेर्नृन् [उ० २. ९५] इति औणादिकः नृन् प्रत्ययः। "नृन्नेभ्यः०" इति प्राप्तस्य ङीषो "न षट्स्वस्रादिभ्यः" इति प्रतिषेधः। "ञ्नित्यादिर्नित्यम्" इत्याद्युदात्तत्वम्॥॥ उत अपि च नप्त्यम् नप्त्रीं पौत्रस्य अपत्यरूपां संततिम् अत्तु। ॥ नप्तृशब्दात् "नृन्ने-

---

१ A विकेश्यो ३ and °धान्यो ३. We with $\overset{h}{B}$ D K $\overset{m}{S}$ R V.

---

1 So S′ Kd.

भ्यः०" इति ङीप् । द्वितीयैकवचने "वा छन्दसि" इति पूर्वरूपस्य विकल्पितत्वाद् यणादेशः । रेफलोपश्छान्दसः ॥ अथ स्वस्वपुत्रादिहननानन्तरं यातुधान्यः राक्षस्यः विकेश्यः परस्परताडनेन विकीर्णाः केशा यासां तास्तथोक्ताः । "स्वाङ्गाच्चोपसर्जनाद् असंयोगोपधात्" इति ङीष् । तथाभूताः सत्यः मिथः परस्परं वि घ्नताम् विशेषेण घ्नन्तु । परस्परताडनेन म्रियन्ताम् इत्यर्थः । हन हिंसागत्योः । लोटि बहुवचने अदादित्वात् शपो लुक् । "गमहन०" इत्युपधालोपः । "हो हन्तेर्ञ्णिन्नेषु" इति कुत्वम् ॥ तथा अराय्यः अदायिन्यः । रा दाने । अस्माद् भावे यञ् । "आतो युक् चिण्कृतोः" इति युक् । ततो नञा बहुव्रीहिः । "पुंयोगाद् आख्यायाम्" इति ङीष् । दानप्रतिबन्धिकाः पिशाच्यश्च मिथो वि तृह्यन्ताम् । विविधं हिंस्यन्ताम् । तृह हिंसि हिंसायाम् । कर्मणि लोट् ॥

सप्तमं सूक्तम् ॥

इति सायणाचार्यविरचिते अथर्वसंहिताभाष्ये प्रथमकाण्डे

पञ्चमोनुवाकः ॥

षष्ठेनुवाके सप्त सूक्तानि । तत्र "अभीवर्तेन" इति प्रथमं सूक्तम् । अस्य आद्याभिश्चतसृभिर्ऋग्भिः शत्रुमर्दितराष्ट्राभिवृद्धये रथचक्रनेमिमणिं सूत्रोक्तलक्षणं कृत्वा संपात्य अभिमन्त्र्य "उदसौ सूर्यः" [१.२९.५, ६] इति उत्तमाभ्यां बध्नीयात् । तथा च कौशिकः । "अभीवर्तेनेति रथने-"मिमणिम् अयःसीसलोहरजतताम्रवेष्टितं हेमनाभिं वासितं बध्नाति सूत्रोतं "[1]बर्हिषि कृत्वा संपातवन्तं प्रत्यृचम्[2] अभीवर्तोत्तमाभ्याम्[3] आचृतति" इति [कौ०२.७] ॥

"माहेन्द्रीं[4] राज्यकामस्य अद्भुतोत्पत्तिविकारेषु च" इति [न०क०१७] विहितायां[5] माहेन्द्र्यां महाशान्तौ रथनेमिमणिवन्धने एतत् सूक्तम् । तथा

---

1 S′ Kd बर्हिषदं कृत्वा. We with *Kaus'ika*. 2 *Kaus'ika* inserts भृष्टीः after प्रत्यृचं, which *Dârila* explains by चात्याः. 3 S′ Kd अभीवर्तोत्तमाभ्यां चतृतीति. 4 S′ Kd माहेंद्री for माहेन्दीम्. 5 S′ Kd वहितायां.

च नक्षत्रकल्पे। "अभीवर्तेनेति रथनेमिमणिं माहेन्द्र्याम्" इति [न० क० १९] ॥

तत्र प्रथमा ॥

अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे।
तेनास्मान् ब्रह्मणस्पतेभि राष्ट्राय वर्धय ॥ १ ॥
अभिऽवर्तेन। मणिना। येन। इन्द्रः। अभिऽववृधे।
तेन। अस्मान्। ब्रह्मणः। पते। अभि। राष्ट्राय। वर्धय ॥ १ ॥

येन समृद्धिसाधनत्वेन प्रसिद्धेन अभीवर्तेन। अभितो वर्तते चक्रम् अनेनेति अभीवर्तो नेमिः। वृतु वर्तने। असात् "अकर्तरि च कारके संज्ञायाम्" इति करणे घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति दीर्घः। "थाथघञ्क्ताजबित्रकाणाम्" इति उत्तरपदान्तोदात्तत्वम्। अत्र कार्ये कारणशब्दः। चक्रनेमिनिर्मितो मणिः। यद्वा अभितः सर्वतः परराष्ट्रादौ अप्रतिहतगतिर्वर्तते अनेन पुरुष इति अभीवर्तो मणिः। तेन [येन] मणिना धृतेन इन्द्रः देवानाम् अधिपतिर्देवः अभिवावृधे अभितः सर्वतः प्रवृद्धोभूत्। परमैश्वर्योपेतस्त्रिलोकीपतिर्बभूवेत्यर्थः। वृधु वृद्धौ। असात् लिटि "तुजादीनां दीर्घोभ्यासस्य" इत्यभ्यासस्य दीर्घः। प्रत्ययस्वरेण अन्तोदात्तत्वम्। "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः। [हे] ब्रह्मणस्पते वेदराशेरधिपते। "षष्ठ्याः पतिपुत्र०" इति विसर्जनीयस्य सत्वम्। "सुवामन्त्रिते पराङ्गवत् स्वरे" इति षष्ठ्यन्तस्य पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य "आमन्त्रितस्य च" इति आष्टमिकं सर्वानुदात्तत्वम्। एतत्संज्ञक देव[2] तेन प्रागुदीरितमहिमोपेतेन मणिना अस्मान् शत्रुभिः पीडितान् राष्ट्राय। तादर्थ्ये चतुर्थी। स्वराष्ट्राभिवृद्ध्यर्थम् अभि वर्धय करितुरगधनादिभिः समृद्धान् कुरु। त्वत्प्रसादात् समृद्धैरस्माभी रक्षितं राष्ट्रं शत्रुभयरहितं य-

---

१ B ब्रह्मं°. We with A $\overset{h}{B}$ D K R $\overset{m}{S}$ V and Rw.

---

1 S′ Kd णतेन for तेन [येन]. 2 S′ Kd देवेन for देव तेन.

था अभिवृद्धं भवति तथा कुरु इत्यर्थः ॥

द्वितीया ॥

अभिवृत्य सपत्नानभि या नो अरातयः ।
अभि पृतन्यन्तं तिष्ठाभि यो नो दुरस्यति ॥ २ ॥

अभिऽवृत्य । सऽपत्नान् । अभि । याः । नः । अरातयः ।
अभि । पृतन्यन्तम् । तिष्ठ । अभि । यः । नः । दुरस्यति ॥ २ ॥

हे अभीवर्त मणे त्वं सपत्नान् । सपत्नीव सपत्नाः सहजशत्रवः । अस्मदीयांस्तान् शत्रून् अभिवृत्य अभिमुखं पर्यावृत्य । तिष्ठेति वक्ष्यमाणक्रिया अत्रापि संबध्यते । त्वमेव प्रतिपक्षी भूत्वा तान् पराकुरु इत्यर्थः ॥ तथा या नः अस्माकम् अरातयः अदातारः अस्मदीयं राष्ट्रधनादिकम् अपहृत्य शात्रवं कुर्वाणा वाह्याः शत्रवः तानपि । अभि इत्युपसर्गश्रवणात् तिष्ठेति संबन्धः । अभिमुखं तिष्ठ ॥ तथा पृतन्यन्तम् युद्धार्थं पृतनां सेनाम् आत्मन इच्छन्तम् । पृतनाशब्दात् "सुप आत्मनः क्यच्" इति क्यच् । "कव्यध्वरपृतनस्यर्चि लोपः" इत्याकारलोपः । युद्धोन्मुखमपि शत्रुम् अभि तिष्ठ ॥ तथा यः शत्रुः नः अस्माकं दुरस्यति दुष्टम् अभिचारादिरूपं क्षुद्रं कर्म कर्तुम् इच्छति । "दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति" इति क्यचि दुष्टशब्दस्य दुरस्भावो निपात्यते । तथाविधमपि शत्रुम् अभि तिष्ठ । शन्निपोः पित्त्वाद् अनुदात्तत्वे क्यच्स्वरेण मध्योदात्तत्वम् । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ॥

तृतीया ॥

अभि त्वा देवः सविताभि सोमो अवीवृधत् ।
अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि ॥ ३ ॥

अभि । त्वा । देवः । सविता । अभि । सोमः । अवीवृधत् ।
अभि । त्वा । विश्वा । भूतानि । अभिऽवर्तः । यथा । अससि ॥ ३ ॥

---

1 S′Kd कर्तमिच्छति.

हे मणे त्वा त्वां देवः द्योतनात्मकः सविता सर्वस्य प्राणिजातस्य प्रेरकः एतत्संज्ञको देवः। अभि इत्युपसर्गश्रवणाद् अवीवृधत् इति क्रिया अत्रापि संबध्यते। अभ्यवीवृधत् अभितः समृद्धम् अकार्षीत्। ॥ वृधु वृद्धौ। अस्मात् ण्यन्तात् लुङि चङि गुणे प्राप्ते "नित्यं छन्दसि" इति उपधाऋवर्णस्य ऋकारादेशः ॥ ॥ तथा सोमो देवः अभ्यवीवृधत्। ॥ "व्यवहिताश्च" इति उपसर्गस्य व्यवहितप्रयोगः ॥ ॥ तथा हे मणे त्वा त्वां विश्वा विश्वानि निखिलानि। ॥ "शेश्छन्दसि बहुलम्" इति शेर्लोपः ॥। भूतानि। सत्तां लभन्त इति भूतानि चराचरात्मकानि। ॥ "क्तोधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः" इति भवतेः कर्तरि क्तप्रत्ययः। उपसर्गश्रवणाद् अत्रापि प्रकृतक्रियासंबन्धः ॥। अभ्यवीवृधन्। अभिवर्धनावधिम् आह। यथा येन प्रकारेण हे मणे त्वम् अभीवर्तः त्वद्धारयितुः पुरुषस्य अभितः स्वराष्ट्रपरराष्ट्रादौ वर्तनसाधनभूतः असि भवसि तथा त्वाम् अवीवृधन् इति पूर्वेण संबन्धः। ॥ अस भुवि। "बहुलं छन्दसि" इति शपो लुगभावः। "यावद्यथाभ्याम्" इति निघातप्रतिषेधः ॥ ॥

चतुर्थी ॥

अभीवर्तो अभिभवः सपत्नक्षयणो मणिः।
राष्ट्राय मह्यं बध्यतां सपत्नेभ्यः पराभुवे ॥ ४ ॥

अभिऽवर्तः। अभिऽभवः। सपत्नऽक्षयणः। मणिः।
राष्ट्राय। मह्यम्। बध्यताम्। सऽपत्नेभ्यः। पराऽभुवे ॥ ४ ॥

अभीवर्तः अभिवर्तनसाधनभूतः। तत्र हेतुम् आह। अभिभवः शत्रूणाम् अभिभविता। अभिभवनं विशिनष्टि। सपत्नक्षयणः सपत्नानाम्[2] भ्रातृव्याणां क्षयंकरः। यत एवम् अतः अभीवर्त इत्यर्थः। तादृशो मणिः मह्यम्। ॥ षष्ठ्यर्थे चतुर्थी। "ङयि च" इत्याद्युदात्तत्वम् ॥। मम बध्यताम्। ॥ बन्ध बन्धने। कर्मणि लोट् ॥ ॥ म-

---

1 S'Kd प्रकृति°. 2 S'Kd क्षयकारः.

णिबन्धनप्रयोजनम् आह । राष्ट्राय राष्ट्राभिवृद्धये । तथा सपत्नेभ्यः । पूर्ववत् षष्ठ्यर्थे चतुर्थी । भ्रातृव्याणां पराभुवे पराभवनाय । परापूर्वाद् भवतेः संपदादिलक्षणो भावे क्विप् ॥ बध्यमानोयं मणिः पूर्वं शत्रुभिः पीडितस्य स्वराष्ट्रस्य अभिवृद्धिं बाधकानां शत्रूणां नाशनं च करोतु इत्यर्थः ॥

पञ्चमी ॥

उद्सौ सूर्यो अगादुदिदं मामकं वचः ।
यथाहं शत्रुहोसान्यसपत्नः सपत्नहा ॥ ५ ॥

उत् । असौ । सूर्यः । अगात् । उत् । इदम् । मामकम् । वचः ।
यथा । अहम् । शत्रुऽहः । असानि । असपत्नः । सपत्नऽहा ॥ ५ ॥

असौ नभोमण्डले परिदृश्यमानः सूर्यः सर्वस्य प्राणिजातस्य प्रेरको देवः । "राजसूयसूर्य०" इत्यादिना क्यपि निपात्यते । उदगात् उदितवान् । इण् गतौ । "इणो गा लुङि" इति गादेशः । "गातिस्था०" इति सिचो लुक् ॥ किं च मामकम् मदीयम् इदम् अधुनोच्चार्यमाणं वचः आत्मनो जयाशंसात्मकं शत्रूणाम् अभिभवप्रतिपादकं च वाक्यम् । यद्वा । जयोद्देशेन प्रयुज्यमानं मन्त्रात्मकं वाक्यम् । उत् इति उपसर्गश्रवणात् प्रकृतक्रियासंबन्धः[1] । उदगात् । मामकम् इति । अस्मच्छब्दात् "तस्येदम्" इत्यण् । "तवकममकावेकवचने" इत्यस्मदो ममकादेशः । सूर्योदयस्य वाग्व्यवहारस्य च प्रतिदिनं सत्त्वेपि विशेषतस्तत्कथनस्य प्रयोजनम् आह । अहम् अभीवर्तमणिधारकः यथा येन प्रकारेण शत्रुहः शत्रूणां हन्ता असानि भवानि । हन हिंसागत्योः । "आशिषि हनः" इति डप्रत्ययः । अस्तेर्लोटि "आडुत्तमस्य पिच्च" इति आडागमः । "यावद्यथाभ्याम्" इति निघातप्रतिषेधः । मिपि पित्त्वाद् अनुदात्तत्वे "आगमा अनुदात्ताः" इति आटोपि अनुदात्तत्वे धातुस्वरेण आद्युदात्तत्वम् । यथाहम्

---

1 S' Kd प्रकृति°.

एवं भवानि तथा उदगाद् इति पूर्वेण संबन्धः ॥ मणिप्रभावात् अद्यतन-सूर्योदयः अधुना प्रयुज्यमानवचश्च शत्रुहननानुकूलम् अभूद् इत्यर्थः ॥ यं-त एवम् अतः अहम् असपत्नः शत्रुरहित एव । यदि च सपत्ना भवे-युस्तर्हि सपत्नहा सपत्नानां शत्रूणां हन्ता अस्मि । ☒ हन्तेः "क्वि-प् च" इति क्विप्☒ ॥

षष्ठी ॥

सपत्नक्षयणो वृषाभिराष्ट्रो विषासहिः ।
यथाहमेषा वीराणां विराजानि जनस्य च ॥ ६ ॥

सपत्नऽक्षयणः । वृषा । अभिऽराष्ट्रः । विऽससहिः ।
यथा । अहम् । एषाम् । वीराणाम् । विऽराजानि । जनस्य । च ॥ ६ ॥

उत्तरवाक्ये यथेति श्रवणात् पूर्ववाक्येपि अर्थात् [2]तथेत्यध्याहियते । सपत्नक्षयणः सपत्नानां शत्रूणां नाशकः । ☒ क्षि क्षये । "नन्दिग्रहि-पचादिभ्यः०" इति कर्तरि ल्युप्रत्ययः☒ । अतः वृषा प्रजानाम् इष्टफ-लस्य वर्षकः । ☒ वृष सेचने । कनिन् युवृषीत्यादिना [उ० १. १५४] कनिन् प्रत्ययः☒ । अत एव अभिराष्ट्रः स्वराष्ट्रं परराष्ट्रं च अभिग-तः अधिपतित्वेन प्राप्तः । ☒ "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति प्रादिसमासः☒ । अतो विषासहिः विविधं पुनःपुनः परेषां सोढा अभिभविता । ☒ षह अभिभवे । अस्माद् यङन्तात् "स-हिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ" इति किप्रत्ययः । अ-तोलोपयलोपौ☒ । मणिप्रभावाद् एवंगुणविशिष्टः तथा भूयासम् । कथम् इत्यत आह । अहम् मणिधारकः यथा येन प्रकारेण एषाम् श-त्रुसंबन्धिनां पूर्वम् [3]आत्मनो बाधकानां वीराणाम् शत्रुभटानां जनस्य स्वकीयस्य परकीयस्य प्राणिजातस्य च विराजानि । ☒ राजतिरैश्वर्य-कर्मा☒ । नियन्ता भवानि । तथेति पूर्वेण संबन्धः ॥ उदीरितगुणो-पेतः सन् मणिप्रभावात् शत्रुप्रभृतीनां सर्वेषां शासिता भवामीति भा-

---

1 S′Kd अतएवम्. 2 S′Kd यथे°. 3 S′Kd. आत्मने.

वः । यद्वा । उक्तगुणोपेतः सन् अहं वीराणां जनस्य च यथा विराजानि हे मणे त्वत्प्रभावात् तथा । भूयासम् इति शेषः ॥

[इति] षष्ठेनुवाके प्रथमं सूक्तम् ॥

"विश्वे देवाः" इति सूक्तेन आयुष्यकर्मणि स्थालीपाके घृतपिण्डत्रयं निक्षिप्य संपात्य अभिमन्त्र्य तद् घृतं स्थालीपाकं च अश्नीयात् । सूत्रं च । "विश्वे देवा इत्यायुष्याणि स्थालीपाके घृतपिण्डान् प्रतिनीयाश्नाति" इति [कौ°७.३] ॥

उपनयनकर्मणि एतत् सूक्तं माणवकस्य नाभिदेशे संस्तभ्य जपेत् । [तथा च सूत्रम्] । "बाहुगृहीतं प्राञ्चम् अवस्थाप्य दक्षिणेन पाणिना "नाभिदेशे संस्तभ्य जपति अस्मिन् वसु वसवो धारयन्तु[१.९] विश्वे "देवा वसवः[१.३०]" इति [कौ°७.६] ॥

आयुष्कामस्य वैश्वदेवयागे तदुपस्थाने च एतत् सूक्तम् । सूत्रितम् । "विश्वे देवा इति विश्वान् देवान् आयुष्कामो यजत उपतिष्ठते" इति [कौ°७.१०] ॥

अध्यायोत्सर्जनकर्मणि अस्य सूक्तस्य आज्यहोमे विनियोगः । "द्व्यान् रसान् उपसादयति विश्वे देवाः[१.३०] अहं रुद्रेभिः[४.३०]" इति हि सूत्रम् [कौ°१४.३] ॥

अथ अस्य सूक्तस्य आयुष्यगणे पाठात् "मेधाजननंायुष्यैर्जुहुयात्" [कौ°७.८] "आयुष्यैः स्वस्ययनैराज्यं जुहुयात्" इति च [कौ°१४.३] सूत्राद् उपनयनोपाकर्मणोरपि आज्यहोमे अस्य विनियोगः ॥

"ऐरावतीं गजक्षये"[न°क°१७] इति नक्षत्रकल्पविहितायाम् ऐरावत्याख्यायां महाशान्तौ "आयुष्यशांन्तिस्वस्तिगण ऐरावत्याम्" इति [न° क°१८] आयुष्यगणस्य विधानात् तद्गणप्रयुक्तोस्य विनियोगः ॥

तथा "वैश्वदेवीं गतायुषाम्" इति [न°क°१७] विहितायां वैश्वदे-

---

1 S′Kd बहु°. 2 S′Kd यद्वयान् for द्वयान्. 3 So S′Kd. *Kaus'ika*: मेधाजनन आ°. 4 S′Kd आयुष्यः शा°. We with the *Nakshatrakalpa*.

व्याख्यायां महाशान्तावपि एतद् विनियुक्तम् । नक्षत्रकल्पे "विश्वे देवा इति वैश्वदेव्याम्" इति [न० क० १८] ॥

आयुष्यश्चाभयश्चैव तथा स्वस्त्ययनो गणः ।
एतान् पञ्च गणान् हुत्वा [प० ५. ४]

इति परिशिष्टोक्ते पुष्पाभिषेकेपि अस्य गणप्रयुक्तो विनियोगः ॥

"ये देवा दिवि"[१. ३०. ३] इत्येषा दर्शपूर्णमासयोर्वषट्कारानुमन्त्रणे विनियुक्ता । उक्तं वैताने । "ये देवा दिवि ष्ठेत्यनुवषट्कारम्" इति [वै० १. ४] ॥

तत्र प्रथमा ॥

विश्वे॑ देवा॒ वस॑वो॒ रक्ष॒तेम॒मुता॑दित्या जागृत यू॒यम॒स्मिन् ।
मे॒मं सना॑भिरु॒त वा॒न्यना॑भि॒र्मे॒मं प्रा॒पत् पौरु॑षेयो व॒धो यः ॥ १ ॥

विश्वे॑ । दे॒वाः॑ । वस॑वः । रक्ष॑त । इ॒मम् । उ॒त । आ॒दि॒त्याः॑ । जा॒गृ॒त । यू॒यम् । अ॒स्मिन् ।
मा । इ॒मम् । सऽना॑भिः । उ॒त । वा॒ । अ॒न्यऽना॑भिः । मा । इ॒मम् । प्र ।
आ॒प॒त् । पौरु॑षेयः । व॒धः । यः ॥ १ ॥

विश्वे सर्वे हे देवाः इन्द्राद्याः । यद्वा विश्वेदेवाख्या गणदेवाः । ☒ "आमन्त्रितस्य च" इति विश्वशब्दस्य पाष्ठिकम् आद्युदात्तत्वम् । तस्य "विभाषितं विशेषवचने बहुवचनम्" इति विकल्पेन अविद्यमानवद्भावनिषेधात् ततः परस्य देवशब्दस्य "आमन्त्रितस्य च" इत्याष्टमिकं सर्वानुदात्तत्वम् ☒ । तथा हे वसवः एतत्संज्ञा देवाः । ☒ अत्र "आमन्त्रितं पूर्वम् अविद्यमानवत्" इति पूर्वामन्त्रितद्वयस्य अविद्यमानवद्भावेन पदात् परत्वाभावाद् "आमन्त्रितस्य च" इति पाष्ठिकम् आद्युदात्तत्वम् ☒ । ते सर्वे यूयम् इमम् आयुष्कामं पुरुषं रक्षत पालयत । ☒ रक्ष पालने । "०अदुपदेशाल्लसार्वधातुकम् अनुदात्तम्०" इति तिङ्[1]भक्तेरनुदात्तत्वम् । शपश्च पित्त्वादेव अनुदात्तत्वम् । ततो धातुस्वरेण

1 S' Kd तङ्ङि°.

आद्युदात्तता । "आमन्त्रितं पूर्वम् अविद्यमानवत्" इति आमन्त्रितत्रयस्यापि अविद्यमानवद्भावेन पदात्परत्वाभावात् "तिङ्ङतिङः" इति निघाताभावः ॥ उत अपि च हे आदित्याः अदितेः पुत्रा धात्र्यर्यमाद्यो देवाः । "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" इति अदितिशब्दाद् अपत्यार्थे प्राग्दीव्यतीयो ण्यप्रत्ययः । यूयमपि अस्मिन् आयुष्कामपुरुषविषये जागृत रक्षणार्थम् अवहिताः संनद्धा भवत । जागृ निद्राक्षये । अदादित्वात् शपो लुक् । "जाग्रोऽविचिण्णल्ङित्सु" इति ङितः पर्युदासाद् गुणाभावः ॥ आदित्यकर्तृकस्य जागरणस्य प्रयोजनम् आह । इमम् आयुष्कामं पुरुषं सनाभिः समानो[1] नाभिः गर्भाशयो यस्यासौ सनाभिर्ज्ञातिः । णह बन्धने । नहो भश्च [उ० ४. १२५] इति औणादिक इञ् प्रत्ययः । तत्संनियोगेन हकारस्य भकारादेशः । ततः समानशब्देन बहुव्रीहौ "ज्योतिर्जनपद०" इत्यादिना समानशब्दस्य सभावः । "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति स एव भवति । उत वा अपि वा अन्यनाभिः असमानजन्मा ज्ञातिरूपः अज्ञातिरूपः इति द्विविधोपि शत्रुः । अत्र माङ्श्रवणाद् भाविनी क्रिया संबध्यते । मा प्रापत् हिंसितुं मैव प्राप्नोतु ॥ तथा यः पौरुषेयः पुरुषकृतः । "पुरुषाद् वधविकार०" इति ढञ् प्रत्ययः । तथाविधो वधः हिंसन[2]म् । "हनश्च वधः" इति भावे हन्तेरप् प्रत्ययः धातोर्वधादेशश्च । सोपि इमम् आयुष्कामं पुरुषं मा प्रापत् । आपॢ व्याप्तौ । लुङि "पुषादिद्युताद्यॢदितः०" इति च्लेः अङ् आदेशः ॥ उक्ताभिर्देवताभिः परिरक्षितः सन् सर्वबाधाविनिर्मुक्तश्चिरं जीवतु इत्यर्थः ॥

द्वितीया ॥

ये वो॑ देवाः पि॒तरो॒ ये च॑ पु॒त्राः सचे॑तसो मे शृणु॒तेदमु॒क्तम् ।
सर्वे॑भ्यो व॒ः परि॑ ददाम्ये॒तं स्व॒स्त्ये॑नं ज॒रसे॑ वहाथ ॥ २ ॥

---

1 S′ Kd समाननाभिः for समानो नाभिः. 2 S′ Kd हिंसहनश्च for हिंसनम् । हनश्च.

ये । वः । देवाः । पितरः । ये । च । पुत्राः । सऽचेतसः । मे । शृणुत ।
इदम् । उक्तम् ।
सर्वेभ्यः । वः । परि । ददामि । एतम् । स्वस्ति । एनम् । जरसे । वहाथ ॥ २ ॥

हे देवाः दानादिगुणयुक्ताः प्रागुदीरिताः वः युष्माकं ये पितरः ये च पुत्राः सन्ति ते सर्वे यूयं सचेतसः अस्मिन्नायुष्कामपुरुषविषये समानमनस्काः सन्तः । ‡ “समानस्य च्छन्दसि०” इति समानशब्दस्य सभावः ‡ । मे मदीयम् इदम् वक्ष्यमाणम् उक्थम् वाक्यम् । ‡ वच परिभाषणे । अस्माद् औणादिको भावे क्थन् प्रत्ययः । “वचिस्वपि०” इत्यादिना संप्रसारणम् ‡ । तद् वचनं शृणुत उक्तप्रकारेण कर्तुम् आकर्णयत । ‡ श्रु श्रवणे । “श्रुवः शृ च” इति शृप्रत्ययः धातोः शृभावश्च ‡ ॥ किं तद् वाक्यम् इत्यत आह । हे देवाः सर्वेभ्यो वः । ‡ “बहुवचनस्य वस्नसौ” इति चतुर्थीबहुवचनान्तस्य युष्मदो वस् आदेशः ‡ । युष्मभ्यम् एतम् आयुष्कामं पुरुषं परि ददामि । रक्षणार्थं दानं परिदानम् । रक्षितुं प्रयच्छामि ॥ अतो यूयम् एनम् रक्षार्थं दत्तं पुरुषं स्वस्ति आध्यात्मिकादिदुःखपरिहाण्या जरसे जरायै । ‡ “जराया जरस् अन्यतरस्याम्” इति जरस् आदेशः ‡ । जराप्राप्तिपर्यन्तं वहाथ प्रापयत । ‡ वह प्रापणे । लेटि आडागमः ‡ ॥ जरोपलक्षितं शतसंवत्सरपरिमितं दीर्घम् आयुः अस्मै प्रयच्छतेत्यर्थः ॥

तृतीया ॥

ये देवा दिवि ष्ठ ये पृथिव्यां ये अन्तरिक्ष ओषधीषु पशुष्वप्स्वन्तः[1]।
ते कृणुत जरसमायुरस्मै शतमन्यान् परि वृणक्तु मृत्यून् ॥ ३ ॥

ये । देवाः । दिवि । स्थ । ये । पृथिव्याम् । ये । अन्तरिक्षे । ओषधीषु ।
पशुषु । अप्ऽसु । अन्तः ।

---

१ B $\overset{h}{B}$ D R $\overset{m}{S}$ have ३ for १. We with K V.

ते । कृणुत । जरसम् । आयुः । अस्मै । शतम् । अन्यान् । परि । वृ-
णक्तु । मृत्यून् ॥ ३ ॥

हे देवाः अग्निवायुसूर्यप्रभृतयः देवताकाण्डे समाम्नाताः । द्युपृथिव्या-दिस्थानभेदेषु विभज्य वक्ष्यमाणानां सर्वेषां देवानां साधारणोयं निर्देशः । "आमन्त्रितस्य च" इत्याष्टमिकं सर्वानुदात्तत्वम् । ये सूर्यादयो यूयं दिवि द्युलोके स्थ भवथ जगदनुग्रहार्थं निवसथ । "ऊडिदंपदाद्यप्पुम्रैद्युभ्यः" इति दिव उत्तरस्याः[1] सप्तम्या उदात्तत्वम् । अस्तेर्लेट् । मध्यमबहुवचने अदादित्वात् शपो लुक् । "श्नसोरल्लोपः" इति अकारलोपः । "यङ्लुक्तान्नित्यम्" इति निघातप्रतिषेधः । तथा ये अग्न्यादयो देवाः यूयं पृथिव्याम् भूमौ । समनन्तरक्रियानुषङ्गः । स्थ भवथ । तथा ये वाय्वादयो यूयम् अन्तरिक्षे अन्तरिक्षलोके स्थ । प्रकाशप्रवर्षणपचनाद्युपकारनिमित्तत्वेन त्रिषु लोकेषु वर्तध्वम् इत्यर्थः । यद्वा "ये देवा दिव्येकादश स्थ पृथिव्याम् अध्येकादश स्थ । अप्सुषदो महिनैकादश स्थ" [तै॰सं॰१.४.१०.१] इति मन्त्रप्रसिद्धाः स्थानत्रये वर्तमानास्त्रयस्त्रिंशद्देवा अत्र संबोध्यन्ते । तथा ओषधीषु व्रीहियवादिषु पशुषु गवादिषु अप्सु उदकेषु अन्तः मध्ये तत्तदभिमानित्वेन वर्तमाना ये यूयं स्थ । "ऊडिदम्॰" इत्यादिना अप्शब्दात् परस्य सुप उदात्तत्वम् । अन्तर्शब्दः स्वरादिष्वन्तोदात्तः पठितः । संहितायां यणादेशे "उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य" इत्यन्तर्शब्दाकारः स्वर्यते । ते सर्वे देवा यूयम् अस्मै आयुष्कामाय पुरुषाय जरसम् जराम् । जरापर्यन्तम् इत्यर्थः । "जराया जरस् अन्यतरस्याम्" इति जरस् आदेशः । तथाविधम् आयुः जीवनं कृणुत कुरुत ॥ भवत्प्रसादाद् असौ शतसंवत्सरपरिमितम् आयुर्जीवतु इत्यर्थः ॥ तदर्थम् अन्यान् कालमृत्युव्यतिरिक्तान् शतम् । अपरिमितनामैतत् । अपरिमितान् मृत्यून् मरणहेतुभूतान् ज्वरादिरूपान् । "ये ते सहस्रम् अयुतं पाशा[2] मृत्यो मर्त्याय हन्तवे" [तै॰ब्रा॰ ३.१०.८.२] इत्यादिमन्त्रप्रसिद्धान् अपमृत्युविशेषान् परि वृणक्तु परिवर्ज-

---

1 S′Kd उत्तरस्य. 2 S′Kd पाशमृत्यो.

यत। परमायुर्भङ्गकरान् अपमृत्यून् निवारयतेत्यर्थः। ऋ वृजी वर्जने। लोण्मध्यमबहुवचनादेशस्य तशब्दस्य "तप्तनप्तनथनाश्च" इति तप् आदेशः। तस्य पित्त्वेन ङित्त्वाभावात् श्नस्य लोपाभावः ऋ॥ यद्वा शतमिति आयुःशब्देन संबध्यते। शतसंवत्सरपरिमितम् आयुः कुरुतेत्यर्थः॥

चतुर्थी॥

येषाँ प्रयाजा उत वानुयाजा हुतभागा अंहुतादश्च देवाः॥
येषाँ वः पञ्च प्रदिशो विभक्तास्तान् वो अस्मै सत्रसदः कृणोमि॥४॥

येषाम्। प्रऽयाजाः। उत। वा। अनुऽयाजाः। हुतऽभागाः। अहुतऽअदः। च। देवाः।
येषाम्। वः। पञ्च। प्रऽदिशः। विऽभक्ताः। तान्। वः। अस्मै। सत्रऽसदः। कृणोमि॥४॥

प्रयाजाः। प्रधानयागात् प्रथमभाविनः समित्तनूनपादादयः पञ्च यागाः प्रयाजाः। ते येषां देवानां स्वभूताः। "अथ किंदेवताः प्रयाजानुयाजाः" इति प्रक्रम्य "आग्नेया इति तु स्थितिर्भक्तिमात्रम् इतरत्" [नि० ८. २२] इत्यन्तेन यास्केन प्रपञ्चिताः प्रयाजदेवाः। ते चात्र येषाम इति सर्वनाम्ना विवक्ष्यन्ते। "प्रयाजान् मे अनुयाजांश्च केवलान् ऊर्जस्वन्तं हविषो दत्त भागम्" [ऋ० १०. ५१. ८] इति मन्त्रप्रसिद्धोग्निरेव वा विवक्षितः। अस्मिन् पक्षे येषाम् इति बहुवचनं पूजार्थम। ऋ येषाम् इत्यत्र "सावेकाचः०" इति प्राप्तस्य विभक्त्युदात्तत्वस्य "न गोश्वन्त्साववर्ण०" इति प्रतिषेधः। प्रपूर्वाद् यजतेः "अकर्तरि च कारके संज्ञायाम्" इति घञ्। "प्रयाजानुयाजौ यज्ञाङ्गे" इति कुत्वाभावो निपात्यते। "थाथघञ्क्ताजबित्रकाणाम्" इत्युत्तरपदान्तोदात्तत्वम् ऋ। उत वा अपि वा अनुयाजाः। अनु पश्चात् प्रधा-

---

१ S^m आहुता°. We with A B B^h D R P P^2 J V. २ P देवाः. We with P^2 J. ३ P अस्मै. We with P^2 J.

---

1 S' Kd समित्तनूनपातादयः.

नयागानन्तरभाविनस्त्रयो यागा अनुयाजाः । ते च येषां देवानां स्वभूताः । ॥ प्रयाजशब्दवत् अनुयाजशब्दस्यापि पदस्वरप्रक्रिये वेदितव्ये ॥ । ये च अन्ये देवा हुतभागाः । हुतम् अग्नौ प्रास्तं चरुपुरोडाशादिकं हविः भागो येषां देवानां ते हुतभागा इन्द्रादयः । तथा ये च देवा अहुतादः । न हुतम् अहुतम् अग्नेरन्यत्र क्षिप्यमाणं हविरदन्ति भक्षयन्तीति अहुतादः बलिहरणादिदेवाः । ॥अद भक्षणे । इत्यस्माद् "अदोऽनन्ने" इति विट् प्रत्ययः ॥ । हे इन्द्रादयो देवाः येषाम् प्रसिद्धानां वः युष्माकं पञ्च पञ्चसंख्याकाः प्रदिशः प्रधानभूताः प्राच्याद्या दिशः विभक्ताः ईशितव्यत्वेन विभज्य स्थिताः । यद्वा "पथ्यां स्वस्तिम् अयजन् प्राचीमेव तया दिशं प्राजानन्" [तै० सं० ६. १. ५. २] इत्यादिश्रुतिप्रसिद्धाः पथ्या स्वस्तिः अग्निः सोमः सविता दितिः इत्येतन्नामानो देवाः येषाम् इति यच्छब्देन विवक्षिताः । हे देवाः तान् उक्तान् सर्वान् वः युष्मान् अस्मै आयुष्कामस्य पुरुषस्य आयुर्वर्धनाद्युपकाराय सत्रसदः । सीदन्त्यस्मिन्निति सत्त्रम् सदनम् । तस्मिन् सीदतः संनिहितान् कृणोमि करोमि । ॥षदॢ विशरणगत्यवसादनेषु इत्यस्माद् अधिकरणे औणादिकस्त्रन् प्रत्ययः । तस्मिन्नुपपदे तस्मादेव धातोः "सत्सूद्विष०" इत्यादिना कर्तरि क्विप् ॥ ॥

[इति] द्वितीयं सूक्तम् ॥

अत्र नित्यनैमित्तिककाम्यभेदेन द्वाविंशतिः सवयज्ञा विहिताः । ते च ब्रह्मौदनस्वर्गौदनचतुःशरावसवौदनसवशतौदनद्वयाजौदनपञ्चौदनब्रह्मास्यौदनमृत्युसवानडुत्सवद्वयकार्किंपृश्निद्वयपौनशिलपवित्रोर्वराऋषभवशाशालाबृहस्पतिसवाख्याः । तत्र चतुःशरावौदनसवे "आशानाम्" इति सूक्तं विनियुक्तम् । तत्र तेन निरुप्तहविरभिमर्शनम् संपातम् दातृवाचनम् दानं च कुर्यात् । यद् आह कौशिकः । "आशानाम् इति चतुःशरावम्" इति [कौ० ८. ५] । "निरुप्तं सूक्तेनाभिमृशति" इति [कौ० ८. ९] । "सूक्तेन

---

1 S′Kd सीद्यंत्य°. 2 S′Kd °पौनासिल°. We with *Kaus'ika*. The two MSS. of *Kaus'ika*, and the *Kes'avî* have °पौन°, and not °पौनः°. 3 S′Kd °मृशत इति. We with *Kaus'ika*.

पूर्वं संपातवन्तं करोति" [कौ° ८. ४] । "तस्मिन्नन्वारब्धं दातारं वाचयति तन्नसूक्तं पच्छः" इति [कौ° ८. ९] "सूक्तेनाभिमन्त्र्य दद्यात्" [कौ° ८. ४] इति च ॥

तथा अनेनैव सूक्तेन धूमकेतुरूपाद्भुतदर्शने दिग्देवताकस्य बहुरूपस्य अजस्य अवदानानि तद्देवताकं चरुं च प्रत्यृचं जुहुयात् । तथा च सूत्रम् । "अथ यत्रैतद् धूमकेतुः सप्तऋषीन् उपधूपयति तद् अयोगक्षेमाशङ्कम् इत्युक्तं पञ्च पशवस्तायन्ते" इति प्रक्रम्य "आशानामिति दैशस्य"[1] इति [कौ° १३. ३५] ॥

तद्वदेव ग्रामनगरदेशप्राकाराद्यवदरणे "अग्रामस्खा" इति तृतीयावर्जम् अनेन सूक्तेन पुरोडाशानां पाषाणानां[2] च निखननं कुर्यात् । "आशापालीयं तृतीयावर्जम्" इति प्रक्रम्य "पुरोडाशान् अश्मोत्तरान् अन्तःस्रक्तिषु निदधात्युभयान् संपातवतः" इति हि सूत्रितम् [कौ° ५. २] ॥

अस्य प्रथमयर्चा सर्वरोगभैषज्ये[3] आप्लावनावसेचनपायनादिकं कुर्यात् । सूत्रं च । "ओषधिवनस्पतीनाम्[4] अनुक्तान्यप्रतिषिद्धानि भैषज्यानाम् अंहोलिङ्गाभिः" इति [कौ° ४. ८] ॥ अत्र अंहोलिङ्गाभिरिति "आशानाम आशापालेभ्यः" इत्येका [१. ३१. १] "अग्नेर्मन्वे" इति [४. २३-२९] सप्त सूक्तानि "या ओषधयः सोमराज्ञीः" इत्येका [६. ९६. १] "वैश्वानरो न आगमत्" इत्येका [६. ३५. २] "शुम्भनी द्यावापृथिवी" इत्येका [७. ११७. १] "यदर्वाचीनम्" इत्येका [१०. ५. २२] "मुञ्चन्तु मा" [११. ६. ७] "भवाशर्वाविदम्" [११. ६. ९] "या देवीः पञ्च" [११. ६. २२] "यन्मातली रथ°" [११. ६. २३] इत्येताभिश्चतसृभिर्वर्जितम् "अग्निं ब्रूमः" [११. ६] इत्यर्थसूक्तम् । अयं सप्तप्रतीकः अंहोलिङ्गगणो विवक्षितः ॥

अश्वमेधे उत्सृष्टम् अश्वम् "आशानाम" इति सूक्तेन ब्रह्मा अनुम-

---

1 So **S′Kd**. The MSS. of *Kaus'ika* read **दिशश्च**. 2 **S′Kd पापाणिनां**. We with *Kaus'ika*. 3 **S′Kd सर्वरोगभैषज्यो**. 4 **S′Kd °वनस्पतीनामुक्तान्य°**. We with *Kaus'ika* and the *Kes'avî*.

न्त्रयते । उक्तं वैताने । "आशापालीयेनोत्सृष्टं संवत्सरम्" इति [वै० ७. १] ॥

तथा "अंहोलिङ्गानाम् आपोभोजनहवींषि" [कौ० ७. ९] इत्यादावपि एतद् द्रष्टव्यम् ॥

अद्भुतमहाशान्तौ दिग्देवताक आद्यो[2] मन्त्रः । उक्तं नक्षत्रकल्पे । "अथातोऽद्भुतमहाशान्तौ दिशो यजते विदिशो यजते" इत्यारभ्य "आशानाम्" इति [न० क० १४] ॥

"स्वस्ति मात्रे"[१. ३१. ४] इत्यन्त्यया[3] ऋचा सर्वस्वस्ययनकामः रात्रौ उपस्थानं कुर्यात् । "स्वस्ति मात्र इति निश्युपतिष्ठते" इति सूत्रम् [कौ० ७. १] ॥

तत्र प्रथमा ॥

आशानामाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः ।
इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयम् ॥ १ ॥

आशानाम् । आशाऽपालेभ्यः । चतुःऽभ्यः । अमृतेभ्यः ।
इदम् । भूतस्य । अधिऽअक्षेभ्यः । विधेम । हविषा । वयम् ॥ १ ॥

आशानाम् प्राच्यादिदिशाम् । ☒ आशाया अदिगाख्या चेत्[फि० १. १९] इति अन्तोदात्तत्वस्य पर्युदासाद् आद्युदात्तता ☒ । [आशा]पालेभ्यः । आशाः पालयन्ति रक्षयन्तीति आशापालाः । ☒ "कर्मण्यण्" इति अण् प्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वेन अन्तोदात्तता ☒ । अत्र आशापालेभ्य इति समस्तेन पदेन[4] स्वामित्वमात्रं विवक्षितम् । आशानाम् इति षष्ठ्यन्तेन ईशितव्यस्य बहुत्वम् अभिधीयत इति न पौनरुक्त्यम् । तेभ्यश्चतुर्भ्यः चतुःसंख्याकेभ्यः इन्द्रयमादिभ्यः । ☒ "झल्युपोत्तमम्" इति उपोत्तमस्य अच उदात्तत्वम् ☒ । अमृतेभ्यः । मृतं मरणम् । ☒ भावे निष्ठा ☒ । तद् न विद्यते येषां ते तथोक्तास्तेभ्यः । ☒ "न-

---

1 S'Kd आशानामाशापालीयेन. We with the *Vaitâna* and its commentary *Âkshepânuvidhi*. 2 S'Kd °देवताकत्याद्यो for °देवताक आद्यो. 3 S'Kd °त्यंतयचा for °त्यन्त्यया ऋचा. 4 S'Kd पादेन.

ओ जरमरमित्रमृताः" इत्युत्तरपदाद्युदात्तत्वम् ॥। भूतस्य सत्तां प्राप्तस्य स्थावरजङ्गमात्मकस्य जगतः अध्यक्षेभ्यः अधिपतिभ्यः इन्द्रादिभ्यः इदम इदानीं चतुःशरावसवयागकाले हविषा ओदनेन मन्त्रसंस्कृतेन विधेम परिचरेम । ॥ विधतिः परिचरणकर्मा [निघ० ३. ५] । विध विधाने इति तुदादौ च पठ्यते । विकरणस्वरेण मध्योदात्तत्वम् । पादादित्वाद् निघाताभावः ॥ ॥

द्वितीया ॥

य आशानामाशापालाश्चत्वार् स्थन देवाः ।
ते नो निर्ऋत्याः पाशेभ्यो मुञ्चतांहसोअंहसः ॥ २ ॥
ये । आशानाम् । आशाऽपालाः । चत्वारः । स्थन । देवाः ।
ते । नः । निःऽऋत्याः । पाशेभ्यः । मुञ्चत । अंहसःऽअंहसः ॥ २ ॥

हे देवाः इन्द्रादयः चत्वारः चतुःसंख्याका ये प्रसिद्धा यूयम् आशानाम दिशाम् आशापालाः अधिपतयः स्तन भवत । ॥ अस भुवि इत्यस्मात् लोण्मध्यमपुरुषबहुवचनादेशस्य तशब्दस्य "तप्तनप्तनथनाश्च" इति तनादेशः । "श्नसोरल्लोपः" इत्यकारलोपः ॥ । ते यूयं नः अस्मान् हविषा युष्मान् प्रीणयितॄन् निर्ऋत्याः । निर्ऋतिः आर्तिकरी पापदेवता । तस्याः संबन्धिभ्यः पाशेभ्यः मरणहेतुभ्यः । तथा अंहसोअंहसः निर्ऋतिपाशव्यतिरिक्ताद् मरणहेतुभूताद् अन्यस्मात् सर्वस्मात् पापात् मुञ्चत मोचयत । ॥ मुचॢ मोक्षणे । "शे मुचादीनाम्" इति नुम् ॥ ॥

तृतीया ॥

अस्रामस्त्वा हविषा यजाम्यश्रोणस्त्वा घृतेन जुहोमि ।
य आशानामाशापालस्तुरीयो देवः स नः सुभूतमेह वक्षत् ॥ ३ ॥
अस्रामः । त्वा । हविषा । यजामि । अश्रोणः । त्वा । घृतेन । जुहोमि ।

---

१ K $\overset{h}{B}$ R $\overset{m}{S}$ S V अश्रोम°. We with A B D P $\overset{2}{P}$ J. २ V °श्रोण°. We with A B $\overset{h}{B}$ D K R $\overset{m}{S}$ P $\overset{2}{P}$ J.

यः । आशानाम । आशाऽपालः । तुरीयः । देवः । सः । नः । सुऽभूतम ।
आ । इह । वक्षत् ॥ ३ ॥

अत्र उत्तरार्धे वक्ष्यमाणो देवः संबोधनीयः । हे धनद त्वा त्वाम् अभिमतधनादिसिद्ध्यर्थम् अश्रामः अश्रमः । ॥ श्रमु तपसि खेदे च । अस्माद् घञि "अत उपधायाः" इति प्राप्ताया वृद्धेः "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति निषेधाभावश्छान्दसः ॥ । श्रमरहितः शरीरप्रयासम् अननुसंदधानः सन् हविषा चर्वादिरूपेण यजामि पूजयामि ॥ तथा हे देव त्वा त्वाम् उद्दिश्य अश्रोणः श्रोणाख्यव्याधिविशेषरहितः सन् घृतेन आज्येन जुहोमि । ॥ घृतेनेति । "तृतीया च होश्छन्दसि" इति तृतीया ॥ ॥ तम् अभिमतं देवं दर्शयति । आशानाम् दिशाम् आशापालः स्वामी तुरीयः पूर्वोदीरितेन्द्रादिदिक्पालापेक्षया चतुर्थः । ॥ "चतुरश्छयतावाद्यक्षरलोपश्च" इति छप्रत्ययः तत्संनियोगेन चकारलोपश्च । "आयन्नादिषु उपदेशिवद्वचनं स्वरसिद्ध्यर्थम" इति वचनात् प्रत्ययस्वरेण ईकार उदात्तः ॥ । एवंभूतो यः प्रसिद्धो देवः धनदाख्यदेवोस्ति स देवः नः अस्माकं सुभूतम् सुष्ठु प्रभूतं सुवर्णरजतादिरूपं धनम् इह अस्मिन् कर्मणि संनिहितः गृहे वा आ वक्षत् आवहतु प्रापयतु । मया दत्तेन हविराज्यादिना प्रीतः सन् मह्यं यथेष्टं धनम् आहृत्य प्रयच्छतु इत्यर्थः । ॥ वह प्रापणे । अस्मात् लेटि अडागमः । "सिब्बहुलं लेटि" इति सिप् । ततः "हो ढः" इति ढत्वम् । "षढोः कः सि" इति कत्वम् । "तिङ्तिङः" इति निघातः ॥ ॥

चतुर्थी ॥

स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः ।
विश्वं सुभूतं सुविदत्रं नो अस्तु ज्योगेव दृशेम सूर्यम् ॥ ४ ॥
स्वस्ति । मात्रे । उत । पित्रे । नः । अस्तु । स्वस्ति । गोभ्यः । जगते । पुरुषेभ्यः ।

---

१ A R $\overset{m}{S}$ B णो. We with D K S V.

---

1 S′ Kd अनुसंदधानः for अननुसंदधानः.

विश्वम्। सुऽभूतम्। सुऽविदत्रम्। नः। अस्तु। ज्योक्। एव। दृशेम।
सूर्यम् ॥ ४ ॥

आत्मनोभिलषितं धनादिकं संप्रार्थ्य स्वकीयानां मात्रादीनां कुशलम् आशास्ते। "एभ्यो माता गरीयसी" इति स्मरणात् पित्रादिभ्यः श्रैष्ठ्यम् अभिप्रेत्य मातुः प्रथमतो निर्देशः। मात्रे स्वकीयायै जनन्यै। "ऋन्नेभ्यः०" इति प्राप्तस्य ङीपो "न षट्स्वस्रादिभ्यः" इति प्रतिषेधः। "नमःस्वस्तिस्वाहा०" इति चतुर्थी। "उदात्तयणो हल्पूर्वात्" इति विभक्तेरुदात्तत्वम्। स्वस्ति क्षेमः अस्तु। स्वस्तीत्यविनाशिनाम। अस्तिरभिपूजितः सु अस्तीति हि यास्कः [नि. ३. २१]। [उत अपि च] नः अस्माकं पित्रे जनकाय स्वस्त्यस्तु भवतु। उपलक्षणम् एतद् अन्येषामपि पुत्रपत्न्यादीनाम्। तथा गोभ्यः पशुभ्यः स्वस्त्यस्तु। "सावेकाचस्तृतीयादि०" इति प्राप्तस्य विभक्त्युदात्तत्वस्य "न गोश्वन्त्साववर्ण०" इति प्रतिषेधः। तथा पुरुषेभ्यः स्वकीयेभ्यो भृत्यादिभ्यः स्वस्त्यस्तु। किं बहुना जगते सर्वस्मै लोकाय स्वस्त्यस्तु ॥ मात्रादीनां स्वस्त्यस्तु इत्युक्तम् तदेव विशिनष्टि। नः अस्माकं संबन्धि विश्वम् सर्वम् उक्तं मात्रादिकं सुभूतम् शोभनधनोपेतं सुविदत्रम् शोभनज्ञानयुक्तं च अस्तु भवतु। सुविदत्रः कल्याणविद्य इति हि यास्कः [नि. ६. १४] ॥ यद्वा सुभूतम् सु शोभनं भूतं भवनं यस्य तत् तथोक्तम्। सुविदत्रम्। विद्यते लभ्यत इति विदत्रम् धनम्। विदॢ लाभे विद ज्ञाने इत्यस्माद् वा सुविदेः कत्रन् [उ० ३. १०८] इति कत्रन् प्रत्ययः। शोभनं विदत्रं धनं यस्य तत् तथोक्तम्। यद्वा सुभूतम् सुसमृद्धं विश्वम् सर्वं सुविदत्रम् धनं नोस्तु। सुविदत्रशब्दं यास्कस्तु द्वेधा व्युत्पादयामास। सुविदत्रं धनं भवति विन्दतेर्वा एकोपसर्गाद् ददातेर्वा स्याद् द्व्युपसर्गात् [नि० ७. ९] इति ॥ तथा उक्तमात्रादिसहितस्य आत्मनश्च[2] दीर्घम् आयुः प्रार्थयते। ज्योगेव चिरकालमेव शतसंवत्सरपर्यन्तं सूर्यम् आदित्यं दृशेम

---

1 S' सुविदः. 2 S' Kd °त्मनः स्वदीर्घ° for °त्मनश्च दीर्घ°.

पश्येम । दृशिर् प्रेक्षणे । "लिङ्याशिष्यङ्" इत्यस्य स्थाने "दृ-शेरग्वक्तव्यः" इति अक् प्रत्ययः । कित्त्वात् लघूपधगुणाभावः ॥

[इति] षष्ठेनुवाके तृतीयं सूक्तम् ॥

"इदं जनासः" इति सूक्तेन वन्ध्यायाः पुत्रप्रजननकर्मणि तस्याः शान्तौषधिसहितोदकाभिषेकम् पुरोडाशकन्दुकालंकारप्रदानं च कुर्यात् । सूत्रितं हि । "इदं जनास इत्यस्यै शिंशपाशाखासु उदकान्ते शान्ता अधिशिरोवसिञ्चति [आव्रजितायै]" इति [कौ० ४. १०] ॥

तथा अनेन सूक्तेन पुष्टिकामः संपत्कामो वा द्यावापृथिव्योर्यागम् उपस्थानं वा कुर्यात् । आह कौशिकः । "इदं जनास इति द्यावापृथिव्यौ पुष्टिकामः संपत्कामः" इति [कौ० ७. १०] ॥

अत्र आद्या दर्शपूर्णमासयोः पत्न्यञ्जलौ उदपात्रनिनयने विनियुक्ता । सूत्रं च । "बर्हिषि पत्न्यञ्जलौ निनयति समुद्रं वः प्र हिणोमि इति [१०. ५. २३] इदं जनासः[१. ३२. १] इति वा" इति [कौ० १. ६] ॥

तत्र प्रथमा ॥

इदं जनासो विदथं महद् ब्रह्म वदिष्यति ।
न तत् पृथिव्यां नो दिवि येन प्राणन्ति वीरुधः ॥ १ ॥

इदम् । जनासः । विदथं । महत् । ब्रह्म । वदिष्यति ।
न । तत् । पृथिव्याम् । नो इति । दिवि । येन । प्राणन्ति । वीरुधः ॥ १ ॥

जनासः हे जनाः । "आज्जसेरसुक्" । ज्ञातुकामा यूयम इदम वक्ष्यमाणं वस्तु विदथ जानीथ । विद ज्ञाने । लेटि मध्यमबहुवचने व्यत्ययेन शः ॥ किं तद् इत्यत आह । मन्त्रद्रष्टा ऋषिः महत् महत्त्वगुणयुक्तं व्यापकं ब्रह्म ब्रह्मणः प्रथमकार्यम् । श्रूयते हि । "आपो वा इदम् अग्रे सलिलम् आसीत्" [तै० सं० ७. १. ५. १] इति । स्मर्यते च ।

---

1 S′Kd संत्योषधि°. We with *Kaus'ika*. 2 S′Kd पुरोडाशकंतुकालंकालप्रदानं. On *Kaus'ika*. IV. 8 (which see) *Dârila* says: भक्षणक्रीडनभूषणार्थम्. 3 S′Kd लिटि.

अप एव ससर्जादौ तासु वीर्यम् अपाकिरत् इति [म० स्मृ० १. ८]। तादृशं ब्रह्म वदिष्यति कथयिष्यति ॥ तस्योदकस्य प्रतिनियतं निवासस्थानं वक्तुं लोकप्रतीतिसिद्धं स्थानम् अपवदति । तत् उदकात्मकं ब्रह्म पृथिव्याम् भूमौ न । तिष्ठतीति शेषः । वृष्ट्यूर्ध्वभाविनो जलस्यैव भूमौ अवस्थानम् । ननु[2] लोकप्रतीतिसिद्धं द्युलोक एवेत्यत आह । नो नैव दिवि द्युलोके । तिष्ठतीति शेषः ॥ तर्हि संभावि[3]ता लोकद्वये अविद्यमानस्य तस्य खपुष्पकल्पनेत्यत आह । येन उक्तेन उदकेन वीरुधः विरोहणशीलाश्च कौशिकेनोक्ताश्चित्र्याद्या अन्याश्चौषधयः प्राणन्ति जीवन्ति । उदकम् अन्तरेण अनुपपद्यमानं वीरुधां जीवनं तत्सत्तायाः कल्पकम् इति तस्य नासत्त्वम् इत्यर्थः । ॒श्वस प्राणने । अन च । अदादित्वात् शपो लुक् । "अनितेः" इति णत्वम् । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ॒ ॥

द्वितीया ॥

अन्तरिक्ष आसां स्थाम आन्तसदामिव ।
आस्थानमस्य भूतस्य विदुष्टद् वेधसो न वा ॥ २ ॥
अन्तरिक्षे । आसाम् । स्थाम । आन्तसदामऽइव ।
आऽस्थानम् । अस्य । भूतस्य । विदुः । तत् । वेधसः । न । वा ॥ २ ॥

पूर्वं प्रतिपादितप्रकारेण उदकसत्ताया अवश्यंभावात् लब्धसत्ताकस्य च वस्तुनः क्वचिद् अवस्थाननियमात् अस्यापि केनचिद् निवासस्थानेन भवितव्यम् इत्याशङ्क्य विवक्षितम् असाधारणं स्थानं दर्शयति अन्तरिक्ष इति । आसाम् वीरुधां स्थाम स्थानं स्थितिहेतुभूतम् उदकम् अन्तरिक्षे द्यावापृथिव्योर्मध्यवर्तिनि लोके । वर्तत इति शेषः । ॒स्थामेति । ष्ठा गतिनिवृत्तौ । अस्माद् मनिन् प्रत्ययः ॒ ॥ यद्वा । आसाम् वीरुज्जीवनहेतुभूतानाम् अपां स्थाम स्थानम् अन्तरिक्षे अन्तरिक्षलोके ।

---

१ B $\overset{h}{B}$ V °मस्य°. We with A D K R $\overset{m}{S}$ P $\overset{2}{P}$ J.

---

1 S′ Kd नवास°. 2 S′ Kd नकुं for ननु. 3 S′ Kd संभावितो.

आह च भगवान् पतञ्जलिर्महाभाष्ये । "अन्तरिक्षे महत् समुद्रं विततम् अस्ति" इति । श्रूयते च । "अस्मिन् महत्यर्णवेन्तरिक्षे" [तै० सं० ४. ५. ११. १] इति । तत्र दृष्टान्तः । आन्तसदामिव । तपसा कृच्छ्रचान्द्रायणादिना आन्ताः सन्तः सीदन्ति निवसन्ति सुखोपभोगार्थम् इति आन्तसदः यक्षगन्धर्वादयः । ॒षदॢ विशरणगत्यवसादनेषु । अस्मात् "सत्सूद्विष०" इत्यादिना क्विप् ॒ । तेषां यथा अन्तरिक्षं स्थानम् । "यक्षगन्धर्वाप्सरोगणसेवितम् अन्तरिक्षम्" [नृ० पू० ता० १] इति श्रुतेः । तथेति पूर्वेण संबन्धः । ॒ "इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्" इति समासः ॒ ॥ लोकान्तरगतत्वेन तद् उदकं भूलोकनिवासिनाम् अनुपकारकम् इत्याशङ्क्य आह आस्थानम् इति । अस्य अस्मिन् लोके परिदृश्यमानस्य भूतस्य लब्धसत्ताकस्य स्थावरजङ्गमात्मकस्य जगतः आस्थानम् । आ समन्तात् तिष्ठन्ति जीवन्ति अनेनेति आस्थानम् । ॒करणे ल्युट् ॒ । वृष्टिद्वारा जगज्जीवनकारणम् इत्यर्थः ॥ तस्य दुर्ज्ञानत्वम् आह । तत् कारणभूतम् उदकं वेधसः विधातारो मन्वादयः विदुः जानन्ति न वा विदुः न वा जानन्ति । सर्वस्रष्टॄणां तेषामपि संदिग्धं किल तत् किमु वक्तव्यम् अर्वाचीनानां मनुष्याणां दुर्ज्ञेयमिति इत्यर्थः । ॒ विदुष्टद् इति । "युष्मत्तत्ततक्षुष्वन्तःपादम्" इति विसर्जनीयस्य षत्वम् ॒ ॥

तृतीया ॥

यद् रोदसी रेजमाने भूमिश्च निरतक्षतम् ।
आर्द्रं तदद्य सर्वदा समुद्रस्येव स्रोत्याः ॥ ३ ॥

यत् । रोदसी इति । रेजमाने इति । भूमिः । च । निःऽअतक्षतम् ।
आर्द्रम् । तत् । अद्य । सर्वदा । समुद्रस्यऽइव । स्रोत्याः ॥ ३ ॥

तस्योदकस्य उत्पत्तिप्रकारम् आह । रोदसी हे* द्यावापृथिव्यौ रेजमाने कम्पमाने जलम् उत्पादयितुं व्याप्रियमाणे । ॒ रेजृ कम्पने

---

1 S′ Kd दुर्ज्ञेयत्वमित्यर्थः for दुर्ज्ञेयत्वमिति इत्यर्थः.

इति धातुः । भ्यसते रेजत इति भयवेपनयोः इति यास्कः[नि° ३. २१]ऽ । भूमिः चकारात् द्यौश्च युवां यत् प्रागुदीरितम् उदकं निरतक्षतम् उदपादयतम् । सृष्टस्योदकस्य सर्वदा धारणात् प्राधान्यं सूचयितुं भूमेः अवयुत्यापि निर्देशः । ऽतक्षू त्वक्षू तनूकरणे । अस्मात् लङि मध्यमद्विवचने रूपम् । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ऽ । तत् उदकम् अद्य इदानीं वर्तमानकाले सर्वदा सर्वस्मिन् काले आर्द्रम् आर्द्रगुणयुक्तं शोषरहितम् । वर्तत इति शेषः । वृष्टिद्वारा उदके निर्गतेपि पुनरपि अन्तरिक्षगतम् उदकम् अनुपक्षीणं वर्तत इत्यर्थः । तत्र दृष्टान्तः । समुद्रस्येव स्रोत्याः । यथा समुद्रगामिन्यो नद्यः अक्षीणोदका वर्तन्ते तद्वद् इत्यर्थः । ऽ"स्रोतसो विभाषा ड्यड्यौ" इति ड्यप्रत्ययः । डित्त्वात् टिलोपः ऽ ॥

चतुर्थी ॥

विश्वमन्यामभीवारं तदन्यस्यामधिश्रितम् ।
दिवे च विश्ववेदसे पृथिव्यै चाकरं नमः ॥ ४ ॥

विश्वम् । अन्याम् । अभिऽवारं । तत् । अन्यस्याम् । अधि । श्रितम् ।
दिवे । च । विश्वऽवेदसे । पृथिव्यै । च । अकरम् । नमः ॥ ४ ॥

विशिष्टकारणजन्यत्वेन आप्यं श्रैष्ठ्यं सूचयितुं कारणत्वेन उक्ते द्यावापृथिव्यौ प्रशंसति । विश्वम् । ऽकर्मणि षष्ठ्यभावश्छान्दसः ऽ । विश्वस्य अन्याम् । ऽ"सुपां सुपो भवन्ति" इति सोः अम आदेशः ऽ । अन्या द्यौः अभीवारः अभितो वरणं छादनम् । भवतीति शेषः । ऽवृञ् वरणे । "वृणो[तेराच्छादने" इति अ]भिपूर्वादपि व्यत्ययेन घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति पूर्वपदस्य दीर्घः ऽ ॥ अथ वा विश्वम् कृत्स्नं जगत् अन्याम् अन्यया दिवा । ऽव्यत्ययेन द्वितीया ऽ । अभीवारः अभिवृतम् । ऽक-

---

१ A B B[P] B[h] D K K[m] R S[m] P P[2] J and V all have °भीवारतद्° and not भीवारस्तद्°.
२ So P P[2] J

र्मणि घञ् ॥ । आच्छन्नम इत्यर्थः । ॥ लिङ्गव्यत्ययः ॥ यद्वा । विश्वम कर्तृभूतं जगत् अन्याम् दिवम् उद्दिश्य अभीवारः । अभितः संभजनयुक्तं वृष्टिविषयप्रार्थनायुक्तम् अभूत् । ॥ वृङ् संभक्तौ । भावे घञ् ॥ तत् उक्तं विश्वम् अन्यस्याम् पृथिव्याम् अधिश्रितम् आश्रितं वर्तते ॥ दिवे उक्तलक्षणाय द्युलोकाय विश्ववेदसे । वेद इति धननाम । विश्वस्य जगतो धनभूताय । वृष्टिप्रदानेन सर्वधनहेतुत्वाद् धनात्मकत्वम् । यद्वा वेद इति ज्ञाननाम । विश्वं विश्वविषयं ज्ञानं यस्याः[1] सा तथोक्ता तस्यै । तथा पृथिव्यै विश्वाधारभूतायै । परस्परसमुच्चयार्थौ चकारौ । नमः । अन्ननामैतत् । हविर्लक्षणम् अन्नं नमस्कारं वा अकरम् करोमि । ॥ "छन्दसि लुङ्लङ्लिटः" इति करोतेर्वर्तमाने लुङ् । "कृमृदरुहिभ्यश्छन्दसि" इति च्लेः अङ् आदेशः । "तिङ्तिङः" इति निघातः ॥ ॥

[इति] षष्ठेनुवाके चतुर्थं सूक्तम् ॥

"हिरण्यवर्णाः" इति सूक्तस्य वृहद्गणे लघुगणे अपां सूक्तेषु च पाठात् तेषां यत्रयत्र विनियोगस्तत्र अस्य सूक्तस्य विनियोगोनुसंधेयः ॥ गणस्वरूपसूत्रं पूर्वमेव उदाहृतम् [१.४] ॥

तथा अनेन सूक्तेन अर्थोत्थापनकर्मणि "अम्बयो यन्ति" [१.४] इति सूक्तोक्तानि कर्माणि कुर्यात् ॥

तथा गोदानाख्ये संस्कारकर्मणि वपनानन्तरम् अनेन सूक्तेन माणवकं स्नापयेत् । सूत्र्यते हि । "अथैनम् उन्नकेशश्मश्रुं[2] कृत्तनखम् आस्नावयति हिरण्यवर्णाः इत्येतेन सूक्तेन" इति [कौ° ७.५] ॥

तथैव मधुपर्के पाद्योदकाभिमन्त्रणे च एतत् सूक्तम् । "अथोदकम् आहारयति पाद्यं भो इति हिरण्यवर्णाभिः[१.३३] प्रतिमन्त्र्य" इति सूत्रितम् [कौ° १२.१] ॥

तद्वदेव अनुदकदेश[3] उदकप्रादुर्भावलक्षणे अद्भुते अनेन सूक्तेन आज्यहोमः कार्यः । सूत्रितं हि । "अथ यत्रैतद् अनुदक उदकोन्मी-

---

1 S′Kd यस्य स for यस्याः सा. 2 S′Kd °श्मश्रुनिवृत्तनख°. 3 S′Kd अनुदककेश.

"लो भवति हिरण्यवर्णा इत्यपां सूक्तैर्जुहुयात् सा तत्र प्रायश्चित्तिः" इति [कौ० १३. २९] ॥

उदकपूर्णकलशभङ्गे नवकलशम् आहृत्य तत्र अनेन सूक्तेन उदकम् अभिमन्त्र्य पूरयेत्। "अथ यत्रैतत् कुम्भ उदधानः सक्तुधानी वा उखा वा अनिङ्गिता विकसति" इति प्रक्रम्य सूत्रितम् "अन्यं कृत्वा ध्रुवाभ्यां हंहयित्वा तत्र हिरण्यवर्णा इत्युदकम् आसेचयेत्" इति [कौ० १३. ४४] ॥

पुष्पाभिषेके कलशाभिमन्त्रणेपि एतत् सूक्तम्। तद् उक्तं परिशिष्टे।

सावित्र्युभयतः कुर्यात् शं-नो-देवी तथैव च।
हिरण्यवर्णाः सूक्तं चानुवाक्याद्यमेव च इति [प० ५. २] ॥

तत्र प्रथमा ॥

हिरण्यवर्णाः शुचयः पावका यासु जातः सविता यास्वग्निः।
या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥ १ ॥

हिरण्यऽवर्णाः। शुचयः। पावकाः। यासु। जातः। सविता। यासु। अग्निः। याः। अग्निम्। गर्भम्। दधिरे। सुऽवर्णाः। ताः। नः। आपः। शम्। स्योनाः[१]। भवन्तु ॥ १ ॥

हिरण्यवर्णाः हितरमणीयवर्णाः हिरण्यसदृशवर्णा वा हिरण्यस्य वर्ण इव वर्णो यासां तास्तथोक्ताः। "सप्तम्युपमान०" इत्यादिना बहुव्रीहिः। "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति पूर्वपदप्रकृतिस्वरत्वेन आद्युदात्तत्वम्। शुचयः शुद्धाः अत एव पावकाः अन्येषां स्नानपानादिना[2] शोधयित्र्यः। "प्रत्ययस्थात् कात् पूर्वस्य०" इत्यादिना प्राप्तस्य इत्वस्य "पावकादीनाम् छन्दस्युपसंख्यानम्" इति प्रतिषेधः। अपां स्वरूपपर्यालोचनया[3] शुद्धिहेतुताम् अभिधाय शोधकानां सवित्रादीनां ज-

---

१ P J K स्योना for स्योनाः which we read with P.

---

1 S' Kd सूक्ताधानीवोखावांनंगता. 2 S' Kd °पादादिना. 3 S' Kd °लोचनायाशुद्धिहेतुकाता°.

न्महेतुत्वेनापि तां समर्थयते यास्विति । यासु अप्सु सविता सर्वस्य प्राणिजातस्य प्रेरक आदित्यो जातः प्रादुर्भूतः । प्रत्यहं हि समुद्रात् सूर्य उद्यन् दृश्यते तदपेक्षोयं निर्देशः । ञजनी प्रादुर्भावे । "श्वीदितो निष्ठायाम्" इति इट्प्रतिषेधः । "जनसनखनां सन्झलोः" इति आत्वम् ञ । तथा यासु अप्सु मेघस्थासु सामुद्रीषु च अग्निः वैद्युतवाडवरूपेण जात इति संबन्धः । गर्भरूपेण शुचिना अग्निना नित्यसंबन्धादपि अपां पूतताम् आह या अग्निम् इति । याः सुवर्णाः शोभनवर्णा आपः अग्निम् अङ्गनादिगुणयुक्तं देवं गर्भं दधिरे गर्भत्वेन धारयन्ति । तथा च निगमः । "अग्ने गर्भो अपाम् असि"[तै॰सं॰ ४.२.३.३] इति । ञडुधाञ् धारणपोषणयोः । "छन्दसि लुङ्लङ्लिटः" इति वर्तमाने लिट् । वहुवचने आलोपे कृते तस्य "द्विर्वचनेचि" इति स्थानिवत्त्वाद् द्विर्वचनम् । इरेचश्चित्त्वाद् अन्तोदात्तत्वम् । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ञ । ता उदीरितलक्षणाः सर्वा आपः नः अस्माकम् अवसेकादिना कर्मणा शम् रोगादिशमनहेतवः स्योनाः । सुखनामैतत् । सुखकारिण्यश्च भवन्तु ॥

द्वितीया ॥

यासा॒ राजा॒ वरु॑णो याति॒ मध्ये॑ सत्यानृ॒ते अव॒पश्य॒न् जना॑नाम् ।
या अ॒ग्निं गर्भं॑ दधि॒रे सु॒वर्णा॒स्ता न॒ आप॒: शं स्यो॒ना भ॑वन्तु ॥ २ ॥

यासा॑म् । राजा॑ । वरु॑णः । याति॑ । मध्ये॑ । स॒त्या॒नृ॒ते इति॑ स॒त्य॒ऽअ॒नृ॒ते ।
अव॒ऽपश्य॑न् । जना॑नाम् ।
याः । अ॒ग्निम् । गर्भ॑म् । द॒धि॒रे । सु॒ऽवर्णाः॑ । ताः । नः॒ । आपः॑ । शम् ।
स्यो॒नाः॑ । भ॒व॒न्तु॒ ॥ २ ॥

---

१ R अव॒पश्य॒ज॰. We with B $\overset{h}{B}$ K D R $\overset{m}{S}$ V. २ $\overset{2}{P}$ J K स्यो॒ना for स्यो॒नाः which we read with P.

---

1 S′Kd °रूपेणाशुचिना. 2 S′Kd अवर्णाः शोभनवर्णा वा आपः for सुवर्णाः शोभनवर्णा आपः. 3 S′Kd °सेकानाकर्मणा.

आप एव स्तूयन्ते । राजा राजमानो वरुणः एतत्संज्ञः पापिना निग्रहकर्ता देवः यासाम् अपां मध्ये मध्यभागे । समुद्रमध्य इति यावत् । तत्र स्थित्वा [जनानां] सत्यानृते । सत्यं यथार्थभाषणम् तद्विपरीतम् अनृतम् । उभे अवपश्यन् तत्कर्तुर्निग्रहार्थम् अवयुत्य परस्परसांकर्यपरिहारेण जानन् याति गच्छति पाशहस्तस्तत्रतत्र संनिधत्ते ॥ तथा च तैत्तिरीयकम् । "अनृते खलु वै क्रियमाणे वरुणो गृह्णाति" [तै° ब्रा° १. ७. २. ६] इति ॥ अन्यद् व्याख्यातम् ॥

तृतीया ॥

यासां॑ दे॒वा दि॒वि कृ॒ण्वन्ति॑ भ॒क्षं या अ॒न्तरि॑क्षे ब॒हुधा भ॑वन्ति॑ ।
या अ॒ग्निं गर्भं॑ दधि॒रे सु॒वर्णा॒स्ता न॒ आप॒: शं स्यो॒ना भ॑वन्तु ॥ ३ ॥

यासा॑म् । दे॒वाः । दि॒वि । कृ॒ण्वन्ति॑ । भ॒क्षम् । याः । अ॒न्तरि॑क्षे । ब॒हुऽधा । भ॑वन्ति॑ ।

याः । अ॒ग्निम् । गर्भ॑म् । द॒धि॒रे । सु॒ऽव॒र्णाः । ताः । नः॒ । आपः॑ । शम् ।
स्यो॒नाः॑ । भ॒व॒न्तु॒ ॥ ३ ॥

देवाः इन्द्राद्याः यासाम् अपां सारभूतम् अमृतं सोमं वा दिवि द्युलोके भक्षम् उपभोग्यम् । भक्ष अदने । कर्मणि घञ् । "णेरनिटि" इति णिलोपः । "एरजण्यन्तानाम्" इति अचो न प्रसङ्गः । भक्ष मन्थ भोग देह इति उञ्छादिषु पाठाद् अन्तोदात्तता । कृण्वन्ति कुर्वन्ति । कृवि हिंसाकरणयोश्च । इदित्त्वाद् नुम् । "धिन्विकृण्व्योर च" इति उप्रत्ययः तत्संनियोगेन अकारश्चान्तादेशः । अतो लोपे तस्य स्थानिवद्भावात् लघूपधगुणाभावः । "सतिशिष्टस्वरबलीयस्त्वम् अन्यत्र विकरणेभ्यः" इति उप्रत्ययस्वरं बाधित्वा तिङः प्रत्ययस्वरेण आद्युदात्तत्वम् । तथा या आपः अन्तरिक्षे अन्तरिक्षलोके बहुधा बहुप्रकारेण । "बहुगणवतुडति संख्या" इति "संख्याया विधार्थे

---

१ D भंवन्ति. We with A B B^{p} B^{h} K R S^{m}. २ See footnote २ on the previous page.

धा" इति धा प्रत्ययः ॥ । वृष्ट्यादिरूपेण नाना भवन्ति ॥ व्याख्यातम् अन्यत् ॥

चतुर्थी ॥

शिवेन॑ मा॒ चक्षु॑षा पश्यताप॒ः शिव॑या त॒न्वो॑प॑ स्पृशत॒ त्वच॑ं मे ।
घृ॒त॒श्चु॒त॒ः शुच॑यो या॒ः पा॑व॒कास्ता न॒ आप॒ः शं स्यो॒ना भ॑वन्तु ॥ ४ ॥
शिवेन॑ । मा॒ । चक्षु॑षा । प॒श्य॒त॒ । आप॒ः । शिव॑या । त॒न्वा॑ । उप॑ ।
स्पृ॒श॒त॒ । त्वच॑म् । मे॒ ।
घृ॒त॒ऽश्चु॒त॒ः । शुच॑यः । याः । पा॒व॒काः । ताः । न॒ः । आप॑ः । शम् ।
स्यो॒नाः॑ । भ॒व॒न्तु ॥ ४ ॥

हे आपः । ॥ "आमन्त्रितस्य च" इत्याष्टमिकं सर्वानुदात्तत्वम ॥ । अबभिमानिन्यो देवताः यूयं शिवेन अक्रूरेण सुखकरेण चक्षुषा लोचनेन मा मां सेकादिना अनिष्टपरिहारेष्टप्राप्तिकामं पश्यत अवलोकयत । ॥ "त्वामौ द्वितीयायाः" इत्यस्मदो द्वितीयान्तस्य मादेशः ॥ ॥ तथा शिवया कल्याण्या इष्टप्राप्तिहेतुभूतया तन्वा युष्मदीयेन शरीरेण मे मम युष्मदनुग्रहाकाङ्क्षिणः त्वचम् त्वग्धातुम् उप स्पृशत संमृशत ॥ परोक्षवद् आह । घृतश्चुतः घृतं क्षरणशीलं दीप्यमानं वा अमृतं श्चोतन्ति क्षरन्तीति घृतश्चुतः अमृतस्राविण्य आपः । ॥ श्चुतिर् क्षरणे । "क्विप् च" इति क्विप् ॥ ॥ अन्यद् व्याख्यातम् ॥

इति पञ्चमं सूक्तम् ॥

परिषज्जयकर्मणि सभाप्रवेशात् पूर्वम् "इयं वीरुत्" इति सूक्तेन मधुकाख्यां वीरुधं भक्षयेत् । सूत्रितं हि । "इयं वीरुद् इति मधुकं खादन् अपराजितात् परिषदम् आव्रजति" इति [कौ० ५.२] ॥

विवाहकर्मण्यपि एतेन सूक्तेन मधुकमणिं रक्तसूत्रेण बद्ध्वा अङ्गुल्यां बध्नीयात् । सूत्रितं च । "इयं वीरुद् इति मधुकमणिं लाक्षारक्तेन सूत्रेण

---

१ $\overset{2}{P}$ J K स्योना for स्योनाः. We with P.

विग्रथ्य[1] अनामिकायां बध्नाति" इति [कौ० १०. २] ॥

विवाह एव चतुर्थिकाकर्मणि[2] शयनकाले मधुकमणिं[3] पिष्ट्वा औक्षे[4] प्रक्षिप्य अनेन सूक्तेन अभिमन्त्र्य वधूवरौ परस्परं संगच्छेयाताम्। "म-धुकमणिम्[5] औक्षेऽपनीय इयं वीरुत्[१. ३४] अमोहम्[१४. २. ७१, ७२] "इति संस्पृशतः" इति [कौ० १०. ५] सूत्रितत्वात् ॥

अश्वमेधे[6] ब्रह्मोद्यवदनेपि एतत् सूक्तम् ॥

तत्र प्रथमा ॥

इयं वीरुन्मधुजाता मधुना त्वा खनामसि।
मधोरधि प्रजातासि सा नो मधुमतस्कृधि ॥ १ ॥

इयम्। वीरुत्। मधुऽजाता। मधुना। त्वा। खनामसि।
मधोः। अधि। प्रऽजाता। असि। सा। नः। मधुऽमतः। कृधि ॥ १ ॥

इयम् पुरोवर्तिनी सभाजयादिकर्मसु विनियुज्यमाना वीरुत् विरोहणशी-ला लता मधुकाख्या मधुजाता मधुनि मधुररसोपेते भूतले जाता उत्पन्ना। यद्वा मधुने मध्वर्थम् उपभोक्तृणां वचसि माधुर्यसंपादनाय जाता उत्पन्ना। अथवा मधुना क्षौद्ररसेन जाता उत्पन्ना। तस्या उत्पत्तौ क्षौद्ररस एव जलवत् कारणम्[7] इत्यर्थः। ✕ जनी प्रादुर्भावे। कर्तरि निष्ठा ✕ ॥ हे वीरुत् त्वा त्वाम् स्वभावतो मधुरां वयमपि मधुना मधुरूपेण खनित्रा-दिना खनामसि खनामः अवदारयामः। ✕ खनु अवदारणे। "इ-दन्तो मसिः" इति मस इदन्तत्वम् ✕। यद्वा मधुना। ✕ इ-त्थंभावे तृतीया ✕। मधुरेण[8] प्रकारेण खनामः। माधुर्यरसोपेतामेव त्वां खनामि न तु केवलाम् इत्यर्थः ॥ तथा त्वं मधोः मधुनः। ✕ लि-ङ्गव्यत्ययः। "जनिकर्तुः प्रकृतिः" इति पञ्चमी ✕। मधुरूपाद् उ-

---

1 S′ Kd विकृष्यानामिकया. We with *Kaus'ika*. 2 S′ Kd चतुर्थीका°. We with *Kaus'ika*. 3 S′ Kd मधूक°. 4 On औक्ष see the couplet quoted by Sâyaṇa in his commentary on II. 36. 7 from the *Paiṭhînasi* as given by Kes'ava (X. 5.) 5 S′ Kd मधिकमणि°. 6 So S′ Kd. The *Vaitâna* does not include this hymn among those used in the As'vamedha. *Vaitâna* VII. 1, 2. 7 S′ Kd करण°. 8 S′ Kd मधुरेणाप्रकारेण.

पादानकारणात् । ॥ अधिः पञ्चम्यर्थानुवादी ॥ । प्रजाता प्रकर्षेण जाता असि भवसि ॥ या त्वम् उक्तप्रकारेण आश्रयतः स्वभावतः उपादानतश्च मधुमयी भवसि सा त्वं नः अस्मान् मधुमतः मधुररसोपेतान् कृधि कुरु । कायिकवाचिकमानसरूपः अस्मदीयः सकलो व्यापारः मधुररसोपेतः सन् सर्वैरुपादेयो भवतु इत्यर्थः । ॥ डुकृञ् करणे । मध्यमैकवचने छान्दसो विकरणस्य लुक् । "श्रुशृणुपृकृवृभ्यश्छन्दसि" इति हेर्धिरादेशः । "कःकरत्करतिकृधिकृतेष्वनदितेः" इति विसर्जनीयस्य सत्वम् ॥ ॥

द्वितीया ॥

जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम् ।
ममेदह क्रतावसो मम चित्तमुपायसि ॥ २ ॥

जिह्वायाः । अग्रे । मधु । मे । जिह्वाऽमूले । मधूलकम् ।
मम । इत् । अह । क्रतौ । असः । मम । चित्तम् । उप ऽआयसि ॥ २ ॥

[हे] मधुकलते त्वं [मे] जिह्वायाः रसनाया अग्रे अग्रभागे मधु क्षौद्रं यथा भवति तथा वर्तस्व ॥ तथा जिह्वामूले रसनाया मूलभागे मधूलकम् मधुररसबहुलं जलमधूलकवृक्षपुष्पं यथा भवति तथा तदात्मिका वा वर्तस्व । जिह्वायां मध्वादिसंनिधानेन तन्निर्वर्त्या वागपि मधुरा सर्वेषां सुश्रवा भवतु इत्यर्थः ॥ तथा हे लते त्वं मम । इत् इति अहेति च निपातौ अवधारणार्थौ । उभाभ्याम् अन्ययोगायोगव्यवच्छेदौ क्रियेते । ममैव नान्यस्येत्यर्थः । क्रतौ कर्मणि शारीरे व्यापारे असः भव । ॥ अस भुवि । लेटि अडागमः ॥ ॥ तथा मम चित्तम् अन्तःकरणम् उपायसि उपागच्छ । मदीयः शारीरो मानसो व्यापारश्च त्वत्संनिधानात् माधुर्यरसोपेतः सर्वश्लाघ्यो भवतु इत्यर्थः ॥

---

१ A B^{h} कृता°. We with D K R S^{m} V.

---

1 S′Kd °दानकरणात्. 2 S′Kd मूललकं for मधूलकम्. 3 S′Kd जलमधूकवृक्ष°. 4 S′Kd सर्वेषाश्रवा for सर्वेषां सुश्रवा.

तृतीया ॥

मधुमन्मे निक्रमणं मधुमन्मे परायणम्।
वाचा वदामि मधुमद् भूयासं मधुसंदृशः ॥ ३ ॥
मधुऽमत्। मे। निऽक्रमणम्। मधुऽमत्। मे। पराऽअयनम्।
वाचा। वदामि। मधुऽमत्। भूयासम्। मधुऽसंदृशः ॥ ३ ॥

हे मधुकलते त्वद्वारणेन मे मम निक्रमणम् निकटगमनं संनिहितार्थेषु प्रवर्तनं मधुमत् मधुयुक्तं स्वस्य परेषां च प्रीतिकरम्। भवतु इति शेषः ॥ तथा मे मम परायणम् परागमनं दूरगमनं मधुमत् भवतु ॥ तथा वाचा वागिन्द्रियेण यद् वदामि कथयामि तत् सर्वं मधुमत् भवतु ॥ इत्थं स्वकीयानां सर्वेषां व्यापाराणां मधुमयत्वात् तथाविधव्यापारयुक्तः अहमपि संदृशः संद्रष्टुः सर्वस्य पुरुषस्य मधु[*] मधुमत्[1] प्रीतिविषयो भूयासम्। ⁂ संपूर्वाद् दृशेः "क्विप् च" इति क्विप् ⁂ ॥

चतुर्थी ॥

मधोरस्मि मधुतरो मदुघान्मधुमत्तरः।
मामित् किल त्वं वनाः शाखां मधुमतीमिव ॥ ४ ॥
मधोः। अस्मि। मधुऽतरः। मदुघात्। मधुमत्ऽतरः।
माम्। इत्। किल। त्वम्। वनाः। शाखाम्। मधुमतीम्ऽइव ॥ ४ ॥

हे मधुकलते त्वत्संनिधानात् मधोः मधुनः क्षौद्रात्। ⁂ लिङ्व्यत्ययः ⁂। मधुतरः अतिशयेन मधुररसोपेतः अस्मि भवामि। ⁂ मधुशब्दात् तरप् ⁂ ॥ मदुघात् मधुदुघात्। ⁂ दुह प्रपूरणे। मधुशब्दोपपदाद् अस्माद् "दुहः कब् घश्च" इति कप् प्रत्ययः तत्संनियोगेन घत्वं च। मधुशब्दे धुलोपश्छान्दसः ⁂। मधुस्राविणः पदार्थविशेषात् मधुमत्तरः अतिशयेन मधुमान् अस्मि। ⁂ मधुशब्दाद् मतुप्। तदन्तात् "द्विवचनविभज्योपपदे तरबीयसुनौ" इति

1 S' Kd मधुवत्°

नरप्॒ । स्वस्य अतिशयेन मधुमत्त्वे हेतुम् आह मामित् इति । हे मधुकलते त्वं मामित् । इच्छब्दः अवधारणे । किलशब्दः प्रसिद्धौ । मामेव खलु वनाः संभजेः । यतस्त्वं मय्येव संनिहिता अतोहं सर्वस्माद् मधुतर इत्यर्थः । ॒वन षण संभक्तौ । अस्मात् लेटि मध्यमे "लेटोडाटौ" इत्याडागमः॒ । तत्र दृष्टान्तः । मधुमतीमिव मधुयुक्तां शाखाम् वृक्षसंबन्धिनीं यथा जनः सेवते तद्वद् इत्यर्थः ॥

पञ्चमी ॥

परिं त्वा परितॢत्लुनेक्षुणांग्॒ामविंड्विषे ।
यथा मां कामिन्यसो यथा मन्नापंग्॒ा असः ॥ ५ ॥

परिं । त्वा । परिऽतॢत्लुना । इक्षुणा । अग्॒ाम् । अविंऽड्विषे ।
यथा । माम् । कामिनीं । असः । यथा । मत् । न । अपंऽड्गाः ।
असः ॥ ५ ॥

हे जाये त्वा त्वां परितॢत्लुना परिततेन सर्वतो व्याप्तेन । ॒तनु विस्तारे । "तनिपत्योश्छन्दसि" इति उपधालोपः॒ । तथाविधेन इक्षुणा इक्षुवद् अतिशयितमाधुर्यरसोपेतेन मधुकेन अविड्विषे आवयोः परस्परं विद्वेषणाभावाय पर्यगाम् परितः प्राप्तवान् अस्मि । ॒इण् गतौ । "इणो गा लुङि" इति गादेशः । "व्यवहिताश्च" इति परेर्व्यवहितप्रयोगः॒ । परिगमनस्य न केवलम् अविद्वेषमात्रं फलम् अपि तु यथा येन प्रकारेण हे जाये त्वं माम् पतिं कामिनी कामयमाना असः भवेः । ॒अस्तेर्लेटि अडागमः॒ । यथा च मत् मत्तः सकाशात् । ॒"एकवचनस्य च" इति अस्मद उत्तरस्य ङसेः अत् आदेशः । "त्वमावेकवचने" इति मपर्यन्तस्य मादेशे "शेषे लोपः" इति लोपः॒ । अपगाः अपहाय गच्छन्ती नासः न भवेः । ॒गाङ् गतौ । अस्माद् अपपूर्वाद् "आतो मनिन्क्वनिब्वनिपश्च" इति विच् प्रत्ययः॒ । तथा त्वां पर्यगाम्

---

१ P P² J अपंऽगा. We with K S.

इति पूर्वेण संबन्धः ॥

इति प्रथमकाण्डे षष्ठेनुवाके षष्ठं सूक्तम् ॥

"यदाबध्नन्" इति सूक्तेन सर्वसंपत्कर्मसु वासितयुग्मकृष्णलमणिबन्धनम् सारूपवत्सौदने पुरुषाकृतिम् आलिख्य तत्प्राशनं च कुर्यात्। तथा च सूत्रम्। "यदाबध्[न् १. ३५ नव प्राणान् ५. २८ इति युग्मकृष्णलं "वासितं बध्नाति सारूपवत्सं पुरुषगात्रं द्वादशरात्रं संपातवन्तं कृत्वाऽन- "भिमुखम् अश्नाति" इति। कौ० २. २ ॥

तथा आयुष्कामः हिरण्यमणिं युग्मकृष्णलं संपात्य अभिमन्त्र्य स्थालीपाकं च संपात्य अभिमन्त्र्य तन्मणिब[1]न्धनं तदोदनप्राशनं च अनेनैव सूक्तेन कुर्यात्। तथा च सूत्रम्। "यदावध्नन्[१. ३५] नव प्राणान्[५. २८] इति युग्मकृष्णलम् आदिष्टानां स्थालीपाक आधाय बध्नात्याशयति" इति [कौ० ७. ३] ॥

उपनयनकर्मण्यपि आयुष्कामस्य ब्रह्मचारिण आज्यहोमे विनियुक्तम्। तथा च सूत्रम्। "मेधाजननायु[2]ष्यैर्जुहुयात्" इति [कौ० ७. ८] ॥

तथा "आदित्यां श्रुततेजोधनायुष्कामस्य" इति [न० क० १७] विहितायाम् आदित्याख्यायां महाशान्तौ युग्मकृष्णलमणिबन्धनेपि एतत् सूक्तम्। तद् उक्तं नक्षत्रकल्पे। "यदाबध्नन्निति युग्मकृष्णलम् आदित्यायाम्" इति [न० क० १९] ॥

तथा प्रातःप्रातः अनेन सूक्तेन अलंकारान् अभिमन्त्र्य पुरोहितो राज्ञे प्रयच्छेत्। तथा च परिशिष्टे "अथ पुरोहितकर्माणि राज्ञः प्रातरुत्थितस्य कृतस्वस्त्ययनस्य" इति प्रक्रम्य उक्तम्। "परिधत्त [२. १३. "२, ३] इति द्वाभ्यां राज्ञे वस्त्रम् अभिमन्त्र्य प्रयच्छेत् यदाबध्नन्नित्यलं- "कारान्" इति [प० ४. १] ॥

हिरण्यगर्भाख्ये महादानेपि अनेन सूक्तेन हिरण्यस्रजं यजमानस्य ब-

---

1 Both **S'** and **Kd** are defective in this part of the introduction, omitting all the portion which I have enclosed within brackets, and confounding two rites enjoined in two different parts of the Sûtra. The restoration is based upon *Kaus'ika* and the *Kes'avî*. 2 For °**जननायुष्यै**° *Kaus'ika* has: °**जनन आयुष्यै**°.

भीयात् । तद् उक्तं तत्रैव । अग्नेः प्रजातं परि यद्धिरण्यम् [१९.२६] "यदाबध्नन्[१.३५] इति हिरण्यस्रजम् आग्रथ्य" इति [प०१३.१] ॥

तत्र प्रथमा ॥

यदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ।
तत् ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय ॥ १ ॥

यत् । आऽअबध्नन् । दाक्षायणाः । हिरण्यम् । शतऽअनीकाय । सुऽमनस्यमानाः ।

तत् । ते । बध्नामि । आयुषे । वर्चसे । बलाय । दीर्घायुऽत्वाय । शतऽशारदाय ॥ १ ॥

दाक्षायणाः दक्षस्य अपत्यं दाक्षिः[1] । "अत इञ्" इति इञ् प्रत्ययः । दाक्षेरपत्यं दक्षस्य गोत्रम् । तत्र "यञिञोश्च" इति फक् । "आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम्" इति फस्य आयन् आदेशः । ["ञ्नित्यादिर्नित्यम्"] इत्यन्तोदात्तत्वम् । दक्षापत्यभूता महर्षयः सुमनस्यमानाः । शोभनं मनो येषां ते सुमनसः । सुमनस इव आचरन्तः सुमनस्यमानाः । सुमनस्शब्दात् "कर्तुः क्यङ् सलोपश्च" इति क्यङ् । सलोपस्य विकल्पितत्वाद् अत्र अभावः । यद्वा प्राग् असुमनसः सुमनसो भवन्तीति च्व्यर्थविवक्षायां "भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः" इति क्यङ् । अन्त्यहलो लोपाभावश्छान्दसः । तदन्तात् लटः शानच् । "कर्तरि शप्" इति शप् प्रत्ययः । तस्य पित्त्वाद् अनुदात्तत्वम् । "०अदुपदेशाल्लसार्वधातुकम०" इति शानचोनुदात्तत्वम् । क्यङः प्रत्ययस्वरेण उदात्तता । सौमनस्यं कुर्वाणाः सन्तः शतानीकाय । शतम् अनीकानि यस्यासौ शतानीकः । "दिक्संख्ये संज्ञायाम्" इति समासः । "शतानीकं सात्राजितम् अभिषिषेच" इति [ऐ०ब्रा०८.२१] श्रुतिप्रसिद्धाय राज्ञे यत् प्रसिद्धं कृष्णलादिरूपं हिरण्यम् हितरमणीयरूपं सुवर्णम् । हिरण्यशब्दं बहु-

---

1 S' Kd दाक्षः.

धा यास्को निरवोचत्। हितरमणं भवतीति वा हृदयरमणं भवतीति वा हर्यतेर्वा स्यात् कान्तिकर्मणः इति [नि०२.१०]। हर्य गतिकान्त्योः। हर्यतेः कन्यन् हिर च इति[उ० ५. ४४] कन्यन् प्रत्ययः। "त्रित्यादिर्नित्यम्" इत्याद्युदात्तत्वम्[1]। आबभ्रन् बन्धनं कृतवन्तः। [1]बन्ध बन्धने। अस्मात् लङि श्नाप्रत्ययः। "श्नाभ्यस्तयोरातः" इत्याकारलोपः। "लुङ्लङ्लृङ्क्ष्वडुदात्तः" इति अट उदात्तत्वम्। "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः[1]। तत् तथाविधं हिरण्यम् हे आयुरादिफलकाम ते तव बध्नामि बन्धनं करोमि। तद्बन्धनस्य फलम् आह। आयुषे आयुरभिवृद्धये वर्चसे तेजसे बलाय बलप्राप्तये। आयुष इत्युक्तं तदेव विवृणोति। दीर्घायुत्वाय दीर्घायुष्ट्वाय। [1]छान्दसः सलोपः[1]। चिरकालजीवनाय। कियत्परिमितम् आयुषो दैर्घ्यम् इति तद् आह। शतशारदाय। शरदतोः संबन्धिनः तद्विशिष्टाः संवत्सराः शारदाः। शतं शारदाः समाहृता यस्मिन् जीवने तत् शतशारदम्। तस्मै। शतसंवत्सरजीवनायेत्यर्थः। आयुर्दैर्घ्यपरिच्छेदस्तु मनुष्याणां परमायुर्विवक्षयेति द्रष्टव्यम्। तथा च श्रुत्यन्तरम्। "शतायुः पुरुषः शतेन्द्रियः" [तै०सं०२.३.११.५] इति॥

द्वितीया॥

नैनं॑ रक्षाँसि॒ न पिं॑शा॒चाः स॑हन्ते॒ दे॒वाना॒मोजः॑ प्रथम॒जं ह्ये॒[2]तत्।
यो बिभ॑र्ति दाक्षाय॒णं हिर॑ण्यं॒ स जी॒वेषु॑ कृ॒णुते॑ दी॒र्घमायुः॑॥ २॥

न। एनम्। रक्षाँसि। न। पिशाचाः। सहन्ते। देवानाम्। ओजः। प्रथमऽजम्। हि। एतत्।
यः। बिभर्ति। दाक्षायणम्। हिरण्यम्। सः। जीवेषु। कृणुते। दीर्घम्। आयुः॥ २॥

---

२ AKV ह्येतत्.

---

1 S'Kd वध for बन्ध.

एनम् आबद्धहिरण्यं पुरुषं रक्षांसि राक्षसाः । ⁂ रक्षो रक्षितव्यम् अस्मात् इति हि यास्कः[नि० ४. १८] ⁂ । न सहन्ते नाभिभवन्ति । ज्वराद्युपद्रवकरणेन[1] न बाधन्त इत्यर्थः । ⁂ षह अभिभवे इति धातुः ⁂ ॥ तथा पिशाचाः पिशिताशिनो भूतविशेषाः न सहन्ते ॥ धृतहिरण्यस्य ईदृशं सामर्थ्यं कुत[2] इत्यत आह देवानाम् इति । एतत् सुवर्णं देवानाम् इन्द्रादीनां प्रथमजम् प्रथमत उत्पन्नम् । ⁂ जनी प्रादुर्भावे । "अन्येषामपि दृश्यते" इति डप्रत्ययः ⁂ । ओजो हि । [ओजः] शरीरधारको बलहेतुः अष्टमो धातुविशेषः । यद् आहुराचार्याः ।

ओजो नामाष्टमी दशा ।
क्षेत्रज्ञस्य तद् ओजस्तु केवलाश्रय इष्यते । इति ।

यद्वा देवानाम् । आदरार्थं बहुवचनम् । देवस्य अग्नेः एतत् हिरण्यं प्रथमजम् ओजः प्रथमोत्पन्नं रेतोरूपं तेजो हि ॥ यस्मात् कारणाद् रक्षसां हन्तुरग्नेस्तेजो हिरण्यम् "अग्निः खलु वै रक्षोहा" [तै० सं० ६. १. ४. ६] इति श्रुतेः तस्मात् हिरण्यं रक्षोनिवर्तकम् इत्यर्थः ॥ हिरण्यस्य अग्निरेतस्त्वं तैत्तिरीयके श्रूयते । "आपो वरुणस्य पत्नय आसन् । ता "अग्निरभ्यध्यायत् । ताः समभवन् । तस्य रेतः परापतत्[3] । तद्धिरण्यम् "अभवत्" [तै० ब्रा० १. १. ३. ८] इति । यतो हिरण्यं रक्षोघ्नम् अतस्[4]तद् दाक्षायणम् । दाक्षायणैः शतानीकस्य प्रथमम् आबद्धत्वात् हिरण्यमपि दाक्षायणम् उच्यते । तथाविधं हिरण्यं यः पुरुषो रक्षोवध[5]कामो बिभर्ति । ⁂ डुधाञ् धारणपोषणयोः । जुहोत्यादित्वात् शपः श्लुः । "श्लौ" इति द्विर्वचने "भृञाम् इत्" इत्यभ्यासस्य इत्वम् । "भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात् पूर्वं पिति" इति प्रत्ययात् पूर्वस्योदात्तत्वम् । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ⁂ । स[6] पुरुषः जीवेषु प्राणिषु मध्ये दीर्घम् शतसंवत्सरपरिमितम् आयुः जीवनकालं कृणुते करोति । रक्षाकरहिरण्यधारणात् निरामयः सन् शतसंवत्सरं जी-

---

1 S′ Kd °द्रवकारणेन. 2 S′ Kd सामर्थ्यमिति कुत इत्य°. 3 S′ Kd परापतद्धिरण्य° for परापतत्। तद्धिरण्य°. 4 S′ Kd यतः for अतः. 5 S′ Kd om. °वध°. 6 S′ Kd सचः for स.

वतीत्यर्थः। ॥ डुकृञ् करणे। व्यत्ययेन श्नुः ॥

तृतीया ॥

अपां तेजो ज्योतिरोजो बलं च वनस्पतीनामुत वीर्याणि।
इन्द्र इवेन्द्रियाण्यधि धारयामो अस्मिन् तद् दक्षमाणो बिभरद्धिरण्यम् ॥ ३ ॥

अपाम्। तेजः। ज्योतिः। ओजः। बलम्। च। वनस्पतीनाम्। उत। वीर्याणि।
इन्द्रेऽइव। इन्द्रियाणि। अधि। धारयामः। अस्मिन्। तत्। दक्षमाणः। बिभरत्। हिरण्यम् ॥ ३ ॥

अपाम् उदकानां संबन्धि यत् तेजः स्नानपानादिना नैर्मल्यकरं सामर्थ्यम्। अपां तेजः वनस्पतीनाम् वीर्याणि इत्याद्यन्तयोर्गुणानां गुणिविशेषसंबन्धश्रवणात् मध्येपि ज्योतिरादीनां यथायोगं गुणिविशेषसंबद्धानामेव अत्र ग्रहणं द्रष्टव्यम्। तथा च ज्योतिष्मतां सूर्यचन्द्रादीनां संबन्धि यत् ज्योतिः ओजस्विनाम् इन्द्रादीनां संबन्धि यद् ओजः बलहेतुभूतो धातुविशेषः। इन्द्रस्य ओजस्वित्वं यजुर्मन्त्रवर्णे प्रसिद्धम्। "इन्द्रौजस्विन्नोजस्वी त्वं देवेषु भूयाः" [तै० सं० ३. ३. १. १] इति। बलवतां पुरुषाणां यद् बलम् शरीरसामर्थ्यम्। उक्तसर्वसमुच्चयार्थश्चकारः। उतशब्दः अप्यर्थे। वनस्पतीनाम् वृक्षविशेषाणां वीर्याणि उपकारजननसामर्थ्यान्यपि यानि सन्ति। वनानां पतयो वनस्पतयः। "पारस्करप्रभृतीनि च संज्ञायाम्" इति सुडागमः। "उभे वनस्पत्यादिषु युगपत्" इति पूर्वोत्तरपदयोर्युगपत् प्रकृतिस्वरत्वेन आद्युदात्तत्वम्। तानि सर्वाणि अस्मिन् उक्तहिरण्यधारके पुरुषे। अधिः सन्नम्यर्थानुवादी। धारयामः स्थापयामः। तत्र दृष्टान्तः। इन्द्रियाणि इन्द्रस्य असाधारणचिह्नानि। "इन्द्रियम् इन्द्रलिङ्गम् इन्द्रदृष्टम् इन्द्रसृष्टम् इन्द्रजुष्टम् इन्द्रदत्तम् इति वा" इति निपात्यते। तानि इन्द्र इव। यथा

---

1 S′ Kd गुणवि°. 2 S′ Kd °संबंधानामेव.

तानि इन्द्र एव असाधारण्येन[1] वर्तन्ते तद्वद् अस्मिन्निति संबन्धः । यस्मात् तेजःप्रभृतीनि धारयामः तत् तस्मात् कारणाद् दक्षमाणः वर्धमानः असौ पुरुषः । दक्ष वृद्धौ इति धातुः । हिरण्यम् तेजःप्रभृतीना प्रापकं कृष्णलादिमणिरूपं बिभरत् विभर्तु । डुभृञ् धारणपोषणयोः । लेटि अडागमः । "इतश्च लोपः परस्मैपदेषु" इति इकारलोपः । जुहोत्यादित्वात् शपः श्लुः । "श्लौ" इति द्विर्वचने "भृञाम् इत्" इत्यभ्यासस्य इत्वम् ॥

चतुर्थी ॥

समानां मासामृतुभिष्ट्वा वयं संवत्सरस्य पयसा पिपर्मि ।
इन्द्राग्नी विश्वे देवास्तेनु मन्यन्तामहृणीयमानाः ॥ ४ ॥

समानाम् । मासाम् । ऋतुऽभिः । त्वा । वयम् । सम्ऽवत्सरस्य । पयसा । पिपर्मि ।

इन्द्राग्नी इति । विश्वे । देवाः । ते । अनु । मन्यन्ताम् । अहृणीयमानाः ॥ ४ ॥

हे सर्वसंपदादिफलकाम त्वा त्वां समानाम् संवत्सराणां मासाम् मासानाम् । "पद्दन्नोमास्०" इति मासशब्दस्य मास्भावः । "ऊडिदंपदाद्०" इति विभक्तेरुदात्तत्वम् । व्यधिकरणे षष्ठ्यौ । संवत्सरसंबन्धिनां चैत्रादिमासानां[2] संबन्धिभिर्ऋतुभिः वसन्ताद्यैः । समाशब्दो यद्यपि नित्यबहुवचनान्तः तथाप्यत्र अर्थबहुत्व एव बहुवचनं विवक्षितम् । तत्सामर्थ्येन पुरुषायुषसंबन्धिशतसंवत्सरावयवभूतमासारब्धैर्ऋतुभिरित्यर्थः संपद्यते । तथाविधैः ऋतुभिः वयम् । व्यत्ययेन बहुवचनम् । अहं पिपर्मि पूरयामि । एतत्सुवर्णधारणेन एनं पुरुषं शतसंवत्सरपर्यन्तं जीवयामीत्यर्थः । पॄ पालनपूरणयोः । जुहोत्यादित्वात् शपः श्लुः । "अर्तिपिपर्त्योश्च" इत्यभ्यासस्य इत्वम् ॥ यद्वा समानाम् आरम्भकैः ऋतुभिः । ऋतुसमुदायो हि संवत्सरः । तथा

---

1 S′Kd इन्द्र इवासा°. 2 S′Kd चैत्रमासानां.

मासाम् मासानां कार्यभूतैः ऋतुभिः इति षष्ठीद्वयस्य ऋतुशब्देनैव संबन्धः ॥ दरिद्रस्य दीर्घमपि आयुर्निरर्थकम् इत्यत आह संवत्सरस्येति । संवत्सरस्य संवत्सरकालसंबन्धिना । संवत्सरव्यापिनेत्यर्थः । तादृशेन पयसा क्षीरेण । एतद् अन्येषामपि फलानाम् उपलक्षणम् । गोधनधान्यादिरूपेण च पिपर्मि पूरयामि । एतत्सुवर्णधारकस्य पुरुषस्य आयुर्मध्ये यथा एकमपि दिनम् उक्तफलरहितं न भवति तथा करोमीत्यर्थः ॥ क्रियमाणेषु देवानाम् अनुमतिं प्रार्थयते । इन्द्राग्नी इन्द्रश्च अग्निश्च । ‘‘देवताद्वन्द्वे च’’ इति प्राप्तस्य उभयपदप्रकृतिस्वरत्वस्य ‘‘नोत्तरपदेनुदात्तादौ०’’ इति प्रतिषेधे ‘‘समासस्य’’ इत्यन्तोदात्तत्वम् । तथा विश्वे सर्वे अन्येपि देवाः ये सन्ति ते सर्वे अहृणीयमानाः । हृणीयतिः क्रुध्यतिकर्मा । अक्रुध्यन्तः क्रियमाणकर्मणि संभवद्वैकल्यनिमित्तं क्रोधम अकुर्वन्तः अनु मन्यन्ताम अनुजानन्तु । सुवर्णधारणादिक्रियाजनितम आयुरादि फलम् अङ्गीकुर्वन्तु इत्यर्थः । हृणीङ् इति कण्ड्वादिषु पाठात् ‘‘कण्ड्वादिभ्यो यक्’’ । तस्य ङित्त्वाद् आत्मनेपदम । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

इति प्रथमकाण्डे षष्ठोनुवाकः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्राजाधिराजपरमेश्वरश्रीवीरहरिहरमहाराजधुरंधरेण सायणाचार्येण विरचिते अथर्वसंहिताभाष्ये प्रथमकाण्डः समाप्तः ॥

श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानाम् उपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत् ।
निर्ममे तम् अहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥

द्वितीये काण्डे षड् अनुवाकाः । तत्र प्रथमेनुवाके पञ्च सूक्तानि । तत्र "वेनस्तत्" इति प्रथमं सूक्तम् । तस्य अभिमतफलसिद्ध्यसिद्धिविज्ञानकर्मसु[1] विनियोगः । तानि च । पञ्चपर्वयुतवेणुं[2]दण्डं काम्पीलवृक्षशाखां युगं वा अभिमन्त्र्य अभिमतकार्यं संचिन्त्य समे देशे ऊर्ध्वं धारयेत् । यदि दण्डाद्-यश्चिन्तितदिशि निपतेयुः तदा कार्यसिद्धिं जानीयात् विपर्यये तु असिद्धिम् ॥

तद्वदेव इषुं संधाय अनेन सूक्तेन अभिमन्त्र्य विसृजेत् । निर्दिष्टल-क्ष्यपतनेन अर्थसिद्धिः ॥

तथैव[3] उदकपूर्णे कुम्भे कमण्डलौ वा दुग्धं प्रक्षिप्य [4]आयाचेत् । ऊ-नेन अधिकेन वा यथासंकल्पम् अर्थसिद्धिः ॥

तथैव दर्भस्तम्बम् अनेन अभिमन्त्र्य कार्यं चिन्तयित्वा गणयेत् । स-मसंख्यायाम् अभिमतसिद्धिः ॥

एवम् इध्मम् अभिमन्त्र्य अग्नौ प्रक्षिपेत् । प्रदक्षिणज्[5]वलनेन इष्ट-सिद्धिः ॥

तथैव अक्षान् अनेन अभिमन्त्र्य प्रक्षिपेत् । इष्टसंख्यापतनेन कार्य-सिद्धिः ॥

एवं हस्तयोरङ्गुलिद्वयम् अनेन अभिमन्त्र्य चिन्तयेत् । उद्दिष्टाङ्गुलिस्प-र्शेनेन अभिलषितसिद्धिः ॥

---

1 S′Kd °सिद्धिसिद्धिविज्ञान°. 2 S′Kd °वेणुदंडकां°. 3 S′Kd तथैवोत्पादक° for तथैव उदक°. 4 So S′Kd. आयाचेत् is Keśava's reading also. 5 S′Kd प्रदक्षिणज्वाल°.

तथैव एकविंशतिसंख्याकाः शर्करा अभिमन्त्र्य ततो गृहीत्वा विभजेत् । यथोद्देशं समविषमभावेन अर्थसिद्धिः ॥

तथा नष्टद्रव्यविज्ञानार्थम् उदकुम्भम् हलम् अक्षान् वा नववस्त्रेण आवेष्ट्य संपात्य अभिमन्त्र्य अरजोवित्ते कुमार्यौ हरतम् इति ब्रूयात् । ते च येन दिग्भागेन हरेतां ततो नष्टम् इति जानीयात् ॥

तथैव विवाहात् प्राक् कुमार्याः सौभाग्यादिलक्षणविज्ञानकर्मण्यपि आकृतिलोष्टवल्मीकलोष्टचतुष्पथलोष्टश्मशानलोष्टरूपाश्चतस्रो मृत्तिका अनेनैव सूक्तेन अभिमन्त्र्य आसाम् अन्यतमां गृहाणेति कुमारीं ब्रूयात् । तत्र आकृतिलोष्टवल्मीकलोष्टयोः स्पर्शने कल्याणं भवति । आकृतिलोष्टः क्षेत्रमृत्तिकेति पूर्वम् उक्तम् । चतुष्पथलोष्टस्पर्शनेन मरिष्यतीति जानीयात् ॥

तथा कुमार्या[2] अञ्जलौ उदकम् आपूर्य अभिमन्त्र्य प्रक्षिपेति तां ब्रूयात् । यदि प्राचीं दिशं प्रति निनयेत् तदा कल्याणं प्रतीयात् ॥

अत्र सूत्रम् । "वेनस्तद् इति पञ्चपवैंपुकुम्भकमण्डलुस्तम्बकाम्पीलशाखायुगेध्माक्षेषु पाण्योरेकविंशत्या शर्करा[3]ः" इत्यादि "उदकाञ्जलिं निनयेत्याह प्राचीनम् अपक्षिपन्त्यां कल्याणम्" इत्यन्तं द्रष्टव्यम् [कौ० ५.१] ॥

अत्र "स नः पिता जनिता" [२.१.३] इत्यस्या ऋचः अग्निचयने षोडशगृहीतोत्तरार्धाज्येन वैश्वकर्मणहोमे विनियोगः । उक्तं वैताने । "यो विश्वचर्षणिः [१३.२.२६] इत्यौप[4]वसथ्ये षोडशगृहीतार्धस्य स नः पिता जनिता [२.१.३] इत्युत्तरार्धस्य" इति [वै० ५.२] ॥

तत्र प्रथमा ॥

वेनस्तत् पश्यत् परमं गुहा यद् यत्र विश्वं भवत्येकरूपम् ।
इदं पृश्निरदुहज्जायमानाः स्वर्विदो अभ्यनूषत व्राः ॥ १ ॥

वेनः । तत् । पश्यत् । परमम् । गुहा । यत् । यत्र । विश्वम् । भवति । एकऽरूपम् ।

---

1 S′ Kd अजान् for अक्षान्. 2 S′ Kd कुमार्याजलौ. 3 S′ Kd शर्करा इत्या°. *Kaus'ika:* शर्कराःस्वीक्षते (for °रास्वीक्षते = °रासु ईक्षते?). 4 S′ Kd इत्युप°.

इदम्। पृश्निः। अदुहत्। जायमानाः। स्वःऽविदः। अभि। अनूषत।
व्राः॥ १॥

वेनतेः कान्तिकर्मसु पाठाद् दीप्यमान आदित्यो वेन इत्युच्यते। ॥वे-नो वेनतेः कान्तिकर्मण इति हि यास्कः[नि०१०.३८]॥। गु-हा गुहायाम्। ॥"सुपां सुलुक्०" इति सप्तम्या लुक्॥। गु-हारूपे सर्वप्राणिहृदये यत् श्रुत्यन्तरप्रसिद्धं सत्यज्ञानादिलक्षणं परमम् ब्रह्म। यत्र यस्मिन् अधिष्ठानरूपे ब्रह्मणि विश्वम् आरोपितं कृत्स्नं जगत् एकरूपम् एकाकारं भवति आरोपितस्य अधिष्ठानव्यतिरेकेण सत्त्वाभावात्। आह स्म भगवान् बादरायणः। "तदनन्यत्वम् आरम्भणशब्दादिभ्यः" इति [बा०२.१.१४]। ॥भवतीति। शप्निपोः पित्त्वाद् अनुदात्तत्वे धातुस्वरेण आद्युदात्तत्वम्। "तिङ्ङतिङः" इति निघातस्य च "निपातैर्यद्यदिहन्ता०" इति प्रतिषेधः॥। तत् उक्तलक्षणं ब्रह्म वेनः पश्यत् अपश्यत्। स्वानन्यत्वेन साक्षात्कृतवान् इत्यर्थः। ॥दृशेर्लङि "बहुलं छन्दस्यमाङ्योगेपि" इति अडभावः॥॥ पृश्निः। दिवश्च आदित्यस्य च साधारणनामैतत्। प्राप्नोज्ज्वलवर्ण आदित्यः। ॥आह च यास्कः। पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण[2] इति नैरुक्ताः[नि०२.१४] इति॥। इदम् भूतभौतिकप्रपञ्चजातम् अदुहत्। अनुद्भूतनामरूपात्मकं जगत् ब्रह्मानन्यत्वेन सर्वशक्तित्वाद् उद्भूतनामरूपत्वेन व्यक्तम् अकार्षीद् इत्यर्थः। ॥दुहेर्लुङि छान्दसः अङ्॥॥ जायमानाः उत्पद्यमाना[व्राः]। वियन्त इति व्राः। ॥घञर्थे कविधानम् "स्थास्त्रागापाव्यधिहनियुध्यर्थम्" इति परिगणनस्य उपलक्षणार्थत्वात् वृञ् वरणे इत्यस्मात् कप्रत्ययः॥। आवृतात्मानः प्रजाः स्वर्विदः। स्वःशब्दाभिधेयम् आदित्यं स्वोत्पादकं विदन्ति जानन्तीति स्वर्विदः। ॥स्वरादित्यो भवति सु अरणः सु ईरण इति हि निरुक्तम[नि०२.१४]॥। अभ्यनूषत आभिमुख्येन तम् आदित्यं स्तुवन्ति। ॥णू स्तवने। "छन्दसि लुङ्लङ्लिटः" इति

1 S′Kd परं for परमम्. 2 S′Kd वर्णमिति.

वर्तमाने लुङ् । व्यत्ययेन आत्मनेपदम् । कुटादित्वेन सिचो ङित्त्वाद् गुणाभावः । "अनित्यम् आगमशासनम्" इति इडभावः ॥ यद्वा । वेनः पर्जन्यात्मा मध्यमस्थानो देवः । "वायुः वरुणः" इति प्रक्रम्य "वेनः असुनीतिः" इति [निघ० ५. ४] मध्यमस्थानदेवगणे पाठात् । तत् आदित्यमण्डलस्थम् उदकं पश्यति । तदेव विशिनष्टि । परमम् उत्कृष्टं गुहारूपे आदित्यमण्डले यद् उदकम् अस्ति । यत्र च उदके विश्वम् जगत् एकरूपम् नैमित्तिकप्रलये उदकात्मकं भवति । "आपो वा इदम् अग्रे सलिलम् आसीत्" [तै० सं० ७. १. ५. १] इति "आपो वा इदं सर्वं विश्वा भूतान्यापः" [तै० आ० १०. २२] इति च श्रुतेः ॥ अथ वा यत्र यस्मिन्नुदके विषये विश्वम् एकरूपम् उपजीव्यत्वेन एकाकारबुद्धिमद् भवति । श्रूयते हि । "नानामनसः खलु वै पशवो नानाव्रतास्तेष एवाभि समनसः" [तै० सं० ५. ३. १. ३] इति । तत् पश्यतीति संबन्धः ॥ इदम् । उदकनामैतत् । उदकम् उक्तम् उदकं पृश्निः आदित्यः तद्रश्मिसमूहो वा अदुहत् वर्षति । "यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेथ वर्षति" इति [तै० सं० २. ४. १०. २] "याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति" [तै० आ० १०. ६३] इति तैत्तिरीयकश्रुतेः ।

आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ।

इति [म० स्मृ० ३. ७६] स्मृतेश्च ॥ जायमानाः पृश्नेरुत्पद्यमानाः स्वर्विदः सुखस्य लम्भयित्रीः वाः व्रियमाणाः संभज्यमानाः स्वीक्रियमाणा अपः सर्वे जना अभ्यनूषत अभिष्टुवन्ति ॥ एवम् उक्तलक्षणः सर्वज्ञ आदित्यः शुभाशुभविज्ञानं करोतु इति विज्ञानकर्मणा संबन्धः ॥

द्वितीया ॥

प्र तद् वोचेद् अमृतस्य विद्वान् गन्धर्वो धाम परमं गुहा यत् ।

---

1 S′Kd °वृद्धि°. 2 S′Kd असौखलुवाआदित्यो. 3 S′Kd लंभयित्रीवाः. 4 S′Kd °कर्मणसं°.

त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुष्पितासत् ॥ २ ॥

प्र। तत्। वोचेत्। अमृतस्य। विद्वान्। गन्धर्वः। धाम। परमम्। गुहा। यत्।

त्रीणि। पदानि। निऽहिता। गुहा। अस्य। यः। तानि। वेद। सः। पितुः। पिता। असत्॥ २ ॥

अमृतस्य अविनाशिनो ब्रह्मणो विद्वान् जानन्। "क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वात् "चतुर्थ्यर्थे बहुलं छन्दसि" इति षष्ठी। न त्वत्र "कर्तृकर्मणोः कृति" इति कर्मणि षष्ठी। "न लोकाव्ययनिष्ठा०" इति तस्याः प्रतिषेधविधानात्। स्वरूपपदाध्याहारेण वा संबन्धः अमृतस्य स्वरूपं विद्वान् इति। न विद्यते मृतं यस्येति बहुव्रीहौ समासे "नञ्सुभ्याम्" इत्युत्तरपदान्तोदात्तत्वे प्राप्ते "नञो जरमरमित्रमृताः" इत्युत्तरपदाद्युदात्तत्वम्। गन्धर्वः। गावो रश्मयः। तान् धारयतीति गन्धर्व आदित्यः। "सूर्यो गन्धर्वस्तस्य मरीचयोप्सरसः" [तै० सं० ३. ४. ७. १] इति श्रुतेः। गां वेदलक्षणां वाचं वा धारयतीति गन्धर्वः। "ऋग्भिः पूर्वाह्णे दिवि देव ईयते" [तै० ब्रा० ३. १२. ९. १] इत्यादिश्रुतेः। "गवि गन् धृञो वः" इति गोशब्दोपपदाद् धृञो वप्रत्ययः। गोशब्दस्य गन् आदेशः। तत् उक्तलक्षणं ब्रह्म प्र वोचेत् प्रब्रवीतु। उपासकेभ्य इति शेषः। "व्यवहिताश्च" इति प्रोपसर्गस्य व्यवहितक्रियया संबन्धः। ब्रूञ आशीर्लिङि वच्यादेशे "लिङ्याशिष्यङ्" इति अङ् प्रत्ययः। "वच उम्" इति उम् आगमः॥ किं तद् इति तद् आह। परमम् क्रियाफलभूतविनश्वरस्वर्गाद्यपेक्षया उत्कृष्टं धाम पुनरावृत्तिरहितं स्थानम्। उक्तं हि भगवता

---

१ A R पितुः पिता°. We with B B^{h} D S^{m} V.

---

1 S′ Kd गंनादेशः. 2 S′ Kd °विनश्वरः.

न तद् भासयते सूर्यो न शशाङ्को न पावकः ।
यद् गत्वा न निवर्तन्ते तद् धाम परमं मम । इति [भ०गी०१५.६] ।

गुहा गुहायां हृद्रूपायां स्थितं यत् तत्त्वं तद् वोचेत् इति संबन्धः ॥ हृदयस्थस्य नित्यापरोक्षस्य परतत्त्वस्य उपदेश्यत्वम् अनुपपन्नम् इत्यत आह त्रीणि पदानीति । अस्य परमात्मनस्त्रीणि पदानि गुहा गुहायां निहिता निहितानि । यद्यपि अत्र निरुपाधिकस्य ब्रह्मणो निरवयवत्वात् पादकल्पना नोपपद्यते तथापि भूतभौतिकप्रपञ्चजातात् तदुपादानस्य आत्मनो निरतिशयमहत्त्वं प्रतिपादयितुं त्रिपदत्वम् उक्तम् इति अविरोधः । यथा छान्दोग्ये । "पादोस्य सर्वा भूतानि त्रिपाद् अस्यामृतं दिवि" [छा०उ०३.१२.६] इति । गुहानिहितपदार्थवत् अज्ञातम् अपरिच्छिन्नं ब्रह्म उपदेशैकसमधिगम्यम् अस्तीति तात्पर्यार्थः । ⧖ निहितेति । निपूर्वाद् धाञः कर्मणि निष्ठा । "दधातेर्हिः" इति हिरादेशः । "शेश्छन्दसि बहुलम्" इति शेर्लोपः । "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम् ⧖ ॥ यद्वा अस्य पूर्वोक्तस्य परब्रह्मणः त्रीणि पदानि । पद्यन्ते गम्यन्ते मुमुक्षुभिः प्राप्यन्त इति पदशब्देन अंशीभूता विराड्धिरण्यगर्भेश्वरा उच्यन्ते । गुहा । गूहयति संवृणोति परिच्छिनत्ति परमात्मानम् इति गुहा माया । तत्र निहितानि समष्टिरूपेण उपहितानि ॥ गुरूपदेशजनितब्रह्मावबोधस्य प्रयोजनम् आह । यः शमदमादिसंपन्नोऽधिकारी तानि तत् पादत्रयोपलक्षितं निष्कलं ब्रह्म वेद जीवेश्वरोपाधिपरित्यागेन साक्षात्करोति । ⧖ वेत्तेः "विदो लटो वा" इति तिपो णल् आदेशः । "लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वम् । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ⧖ । स विद्वान् पितुः स्वजनकस्यापि पिता कारणभूतः असत् भवति । ⧖ अस्तेर्लेटि अडागमः ⧖ । सर्वजगदधिष्ठानभूतब्रह्मीभावेन स्वस्यापि सर्वजगत्कारणत्वोपपत्तेः । तद् उक्तं सामब्राह्मणे । "शिशुर्वा आङ्गिरसो मन्त्रकृतां मन्त्रकृद् आसीत् स पितॄन् पुत्रका इत्यामन्त्रयत" इत्यादि । स्मर्यते च ।

---

1 S′Kd शब्दजग° for सर्वजग°. 2 S′Kd अंगिरसो.

अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान्॥ २, १५१
ते तम् अर्थम् अपृच्छन्त देवान् आगतमन्यवः।
देवाश्चैनान् समेत्योचुर्न्यायं वः शिशुरुक्तवान्॥ २, १५२

इति [म० स्मृ०]। अथ वा तानि विराड्धिरण्यगर्भेश्वरतत्त्वानि वेद प्रणवावयवैः अकारादिभिः व्यष्टिरूपाणां विश्वतैजसप्राज्ञानां समष्टिरूपविराडादितादात्म्य-ज्ञानपुरःसरं तुरीयं वस्तु यो वेद स पितुः पिता असद् इति पूर्ववत्॥

तृतीया॥

स नः पिता जनिता स उत बन्धुर्धामानि वेद भुवनानि विश्वा।
यो देवानां नामधा एक एव तं सम्प्रश्नं भुवना यन्ति सर्वा॥ ३॥

सः। नः। पिता। जनिता। सः। उत। बन्धुः। धामानि। वेद्। भुवनानि। विश्वा।
यः। देवानाम्। नामधाः। एकः। एव। तम्। सम्ऽप्रश्नम्। भुवना। यन्ति। सर्वा॥ ३॥

स सूर्यात्मकः परमात्मा नः अस्माकं पिता पालयिता॥ न केवलं पालकः किंतु जनिता जनयिता उत्पादकः। ✕"जनिता मन्त्रे" इति निपातनात् णिलोपः✕॥ उत अपि च सः उक्त एव बन्धुः भ्रात्रादिरूपो बन्धुवर्गः। पुत्रादीनां चेतनानां तद्व्यतिरेकेण अभावात् तत्तन्नामभिः स एवाभिधीयत इत्यर्थः। ✕बन्धुः। बन्ध बन्धने। शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च [उ० १, १०] इति उप्रत्ययः। धान्ये नित् [उ० १, ९] इत्यतो नित् इत्यनुवृत्तेः "स्नित्यादिर्नित्यम्" इत्याद्युदात्तत्वम्✕॥ इदानीं तस्य सर्वज्ञताम् आह। धामानि कर्मफलभूतस्वर्गादिस्थानानि। ✕धामानि त्रयाणि भवन्ति। स्थानानि

---

१ We read नामध for नामधा with A B D R $\overset{m}{S}$. नामधा is the reading of K S $\overset{h}{B}$ V.

२ So P $\overset{3}{P}$ J. K नामऽधाः.

नामानि जन्मानीति । इति हि निरुक्तम् [नि° ९.२८]॥ । तत्र स्थितानि विश्वा विश्वानि सर्वाणि भवन्ति सत्तां लभन्ते उत्पद्यन्ते इति भुवनानि भूतजातानि च वेद । स्वाध्यस्तं कृत्स्नप्रपञ्चं स्वाभिन्नं जानातीत्यर्थः ॥ तथा य उक्तः परमात्मा एक एव देवानाम् इन्द्रादीनां स्वसृष्टानां नामधाः । इन्द्रमित्रादीनि नामानि दधाति विदधाति करोतीति नामधाः । श्रूयते हि । "सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन् यदास्ते" [तै° आ° ३.१२.७] इति । यद्वा इन्द्राग्न्यादिदेवतात्मकः सन् तत्तन्नामानि स्वयमेव धत्ते इति नामधाः । तथा चाम्नायते । "तदेवाग्निस्तद् वायुस्तत् सूर्यस्तदु चन्द्रमाः तदेव शुक्रं तद् ब्रह्म तद् आपस्तत् प्रजापतिः" [तै° आ° १०.१.२] इति । "इन्द्रं मि- "त्रं वरुणम् अग्निम् आहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद् वि- "प्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानम् आहुः" [ऋ° १.१६४.४६] इति । ॥ नामोपपदात् दधातेः "आतो मनिन्क्वनिब्वनिपश्च" इति चकाराद् विच् प्रत्ययः । "गतिकारकोपपदात् कृत्" [इति] उत्तरपदप्रकृतिस्वरत्वम् ॥ । तम् उक्तलक्षणम् आत्मानं विषयीकृत्य सर्वा सर्वाणि [भुवना] भुवनानि भूतजातानि । ॥ उभयत्र "शेश्छन्दसि°" इति शेर्लोपः ॥ । संप्रश्नम् । किंविधोयम् आत्मा इति संभूय क्रियमाणः प्रश्नः संप्रश्नः । तं यन्ति प्राप्नुवन्ति । "यतो वाचो निवर्तन्ते" [तै° आ° ८.९] इत्यादिश्रुत्या परतत्त्वस्य अवाङ्मनसगोचरत्वात् तत्स्वरूपं निश्चेतुम् असमर्थाः सन्तो जिज्ञासवः किम् अयम् आत्मा ज्ञानादिगुणकः उत निर्गुणः परिच्छिन्नः अपरिच्छिन्नो वा जगतः किं निमित्तकारणमेव उत उपादानकारणमपि इत्येवमादिसंशयम् आपद्यन्त इत्यर्थः ॥ अथ वा संप्रश्नम् । क्रियाविशेषणम् एतत् । संगतः प्रश्नः संप्रश्नः । तत्पूर्वकं गुरुशास्त्रोपदेशतस्तमेव परमात्मानं यन्ति । तदैक्यं लभन्त इत्यर्थः । "ब्रह्मैव सन् ब्रह्माप्येति" [तै° आ° २.२] "ब्रह्मविद् आप्नोति परम्" [तै° आ° ८.१] "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिश्रुतिभ्यः ॥ विश्वं कृत्स्नं जगत् कर्म कर्तव्यं यस्येति व्युत्पत्त्या विश्वकर्मशब्देन परमात्मैवोच्यते इ-

ति वैश्वकर्मणहोमेपि अस्या ऋचो विनियोग उपपन्नः। ॥ संप्रश्न इति। प्रच्छ ज्ञीप्सायाम् इत्यस्मात् संपूर्वात् "यजयाच०" इत्यादिना नङ्। "प्रश्ने चासन्नकाले" इति निपातनात् संप्रसारणाभावः। कृदुत्तरपदप्रकृतिस्वरत्वम्। यन्तीति। इण् गतौ। "इणो यण्" इति यण् आदेशः ॥ ॥

चतुर्थी ॥

परि द्यावापृथिवी सद्य आयमुपातिष्ठे प्रथमजामृतस्य।
वाचमिव वक्तरि भुवनेष्ठा धास्युरेष नन्वेषो अग्निः ॥ ४ ॥

परि। द्यावापृथिवी इति। सद्यः। आयम्। उप। आऽतिष्ठे। प्रथमऽजाम्। ऋतस्य।
वाचम्ऽइव। वक्तरि। भुवनेऽस्थाः। धास्युः। एषः। ननु। एषः। अग्निः ॥ ४ ॥

ज्ञानोत्तरकालं तत्त्वविद् ब्रूते। द्यावापृथिवी द्यौश्च पृथिवी च द्यावापृथिव्यौ। ॥ "दिवो द्यावा" इति द्यावादेशः आद्युदात्तः। "वा छन्दसि" इति पूर्वसवर्णदीर्घः। "देवताद्वन्द्वे च" इत्युभयपदप्रकृतिस्वरत्वम् ॥। तदुपलक्षितं कृत्स्नं जगत् सद्यः तदानीं तत्त्वज्ञानसमकालमेव पर्यायम् परितः प्राप्तवान् अस्मि। स्वाभेदेन अवगतस्य ब्रह्मणः सर्वात्मकत्वाद् इति भावः। तथा च श्रुत्यन्तरे। "अहं मनुरभवं सूर्यश्च" इति [ऋ० ४, २६, १]। ॥ इण् गतौ। लङि उत्तमैकवचने गुणायादेशयोः आडागमः ॥ ॥ ऋतस्य सत्यस्य सत्याद् ब्रह्मणः। ॥ संबन्धसामान्ये षष्ठी ॥। प्रथमजाः भूतभौतिकप्रपञ्चजातात् पूर्वम् उत्पन्नः सूत्रात्मा। श्रूयते हि। "हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्" इति [ऋ० १०, १२१, १]। उपातिष्ठत्। स यथा समष्टिरूपेण कृत्स्नं जगद् व्याप्य अवतिष्ठते तद्वद् अहम् अस्मीत्यर्थः। ॥ प्र-

---

१ ^{h}BKSV °तिष्ठेत्. We read °तिष्ठे with ABDRP^{2}PJ २ We read प्रथमऽजाम् with AB^{h}BBrDRS^{m}PP^{2}J. VS have प्रथमजा ऋ°.

थमं जायत इति प्रथमजाः । जनी प्रादुर्भावे इत्यस्मात् "जनसनखनक्रमगमो विट्" । "विड्वनोरनुनासिकस्यात्" इति आत्वम् ॥ सद्यः-प्राप्निं दृष्टान्तेन उपपादयति वाचमिवेति । वक्तरि प्रयोक्तरि स्थितां वाचं निकटस्थिता बोद्धारो यथा प्रयोगसमकाल एव अवगच्छन्ति तथेत्यर्थः । यद्वा ज्ञानिना प्राप्यस्य तत्त्वस्य सर्वात्मकताम् आह वाचमिवेति । प्रथमार्थे द्वितीया । "सुपां सुपो भवन्तीति वक्तव्यम्" इति वचनात् । वाक् रवात्मकं विततं शब्दब्रह्म वक्तरि पुरुषे परिच्छिन्नं सत् यथा आविर्भवति । यथाहुराचार्याः ।

स रवः श्रुतिसंपन्नैः शब्दब्रह्मेति कथ्यते ।
स तु सर्वत्र संस्यूतो जाते भूताकरे पुनः ॥
आविर्भवति देहेषु प्राणिनाम् अर्थविस्तृतः । इति ।

एवं परमात्मा भुवनेष्ठाः । मायातत्कार्यात्मके भुवने भूतजाते तिष्ठति उपहितः सन् वर्तत इति भुवनेष्ठाः । तिष्ठतेर्विचि "तत्पुरुषे कृति बहुलम्" इति सप्तम्या अलुक् । सुपामादित्वात् षत्वम् । एष परमात्मा धास्युः पोषणेच्छावान् । हेतुगर्भविशेषणम् एतत् । पोषणाङ्गेतोस्तत्तत्र भूतेषु वर्तत इत्यर्थः । डुधाञ् धारणपोषणयोः इत्यस्मात् सर्वधातुभ्योऽसुन् [उ० ४. १८८] इति भावे असुन् प्रत्यये धा इति रूपम् । धाः धारणं पोषणं जगत इच्छतीति "छन्दसि परेच्छायामपि" इति क्यच् । "क्याच्छन्दसि" इति उप्रत्ययः । यद्वा धासिरित्यन्ननाम । तदुपलक्षितं भोग्यजातम् आत्मन इच्छतीति धास्युः । धाञ औणादिकः सिप्रत्ययः । ततः क्यचि अन्त्यलोपश्छान्दसः ॥ निष्क्रियस्य सतः कथं पोषकत्वं भोक्तृत्वं चेति तत्राह नन्वेषो अग्निरिति । एष परमात्मा अग्निर्ननु वैश्वानरात्मना पोषको भोक्ता खलु । श्रूयते हि वाजसनेयके । "एतावद् वा इदम् अन्नं चैवान्नादश्च सोम एवान्नम् अग्निरन्नादः" इति । भगवताप्युक्तम् ।

अहं वैश्वानरो भूत्वा प्राणिनां देहम् आश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् इति [भ० गी० १५. १४] ॥

पञ्चमी ॥

परि॒ विश्वा॒ भुव॑नान्यायमृ॒तस्य॒ तन्तुं॒ वित॑तं दृ॒शे कम्।
यत्र॑ दे॒वा अ॒मृत॑मानशा॒नाः सं॒माने योना॒वध्यैर॑यन्त ॥ ५ ॥

परि॑। विश्वा॑। भुव॑नानि। आ॒यम्। ऋ॒तस्य॑। तन्तु॑म्। विऽत॑तम्। दृ॒शे। कम्।

यत्र॑। दे॒वाः। अ॒मृत॑म्। आ॒न॒शा॒नाः। स॒माने। योनौ॑। अधि॑। ऐर॑यन्त ॥ ५ ॥

विश्वा विश्वानि भुवनानि पृथिव्यादीन् कर्मफलभूतान् लोकान् पर्यायम् ज्ञानोत्पत्तेः प्राक् खलु परितः प्राप्नवम्। परितो गमनस्य प्रयोजनम् आह। ऋतस्य सत्यस्य ब्रह्मणः तन्तुम् पटस्य तन्तुवत् जगतः कारणभूतं विततम् व्याप्तं स्वरूपं दृशे द्रष्टुम्। पर्यायम् इति संबन्धः। कम् इति पदपूरणः। तथा च यास्कः। पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्धिति इति [नि० १. ९]। यद्वा। ऋतस्य पुण्यापुण्यलक्षणकर्मणः कारणभूतं तन्तुम् तन्तुवद् बन्धनहेतुं मूलाज्ञानं विततम् अनादित्वेन विस्तीर्णम्। "ऋतस्य तन्तुं विततं विचृत्य" इति [तै० आ० १०. १. ४] श्रुत्यन्तराद् अत्रापि छित्त्वेत्यध्याहारः। कम् सुखात्मकं ब्रह्म। "कं ब्रह्म खं ब्रह्म" [छा० उ० ४. १०. ५] इति श्रुतेः। दृशे द्रष्टुं पर्यायम् इति योजना। "दृशे विख्ये च" इति दृशेस्तुमर्थे केप्रत्ययान्तो निपातितः ॥ द्रष्टव्यं ब्रह्मैव विशिनष्टि यत्र देवा इत्यर्धर्चेन। यत्र यस्मिन् ब्रह्मणि देवाः इन्द्राद्या अमृतम् अविनश्वरं परमानन्दम् आनशानाः अश्नुवानाः प्राप्नुवन्तः समाने योनौ एकस्मिन्नेव कारणभूते ब्रह्मणि। अधिः सप्तम्यर्थानुवादी आधिक्यार्थो वा। ऐरयन्त स्वात्मानम् अगमयन्। तदेकीभूता इत्यर्थः ॥ अथ वा तत्त्ववित् स्वानुभवम् आविष्करोति। यत्र ब्रह्मणि मनोवृत्तिभिः साक्षात्कृते अमृतम् अनश्वरनिरतिशयानन्दम् आनशानाः प्राप्नुवन्तो देवा इन्द्रियाणि समाने योनौ साधारणे कारणभूते ब्रह्मणि अध्यैरयन्त प्राप्नुवन्ति। लीना भवन्तीत्यर्थः। अर्थद्वयेपि तद् ब्रह्म द्रष्टुम् इति संबन्धः। आनशा-

नाः । अश्नोतेश्छान्दसे लिटि "लिटः कानज्वा" इति कानजादेशः । "अश्नोतेश्च" इति नुडागमः । "चितः" इत्यन्तोदात्तत्वम् ॥

[इति] द्वितीयकाण्डे प्रथमेनुवाके प्रथमं सूक्तम् ॥

"दिव्यो गन्धर्वः" इत्येतत् सूक्तं मातृनामगणे पठितम् । सूत्रितं हि। "दिव्यो गन्धर्वः[२.२] इमं मे अग्ने[६.१११] यौ ते माता[८.६] इति मातृनामानि" इति [कौ०१.८] ॥

अस्य सूक्तस्य गन्धर्वराक्षसाप्सरोभूतग्रहादिशान्तये घृताक्तसर्वौषधिहोमे चतुष्पथे ग्रहगृहीतशिरःस्थितमृन्मयकपालाग्निहोमादौ च विनियोगः । "मा-तृनाम्नोः सर्वसुरभिचूर्ण्[1]यन्वक्तानि हुत्वा शेषेण प्रलिम्पति चतुष्पथे च "शिरसि दर्भैण्ड्वेऽङ्गारकपाले[2]न्वक्तानि" इत्यादि "मौञ्जे त्रिपादे वयोनिवे-शने प्रबध्नाति" इत्यन्तं [कौ०४.२] सूत्रम् अत्र द्रष्टव्यम् ॥

तथा घृतमांसमधुहिरण्यपांस्वादिघोरवर्षणाङ्गुते मर्कटश्वापदादिरूपयक्षाँ[3]-ङ्गुते गोमायुनामकमण्डूकवदनादिषु अङ्गुतेषु[च] अनेन सूक्तेन आज्यं जु-हुयात् । "अथ यत्रैतानि वर्षाणि वर्षन्ति घृतं मांसं मधु च यद्धिरण्य-म्" इति प्रक्रम्य "दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् सा तत्र प्रा-यश्चित्तिः" इति तत्रतत्रोदाहृतं सूत्रं [कौ०१३.२] द्रष्टव्यम् ॥

तथा ग्रहयज्ञे प्रधानहोमानन्तरं शान्त्यर्थम् अनेन सूक्तेन आज्यं जु-हुयात् । तद् उक्तं शान्तिकल्पे । ग्रहयज्ञं प्रक्रम्य "अथ शान्तिः कृत्यादूष-"णैः[२.११; ४.४०; ४.१७; ४.१८; ४.१९; ५.१४; ५.३१; ८.५; "१०.१] चातनैः[१.७; १.८; २.१४; २.१८.३-५; २.२५; ४.२०; "४.३६; ४.३७; ५.२९; ८.३,४] मातृनामभिः[२.२; ६.१११; ८.६] "वास्तोष्पत्यैः[३.१२; ६.७३; ६.९३; १२.१] आज्यं जुहुयात्" इति [शा०क०१६] ॥

तथा प्राग् उदीरितानां त्रिंशच्छान्तीनां तन्त्रभूतायां महाशान्तौ अनेन सूक्तेन आज्यं हुत्वा कुम्भे संपातान् आनयेत् । उक्तं हि नक्षत्रकल्पे ।

---

1 S′ Kd °सुरभिश्च°. We with *Kaus'ika*. 2 S′ Kd °भेंडुकेंगा°. We with *Kaus'ika*. 3 S′ Kd °यज्या° for °यक्षा°.

संपातान् आनयेत् कुम्भे जुह्वन्मन्त्रैरयोत्तरैः

इत्यारभ्य

चातनो मातृनामा च वास्तोष्पत्योथ पाप्महा [न० क० २३] इति ॥

तथा यत्रयत्र महाशान्त्यादौ मातृनामगणस्य विनियोगस्तत्रतत्रैतत् सूक्तं द्रष्टव्यम् ॥

तथा अश्वमेधे "दिव्यो गन्धर्वः" इत्यनया ऋचा ब्रह्मा संवत्सरान्ते युज्यमानम् अश्वम् अनुमन्त्रयेत । "दिव्यो गन्धर्व इत्येतया कौशिकः" इति हि वैतानं सूत्रम् [वै० ७, १] ॥

तत्र प्रथमा ॥

दि॒व्यो ग॑न्ध॒र्वो भुव॑नस्य॒ यस्पति॒रेक॑ एव॒ न॑म॒स्यो॑ वि॒श्वीड्यः॑ ।
तं त्वा॑ यौमि॒ ब्रह्म॑णा दिव्य देव॒ नम॑स्ते अस्तु दि॒वि ते॑ स॒धस्थ॑म् ॥ १ ॥

दि॒व्यः॑ । ग॒न्ध॒र्वः॑ । भुव॑नस्य । यः । पतिः॑ । एक॑ः । एव॒ । न॒म॒स्यः॑ । वि॒क्षु । ईड्यः॑ ।
तम् । त्वा॒ । यौमि॒ । ब्रह्म॑णा । दि॒व्य॒ । दे॒व॒ । नमः॑ । ते॒ । अ॒स्तु॒ । दि॒वि । ते॒ ।
स॒धऽस्थ॑म् ॥ १ ॥

दिवम् अर्हतीति दिव्यः । द्युस्थान इत्यर्थः । "छन्दसि च" इति यः । प्रत्ययस्वरेण अन्तोदात्तः । गाः रश्मीन् उदकं वा धारयतीति गन्धर्वः सूर्यः भुवनस्य पृथिव्यादिलोकस्य वृष्ट्यादिना पतिः पोषकः । श्रूयते हि । "यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेथ वर्षति" [तै० सं० २, ४, १०, २] इत्यादि । अथ वा भुवनस्य प्राणिजातस्य पतिः प्राणरूपेण पालकः । तथा च आथर्वणोपनिषदि आम्नायते । "सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानाम् उदयत्येष सूर्यः" [प्र० उ० १, ८] इति । "योसौ तपन्नुदेति स सर्वेषां भूतानां प्राणान् आदायोदेति" इति हि तैत्तिरीयके [तै० आ० १, १४, १] । विक्षु प्रजासु एक एव नमस्यः नमस्कार्यः ईड्यः स्तुत्यश्च । नमःशब्दात् "नमोवरिवश्चित्रङः क्यच्" इति पूजायां क्यच् । तदन्ताद् "अचो य-

त्" । अतोलोपयलोपौ । यद्वा नमस्कारार्हः । "तद् अर्हति" इति छान्दसो यत् । "तित् स्वरितः" इति स्वरितत्वम् । विक्षु । "सावेकाचः०" इति विभक्तेरुदात्तत्वम् । ईड्यः । ईड स्तुतौ इत्यस्मात् "ऋहलोर्ण्यत्" । "ईडवन्दवृशंसदुहां ण्यतः" इत्याद्युदात्तत्वम् । ईदृशो यो गन्धर्वः तं त्वा त्वां ब्रह्मणा परमात्मना यौमि संयोजयामि । तद्रूपेण भावयामीत्यर्थः ॥ यद्वा ब्रह्मणा स्तुतिलक्षणेन मन्त्रेण हविर्लक्षणेन अन्नेन वा यौमि संयोजयामि[1] । युमिश्रणे । "उतो वृद्धिर्लुकि हलि" इति वृद्धिः । हे दिव्य दिवि भव हे देव द्योतनादिगुणविशिष्ट । दीव्यतेः इगुपधलक्षणे[2] के प्राप्ते "देवसेनमेषादयः पचादिषु द्रष्टव्याः" इति अच् प्रत्ययः ॥ किं च ते तुभ्यं नमोस्तु मया क्रियमाणो नमस्कारो भवतु । "नमः स्वस्ति०" इति युष्मदश्चतुर्थी । "तेमयावेकवचनस्य" इति तेआदेशः । "अनुदात्तं सर्वमपादादौ" इत्यनुदात्तः ॥ नमस्कार्यत्वमेव उपपादयति । दिवि द्युलोके खलु ते तव सधस्थम् सहस्थानम् । आवासस्थानम् इत्यर्थः । दिवि । "ऊडिदम्०" इत्यादिना विभक्तेरुदात्तता । सह तिष्ठन्त्यत्रेति "घञर्थे कविधानं स्थास्त्रागापाव्यधिहनियुध्यर्थम्" इत्यधिकरणे कप्रत्ययः । "सध मादस्थयोश्छन्दसि" इति सहस्य सधादेशः । "अद्रिसभ्योरन्तोदात्तत्वनिपातनं कृत्स्वरनिवृत्त्यर्थम्" इत्यत्र सध्रिग्रहणस्य सहादेशोपलक्षणार्थत्वात् सधशब्दस्य अन्तोदात्तता ॥ अस्या ऋचः अश्वमेधे बध्यमानाश्वानुमन्त्रणे[3] विनियोगस्य दर्शितत्वात् तदनुसारेण अर्थो नेयः । गन्धर्वः गन्धर्वकुलजातोश्व इत्यर्थः । "उषा वा अश्वस्य मेध्यस्य" [बृ० आ० १, १, १] । इत्यादिना अश्वमेधाङ्गस्य अश्वस्य बृहदारण्यके विराडात्मना उपास्यत्वदर्शनात् सर्वाणि विशेषणानि अश्वपक्षेपि युज्यन्ते ॥

द्वितीया ॥

दिवि स्पृष्टो यजतः सूर्यत्वगवयाता हरसो दैव्यस्य ।
मृडाद् गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यः सुशेवाः ॥ २ ॥

---

1 S′Kd om. सं°. 2 S′Kd इगुपधगुणे for इगुपधलक्षणे. 3 वध्य° for वध्य°.

दिवि। स्पृष्टः। यजतः। सूर्यत्वक्। अवऽयाता। हरसः। दैव्यस्य।
मृडात्। गन्धर्वः। भुवनस्य। यः। पतिः। एकः। एव। नमस्यः।
सुऽशेवाः॥ २॥

दिवि द्युस्थाने स्पृष्टः स्प्रष्टा। तत्र स्थित इत्यर्थः। ✠स्पृश संस्पर्शने इत्यस्मात् कर्तरि क्तः✠। यजतः यष्टव्यः। ✠भृमृदृशियजिपत्यमिनमिहनिभ्योऽतच् [उ० ३. ११४] इति अतच् प्रत्ययः। चित्त्वाद् अन्तोदात्तः✠। सूर्यस्य त्वगिव त्वग् यस्य स सूर्यत्वक्। सूर्यसमानवर्ण इत्यर्थः। ✠"राजसूयसूर्य०" इत्यादिना सुवतेः सरतेर्वा क्यबन्तो निपातितः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्✠। दैव्यस्[2] देवसंबन्धिनो हरसः। क्रोधनामैतत्। क्रोधस्य अवयाता अपगमयिता। ✠"देवाद् यञञौ" इति प्राग्दीव्यतीयेषु अर्थेषु यञ्। "ञ्नित्यादिर्नित्यम्" इत्याद्युदात्तः✠॥ न केवलं दैव्यस्[2] क्रोधस्य निवारकः अपि तु सुखप्रदोपि अयमेव इत्याह। मृडात् मृडयतु। ✠मृड सुखने इत्यस्मात् लेटि आडागमः। "इतश्च लोपः परस्मैपदेषु" इति इकारलोपः✠। गन्धर्व इत्यादि पूर्ववत्। सुशेवाः। शेवम् इति सुखनाम। शोभनं सुखं यस्य स तथोक्तः। ✠व्यत्ययेन बहुवचनम्। इण्शीङ्भ्यां वन् [उ० १. १५०] इति वन् प्रत्ययः। "आद्युदात्तं द्व्यच् छन्दसि" इति बहुव्रीहौ उत्तरपदाद्युदात्तत्वम्✠। यद्वा। ✠एवृ शेवृ केवृ सेवने तालव्यादिः पठ्यते। अस्माद् भावे असुनि शोभनं शेवः शेवनं यस्येति बहुव्रीहौ "सोर्मनसी अलोमोषसी" इत्युत्तरपदाद्युदात्तत्वम्✠। अनायासेन सेव्य इत्यर्थः॥

तृतीया॥

अनवद्याभिः समु जग्म आभिरप्सुरास्वपि गन्धर्व आसीत्।
समुद्र आसां सदनं म आहुर्यतः सद्य आ च परा च यन्ति॥ ३॥

---

1 S′ Kd स्वरतेर्वा. 2 S′ Kd देव्यस्य.

अनवद्याभिः । सम् । ऊं इति । जग्मे । आभिः । अप्सरासु । अपि ।
गन्धर्वः । आसीत् ।
समुद्रे । आसाम् । सदनम् । मे । आहुः । यतः । सद्यः । आ । च ।
परा । च । यन्ति ॥ ३ ॥

अनवद्याभिः अगर्ह्याभिः । प्रशस्तरूपाभिरित्यर्थः । "अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु" इति गर्ह्यार्थे अवद्यशब्दो यत्प्रत्ययान्तो निपातितः । वहुव्रीहौ "नञ्सुभ्याम्" इत्युत्तरपदान्तोदात्तत्वम् । आभिरप्सरोभिः मरीचिरूपाभिः । "सूर्यो गन्धर्वस्तस्य मरीचयोप्सरसः" [तै० सं० ३. ४. ७. १] इति श्रुतेः । सूर्यरूपो गन्धर्वः सं जग्मे संगतवान् । उशब्दः पदपूरणार्थः प्रसिद्ध्यर्थो वा । "समो गम्यृच्छि०" इत्यादिना अकर्मकाद् गमेरात्मनेपदम् । "गमहन०" इत्युपधालोपः । अप्सरासु अप्सरःस्वपि गन्धर्वः सूर्यनामा आसीत् संगतोभवत् । गन्धर्वाप्सरसां परस्परसाहित्यप्रतिपादनेन[1] तेषाम् अविनाभावस्य सिद्धत्वात् सहैव तेषां पूजाहोमादिकं कार्यम् इति तात्पर्यार्थः । अत एव तैत्तिरीयके । "गन्धर्वाप्सरसो वा एतम् उन्मादयन्ति य उन्माद्यति" इति प्रक्रम्य "तस्मै स्वाहा ताभ्यः स्वाहेति जुहोति तेनैवैनान् समर्धयति" [तै० सं० ३. ४. ८. ४] इति होमसाहित्यम् आम्नातम् । अप्सरास्विति । आप इत्यन्तरिक्षनाम । उदकं वा । तत्र चरतीत्यप्सरा । बाहुलकाद् अच् । यद्वा अप्स इति रूपनाम । रो मत्वर्थीयः । उभयत्र टाप् । अथ वा अप्सु सरतीति अप्शब्दोपपदात् सर्तेः असुन् । अप्सुशब्दोपपदात् ला आदाने इत्यस्माद् वा रत्वे असुन् । रा दाने इत्यस्माद् वा असुन् । तथा च सकारान्तोप्सरःशब्दः । तस्यैव व्यत्ययेन सकारस्य आत्वम् । एतत् सर्वं यास्केनोक्तम् । अप्सरा अप्सारिण्यपि वा अप्स इति रूपनाम अप्सातेरप्सानीयं भवति । आदर्शनीयं व्यापनीयं वेति । तद्वा भवति रूपवती तद् अनयात्तम् इति वा तद् अ-

---

1 S' Kd °पादकेन for °पादनेन.

स्मै दत्तम् इति वा इति च [नि. ५. १३]। अत एव व्युत्पत्त्यनवधारणात् पदकारा नावगृह्णते ॥। अप्सरसां स्थानम् आह समुद्र इति। आसाम् अप्सरसां मरीचिरूपाणां सदनम्। ॥ सीदन्त्यस्मिन्निति सदनम् आवासस्थानम्। अधिकरणे ल्युट् ॥। समुद्रे समुद्रवन्ति अस्माद् आप इति वा संमोदन्तेस्मिन् भूतानीति वा समुद्रशब्देन आदित्य उच्यते। तत्र इति मे मम आहुः कथयन्ति अभिज्ञाः। इति मन्त्रद्रष्टुर्वचनम् एतत्। तदेव उपपादयति। यतः यस्माद् आदित्यात् सद्यः सूर्योदयसमकालमेव आ यन्ति च आगच्छन्ति च परा यन्ति च अस्मात् स्थानात् तत् पुनः परागच्छन्ति च। अस्तमयकाले तदेव प्रविशन्तीत्यर्थः॥ अथ वा गन्धर्वशब्दः प्रसिद्धगन्धर्वजातिवाचकः[1]। अप्सरःशब्दोपि प्रसिद्धाप्सरोजातिवाची। समु जग्मुः[2] इति परस्परानुरागविशेषेण स्त्रीपुंसात्मकानां तेषां गतिरुक्ता। समुद्रशब्देन अन्तरिक्षलोक उच्यते। यतः यस्माद् अन्तरिक्षलोकाद् आयन्ति प्रजापीडार्थम् आविर्भवन्ति[3] पुनस्तत्रैव परा[4] यन्ति। तिरोभवन्तीत्यर्थः। अन्यत् पुर्ववद् योज्यम॥

चतुर्थी॥

अभ्रिये दिद्युन्नक्षत्रिये या विश्वावसुं गन्धर्वं सचध्वे।
ताभ्यो वो देवीर्नम इत् कृणोमि॥ ४॥

अभ्रिये। दिद्युत्। नक्षत्रिये। याः। विश्वऽवसुम्। गन्धर्वम्। सचध्वे।
ताभ्यः। वः। देवीः। नमः। इत्। कृणोमि॥ ४॥

हे अभ्रिये। अभ्रेषु भवा अभ्रिया। ॥ "समुद्राभ्राद्घः" इति भवार्थे घप्रत्ययः। घस्य इय् आदेशः ॥। हे दिद्युत् द्योतनस्वभावे। ॥ द्युत दीप्तौ इत्यस्मात् "द्युतिगमिजुहोतीनां द्वे च" इति क्विपि द्विर्वचने "द्युतिस्वाप्योः संप्रसारणम्" इत्यभ्यासस्य संप्रसारणम् ॥। हे नक्षत्रिये नक्षत्ररूपिणि। ॥ "नक्षत्राद् घः" इति स्वार्थे घप्रत्ययः।

---

1 S′Kd प्रसिद्धः गंध°. 2 S′Kd जग्मुः इति for जग्म इति. 3 S′Kd °विर्भवति. 4 S′Kd पारयंत्विति तिरो° for परा यन्ति। तिरो°.

"चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसः" [तै० सं० ३.४.७.१] इति श्रुतेर्नक्षत्राणाम् अप्सरस्त्वम् । यद्वा अभ्रिये । अभ्रम् अन्तरिक्षम् । तत्र भवः अभ्रियो मेघः । तस्मिन् । दिद्युत् । व्यत्ययेनैकवचनम् । द्योतमाना या अप्सरसः । "पर्जन्यो गन्धर्वस्तस्य विद्युतोप्सरसः" [तै० सं० ३.४.७.२] इति श्रुतेः । नक्षत्रिये । जातावेकवचनम् । सुकृतफलोपभोगायतनानि नक्षत्राणि । "देवगृहा वै नक्षत्राणि" [तै० ब्रा० १.५.२.६] इति श्रुतेः । तेषु च या अप्सरसः या यूयं विश्वावसुम् । विश्वं वसु यस्मिन् स विश्वावसुः । "विश्वस्य वसुराटोः" इति पूर्वपदस्य दीर्घः । "बहुव्रीहौ विश्वं संज्ञायाम्" इति पूर्वपदान्तोदात्तत्वम् । एतन्नामानं गन्धर्वं सचध्वे संगता भवथ । पच समवाये । हे देवीः देव्यो द्योतमानाः । "वा छन्दसि" इति पूर्वसवर्णदीर्घः । ताभ्यः उक्तरूपाभ्यो वः युष्मभ्यम् । "बहुवचनस्य वस्नसौ" इति चतुर्थीबहुवचनान्तस्य युष्मदो वस् आदेशः । नमः । अन्ननामैतत् । हविर्लक्षणम् अन्नं नमस्कारं वा । इच्छब्दः अवधारणे । कृणोमि करोमि । कृवि हिंसाकरणयोश्च । "धिन्विकृण्व्योर च" इति उप्रत्ययः ॥

पञ्चमी ॥

याः क्रुन्दास्तमिषीचयोक्षकामा मनोमुहः ।
ताभ्यो गन्धर्वपत्नीभ्योप्सराभ्योकरं नमः ॥ ५ ॥

याः । क्रुन्दाः । तमिषीचयः । अक्षऽकामाः । मनःऽमुहः ।
ताभ्यः । गन्धर्वऽपत्नीभ्यः । अप्सराभ्यः । अकरम् । नमः ॥ ५ ॥

क्रुन्दाः क्रुन्दयित्र्यो मनुष्यान् आविश्य उपद्रवकरणेन रोदयित्र्यः । कदि क्रदि क्रुदि आह्वाने रोदने च इत्यत्र क्रुन्देर्ण्यन्तात् पचाद्यच् । तमिषीचयः । तविषीति बलनाम । तद् अञ्चन्ति प्राप्नुवन्ति चिन्वन्ति वेति तविषीचयः । बलवत्य इत्यर्थः । तवेर्वृद्ध्यर्थात् तवेर्णिङ्वा [उ० १.४८] इति टिषच् प्रत्ययः । टित्वाद् ङीप् । वर्णव्यत्यय-

श्छान्दसः । ततः अञ्चतेश्चिनोतेर्वा क्विनि पृषोदरादित्वाद् रूपसिद्धिः । तमु ग्लानौ । इत्यस्माद् वा बाहुलकात् टिषच् प्रत्ययः । तमिषीं ग्लानिं परेषाम् आविष्टानाम् उपचिन्वन्तीति तमिषीचयः । अक्षकामाः अक्षाणि इन्द्रियाणि तानि नाशयितुं कामयमानाः । कर्मेर्णिच् । "कर्मण्यण्" इति अणि प्राप्ते "शीलिकामिभक्ष्याचरिभ्यो णः" इति णप्रत्ययः । मनोमुहः मनसो मोहयित्र्यः । उन्मादकारिण्य इत्यर्थः । श्रूयते हि तैत्तिरीयके । "गन्धर्वाप्सरसो वा एतम् उन्मादयन्ति य उन्माद्यति" [तै० सं० ३. ४. ८. ४] इति । एवंविधा या अप्सरसस्ताभ्यो गन्धर्वपत्नीभ्यः गन्धर्वाः पतयो यासाम् । "विभाषा सपूर्वस्य" इति ङीन्नकारौ । अप्सराभ्यः अप्सरोभ्यः नमः हविर्लक्षणम् अन्नं नमस्कारं वा अकरम् करोमि । "छन्दसि लुङ्लङ्लिटः" इति करोतेश्छान्दसे लुङि "कृमृदरुहिभ्यश्छन्दसि" इति च्लेः अङ् आदेशः । "ऋदृशोङि गुणः" इति गुणः ॥

इति द्वितीये काण्डे प्रथमेनुवाके द्वितीयं सूक्तम् ॥

"अदो यत्" इति सूक्तेन ज्वरातीसारातिमूत्रनाडीव्रणेषु तदुपशान्तये मुञ्जशिरोनिर्मितरज्जुबन्धनम् क्षेत्रमृत्तिकाया वा पायनम् सर्पिर्लेपनम् चर्मर्दतिमुखेन[1] अपानशिश्ननाडीव्रणमुखानां धमनं च कार्यम् । "विश्वाशरस्य[१. २] अदो यत्[२. ३] इति मुञ्जशिरोरज्वा वध्नाति" इत्यादि [कौ० ४. १] सूत्रं द्रष्टव्यम् ॥

तत्र प्रथमा ॥

अदो यद॑वधाव॑त्यव॒ल्कमधि॒ पर्व॑तात् ।
तत् ते॑ कृणोमि भेष॒जं सुभे॑षजं॒ यथास॑सि ॥ १ ॥

अ॒दः । यत् । अ॒व॒ऽडधाव॑ति । अ॒व॒त्ऽकम् । अधि॑ । पर्व॑तात् ।
तत् । ते॒ । कृ॒णोमि॒ । भे॒ष॒जम् । सुऽभे॑षजम् । यथा॑ । अस॑सि ॥ १ ॥

---

1 S' Kd चर्मदृति°. We with the *Kes'ari* which explains the phrase to mean चर्मखल्वामुखन &c. See also Sâyaṇa's introduction to I. 2, and our foot-note 2 at page 15.

पर्वतात् । अत्र पर्वतशब्देन मुञ्जवान् नाम पर्वतो विवक्षितः । "मुञ्जशिरोरज्ज्वा बध्नाति" इति विनियुक्तस्य मुख्यमुञ्जस्य तत्रैवोत्पत्तेः । तस्मात् । अधिः पञ्चम्यर्थानुवादी । "अधिपरी अनर्थकौ" इति स्मरणात् । अदः विप्रकृष्टं यत् प्रसिद्धम् अवत्कम् व्याधिपरिहारेण रक्षकं मुञ्जशिरः अवधावति अवरुह्य भूमौ धावति । व्याप्य वर्तत इत्यर्थः । "पाघ्राध्मा०" इत्यादिना सर्तेर्वेगितायां गतौ धाव् आदेशः । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधे "तिङि चोदात्तवति" इति गतेरनुदात्तत्वम् । हे मुञ्ज ते तव त्वदीयं तत् अग्रम् । यद्वा । कर्मणि षष्ठी । तत् तथाविधं ते त्वां भेषजं कृणोमि व्याधिनिवृत्त्यर्थम् औषधं करोमि । यथा येन प्रकारेण सुभेषजम् व्याधिनिवर्तनक्षमम् अतिशयितवीर्ययुक्तम् अससि । तथा कृणोमीति संबन्धः । सुभेषजम् । "स्वती पूजायाम्" इति प्रादिसमासः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अससि । अस्तेः "बहुलं छन्दसि" इति शपो लुगभावः । "यावद्यथाभ्याम्" इति निघातप्रतिषेधः ॥

द्वितीया ॥

आद॒ङ्गा कु॒विद॒ङ्गा श॒तं या भे॑ष॒जानि॑ ते ।
तेषा॑मसि॒ त्वमु॑त्त॒मम॑नास्रावमरो॑गणम् ॥ २ ॥

आत् । अ॒ङ्ग । कु॒वित् । अ॒ङ्ग । श॒तम् । या । भे॒ष॒जानि॑ । ते॒ ।
तेषा॑म् । अ॒सि॒ । त्वम् । उ॒त्ऽत॒मम् । अ॒ना॒स्रा॒वम् । अरो॑गणम् ॥ २ ॥

अङ्गेत्याभिमुख्यकरणे । हे ओषधे आत् प्रयोगसमनन्तरमेव । रोगं निवर्तयेत्यध्याहारः ॥ तथा अङ्ग कुवित् । बहुनामैतत् । बहुधा उत्पन्नान् अतीसारादीन् रोगान् । विनाशयेति शेषः । अङ्ग इत्युभयत्र "निपातस्य च" इति सांहितिको दीर्घः । तदेव प्रशंसति । हे ओषधे ते तव संबन्धीनि सजातीयानि शतम् अपरिमितानि या यानि । "शेश्छन्दसि बहुलम्" इति लोपः । भेषजानि सन्ति तेषाम् भेषजानां मध्ये त्वम् उत्तमम् उत्कृष्टतमम् असि भव-

सि । ॥ उत्कृष्टार्थवाचिन उच्छब्दाद् अतिशायने तमप् । "उत्तमशश्वत्तमौ सर्वत्र" इति उञ्छादिषु पाठात् अन्तोदात्तः ॥ । उत्तमत्वं समर्थयते । अनास्रावम् । आस्रवन्तीति आस्रावाः अतीसारातिमूत्रनाडीव्रणादयः । तेषां निवर्तकम् । ॥ आङ्पूर्वात् स्रवतेः "श्याद्व्यधास्रु०" इत्यादिना णः ॥ । अरोगणम् तन्मूलरोगनिवर्तकम् । ॥ रुजो भङ्गे इत्यस्माद् भावे ल्युट् । छान्दसं कुत्वम् ॥ ॥

तृतीया ॥

नीचैः खनन्त्यसुरा अरुस्राणमिदं महत् ।
तदास्रावस्य भेषजं तदु रोगमनीनशत् ॥ ३ ॥

नीचैः । खनन्ति । असुराः । अरुःऽस्राणम् । इदम् । महत् । तत् । आऽस्रावस्य । भेषजम् । तत् । ऊं इति । रोगम् । अनीनशत् ॥ ३ ॥

असुराः । असून् प्राणान् लान्ति आददते अपहरन्तीत्यसुराः । ॥ "आतोनुपसर्गे कः" इति कप्रत्ययः ॥ । अस्यन्ति शरीरं क्षिपन्ति पातयन्तीति असुराः व्याधयो राक्षसा वा । ॥ असेरुरन् [उ० १. ४२] इति उरन् प्रत्ययः ॥ । इदम् परिदृश्यमानं महत् उल्बणम् अरुःस्राणम् अरुषो व्रणस्य पाकस्थानम् । व्रणमुखम् इत्यर्थः । ॥ स्रै पाके इत्यस्माद् अधिकरणे ल्युट् ॥ । नीचैः खनन्ति अन्तरन्तः अवदारयन्ति । अभ्यन्तरं व्याप्नुवन्तीत्यर्थः । यद्वा असुराः असुः प्राणः । ॥ रो मत्वर्थीयः ॥ । प्राणवन्तः । बलवन्त इत्यर्थः । अरुःस्राणम् । अरुः स्रायति पक्वं भवति उपशमनोन्मुखं भवति अनेनेति अरुःस्राणम् । ॥ करणे ल्युट् ॥ । इदम् महत् औषधं नीचैः खनन्ति समूलम् उद्धरन्ति ॥ तत् उक्तम् औषधम् आस्रावस्य उक्तलक्षणस्य रोगस्य भेषजम्

---

१ So we with **A B** Bp $\overset{h}{\mathbf{B}}$ **D K** $\overset{m}{\mathbf{S}}$, none of which have अरुः स्रा° or अरुस्रा°. **R V** have अरुःस्रा°.

---

1 **S′ K**d क्षिपंतीति पातयंतीति. 2 **S′ K**d अरुस्राणं. 3 **S′ K**d स्रै.

निवर्तकम् । तदु तदेव रोगम् अतीसारादिकम् अशीशमत् समूलं नाशयति । ॥ शमेर्ण्यन्तात् लुङि चङि रूपम् ॥

चतुर्थी ॥

उपजीका उद्भरन्ति समुद्रादधि भेषजम् ।
तदास्रावस्य भेषजं तदु रोगमशीशमत् ॥ ४ ॥
उपऽजीकाः । उत् । भरन्ति । समुद्रात् । अधि । भेषजम् ।
तत् । आऽस्रावस्य । भेषजम् । तत् । ऊं इति । रोगम् । अशीशमत् ॥ ४ ॥

उपजीका वल्मीकनिष्पादिका वश्यः समुद्रात् पृथिव्या अधोवस्थितात् जलराशेः । [अधिः] पञ्चम्यर्थानुवादी । भेषजम् रोगनिवारकम् औषधम् [उद्भरन्ति] उद्धरन्ति । पृथिव्या उर्ध्वं हरन्ति । "हृग्रहोर्भश्छन्दसि" इति भत्वम् ॥ तत् वल्मीकमृत्तिकारूपम् औषधम् आस्रावस्येत्यादि पूर्ववत् ॥

पञ्चमी ॥

अरुस्राणमिदं महत् पृथिव्या अध्युद्भृतम् ।
तदास्रावस्य भेषजं तदु रोगमनीनशत् ॥ ५ ॥
अरुःऽस्राणम् । इदम् । महत् । पृथिव्याः । अधि । उत्ऽभृतम् ।
तत् । आऽस्रावस्य । भेषजम् । तत् । ऊं इति । रोगम् । अनीनशत् ॥ ५ ॥

अरुःस्राणम् अरुषो व्रणस्य पाचनं पृथिव्याः केदारादिक्षेत्ररूपायाः सकाशात् । अधिः पञ्चम्यर्थानुवादी । उद्भृतम् उद्धृतम् । "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम् । यद् इदं महत् औषधं क्षेत्रमृत्तिकारूपम् तत् आस्रावस्येत्यादि पूर्ववत् । अनीनशत् इति । णशेर्ण्यन्तात् लुङि चङि रूपम् ॥

---

१ So we with **A B** Br $\overset{h}{B}$ **D** $\overset{m}{S}$. **R K V** have अरुःस्रा°.

---

1 **S′ Kd** °निष्पादका°.

षष्ठी ॥

शं नो॑ भवन्त्व॒प ओष॑धयः शि॒वाः।
इन्द्र॑स्य॒ वज्रो॒ अप॑ हन्तु र॒क्षस॑ आ॒राद् विसृ॑ष्टा इष॑वः पतन्तु
र॒क्षसा॑म् ॥ ६ ॥

शम्। नः। भवन्तु। अपः। ओष॑धयः। शि॒वाः।
इन्द्र॑स्य। वज्रः। अप॑। हन्तु। र॒क्षसः। आ॒रात्। विऽसृ॑ष्टाः। इष॑वः।
पत॒न्तु। र॒क्षसा॑म् ॥ ६ ॥

औषधार्थं प्रयुज्यमाना आपः[*] ओषधयश्च शिवाः सुखहेतवः सत्यः नः अस्माकं शम् रोगाणां शमनाय भवन्तु ॥ रक्षसः राक्षसान् रोगोत्पादकान् इन्द्रस्य वज्रः अप हन्तु हिनस्तु। रक्षत्यस्माद् इति "भीमादयोपादाने" इत्यपादाने रक्षतेः असिप्रत्ययः। रक्षो रक्षितव्यम् अस्मात् इति यास्कः [नि० ४. १८]। प्रत्ययाद्युदात्तत्वम् ॥ विसृष्टा मनुष्याणां पीडनाय प्रयुक्ता रक्षसाम् इषवः रोगादिरूपा आरात् अस्मत्तो दूरे पतन्तु ॥

[इति] द्वितीये काण्डे प्रथमेनुवाके तृतीयं सूक्तम् ॥

"दीर्घायुत्वाय" इति सूक्तेन कृत्यादूषणार्थम् आत्मरक्षार्थम् विघ्नशमनार्थं च जङ्गिडाख्यवृक्षविशेषमणिं शणसूत्रप्रोतं कृत्वा संपात्य अभिमन्त्र्य बध्नीयात्। "दीर्घायुत्वायेति मन्त्रोक्तं बध्नाति" इति सूत्रम् [कौ० ५. ६] ॥

तत्र प्रथमा ॥

दी॒र्घायु॑त्वाय॑ बृह॒ते रणा॒यारि॑ष्यन्तो॒ दक्ष॑माणाः॒ सदै॒व।
म॒णिं वि॑ष्कन्ध॒दूष॑णं जङ्गि॒डं बि॑भृमो व॒यम् ॥ १ ॥
दी॒र्घायु॑ऽत्वाय। बृह॒ते। रणा॑य। अरि॑ष्यन्तः। दक्ष॑माणाः। सदा॑। ए॒व।
म॒णिम्। वि॒स्क॒न्ध॒ऽदूष॑णम्। ज॒ङ्गि॒डम्। बि॒भृ॒मः। व॒यम् ॥ १ ॥

---

१ So we with A B $\overset{h}{\text{B}}$ K D R $\overset{m}{\text{S}}$ P $\overset{2}{\text{P}}$ J, none of which read भवन्त्वाप.

दीर्घायुत्वाय चिरकालजीवनाय । छन्दसीणः [उ० १.२] इति एतेः उण् प्रत्ययः । यद्वा दीर्घायुष्ट्वाय । एतेर्णिच्च [उ० २. ११७.] इति उसिप्रत्ययः । सकारलोपश्छान्दसः । बहुव्रीहेर्भावे त्वप्रत्ययः । दीर्घम् आयुः अस्माकं यथा स्याद् इत्येवमर्थं बृहते महते रणाय रमणीयाय प्रशस्याय कर्मणे । अभिलषितकर्मानुष्ठानविघ्नशान्तय इत्यर्थः । "बृहन्महतोरुपसंख्यानम्" इति विभक्तेरुदात्तत्वम् । "वशिरण्योरप्युपसंख्यानम्" इति रणतेः शब्दार्थात् कर्मणि अप् प्रत्ययः । अरिष्यन्तः अविनश्यन्तः । अहिंसनाङ्गेतोरित्यर्थः । रुष रिष हिंसायाम् । "लक्षणहेत्वोः क्रियायाः" इति हेतौ शतृप्रत्ययः । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । सदैव सर्वदैव रक्षमाणाः आत्मानं पालयमानाः । रक्ष पालने इत्यस्माद् व्यत्ययेन आत्मनेपदम् । हेतौ शानच् । आत्मरक्षणाङ्गेतोरित्यर्थः । विस्कन्धदूषणम् । विस्कन्धः रक्षः[2]पिशाचादिकृतगतिप्रतिबन्धात्मकः[3] शरीरशोषणरूपो वा विघ्नः तस्य निवारकम् । विपूर्वात् स्कन्देर्धञि धत्वं छान्दसम् । दुष वैकृत्ये । अस्माद् ण्यन्तात् करणे त्युट् । "दोषो णौ" इति ऊत्वम् । जङ्गिडम् । जङ्गिडः वृक्षविशेषो वाराणस्यां प्रसिद्धः । तेन साधितं मणिं बिभृमो धारयामः । डुभृञ् धारणपोषणयोः । श्लौ "भृञामित्" इत्यभ्यासस्य इत्वम् ॥

द्वितीया ॥

जङ्गिडो जम्भाद् विशराद् विष्कन्धाद् अभिशोचनात् ।
मणिः सहस्वीर्यः परि णः पातु विश्वतः ॥ २ ॥

जङ्गिडः । जम्भात् । विशरात् । विस्कन्धात् । अभिशोचनात् ।
मणिः । सहस्वत्वीर्यः । परि । नः । पातु । विश्वतः ॥ २ ॥

जम्भात् हिंसकात् कृत्यादेः । यद्वा जम्भ इति दन्तविशेषस्य आ-

---

1 S′ Kd लक्षणाङ्गेतोः. 2 S′ Kd विस्कंधोस्कंधरक्षः° for विस्कन्धः रक्षः°. 3 S′ Kd °कशरीर°.

ख्या। राक्षसदन्तविशेषकृतात् खादनाद् इत्यर्थः। विशरात् शरीरविशरणात्। ॥शृ हिंसायाम् इत्यस्मात् "ऋदोरप्" ॥। विस्कन्धात् विघ्नात् रक्षःपिशाचादिकृताद् रोगादिरूपात् [अभिशोचनात् कृत्याकृताच्छोकात्] सहस्रवीर्यः अपरिमितसामर्थ्यो जङ्गिडः [जङ्गिड]वृक्षविकारो मणिः नः अस्मान् विश्वतः विश्वस्माद् उदीरिताज्जम्भादेः परि पातु परिरक्षतु। ॥"उपसर्गाद् बहुलम्" [इति] नसोपि णत्वम्। विश्वत इति। विश्वशब्दात् "पञ्चम्यास्तसिल्"। "लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वम् ॥॥

तृतीया ॥

अयं विष्कन्धं सहतेयं बाधते अत्त्रिणः।
अयं नो विश्वभेषजो जङ्गिडः पातंहसः ॥ ३ ॥

अयम्। विऽस्कन्धम्। सहते। अयम्। बाधते। अत्त्रिणः।
अयम्। नः। विश्वऽभेषजः। जङ्गिडः। पातु। अंहसः ॥ ३ ॥

अयं जङ्गिडो मणिः विस्कन्धम् परकृतं सहते। अभिभवतीत्यर्थः ॥ अयम् उक्तो मणिः अत्त्रिणः अत्तॄन् भक्षकान् कृत्यादीन् बाधते नाशयति। ॥अद भक्षणे इत्यस्माद् अदेस्त्रिनिश्च [उ० ४. ६८] इति त्रिनिप्रत्ययः ॥॥ अयं मणिः नः अस्माकं विश्वभेषजः विश्वेषां रोगादीनां निवर्तकः। यद्वा विश्वं कृत्स्नं भेषजं यस्मिन्। सकलौषधात्मक इत्यर्थः। ॥"बहुव्रीहौ विश्वं संज्ञायाम्" इति पूर्वपदान्तोदात्तत्वम् ॥। जङ्गिडो मणिः अंहसः पापात् पातु रक्षतु ॥

चतुर्थी ॥

देवैर्दत्तेन मणिना जङ्गिडेन मयोभुवा।
विष्कन्धं सर्वा रक्षाँसि व्यायामे सहामहे ॥ ४ ॥

देवैः। दत्तेन। मणिना। जङ्गिडेन। मयःभुवा।
विऽस्कन्धम्। सर्वा। रक्षाँसि। विऽआयामे। सहामहे ॥ ४ ॥

देवैः अद्भ्यादिभिर्दत्तेन । अनेन अमोघवीर्यत्वम् अस्योक्तम् । मयोभुवा । मय इति सुखनाम । तद् भवत्यस्माद् इति मयोभूः । "क्विप् च" इति क्विप् । यद्वा मयसः सुखस्य भावयिता उत्पादयिता । अन्तर्णीतण्यर्थाद् भवतेः क्विप् । तेन जङ्गिडेन उक्तेन मणिना । करणे तृतीया । विस्कन्धम् विघ्नं [तथा] तद्धेतुभूतानि सर्वा सर्वाणि रक्षांसि रक्षःशब्दोपलक्षितान् भूतप्रेतपिशाचादीन् व्यायामे संचरणे । निमित्तभूते सतीत्यर्थः । व्याङ्पूर्वाद् यमेर्भावे घञ् । "नोदात्तोपदेशस्य मान्तस्य०" इति वृद्धिप्रतिषेधो न भवति । अस्य अनुदात्तोपदेशत्वात् । यद्वा । व्यायच्छन्ति संचरन्ति अस्मिन्निति । अधिकरणे घञ् । संचरणप्रदेशे सहामहे अभिभवामः ॥

पञ्चमी ॥

शणश्च मा जङ्गिडश्च विष्कन्धादभि रक्षताम् ।
अरण्यादन्य आभृतः कृष्या अन्यो रसेभ्यः ॥ ५ ॥

शणः । च । मा । जङ्गिडः । च । विऽस्कन्धात् । अभि । रक्षताम् ।
अरण्यात् । अन्यः । आऽभृतः । कृष्याः । अन्यः । रसेभ्यः ॥ ५ ॥

शणः प्रसिद्धः मणिबन्धनसूत्रप्रकृतिभूतः । जङ्गिड उक्तः । चशब्दौ परस्परसमुच्चयार्थौ । तावुभौ विस्कन्धात् उक्ताद् मा माम् अभि रक्षताम् अभितः सर्वतः पालयताम् । तावेव दर्शयति । अन्यः तयोरेकः । जङ्गिड इत्यर्थः । अरण्यात् वनाद् आभृतः आहृतः । "हृग्रहोर्भश्छन्दसि" इति भत्वम् । अन्यः एकः शणः कृष्याः । कृषिः कर्षकव्यापारविशेषः । तस्मात् रसेभ्यः ओषधिसारभूतकाष्ठेभ्यः । आभृत इति संबन्धः । एवम् आनीतौ शणजङ्गिडौ विस्कन्धाद् रक्षताम् इति संबन्धः ॥

षष्ठी ॥

कृत्यादूषिरयं मणिरथो अरातिदूषिः ।

अथो सहस्वान् जङ्गिडः प्र ण आयूंषि तारिषत् ॥ ६ ॥

कृत्याऽदूषिः । अयम् । मणिः । अथो इति । अरातिऽदूषिः । अथो इति । सहस्वान् । जङ्गिडः । प्र । नः । आयूंषि । तारिषत् ॥ ६ ॥

मणेः प्रशंसापूर्वकम् अभिलषितफलसाधनत्वं प्रदर्श्यते । अयम् उक्तो मणिः कृत्यादूषिः । परकृताभिचारक्रियाजन्या पीडाकरी काचिच्छक्तिः कृत्या । तस्या निवारकः । दुषेर्ण्यन्ताद् अच इः [उ० ४. १३८] इति इकारप्रत्ययः ॥ अथो अपि च अरातिदूषिः । अरातयः शत्रवः । तेषां दूपकः ॥ अथो अपि च सहस्वान् सहः अभिभवनसाधनं बलम् अभिभवनं वा तद्वान् । "तसौ मत्वर्थे" इति सकारान्तस्य भत्वेन पदत्वाभावाद् रुत्वाभावः । एवंगुणविशिष्टो जङ्गिडः नः अस्माकम् आयूंषि प्र तारिषत् । प्रपूर्वस्तरतिर्वृद्ध्यर्थः । प्रवर्धयतु । प्र ण इति । "उपसर्गाद् बहुलम्" इति णत्वम् । तारिषदिति । तरतेः पञ्चमलकारे "सिब्बहुलं लेटि" इति सिप् । "सिब्बहुलं छन्दसि णिद् वक्तव्यः" इति सिपो णिद्भावाद् वृद्धिः । "लेटोडाटौ" इत्यडागमः । "इतश्च लोपः परस्मैपदेषु" इति इकारलोपः ॥

इति द्वितीयकाण्डे प्रथमेनुवाके चतुर्थं सूक्तम् ॥

"इन्द्र जुषस्व" इति सूक्तेन वलकामः इन्द्रं यजते उपतिष्ठते वा । यद् आह कौशिकः । "इन्द्र जुषस्वेतीन्द्रं बलकामः" इति [कौ० ७. १०] ॥

सोमाभिषवकाले अभिषवहोमेषु च अस्य विनियोगः । उक्तं वैताने । "इन्द्र जुषस्वेति राज्यभिषूयमाणेभिषवणहोमान् जुहोति" इति [वै० ३. ६] ॥

तथा षोडशिग्रहे इन्द्रोपस्थानेपि एतत् सूक्तम् । [उक्तं] वैताने । "षोडशिग्रहेष्विन्द्र जुषस्वेतीन्द्रम" इति [वै० ४. १] ॥

तथा "ऐन्द्रीं विजयबलपुष्टिपशुकामस्य परचक्रागमे च" इति [न० क० १७] विहितायां महाशान्तौ एतत् सूक्तं योजयेत् । उक्तं नक्षत्रकल्पे ।

---

१ R सहस्वां. We with A B $\overset{h}{B}$ D K $\overset{m}{S}$ V. २ A D R तार्षत्. We with $\overset{h}{B}$ K $\overset{m}{S}$ V.

"अथावापिकाः शान्तयः" इति प्रक्रम्य "इन्द्र जुषस्वेत्यैन्द्र्याम्" इति [न० क० १८] ॥

तत्र प्रथमा ॥

इन्द्र॑ जुषस्व॒ प्र व॒हा या॑हि शू॒र॒ हरि॑भ्याम् ।
पिबा॑ सु॒तस्य॑ म॒तेरि॒ह मधो॑श्चकानश्चारु॒र्मदा॑य ॥ १ ॥

इन्द्र॑ । जु॒षस्व॑ । प्र । व॒ह॒ । आ । या॒हि॒ । शू॒र॒ । हरि॑ऽभ्याम् ।
पिब॑ । सु॒तस्य॑ । म॒तेः । इ॒ह । मधोः॑ । च॒कानः॑ । चारुः॑ । मदा॑य ॥ १ ॥

हे इन्द्र परमैश्वर्ययुक्त जुषस्व प्रीयस्व । ☒ जुषी प्रीतिसेवनयोः ☒ ॥ प्र वह प्रकृष्टम् अभिलषितं फलं प्रापय ॥ हे शूर शौर्ययुक्त हरिभ्याम् एतन्नामकाभ्याम् अश्वाभ्याम् । ☒ हरी इन्द्रस्य इति हि यास्कः [निघ० १. १५] ☒ । ताभ्याम् आ याहि अस्मदीयं यज्ञं प्रति आगच्छ ॥ आगत्य इह अस्मिन् यज्ञे सुतस्य अभिषुतस्य मतेः । ☒ कर्मणि क्तिन् ☒ । मननीयस्य । प्रशस्यस्येत्यर्थः । यद्वा । मतिरिति मेधाविनाम । तत्संबन्धिन इत्यर्थः । मधोः मधुररसस्य सोमस्य । भागम् इति शेषः । यद्वा ☒ "क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानसंज्ञायां "चतुर्थ्यर्थे बहुलं छन्दसि" इति षष्ठी ☒ । उक्तविधं सोमं पिब । ☒ "ह्यचोतस्तिङः" इति सांहितिको दीर्घः ☒ ॥ एवं पीतः सोमः चकानः । ☒ चक तृप्तौ इति धातोः शानच् । छान्दसः शपो लुक् ☒ । तर्पयन्नित्यर्थः । यद्वा । ☒ कै गै रै शब्दे इत्यस्मात् कर्मणि लिटः कानच् ☒ । स्तूयमानः चारुः दशापवित्रेण शोधितत्वान्निर्मलः मदाय मदोत्पत्तये । भवतु इति शेषः । ☒ "मदोऽनुपसर्गे" इति भावे अप् प्रत्ययः ☒ ॥

द्वितीया ॥

इन्द्र॑ ज॒ठरं॑ न॒व्यो न पृ॒णस्व॒ मधो॑र्दि॒वो न ।

---

1 S′ Kd तत्तत्संवं°.

अस्य सुतस्य स्व१र्णोप त्वा मदाः सुवाचो अगुः ॥ २ ॥

इन्द्र। जठरम्। नव्यः। न। पृणस्व। मधोः। दिवः। न।
अस्य। सुतस्य। स्वः। न। उप। त्वा। मदाः। सुऽवाचः। अगुः ॥ २ ॥

हे इन्द्र नव्यो न नूतन इव। ॥ "वस्वप्स्वौककविक्षेमवर्चोनिष्केवलोक्थजनपूर्वनवसूरमर्तयविष्ठेभ्यो यत्" इति नवशब्दात् स्वार्थे यत् प्रत्ययः। उपमानोत्तरस्थो नञ् उपमार्थे वर्तते। दुर्मदासो न सुरायाम् [ऋ० ८. २. १२] इत्युपमार्थीय उपरिष्टाद् उपचारस्तस्य येनोपमिमीते इति [नि० १. ४] यास्कवचनात्॥। अनेन आदरातिशय उक्तः। मधोः मधुररसस्य सोमस्य भागेन जठरम् स्वोदरकुहरं पृणस्व पूरय। ॥ पृण प्रीणने। तौदादिकः। अत्र पूरणकर्मा॥। तत्र दृष्टान्तः। दिवो न दिवः स्वर्गस्य संबन्धिना अमृतेनेव ॥ ततश्च सुतस्य अभिषुतस्य अस्य सोमस्य सुवाचः स्तुतिरूपा मन्त्रात्मिकाः शोभना वाचो येषां तथाविधा मदाः मदकरा रसाः स्वर्णं स्वर्गं यथा तथा अत्रापि त्वा त्वाम् उपागुः उपगच्छन्तु। ॥ एतेश्छान्दसे लुङि "इणो गा लुङि" इति गादेशः॥ ॥

तृतीया ॥

इन्द्रस्तुराषाण्मित्रो वृत्रं यो जघान यतीर्न।
बिभेद वलं भृगुर्न ससहे शत्रून् मदे सोमस्य ॥ ३ ॥

इन्द्रः। तुराषाट्। मित्रः। वृत्रम्। यः। जघान। यतीः। न।
बिभेद। वलम्। भृगुः। न। ससहे। शत्रून्। मदे। सोमस्य ॥ ३ ॥

तुराषाट् [तुरं] तूर्णं सहते अभिभवति शत्रून् इति तुराषाट्। ॥ "छन्दसि सहः" इति सहेर्ण्विप्रत्ययः। "सहेः साडः सः" इति षत्वम्॥। मित्रः सर्वप्राणिमित्रभूतो य इन्द्रः वृत्रम् एतन्नामानं त्वाष्ट्रम्

---

१ D R S^{m} °र्णोप. We with A B B^{p} B^{h} K V. २ R वलं. We with A B^{h} D K S^{m} V.

---

1 S′ Kd वस्वप्स्वोककविक्षेमवर्चोनिष्केवलोक्थजन°.

असुरम् आवारकं मेघं वा जघान हतवान् । ॥उक्तं हि यास्केन। तत् को वृत्रो मेघ इति नैरुक्ताख्याष्ट्रोसुर इत्यैतिहासिकाः [नि°२.१६] इति ॥ । तत्र दृष्टान्तः । यतीर्न यतयो नाम नियमनशीला आसुर्यः प्रजाः । ता इव । यद्वा अत्र यतिशब्देन वेदान्तार्थविचारशून्याः परिव्राजका विवक्षिताः । तानिव । [1]तथा च कौषीतकोपनिषदि इन्द्रवाक्यम् । "त्रिशीर्षाणं त्वाष्ट्रम् अहनम् अरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छम्" इति [कौ°उ°३.१] । [3]तथा भृगुर्न भृगुरिव [4]वलम् अङ्गिरसां सत्त्रम् आसीनानां यज्ञसाधनभूता गा अपहृत्य स्थितं [4]वलनामानम् असुरं बिभेद विदारितवान् ॥ एतत् सर्वं सामर्थ्यं सोमपानप्रभावनिबन्धनम् इत्याह ससहे शत्रून् इति । सोमस्य पीतस्य मदे सति शत्रून् उदीरितान् ससहे अभिभूतवान् । ॥एत्वाभ्यासलोपाभावश्छान्दसः॥ ॥

चतुर्थी ॥

आ त्वा विशन्तु सुतासः इन्द्र पृणस्व कुक्षी विड्ढि[1] शक्र धियेह्या नः ।
श्रुधी हवं गिरो मे जुषस्वेन्द्र स्वयुग्भिर्मत्स्वेह महे रणाय ॥ ४ ॥

आ । त्वा । विशन्तु । सुतासः । इन्द्र । पृणस्व । कुक्षी इति । विड्ढि । शक्र । धिया । आ । इहि । आ । नः ।
श्रुधि । हवम् । गिरः । मे । जुषस्व । आ । इन्द्र । स्वयुक्ऽभिः । मत्स्व । इह । महे । रणाय ॥ ४ ॥

हे इन्द्र सुतासः सुता अभिषुताः सोमाः । ॥"आज्जसेरसुक्" ॥ । त्वा त्वाम् आ विशन्तु प्रविशन्तु ॥ तैराविष्टैः सोमैः कुक्षी दक्षिणोत्तरकुक्षिद्वयं पृणस्व पूरय ॥ वृंड्ढि वर्धय च । ॥वृहेर्वृद्ध्यर्थात् लोटि छान्दसः शपो लुक् । हेर्ध्यादेशे ढत्वष्टुत्वजश्त्वानि ॥ ॥ हे शक्र

---

१ ABB[h]DRS[m]PP[2]J. विड्ढि.

---

1 S′Kd यथा for तथा. 2 So S′Kd. 3 So S′Kd. The sentence which began with य इन्द्रः being incomplete, we should read स for तथा, or read इन्द्रः before तुराषाट् and सर्वप्राणिभूतश्च भवति । for सर्वप्राणिभूतो. 4 S′Kd वल°.

नः अस्माकं धिया । धीरिति कर्मनाम । कर्मणा आवाहनस्तुत्यादिरूपेण एहि आगच्छ । यद्वा धिया अनुग्रहबुद्ध्या नः अस्मान् अभिलक्ष्य आगच्छ ॥ हवम् अस्मदीयम् आह्वानं श्रुधि शृणु । ह्वेञो "भावेनुपसर्गस्य" इति अप् संप्रसारणं च । श्रुधीति । श्रु श्रवणे । विकरणप्रत्ययस्य लुक् । "श्रुशृणुपृकृवृभ्यश्छन्दसि" इति हेर्धिरादेशः । "अन्येषाम् अपि दृश्यते" इति सांहितिको दीर्घः ॥ तथा मे मदीया गिरः स्तुतिरूपा वाचः जुषस्व सेवस्व । स्वीकुर्वित्यर्थः । यद्वा मम गिरः श्रुत्वा प्रीतो भव ॥ ततः हे इन्द्र इह अस्मिन् यज्ञे स्वयुग्भिः स्वसखिभूतैर्मरुदादिभिर्देवैः सह मत्स्व सोमपानेन तृप्तो भव । मदी हर्षे । व्यत्ययेन आत्मनेपदम् । छान्दसो विकरणस्य लुक् । किमर्थम् । महे महते रणाय रमणीयाय कर्मणे । कर्मफलसिद्धय इत्यर्थः ॥

पञ्चमी ॥

इन्द्रस्य नु प्रा वोचं वीर्याणि यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम् ॥ ५ ॥

इन्द्रस्य । नु । प्र । वोचम् । वीर्याणि । यानि । चकार । प्रथमानि । वज्री । अहन् । अहिम् । अनु । अपः । ततर्द । प्र । वक्षणाः । अभिनत् । पर्वतानाम् ॥ ५ ॥

इन्द्रस्य वीर्याणि वीरकर्माणि नु क्षिप्रं प्रा वोचम् ब्रवीमि । छान्दसो लुङ् । "अस्यतिवक्तिख्यातिभ्योऽङ्" इति च्लेः अङ् आदेशः । वज्री वज्रवान् प्रथमानि आदिभूतानि प्रथितानि वा । प्रथ प्रख्याने इत्यस्मात् प्रथेरमच् [उ० ५. ६८] इति अमच् प्रत्ययः । यानि वीर्याणि चकार कृतवान् । "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधे "लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वम् ॥ कानि पुनस्तानीति तत्राह । अहिम् । आहननात् अहिः वृत्रोसुरो मेघो वा । आङि

---

१ A B^{h} D R S K S^{m} V have प्रा, and not प्र.

---

1 S′ Kd °पूर्वपदस्यो° for °पूर्वस्य उ°.

श्रिहनिभ्यां ह्रस्वश्च [उ० ४. १३७] इति डित् इण् प्रत्ययः ॥ । तम् अहन् हतवान् । ॥ हन्तेर्लङि शपो लुकि "हल्ङ्यादि०"-लोपे रूपम् । पादादित्वान्निघाताभावाद् अडागमस्य उदात्तत्वम् ॥ ॥ अनु तदनन्तरम् अपः तेन वृत्रेण निरुद्धानि उदकानि ततर्द जिहिंस विदारितवान् । मार्गप्रदानेन निःसारितवान् इत्यर्थः । ॥ उनृदिर् हिंसानादरयोः इति धातुः । अप इति । "ऊडिदम्०" इत्यादिना शस उदात्तत्वम् ॥ ॥ पर्वतानाम् शिलोच्चयानां संबन्धिनीः वक्षणाः । नदीनामैतत् । वहन्ति कूलानीति वक्षणा नद्यः । ताः प्राभिनत् विदारितवान् ॥

षष्ठी ॥

अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः ॥ ६ ॥

अहन् । अहिम् । पर्वते । शिश्रियाणम् । त्वष्टा । अस्मै । वज्रम् । स्वर्यम् । ततक्ष ।
वाश्राःइव । धेनवः । स्यन्दमानाः । अञ्जः । समुद्रम् । अव । जग्मुः । आपः ॥ ६ ॥

पर्वते शिलोच्चये पर्ववान् पर्वतो मेघस्तस्मिन् वा शिश्रियाणम् श्रितम् । ॥ श्रयतेः कानच् । चित्त्वाद् अन्तोदात्तत्वम् ॥ । अहिम् वृत्रं मेघम् असुरं वा अहन् जघान ॥ त्वष्टा वृत्रस्य पिता अस्मै इन्द्राय स्वर्यम् सुष्ठु प्रेरणीयम् उपतापकरणं वा वज्रम् आयुधं ततक्ष तीक्ष्णं चकार । ॥ तक्षू त्वक्षू तनूकरणे ॥ । "तस्मै त्वष्टा वज्रम् असिञ्चत्" इत्यादि तैत्तिरीयकम् [तै० सं० २. ४. १२. २] । यद्वा अस्मै वृत्राय । ॥ "क्रियार्थोपपदस्य [च] कर्मणि स्थानिनः" इति कर्मणि चतुर्थी ॥ । वृत्रं हन्तुम् इत्यर्थः । ॥ स्वर्यम् इति । सुपूर्वाद् अर्तेः स्वृ शब्दोपतापयोः इत्यस्माद् वा "ऋहलोर्ण्यत्" । "संज्ञापूर्वको विधिरनित्यः" इति वृद्ध्यभावः । अत एव व्युत्पत्त्यनवधारणाद् अनवग्रहः ॥ ॥ वाश्राः शब्दायमाना धेनव इव । ॥ वाशृ शब्दे इत्यस्मात् स्फायितञ्चीत्यादिना [उ० २. १३.] रक् ॥ । स्यन्दमानाः प्रवहन्त्यः । ॥ स्यन्दू

प्रस्रवणे । अस्मात् लटः शानच् । "॰अदुपदेशाल्लसार्वधातुक॰" [इति] अनुदात्तत्वे धातुस्वरः ॥ । तथाविधा आपः अञ्जः अञ्जसा अन्यैर-निरुद्धाः समुद्रम् सरित्पतिम् अव जग्मुः अवाञ्चुखाः सत्यः प्रापुः ॥

सप्तमी ॥

वृषायमाणो अवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥ ७ ॥

वृषऽयमाणः । अवृणीत । सोमम् । त्रिऽकद्रुकेषु । अपिबत् । सुतस्य ।
आ । सायकम् । मघऽवा । अदत्त । वज्रम् । अहन् । एनम् । प्रथ-मऽजाम् । अहीनाम् ॥ ७ ॥

वृषायमाणः वृषेव आचरन्निन्द्रः सोमम् सोमात्मकं प्रशस्तम् अन्नम् अवृणीत । ॥ वृङ् संभक्तौ ॥ । प्रजापतेः स्रष्टुः सकाशाद् वृतवान् । ॥ वृषशब्दात् "कर्तुः क्यङ् सलोपश्च" इति आचारार्थे क्यङ् । "अकृत्सार्वधातुकयोः॰" इति दीर्घः ॥ ॥ अनन्तरं त्रिकद्रुकेषु पूर्वम् अभिसवत्र्यहं त्रिकद्रुकशब्देन उच्यते । तद् उक्तम् आपस्तम्बेन "ज्योतिर्गौरायुरिति त्रिकद्रुकाः" इति । त्रयः सन्तः कद्रूवन्ति कुटिलम् आवर्तन्ते संवत्सरसत्त्र इति त्रिकद्रुकाः । तेषु सोमयागेषु सुतस्य । ॥ कर्मणि षष्ठी ॥ । अभिषुतं सोमम् अपिबत् ॥ पीत्वा लब्धबलः सन् मघवा इन्द्रः सायकम् । ॥ षो अन्तकर्मणि । अस्मात् ण्वुल् ॥ । शत्रूणां घातकं वज्रम् आदत्त अगृह्णात् । ॥ "आङो दोऽनास्यविहरणे" इत्यात्मनेपदम् ॥ ॥ ततः अहीनाम् आहन्तॄणाम् असुराणां प्रथमजाम् प्रथमजातम् एनम् वृत्रम् अहन् हतवान् । ॥ एनम् इति । अन्वादेशे एनादेशोनुदात्तः । प्रथमजाम् इति । प्रथमं जायत इति प्रथमजाः । "जनसनखनक्रमगमो विट्" इति विट् । "विड्वनोरनुनासिकस्यात्" इत्यात्त्वम् ॥ ॥

इति प्रथमेनुवाके पञ्चमं सूक्तम् ॥

---

१ **R K S V** omit अ॰. We with **A** $\overset{h}{\mathbf{B}}$ **D** $\overset{m}{\mathbf{S}}$ and **R**w.

इति सायणाचार्यविरचिते अथर्वसंहिताभाष्ये द्वितीयकाण्डे प्रथमोनुवाकः ।

द्वितीयेनुवाके पञ्च सूक्तानि । तत्र "समास्त्वाग्ने" इति प्रथमं सूक्तम् । अनेन संपत्कामः अग्नेर्यागम् उपस्थानं वा कुर्यात् । "समास्त्वाग्ने [२.६] अभ्यर्चत [७.८२] इत्यग्निं संपत्कामः" इति [कौ०७.१०] कौशिकसूत्रात् ॥

तथा भूतरोगचोरादिभयेन दारुणे संवत्सरे सति तच्छान्तये अनेन सूक्तेन आज्यं जुहुयात् । तथा च सूत्रम् । "अथ यत्रैतत् समा दारुणा भवन्ति[1]" इति प्रक्रम्य "समास्त्वाग्न इत्येतेन सूक्तेन जुहुयात् सा तत्र प्रायश्चित्तिः" इति [कौ० १३.१०] ॥

तथा अग्निचयने प्राजापत्ये पशौ सामिधेनीकाले ब्रह्मा एतत् सूक्तं जपेत् । "समास्त्वाग्न इति जपति" इति [वै० ५.१] वैतानसूत्रात् ॥

तथा "आग्नेयीम् अग्निभये सर्वकामस्य च" इति [न० क० १७] विहितायाम् आग्नेय्यां महाशान्तौ एतत् सूक्तं योजयेत् । तद् उक्तं नक्षत्रकल्पे । "समास्त्वाग्नेभ्यर्चतेत्याग्नेय्याम्" इति [न० क० १८] ॥

राज्ञो रात्रौ आरात्रिकविधाने "अति निहः" [२.६.५] इत्यनया दीपं प्रज्वालयेत् । उक्तं परिशिष्टे ।

कृत्वा पिष्टमयं दीपं सुवर्तिस्नेहसंभवम् ।
अति निहः प्रान्यान्[2] इति द्वाभ्यामेनं[3] प्रदीपयेत् । इति [प० ७.२] ॥

तत्र प्रथमा ॥

समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशश्चतस्रः ॥ १ ॥

समाः । त्वा । अग्ने । ऋतवः । वर्धयन्तु । सम्ऽवत्सराः । ऋषयः । यानि । सत्या ।

---

1 S' Kd भवंति. 2 S' Kd प्राच्यानिति for प्रान्यान् इति. 3 S' Kd °मेवं.

सम्। दिव्येन। दीदिहि। रोचनेन। विश्वाः। आ। भाहि। प्रऽदिशः। चतस्रः॥ १॥

हे अग्ने समाः संवत्सरास्त्वा त्वां वर्धयन्तु। ऋतवश्च त्वां वर्धयन्तु। पुनः संवत्सरशब्देन मासार्धमासदिवसरूपाः तदवयवाश्च त्वां वर्धयन्तु। ऋषयः प्रसिद्धा वसिष्ठप्रभृतयः। यानि अन्यानि च सत्या सत्यानि पृथिव्यादीनि तानि च त्वां वर्धयन्तु। "शेश्छन्दसि बहुलम्" इति शेर्लोपः[1]॥ स त्वं तैर्वर्धितो दिव्येन द्युलोकार्हेण आत्मीयेन। "छन्दसि च" इति यः। रोचनेन रोचमानेन वपुषा। रुच दीप्तौ इत्यस्माद् "अनुदात्तेतश्च हलादेः" इति युच्। सं दीदिहि सम्यग् दीव्य दीप्यस्व वा। दीव्यतेः "बहुलं छन्दसि" इति शपः श्लुः। "तुजादीनाम्॰" इत्यभ्यासस्य दीर्घत्वम्। "लोपो व्योर्वलि" इति लोपः। धात्वन्तरं वा दीदेतिश्छान्दसो दीप्तिकर्मा॥ तथा दीप्तश्च त्वं विश्वाः सर्वाश्चतस्रः प्रदिशः प्रकृष्टाः प्राच्याद्या महादिशः आ भाहि प्रकाशय। प्रदिशां प्रकाशने किं पुनर्विदिशाम्[2] इत्यष्टानामपि दिशां प्रकाशलाभः॥

द्वितीया॥

सं चेध्यस्वाग्ने प्र च वर्धयेममुच्च तिष्ठ महते सौभगाय।
मा ते रिषन्नुपसत्तारो अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये॥ २॥

सम्। च। इध्यस्व। अग्ने। प्र। च। वर्धय। इमम्। उत्। च। तिष्ठ। महते। सौभगाय।
मा। ते। रिषन्। उपऽसत्तारः। अग्ने। ब्रह्माणः। ते। यशसः। सन्तु। मा। अन्ये॥ २॥

हे अग्ने समिध्यस्व च स्वयमेव समिद्धो भव। इन्धी दीप्तौ। कर्मकर्तरि यकि "अनिदिताम्॰" इति नलोपः॥ इमम् यजमानं [प्र] वर्धय च समृद्धकामं कुरु। "चवायोगे प्रथमा" इति इ-

1 S′Kd insert लुक् after °लोपः. 2 S′Kd °दिशानामित्य°.

ध्यस्वेति प्रथमा तिङ् विभक्तिर्न निहन्यते ॥ उत्तिष्ठ च उत्साहवान् भव । "उदोनूर्ध्वकर्मणि" इत्यात्मनेपदं व्यत्ययेन न प्रवर्तते । "उद ईहायाम्" इति वचनाद् अनीहाविषयो वा द्रष्टव्यः । यद्वा ऊर्ध्वं उच्छ्रितो भव । ततश्च ऊर्ध्वकर्मत्वाद् आत्मनेपदाभावः । किमर्थम् । महते सौभगाय सुश्रीकत्वाय । यजमानस्येति शेषः । "वृहन्महतोरुपसंख्यानम्" इति महतो विभक्तेरुदात्तत्वम् । उङ्गात्रादिषु "सुभग मन्त्रे" इति पाठाद् अञ् । "सुभगस्य मन्त्र उत्तरपदवृद्धिर्नेष्यते" इति भगान्तलक्षणवृद्ध्यभावः ॥ हे अग्ने इदं चाप्यस्तु । [ते] तव उपसत्तारः उपसदनकर्तारः परिचारका ऋत्विग्यजमाना मा रिषन् मा विनश्यन्तु सम्यक् कर्मणि वर्तन्ताम् । रिष हिंसायाम् । अस्माद् व्यत्ययेन ङेः अङ् आदेशः । सदेस्तृचि कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ अपि च ब्रह्माणः ब्राह्मणाः ते त्वदीया ऋत्विग्यजमानाः त्वत्परिचरणे वर्तमाना यशसः सन्तु यशस्विनो भवन्तु । अन्ये ये त्वत्परिचरणपराङ्मुखास्त्वदीया न भवन्ति ते मा भूवन् । यशस्विन इत्यनुषङ्गः । यशःशब्दात् "तत्करोति°" इति णिच् । तदन्ताद् असुनि णिलोपे उदात्तनिवृत्तिस्वरेण असुन उदात्तत्वम् ॥

तृतीया ॥

त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः ।
सपत्नहाग्ने अभिमातिजिद् भव स्वे गये जागृह्यप्रयुच्छन् ॥ ३ ॥

त्वाम् । अग्ने । वृणते । ब्राह्मणाः । इमे । शिवः । अग्ने । सम्ऽवरणे ।
भव । नः ।
सपत्नऽहा । अग्ने । अभिमातिऽजित् । भव । स्वे । गये । जागृहि । अप्रऽयुच्छन् ॥ ३ ॥

हे अग्ने इमे ब्राह्मणाः ऋत्विग्यजमानास्त्वां वृणते संभजन्ते आराधयन्ति ॥ तस्मात् नः अस्माकं संभाव्यमानप्रमादानां शिवः शान्तो भूत्वा

---

1 S′Kd इयं for इदं. 2 S′Kd संभाव्यमानः प्र°.

संवरणे भव विद्यमानस्यापि प्रमादस्य संछादने वर्तस्व । मा तत्प्रकाशनेन क्रोधं कार्षीरित्यर्थः । "द्यचोतस्तिङः" इति भवशब्दस्य सांहितिको दीर्घः ॥ किं च हे अग्ने सपत्नहा अस्मदीयानां शत्रूणां हन्ता अभिमातिजित् । अभिमातिः पाप्मा । श्रूयते हि । "पाप्मा वा अभिमातिः" इति [तै० सं० २. १. ३. ५] । तस्य जेता भव ॥ स्वे आत्मीये [गये] । गृहनामैतत् । गृहे अप्रयुच्छन् अप्रमाद्यन् । युछ प्रमादे । जागृहि प्रबुध्यस्व । आदरवान् वर्तस्व ॥

चतुर्थी ॥

क्षत्रेणाग्ने स्वेन सं रभस्व मित्रेणाग्ने मित्रधा यतस्व ।
सजातानां मध्यमेष्ठा राज्ञामग्ने विहव्यो दीदिहीह ॥ ४ ॥

क्षत्रेण । अग्ने । स्वेन । सम् । रभस्व । मित्रेण । अग्ने । मित्रऽधा । यतस्व ।
सऽजातानाम् । मध्यमेऽस्थाः । राज्ञाम् । अग्ने । विऽहव्यः । दीदिहि ।
इह ॥ ४ ॥

हे अग्ने स्वेन आत्मीयेन क्षत्रेण । बलनामैतत् । बलेन सं रभस्व संरब्धो भव । संगतो भवेत्यर्थः । रभ राभस्ये ॥ किं च हे अग्ने मित्रधाः मित्राणां पोषकः । मित्रशब्दोपपदाद् धाञो विचि रूपम् । मित्रेण मित्रभावेन यतस्व उपकरोमीत्येव वर्तस्व मा उदासिष्ठाः । यती प्रयत्ने ॥ अपि च सजातानाम् समानं जातानां ब्राह्मणानाम् । प्रजापतिमुखाद् उत्पन्नत्वाद् अग्नेर्ब्राह्मणानां च सजातत्वम् । मध्यमेष्ठाः । मध्यमेव मध्यमम् । स्वार्थे "मध्यान्मः" । तत्र स्थाता । यद्वा सजातानां मध्ये भवो मध्यमः यजमानः । तेषाम् उपजीव्यः । तत्र सदा स्थाता । तिष्ठतेर्विच् । "तत्पुरुषे कृति बहुलम्" इत्यलुक् । सुषामादित्वात् षत्वम् । राज्ञाम् क्षत्रियाणामपि विहव्यः विहवेषु भवः । विविधं हूयन्ते आहूयन्ते देवा एष्विति विहवा यज्ञाः । "ह्वः संप्रसारणं च न्यभ्युपविषु" इति अप् संप्रसारणं च । ततो "भवे छन्दसि" इति यत् । यद्वा वि-

विधानि हव्यानि चरुपुरोडाशादीनि हवींषि यस्य स तथोक्तः । ॥ अस्मिन् पक्षे छान्दसम् अन्तस्वरितत्वम् ॥ । हे अग्ने एवंभूतस्त्वम् इह अस्मिन् कर्मणि दीदिहि दीप्यस्व । ॥ दीदेतिर्व्याख्यातम् ॥ ॥

पञ्चमी ॥

अति निहो अति सृधोत्यचित्तीरति द्विषः ।
विश्वा ह्यग्ने दुरिता तर त्वमथास्मभ्यं सहवीरं रयिं दाः ॥ ५ ॥

अति । निहः । अति । सृधः । अति । अचित्तीः । अति । द्विषः ।
विश्वा । हि । अग्ने । दुःऽइता । तर । त्वम् । अथ । अस्मभ्यम् । सहऽवीरम् । रयिम् । दाः ॥ ५ ॥

निहः निहन्तॄन् विषयजान् दोषान् । ॥ हन्तेः क्विपि टिलोपश्छान्दसः ॥ । यद्वा निकृष्टा गतीः श्वशूकरादियोनिप्राप्तिरूपाः । ॥ ओहाङ् गतौ । क्विबन्तात् शसि "आतो धातोः" इत्याकारलोपः । उदात्तनिवृत्तिस्वरो व्यत्ययेन न प्रवर्तते ॥ । तान् अति । तरेति संबन्धः । ॥ स चान्तर्णीतण्यर्थः ॥ । अतितारय । तद्धेतुभूतपापजालविनाशनेन तदपि विनाशयेत्यर्थः । [स्रिधः ।] ॥ स्रेधतिः शोषणकर्मा छान्दसः । ततः क्विप् ॥ । देहशोषकान् रोगान् अतितारय । अचित्तीः अशोभनबुद्धीः पापप्रवणा अतितारय । द्विषः द्वेष्टॄन् शत्रूंश्च अतितारय । हिशब्दः समुच्चयार्थः । किं बहुना । हे अग्ने त्वं विश्वा विश्वान्यपि [दुरिता] दुरितानि दुर्गतानि अति तर अतितारय ॥ अथ अनन्तरम् अस्मभ्यं सहवीरम् पुत्रपौत्रादिसहितं रयिम् धनं दाः देहि । ॥ छान्दसे लुङि "गातिस्थाघुपा°" इति सिचो लुक् । "बहुलं छन्दस्यमाङ्योगेपि" इति अडभावः । "तेन सहेति तुल्ययोगे" इति तुल्यक्रियायोगे बहुव्रीहौ "वोपसर्जनस्य" इति सहस्य सभावो विकल्पितत्वात् न प्रवर्त-

---

१ $\overset{h}{\mathbf{B}}\overset{3}{\mathbf{P}}\mathbf{J}\,\mathbf{V}$ स्रिधो°. We with **A D K R** $\overset{m}{\mathbf{S}}$ **P**. २ $\overset{h}{\mathbf{B}}\,\mathbf{K}\,\mathbf{V}$ तर्. We with **A D R** $\overset{m}{\mathbf{S}}$ $\overset{2}{\mathbf{P}}\,\mathbf{J}$. ३ $\mathbf{J}\,\overset{2}{\mathbf{P}}$ स्रिधः. We with **P K**. ४ $\mathbf{P}\,\overset{3}{\mathbf{P}}\,\mathbf{J}\,\mathbf{K}$ विश्वाः. We with Sâyaṇa. ५ So we with $\mathbf{P}\,\overset{2}{\mathbf{P}}\,\mathbf{J}$.

ते। "एवमादीनाम् अन्तः" [फि०४.१४] इति सहशब्दः अन्तोदात्तः ॥

[इति] द्वितीयेनुवाके प्रथमं सूक्तम् ॥

"अघद्विष्टा" इति सूक्तेन लौकिकवैदिकाक्रोशयोर्ब्राह्मणशापे क्रूरचक्षुः-पुरुषदृष्टिनिपाते पिशाचयक्षादिभये च यवमणिं संपात्य अभिमन्त्र्य बध्नीयात्। सूत्रितं हि। "अघद्विष्टा[२.७] शं नो देवी[२.२५] वरणः [६.८५]" इति प्रक्रम्य "प्रथमेन मन्त्रोक्तं बध्नाति" इति [कौ०४.२]॥

"भार्गवीं नक्षत्रग्रहोपसृष्टभयार्तरोगगृहीतानाम्" इति [न०क०१७] विहितायां भार्गव्यां महाशान्तौ सहस्रकाण्डमणिवन्धनेपि एतत् सूक्तम्। उक्तं नक्षत्रकल्पे "अघद्विष्टा देवजातेति सहस्रकाण्डं भार्गव्याम्" इति [न०क०१९] ॥

तत्र प्रथमा ॥

अघद्विष्टा देवजाता वीरुच्छपथयोपनी।
आपो मलमिव प्राणैक्षीत् सर्वान् मच्छपथाँ अधि ॥ १ ॥

अघऽद्विष्टा। देवऽजाता। वीरुत्। शपथऽयोपनी।
आपः। मलम्ऽइव। प्र। अनैक्षीत्। सर्वान्। मत्। शपथान्। अधि॥ १ ॥

अघद्विष्टा अघस्य पिशाचरक्षःप्रभृतिजनितस्य पापस्य द्वेषिणी विनाशयित्री। द्विष अप्रीतौ इत्यस्मात् कर्तरि क्तः। देवजाता देवैर्निर्मिता देवार्थं वा उत्पन्ना शपथयोपनी लौकिकस्य वैदिकस्य च ब्राह्मणादिकृतस्य शापस्य विमोहनी निवारयित्री। युप रुप विमोहने। अस्मात् करणे ल्युट्। एवंविधा वीरुत् विरोधनशीला[1] दूर्वा यवो वा। सर्वान् उक्तविधान् [शपथान्] शापान् मत् मत्तः। अधिः पञ्चम्यर्थानुवादी। "अधिपरी अनर्थकौ" इत्यनर्थको वा। प्रा-णैक्षीत् प्रकर्षेण प्रक्षालयतु। तज्जनितम् अरिष्टम् अस्मत्तो निःशेषं वियोजयतु इत्यर्थः। णिजिर् शौचपोषणयोः। अस्माच्छान्दसे लुङि "इरितो वा" इत्यङभावे सिचि रूपम्। "उपसर्गाद् असमासेपि णो-

1 S′Kd °शीलाः दुर्वा for °शीला दूर्वा. The emendation is conjectural.

पदेशस्य" इति णत्वम् । तत्र दृष्टान्तः । आपो मलमिव । यथा आपः शरीरादिगतं मलं स्वेदपङ्कादिरूपं प्रक्षालयन्ति ॥

द्वितीया ॥

यश्च सापत्नः शपथो जाम्याः शपथश्च यः ।
ब्रह्मा यन्मन्युतः शपात् सर्वं तन्नो अधस्पदम् ॥ २ ॥
यः । च । सापत्नः । शपथः । जाम्याः । शपथः । च । यः ।
ब्रह्मा । यत् । मन्युतः । शपात् । सर्वम् । तत् । नः । अधःऽपदम् ॥ २ ॥

उक्तान् शपथान् विशेषतो दर्शयति । सापत्नः सपत्नो द्वेष्यो द्वेष्टा च । "व्यन्सपत्ने" इति सूत्रेनुवादात् । सपत्नीव सपत्न इति इवार्थे अकारप्रत्ययान्तो निपातितः । तत्संबन्धी यश्च आक्रोशादिरूपः शपथः । जाम्याः जामिः सहोत्पन्ना भगिनी । न जामये भगिन्यै जामिरन्येस्यां जनयन्तीति हि यास्कः [नि° ३. ६] । तस्याश्च यः शपथः । जामिशब्दः सहजातानाम् उपलक्षणम् । "उदात्तयणो हल्पूर्वात्" इति जामिशब्दात् पञ्च्या उदात्तत्वम् । ब्रह्मा ब्राह्मणः मन्युतः क्रोधात् यत् शपात् शपेत् । यद् इति । क्रियाविशेषणत्वान्नपुंसकत्वम् । शप आक्रोशे । "लेटोडाटौ" इत्याडागमः । सर्वम् तत् उक्तं त्रिविधं शपथजातं नः अस्माकम् अधस्पदम् पादस्याधस्तात् । अस्मदसंस्पृष्टं भवतु इत्यर्थः । "अधःशिरसी पदे" इति विसर्जनीयस्य सत्वम् ॥

तृतीया ॥

दिवो मूलमवततं पृथिव्या अध्युत्ततम् ।
तेन सहस्रकाण्डेन परि णः पाहि विश्वतः ॥ ३ ॥
दिवः । मूलम् । अवऽततम् । पृथिव्याः । अधि । उत्ऽततम् ।
तेन । सहस्रऽकाण्डेन । परि । नः । पाहि । विश्वतः ॥ ३ ॥

---

१ S[m] °स्पदाम्. We with A B B[h] D R P P[2] J V.

दिवः द्युलोकात् अवततम् अवाङ्मुखं प्रसृतं मूलम् मूलवद् अवस्थितम्। पृथिव्याः। अधिरुपर्यर्थः। पृथिव्या उपरि उत्ततम् ऊर्ध्वम् उन्नतं वा विस्तृतम्। लोकद्वयं व्याप्य वर्तमानम् इत्यर्थः॥ तेन उक्तलक्षणेन सहस्रकाण्डेन। सहस्रशब्दः अपरिमितवचनः। अनेकपर्वात्मना। ॥ इत्थंभावे तृतीया॥। हे मणे नः अस्मान् विश्वतः सर्वस्मात् शापात् परि पाहि परितः सर्वतः पालय। इह परिशब्दः पालनकात्स्न्र्यम् आह। ॥ विश्वत इति। "भीत्रार्थानां भयहेतुः" इत्यपादानसंज्ञायां पञ्चम्यास्तसिल्॥ ॥

चतुर्थी ॥

परि॑ मां॒ परि॑ मे प्र॒जां परि॑ णः पाहि॒ यद् ध॑न॑म्।
अरा॑तिर्नो॒ मा ता॑रीन्मा नस्तारि॒षुर॒भिमा॑तयः॥ ४॥

परि॑। माम्। परि॑। मे॒। प्र॒ऽजाम्। परि॑। नः॒। पा॒हि॒। यत्। ध॑न॑म्।
अरा॑तिः। नः॒। मा। ता॒रीत्। मा। नः॒। ता॒रि॒षुः। अ॒भिऽमा॑तयः॥ ४॥

हे मणे मां परि पाहि॥ मे मदीयां प्रजाम् प्रजायत इति प्रजा ता पुत्रपौत्रादिरूपां परि पाहि॥ नः अस्माकं यद् धनम् अस्ति तदपि परि पाहि। ब्राह्मणाद्याक्रोशेन आत्मपुत्रपौत्रधनादिनाशो भवतीति तद्भावः प्रार्थ्यते॥ शत्रुकृतपीडाभावम् अभ्यर्थ्य तत्कर्तॄणां शत्रूणाम् अभावः प्रार्थ्यते। नः अस्मान् अरातिः शत्रुर्मा तारीत् मातिक्रामतु॥ अभिमातयः हन्तुम् अभिमन्यमानाः पिशाचयक्षादिरूपाः शत्रवो नः अस्मान् मा तारिषुः मातिक्रामन्तु मा हिंसन्तु। ॥ तरतेर्माङि लुङि "न माङ्योगे" इत्यडभावः॥ ॥

पञ्चमी ॥

शप्तारमेतु शपथो यः सुहार्त् तेन॑ नः स॒ह।

---

१ This is the reading of **A B B̊ Bᵖ D K R S̊ᵐ P P̊² J V.** See **R**ᵂ. २ **R** °र्णो. We with **A B B̊ʰ D K S̊ᵐ V.** ३ For सुहार्त् तेन **S̊ᵐ** सुहात्तेन and **P P̊² J** सुऽहात्। तेन। We with **A B Bᵖ B̊ʰ D K R V.**

चक्षुर्मन्त्रस्य दुर्हार्दः पृष्टीरपि शृणीमसि ॥ ५ ॥

शन्नारम । एतु । शपथः । यः । सुऽहार्त । तेन । नः । सह ।

चक्षुःऽमन्त्रस्य । दुःऽहार्दः । पृष्टीः । अपि । शृणीमसि ॥ ५ ॥

अन्यकृतस्य शपथस्य आत्मसंबन्धं परिहृत्य ब्राह्मणाद्याक्रोशस्य अमोघत्वात् शप्तैव विषयो भवतु इत्याह । शन्नारम शापकर्तारं पुरुषं शपथः तत्कृतः शापः प्रतिनिवृत्य एतु प्राप्नोतु ॥ यः पुरुषः सुहार्त शोभनहार्दः सुमनस्कः । अनुकूलकारीत्यर्थः । हृदये भवं हार्दम । हृदयशब्दात् प्राग्दीव्यतीये अणि "हृदयस्य हृल्लेखयदण्लासेषु" इति हृद्भावे अन्त्यलोपश्छान्दसः । यद्वा हार्दम् आनुकूल्यं करोति हार्दयति । हार्दयतेः क्विपि णिलोपे रूपम् । तेन सुहृदयेन मित्रेण सह नः अस्माकम् । सुखं भवतु इति शेषः ॥ मन्त्रस्य गुप्तं भाषमाणस्य पिशुनस्य । मन्त्रि गुप्तभाषणे इत्यस्मात् पचाद्यच् । अत एव दुर्हार्दः दुष्टहृदयस्य । सुहार्तशब्दवद् व्युत्पत्तिः । एतादृशस्य क्रूरस्य चक्षुः सदोषम् अक्षि पृष्टीः । पृष्टयः पर्शवः पार्श्वास्थीनि । अनेन सर्वे अवयवा उपलक्ष्यन्ते । तान् अपि शृणीमसि शृणीमः हिंस्मः । समन्त्रकमणिबन्धनप्रभावाद् वयं लौकिकवैदिकाक्रोशब्राह्मणशापक्रूरचक्षुर्दर्शनादिकृतान् दोषान् विनाशयाम इत्यर्थः । शॄ हिंसायाम । प्वादित्वात् ह्रस्वत्वम । "इदन्तो मसिः" ॥

इति द्वितीयकाण्डे द्वितीयेनुवाके द्वितीयं सूक्तम ॥

"उदगातां भगवती" इति सूक्तेन कुलागतकुष्ठक्षयग्रहण्यादिरोगशान्तये उदकघटं संपात्य अभिमन्त्र्य गृहाद् बहिर्व्याधितम अवसिञ्चेत ॥

अत्र "अपेयम" इति द्वितीयया ऋचा उक्तव्याधिशान्तये व्युष्टायां रात्रौ उक्तप्रकारेणैव अवसेकं कुर्यात ॥

"बभ्रोः" इति तृतीयया अर्जुनकाष्ठयवबुसतिलपिञ्जिकाः एकीकृत्य अभिमन्त्र्य बभ्रीयात ॥

---

१ So all our authorities. The word चक्षुर्मन्त्रस्य has to be taken as qualifying दुर्हार्दः. Also see XIX. 45. 9. २ A B K R S V पृष्टी°. B पृष्टि°. We with D S. ३ P P J सुऽहात्. K सुऽहाः. We with the Saṁhitâ. ४ So P P J K V, and rightly.

तथा अनयैव ऋचा आकृतिलोष्ठं वल्मीकमृत्तिकां वा जीवपशुचर्मणा आवेष्ट्य पूर्ववद् बध्नीयात् ॥

"नमस्ते लाङ्गलेभ्यः" इति चतुर्थ्या उदकघटम् अभिमन्त्र्य वृषभयुक्तस्य हलस्य अधस्ताद् व्याधितम् अवस्थाप्य तेनोदकेन अवसिञ्चेत् ॥

"नमः सनिस्रसाक्षेभ्यः" इति पञ्चम्या शून्यगृहे उदकघटं संपात्य जङ्गलं च अन्ते संपात्य तङ्गलं शालातृणानि आस्तीर्य तत्र व्याधितं स्थापयित्वा तेन घटोदकेन आचामयेत् अवसिञ्चेच्च ॥

सूत्रितं हि । "उदगाताम्[२. ८] इत्यासावयति बहिः अपेयम्[२] इति "व्युच्छन्त्याम् बभ्रोः[३] इति मन्त्रोक्तम् आकृतिलोष्टवल्मीकौ परिलिख्य[1] जी- "वकोषण्यामुत्सीव्य[2] बध्नाति । नमस्ते लाङ्गलेभ्यः[४] इति सीरयोगम् अधि- "शिरोवसिञ्चति । नमः सनिस्रसाक्षेभ्यः[५] इति शून्यशालायाम् अप्सु संपा- "तान् आनयत्युत्तरं[3] जरत्खाते सशालातृणे तस्मिन्नाचामयत्यासावयति" इति [कौ० ४. ३] ॥ एवं सूक्तेन ऋग्भिश्च क्रियमाणानि कर्माणि उक्तक्षेत्रियव्याध्यै विकल्पेन कुर्यात् । अवसेकबन्धनासावनादीनां सूत्रकृता पृथङ्निर्दिष्टत्वात् ॥

तत्र प्रथमा ॥

उद्गातां भगवती विचृतौ नाम तारके ॥
वि क्षेत्रियस्य मुञ्चतामधमं पाशमुत्तमम् ॥ १ ॥

उत् । अगाताम् । भगवती इति भगऽवती । विऽचृतौ । नाम । तारके इति । वि । क्षेत्रियस्य । मुञ्चताम् । अधमम् । पाशम् । उत्ऽतमम् ॥ १ ॥

भगवती तेजस्विन्यौ विचृततः विमोचयतः बन्धम् इति विचृतौ । ॐ चृती हिंसाग्रन्थनयोः इत्यस्माद् विपूर्वात् क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम ॐ । एतन्नाम्न्यौ तारके मूलनक्षत्रम् । तदधिष्ठानमण्डलापेक्षया द्विवचननिर्देशः । ॐ तथा च तैत्तिरीयकम् [तै० आ० २. ६. १] ।

अमी ये सुभगे दिवि विचृतौ नाम तारके ।

---

1 S' Kd परिदिश्य. We with *Kaus'ika*. 2 S' Kd om. °मुत्सीव्य. We with *Kaus'ika*.
3 S' Kd °त्युत्तमं. We with *Kaus'ika* and his commentators.

प्रेहामृतस्य यच्छताम एतद् बद्धकमोचनम् इति ।

विचृच्छब्दस्य मूलनक्षत्रपर्यायत्वं तत्रैव आम्नातम् । "विचृतौ नक्षत्रम् पितरो देवताषाढा नक्षत्रम् आपो देवता" [तै० सं० ४. ४. १०. २] इति ॥ । तथाविधे नक्षत्रे उदगाताम् उदिते भवतः । ॥ "इणो गा लुङि" इति गादेशः ॥ । ते नक्षत्रे[2] क्षेत्रियस्य । क्षेत्रे परक्षेत्रे पुत्रपौत्रादिशरीरे चिकित्स्यः क्षयकुष्ठादिदोषदूषितपितृमात्रादिशरीरावयवेभ्य आगतः[3] क्षयकुष्ठापस्मारादिरोगः क्षेत्रिय इत्युच्यते । ॥ "क्षेत्रियच् परक्षेत्रे चिकित्स्यः" इति क्षेत्रियशब्दो निपात्यते ॥ । तस्य क्षेत्रियरोगस्य अधमम् अधरकायाश्रितम् उत्तमम् ऊर्ध्वकायाश्रितं च पाशम् पाशवद् बन्धकं रोगबीजं वि मुञ्चताम् विमोचयताम् । ॥ मुचेर्लोटि "शे मुचादीनाम्" इति नुम् ॥ ॥

द्वितीया ॥

अपेयं रात्र्युच्छत्वपोच्छन्त्वभिकृत्वरीः ।
वीरुत् क्षेत्रियनाश्न्यप क्षेत्रियमुच्छतु ॥ २ ॥
अप । इयम् । रात्री । उच्छतु । अप । उच्छन्तु । अभिऽकृत्वरीः ।
वीरुत् । क्षेत्रियऽनाशनी । अप । क्षेत्रियम् । उच्छतु ॥ २ ॥

इयम् उषःकालीना रात्री रात्रिः । ॥ "रात्रेश्चाजसौ" इति ङीप् ॥ । अपोच्छतु विवासयतु । ॥ उछी विवासे ॥ । यथा व्युच्छन्ती रात्रिस्तमो नाशयति एवं तमोवत् आवरकं[4] क्षेत्रियव्याधिम् अपगमयतु इत्यर्थः । अनेन एतद्रोगचिकित्साकर्मणः कालः सूचितः ॥ अभिकृत्वरीः अभिकृत्वर्यः अभितः रोगशान्तिं कुर्वाणाः आदित्यादिदेवता अपोच्छन्तु प्रकृतं व्याधिम् अपगमयन्तु । ॥ अभिपूर्वात् करोतेः "अन्येभ्योपि दृश्यन्ते" इति क्वनिप् । ततस्तुगागमः । "वनो र च" इति ङीब्रेफौ । "वा छन्दसि" इति जसः पूर्वसवर्णदीर्घत्वम् ॥ । य-

---

१ B °पोच्छत्वभि°. We with A $\overset{h}{B}$ D R $\overset{m}{S}$ V.

---

1 S′ Kd °मोचकम्. 2 S′ Kd. नक्षेत्रे. 3 S′ Kd °गतक्षय°. 4 S′ Kd °वारकं.

द्वा अभिकृत्वरीः कर्तनशीलाः अपस्मारादिरोगकारिण्यः पिशाच्यः अपोच्छन्तु अपगच्छन्तु ॥ किं च । क्षेत्रियनाशनी क्षेत्रियव्याधेर्विनाशयित्री वीरुत् या तत्तद्रोगभैषज्यप्रस्तावोक्ता ओषधिरस्ति सापि क्षेत्रियम् उक्तं रोगम् अपोच्छतु अपगमयतु ॥

तृतीया ॥

बभ्रोरर्जुनकाण्डस्य यवस्य ते पलाल्या तिलस्य तिलपिञ्ज्या ।
वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ॥ ३ ॥

बभ्रोः । अर्जुनऽकाण्डस्य । यवस्य । ते । पलाल्या । तिलस्य । तिलऽपिञ्ज्या ।
वीरुत् । क्षेत्रियऽनाशनी । अप । क्षेत्रियम् । उच्छतु ॥ ३ ॥

बभ्रोः कपिलवर्णस्य अर्जुनकाण्डस्य अर्जुनाख्यवृक्षविशेषकाष्ठस्य । शकलेनेति शेषः । यवस्य । यवः प्रसिद्धः । तस्य पलाल्या तुषेण तिलस्य तिलसंबन्धिन्या तिलपिञ्ज्या तिलसहितमञ्जर्या च कृतो मणिः हे रुग्ण ते तव रोगम् अपोच्छतु ॥ वीरुदित्यादि व्याख्यातम् ॥

चतुर्थी ॥

नमस्ते लाङ्गलेभ्यो नम ईषायुगेभ्यः ।
वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ॥ ४ ॥

नमः । ते । लाङ्गलेभ्यः । नमः । ईषाऽयुगेभ्यः ।
वीरुत् । क्षेत्रियऽनाशनी । अप । क्षेत्रियम् । उच्छतु ॥ ४ ॥

हे रुग्ण ते त्वद्रोगशमनाय लाङ्गलेभ्यः वृषभयुक्तसीरेभ्यो नमः ॥ ईषायुगेभ्यः ईषाश्च युगानि च तेभ्यश्च हलावयवेभ्यो नमः । उभयत्रापि पूजायां बहुवचनम् । पीडाकररोगनिवर्तकत्वेन पूज्यत्वम् आरोप्य नमस्कारः कृतः । यद्वा हलादीनाम् अचेतनत्वेपि तदभिमानिदेवताभिप्रायेण नमस्कारः । तत्सद्भावश्च भगवता बादरायणेन सूत्रितः । "अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्" इति [बा० २, १, ५] ॥ वीरुदित्यादि गतम् ॥

पञ्चमी ॥

नमः सनिस्रसाक्षेभ्यो नमः संदेश्येभ्यः ।
नमः क्षेत्रस्य पतये वीरुत्क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ॥ ५ ॥

नमः । सनिस्रसऽअक्षेभ्यः । नमः । समऽदेश्येभ्यः ।
नमः । क्षेत्रस्य । पतये । वीरुत् । क्षेत्रियऽनाशनी । अप । क्षेत्रियम् । उच्छतु ॥ ५ ॥

सनिस्रसाक्षेभ्यः सनीस्रस्यमानानि अतिशयेन विस्रंसमानानि विशीर्यमाणानि अक्षाणि गवाक्षादिद्वाराणि येषां ते सनिस्रसाक्षाः । शून्यगृहा इत्यर्थः । स्रंसु गतौ इत्यस्मात् यङन्ताद् घञि अतोलोपयलोपौ । "नीग्वञ्चुस्रंसु०" इत्यभ्यासस्य नीग् आगमः । छान्दसं ह्रस्वत्वम् । तेभ्यः शून्यगृहेभ्यो नमः नमस्कारो भवतु ॥ संदेशेभ्यः संदिश्यन्ते त्यज्यन्ते तङ्गतमृदादानेनेति संदेशाः जरङ्गर्ताः । तेभ्यो नमः ॥ क्षेत्रस्य पतये शून्यगृहादिरूपस्य क्षेत्रस्याधिपतये एतन्नाम्ने देवाय नमः । "षष्ठीयुक्तश्छन्दसि वा" इति पतिशब्दस्य घिसंज्ञायां "घेर्ङिति" इति गुणः ॥ युष्मत्प्रसादाद् रोगशान्तिर्भवतु इति नमस्काराभिप्रायः ॥ वीरुत् क्षेत्रियनाशनीत्यादि शिष्टं गतम् ॥

इति द्वितीयकाण्डे द्वितीयेनुवाके तृतीयं सूक्तम् ॥

"दशवृक्ष" इति सूक्तेन ब्रह्मग्रहशान्तये पलाशौदुम्बरजम्बूकाम्पीलादिषु सूत्रोक्तेषु इच्छया दशवृक्षशकलानि गृहीत्वा तैर्लाक्षाहिरण्येन वेष्टितं मणिं कृत्वा संपात्य अभिमन्त्र्य बध्नीयात् ॥

तथैव एतत् सूक्तं दश ब्राह्मणाः ब्रह्मग्रहगृहीतं स्पृशन्तो जपेयुः ॥

तद् उक्तं संहिताविधौ । "दशवृक्षेति शाकलो दश सुहृदो जपन्तोभिमृशन्ति" इति [कौ० ४. ३] ॥

---

१ So we divide the *pada* with **A B̥ D K R S̥**. See **R**w. २ So we with **A B Br B̥ D R S̥ V.** See **R**w. ३ **P P̊ J** have **पतये ॥** for **पतये ।**.

तत्र प्रथमा ॥

दशवृक्ष मुञ्चेमं रक्षसो ग्राह्या अधि यैनं जग्राह पर्वसु।
अथो एनं वनस्पते जीवानां लोकमुन्नय ॥ १ ॥

दशऽवृक्ष। मुञ्च। इमम्। रक्षसः। ग्राह्याः। अधि। या। एनम्। जग्राह। पर्वऽसु।
अथो इति। एनम्। वनस्पते। जीवानाम्। लोकम्। उत्। नय ॥ १ ॥

हे दशवृक्ष पलाशौदुम्बरादिदशवृक्षशकलनिर्मित मणे रक्षसः ब्रह्मराक्षसात् ग्राह्याः गृह्णातीति ग्राहिः राक्षसी। ग्रहेर्णिन् प्रत्यय औणादिकः। तस्याश्च। अधिः पञ्चम्यर्थानुवादी। इमम् गृहीतं पुरुषं मुञ्च मोचय। दशवृक्षेति। "आमन्त्रितस्य च" इति षाष्ठिकम् आद्युदात्तत्वम्। "आमन्त्रितं पूर्वम् अविद्यमानवत्" इति तस्य अविद्यमानवद्भावात् पदपरत्वस्य अभावात् मुञ्चेत्यस्य "तिङ्तिङः" इति निघाताभावे विकरणस्वरेण अन्तोदात्तत्वम्। या ग्राहिर्ब्रह्मराक्षसी पर्वसु शरीरसंबन्धिषु अमावास्यादिपर्वसु वा एनम् पुरुषं जग्राह गृहीतवती। तस्याः सकाशान्मोचयेति पूर्वेण संबन्धः। अमावास्यायां रक्षसाम् उत्थानं च "येमावास्यां रात्रिम् उदस्थुर्भोजम् अत्तिणः" इति [१.१६.१] प्राग् आम्नातम् ॥ अथो अपि च हे वनस्पते वनानां पतिर्वनस्पतिः। पारस्करादित्वात् सुडागमः। वनस्पतिविकार मणे एनम् गृहीतं पुरुषं जीवानाम् जीवतां प्राणिनां लोकम् स्थानं भूलोकम् उन्नय उद्धृत्य प्रापय। ग्रहावेशेन मृतप्रायं पुनर्जीवनयुक्तं कुरु इति भावः। "नीवह्योर्हरतेश्च" इति स्मरणाद् नयतिर्द्विकर्मकः ॥

द्वितीया ॥

आगादुदगादयं जीवानां व्रातमप्यगात्।
अभूदु पुत्राणां पिता नॄणां च भगवत्तमः ॥ २ ॥

आ। अगात्। उत्। अगात्। अयम्। जीवानाम्। व्रातम्। अपि। अगात्।

अभूत्। ऊं इति। पुत्राणाम्। पिता। नृणाम्। च। भगवत्तमः ॥ २ ॥

मणिप्रभावं वक्तुं मणिबन्धनसमनन्तरमेव अभिमतफलसिद्धिं दर्शयति। हे मणे त्वत्प्रसादाद् अयम् ग्रहाद् विनिर्मुक्तो लब्धजीवनः आगात् इमं लोकम् आगमत्॥ उदगात् उदस्थात्। संचारक्षमोभूदित्यर्थः॥ न केवलम् उत्थानम् जीवानाम् जीवतां जनानां व्रातम् समूहमपि अगात् प्रापत्। बन्धुजनैः सह व्यवहारम् अकार्षीदित्यर्थः॥ उ अपि च पुत्राणाम् आत्मीयानां सुतानां पिता जनकोभूत्। मृतप्रायस्य आत्मनो गतं पितृत्वं पुनर्जीवनेन आगतम् इत्यर्थः। यद्वा जनिष्यमाणानां पुत्राणाम् उत्पादकोभूदित्यर्थः॥ किं च नृणाम् मनुष्याणां मध्ये भगवत्तमः अतिशयितभाग्ययुक्तः संपन्नः। ⌛"नृ च" इति "नामि"-दीर्घाभावः। "नाम् अन्यतरस्याम्" इति नाम उदात्तत्वम्। मणिबन्धनसमनन्तरमेव फलसिद्धिर्भवतीति अद्यतनभूतार्थवाचिनो लुङः सर्वत्र प्रयोगः। यद्वा "छन्दसि लुङ्लङ्लिटः" इति प्रार्थनायां लुङ्⌛। आगाद् आगच्छतु इत्येवमादि योज्यम्॥

तृतीया॥

अधीतीरध्यगादयमधि जीवपुरा अगन्।
शतं ह्यस्य भिषजः सहस्रमुत वीरुधः॥ ३ ॥

अधिऽइतीः। अधि। अगात्। अयम्। अधि। जीवऽपुराः। अगन्।
शतम्। हि। अस्य। भिषजः। सहस्रम्। उत। वीरुधः॥ ३ ॥

अयम् ब्रह्मग्रहाद् विमुक्तः पुरुषः अधीतीः अधीयन्त इत्यधीतयः। ⌛इङ् अध्ययने इक् स्मरणे इत्यस्माद् वा कर्मणि क्तिन्⌛। प्राग् अधीतान् वेदान् स्मर्तव्यान् पदार्थान् वा अध्यगात् अस्मार्षीत् स्मरतु वा। ⌛इक् स्मरणे इत्यस्मात् लुङि "इण्वदिक इति वक्तव्यम्" इति "इणो गा लुङि" इति गादेशः। इङस्त्वात्मनेपदित्वाद् नैतद् रूपम्। "इङ्कावध्युपसर्गं न व्यभिचरतः" इति अधेः प्रयोगः⌛॥ तथा जीवपुराः जीवानां पुरः भोगायतनानि शरीराणि आवासस्थानानि

ग्रामजनपदादीनि वा जीवपुराः। ⁂ "ऋक्पूरब्धूःपथाम् आनक्षे" इत्यकारः समासान्तः ⁂। ताः अध्यगन् अध्यगमत् अज्ञासीत् जानातु वा। ⁂ गमेर्लुङि "मन्त्रे घसह्वरणश॰" इति च्लेर्लुकि संयोगान्तलोपे "मो नो धातोः" इति नत्वम् ⁂॥ उक्तायां अविलम्बितफलसिद्धेर्हेतुम् आह। हि यस्मात् कारणात् अस्य ग्रहगृहीतस्य शतम् अपरिमिता भिषजः। भिषज्यन्ति चिकित्सां कुर्वन्ति इति भिषजो वैद्याः। बहुभिर्वैद्यैः क्रियमाणम् एकम् औषधं फलभेदाय न कल्पत इति औषधानामपि[1] आनन्त्यम् आह सहस्रम् इति। सहस्रम् अपरिमिता वीरुधः। विरुन्धन्ति विनाशयन्ति रोगान् इति वीरुधः औषधानि। बहुभिर्वैद्यैरौषधैश्च यत् फलं भवति तद् एतत्सूक्ताभिमन्त्रितमणिबन्धनसामर्थ्येन भवतीति भावः॥

चतुर्थी॥

देवास्ते चीतिमविदन् ब्रह्माण उत वीरुधः।
चीतिं ते विश्वे देवा अविदन् भूम्यामधि॥ ४॥
देवाः। ते। चीतिम्। अविदन्। ब्रह्माणः। उत। वीरुधः।
चीतिम्। ते। विश्वे। देवाः। अविदन्। भूम्याम्। अधि॥ ४॥

बध्यमानमणेरुक्तं सामर्थ्यं देवादिप्रसिद्धम् इत्याह। हे मणे ते तव चीतिम् ग्रहविकाराद् रोगिण आदानं ग्रहादेः संवरणं छादनम् अभिभवनं वा देवाः इन्द्राद्या अविदन् विदन्ति जानन्ति। ⁂ चीवृ आदानसंवरणयोः। अस्माद् भावे क्तिनि "तितुत्र॰" इति इट्प्रतिषेधे वलिलोपे चीतिः इति रूपम्। वेत्तेश्छान्दसे लुङि व्यत्ययेन जुसभावः ⁂॥ तथा ब्रह्माणः ब्राह्मणाः। उतशब्दः अप्यर्थे। वीरुधः औषधानि च। चीतिम् अविदन्निति संबन्धः॥ विश्वे देवाः एतन्नामानो वरुणमित्रादयो गणदेवाः भूम्यां भूलोके। अधिः सप्तम्यर्थानुवादी। ते तव चीतिम् अविदन्॥ यद्वा अत्र रुग्ण एव संबोध्यः। हे रुग्ण ते तव मूर्छितस्य

---

1 S′Kd ओषधाना॰.

चीतिम् संज्ञानम् । ꣿ चिती संज्ञाने इत्यस्माद् औणादिके किप्रत्ये उपधादीर्घश्छान्दसः ꣿ ॥ भूम्याम् अधि भूलोके देवा अविदन् लम्भयन्तु प्रापयन्तु । ꣿ विदॢ लाभे । अस्माद् अन्तर्णीतण्यर्थात् छान्दसे लुङि लृदित्वाद् अङ् ꣿ ॥ एवं ब्रह्माण इत्यादि योज्यम् । भूम्याम् अधीति सर्वशेषः ॥

पञ्चमी ॥

यश्चकार॒ स निष्क॑र॒त् स ए॒व सुभि॑षक्तमः ।
स ए॒व तुभ्यं॑ भेष॒जानि॑ कृणव॑द् भि॒षजा॒ शुचिः॑ ॥ ५ ॥

यः । च॒कार॑ । सः । निः । क॒र॒त् । सः । ए॒व । सुभि॑षक्ऽतमः ।
सः । ए॒व । तुभ्य॑म् । भे॒ष॒जानि॑ । कृ॒ण॒व॑त् । भि॒षजा॑ । शुचिः॑ ॥ ५ ॥

यः पुरुषो विधानज्ञः अथर्वाख्यो महर्षिर्वा चकार एतन्मणिबन्धनं कृतवान् स निष्करत् निष्कृतिं ग्रहविकारस्य शमनं करोतु । मणिबन्धनकर्ता चिकित्सको मन्त्रसिद्धान् पुरातनान् वैद्यांश्चिन्तयेदिति भावः । ꣿ करोतेः पञ्चमलकारे "लेटोडाटौ" इत्यडागमः । "कःकरत्करति" इति निसः षत्वम् ꣿ । यद्वा । यः परमेश्वरश्चकार इदं सर्वं जगत् सृष्टवान् स एव निष्करत् ग्रहविकारस्य निष्कृतिं करोतु । स एव उक्त एव सुभिषक्तमः । निदानज्ञानपूर्वकं चिकित्सकाः सुभिषजः तेभ्योयम् उत्कृष्टः आदिवैद्यः । श्रूयते हि । "अध्यवोचद् अधिवक्ता प्रथमो दैव्यो भिषक्" [तै॰सं॰ ४. ५. १. २] इति । "भिषक्तमं त्वा भिषजां शृणोमि" [ऋ॰ २. ३३. ४] इति च । स एव ईश्वर एव हे रुग्ण तुभ्यं भिषजा इदानींतनभिषग्रूपेण । ꣿ इत्थंभावे तृतीया ꣿ । भेषजानि कृणवत् करोतु । शुचिः निर्मलज्ञानवान् स इति संबन्धः ॥ यद्वा तृतीयाः सुः[2] । शुचिना भिषजेति योज्यम् । ꣿ तुभ्यम् इति । युष्मदस्मदोर्ङसि "ङयि च" इत्याद्युदात्तत्वम् । कृवि हिंसाकरणयोश्च इत्यस्मात् पञ्चमलकारे "धिन्विकृण्व्योर च" इति उप्रत्ययः अकारश्चान्तादेशः । "लेटोडाटौ" इत्यडागमः ꣿ ।

---

1 S′Kd इत्याडागमः. 2 S′Kd सु for सुः.

इति द्वितीयकाण्डे द्वितीयेनुवाके चतुर्थं सूक्तम् ॥

"क्षेत्रियात् त्वा" इति सूक्तेन पूर्वोक्तक्षेत्रियरोगशान्तये चतुष्पथे उदकघटं संपात्य अभिमन्त्र्य व्याधितपर्वसु काम्पीलशकलानि बद्ध्वा कूर्चैः सह तेनोदकेन आसावयेद् अवसिञ्चेत् । सूत्रितं हि । "क्षेत्रियात् त्वेति चतुष्पथे काम्पीलशकलैः पर्वसु बद्ध्वा पिञ्जूलीभिरासावयत्यवसिञ्चति" इति [कौ० ४. ३.] ॥

तत्र प्रथमा ।

क्षेत्रियात् त्वा निर्ऋत्या जामिशंसाद् द्रुहो मुञ्चामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥ १ ॥

क्षेत्रियात् । त्वा । निःऽऋत्याः । जामिऽशंसात् । द्रुहः । मुञ्चामि । वरुणस्य । पाशात् ।

अनागसम् । ब्रह्मणा । त्वा । कृणोमि । शिवे इति । ते । द्यावापृथिवी इति । उभे इति । स्ताम् ॥ १ ॥

हे क्षेत्रियव्याधिपीडित पुरुष त्वा त्वां क्षेत्रियात् क्षयकुष्ठादिदोषदूषितपितृमात्रादिशरीरावयवेभ्य आगतात् पुत्रादिशरीरसंक्रान्तात् क्षयकुष्ठादेः मुञ्चामि मोचयामि । पुत्रशरीरे पित्रादिशरीरावयवसंक्रान्तिः श्रुत्यन्तरे श्रूयते । "अङ्गाद् अङ्गात् संभवसि हृदयाद् अधि जायसे" [आश्व० गृ० १. १५. ११] इति ॥ तथा निर्ऋत्याः रोगनिदानभूतायाः पापदेवतायाः सकाशात् जामिशंसात् । सह जायत इति जामिर्भगिनी तदुपलक्षिता बन्धवो जामयः । अप्राप्ताभिलषितानां तेषां शंसनात् आक्रोशजनितात् पापात् द्रुहः गुरुदेवतादिद्रोहात् वरुणस्य देवस्य पाशात् पापिनां निग्राहकात् । त्वा मुञ्चामि इति सर्वत्र संबन्धः ॥ निर्ऋत्यादीनां महा[1]रोगनिदानत्वात् तद[2]निवृत्तौ रोगनिवृत्तेरसंभवात् ततोपि मो[3]चनम् उक्तम् ॥ अपि च । त्वा त्वां ब्रह्मणा मन्त्रेण अनागसम् अपराधरहितं कृणोमि करोमि । न तत्

---

1 S′ Kd महोगनिदा°. 2 S′ Kd तदनुवृत्तौ. 3 S′ Kd मुक्तम् for मोचनम् उक्तम्.

सर्वं मत्सामर्थ्येन करोमि अपि तु मन्त्रप्रभावेनेति तात्पर्यार्थः ॥ ततः हे व्याधित द्यावापृथिवी द्यावापृथिव्यौ उभे ते तव शिवे कल्याणकारिण्यौ [स्ताम्] भवताम् । ✕अस्तेर्लोटि तसस्ताम् । "श्नसोरल्लोपः" इत्यकारलोपः ✕ । सत्स्वपि देवतान्तरेषु द्यावापृथिव्योरेव प्रार्थनम् भौमदिव्यापराधजनितत्वात् सर्वरोगाणाम् "द्यौः पिता पृथिवी माता" इति [तै० ब्रा० ३. ७. ५. ५] श्रुतेः तयोरेव सर्वजगन्मातापितृत्वेन सर्वदेवान्तर्भावात् तत्प्रसादेन[2] सर्वरोगशान्तिः सर्वदेवताप्रीतिश्च भवतीत्येवमर्थं कृतम् ॥

द्वितीया ॥

शं ते अग्निः सहाङ्गिरस्तु शं सोमः सहौषधीभिः ।
एवाहं त्वां क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुञ्चामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥ २ ॥

शम् । ते । अग्निः । सह । अङ्गिऽभिः । अस्तु । शम् । सोमः । सह । ओषधीभिः ।

एव । अहम् । त्वाम् । क्षेत्रियात् । निःऽऋत्याः । जामिऽशंसात् । द्रुहः ।
मुञ्चामि । वरुणस्य । पाशात् ।

अनागसम् । ब्रह्मणा । त्वा । कृणोमि । शिवे इति । ते । द्यावापृथिवी इति ।
उभे इति । स्ताम् ॥ २ ॥

हे रुग्ण ते तव अग्निः अयं चतुष्पथे हूयमानः पृथिवीस्थानः अङ्गिः अभिमन्त्रितोदकाभिमानिदेवताभिः सह समस्तव्याध्युपशमनेन [शम] सुखकरो भवतु ॥ सोमः ओषधीनां राजा ओषधीभिः ओषध्युपलक्षितैः कार्म्पीलादिभिरौषधगणैः सह शम् सुखकरो भवतु । ✕"ओषधेश्च विभक्तावप्रथमायाम्" इति सांहितिको दीर्घः ✕ ॥ एव एवम् अहं प्रयोक्ता त्वा त्वाम् ॥ क्षेत्रियादित्यादि पूर्ववद् योज्यम् ॥

---

1 S′ Kd भौम्य°. 2 S′ Kd तत् omitted.

तृतीया ॥

शं ते॒ वातो॑ अ॒न्तरि॑क्षे॒ वयो॑ धा॒च्छं ते॑ भवन्तु प्र॒दिश॒श्चत॑स्रः ।
एवाहं त्वां क्षे॑त्रि॒यान्नि॑र्ऋ॒त्या जामिशं॑साद् द्रु॒हो मु॑ञ्चामि॒ वरु॑णस्य॒ पाशा॑त् ।
अ॒ना॒गस॑ं ब्रह्म॑णा त्वा कृणोमि शि॒वे ते॒ द्यावा॑पृथि॒वी उ॒भे स्ता॑म् ॥ ३ ॥

शम् । ते॒ । वात॑: । अ॒न्तरि॑क्षे । वय॑: । धा॒त् । शम् । ते॒ । भ॒व॒न्तु॒ । प्र॒ऽदिश॑: ।
चत॑स्र: ।
एव । अ॒हम् । त्वाम् । क्षे॒त्रि॒यात् । नि॒:ऽऋ॑त्या: । जा॒मि॒ऽशं॒सात् । द्रु॒ह: ।
मु॒ञ्चा॒मि॒ । वरु॑णस्य । पाशा॑त् ।
अ॒ना॒गस॑म् । ब्रह्म॑णा । त्वा॒ । कृ॒णो॒मि॒ । शि॒वे इति॑ । ते॒ । द्यावा॑पृथि॒वी
इति॑ । उ॒भे इति॑ । स्ता॒म् ॥ ३ ॥

हे रुग्ण ते तव अन्तरिक्षे अन्तरा क्षान्ते द्यावापृथिव्योर्मध्ये वर्तमाने वा । अन्तरा क्षान्तं भवत्यन्तरेमे इति वा इत्यादि निरुक्तम् [नि०२.१०] । तस्मिन् स्वस्थाने वयोधाः वयसां पक्षिणां धाता धारयिता वयसाम् अन्नेन पोषयिता वा वातः अन्तरिक्षाधिपतिर्वायुः शम् सुखकरो भवतु ॥ तथा चतस्रः प्रदिशः प्रकृष्टा दिशः प्राच्याद्या महादिशः ते तव शं भवन्तु सुखकर्यो भवन्तु ॥ एवाहम् इत्यादि गतम् ॥

चतुर्थी ॥

इ॒मा या दे॒वीः प्र॒दिश॒श्चत॑स्रो वा॒तप॑त्नीर॒भि सूर्यो॑ वि॒चष्टे॑ ।
एवाहं त्वां क्षे॑त्रि॒यान्नि॑र्ऋ॒त्या जामिशं॑साद् द्रु॒हो मु॑ञ्चामि॒ वरु॑णस्य॒ पाशा॑त् ।
अ॒ना॒गस॑ं ब्रह्म॑णा त्वा कृणोमि शि॒वे ते॒ द्यावा॑पृथि॒वी उ॒भे स्ता॑म् ॥ ४ ॥

इ॒माः । याः । दे॒वीः । प्र॒ऽदिश॑: । चत॑स्रः । वा॒तऽप॑त्नीः । अ॒भि । सूर्य॑: ।
वि॒ऽचष्टे॑ ।
एव । अ॒हम् । त्वाम् । क्षे॒त्रि॒यात् । नि॒:ऽऋ॑त्या: । जा॒मि॒ऽशं॒सात् । द्रु॒ह: ।
मु॒ञ्चा॒मि॒ । वरु॑णस्य । पाशा॑त् ।

अनागसꣳम । ब्रह्मणा । त्वा । कृणोमि । शिवे इति । ते । द्यावापृथिवी इति । उभे इति । स्ताम् ॥ ४ ॥

इमाः परिदृश्यमाना देवीः द्योतमानाः वातपत्नीः वातः पतिर्यासाम् । ⧖ "विभाषा सपूर्वस्य" इति ङीन्नकारौ ⧖ । दिक्षु वायोः संचारात् तत्पतित्वोपचारः । एवंभूता याश्चतस्रः प्रदिशः सूर्यः सर्वस्य प्रेरयिता द्युस्थानाधिपतिः सविता अभि अभितः सर्वतो विचष्टे । पश्यतिकर्मायम् । विपश्यति । स्वकिरणप्रसारणेन प्रकाशयतीत्यर्थः । ⧖ चतस्र इति । "चतसर्याद्युदात्तत्वनिपातनम्" इति वचनात् "चतुरः शसि" इति अन्तोदात्तत्वाभावः । चष्ट इति । चक्षिङ् व्यक्तायां वाचि । अदादित्वात् शपो लुक् । "स्कोः संयोगाद्योरन्ते च" इति कलोपः ⧖ । ताभिः सह सूर्यः शं भवतु इत्यनुषङ्गः ॥ एवाहम इत्यादि गतम ॥

पञ्चमी ॥

तासु त्वान्तर्जरस्या दधामि म यक्ष्म एतु निर्ऋतिः पराचैः ।
एवाहं त्वां क्षेत्रियान्निर्ऋत्या जामिशꣳसाद् द्रुहो मुञ्चामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥ ५ ॥

तासु । त्वा । अन्तः । जरसि । आ । दधामि । म । यक्ष्मः । एतु । निःऽऋतिः । पराचैः ।

एव । अहम् । त्वाम् । क्षेत्रियात् । निःऽऋत्याः । जामिऽशꣳसात् । द्रुहः । मुञ्चामि । वरुणस्य पाशात् ।

अनागसꣳम । ब्रह्मणा । त्वा । कृणोमि । शिवे इति । ते । द्यावापृथिवी इति । उभे इति । स्ताम् ॥ ५ ॥

याः पूर्वमन्त्रोक्ता दिशः तासु अन्तः मध्ये हे रुग्ण त्वा त्वां जरसि जरायाम् आ दधामि । जरापर्यन्तं रोगादिपरिहारेण जीवयन् शतायुषं करोमीत्यर्थः । ⧖ "जराया जरस् अन्यतरस्याम" इति जरस् आदेशः ⧖ ॥ यक्ष्मः त्वदीयो राजयक्ष्मादिः क्षेत्रियः प्रैतु प्रगच्छतु त्वां वि-

मुञ्चतु ॥ निर्ऋतिः त्वद्रोगनिदानभूता पापदेवता पराचैः पराङ्मुखी प्रैतु। प्रतिनिवृत्य अनवलोकयन्ती दूरं गच्छतु इत्यर्थः ॥ एवाहं *त्वेत्यादि गतम् ॥

षष्ठी ॥

अमुंक्था यक्ष्मांद् दुरितादंवद्याद् द्रुहः पाशाद् ग्राह्याश्चोदंमुक्थाः ।
एवाहं त्वां क्षेंत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंञ्चामि वरुंणस्य पाशांत् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावांपृथिवी उभे स्तांम ॥ ६ ॥

अमुंक्थाः । यक्ष्मांत् । दुःऽइतात् । अवद्यात् । द्रुहः । पाशांत् । ग्राह्याः ।
च । उत् । अमुक्थाः ।
एव । अहम । त्वाम । क्षेत्रियात् । निःऽऋत्याः । जामिऽशंसात् । द्रुहः ।
मुञ्चामि । वरुंणस्य । पाशांत् ।
अनागसंम । ब्रह्मणा । त्वा । कृणोमि । शिवे इतिं । ते । द्यावांपृथिवी इतिं ।
उभे इतिं । स्तांम ॥ ६ ॥

हे रुग्ण त्वं यक्ष्मात् क्षेत्रियव्याधेः अमुक्थाः मुक्तोसि । मा संशयं कार्षीरित्यर्थः । ⁂ मुचू मोक्षणे । अस्मात् कर्मणि लुङि मध्यमैकवचने "झलो झलि" इति सिचो लोपः ⁂ ॥ तथा दुरितात् दुर्गतात् रोगनिदानभूतात् पापात् अवद्यात् जाम्याद्यभिशंसनरूपाद् निन्दनात् । ⁂ "अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु" इति यत्प्रत्ययान्तो निपातितः ⁂ । द्रुहः देवतादिद्रोहात् । पाशात् पापिनो निग्रहकाद् वरुणपाशात् ग्राह्याः ब्रह्मराक्षस्यादिरूपायाः पिशाच्याश्च उदमुक्थाः उन्मुक्तो भवसि ॥ एवाहम इत्यादि पूर्ववत् ॥

सप्तमी ॥

अहा अरांतिमविंदः स्योनमप्यंभूर्भद्रे सुंकृतस्य लोंके ।
एवाहं त्वां क्षेंत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुंञ्चामि वरुंणस्य पाशांत् ।

---

१ A B D S V K omit the visarga. We with R.

अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम ॥ ७ ॥

अहाः । अरातिम । अविंदः । स्योनम । अपि । अभूः । भद्रे । सुऽकृतस्य । लोके ।

एव । अहम । त्वाम । क्षेत्रियात् । निःऽऋत्याः । जामिऽशंसात् । द्रुहः । मुञ्चामि । वरुणस्य । पाशात् ।

अनागसम । ब्रह्मणा । त्वा । कृणोमि । शिवे इति । ते । द्यावापृथिवी इति । उभे इति । स्ताम ॥ ७ ॥

हे व्याधित अरातिम शत्रुवद्बाधकं रोगं शत्रुमेव वा अहाः अहासीः अत्याक्षीः । ओहाक् त्यागे । लुङि "मन्त्रे घसह्वरणशवृदहाद्०" इति च्लेर्लुक् ॥ स्योनम । सुखनामैतत् । सुखम् अविदः लब्धवान् असि । विदॢ लाभे इत्यस्मात् लुङि लृदित्वाद् अङ् ॥ भद्रे भन्दनीये कल्याणे सुकृतस्य सुष्ठु कृतस्य पुण्यस्य फलभूतेऽस्मिन् भूलोके अप्यभूत् । "अपिः पदार्थसंभावनान्ववसर्ग०" इति कस्यचित् पदस्यार्थे अपिशब्दस्य कर्मप्रवचनीयसंज्ञाविधानाद् अत्र अन्वेतुं योग्ये जीवननिवासादिपदार्थे अपिशब्दो वर्तते । भूलोके चिरकालनिवासो दीर्घजीवनं वा तव अभूद् इत्यर्थः ॥ एवाहम इत्यादि गतम ॥

अष्टमी ॥

सूर्यमृतं तमसो ग्राह्या अधि देवा मुञ्चन्तो असृजन्निरेनसः ।
एवाहं त्वां क्षेत्रियान्निर्ऋत्या जामिशंसाद् द्रुहो मुञ्चामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम ॥ ८ ॥

सूर्यम । ऋतम । तमसः । ग्राह्याः । अधि । देवाः । मुञ्चन्तः । असृजन् । निः । एनसः ।

एव । अहम । त्वाम । क्षेत्रियात् । निःऽऋत्याः । जामिऽशंसात् । द्रुहः । मुञ्चामि । वरुणस्य । पाशात् ।

---

१ So we with **A B B̂ D K R Ŝ V**. See **R**w.

अनागसंम्। ब्रह्मणा। त्वा। कृणोमि। शिवे इतिं। ते। द्यावापृथिवी इतिं। उभे इतिं। स्ताम् ॥ ८ ॥

ऋतम् सत्यभूतं सूर्यं तमसः स्वर्भानुरूपाद् ग्राह्याः ग्रहात्। ॥ अधिः पञ्चम्यर्थानुवादी ॥। मुञ्चन्तः मोचयन्तो देवाः इन्द्रादयः एनसः तद्धेतुभूतात् पापाद् निरसृजन् निरगमयन्। ॥ सृज विसर्गे। "सुवर्भानुरासुरः सूर्यं तमसाविध्यत् तस्मै देवाः प्रायश्चित्तिम् ऐच्छन्" [तै° सं° २. १. २. २] इत्यादि तैत्तिरीयकम् ॥। यथा देवाः सूर्यं राहुग्रहाद् अमोचयन् एवम् अहमपि त्वां मन्त्रप्रभावेन क्षेत्रियरोगात् तन्निदानभूतपापादिभ्यश्च मोचयामीत्यर्थः ॥

इति द्वितीयेनुवाके पञ्चमं सूक्तम्।

[इति] द्वितीयोनुवाकः ॥

तृतीयेनुवाके सप्त सूक्तानि। तत्र "दूष्या दूषिरसि" इति प्रथमं सूक्तम्। स्त्रीशूद्रराजब्राह्मणकापालिकान्त्यजशाकिन्यादिकृताभिचारे स्वात्मरक्षार्थम् कृत्याप्रतिहरणार्थं च अनेन सूक्तेन तिलकमणिं संपात्य अभिमन्त्र्य बध्नीयात्। तथा च सूत्रम्। "दूष्या दूषिरसीति स्रात्त्यं बध्नाति" इति [कौ° ५. ३] ॥ स्रक्तिस्तिलकवृक्षः। स्रक्ति]स्तिलक इति भाष्यकारः ॥[1]

तथा अस्य सूक्तस्य कृत्याप्रतिहरणगणे पाठात् कृत्यानिर्हरणार्थं शान्त्युदकेपि एतत् सूक्तम् आवपनीयम्। यद् आह कौशिकः। "दूष्या दू- "षिरसि[२. ११] ये पुरस्तात्[४. ४०] ईशानां त्वा[४. १७] समं ज्यो- "तिः[४. १८] उतो अस्यबन्धुकृत्[४. १९] सुपर्णस्त्वा[५. १४] यां ते "चक्रुः[५. ३१] अयं प्रतिसरः[८. ५] यां कल्पयन्ति[१०. १] इति "महाशान्तिम् आवपते" इति [कौ° ५. ३] ॥ अयमेव कृत्याप्रतिहरणगणः ॥

तथा नक्षत्रकल्पे "कृत्यादूषण एव च। चातनो मातृनामा च"[न° क° २३] इत्यत्र शान्तिकल्पे "अथ शान्तैः[2] कृत्यादूषणैश्चातनैः" [शा°

---

1 Dârila's note on *Kaus'ika* V. 3 is स्रक्त्यास्तिलकः where स्रक्त्य° seems to be a mistake for स्रक्ति°. 2 S' Kd शांतिः. The *Nakshatrakalpa* MS. reads शांत्यैः. शांतिः is a probable slip for शांतैः, which we have accordingly conjectured.

क०१६] इत्यत्र च अस्य सूक्तस्य गणप्रयुक्तो विनियोगोवगन्तव्यः ॥

एवं "बार्हस्पत्यां राज्यश्रीब्रह्मवर्चसकामस्याभिचरतोभिचर्यमाणस्य च" इति [न०क०१७] विहितायां बार्हस्पत्याख्यायां महाशान्तौ स्नात्यमणिबन्धनेपि एतत् सूक्तम् । तद् उक्तं नक्षत्रकल्पे । "बार्हस्पत्यायां दूष्या दूषिरसीति स्नात्यम् अभिचरतोभिचर्यमाणस्य च" इति [न०क०१९] ॥

कृत्याप्रतिहरणकर्मण्येव आद्ययर्चा कृत्याया गुल्फं सूत्रोक्तद्रव्येण परिषिञ्चेत् । सूत्रं च । "दूष्या दूषिरसीति दर्व्या त्रिः सारूपवत्सेनापोदकेन मथितेन गुल्फान् परिषिञ्चति" इति [कौ० ५. ३] ॥

तत्र प्रथमा ॥

दूष्या दूषिरसि हेत्या हेतिरसि मेन्या मेनिरसि ।
आ मुहि श्रेयांसमति समं क्राम ॥ १ ॥

दूष्याः । दूषिः । असि । हेत्याः । हेतिः । असि । मेन्याः । मेनिः । असि । आ मुहि । श्रेयांसम् । अति । समम् । क्राम ॥ १ ॥

हे तिलकमणे त्वं दूष्याः । दूषयति विनाशयतीति दूषिः कृत्या । दुषेर्ण्यन्ताद् औणादिक इप्रत्ययः । तस्याः परकृतायाः दूषिरसि दूषकः निवारकोसि ॥ हेत्याः । आयुधनामैतत् । हन्ति अनयेति महीयते प्रक्षिप्यत इति वा हेतिः आयुधम् । "ऊतियूतिजूतिसातिहेतिकीर्तयश्च" इति हन्तेर्हिनोतेर्वा क्तिन्प्रत्ययान्तो निपातितः । तस्याः परप्रेरितायास्त्वं हेतिः प्रतिहननसाधनम् असि ॥ मेन्याः । वज्रनामैतत् । मीनाति हिनस्तीति मेनिः मर्मभेदि मन्त्रात्मकं वाग्वज्रम् । तस्य परोच्चारितस्य मेनिरसि निवारकः प्रतिवाग्वज्रोसि । मीञ् हिंसायाम् इत्यस्माद् औणादिको निप्रत्ययः । यद्यपि हेतिमेनी द्वे अपि आयुधनामनी तथापि अत्र समन्तकामन्तकास्त्रशस्त्रभेदेन तयोर्भेदोवगन्तव्यः ॥ यतस्त्वं शत्रुकृताभिचारादिजनितसर्वारिष्टनिवारकोसि अतः श्रेयांसम् प्रशस्यतमम् अधिकबलम् अस्मदीयं शत्रुम् आमुहि हन्तुं व्यामुहि । निरुध्य

---

1 The *Nakshatrakalpa* reads: राज्यार्थं श्रीब्रह्म°. 2 S′ Kd स्न°. 3 S′ Kd मंत्रात्मकवाग्व°.

तं जहीत्यर्थः ॥ समम् समबलं शत्रुम् अति क्राम अतिक्रम्य गच्छ। अप्रयत्नेन निवारयेत्यर्थः। न्यूनबलस्तु मन्त्रप्रभावम् अन्तरेण स्वेनैव जित इति तस्य अनुपन्यासः। तथा च तैत्तिरीयके समाम्नातम्। "प्र श्रेयांसं भ्रातृव्यं नुदतेति सदृशं क्रामति नैनं पापीयान् आप्नोति" [तै० सं० २. ४. १. ४] इति। ॥ क्रामेति। क्रमु पादविक्षेपे। अस्मात् लोटि शपि "क्रमः परस्मैपदेषु इति दीर्घः ॥ ॥

द्वितीया ॥

स्रक्त्यो॑सि प्रतिस॒रो॑सि प्रत्यभि॒चर॑णोसि।
आ॒प्नु॒हि श्रेयां॑स॒मति॑ स॒मं क्रा॑म ॥ २ ॥

स्रक्त्यः। अ॒सि॒। प्र॒ति॒ऽस॒रः। अ॒सि॒। प्र॒ति॒ऽअ॒भि॒चर॑णः। अ॒सि॒। आ॒प्नु॒हि। श्रेयां॑सम्। अति॑। स॒मम्। क्रा॒म॒ ॥ २ ॥

हे मणे स्रक्त्यः। स्रक्तिस्तिलकवृक्षः[2] तत्र भवः स्रक्त्यः। ॥ "भवे छन्दसि" इति यत्॥। तिलकवृक्षनिर्मितोसि ॥ प्रतिसरः। हन्तुम् अभिमुखाः कृत्यादयः प्रतिसार्यन्ते प्रतिमुखं निवर्त्यन्ते अनेन इति प्रतिसरः। अभिमन्त्रितं रक्षासूत्रम् असि। ॥ प्रतिपूर्वात् सारयतेः "पुंसि संज्ञायां घः०"। उपधाह्रस्वश्छान्दसः॥। अत एव महाशान्तिषु मणिबन्धनस्थाने प्रतिसरबन्धनम् उक्तं नक्षत्रकल्पे। "प्रतिसरं वा सर्वत्र" इति [न० क० १९] ॥ प्रत्यभिचरणः प्रत्यभिचर्यते निवार्यते परकृताभिचारजनिता कृत्या अनेन इति प्रत्यभिचरणः। तथाविधोसि ॥ आप्नुहीत्यादि व्याख्यातम् ॥

तृतीया ॥

प्रति तमभि चा॑र यो॑३॑स्मान् द्वेष्टि यं वयं द्वि॒प्मः।
आ॒प्नु॒हि श्रेयां॑स॒मति॑ स॒मं क्रा॑म ॥ ३ ॥

---

१ A S[m] १ for ३. We with B[h] D K R V.

---

1 S′ Kd नुदते अति. 2 S′ Kd स्रक्तितिलक°.

प्रति । तम् । अभि । चर । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ।
आऽमुहि । श्रेयांसम् । अति । सम्मम् । क्राम् ॥ ३ ॥

यः शत्रुः अस्मान् सपुत्रपशुबान्धवान् द्वेष्टि जिघांसति वयं च यम् शत्रुं द्विष्मः नाशयितुम् इच्छामः । द्विष अप्रीतौ । अदादित्वात् शपो लुक् । तम् उभयविधं द्वेष्टारं द्वेष्यं च शत्रुं हे मणे प्रत्यभि चर शत्रुकृतां कृत्यां प्रतिनिवर्त्य तमपि नाशयेत्यर्थः ॥ आमुहीत्यादि गतम् ॥

चतुर्थी ॥

सूरिरसि वर्चोधा असि तनूपानोसि ।
आमुहि श्रेयांसमति समं क्राम ॥ ४ ॥

सूरिः । असि । वर्चःऽधाः । असि । तनूऽपानः । असि ।
आमुहि । श्रेयांसम् । अति । सम्मम् । क्राम् ॥ ४ ॥

हे मणे सूरिः अभिज्ञोसि । शत्रुकृताभिचारनिवर्तनज्ञानवान् असीत्यर्थः ॥ वर्चोधाः वर्चसः तेजसो धाता विधाता असि धारयितृणाम् ॥ तथा तनूपानोसि तनूनाम् अस्मत्संबन्धिनां शरीराणां परकृताभिचारात् पालयितासि । आमुहीत्यादि पूर्ववत् ॥

पञ्चमी ॥

शुक्रोसि भ्राजोसि स्वरसि ज्योतिरसि ।
आमुहि श्रेयांसमति समं क्राम ॥ ५ ॥

शुक्रः । असि । भ्राजः । असि । स्वः । असि । ज्योतिः । असि ।
आमुहि । श्रेयांसम् । अति । सम्मम् । क्राम् ॥ ५ ॥

हे मणे शुक्रः शोचकः शत्रूणां शोचयितासि ॥ भ्राजोसि दीप्यमानः तेजस्वी भवसि ॥ स्वः ज्वरादिरोगोत्पादनेन तापकोसि । स्वृ श-

---

१ $\overset{h}{B}$ °ज्यो° corrected from °जो°. We with **A D K** B^P **R** $\overset{m}{S}$ **V.**

---

1 S' **K**d तवमवि for तमपि.

व्दोपतापयोः । अस्मात् छान्दसो विच् । यद्वा स्वः । दिवश्च आदित्यस्य च साधारणं नामैतत् । आदित्योसि आदित्यवत् कृत्यादीनाम् अभिभविता असि भवसि ॥ तथा ज्योतिः अद्न्यादिज्योतिरिव असंस्पृश्योसि । शत्रुकृताभिचारादिभिः अनाधर्षणीयोसीत्यर्थः ॥ आमुहीत्यादि व्याख्यातम् ॥

[इति] द्वितीयकाण्डे तृतीयेनुवाके प्रथमं सूक्तम् ॥

"द्यावापृथिवी उरु" इति सूक्तेन अभिचारकर्मणि दीक्षार्थं वेणुदण्डं वृश्चति । [सूत्रितं हि । "भरद्वाजप्रवस्केनाङ्गिरसं दण्डं वृश्चति" इति कौ° ६. १ ॥ तत्र "द्यावापृथिवी उर्वन्तरिक्षम्" इति सूक्तं भरद्वाजप्रवस्कम् ॥]

तथा अनेनैव सूक्तेन द्वेष्यनिषूदनकर्मणि दक्षिणाभिमुखं धावतः शत्रोः पदेषु वृक्षपत्राणि प्रक्षिप्य परशुना छित्त्वा सपांसून् पर्णच्छेदान्[1] वधकपात्रे प्रक्षिप्य आनीय भ्राष्ट्रे भर्जयेत्[2] । [कौ° ६. १] ॥

तत्र प्रथमा ॥

द्यावा॑पृथि॒वी उ॒र्वं१न्तरि॑क्षं॒ क्षेत्र॑स्य॒ पत्यु॒रुगा॑योऽङ्कुतः ।
उ॒तान्तरि॑क्षमु॒रु वात॑गोपं॒ त इ॒ह त॑प्यन्तां॒ मयि॑ तप्यमा॒ने ॥ १ ॥

द्यावा॑पृथि॒वी इति॑ । उ॒रु । अ॒न्तरि॑क्षम् । क्षेत्र॑स्य । पत्नी॑ । उ॒रु॒ऽगा॒यः । अङ्कु॑तः ।
उ॒त । अ॒न्तरि॑क्षम् । उ॒रु । वात॑ऽगोपम् । ते । इ॒ह । त॒प्य॒न्ता॒म् । मयि॑ । त॒प्य॒मा॒ने ॥ १ ॥

द्यौश्च पृथिवी च द्यावापृथिव्यौ । "[दिवो] द्यावा" इति द्यावादेशः । "वा छन्दसि" इति पूर्वसवर्णदीर्घः । "देवताद्वन्द्वे च" इति उभयपदप्रकृतिस्वरत्वम् । उरु विस्तीर्णम् अन्तरिक्षम् तयोर्मध्ये

---

१ B[h] D तप्यतां. We with A B K R S[m] P P[2] J V. २ So P P[2] J K, and not पत्नी इति.
३ P P[2] J K तप्यमाने इति.

---

1 S′ Kd पर्णछदान्. 2 Kd भर्जयेत्या for भर्जयेत्. We with S′.

वर्तमानोन्तरिक्षलोकः । क्षेत्रस्य । क्षियन्ति निवसन्ति अस्मिन्निति क्षेत्रम् उक्तं लोकत्रयम् । तस्य पत्नी अधिपतिः देवता क्रमेण अग्निवायुसूर्यात्मिका । ॥ छान्दसौ ङीम्नकारौ ॥ । अद्भुतः त्रिविक्रमरूपत्वेन सर्वलोकव्यापनाद् आश्चर्यभूतः उरुगायः उरुभिर्महानुभावैर्बहुभिर्वा गीयमानः स्तूयमानः लोकानां पालको विष्णुः । ॥ तथा च अन्यत्र आम्नातम् । "त्रेधा विष्णुरुरुगायो विचक्रमे" [तै० ब्रा० ३.१.२.६] इति । कै गै रै शब्दे । कर्मणि घञ् । "थाथघञ्क्ताजबित्रकाणाम्" इत्यन्तोदात्तत्वम् ॥ । उत अपि च वातगोपम् । वातो वायुः सूत्रात्मा गोपाः गोपायिता यस्य यद्वा वातेन गोप्यमानं धार्यमाणं वातगोपम् । ॥ तथा च वाजसनेयकम् । "वायुर्वै गौतम तत् सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि" [बृ० आ० ५.७.२] ॥ । उरु[2] विस्तीर्णं ब्रह्माण्डान्तर्व्यापि अन्तरिक्षम् महाकाशम् । एवं ये लोकास्तदधिपतयश्च सन्ति ते सर्वे इह अस्मिन् अभिचारकर्मणि मयि अभिचारके तप्यमाने दीक्षानियमेन उपवासादिना क्लिश्यमाने सति तप्यन्ताम् संतप्ता भवन्तु । अहं यथा द्वेष्यं नाशयितुम् उद्युक्तोस्मि एवं भवन्तोपि शत्रोः स्थानाद्यप्रदानेन हिंसका भवन्तु इत्यर्थः ॥

द्वितीया ॥

इ॒दं दे॑वाः शृणुत॒ ये य॒ज्ञिया॒ स्थ भ॒रद्वा॑जो मह्यमु॒क्थानि॑ शंसति ।
पाशे॒ स ब॒द्धो दु॑रि॒ते नि यु॑ज्यतां॒ यो अ॒स्माकं॒ मन॑ इ॒दं हि॒नस्ति॑ ॥२॥

इ॒दम् । दे॒वाः॒ । शृ॒णु॒त॒ । ये । य॒ज्ञि॒याः॑ । स्थ । भ॒रत्ऽवा॑जः । मह्य॑म् ।
उ॒क्थानि॑ । शंस॑ति ।
पाशे॑ । सः । ब॒द्धः । दुः॒ऽइ॒ते । नि । यु॒ज्य॒ता॒म् । यः । अ॒स्माक॑म् । म॒नः॑ । इ॒दम् । हि॒नस्ति॑ ॥ २ ॥

हे देवाः इदम् वक्ष्यमाणं मद्वाक्यं शृणुत । ये यूयं यज्ञियाः यज्ञार्हाः स्थ भवथ । ॥ "यज्ञर्त्विग्भ्यां घखञौ" इति घप्रत्ययः ॥ । किं

---

1 S′Kd आनाश्चर्यभूतः for आश्चर्यभूतः. 2 S′Kd सउरु for उरु.

तद् इति तद् आह। भरद्वाजः भरत् देवानां पोषकं वाजो हविर्लक्षणम् अन्नं यस्य सोयं भरद्वाजः वषट्कारेण देवानां हविषः प्रदाता एतन्नामको महर्षिः मह्यम् मदर्थं मदभिलषितसिद्धये उक्थानि शस्त्राणि शंसति पठति। यद्वा उक्थशब्दः स्तावकमन्त्रमात्रोपलक्षणपरः। अभिचारकर्मोचितदेवतास्तुतिपरान् मन्त्रान् प्रयुङ्क्ष इत्यर्थः॥ यः शत्रुः अस्माकम् इदम् पूर्वं सन्मार्गप्रवृत्तं मनः मानसं हिनस्ति बाधते। हिसि हिंसायाम्। इदित्त्वाद् नुम्। रुधादित्वात् श्नम्। "श्नान्नलोपः" इति नकारलोपः। "यद्वृत्तान्नित्यम्" इति निघातप्रतिषेधः। अनभिमतकार्यकरणेन इष्टविघातेन च यो विक्षिप्तं करोति स शत्रुः पाशे पाशेन मत्कृताभिचारकर्मरूपेण बद्धः निरुद्धगतिः सन् दुरिते दुर्गते मरणरूपे नियुज्यतां नियुक्तो भवतु। अनेन कर्मणा मृतिं प्राप्नोतु इत्येतत् शृणुतेति पूर्वेण संबन्धः॥

तृतीया॥

इदमिन्द्र शृणुहि सोमपा यत् त्वा हृदा शोचता जोहवीमि।
वृश्चामि तं कुलिशेनेव वृक्षं यो अस्माकं मन इदं हिनस्ति॥ ३॥

इदम्। इन्द्र। शृणुहि। सोमऽपा। यत्। त्वा। हृदा। शोचता। जोहवीमि।

वृश्चामि। तम्। कुलिशेनऽइव। वृक्षम्। यः। अस्माकम्। मनः। इदम्। हिनस्ति॥ ३॥

[पूर्वं] देवाः सामान्येन प्रार्थिताः। इदानीं तत्प्रधानभूत इन्द्रः प्रार्थ्यते। हे सोमप। सोमं पिबतीति सोमपः। "आतोनुपसर्गे कः"। तस्य संबुद्धिः। सोमपानेन सर्वदा संतुष्टमानस हे इन्द्र इदम् वक्ष्यमाणं मदीयं वाक्यं शृणुहि शृणु। "[1]उतश्च प्रत्ययाच्छन्दसि वा वचनम्" इति हेर्लुगभावः। तदेव दर्शयति यद् इति। शोचता द्वेष्यकृतापकारैः शोकार्तेन हृदा मनसा त्वा त्वां जोह-

1 S' Kd इतश्च for उतश्च.

वीमि पुनःपुनराह्वयामि । आर्तस्य अनन्यगतिकस्य मम वचनं मा उपेक्षिष्ठा इति क्रियासमभिहारेण सूचितम[1] । ह्वयतेर्यङुगन्तात् लङुत्तमैकवचने "ह्वः संप्रसारणम्" "अभ्यस्तस्य च" इति संप्रसारणम् । जोहवीमीति यत् तद्[2] इदम् इति संबन्धः । तं शत्रुं वृश्चामि छिनद्मि । ओव्रश्चू छेदने । तुदादित्वात् शः । "ग्रहिज्या०" इत्यादिना संप्रसारणम् । पादादित्वाद् अनिघातः । किमिव कुलिशेन वज्रसदृशेन परशुना वृक्षम् इव ॥ अत्र व्रश्चनलिङ्गाद् दीक्षादण्डच्छेदने शत्रुपदप्रक्षिप्तपर्णच्छेदने च विनियोग उपपन्नः ॥ यो अस्माकम् इत्यादि व्याख्यातम् ॥

चतुर्थी ॥

अशीतिभिस्तिसृभिः सामगेभिरादित्येभिर्वसुभिरङ्गिरोभिः ।
इष्टापूर्तमवतु नः पितॄणामामुं ददे हरसा दैव्येन ॥ ४ ॥

अशीतिऽभिः । तिसृऽभिः । सामऽगेभिः । आदित्येभिः । वसुऽभिः ।
अङ्गिरःऽभिः ।
इष्टापूर्तम् । अवतु । नः । पितॄणाम् । आ । अमुम् । ददे । हरसा ।
दैव्येन ॥ ४ ॥

तिसृभिः त्रिसंख्याकाभिः अशीतिभिः तृचाशीतिभिः । ताश्च अशीतय ऐतरेयके महाव्रतक्रतौ बृहदुक्थे समाम्नायन्ते । "गायत्री तृचाशीतिः औष्णिही तृचाशीतिः बार्हती तृचाशीतिः" [ऐ० आ० १. ४. ३] । ताभिस्तत्संख्याक्रान्तैस्तृचैः तत्प्रतिपाद्येन्द्रदेवतया[3] वा सामगेभिः सामगैरुह्यादिभिः तत्प्रयुक्तैः स्तोत्रैर्वा आदित्येभिः आदित्यैर्द्वादशभिः वसुभिः अष्टभिः अङ्गिरोभिः प्रसिद्धैः दीर्घसत्रानुष्ठातृभिर्महर्षिभिः । वस्वादित्यसमभिव्याहाराद् अङ्गनाद् व्यापनाद् रुद्रा वा अङ्गिरःशब्देन प्रत्येतव्याः । तैः सह । सहयोगे तृतीया । पितॄणाम् अस्मत्पूर्वपुरुषाणाम् इष्टापूर्तम् । इष्टं श्रुतिविहितं यागादि । पूर्तं स्मृत्युक्तं कूपारामतटाकादि ।

---

1 S′ Kd सूचितः. 2 S′ Kd तद्दमिति for तद् इदम् इति. 3 S′ Kd °पाद्येंद्रा°.

तदुभयजनितं सुकृतं नः अस्मान् अवतु शत्रोः सकाशाद् रक्षतु । यद्वा । ⁂ करणे तृतीया ⁂ । स्तुतशस्त्रैर्वसुरुद्रादित्यरूपाभिः सवनदेवताभिश्च निष्पादितं पितॄणाम् इष्टापूर्तम् अस्मान् अवतु इति ॥ रक्षाप्रार्थनायाः प्रयोजनम् आह । अमुम् अपकर्तारम् अमुकनामानं शत्रुं दैव्येन देवसंबन्धिना । मत्कृताभिचारजनितकृत्यारूपदेवताकृतेनेत्यर्थः । हरसा । क्रोधनामैतत् । क्रोधेन आ ददे स्वीकरोमि । निगृह्णामीत्यर्थः । ⁂ "आङो दोऽनास्यविहरणे" इत्यात्मनेपदम् ⁂ ॥

पञ्चमी ॥

द्यावा॑पृथिवी॒ अनु॑ मा दीधीतां॒ विश्वे॑ देवासो॒ अनु॑ मा॒ रभध्वम् ।
अङ्गि॑रसः॒ पित॑रः॒ सोम्या॑सः॒ पापमार्छ॑त्वपका॒मस्य॑ क॒र्ता ॥ ५ ॥

द्यावा॑पृथिवी॒[1] इति॑ । अनु॑ । मा॒ । आ । दी॒धी॒ता॒म् । विश्वे॑ । दे॒वा॒सः॒ । अनु॑ । मा॒ । आ । र॒भ॒ध्व॒म् ।
अङ्गि॑रसः । पित॑रः । सोम्या॑सः । पाप॑म् । आ । ऋ॒च्छ॒तु॒ । अप॑ऽकामस्य । क॒र्ता ॥ ५ ॥

द्यावापृथिवी हे द्यावापृथिव्यौ मा शत्रुनिरसनार्थं दीप्तं माम् अनु युवामपि आ दीधीथाम् आदीप्ते भवतम् । शत्रुजयार्थम् आनुकूल्यं कुरुतम् इत्यर्थः । ⁂ "अनुर्लक्षणे" इति अनोः कर्मप्रवचनीयसंज्ञायां "कर्मप्रवचनीययुक्ते द्वितीया" इति अस्मच्छब्दाद् द्वितीया । दीधीङ् दीप्तिदेवनयोः इत्यस्मात् लोटि अदादित्वात् शपो लुक् ⁂ ॥ विश्वे देवासः हे विश्वे देवाः एतन्नामानो गणदेवाः मा शत्रुजयार्थम् उद्युक्तं माम् अनु [आ रभध्वम् शत्रुं निग्रहीतुम् उद्युक्ता भवत । तथा हे सोम्यासः सोमार्हा अङ्गिरसः हे तथाविधाः पितरः एतन्नामानो देवाः ।] यूयमपि आ रभध्वम् इति पूर्वेण संबन्धः ॥ प्रार्थनायाः प्रयोजनं दर्शयति । अपकामस्य अनभिमतस्य कार्यस्य द्रोहस्य कर्ता शत्रुः पापं मृतिलक्षणम्

---

१ K P °पृथिवी इति. We with $\dot{P}^2$ J.

आर्च्छतु प्राप्नोतु । ऋच्छ गतौ । "उपसर्गाद् ऋति धातौ" इति गुणापवादो वृद्धिः ॥

षष्ठी ॥

अतीव॒ यो म॑रुतो॒ मन्य॑ते नो॒ ब्रह्म॑ वा॒ यो नि॒न्दिष॑त् क्रि॒यमा॑णम् ।
तपूँ॑षि॒ तस्मै॑ वृजि॒नानि॑ सन्तु ब्रह्म॒द्विषं॒ द्यौर॑भि॒संत॑पाति ॥ ६ ॥

अति॑ऽइव । यः । म॒रु॒तः॒ । मन्य॑ते । नः॒ । ब्रह्म॑ । वा॒ । यः । नि॒न्दि॑ष॒त् । क्रि॒यमा॑णम् ।
तपूँ॑षि । तस्मै॑ । वृ॒जि॒नानि॑ । स॒न्तु॒ । ब्र॒ह्म॒ऽद्विष॑म् । द्यौः । अ॒भि॒ऽसंत॑पाति ॥ ६ ॥

हे मरुतः एकोनपञ्चाशत्संख्याका गणदेवाः यः शत्रुः नः अस्मान् अतीव अतिक्रान्त इव मन्यते आत्मानं जानाति । मन ज्ञाने । "दिवादिभ्यः श्यन्" । "यङ्वृत्तान्नित्यम्" इति निघातप्रतिषेधः । यश्च शत्रुः । वाशब्दः चार्थे । क्रियमाणम् अस्माभिरनुष्ठीयमानं ब्रह्म मन्त्रसाध्यं कर्म निन्दिषत् निन्देत् । णिदि कुत्सायाम् । इदित्त्वान्नुम् । "लेटोडाटौ" इत्यडागमः । "सिब्बहुलम्०" इति सिप् । तस्मै उभयविधाय शत्रवे तपूंषि तापकानि तेजांसि आयुधानि वा वृजिनानि वर्जकानि वाधकानि सन्तु । तप संतापे इत्यस्माद् जनेरुसिः [उ०२.११४] इत्यनुवृत्तौ अर्तिपॄवपियजितनिधनितपित्रपिभ्यो नित् [उ०२.११६] इत्युसिप्रत्ययः । नित्त्वाद् आद्युदात्तः । वृजी वर्जने । [वृजेः] किच्च [उ०२.४७] इति इनच् प्रत्ययः । कित्त्वाद् गुणाभावः । चित्त्वाद् अन्तोदात्तः । द्यौः आदित्यः । द्युस्थानत्वात् । ब्रह्मद्विषम् मदीयं कर्म द्विषन्तं शत्रुम् अभिसंतपाति अभितः संतपतु । तपतेः पञ्चमलकारे "लेटोडाटौ" इत्याडागमः ॥

सप्तमी ॥

स॒प्त प्रा॒णान॒ष्टौ म॑न्यस्तांस्ते वृश्चामि॒ ब्रह्म॑णा ।

---

१ P² निदिंपत्. We with P J. २ A B^h D R S^m P मुञ्च°. We with K P² J B V.

अया॑ यमस्य सादनमग्निदू॑तो अरं॑कृतः ॥ ७ ॥

सन्न । प्राणान् । अष्टौ । मन्यः । तान् । ते । वृश्चामि । ब्रह्मणा ।

अयाः । यमस्य । सदनम । अग्निऽदूतः । अरंमऽकृतः ॥ ७ ॥

सन्न सन्नसंख्याकान् प्राणान् शीर्षण्यान् चक्षुरादीन्द्रियाणि । छिद्रापेक्षया सन्नसंख्या । "सन्न वै शीर्षण्याः प्राणाः" इति [तै° ब्रा° १. २. ३. ३] श्रुतेः । अष्टौ मन्यः धमन्यः कण्ठगता नाडीविशेषाः । तान् अष्टौ अष्टसंख्याकान् प्रधानभूतांश्च वृश्चामीत्यन्वयः । ते तव संबन्धिनस्तान् प्रसिद्धान् अवशिष्टावयवान् ब्रह्मणा मन्त्रेण तत्साध्याभिचारकर्मणा वा वृश्चामि छिनद्मि ॥ एवं मन्त्रप्रभावेन छिन्नसर्वाङ्गस्त्वं यमस्य अन्तकस्य सदनम् गृहम् अयाः याहि गच्छ । यातेश्छान्दसे लुङि "मन्त्रे घस°" इति च्लेर्लुक् । गमनप्रकारम् आह । अग्निदूतः अग्निर्दूतः अनुचरो यस्य स तथोक्तः दाहार्थं तस्यैव आनीयमानत्वात् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । अरंकृतः अलंकृतः शवालंकारेण विभूषितः । "वालमूलललग्वलमङ्गुलीनाम्°" इति रत्वविकल्पः । "भूषणेलम्" इति [गति]संज्ञायां "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम् ॥

अष्टमी ॥

आ दं॑धामि ते प॒दं समि॑द्धे जा॒तवे॑दसि ।

अ॒ग्निः शरी॑रं वेवे॒ष्ट्वसुं॑ वागपि॑ गच्छतु ॥ ८ ॥

आ । दधामि । ते । पदम । समऽइ॑द्धे । जातऽवे॑दसि ।

अ॒ग्निः । शरी॑रम । वे॒वे॒ष्टु । अस॑म । वाक् । अपि॑ । ग॒च्छ॒तु ॥ ८ ॥

समिद्धे सम्यग्दीप्ते ज्वलिते जातवेदसि अग्नौ । जातानि जनिमन्ति भूतानि वेत्ति तैर्विद्यते ज्ञायते इति वा जातेषु सर्वेषु भूतेषु वैश्वानररूपेण विद्यते सत्तां लभत इति वा जातवेदाः । यद् उक्तं यास्के-

---

१ P मज्ञः. We with $\dot{P}^2$ K J.

न । जातवेदाः कस्मात् । जातानि वेद जातानि वैनं विदुर्जातेजाते विद्यत इति वा" [नि० ७.१९] इत्यादि ॥ । तस्मिन्नग्नौ हे शत्रो ते तव पदम् छिन्नपर्णसहितं पदपांसुम् आ दधामि प्रक्षिपामि । भ्राष्ट्रेऽग्निसंतप्ते भर्जयामीत्यर्थः ॥ अग्निः शरीरं त्वदीयं वेवेष्टु पदपांसुद्वारा पादं प्रविश्य कृत्स्नम् अङ्गं व्याप्नोतु । दहतु इत्यर्थः । ॥ विष्लृ व्याप्तौ । जुहोत्यादित्वात् शपः श्लुः । "निजां त्रयाणां गुणः श्लौ" इत्यभ्यासस्य गुणः ॥ वागपि वागिन्द्रियं च असुम् प्राणं गच्छतु प्राप्नोतु । उपलक्षणम् एतत् । सर्वेन्द्रियव्यवहारशून्यो भवतु इत्यर्थः ॥

इति द्वितीयकाण्डे तृतीयेनुवाके द्वितीयं सूक्तम् ॥

"आयुर्दाः" इति सूक्तं गोदानाख्ये संस्कारकर्मणि शान्त्युदके अनुयोजयेत् । तत्रैव कर्मणि अनेनैव सूक्तेन आज्यं हुत्वा ब्रह्मचारिणो मूर्ध्नि संपातान् आनयेत् । "आयुर्दा इति गोदानं कारयिष्यन्" इति प्रक्रम्य सूत्रितम् । "शान्त्युदकं करोति तत्रैतत् सूक्तम् अनुयोजयति" इति [कौ० ७.४] "आयुर्दा इत्येतेन सूक्तेन आज्यं जुह्वन् मूर्ध्नि संपातान् आनयति" इति च [कौ० ७.४] ॥

तत्रैव कर्मणि "परि धत्त" [२,३] इति द्वाभ्यां नवं वासः प्रयच्छेत् ॥

"एह्यश्मानम्" [४] इत्यनया दक्षिणेन पादेन अश्मानम् आस्थापयेत् ॥

"यस्य ते वासः" [५] इत्यनया पूर्वपरिहितं वासः कर्ता गृह्णीयात् ॥

"अथैनम् अहतेन वसनेन परिधापयति परिधत्तेति द्वाभ्याम् एह्यश्मानम्" इत्यादि [कौ० ७.५] सूत्रम् अत्र द्रष्टव्यम् ॥

तथा "परि धत्त" [२,३] इति द्व्यृचेन पुरोहितः प्रातःप्रातर्वस्त्रम् अभिमन्त्र्य राज्ञे दद्यात् । उक्तं परिशिष्टे । "अथ पुरोहितकर्माणि" इति प्रक्रम्य "परि धत्तेति [द्वाभ्यां] राज्ञो वस्त्रम् अभिमन्त्र्य प्रयच्छेत्" इति [अ० प० ४.१] ॥

तथा आरात्रिकविधाने चतस्रः शर्कराः प्रतिदिशं क्षिप्त्वा पञ्चमीम्

---

1 S′Kd पाद° for पद°. 2 S′Kd आनयंतीति for आनयति इति. We with *Kaus'ika*.

"एह्यश्मानम्" [४] इत्यनया राजानम् आस्थापयेत्। उक्तं परिशिष्टे। "एह्यश्मानम् आतिष्ठेति पञ्चमीम् अधिष्ठापयेत्" इति [अ० प० ४. ४] ॥

तत्र प्रथमा ॥

आयुर्दा अग्ने जरसं वृणानो घृतप्रतीको घृतपृष्ठो अग्ने।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रानभि रक्षतादिमम् ॥ १ ॥
आयुःऽदाः। अग्ने। जरसम्। वृणानः। घृतऽप्रतीकः। घृतऽपृष्ठः। अग्ने।
घृतम्। पीत्वा। मधु। चारु। गव्यम्। पिताऽइव। पुत्रान्। अभि।
रक्षतात्। इमम् ॥ १ ॥

हे अग्ने आयुर्दाः आयुषो दाता। माणवकस्य भवेति शेषः। कियत्पर्यन्तं तद् आयुरिति तत्राह। जरसम् जरां वृणानः संभजमानः। जरापर्यन्तं शतसंवत्सरपरिमितं दीर्घम् आयुः प्रयच्छेत्यर्थः ॥ हे अग्ने त्वं घृतप्रतीकः घृताहुतिभिः उद्भूतज्वालारूपावयवः घृतपृष्ठः घृतमेव पृष्ठं पृष्ठवंशवत् सर्वावयवाधारभूतं गात्रं यस्य स तथोक्तः। घृतोपादानकशरीर इत्यर्थः ॥ यत एवम् अतो हेतोः मधु मधुरं चारु निर्मलं मन्त्रसिद्धं गव्यम् गवि भवम्। ⁂ "सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यद् वक्तव्यः" इति यत्। "यतोऽनावः" इत्याद्युदात्तत्वम् ⁂। एवंगुणविशिष्टं घृतम् अस्माभिर्हुतं पीत्वा यथेच्छं स्वीकृत्य तुष्टः सन् पिता जनकः पुत्रान् आत्मीयानिव इमम् माणवकम् अभि रक्षतात् अभिरक्ष। पिता यथा सापराधानपि पुत्रान् पालयति एवं त्वम् एनं पाहीत्यर्थः। ⁂ रक्ष पालने। लोण्मध्यमैकवचने हेस्तातङ् आदेशः ⁂ ॥

द्वितीया ॥

परि धत्त धत्त नो वर्चसेमं जरामृत्युं कृणुत दीर्घमायुः।
बृहस्पतिः प्रायच्छद् वास एतत् सोमाय राज्ञे परिधातवा उ ॥ २ ॥
परि। धत्त। धत्त। नः। वर्चसा। इमम्। जराऽमृत्युम्। कृणुत।
दीर्घम्। आयुः।

---

1 S′ Kd पृष्ठवंशवंशवत् for पृष्ठं पृष्ठवंशवत्.

बृहस्पतिः । प्र । अयच्छत् । वासः । एतत् । सोमाय । राज्ञे । परिऽधा-
तवै । ऊं इति ॥ २ ॥

वाससः सर्वदेवत्यत्वात् तदभिमानिदेवानामेव संबोध्यत्वम् । तथात्वं च वाससः तैत्तिरीयके समाम्नायते । "अग्नेस्तूषाधानम्" इति प्रक्रम्य "तद् वा एतत् सर्वदेवत्यं यद् वासः" [तै० सं० ६.१.१.३] इति । हे देवाः परि धत्त । ॥ अन्तर्भावितण्यर्थः ॥ । इमम् माणवकं वासः परिधापयत । नः अस्मदीयम् इमं वर्चसा तेजसा धत्त पोषयत । तेजस्विनं कुरुतेत्यर्थः ॥ किं च । इममेव माणवकं जरामृत्युम् । जरयैव मृत्युर्मूर्तिर्यस्य स तथोक्तः । तथाविधं [कृणुत] कुरुत । अकालमृतिर्मा भूद् इत्यर्थः । एतदेव आह दीर्घम् इति । अस्य माणवकस्य दीर्घं शतपरिमितम् आयुरस्तु ॥ तदेव वासः प्रशंसति । बृहस्पतिः बृहताम् इन्द्रादीनां पतिः एतन्नामा देवः । ॥ "तद्बृहतोः करपत्योः०" इति सुट्तलोपौ । "पत्यावैश्वर्ये" इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते "उभे वनस्पत्यादिषु युगपत्" इत्युभयपदप्रकृतिस्वरत्वम् ॥ । एतन्नामा देवः एतत् प्रकृतं वासः सोमाय राज्ञे ब्राह्मणानां स्वामिने । "सोमोस्माकं ब्राह्मणानां राजा" [तै० सं० १.८.१०.२] इति श्रुतेः । परिधातवै परिधातुम् । ॥ "तुमर्थे सेसेन्०" इति तवैप्रत्ययः । "तवै चान्तश्च युगपत्" इति उभयपदप्रकृतिस्वरत्वम् ॥ । प्रायच्छत् अददात् । ॥ [दाण्] दाने इत्यस्मात् लङि "पाघ्रा०" इत्यादिना यच्छादेशः । उ इति पदपूरणः ॥ । अनेन वस्त्राणां सोमदेवताकत्वं सूचितम् । तथा च श्रुत्यन्तरम् । "सौम्यं वै वासः । स्वयैवैनद्[1] देवतया प्रतिगृह्णाति" [तै० ब्रा० २.२.५.२] इति ॥

तृतीया ॥

परीदं वासो अधिथाः स्वस्तयेभूर्गृष्टीनामभिशस्तिपा उ ।
शतं च जीव शरदः पुरूची रायश्च पोषमुपसंव्ययस्व ॥ ३ ॥

---

1 S'Kd स्वयैवैनं देवतया.

परिं। इदम्। वासः। अधिथाः। स्वस्तयें। अभूः। गृष्टीनाम्। अभि-
शस्तिऽपाः। ऊं इतिं।
शतम्। च। जीवं। शरदः। पुरूचीः। रायः। च। पोषम्। उपऽसं-
व्ययस्व॥ ३॥

हे माणवक इदम् उक्तं वासः वस्त्रं स्वस्तये क्षेमाय पर्यधिथाः परिहितवानसि। ⁂[परि]पूर्वाद् धाञो लुङि "स्याग्वोरिच्च" इति इत्वकित्त्वे। "ह्रस्वाद् अङ्गात्" इति सिज्लोपः ⁂॥ तेन परिधानेन गृष्टीनाम् गवाम् अभिशस्तिपाः। अभिशस्तिः अभितो विशसनं हिंसा। तन्निमित्ताद् भयात् पालकोभूः। पुरा खलु देवा मनुष्याणां दृढतरां त्वचं छित्त्वा क्षीरप्रदानक्षेत्रकर्षणभारोद्वहनादिबहुविधोपकारकारिषु गोषु न्यदधुः। ते च तया त्वचा संवीतगात्राः शीतवातातपादिसहनशीला बभूवुः। अत एव कारणाद् नग्नं पुरुषं दृष्ट्वा स्वकीयां त्वचम् अस्मासु स्थिताम् असौ ग्रहीतुम् आगच्छतीति बिभ्यति। तस्माद् गोसमीपं विवसनो न गच्छेद् इति। तथा च शतपथब्राह्मणे तृतीयकाण्डे दीक्षाप्रकरणे समाम्नायते। "अथ वासः परिधत्ते। सर्वत्वायैव स्वामेवास्मिन्नेतत् त्वचं दधाति। "या ह वा इयं गोस्त्वक् पुरुषे हैषाग्र आस। ते देवा अब्रुवन्। गौर्वा "इदं सर्वं बिभर्ति। हन्त येयं पुरुषे त्वक् गव्येतां दधाम। तयैषा वर्षन्तं "तया हिमं तया घृणिं तितिक्षिष्यत इति। तेवच्छाय पुरुषं गव्येतां त्वचम् "अदधुः। तयैषा वर्षन्तं तया हिमं तया घृणिं तितिक्षते अवच्छितो ह वै "पुरुषः। तस्माद् अस्य यत्रैव क्व च कुशो वान्यद् वा विकृन्तति तत "एव लोहितम् उत्पद्यते तद् एतां ह्यस्मिंस्त्वचम् अदधुर्वास एव। तस्मा-"न्नान्यः पुरुषाद् वासो बिभर्ति। तस्मादु सुवासा एव बुभूषेत्। नो "हान्ते गोर्नग्नः स्यात्। वेद हि गौरहम् अस्य त्वचं बिभर्मीति। सा "बिभ्यती त्रसति त्वचं म आदास्यते" इति [श॰ब्रा॰३.१.२.१३]।

---

1 S′ Kd °कर्षभा°. 2 S′ Kd सर्वत्रा°. 3 S′ Kd हैवाग्र आस. 4 S′ Kd हिसंतया for हिमं तया. 5 S′ Kd तेच for तेव°. 6 S′ Kd हिसंतया for हिमं तया. 7 S′ Kd कुतो for कुशो. 8 S′ Kd सुवात्सीएववुभूषेत्. 9 S′ Kd गौर्न°. 10 S′ Kd आदास्यतीति.

एषैव त्वगादानभीतिः अत्र अभिशस्तिशब्देन विवक्षिता । तस्या अभिशस्तेर्वासःपरिधानेन [ता] निवर्तयेत्यभिप्रायः ॥ किं च पुरूचीः बहुकालम अञ्चन्तीः बहुविधान् पुत्रपौत्रादीन् वा व्याप्नुवतीः । पुरुपूर्वाद् अञ्चतेः "ऋत्विग्०" इत्यादिना क्विन् । "अनिदिताम्०" इति नलोपः । "अञ्चतेश्चोपसंख्यानम्" इति ङीप् । "अचः" इत्यकारलोपे "चौ" इति दीर्घः । शतम् शतसंख्याकाः शरदः संवत्सरान् जीव ॥ अपि च रायः धनस्य पोषम् पुष्टिं समृद्धिम उपसंव्ययस्व परिधत्स्व । एतद्वासःपरिधानेन धनादिसमृद्धिर्भवतीति भावः ॥

चतुर्थी ॥

एह्यश्मानमा तिष्ठाश्मा भवतु ते तनूः ।
कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम् ॥ ४ ॥

आ । इहि । अश्मानम् । आ । तिष्ठ । अश्मा । भवतु । ते । तनूः ।
कृण्वन्तु । विश्वे । देवाः । आयुः । ते । शरदः । शतम् ॥ ४ ॥

हे माणवक एहि आगच्छ ॥ अश्मानम् आ तिष्ठ दक्षिणेन पादेन आक्रम ॥ ते तव तनूः शरीरम् अश्मा भवतु । अश्मवद् रोगादिविनिर्मुक्तं दृढं भवतु ॥ विश्वे देवाश्च ते तव शतसंवत्सरपरिमितम् आयुः कृण्वन्तु कुर्वन्तु । "युष्मत्ततक्षुष्वन्तःपादम" इति सकारस्य षत्वम ॥

पञ्चमी ॥

यस्य ते वासः प्रथमवास्यै१ हरामस्तं त्वा विश्वेवन्तु देवाः ।
तं त्वा भ्रातरः सुवृधा वर्धमानमनु जायन्तां बहवः सुजातम् ॥ ५ ॥

यस्य । ते । वासः । प्रथमऽवास्यसि । हरामः । तम् । त्वा । विश्वे ।
अवन्तु । देवाः ।
तम् । त्वा । भ्रातरः । सुऽवृधा । वर्धमानम् । अनु । जायन्ताम् । बहवः । सुऽजातम् ॥ ५ ॥

हे माणवक यस्य परिहितवस्त्रस्य ते तव प्रथमवास्यम् पूर्वं परि-

हितं वासः वस्त्रं हरामः स्वीकुर्मः। ✕वस आच्छादने इत्यस्मात् "ऋहलोर्ण्यत्" इति कर्मणि ण्यत्। "तित् स्वरितः" इति स्वरितत्वम्✕। तम् तादृशं त्वा त्वां विश्वे सर्वे देवा अवन्तु रक्षन्तु॥ तम् उक्तरूपं सुवृधा शोभनया वृद्ध्या वर्धमानम् पशुपुत्रधनादिभिरुपचीयमानं सुजातम् संस्कारविशेषेण शोभनजन्मयुक्तं [त्वा] त्वाम् अनु बहवो भ्रातरो जायन्ताम् उत्पद्यन्ताम्॥

इति द्वितीयकाण्डे तृतीयेनुवाके तृतीयं सूक्तम्॥

"निःसालाम्" इति सूक्तेन मृतापत्यायाः स्त्रिया अपत्यनाशपरिहाराय त्रिषु मण्डपेषु[1] एकैकस्मिन्नुदपात्रे सीसेषु च संपातानयनम् सीसोपरि स्थितायास्तस्याः संपातितोदकेन आत्मावनं च कृत्वा स्वगृहम् आनीय शान्त्युदकेन अभिषिच्य तस्यै पुरोडाशकन्दुकालङ्कारान्[2] अभिमन्त्र्य दद्यात्॥

अथ वा एकस्मिन्नेव मण्डपे[1] अनेन सूक्तेन औदुम्बरीः समिधस्तया आधाय्य पूर्ववत् शान्त्युदकाभिषेकादिकं कुर्यात्॥

सूत्रितं हि। "निःसालाम् इत्यवतोकायै कृष्णवसनायै त्रिषु विमितेषु" इत्यादि "औदुम्बरीराधापयत्युक्तम् आव्रजितायै" इत्यन्तम् [कौ० ४.१०]॥

यस्य गृहे गवादिर्वन्ध्या भवति तद् गृहं दैवहतं भवति तद्दोषनिवृत्तये तयैव वशया यागः कार्यः। तत्र अनेन सूक्तेन तस्याः पर्यग्निकरणं कुर्यात्। "य आत्मदा इति वशाशमनम्" इति प्रक्रम्य सूत्रितम्। "निःसालाम् इत्युल्मुकेन त्रिः प्रसव्यं परिहरति" इति [कौ० ५. ८]॥

आवसथ्याधाने क्रव्यादाग्निनिर्हरणानन्तरं शालाप्रोक्षणेपि एतत् सूक्तं विनियुक्तम्। "एकाग्निम् आधास्यन्" [कौ० ९. १] इति प्रक्रम्य सूत्रितम्। "निःसालाम्[२.१४] इति शालानिवेशनं प्रोक्षति[3] ऊर्जं बिभ्रत् [७. ६२] इति प्रपादयति" इति [कौ० ९. ४]॥

एतत् सूक्तं चातनगणेपि पठितम्। अतः "चातनानाम् अपनोदनेन व्याख्यातम्" [कौ० ४.१]। "चातनो मातृनामा च" [न० क० २३] "चात-

---

1 S′ Kd मण्टपे°. 2 S′ Kd पुरोडाशकंतु°. 3 So S′ Kd. The Sûtra: संप्रोक्ष्योर्जं.

नैर्मातृनामभिः" [शा०क०१५] इत्यादिप्रदेशेष्वपि एतत् सूक्तं द्रष्टव्यम् ॥

तत्र प्रथमा ॥

नि॒ःसा॒लां धृ॒ष्णुं धि॒ष॒ण॑मेकवा॒द्यां जि॑घ॒त्स्व॒म् ।
सर्वा॒श्चण्ड॑स्य नप्त्यो॒ नाश॑यामः स॒दान्वा॑ः ॥ १ ॥

नि॒ःऽसा॒लाम् । धृ॒ष्णुम् । धि॒ष॒ण॑म् । एक॒ऽवा॒द्या॒म् । जि॒घ॒त्ऽस्व॒म् ।
सर्वा॑ः । चण्ड॑स्य । नप्त्यः॑ । नाश॑यामः । स॒दाऽन्वा॑ः ॥ १ ॥

निःसालाम् । ॒षल गतौ॒ । निःसालयति निर्गमयति अपसारयतीति निःसाला एतन्नामधेया पिशाची । यद्वा सालो[1] वृक्षविशेषः । ततो निर्गता निःसाला । ततोपि उन्नतगात्रीत्यर्थः । तां धृष्णुम् धर्षणशीलां भयस्य जनयित्रीम् एतन्नामिकां पिशाचीम् । ॒"त्रसिगृधिधृषिक्षिपेः क्नुः" ॒ । धिषणम् । धृष्णोति अभिभवतीति धिषणः । ॒धृषेर्धिष च संज्ञायाम् इति [उ०२.८२] क्युः॒ । एतन्नामानं पापग्रहम् । एकवाद्याम् एकम् एकप्रकारं परुषरूपं[2] वाद्यं वचनं यस्याः सा तथोक्ता । यद्वा एकवारमेव वाद्यं वचनं यस्याः सा । सकृद्भाषिणीत्यर्थः । ताम् एतन्नामिकां जिघत्स्वम् जिघत्सुं भक्षणेच्छुम् । सर्वदा भक्षणशीलाम् इत्यर्थः । ॒अदेः सनि घस्लादेशे "सस्यार्धधातुके" इति तत्वम् । "सनाशंसभिक्ष उः" इति उप्रत्ययः । "वा छन्दसि" इति अमि-पूर्वत्वस्य विकल्पनाद् यण् आदेशः॒ । तां च । नाशयाम इति सर्वत्र संबन्धः ॥ तथा चण्डस्य क्रुद्धस्य एतन्नामकस्य पापग्रहस्य नप्त्यः नप्त्रीः अपत्यभूताः सर्वाः निखिलाः सदान्वाः सदा नोनूयमानाः आक्रोशकारिणीः पिशाचीश्च नाशयामः । उक्तं यास्केन । ॒सदान्वे । सदानोनुवे शब्दकारिके [नि० ६.३०] इति । नौतेः शब्दकर्मणो यङुगन्तात् पचाद्यचि "द्विर्वचनप्रकरणे छन्दसि वेति व-

---

१ Our manuscript and other authorities निःसा° and not निस्सा°. २ So P P[2] J K.

---

1 S′ Kd सालावृक्ष°. 2 S′ Kd पुरुष°.

क्त्व्यम्" इति वचनाद् द्विर्वचनाभावः। "न धातुलोप आर्धधातुके" इति गुणप्रतिषेधे छान्दसो यण् आदेशः ॥

द्वितीया ॥

निर्वो गोष्ठादजामसि निरक्षान्निरुपानसात्।
निर्वो मगुन्द्या दुहितरो गृहेभ्यश्चातयामहे ॥ २ ॥
निः। वः। गोऽस्थात्। अजामसि। निः। अक्षात्। निः। उपऽआनसात्।
निः। वः। मगुन्द्याः। दुहितरः। गृहेभ्यः। चातयामहे ॥ २ ॥

हे मगुन्द्या दुहितरः मगुन्दी नाम काचन पिशाची तस्याः पुत्र्यः वः युष्मान् गोष्ठात्। गावस्तिष्ठन्त्यस्मिन्निति गोष्ठं गोशाला। "घञर्थे कविधानम्" इति कः। "अम्बाम्बगोभूमि०" इत्यादिना षत्वम्। तस्माद् गोष्ठात् निरजामसि निरजामः निःसारयामः। अज गतिक्षेपणयोः। "इदन्तो मसिः"। तथा अक्षात् अक्षक्रीडास्थानाद् द्यूतशालायाः सकाशाद् निरजामः॥ एवम् उपानसात्। अनसः समीपम् उपानसं धान्यगृहम्। तस्माद् निरजामः। "अव्ययीभावे शरत्प्रभृतिभ्यः" इति शरत्प्रभृतिषु अनःशब्दस्य पाठात् टच् समासान्तः। यद्वा उपगतं च तद् अनश्च उपानसं धान्यपूर्णं शकटम्। "अनोश्मायःसरसां जातिसंज्ञयोः" इति तत्पुरुषे टच् समासान्तः॥ तथा गृहेभ्यः आवासमन्दिरेभ्यो वः युष्मान् निश्चातयामहे निःसार्य निःशेषेण वा विनाशयामः। चातयतिर्नाशने इति यास्कः [नि० ६. ३०]॥

तृतीया ॥

असौ यो अधराद् गृहस्तत्र सन्त्वराय्यः।
तत्र सेदिर्नि षीदतु सर्वाश्च यातुधान्यः ॥ ३ ॥
असौ। यः। अधरात्। गृहः। तत्र। सन्तु। अराय्यः।
तत्र। सेदिः। नि। उच्यतु। सर्वाः। च। यातुऽधान्यः ॥ ३ ॥

---

१ P P̂ J °गुंद्या। We with Sâyaṇa. २ Our MSS सेदिर्नि°.

असौ विप्रकृष्टो यः प्रसिद्धः अधरात् अधरः अस्माल्लोकाद् अधरभूतः अधस्ताद्देशे वा वर्तमानो गृहः गृहवन्निवासभूतः पाताललोकोस्ति । ⧖"उत्तराधरदक्षिणाद् आतिः" इति आतिप्रत्ययः⧖ । तत्र लोके अराय्यः अदायिन्यः दानोपलक्षितनिखिलश्रेयोविघ्नकारिण्यः एतत्संज्ञिकाः पिशाच्यः सन्तु । इमं लोकं विसृज्य अत्यन्तविप्रकृष्टं पातालं गच्छन्तु इत्यर्थः । ⧖रा दाने इत्यस्मात् नञ्युपपदे "सुप्यजातौ णिनिस्ताच्छील्ये" इति णिनिः । छान्दसोन्त्यलोपः⧖ । यद्वा रायते दीयत इति रायो धनम् । ⧖कर्मणि घञ्⧖ । न रायः अरायः अधनम् आसाम् अस्तीत्यराय्यः अलक्ष्म्यः । ⧖"छन्दसीवनिपौ०" इति मत्वर्थीय ईकारः⧖ । "अरायि काणे विकटे गिरिं गच्छ सदान्वे" इति हि श्रुत्यन्तरम् [ऋ.१०.१५५.१] ॥ सादयति नाशयतीति सेदिर्निर्ऋतिः । "जहामि सेदिम् अनिराम् अमीवाम्" [तै० सं० ४.२.७.२] इति श्रुत्यन्तरात् । ⧖"उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्" इति सदेः किप्रत्ययः । तस्य लिङ्वद्भावाद् द्विर्वचने एत्वाभ्यासलोपौ⧖ । सापि तत्र पाताले न्युच्यतु । नीचीना समवैतु । इमं लोकं विहाय पूर्वोक्ताभिः सह निवसतु इत्यर्थः । ⧖उच समवाये दिवादिः⧖ ॥ किं च सर्वाः निखिला यातुधान्यः यातवो यातनाः पीडास्ताः प्राणिभ्यो धीयन्ते क्रियन्त आभिरिति यातुधान्यः उक्ताभ्योन्याः पिशाच्यः । ⧖करणे ल्युट्⧖ । तत्र न्युच्यन्तु इति वचनविपरिणामेन संबन्धः ॥

चतुर्थी ॥

भूतपतिर्निरजत्विन्द्रश्चेतः सदान्वाः ।
गृहस्य बुध्न आसीनास्ता इन्द्रो वज्रेणाधि तिष्ठतु ॥ ४ ॥

भूतऽपतिः । निः । अजतु । इन्द्रः । च । इतः । सदान्वाः ।
गृहस्य । बुध्ने । आसीनाः । ताः । इन्द्रः । वज्रेण । अधि । तिष्ठतु ॥ ४ ॥

भूतपतिः भूतानां पालको रुद्रः सदान्वाः सदा नोनूयमाना आक्रोशकारिणीः पिशाचीः इतः अस्माद् मदीयात् स्थानात् निरजतु निःसा-

रयतु ॥ इन्द्रश्च ता निरजतु ॥ गृहस्य मदीयस्य बुध्ने मूले अधःप्रदेशे। ब्रन्धेर्व्रधिबुधी च [उ० ३. ५] इति नक् प्रत्ययः। आसीनास्ताः पिशाचीः इन्द्रः इराया भूमेर्दारको देवः। इन्द्र इरां हणातीति वा इरां दारयतीति वा इति हि निरुक्तम् [नि० १०. ८]। वज्रेण आयुधेन अधि तिष्ठतु। यथा पुननोंत्तिष्ठन्ति तथा आक्रम्य तिष्ठतु इत्यर्थः ॥

पञ्चमी ॥

यदि॑ स्थ क्षे॑त्रि॒याणां॑ यदि॑ वा पुरु॑षेषिताः।
यदि॒ स्थ दस्यु॑भ्यो जा॒ता नश्य॑ते॒तः स॒दान्वा॑[1]ः ॥ ५ ॥

यदि॑। स्थ। क्षे॒त्रि॒याणा॑म्। यदि॑। वा॒। पुरु॑षऽइषिताः।
यदि॑। स्थ। दस्यु॑ऽभ्यः। जा॒ता॑[2]ः। नश्य॑त। इ॒तः। स॒दा॑[3]न्वा॑ः ॥ ५ ॥

हे* सदान्वाः। पिशाच्य इति शेषः। यूयं क्षेत्रियाणाम् क्षेत्रात् परक्षेत्रात् मातापितृशरीराद् आगतानां कुष्ठापस्मारग्रहण्यादिरोगाणां निदानभूता यदि स्थ भवथ। यदि वा पुरुषेषिताः पुरुषैः शत्रुभिः प्रेषिता भवथ। इष गतौ इत्यस्मात् कर्मणि निष्ठा। "तीषसहलुभरुषरिषः" इत्यत्र इषु इच्छायाम् इत्यस्यैव ग्रहणात् "यस्य विभाषा" इति तस्यैव निष्ठायाम् इट्प्रतिषेधो न तु इष गतौ इत्यस्य इति निष्ठायाम् इट् भवति। "तृतीया कर्मणि" इति पूर्वपदप्रकृतिस्वरत्वम्। दस्युभ्यः उपक्षयकारिभ्यश्चोरादिभ्यः। दसु उपक्षये। यजिमनिशुन्धिदसिजनिभ्यो युच् [उ ३. २०] इति युच् प्रत्ययः। तेभ्यः सकाशात् यदि जाताः प्रादुर्भूता भवथ। एवं बहुविधम् आगता यूयम् इतः अस्मात् स्थानात् निर्गताः सत्यो नश्यत विनष्टा भवत ॥

---

१ So **A B B̂ D R S̃ P P̂ J K V.** २ **P** omits the visarga. **J** removes an existing one. We with **P̂.** ३ So **P P̂ J** here and in the following Mantras.

---

1 So **S′ K**d. 2 **S′ K**d पिशाचीति. 3 **S′ K**d भवथ.

षष्ठी ॥

परि॒ धामा॑न्यासाम॒ाशुर्गाष्ठा॑मिवासर॑न् ।
अजै॑षं॒ सर्वा॑न् आ॒जीन् वो॒ नश्य॑तेतः॒ स॒दा॑न्वाः ॥ ६ ॥

परि॑ । धामा॑नि । आ॒सा॒म् । आ॒शुः । गाष्ठा॑म्ऽइव । अस॑र॑न् ।
अजै॑षम् । सर्वा॑न् । आजीन् । वः॒ । नश्य॑त । इ॒तः॒ । सदान्वाः ॥ ६ ॥

आसाम् पिशाचीनां धामानि निवासस्थानानि पर्यसरम्* परितः सर्वत आक्रमिषम् । तत्र दृष्टान्तः । आशुः । अश्वनामैतत् । शीघ्रगामी अश्वः ग्लाष्ठामिव । परिधावनेन ग्लानः सन् यत्र तिष्ठति सा ग्लाष्ठा गन्तव्यावधिः आज्यन्तः काष्ठापरपर्यायः । तामिव । [x]असरम् इति । सृ गतौ इत्यस्मात् लुङि "सर्तिशास्त्यर्तिभ्यश्च" इति च्लेः अङ् । "ऋदृशोङि गुणः"[x] ॥ हे* सदान्वाः वः युष्माकं सर्वान् आजीन् संग्रामान् अजैषम् जितवान् अस्मि ॥ इतः अस्मात् कारणात् भवदीयस्य निखिलस्य वासस्थानस्य[1] अस्माभिराक्रान्तत्वाद् निराश्रयाः सत्यो यूयं नश्यत ॥

[इति] द्वितीये काण्डे तृतीयेनुवाके चतुर्थं सूक्तम् ॥

"यथा द्यौः" इति सूक्तेन आयुष्कामः स्थालीपाकम् ओदनं शान्त्युदकेन संप्रोक्ष्य अभिमन्त्र्य प्राश्नीयात् । सूत्रितं हि । "यथा द्यौः[२.१५] मनसे चेतसे धिये[६.४१] इति महाव्रीहीणां स्थालीपाकं अप-
"यित्वा शान्त्युदकेन उपसिच्य[2] अभिमन्त्र्य प्राशयति" इति [कौ०७.५] ॥

तत्र प्रथमा ॥

यथा॒ द्यौश्च॑ पृथि॒वी च॒ न बि॑भी॒तो न रि॑ष्य॒तः ।
ए॒वा मे॑ प्राण॒ मा बि॑भेः ॥ १ ॥

यथा॑ । द्यौः । च॒ । पृथि॒वी । च॒ । न । बि॒भी॒तः । न । रि॒ष्य॒तः ।
ए॒व । मे॒ । प्रा॒ण॒ । मा । बि॒भे॒रि॒ति॑ बिभेः ॥ १ ॥

---

१ So A B B̄ D K R S̄ P P̄ J V. २ So A B B̄ D R S̄ P P̄ J K V. ३ So P P̄ J.
४ So all our manuscript and other authorities.

---

1 S′ Kd वासस्थानस्याभिरा°. 2 S′ Kd °दकेनोपरिषिच्य.

द्यौः द्युलोको देवाद्याश्रयभूतः पृथिवी भूलोको मनुष्यादिभिराश्रितः। परस्परसमुच्चयार्थौ चकारौ। तावुभौ लोकौ यथा येन प्रकारेण देवमनुष्यादिभिः सर्वैरुपजीव्यत्वाद् उपजीव्यविघातकस्य कस्यचिदपि असंभवाद् न विभीतः भयशङ्कां न प्राप्नुतः। ॒जिभी भये॒। यथा च न रिष्यतः न विनश्यतः। ॒रिष हिंसायाम्। दैवादिकः। "यावद्यथाभ्याम्" इति आख्यातस्य निघातप्रतिषेधः॒। एव एवम्। ॒"निपातस्य च" इति सांहितिको दीर्घः॒। मे मदीय हे प्राण त्वं मा बिभेः शत्रुग्रहरोगादिभ्यो भयशङ्कां मरणशङ्कां च मा कार्षीः। अनेन मन्त्रसामर्थ्येन द्यावापृथिवीवत् चिरकालावस्थानयुक्तो भवेत्यर्थः। ॒बिभेरिति। माङि लुङि प्राप्ते छान्दसो लङ्॒॥

द्वितीया॥

यथाऽहश्च रात्रीं च न बिभीतो न रिष्यतः।
एवा मे प्राण मा बिभेः॥ २॥

यथा। अहः। च। रात्री। च। न। बिभीतः। न। रिष्यतः।
एव। मे। प्राण। मा। बिभेः॥ २॥

अहश्च रात्री च अहोरात्रौ कल्पान्तस्थायित्वाद् यथा न विभीतः न रिष्यतः। एवा[1] म इत्यादि पूर्ववत्। एवं सर्वेष्वपि पर्यायेषु[2] योज्यम्। ॒रात्रीति। "रात्रेश्चाजसौ" इति ङीप्॒॥

तृतीया॥

यथा सूर्यश्च चन्द्रश्च न बिभीतो न रिष्यतः।
एवा मे प्राण मा बिभेः॥ ३॥

यथा। सूर्यः। च। चन्द्रः। च। न। बिभीतः। न। रिष्यतः॥
एव। मे। प्राण। मा। बिभेः॥ ३॥

स्पष्टोर्थः॥

---

1 S'Kd एवमित्यादि. 2 S'Kd पर्याये योज्यम्.

चतुर्थी ॥

यथा ब्रह्म च क्षत्रं च न बिभीतो न रिष्यतः ।
एवा मे प्राण मा बिभेः ॥ ४ ॥
यथा । ब्रह्म । च । क्षत्रम् । च । न । बिभीतः । न । रिष्यतः ।
एव । मे । प्राण । मा । बिभेः ॥ ४ ॥

ब्रह्म ब्राह्मणजातिः क्षत्रम् क्षत्रियजातिः । जातेर्नित्यत्वाभ्युपगमात् भीत्याद्यभावः ॥

पञ्चमी ॥

यथा सत्यं चानृतं च न बिभीतो न रिष्यतः ।
एवा मे प्राण मा बिभेः ॥ ५ ॥
यथा । सत्यम् । च । अनृतम् । च । न । बिभीतः । न । रिष्यतः ।
एव । मे । प्राण । मा । बिभेः ॥ ५ ॥

सत्यम् यथार्थभाषणम् । अनृतम् मिथ्याभाषणम् । लोकव्यवहारस्य प्रवाहनित्यत्वात् सत्यानृतयोरपि भीत्याद्यभावः । तदभिमानिदेवतापेक्षया वा ॥

षष्ठी ॥

यथा भूतं च भव्यं च न बिभीतो न रिष्यतः ।
एवा मे प्राण मा बिभेः ॥ ६ ॥
यथा । भूतम् । च । भव्यम् । च । न । बिभीतः । न । रिष्यतः ।
एव । मे । प्राण । मा । बिभेः ॥ ६ ॥

भूतम् सत्तां प्राप्तं वस्तुजातम् । भव्यम् भविष्यत् उत्पत्स्यमानं वस्तुजातम् । पूर्ववद् अनयोरपि प्रवाहनित्यत्वेन भीत्याद्यभावः । ⧖ "भव्यगेय०" इत्यादिना भवतेः कर्तरि[1] यत्प्रत्ययान्तो निपातितः ⧖ ॥

इति द्वितीये काण्डे तृतीयेनुवाके पञ्चमं सूक्तम् ॥

---

1 S′Kd insert यङ्गार्थो after कर्तरि and before यत्प्र°.

"प्राणापानौ" इति सूक्तेन आज्यसमित्पुरोडाशपयओदनपायसपशुवी-हियवतिलधानाकरम्भशष्कुल्याख्यानि त्रयोदश द्रव्याणि आयुष्कामो जुहुयात् । सूत्रितं हि । "प्राणापानौ[२. १६] ओजोसि[२. १७] इत्युपदधीत" इति [कौ० ७. ५] ॥ उपदधीतेत्यत्र "उक्तैस्त्रयोदशभिर्द्रव्यैर्होम इति जानीयात्" इति पैठीनसिपरिभाषा त्रिषप्तीयसूक्त एवोदाहृता ॥

अत्र "द्यावापृथिवी उपश्रुत्या" [२] इति मन्त्रेण आग्रयणेष्टौ ब्रह्मा द्यावापृथिव्यं हविरनुमन्त्रयेत । तद् उक्तं वैताने । "ओषधीषु पक्वास्वाग्रयणेष्टिः" इत्युपक्रम्य "यद् विद्वांसः[६. ११५] द्यावापृथिवी उपश्रुत्या[२. १६. २] सोमो वीरुधाम्[५. ४. ७] इति वैश्वदेवद्यावापृथिव्यसौम्यान्" इति [वै० २. ४] ॥

तत्र प्रथमा ॥

प्राणापानौ मृत्योर्मा पातं स्वाहा ॥ १ ॥

प्राणापानौ । मृत्योः । मा । पातम् । स्वाहा ॥ १ ॥

हे प्राणापानौ । प्राक् ऊर्ध्वमुखः अनिति चेष्टत इति प्राणः । अप अनिति अवाङ्मुखश्चेष्टत इत्यपानः । तदभिमानिनौ हे देवौ मृत्योः सकाशात् मा मां पातम् रक्षतम् । स्वाहा युक्ताभ्याम् इदं हविः स्वाहुतम् अस्तु । मरणस्य प्राणापानवियोगरूपत्वाद् मदीयहविःस्वीकारेण तुष्टयोर्युवयोश्चिरकालावस्थानेन अहं दीर्घायुर्भूयासम् इति प्रार्थनाभिप्रायः ॥ स्वाहा इति देवानां हविर्दाने । "स्वाहाकारेण वा वषट्कारेण वा देवेभ्योन्नं प्रदीयते" इति श्रुतेः । कौशिकेनाप्युक्तम् । "स्वाहाकारवषट्कारप्रदाना देवाः स्वधाकारनमस्कारप्रदानाः पितरः" इति [कौ० १. १] । अक्षरार्थस्तु यास्केनोक्तः । स्वाहेत्येतत् सु आहेति वा स्वा वागाहेति वा स्वं प्राहेति वा स्वाहुतं हविर्जुहोतीति वा [नि० ८. २०] इति । अत्र स्वा वागाहेत्ययम् अर्थस्तैत्तिरीयके स्पष्टम् आम्नातः । "स्वैव ते वागित्यब्रवीत् । सोजुहोत् स्वाहेति । तत् स्वाहाकारस्य जन्म" [तै० ब्रा० २. १. २. ३] इति ॥

द्वितीया ॥

द्यावा॑पृथिवी॒ उप॑श्रुत्या मा पातं॒ स्वाहा॑ ॥ २ ॥

द्यावा॑पृथिवी॒ इति॑ । उप॑ऽश्रुत्या । मा॒ । पा॒त॒म् । स्वाहा॑ ॥ २ ॥

"तान् वरिष्ठः प्राण उवाच । मा मोहम् आपद्यथ । अहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद् बाणम् अवष्टभ्य विधारयामि" [प्र० उ० २.३] इत्यादिना प्रश्नोपनिषदि महता प्रपञ्चेन इतरेन्द्रियापेक्षया प्राणस्य श्रैष्ठ्यं प्रतिपादितम् । इति प्रथमतः प्राणप्रार्थनां कृत्वा तदुपजीविनां श्रोत्रादीन्द्रियाणाम् एतदाद्यैर्मन्त्रैः स्थैर्यं प्रार्थ्यते । द्यावापृथिवी । अत्र द्यावापृथिवीशब्देन तदन्तरालवर्तिन्यो दिशो विवक्षिताः । हे द्यावापृथिव्यौ उपश्रुत्या समीपश्रवणकरणेन श्रोत्रेन्द्रियेण शब्दश्रवणशक्तिप्रदानेन । मा पातम् इत्यादि पूर्ववत् ॥

तृतीया ॥

सूर्य॑ चक्षु॑षा मा पाहि॒ स्वाहा॑ ॥ ३ ॥

सूर्य॑ । चक्षु॑षा । मा॒ । पा॒हि॒ । स्वाहा॑ ॥ ३ ॥

सूर्यश्चक्षुरभिमानी देवः । "आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत्" [ऐ० उ० १.२] इति श्रुतेः । [हे सूर्य] त्वं चक्षुषा चक्षुरिन्द्रियेण रूपदर्शनशक्त्या । गतम् अन्यत् ॥

चतुर्थी ॥

अग्ने॑ वैश्वान॑र॒ विश्वै॑र्मा दे॒वैः पा॑हि॒ स्वाहा॑ ॥ ४ ॥

अग्ने॑ । वै॒श्वा॒न॒र॒ । विश्वैः॑ । मा॒ । दे॒वैः॑ । पा॒हि॒ । स्वाहा॑ ॥ ४ ॥

हे वैश्वानर विश्वान् नरान् ऐहिकामुष्मिकलक्षणं तत्तत् कर्मफलं नयतीति वा विश्वैर्नरैस्तत्तद्यागादिकर्मसिद्धये नीयते प्रणीयत इति वा वैश्वानरः । विश्वनरशब्दान्नेतृत्वेन नीयमानत्वेन वा संबन्धीति "तस्येदम्" इति अण् । "अन्येषाम् अपि दृश्यते" इति पूर्वपदस्य दीर्घः । यद्वा

---

१ $\overset{h}{B}$ corrects into °अ्र°. V K सूर्यश्र°. P $\overset{2}{P}$ सूर्यं:. We with A B D R $\overset{m}{S}$ J. २ B corrects into °न॒र. $\overset{h}{B}$ corrects °न॒र into °नर्. We with A D K R $\overset{m}{S}$ P $\overset{2}{P}$ J V.

विश्वान् जन्तून् अरः प्रतिगतः प्रविष्ट इति विश्वानरः। सामर्थ्यात् प्राणाख्यो वायुः। ऋ गतौ इत्यस्माद् भूते छान्दसः पचाद्यच्। उपपदविभक्तेश्च अलुक्। तेन जन्यमानत्वाद् अयम् अग्निर्वैश्वानरः। पूर्ववद् अण्। [यद्वा] विश्वे नरा यस्य पोष्यत्वेन स विश्वानरः। स विश्वानरः वैद्युतोग्निः आदित्यश्च। "नरे संज्ञायाम्" इति पूर्वपदस्य दीर्घः। ताभ्यां जायमानत्वाद् अयं पार्थिवोग्निर्वैश्वानरः। [तथा च यास्कः। अयमेवाग्निर्वैश्वानरः] इति शाकपूणिः। विश्वानरावप्येते उत्तरे ज्योतिषी वैश्वानरोयं यत् ताभ्यां जायते [नि० ७. २३] इति च। तथाविध हे वैश्वानराग्ने सर्वदेवतात्मक। यद्वा अन्युपलक्षिततत्तदिन्द्रियाधिष्ठायक देव विश्वैः सर्वैर्देवैः देवनसाधनैर्वागादीन्द्रियैः तत्तदिन्द्रियसामर्थ्यप्रदानेन। मां[2] पाहीत्यादि गतम्॥

पञ्चमी॥

विश्वम्भर॒ विश्वे॑न मा॒ भर॑सा पाहि॒ स्वाहा॑॥ ५॥

विश्वम्ऽभर। विश्वेन। मा। भर॑सा। पाहि। स्वाहा॑॥ ५॥

हे विश्वंभर। विश्वं सर्वं प्राणिजातं बिभर्ति अनुप्रविश्य अशितपीतादिपचनेन पोषयतीति विश्वंभरो जाठराग्निः। "संज्ञायां भृतृवृजि०" इत्यादिना खच्। "अरुर्द्विषदजन्तस्य मुम्" इति मुम्। ताहशस्त्वं विश्वेन कृत्स्नेन भरसा पोषणशक्त्या। डुभृञ् धारणपोषणयोः इत्यस्मात् "सर्वधातुभ्योसुन्" [उ० ४. १८८] इति असुन्। विश्वंभरशब्दस्य अग्निवाचकत्वं बृहदारण्यके समाम्नातम्। "यथा क्षुरः क्षुरधानेवहितः स्याद् विश्वंभरो वा विश्वंभरकुलाये" [बृ० आ० १. ४. ७] इति। यातम् अन्यत्॥

इति द्वितीयकाण्डे तृतीयेनुवाके षष्ठं सूक्तम्॥

"ओजोसि" इत्यनेन आयुष्कामः पूर्वम् उक्तप्रकारेण त्रयोदश द्रव्याणि जुहुयात्। सूत्रं तु तत्रैवोदाहृतम्॥

---

1 So S' Kd. 2 S' Kd मां for मा.

तत्र प्रथमा ॥

ओजोस्योजो मे दाः स्वाहा ॥ १ ॥

ओजः । असि । ओजः । मे । दाः । स्वाहा ॥ १ ॥

अत्र सूक्ते देवताविशेषस्य अश्रवणात् होमाधारभूतोग्निः संबोध्यः हूयमानद्रव्यं वा । हे अग्ने हूयमानद्रव्य वा त्वम् ओजः आत्मनः । ओजः शरीरस्थितिकारणम् अष्टमो धातुः । तद् उक्तम् आचार्यैः ॥

ओजो नामाष्टमी दशा ।
क्षेत्रज्ञस्य तद् ओजस्तु केवलाश्रय इष्यते ।
यथा स्नेहः प्रदीपस्य यथाऽभ्रम अशनित्विषः इति ।

तथाविधम ओजः त्वम असि । तद्धेतुत्वात् ताच्छब्द्यम । "आयुर्वै घृतम" [तै॰सं॰२.३.११.५] इति वत् । अतो मे मह्यम ओजः उक्तलक्षणं दाः देहि । स्वाहा स्वाहुतम इदम अस्तु । ओज इति । उज्ज आर्जवे । उज्जे[र्बले बलोपश्च इति उ॰४.१९१ असुन् बलोपश्च] ॥

द्वितीया ॥

सहोसि सहो मे दाः स्वाहा ॥ २ ॥

सहः । असि । सहः । मे । दाः । स्वाहा ॥ २ ॥

सहः शत्रूणाम् अभिभवनसमर्थं तेजोसि । सहतेरभिभवार्थाद् असुन् । अन्यत् पूर्ववत् ॥

तृतीया ॥

बलमसि बलं मे दाः स्वाहा ॥ ३ ॥

बलम् । असि । बलम् । मे । दाः । स्वाहा ॥ ३ ॥

स्पष्टोर्थः ॥

---

१ $\overset{h}{\mathbf{B}}\mathbf{K}\overset{m}{\mathbf{S}}$ omit the visarga after दा here and in the following mantras of this hymn as well as in those of the next one. We with **A S R V.**

---

1 S′ omits आत्मनः । ओजः.

चतुर्थी ॥

आयुर्स्यायुर्मे दाः स्वाहा ॥ ४ ॥

आयुः । असि । आयुः । मे । दाः । स्वाहा ॥ ४ ॥

आयुश्चिरकालजीवनम् असि । अतः शतसंवत्सरपरिमितम् आयुर्मे देहि ॥

पञ्चमी ॥

ओत्रंमसि ओत्रं मे दाः स्वाहा ॥ ५ ॥

ओत्रंम् । असि । ओत्रंम् । मे । दाः । स्वाहा ॥ ५ ॥

षष्ठी ॥

चक्षुरसि चक्षुर्मे दाः स्वाहा ॥ ६ ॥

चक्षुः । असि । चक्षुः । मे । दाः । स्वाहा ॥ ६ ॥

पञ्चमीषष्ठ्यौ निगदसिद्धे ॥

सप्तमी ॥

परिपाणंमसि परिपाणं मे दाः स्वाहा ॥ ७ ॥

परिडपानंम् । असि । परिडपानंम् । मे । दाः । स्वाहा ॥ ७ ॥

परिपाणम् परितः पालनम् । तद्धेतुत्वात् ताच्छब्द्यम् । परिपालक इत्यर्थः । अतः परिपाणम् परितः सर्वतः आयुर्भङ्गनिमित्तभूतेभ्यः पालनं देहि । ☒परिपूर्वात् पातेर्भावे ल्युट् । "कृत्यचः" इति नस्य णत्वम्☒ ॥

इति द्वितीये काण्डे तृतीयेनुवाके सप्तमं सूक्तम् ॥

[इति] तृतीयोनुवाकः समाप्तः ॥

चतुर्थेनुवाके नव सूक्तानि । तत्र "भ्रातृव्यक्षयणम्" इति प्रथमसूक्तेन अभिचारकर्मणि शरसमिदाधानम् कृष्णव्रीहियवतिलाद्यावपनं च कुर्यात् । [कौ० ६. २] ॥

अत्र अरायक्षयणम् [३-५] इत्याद्यास्तिस्रः चातनगणे [कौ० १. ८] प-

---

1 S' Kd नसो.

ठिताः । अतस्तस्य गणस्य यत्रयत्र विनियोगस्तत्रतत्र आसा विनियोगो द्रष्टव्यः ॥

तत्र प्रथमा ॥

भ्रातृव्यक्षयंणमसि भ्रातृव्यचातंनं मे दाः स्वाहा ॥ १ ॥

भ्रातृव्यऽक्षयंणम् । असि । भ्रातृव्यऽचातंनम् । मे । दाः । स्वाहा ॥ १ ॥

अत्रापि होमाधारोग्निः संबोध्यः होमद्रव्यं वा । हे अग्ने त्वं भ्रातृव्यक्षयणम् असि । भ्रातृव्यः शत्रुः । भ्रातृशब्दाद् "व्यन्सपत्ने" इति व्यन् प्रत्ययः । तस्य क्षयणं विनाशनम् असि । क्षि क्षये इत्यस्माद् भावे करणे वा ल्युट् । अतो मे मह्यं भ्रातृव्यचातनम् भ्रातृव्यनाशनम् । चातयतिर्नाशनकर्मा इत्युक्तम् । दाः देहि । स्वाहेति पूर्ववद् योज्यम् ॥

द्वितीया ॥

सपत्नक्षयंणमसि सपत्नचातंनं मे दाः स्वाहा ॥ २ ॥

सपत्नऽक्षयंणम् । असि । सपत्नऽचातंनम् । मे । दाः । स्वाहा ॥ २ ॥

सपत्नशब्दः शत्रुपर्यायः । "व्यन्सपत्ने" इति सूत्रे सपत्नशब्दः सपत्नीव सपत्न इति इवार्थे अकारप्रत्ययान्तो व्याख्यातः । यद्यपि भ्रातृव्यसपत्नशब्दौ पर्यायौ तथाप्यत्र उभयोरपि पृथगुपादानाद् आत्मीयानात्मीयरूपेण भेदो द्रष्टव्यः । गतम् अन्यत् ॥

तृतीया ॥

अरायक्षयंणमस्यरायचातंनं मे दाः स्वाहा ॥ ३ ॥

अरायऽक्षयंणम् । असि । अरायऽचातंनम् । मे । दाः । स्वाहा ॥ ३ ॥

अरायक्षयणम् अरायाः अदायिनः दानोपलक्षितनिखिलश्रेयोविघ्नकारिणः । तेषां क्षयणम् । रा दाने इत्यस्य घञन्तस्य नञा बहुव्रीहिः । अन्यत् पूर्ववत् ॥

चतुर्थी ॥

पिशाचक्षयंणमसि पिशाचचातंनं मे दाः स्वाहा ॥ ४ ॥

पिशाचऽक्षयंणम् । असि । पिशाचऽचातंनम् । मे । दाः । स्वाहा ॥ ४ ॥

पिशाचाः पिशिताशिनो भूतविशेषाः । पिशितं मांसम् अश्नन्तीति "कर्मण्यण्" । पृषोदरादिषु पाठात् पिशिताशशब्दयोः पिशाचौ आदेशौ । गतम् अन्यत् ॥

पञ्चमी ॥

सदान्वाक्षयंणमसि सदान्वाचातंनं मे दाः स्वाहा ॥ ५ ॥

सदान्वाऽक्षयंणम् । असि । सदान्वाऽचातंनम् । मे । दाः । स्वाहा ॥ ५ ॥

सदान्वाक्षयणम् सदा नोनूयमाना आक्रोशकारिण्यः पिशाच्यः । सदान्वा इति निःसालसूक्ते[1] [२. १४] व्याख्यातम् ॥

इति द्वितीयकाण्डे चतुर्थेनुवाके प्रथमं सूक्तम् ॥

"अग्ने यत् ते" इत्यादिभिः पञ्चभिः सूक्तैरभिचारकर्मणि पुरस्ताद्धोमान् आज्येन[2] जुहुयात् । [कौ० ६. १] ॥

तत्र प्रथमा ॥

अग्ने यत् ते तपस्तेन तं प्रति तप योऽस्मान्[1] द्वेष्टि यं वयं द्विष्मः ॥ १ ॥

अग्ने । यत् । ते । तपः । तेन । तम् । प्रति । तप । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ १ ॥

हे अग्ने पृथिवीस्थान ते त्वदीयं यत् तपः संतापनशक्तिः तेन तपसा तम् शत्रुं प्रति लक्षीकृत्य तप प्रज्वलितो भव । "लक्षणेत्थंभूताख्यान०" इत्यादिना प्रतेः कर्मप्रवचनीयसंज्ञा । "कर्मप्रवचनीययुक्ते०" इति द्वितीया । यद्वा । कर्मणि द्वितीया । तं शत्रुं प्रति तप । प्रतिकूलं प्रतिमुखं प्रत्यवयवं वा तपेत्यर्थः । यः शत्रुरस्मान् द्वेष्टि द्वेषं करोति यं च शत्रुं वयं द्विष्मः अप्रियं[3] कुर्मः । तम् इति पूर्वेण

---

१ **A B K Š V.** That is, तप यो१स्मान् here and throughout. **D** omits to put any kampa throughout. We with **B R.**

---

1 So **S' K**d. 2 **S' K**d आज्येना. 3 **S' K**d repeat the word अप्रियम्.

संबन्धः ॥ अनेन व्यतिहारनिर्देशेन अभिचारप्रत्यभिचारयोरुभयत्रापि अस्य मन्त्रस्य सामर्थ्यं दर्शितं भवति ॥

द्वितीया ॥

अग्ने॒ यत् ते॒ हर॒स्तेन॒ तं प्रति॑ हर॒ योऽ३॒स्मान् द्वेष्टि॒ यं व॒यं द्वि॒प्मः ॥ २ ॥

अग्ने॑ । यत् । ते॒ । हरः॑ । तेन॑ । तम् । प्रति॑ । हर । यः । अ॒स्मान् । द्वे-ष्टि॑ । यम् । व॒यम् । द्वि॒प्मः ॥ २ ॥

हरतीति हरः संहरणसामर्थ्यम् । क्रोधनामसु पाठात् क्रोधो वा । [1]ह-रतेरसुन्[1] । तेन हरसा तम् शत्रुं प्रति हर संहर । गतम् अन्यत् ॥

तृतीया ॥

अग्ने॒ यत् ते॒र्चिस्तेन॒ तं प्रत्यर्च॒ योऽ३॒स्मान् द्वेष्टि॒ यं व॒यं द्वि॒प्मः ॥ ३ ॥

अग्ने॑ । यत् । ते॒ । अ॒र्चिः । तेन॑ । तम् । प्रति॑ । अ॒र्च॒ । यः । अ॒स्मान् । द्वेष्टि॑ । यम् । व॒यम् । द्वि॒प्मः ॥ ३ ॥

[1]अर्चतिरत्र धातूनाम् अनेकार्थत्वाद् दीप्त्यर्थः[1] । तेन अर्चिषा तं प्रत्यर्च प्रतिदग्धुं दीप्तो भव । उक्तम् अन्यत् ॥

चतुर्थी ॥

अग्ने॒ यत् ते॑ शो॒चिस्तेन॒ तं प्रति॑ शोच॒ योऽ३॒स्मान् द्वेष्टि॒ यं व॒यं द्वि॒प्मः ॥ ४ ॥

अग्ने॑ । यत् । ते॒ । शो॒चिः । तेन॑ । तम् । प्रति॑ । शो॒च॒ । यः । अ॒स्मान् । द्वे-ष्टि॑ । यम् । व॒यम् । द्वि॒प्मः ॥ ४ ॥

शोचिः शोकजननसामर्थ्यम् । [1]शुच शोके इत्यस्मात् अर्चिशुचिहु-सृपिछादि[2]छर्दिभ्य इसिः [उ० २. १०७] इति करणे इसिप्रत्ययः[1] । तेन शोचिषा तं प्रति शोच शोकयुक्तं कुरु ॥

पञ्चमी ॥

अग्ने॒ यत् ते॒ तेज॒स्तेन॒ तम॑ते॒जसं॑ कृणु॒ योऽ३॒स्मान् द्वेष्टि॒ यं व॒यं द्वि॒प्मः ॥ ५ ॥

---

1 S′ Kd शुक for शुच. 2 S′ Kd °छादिकृदि° for °छादिछर्दि°.

अग्ने । यत् । ते । तेजः । तेन । तम् । अतेजसम् । कृणु । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ५ ॥

तेजः तीक्ष्णं पराभिभवनसामर्थ्यम् । तिज निशाने इत्यस्माद् असुन् । तेन तेजसा तम् शत्रुम् अतेजसं निस्तेजस्कं कृणु कुरु ॥ गतम् अन्यत् ॥ यद्यप्यत्र सूक्ते क्रमेण निर्दिष्टास्तपोहरोर्चिःशोचिस्तेजःशब्दाः पञ्चापि यास्केन ज्वलन्नामसु पठितास्तथापि सर्वेषाम् अत्रोपादानाद् उक्तप्रकारेण धात्वर्थभेदाद् भेदोवगन्तव्यः ॥

इति चतुर्थेनुवाके द्वितीयं सूक्तम् ॥

इत उत्तराणि "वायो यत्"[२.२०] "सूर्य यत्"[२.२१] "चन्द्र यत्"[२.२२] "आपो यत्"[२.२३] इति चत्वारि सूक्तानि "अग्ने यत्"[२.१९] इति पूर्वसूक्तवद् व्याख्येयानि । तेषु वाय्वादिदेवतासंबोधनमेव विशेषः । "आपो यद् वः" इत्यत्र अपां नित्यबहुत्वाद् बहुवचननिर्देशः ॥

तत्र प्रथमा ॥

वायो यत् ते तपस्तेन तं प्रति तप योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ १ ॥

वायो इति । यत् । ते । तपः । तेन । तम् । प्रति । तप । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ १ ॥

द्वितीया ॥

वायो यत् ते हरस्तेन तं प्रति हर योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ २ ॥

वायो इति । यत् । ते । हरः । तेन । तम् । प्रति । हर । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ २ ॥

तृतीया ॥

वायो यत् तेर्चिस्तेन तं प्रत्यर्च योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ३ ॥

वायो इति । यत् । ते । अर्चिः । तेन । तम् । प्रति । अर्च । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ३ ॥

चतुर्थी ॥

वायो यत् ते शोचिस्तेन तं प्रति शोच योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ४ ॥

वायो इति । यत् । ते । शोचिः । तेन । तम् । प्रति । शोच । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ४ ॥

पञ्चमी ॥

वायो यत् ते तेजस्तेन तमतेजसं कृणु योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ५ ॥

वायो इति । यत् । ते । तेजः । तेन । तम् । अतेजसम् । कृणु । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ५ ॥

[इति चतुर्थेनुवाके तृतीयं सूक्तम् ॥]

तत्र प्रथमा ॥

सूर्य यत् ते तपस्तेन तं प्रति तप योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ १ ॥

सूर्य । यत् । ते । तपः । तेन । तम् । प्रति । तप । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ १ ॥

द्वितीया ॥

सूर्य यत् ते हरस्तेन तं प्रति हर योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ २ ॥

सूर्य । यत् । ते । हरः । तेन । तम् । प्रति । हर । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ २ ॥

तृतीया ॥

सूर्य यत् तेऽर्चिस्तेन तं प्रत्यर्च योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ३ ॥

सूर्य । यत् । ते । अर्चिः । तेन । तम् । प्रति । अर्च । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ३ ॥

चतुर्थी ॥

सूर्य यत् ते शोचिस्तेन तं प्रति शोच योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ४ ॥

सूर्य । यत् । ते । शोचिः । तेन । तम् । प्रति । शोच । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ४ ॥

पञ्चमी ॥

सूर्य यत् ते तेजस्तेन तमंतेजसं कृणु योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ५ ॥
सूर्य । यत् । ते । तेजः । तेन । तम् । अतेजसम् । कृणु । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ५ ॥

[इति चतुर्थेनुवाके चतुर्थं सूक्तम् ॥]

तत्र प्रथमा ॥

चन्द्र यत् ते तपस्तेन तं प्रति तप योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ १ ॥
चन्द्र । यत् । ते । तपः । तेन । तम् । प्रति । तप । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ १ ॥

द्वितीया ॥

चन्द्र यत् ते हरस्तेन तं प्रति हर योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ २ ॥
चन्द्र । यत् । ते । हरः । तेन । तम् । प्रति । हर । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ २ ॥

तृतीया ॥

चन्द्र यत् तेर्चिस्तेन तं प्रत्यर्च योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ३ ॥
चन्द्र । यत् । ते । अर्चिः । तेन । तम् । प्रति । अर्च । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ३ ॥

चतुर्थी ॥

चन्द्र यत् ते शोचिस्तेन तं प्रति शोच योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ४ ॥
चन्द्र । यत् । ते । शोचिः । तेन । तम् । प्रति । शोच । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ४ ॥

पञ्चमी ॥

चन्द्र यत् ते तेजस्तेन तमंतेजसं कृणु योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ५ ॥

चन्द्रं । यत् ते । तेजः । तेन । तम् । अतेजसम् । कृणु । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ५ ॥

[इति चतुर्थेनुवाके पञ्चमं सूक्तम् ॥]

तत्र प्रथमा ॥

आपो यद् वस्तपस्तेन तं प्रति तपत यो३ऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ १ ॥

आपः । यत् । वः । तपः । तेन । तम् । प्रति । तपत । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ १ ॥

द्वितीया ॥

आपो यद् वो हरस्तेन तं प्रति हरत यो३ऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ २ ॥

आपः । यत् । वः । हरः । तेन । तम् । प्रति । हरत । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ २ ॥

तृतीया ॥

आपो यद् वोर्चिस्तेन तं प्रत्यर्चत यो३ऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ३ ॥

आपः । यत् । वः । अर्चिः । तेन । तम् । प्रति । अर्चत । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ३ ॥

चतुर्थी ॥

आपो यद् वः शोचिस्तेन तं प्रति शोचत यो३ऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥४॥

आपः । यत् । वः । शोचिः । तेन । तम् । प्रति । शोचत । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ४ ॥

पञ्चमी ॥

आपो यद् वस्तेजस्तेन तमतेजसं कृणुत यो३ऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥ ५ ॥

आपः । यत् । वः । तेजः । तेन । तम् । अतेजसम् । कृणुत । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥ ५ ॥

इति द्वितीयकाण्डे चतुर्थेनुवाके तृतीयचतुर्थपञ्चमषष्ठसूक्तानि ॥

"शेरभक" इति सप्तमसूक्तेन अलक्ष्मीविनाशकर्मणि समुद्रमध्ये [1]शा-पेटस्थेन्नौ हुत्वा चरुं संपात्य अभिमन्त्र्य प्राश्नीयात् ॥

तथा तस्मिन्नेव कर्मणि "शेरभक" इत्यनेनैव सूक्तेन [2]खण्डितयवानां सक्तुं रक्तवर्णाया अजाया दध्युदके क्षिप्त्वा आज्येन हुत्वा संपात्य अभिमन्त्र्य अश्नीयात् ॥

तथैव तस्मिन्नेव कर्मणि अनेन सूक्तेन तृणग्रन्थीन् कृत्वा उदपात्रे प्रत्यृचं विस्रस्य तेनोदकेन आत्मावनं मुखमार्जनं च कुर्यात् ॥

उक्तं हि सूत्रे । "शेरभकेति [3]सामुद्रम् अप्सु कर्म व्याख्यातम् [2]अपहतधाना लोहिताजाया द्रप्सेन संनीयाश्नाति" इत्यादि [कौ० ३. २] ॥

तत्र प्रथमा ॥

शेरभक शेरभ पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥ १ ॥

शेरभक । शेरभ । पुनः । वः । यन्तु । यातवः । पुनः । हेतिः । किमीदिनः । यस्य । स्थ । तम् । अत्त । यः । वः । प्रऽअहैत् । तम् । अत्त । स्वा । मांसानि । अत्त ॥ १ ॥

हे शेरभक स्वाश्रितानां सुखस्य प्रापक । शरभवत् सर्वेषां हिंसको वा शेरभः यातुधानाधिपतिः । असौ ग्रामणीः प्रधानभूतो यस्य तत्सचिवादेः स शेरभकः । "स एषां ग्रामणीः" इति कन् प्रत्ययः । हे शेरभ यातुधानाधिपते हे शेरभक तत्स्वामिक सचिवादे वः युष्मदीया अलक्ष्मीकरा युष्माभिः अस्मदभिमुखं प्रेरिता यातवः राक्षसाः[4] पुनर्यन्तु अस्मत्तः प्रतिनिवर्तन्ताम् ॥ तथा हेतिः हननसाधनं युष्मदीयम् आयुधजातं प्रतिनिवर्तताम् । किमीदिनः किम् इदानीं [किम् इदानीं] वर्तते किम् इदं किम् इदम् इति वा [5]पैशुन्यार्थं चरन्तीति किमीदिनश्चोराः । आह च यास्कः । किमीदिने किम् इदानीम् इति

---

1 S′ Kd श्वापेट°. We with *Kaus'ika*. 2 So S′ Kd. *Kaus'ika*: अनपहत°. 3 S′ Kd समुद्र°. We with *Kaus'ika*. 4 S′ Kd रक्षसाः. 5 S′ Kd पैशू°. We with *Kaus'ika*.

चरते किम् इदं किम् इदम् इति वा पिशुनाय चरते [नि० ६.११] इति ऽ । युष्मदीयास्तथाविधा अनुचराश्च । पुनर्यन्तु इति संबन्धः ॥ प्रतिनिवृत्तानां तेषां कर्तव्यम् आह । हे शेरभादयः सपरिकरा राक्षसाः यूयं यस्य स्थ यस्य असद्विरोधिनः समीपे भवथ तम् अत्त भक्षयत ॥ यः प्रयोक्ता वः युष्मान् [प्राहैत्] प्राहैषीत् अस्मत्सकाशं प्रेषितवान् तम् अत्त तमपि भक्षयत । ऽ हि गतौ । लुङि सिचि वृद्धौ "बहुलं छन्दसि" इति अपृक्तप्रत्ययस्य ईडभावे "स्कोः संयोगाद्योः०" इति सलोपः ऽ ॥ अदने रुचिम् उत्पादयति सेत्यादिना । सा* । ऽ "सुपां सुलुक्०" इति षष्ठ्याः सुः । लिङ्गव्यत्ययः ऽ । तस्य शत्रोः मांसान्यत्त । यद्वा सा* हेतिः यूयं च शत्रोर्मांसानि भक्षयत । प्रेरकजीवने प्रतिनिवृत्तानामपि रक्षसां पुनःपुनःप्रेषणसंभवात् तत्प्रेरकनाशनकथनेन तेषां पुनरागमनं निरस्तम् इति भावः ॥

द्वितीया ॥

शेवृधक॒ शेवृ॑ध॒ पुन॑र्वो॒ यन्तु॒ या॒तव॒ः पुन॑र्हे॒तिः किमी॑दिनः ।
यस्य॒ स्थ तम॑त्त॒ यो व॒ः प्राहै॒त् तम॑त्त॒ स्वा मां॒सान्य॑त्त ॥ २ ॥

शेवृ॑धक । शेवृ॑ध । पुन॑रिति॒ पुनः॑ । व॒रिति॑ वः॑ । यन्तु॒ । या॒तव॒ इति॑ या॒तवः॑ । पुन॑रिति॒ पुनः॑ । हे॒तिरिति॑ हे॒तिः॑ । किमी॑दिन॒ इति॒ किमी॑दिनः॑ । यस्य॑ । स्थ । तम॑त्त । यः । व॒रिति॑ वः॑ । प्राहै॒दिति॒ प्रऽअहै॑त् । तम॑त्त । स्वा । मां॒सानि॑ । अत्त ॥ २ ॥

हे शेवृधक स्वाश्रितानां सुखस्य वर्धक । ऽ वृधेरन्तर्णीतण्यर्थाद् इगुपधलक्षणः कः ऽ । शेवृधो ग्रामणीर्यस्य सचिवादेः स शेवृधकः । अन्यत् पूर्ववत् ॥

तृतीया ॥

म्रोकानुम्रोक॒ पुन॑र्वो॒ यन्तु॒ या॒तव॒ः पुन॑र्हे॒तिः किमी॑दिनः ।
यस्य॒ स्थ तम॑त्त॒ यो व॒ः प्राहै॒त् तम॑त्त॒ स्वा मां॒सान्य॑त्त ॥ ३ ॥

म्रोक॑ । अनु॑ऽम्रोक । पुन॑रिति॒ पुनः॑ । व॒रिति॑ वः॑ । यन्तु॒ । या॒तव॒ इति॑ या॒तवः॑ । पुन॑रिति॒ पुनः॑ । हे॒तिरिति॑ हे॒तिः॑ । किमी॑दिन॒ इति॒ किमी॑दिनः॑ ।

यस्य॑ । स्थ । तम् । अ॒त्त॒ । यः । व॒ः । प्र॒ऽअहै॑त् । तम् । अ॒त्त॒ । स्वा ।
मां॒सानि॑ । अ॒त्त॒ ॥ ३ ॥

हे म्रोक म्रोचति धनादिकम् अपहृत्य छन्नः सन् गच्छतीति म्रोकः । म्रोकम् अनुसृत्य गच्छतीति अनुम्रोकः । ॥ म्रुचु म्लुचु गतौ । "पुंसि संज्ञायां घः प्रायेण" इति व्यत्ययेन कर्तरि घः । "चजोः कु-घिण्ण्यतोः" इति कुत्वम् ॥ ॥

चतुर्थी ॥

सर्पा॑नुसर्प॒ पुन॑र्वो यन्तु या॒तव॒ः पुन॑र्हे॒तिः किमी॑दिनः ।
यस्य॒ स्थ तम॑त्त॒ यो व॒ः प्राहै॒त् तम॑त्त॒ स्वा मां॒सान्य॑त्त ॥ ४ ॥

सर्प॑ । अनु॑ऽसर्प । पुन॑रिति॑ । वः॒ । यन्तु॑ । या॒तवः॑ । पुन॑रिति॑ । हे॒तिः । किमी॑दिन॒रिति॒ किमि॑ऽदिनः ।
यस्य॑ । स्थ । तम् । अ॒त्त॒ । यः । व॒ः । प्र॒ऽअहै॑त् । तम् । अ॒त्त॒ । स्वा ।
मां॒सानि॑ । अ॒त्त॒ ॥ ४ ॥

हे सर्प । सर्पति कुटिलं गच्छतीति सर्पः एतत्संज्ञो यातुधानाधिपतिः । तम् अनुसृत्य गच्छतीति अनुसर्पः । ॥ सृपॢ गतौ इत्यस्मात् पचाद्य-च् ॥ । गतम् अन्यत् ॥

पञ्चमी ॥

जूर्णि॑ पुन॑र्वो यन्तु या॒तव॒ः पुन॑र्हे॒तिः किमी॑दिनीः ।
यस्य॒ स्थ तम॑त्त॒ यो व॒ः प्राहै॒त् तम॑त्त॒ स्वा मां॒सान्य॑त्त ॥ ५ ॥

जूर्णि॑ । पुन॑रिति॑ । वः॒ । यन्तु॑ । या॒तवः॑ । पुन॑रिति॑ । हे॒तिः । किमी॑दिनी॒रिति॒ किमि॑ऽदिनीः ।
यस्य॑ । स्थ । तम् । अ॒त्त॒ । यः । व॒ः । प्र॒ऽअहै॑त् । तम् । अ॒त्त॒ । स्वा ।
मां॒सानि॑ । अ॒त्त॒ ॥ ५ ॥

जीर्यति जीर्णं भवति प्राणिशरीरम् अनयेति जूर्णिः एतत्संज्ञा राक्षसी तस्याः संबुद्धिः । ॥ जॄ वयोहानौ इत्यस्मात् करणे क्तिन् । "बहुलं

1 S'Kd घः कर्तरि घः.

छन्दसि" इति अनोष्ठ्यपूर्वस्यापि उत्वम् । "ऋकारल्वादिभ्यः क्तिन् निष्ठावद् भवतीति वक्तव्यम्" इति निष्ठावद्भावाद् नत्वम् । यद्वा ज्वरति अनयेति करणे क्तिन् । "ज्वरत्वर०" इत्यादिना वकारोपधयोरूठ् । छान्दसं नत्वम् संबुद्धिगुणाभावश्च । यद्वा "वीज्याज्वरिभ्यो निः" इति [उ० ४.४८] औणादिको निप्रत्ययः । पूर्ववद् ऊठ् । "कृदिकाराद् अक्तिनः" इति ङीषि "अम्बार्थनद्योर्ह्रस्वः" इति ह्रस्वत्वम् । जूर्णेः स्त्रीत्वाद् यातवोत्र यातुधान्यः । किम् इदानीं किम् इदानीम् इति चरन्त्यो राक्षस्यः किमीदिन्यः । जसि "वा छन्दसि" इति पूर्वसवर्णदीर्घः । अन्यत् समानम् ॥

षष्ठी ॥

उपब्दे पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनीः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥ ६ ॥

उपब्दे । पुनः । वः । यन्तु । यातवः । पुनः । हेतिः । किमीदिनीः ।
यस्य । स्थ । तम् । अत्त । यः । वः । प्रऽअहैत् । तम् । अत्त । स्वा ।
मांसानि । अत्त ॥ ६ ॥

हे उपब्दे क्रूरशब्दकारिणि । उपपूर्वाद् वदतेः शब्दनार्थात् पद्यतेर्वा बद स्थैर्य इत्यस्माद् वा इन् सर्वधातुभ्यः [उ० ४.११७] इति इन् । पृषोदरादित्वाद् रूपसिद्धिः । गतम् अन्यत् ॥

सप्तमी ॥

अर्जुनि पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनीः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥ ७ ॥

अर्जुनि । पुनः । वः । यन्तु । यातवः । पुनः । हेतिः । किमीदिनीः ।
यस्य । स्थ । तम् । अत्त । यः । वः । प्रऽअहैत् । तम् । अत्त । स्वा ।
मांसानि । अत्त ॥ ७ ॥

हे अर्जुनि अर्जुनशीले अर्जुनवर्णे वा ॥

अष्टमी ॥

भरूंजि पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनीः ।
यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥ ८ ॥

भरूंजि । पुनः । वः । यन्तु । यातवः । पुनः । हेतिः । किमीदिनीः ।
यस्य । स्थ । तम् । अत्त । यः । वः । प्रऽअहैत् । तम् । अत्त । स्वा ।
मांसानि । अत्त ॥ ८ ॥

हे भरूचि[*] भ्रियते पोष्यत इति भरुः शरीरम् । तद् अपहर्तुम् अञ्चति गच्छतीति भरूची । डुभृञ् धारणपोषणयोः इत्यस्मात् भृमृशी[1]० [उ० १.७] इत्यादिना उप्रत्यये भरुः । तस्मिन्नुपपदे "ऋत्विक्०" इत्यादिना अञ्चतेः क्विन् । "अञ्चतेश्चोपसंख्यानम्" इति ङीप् । "अचः" इत्यकारलोपे "चौ" इति दीर्घः । उक्तम् अन्यत् ॥

इति द्वितीये काण्डे चतुर्थेनुवाके सप्तमं सूक्तम् ॥

"शं नो देवी पृश्निपर्णी" इति सूक्तस्य चातनगणे पाठात् शान्त्युदकादौ अस्य विनियोगोवगन्तव्यः ॥

तथा कुष्ठादिसर्वरोगभैषज्यकर्मणि अनेन सूक्तेन पृश्निपर्णीं पेषयित्वा[2] लेपयेत् । सूत्रितं हि । "अघद्विष्टा[२.७] शं नो देवी[२.२५] वरणः [६.८५] पिप्पली[3]"[६.१०९] इति प्रक्रम्य "द्वितीयेन मन्त्रोक्तस्य संपातवतावसिञ्चत्यनुलिम्पति[4]" इति [कौ० ४.२] ॥

तत्र प्रथमा ॥

शं नो देवी पृश्निपर्ण्यशं निर्ऋत्या अकः ।
उग्रा हि कण्वजम्भनी तामभक्षि सहस्वतीम् ॥ १ ॥

शम् । नः । देवी । पृश्निऽपर्णी । अशम् । निःऽऋत्यै । अकः ।
उग्रा । हि । कण्वऽजम्भनी । ताम् । अभक्षि । सहस्वतीम् ॥ १ ॥

---

१ K भरूचि. We with A B $\overset{h}{B}$ D R $\overset{m}{S}$ P $\overset{2}{P}$ V.

---

1 S′ Kd °दशि° for °शी°. 2 S′ Kd °यित्वात्वाले°. 3 S′ Kd पिप्पलीम्. 4 S′ Kd om. °वसिञ्चत्य°.

देवी द्योतमाना पृश्निपर्णी चित्रपर्णी ओषधिः नः अस्माकं शम् कुष्ठादिरोगशमनेन सुखम् अकः अकार्षीत् करोतु । ॥ "छन्दसि लुङ्लङ्लिटः" इति लोडर्थे[1] लुङ् । "मन्त्रे घस०" इत्यादिना च्लेर्लुक् । गुणे "हल्ङ्याब्भ्यः०" इति तिलोपः ॥ । निर्ऋत्यै । ॥ षष्ठ्यर्थे चतुर्थी ॥ । निर्ऋत्याः रोगनिदानभूतायाः अशम् दुःखम् अकः करोतु ॥ हि यस्मात् उग्रा उन्नूर्णबला सती कण्वजम्भनी कण्वस्य पापस्य नाशयित्री ॥ अतः सहस्वतीम् रोगाभिभवनसामर्थ्ययुक्तां ताम् पृश्निपर्णीम् अभक्षि अहं भक्षे अनुलेपादिना सेवे । ॥ भक्षेर्लुङि आत्मनेपदोत्तमैकवचने रूपम् । सहस्वतीम् इति । "तसौ मत्वर्थे" इति भत्वेन अपदत्वाद्[2] रुत्वाभावः ॥ ॥

द्वितीया ॥

सहमानेयं प्रथमा पृश्निपर्ण्यजायत ।
तयाहं दुर्णाम्नां शिरो वृश्चामि शकुनेरिव ॥ २ ॥

सहमाना । इयम् । प्रथमा । प्रश्निऽपर्णी । अजायत ।
तया । अहम् । दुःऽनाम्नाम् । शिरः । वृश्चामि । शकुनेःऽइव ॥ २ ॥

सहमाना रोगान् अभिभवन्ती इयं पृश्निपर्णी प्रथमा प्रथिता ओषधीनां मुख्या आदिभूता वा अजायत उत्पन्ना । ॥ जनी प्रादुर्भावे । "ज्ञाजनोर्जा" इति जादेशः ॥ ॥ तया उक्तलक्षणया पृश्निपर्ण्या दुर्नाम्नाम् दद्रुविसर्पकश्वित्रादिकुष्ठरोगविशेषाणा शिरः शिरोवत्प्रधानभूतं रोगनिदानम् अहं वृश्चामि छिनद्मि नाशयामि । तत्र दृष्टान्तः । शकुनेरिव यथा पक्षिणः शिरः खड्गादिप्रहरणसाधनम् अनपेक्ष्य अनायासेन छिद्यते एवं पृश्निपर्णीलेपनमात्रेण समूलम् उन्मूलयामीत्यर्थः ॥

तृतीया ॥

अरायमसृक्पावानं यश्च स्फातिं जिहीर्षति ।

---

१ D R P[2] J जिहीरिषति.

---

1 S' Kd लेडर्थे. 2 S' Kd भत्वेन पद°.

गर्भादं कण्वं नाशय पृश्निपर्णि सहस्व च ॥ ३ ॥

अरायम्। असृक्पावानम्। यः। च। स्फातिम्। जिहींर्षति।

गर्भऽअदम्। कण्वम्। नाशय। पृश्निऽपर्णि। सहस्व। च ॥ ३ ॥

असृक्पावानम् शरीरगतरक्तस्य पातारम् अरायम् अरातिं कुष्ठादिरोगात्मकम्। नाशयेति संबन्धः। कुष्ठादिरोगेण शरीरपोषकशुद्धरक्तस्यापगमात् पानव्यपदेशः। पिबतेः "आतो मनिन्क्वनिव्वनिपश्च" इति वनिप् प्रत्ययः। किं च यः रोगो ग्रहण्यादिरूपः स्फातिम् शरीरवृद्धिं जिहीर्षति हर्तुम् इच्छति नाशयितुम् उपक्रमते। तं नाशयेति संबन्धः। स्फायी वृद्धौ। क्तिनि "तितुत्र०" इति इट्प्रतिषेधे वलि लोपः। हरतेः सनि "अज्झनगमां सनि" इति दीर्घे "ऋत इद्धातोः" इति इत्वम्। यद्वृत्तयोगेन निघातप्रतिषेधे निच्वाद् आद्युदात्तत्वम॥ तथा हे पृश्निपर्णि गर्भादम् गर्भस्य भक्षकं कण्वम् रोगनिदानपापं नाशय सहस्व च गर्भध्वंसकान् शत्रूंश्च अभिभव। गर्भादम् इति। अद भक्षणे। अस्माद् गर्भोपपदाद् "अदोनन्ने" इति विट् प्रत्ययः ॥

चतुर्थी ॥

गिरिमेनाँ आ वेशय कण्वान् जीवितयोपनान्।

तांस्त्वं देवि पृश्निपर्ण्यग्निरिवानुदहन्निहि ॥ ४ ॥

गिरिम्। एनान्। आ। वेशय। कण्वान्। जीवितऽयोपनान्।

तान्। त्वम्। देवि। पृश्निऽपर्णि। अग्निःऽइव। अनुऽदहन्। इहि ॥ ४ ॥

हे पृश्निपर्णि जीवितयोपनान् प्राणस्य मोहकान्। युप रुप लुप विमोहने। "कृत्यल्युटो बहुलम्" इति कर्तरि ल्युट्। एनान् उक्तविधान् कण्वान् कुष्ठादिरोगनिदानभूतान् पाप्मनः गिरिम् पर्वतं स्वसंचाररहितम् आ वेशय प्रवेशय। "गतिबुद्धिप्रत्यवसानार्थ०"

---

१ B corrects into कण्वाँ. We with A $\overset{h}{B}$ D K R $\overset{m}{S}$ V. २ $\overset{2}{P}$ J जिहींरिषति. We with P.

1 S' Kd विनि for वनिप्.

इति विशतेर्गत्यर्थाद् अणिकर्तुः पाप्मनः कर्मत्वम् ॥ हे देवि द्योतमाने हे पृश्निपर्णि त्वं तान् गिरौ आवेशितान् कण्वान् अनुदहन् अग्निरिव अरण्यस्थितान् सर्पमृगादीन् अनुगम्य दहन् दावाग्निरिव अनुदहन्ती इहि गच्छ । अनुदहन्निति । अनुदहनलक्षणस्य साधारणधर्मस्य उपमानोपमेयनिष्ठत्वाद् उपमानापेक्षया पुंलिङ्गता । इहीति । इण् गतौ । लोटि अदादित्वात् शपो लुक् ॥

पञ्चमी ॥

परांच एनान् प्र णुद कण्वान् जीवितयोपनान् ।
तमांसि यत्र गच्छन्ति तत् क्रव्यादो अजीगमम् ॥ ५ ॥

परांचः । एनान् । प्र । नुद । कण्वान् । जीवितऽयोपनान् ।
तमांसि । यत्र । गच्छन्ति । तत् । क्रव्यऽअदः । अजीगमम् ॥ ५ ॥

हे पृश्निपर्णि जीवितयोपनान् एनान् अन्वादिष्टान् कण्वान् पराचः प्र णुद पराङ्मुखान् प्रेरय अपसारय । परापूर्वाद् अञ्चतेः क्विनि शसि अकारलोपे "अनिगन्तोञ्चतावप्रत्यये" इति पूर्वपदप्रकृतिस्वरत्वम् ॥ तमांसि सूर्योदयानन्तरं यत्र सूर्यरश्मिसंचाररहितं यं प्रदेशं गच्छन्ति तत् तथाविधं निःसूर्यं स्थानं क्रव्यादः पिशितादिधातुभक्षकान् कुष्ठादिरोगान् अजीगमम् त्वल्लेपनेन अहमपि प्रापयामि । क्रव्यशब्दोपपदाद् अत्तेः "क्रव्ये च" इति विट् प्रत्ययः । गमेर्ण्यन्तात् लुङि चङि रूपम् ॥

इति चतुर्थेनुवाकेऽष्टमं सूक्तम् ॥

"एह यन्तु पशवः" इति सूक्तेन गोपुष्टिकामः अभिनवं पयः वत्सलालामिश्रितं संपात्य अभिमन्त्र्य अश्नीयात् ॥
तथा अनेन सूक्तेन गाम्[2] अभिमन्त्र्य दद्यात् ॥
तथैव अनेन उदपात्रम् अभिमन्त्र्य गोष्ठमध्ये निनयेत् ॥

---

1 S′Kd omit the visarga. 2 S′Kd गा अभि°. We with *Kaus'ika*.

एवं सारूपवत्सौदने गुग्गुलुलवणशकृत्पिण्डान् प्रक्षिप्य पश्चाद् अग्नेस्त्रिरात्रं निखाय चतुर्थेऽहनि उद्धृत्य अनेन संपात्य अभिमन्त्र्य अश्नीयात् ॥

अत्रोक्तं कौशिकेन। "एह यन्तु पशवः[२.२६] सं वो गोष्ठेन [३.१४]" इति प्रक्रम्य "गृष्टेः पीयूषं श्लेष्ममिश्रम् अश्नाति गां ददात्युदपात्रं निनयति" इत्यादि [कौ० ३.२] ॥

तत्र प्रथमा ॥

एह यन्तु पशवो ये परेयुर्वायुर्येषां सहचारं जुजोष।
त्वष्टा येषां रूपधेयानि वेदास्मिन् तान् गोष्ठे सविता नि यच्छतु ॥ १ ॥

आ। इह। यन्तु। पशवः। ये। पराऽईयुः। वायुः। येषाम्। सहऽचारम्। जुजोष।
त्वष्टा। येषाम्। रूपऽधेयानि। वेद। अस्मिन्। तान्। गोऽस्थे। सवि-
ता। नि। यच्छतु ॥ १ ॥

ये पशवः परेयुः परागताः पराङ्मुखाः पुनरावृत्तिरहिता अगमन् ते सर्वे इह अस्मिन् गोष्ठे आ यन्तु पुनरागच्छन्तु। इण् गतौ। "इणो यण्" इति यण् आदेशः। ईयुरिति। अस्मादेव धातोर्लिटि उसि पूर्ववद् यणि कृते "द्विर्वचनेचि" इति स्थानिवद्भावाद् द्विर्वचनम्। "दीर्घ इणः किति" इत्यभ्यासस्य दीर्घः। येषाम् पशूनां वायुः सहचारम् सहसंचरणं जुजोष सेवते तद्रक्षणार्थं सह वर्तते। जुषेर्व्यत्ययेन परस्मैपदम्। गोष्ठाद् विनिर्गतानां गवां वायुरेव रक्षक इत्ययम् अर्थस्तैत्तिरीयके स्पष्टम् आम्नायते। "वायवः स्थेत्या-"ह। वायुर्वा अन्तरिक्षस्याध्यक्षाः[1]। अन्तरिक्षदेवत्याः खलु वै पशवः। वायव "एवैनान् परिददाति" इति [तै० ब्रा० ३.२.१.४]। येषाम् पशूनां त्वष्टा एतन्नामको देवः रूपधेयानि। "भागरूपनामभ्यो धेयः" इति स्वार्थे धेयप्रत्ययः। गर्भगतवत्सरूपाणि वेद कर्तुं जानाति। करोतीत्यर्थः। "यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो

1 So S'Kd and the TB. also.

"वै तत् प्रजायते" [तै० सं० १. ५. ९. १] "त्वष्टा वै पशूनां मिथुनानां रूपकृत् [तै० ब्रा० ३. ८. ११. २] इत्यादिश्रुतेः । यद्वा रूपधेयानि रूपाणि धेयानि विधातव्यानि वेद । धाञः कर्मणि यत् । "ईद्यति" इति ईत्वम् । तान् उक्तान् सर्वान् पशून् अस्मिन् गोष्ठे । गावस्तिष्ठन्त्यस्मिन्निति गोष्ठम् । तस्मिन् । सविता सर्वप्रेरको देवो नि यच्छतु नियमयतु । यथा पुनर्न गच्छन्ति तथा स्थापयतु इत्यर्थः । निपूर्वाद् यमेः शपि "इषुगमियमां छः" इति छत्वम् ॥

द्वितीया ॥

इमं गोष्ठं पशवः सं स्रवन्तु बृहस्पतिरा नयतु प्रजानन् ।
सिनीवाली नयत्वाग्रमेषामाजग्मुषो अनुमते नि यच्छ ॥ २ ॥

इमम् । गोऽस्थम् । पशवः । सम् । स्रवन्तु । बृहस्पतिः । आ । नयतु । प्रऽजानन् ।
सिनीवाली । नयतु । आ । अग्रम् । एषाम् । आऽजग्मुषः । अनुऽमते । नि । यच्छ ॥ २ ॥

पशवः गवाद्या इमम् अस्मदीयं गोष्ठं सं स्रवन्तु संप्राप्नुवन्तु ॥ बृहस्पतिर्देवः प्रजानन् आनयनप्रकारं विद्वान् आ नयतु गोष्ठं प्रापयतु ॥ तथा सिनीवाली एतन्नामिका देवपत्नी दृष्टेन्दुकलामावास्यादेवता वा । एषाम् । कर्मणि षष्ठी । इमान् पशून् अग्रम् पुरोदेशम् आ नयतु । सिनीवालीशब्दो यास्केन बहुधा व्याख्यातः । सिनीवाली कुहूरिति देवपत्न्याविति नैरुक्ताः । अमावास्ये इति याज्ञिकाः । [या पूर्वामावास्या सा सिनीवाली । योत्तरा सा कुहूरिति विज्ञायते] । सिनीवाली । सिनम् अन्नं भवति । सिनाति भूतानि । वालं पर्व वृणोतेस्तस्मिन्नन्नवती वालिनी वा वालेनैवास्याम् अणुत्वाच्चन्द्रमाः सेवितव्यो भवतीति वा [नि० ११. ३१] इति । आजग्मुषः आगता-

---

१ This is the reading of **A B B**r **B**^{h} **D K R S**^{m} **P P**^{2} **J V.** अनुमते is supported by none of our authorities. २ **B**^{h} यंच्छत्. We with **A B B**r **D K R S**^{m} **P P**^{2} **J V.**

न् पशून् अनुगँते हे अनुगमनकारिणि हे देवपत्नि पूर्वपौर्णमास्यभिमानिदेवते वा त्वं नि यच्छ गोष्ठे नियमय। आजग्मुष इति। आङ्पूर्वाद् गमेः क्वसुः। शसि "वसोः संप्रसारणम्" इति संप्रसारणम् ॥

तृतीया ॥

सं सं स्रवन्तु पशवः समश्वाः समु पूरुषाः।
सं धान्यस्य या स्फातिः सँस्राव्येण हविषा जुहोमि ॥ ३ ॥

सम्। सम्। स्रवन्तु। पशवः। सम्। अश्वाः। सम्। ऊं इति। पुरुषाः।
सम्। धान्यस्य। या। स्फातिः। समऽस्राव्येण। हविषा। जुहोमि॥३॥

पशवः गवाद्याः सं सं स्रवन्तु सम्यग् आगच्छन्तु। "प्रसमुपोदः पादपूरणे" इति समो द्विर्वचनम् ॥ तथा अश्वाः। सम् इत्युपसर्गश्रवणात् सर्वत्र स्रवन्तु इति संबन्धः ॥ तथा पुरुषाश्च सेवकाद्याः ॥ धान्यस्य व्रीहियवादेर्या स्फातिः अभिवृद्धिः सापि [सं] स्रवतु ॥ अहमपि तत्सिद्धये संस्राव्येण संस्रावणार्हेण आज्येन हविषा जुहोमि ॥

चतुर्थी ॥

सं सिञ्चामि गवां क्षीरं समाज्येन बलं रसम्।
संसिक्ता अस्माकं वीरा ध्रुवा गावो मयि गोपतौ ॥ ४ ॥

सम्। सिञ्चामि। गवाम्। क्षीरम्। सम्। आज्येन। बलम्। रसम्।
समऽसिक्ताः। अस्माकम्। वीराः। ध्रुवाः। गावः। मयि। गोऽपतौ॥४॥

गवाम्। अत्र गोशब्देन गृष्टयो विवक्षिताः। गृष्टीनां क्षीरम् अभिनवं पयः आज्येन सं सिञ्चामि गवां क्षीरं सम् आज्येन संपातयामि। गवाम् इति। "[न] गोश्वन्त्साववर्ण०" इति विभक्त्युदात्तत्वप्रतिषेधः ॥ तथा आज्येन बलम् बलकरम् अन्नं रसम्[2] उदकं च बलकरं रसमेव वा। सं सिञ्चामीति संबन्धः ॥ अस्माकं वी-

1 S′Kd repeat पशवः. 2 S′Kd चस° for रस°.

राः पुत्राद्याः संसिक्ताः घृतादिना संसिक्तशरीराः दृढगात्राः । भवन्तु इति शेषः ॥ तदर्थं गोपतौ गोस्वामिनि मयि गावः ध्रुवाः स्थिरा भवन्तु । ॥ गोपताविति । "पत्यावैश्वर्ये" इति पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥

पञ्चमी ॥

आ हरामि गवां क्षीरमाहार्षं धान्यं१ रसम् ।
आहृता अस्माकं वीरा आ पत्नीरिदमस्तकम् ॥ ५ ॥

आ । हरामि । गवाम् । क्षीरम् । आ । अहार्षम् । धान्यम् । रसम् ।
आऽहृताः । अस्माकम् । वीराः । आ । पत्नीः । इदम् । अस्तकम् ॥ ५ ॥

गवां क्षीरम् उक्तप्रयोगेण आ हरामि आनयामि । गोसंपत्त्या बहुतरं क्षीरसंपन्नो भवामीत्यर्थः ॥ तथा धान्यं रसं च आहार्षम् आहृतवान् अस्मि ॥ तथा अस्माकं वीराः पुत्राद्या आहृताः आनीताः प्राप्ताः । पत्नीः पत्यश्च । आ इत्युपसर्गश्रवणात् हृता इति संबन्धः ॥ उक्तानां सर्वेषां किं प्रति आहरणम् इति तद् आह । इदम् संनिहितम् अस्मत्संबन्धि अस्तकम् । ॥ अस्तम् इति गृहनाम । स्वार्थे कः ॥ । गृहम् । गोधान्यपुत्रादिभिरस्मद्गृहं सर्वतः पूर्णं भवतु इति भावः ॥

इति द्वितीये काण्डे चतुर्थेनुवाके नवमं सूक्तम् ॥

समाप्तश्चतुर्थोनुवाकः ॥

पञ्चमेनुवाके पञ्च सूक्तानि । तत्र "नेच्छत्रुः" इति प्रथमेन सूक्तेन विवादजयकर्मणि पाठामूलम् अभिमन्त्र्य खादन् अपराजिताद् देशात् सभास्थानं प्रविशेत् ॥

तथा अनेन अभिमन्त्रितां पाठां खादन् प्रतिवादिनं ब्रूयात् ॥

एवं पाठामूलं संपात्य अनेनाभिमन्त्र्य वक्षीयात् ॥

एवमेव अनेनाभिमन्त्रितां पाठामालां सप्तभिः पत्रैर्विरचितां शिरसि धारयेत् ॥

---

१ B^{h} B R S^{m} धान्यं ३. **D** has no kampa.

सूत्रितं हि। "नेच्छत्रुरिति पाठामूलं प्रतिप्राशितम् अन्वाह बभ्राति मालां सन्नपलाशीं धारयति" इति [कौ० ५. २]॥

तथा "अपराजितां विजयकामस्य" इति [न० क० १७] विहितायाम् अपराजिताख्यायां महाशान्तौ पाठामूलमणिबन्धनेपि एतत् सूक्तम्। उक्तं नक्षत्रकल्पे। "नेच्छत्रुरिति पाठामूलम् अपराजितायाम्" इति [न० क० १९]॥

तत्र प्रथमा॥

नेच्छत्रुः प्राशं जयाति सहमानाभिभूरसि।
प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे॥ १॥

न। इत्। शत्रुः। प्राशम्। जयाति। सहमाना। अभिऽभूः। असि।
प्राशम्। प्रतिऽप्राशः। जहि। अरसान्। कृणु। ओषधे॥ १॥

हे पाठाख्ये ओषधे शत्रुः प्रतिवादी प्राशम् प्रष्टारं वादिनं त्वत्सेवकं मां[1] नेत् जयाति। इदिति अवधारणे। नैव जयतु। प्राशम् इति। प्रच्छ ज्ञीप्सायाम् इत्यस्मात् "क्विब्वचि०" इत्यादिना क्विप् तत्संनियोगेन दीर्घः संप्रसारणाभावश्च। "च्छ्वोः शूडनुनासिके च" इति सतुक्कस्य छकारस्य शकारः। जयातीति। जयतेर्लेटि आडागमः॥ यतस्त्वं सहमाना शत्रुसहनस्वभावा अतः अभिभूरसि प्रतिवादिनः शत्रोरभिभवित्री भवसि। एवम् अतिशयितवीर्ययुक्तायास्तव सेवया मां शत्रुर्न जयतु इत्यर्थः। अस्याः सहनशील[2]त्वं श्रुत्यन्तरे सिद्धवद् आम्नातम्। "उत्तानपर्णे सुभगे सहमाने सहस्वति"। "उप तेधां सहमानाम्" इति च [ऋ० १०. १४५. ६]॥ प्राशम् प्रष्टारं वादिनं माम् उद्दिश्य प्रतिप्राशः प्रतिकूलप्रश्नकर्तॄन् प्रतिवादिनो जहि पराजितान् कुरु। "हन्तेर्जः" इति जादेशः। "असिद्धवद् अत्रा भात्" इति तस्यासिद्धत्वात् हेर्लुगभावः। यद्वा। प्रतिप्राश इति षष्ठी। प्रतिवादिनः प्राशम् प्रश्नं जहीत्यर्थः। प्रतिपूर्वात् प्रच्छेः पूर्ववत् प्रक्रिया। पराजयप्रकारमेवाह। हे ओषधे प्रतिवादिवाक्यजनित-

1 S' Kd मा for मां. 2 S' Kd सहशीलत्वश्रु°.

तापापहर्त्रि । ओषः पाकोस्यां धीयत इति "कर्मण्यधिकरणे च" इति दधातेरधिकरणे किप्रत्ययः । यद्वा ओषे दाहके ज्वरादौ एनां पाठादिरूपां वैद्योपदेशप्रकारेण धयन्ति पिबन्ति आतुरा इति ओषधिः । अपि वा दोषं वातपित्तादिकं धयति पिबति विनाशयतीति ओषधिः । पृषोदरादित्वाद् आदिवर्णलोपः । पक्षद्वयेपि धेटः अनुपसर्गे सुबन्तमात्र उपपदे व्यत्ययेन किप्रत्ययः । अत्र यास्कः । ओषधय ओषद्धयन्तीति वा ओषत्येना धयन्तीति वा दोषं धयन्तीति वा इति [नि० ९. २७] । हे तथाविधौषधे प्रतिवादिनः अरसान् नीरसान् शुष्ककण्ठान् वक्तुम् असमर्थान् कृणु कुरु । यद्वा अरसान् रसरहितवाक्यान् । असंगतप्रलापिनः कुरु इत्यर्थः ॥

द्वितीया ॥

सुपर्णस्त्वान्वविन्दत् सूकरस्त्वाखनन्नसा ।
प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ॥ २ ॥

सुऽपर्णः । त्वा । अनु । अविन्दत् । सूकरः । त्वा । अखनत् । नसा ।
प्राशम् । प्रतिऽप्राशः । जहि । अरसान् । कृणु । ओषधे ॥ २ ॥

सुपर्णः शोभनपक्षो वैनतेयस्त्वा त्वाम् अन्वविन्दत् विषाद्यपहरणाय अन्विष्य अलभत । विदॢ लाभे । "शे मुचादीनाम्" इति नुम ॥ सूकरः आदिवराहस्त्वा त्वां नसा नासिकया तत्सहितया दंष्ट्रया अखनत् विदारितवान् । भूम्या अन्तरवस्थितां त्वां लोकोपकारार्थम् उदहार्षीद् इत्यर्थः । अनेन अस्या अमोघवीर्यत्वम् उक्तम् ॥ प्राशं प्रतिप्राशम् इत्यादि गतम् ॥

तृतीया ॥

इन्द्रो ह चक्रे त्वा बाहावसुरेभ्यस् तरीतवे ।
प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ॥ ३ ॥

इन्द्रः । ह । चक्रे । त्वा । बाहौ । असुरेभ्यः । तरीतवे ।

---

1 S' Kd ओषधय°.

प्राशंम। प्रतिंऽप्राशः। जहि। अरसान्। कृणु। ओषधे॥ ३॥

हे पाठे त्वाम् इन्द्रस्त्रिलोकीपतिः असुरेभ्यः असुरान् *तरीतवे स्तरीतुम्। हिंसितुम् इत्यर्थः। बाहौ दक्षिणभुजे चक्रे कृतवान् धृतवान्॥ तथा अहमपि प्रतिवादिविजयार्थं त्वाम्॥ गतम् अन्यत्। ✠ असुरेभ्य इति। "क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वात् चतुर्थी। "तुमर्थेसेसेनसे०" इत्यादिना तवेप्रत्ययः। "वृतो वा" इति इटो दीर्घः ✠॥

चतुर्थी॥

पाटामिन्द्रो व्याश्नादसुरेभ्य स्तरीतवे।
प्राशं प्रतिंप्राशो जह्यरसान् कृण्वोषधे॥ ४॥

पाटाम। इन्द्रः। वि। आश्नात्। असुरेभ्यः। स्तरीतवे।
प्राशंम। प्रतिंऽप्राशः। जहि। अरसान्। कृणु। ओषधे॥ ४॥

*पाठांम उक्तप्रभावाम ओषधिम असुरांस्तरीतुम इन्द्रो व्याश्नात्। अभक्षयत्। ✠ अश भोजने। क्र्यादित्वात् श्नाप्रत्ययः॥ गतम् अन्यत् ✠॥

पञ्चमी॥

तयाहं शत्रून्त्साक्ष इन्द्रः सालावृकाँ इव।
प्राशं प्रतिंप्राशो जह्यरसान् कृण्वोषधे॥ ५॥

तया। अहम। शत्रून्। साक्षे। इन्द्रः। सालावृकान्ऽइव।
प्राशंम। प्रतिंऽप्राशः। जहि। अरसान्। कृणु। ओषधे॥ ५॥

या उदीरितप्रभावा *पाठां तयाहं धारणभक्षणादिना शत्रून् प्रतिवादिनः साक्षे अभिभवामि। निरुत्तरान् असत्प्रायान् करोमीत्यर्थः। ✠ सहतेरभिभवार्थात् लेटि उत्तमे "सिव्बहुलं लेटि" इति सिप्। "सिव्बहुलं छन्दसि णिद् वक्तव्यः" इति सिपो णिद्वद्भावाद् वृद्धिः ✠। तत्र

---

१ R °वृकँ. We with A B B^{r} B^{h} D K S^{m} V.

---

1 S′ Kd °रान् तरी° distinctly. 2 S′ निरुत्तरोनसत्रयान्. Kd निरुत्तरोनसतत्रायान्.

दृष्टान्तः । इन्द्रो देवः सालावृकान् । अरण्यश्वानः सालावृकाः । तद्रूपान् असुरान् यथा विगीर्णवान् ॥ अयमेवार्थो दाशतय्या स्पष्टम् आम्नातः । "त्वमिन्द्र सालावृकान्त्सहस्त्रम् आसन् दधिषे" इति । [ऋ. १०.७३.३] ॥

षष्ठी ॥

रुद्र जलाषभेषज नीलशिखण्ड कर्मकृत ।
प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ॥ ६ ॥

रुद्र । जलाषऽभेषज । नीलऽशिखण्ड । कर्मऽकृत ।
प्राशम् । प्रतिऽप्राशः । जहि । अरसान् । कृणु । ओषधे ॥ ६ ॥

रौति शब्दायते तारकं ब्रह्म उपदिशतीति रुद्रः । तथा च जाबालश्रुतिः । "अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु[1] रुद्रस्तारकं ब्रह्म व्याचष्टे" इति [जा० उ० १] । शब्दब्रह्मात्मना रोरूयमाणो द्रवति सर्वप्राणिहृदये वर्तत इति वा अस्त्रेण छिन्नशिरसं शोचन्तं प्रजापतिम् अनु स्वयमपि शोकवशाद् अरोदीद् इति वा उत्पत्तिकाले स्वयम् अरुदद् इति वा रोदयति सर्वम् अन्तकाल इति वा रुद्रः । तद् उक्तं यास्केन । रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा । यद्[2] अरुदत् तद् रुद्रस्य रुद्रत्वम् इति विज्ञायते[2] । यद् अरुदत् तद् रुद्रस्य रुद्रत्वम् इति काठकम् यद् अरोदीत् तद् रुद्रस्य रुद्रत्वम् इति हारिद्रवकम् [नि० १०.५] इति । तथा महोपनिषदि । "तस्य ध्यानान्तस्थस्य ललाटात् त्र्यक्षः[3] शूलपाणिः पुरुषोजायत विभ्रच्छ्रियं सत्यम" इति [महोप० १] । अथर्वशिरस्यपि । "संयुगस्यान्तकाले संहृत्य विश्वा भुवनानि गोप्ता तस्माद् उच्यत एको रुद्रः" इति [अ० शि० उ० ४] । अथवा रुत् रोदनकरं सांसारिकं दुःखं तद्धेतुभूताम् अविद्यां वा द्रावयति विनाशयतीति रुद्रः । तद् उक्तं वायवीयसंहितायाम् ।

रुद् दुःखं दुःखहेतुर्वा तद् द्रावयति नः प्रभुः ।

---

1 S′ Kd °पूत्क्रमणेषु. 2 So S′ Kd. 3 S′ Kd त्र्यक्षशूलपाणिपुरु°.

रुद्र इत्युच्यते तस्मात् शिवः परमकारणम् ।

इति। हे उक्तमहिमोपेत रुद्र जलाषभेषज। जलाषम् इति सुखनाम। जायन्त इति जाः जनाः। ङ "डोन्यत्रापि दृश्यते" इति जनेः केवलादपि डः ङ। तैर्लष्यते वाञ्छ्यत इति जलाषं सुखम्। ङ जशब्दे उपपदे लषेः कर्मणि घञ् ङ। जलाषं सुखकरं भेषजं यस्य। यद्वा उदकनामैतत्। जलाषम् उदकमात्रं यस्य स्मरणेन भेषजं भवति स तथोक्तः। तस्य ध्येयम् आकारं दर्शयति। नीलशिखण्ड नीलवर्णकपर्दोपेत। अनेन नित्यतारुण्यम् उक्तम्। हे कर्मकृत् स्वोपासकानां दुष्कर्माणि कृन्ततीति कर्मकृत्। अथवा साध्वसाधुरूपाणि कर्माणि कारयतीति कर्मकृत्। ङ करोतेरन्तर्भावितण्यर्थात् क्विप् ङ। "एष ह्येव साधु कर्म कारयति" [कौ० ब्रा० ३, ८] इत्यादिश्रुतेः। यद्वा सृष्ट्यादीनि पञ्च कृत्यानि करोतीति कर्मकृत्। उक्तं हि।

पञ्चविधं तत् कृत्यं सृष्टिः स्थितिसंहृती तिरोभावः।
तद्वद् अनुग्रहकरणं प्रोक्तं सततोदितस्यास्य।

इति। एवंमहानुभाव रुद्र मया सेव्यमानाम् इमां पाठाख्याम् ओषधिं प्रतिवादितिरस्करणसमर्थां कुरु इति शेषः॥ एवं रुद्रानुगृहीते पाठाख्ये ओषधे। प्राशं प्रतिप्राशो जहीत्यादि पूर्ववत्॥

सप्तमी॥

तस्य॒ प्राश॒ं त्वं ज॑हि॒ यो न॑ इन्द्राभि॒दास॑ति।
अधि॑ नो ब्रूहि॒ शक्ति॑भिः प्रा॒शि॑ं मामु॒त्त॑रं कृधि॥ ७॥

तस्य॑। प्राश॑म्। त्वम्। ज॒हि॒। यः। नः॒। इ॒न्द्र॒। अ॒भि॒ऽदास॑ति।
अधि॑। नः॒। ब्रू॒हि॒। शक्ति॑ऽभिः। प्रा॒शि॑ं। माम्। उ॒त्ऽत॑रम्। कृ॒धि॒॥ ७॥

हे इन्द्र यः प्रतिवादी नः अस्मान् अभिदासति उपक्षपयति युक्तिभिस्तिरस्करोति। ङ दसु उपक्षये इत्यस्माद् ण्यन्तात् परस्य शपः "छन्दस्युभयथा" इति आर्धधातुकत्वात् "णेरनिटि" इति णिलो-

१ K V प्राशम्. We with A B B[p] B[h] D R S[m] P P[2] J.

पः ॥ । तस्य उपक्षपयितुः प्राशम् प्रतिकूलप्रश्नरूपं वाक्यं त्वं जहि नाशय ॥ तथा शक्तिभिः त्वदीयैः सामर्थ्यविशेषैः नः असान् अधि ब्रूहि अधिकवचनयुक्तान् ग्राह्यवाचः कुरु । फलितम् आह । प्राशँम् प्रष्टारं वादिनं माम् उत्तरम् प्रतिवादिनोप्युत्कृष्टतरं कृधि कुरु । "श्रुशृणुपृकृवृभ्यश्छन्दसि" इति हेर्धिरादेशः ॥

इति पञ्चमेनुवाके प्रथमं सूक्तम् ॥

"तुभ्यमेव जरिमन्" इति सूक्तेन गोदानचौलकर्मणोर्मातापितरौ परस्परं पुत्रं त्रिः प्रत्यर्पयतः ॥

तथा तत्रैव कर्मणि अनेन सूक्तेन त्रीन् घृतपिण्डान् संपात्य अभिमन्त्र्य पुत्रं प्राशयतः ॥

सूत्रितं हि । "तुभ्यमेव जरिमन्निति कुमारं मातापितरौ त्रिः प्रयच्छेते घृतपिण्डान् आशयतः" इति [कौ० ७. ५] ॥

तत्र प्रथमा ॥

तुभ्यमेव जरिमन् वर्धतामयं मेमन्ये मृत्यवो हिंसिषुः शतं ये ।
मातेव पुत्रं प्रमना उपस्थे मित्र एनं मित्रियात् पात्वंहसः ॥ १ ॥

तुभ्यम् । एव । जरिमन् । वर्धताम् । अयम् । मा । इमम् । अन्ये । मृत्यवः । हिंसिषुः । शतम् । ये ।
माताऽइव । पुत्रम् । प्रऽमनाः । उपऽस्थे । मित्रः । एनम् । मित्रियात् । पातु । अंहसः ॥ १ ॥

जरिमन् जरतिः स्तुतिकर्मा । जरा स्तुतिर्जरते स्तुतिकर्मण इति यास्कः [नि. १०. ८] । तस्मात् कर्मणि औणादिक इमनिच् । हे स्तूयमान अग्ने तुभ्यमेव त्वत्परिचरणार्थमेव अयम् कुमारो वर्धतां रोगादिरहितः सन् अभिवृद्धो भवतु । यद्वा जरिमन् । जरैव जरिमा । हे जरे तुभ्यं त्वदर्थं त्वदागमनपर्यन्तं चिरकालम् अयं वर्धताम् ॥ किं च । शतम् शतसंख्योपलक्षिता अपरिमिता अन्ये त्वद्व्यतिरिक्ता ये मृत्यवः हिंसका रक्षःपिशाचादिरोगाद्याः सन्ति ते सर्वेपि इमं बालकं मा हिंसिषुः मा

हिंसन्तु ॥ तथा प्रमनाः प्रमुदितमना मित्रः एतन्नामा देवः मातेव पुत्रम् माता पुत्रमिव एनम् बालकम् उपस्थे उत्सङ्गे निकटप्रदेशे कृत्वा मित्रियात् मित्रसंबन्धिनः अंहसः द्रोहजनितात् पापात् पातु रक्षतु ॥

द्वितीया ॥

मित्र एनं वरुणो वा रिशादा जरामृत्युं कृणुतां संविदानौ ।
तदग्निर्होता वयुनानि विद्वान् विश्वा देवानां जनिमा विवक्ति ॥ २ ॥

मित्रः । एनम् । वरुणः । वा । रिशादाः* । जराऽमृत्युम् । कृणुताम् । समऽविदानौ ।
तत् । अग्निः । होता । वयुनानि । विद्वान् । विश्वा । देवानाम् । जनिम । विवक्ति ॥ २ ॥

मित्रः अहरभिमानी देवः वरुणः रात्र्यभिमानी । "मैत्रं वा अहः वारुणी रात्रिः" इति [तै० ब्रा० १. ७. १०. १] श्रुत्यन्तरात् । स च वरुणो रिशादाः रिशानां हिंसकानाम् अत्ता । रिश हिंसायाम् इत्यस्मात् इगुपधलक्षणः कः । अद भक्षणे इत्यस्माद् असुन् । वाशब्दः चार्थे । तावुभौ संविदानौ ऐकमत्यं प्राप्तौ । संपूर्वाद् वेत्तेरकर्मकात् "समो गम्यृच्छि०" इत्यात्मनेपदम् । लटः शानच् । एनम् माणवकं जरामृत्युम् जरयैव मृत्युर्मरणं यस्य तथाविधं कृणुताम् कुरुताम् । अहोरात्रयोरेव मरणसंभवात् तन्निवारणाय तदभिमानिदेवयोर्मित्रावरुणयोः प्रार्थनेति भावः ॥ होता देवानाम् आह्वाता वयुनानि । प्रज्ञानामैतत् । इह तु सामर्थ्यात् प्रज्ञातव्यानि विद्वान् जानन् अग्निः देवानां विश्वा विश्वानि सर्वाणि [जनिमा*] जनिमानि जन्मानि प्रादुर्भावस्थानानि । प्राप्येति शेषः । तत्[1] प्रार्थितं दीर्घम् आयुः विवक्ति ब्रवीतु । अग्निप्रमुखाः सर्वे देवाश्चास्य दीर्घम् आयुः कुर्वन्तु इत्यभिप्रायः । विवक्तीति । वचेः पञ्चमलकारे छान्दसः शपः श्लुः । "व-

---

१ K P P̊ J रिशादा, omitting the visarga. We with S.

---

1 S' Kd ततः for तत्.

हुलं छन्दसि" इत्यभ्यासस्य इत्वम् । जनिमेति । जनिमृङ्भ्यां इमनिन् [उ० ४. १४८] इति इमनिन् ॥

तृतीया ॥

त्वमीशिषे पशूनां पार्थिवानां[1] ये जाता उत वा ये जनित्राः[1] ।
मेमं प्राणो हासीन्मो अपानो मेमं मित्रा वधिषुर्मो अमित्राः ॥ ३ ॥

त्वम् । ईशिषे । पशूनाम् । पार्थिवानाम् । ये । जाताः । उत । वा । ये । जनित्राः[1] ।
मा । इमम् । प्राणः । हासीत् । मो इति । अपानः । मा । इमम् । मित्राः । वधिषुः । मो इति । अमित्राः ॥ ३ ॥

हे अग्ने त्वं पार्थिवानाम् पृथिव्याम् उत्पन्नानाम् । "पृथिव्या ञाञौ" इत्यञ् प्रत्ययः । ञित्वाद् आद्युदात्तत्वम् । पशूनाम् द्विपाच्चतुष्पाद्रूपाणां प्राणिनाम् । "अधीगर्थदयेशां कर्मणि" इति षष्ठी । ईशिषे अधिपतिरसि । ईश ऐश्वर्ये । "थासः से" । अदादित्वात् शपो लुक् । "ईशः से" इति इडागमः । तानेव पशून् विशिनष्टि । ये जाताः पूर्वम् उत्पन्नाः उत वा । उतशब्दः अप्यर्थे । अपि वा ये जनित्राः जनिष्यमाणाः । तेषाम् इति संबन्धः । जनेरौणादिक इत्रप्रत्ययः ॥ अतस्त्वत्प्रसादाद् इमम् माणवकं प्राणः ऊर्ध्वकायस्थो वायुः मा हासीत् मा त्याक्षीत् । अपानः अधरकायस्थो वायुः मो मैव हासीत् । ओहाक् त्यागे । "यमरमनमातां सक् च" इति सगिटौ ॥ तथा मित्राः । लिङ्गव्यत्ययः । मित्रभूता जनाः इमं कुमारं मा वधिषुः मा हिंसिषुः । अमित्राः शत्रवश्च मो मैव वधिषुः । हन्तेः "लुङि च" इति वधादेशः । तस्य अदन्तत्वेन अनेकाच्त्वाद् एकाज्लक्षणेट्प्रतिषेधाभावात् सिच इट् । अल्लोपस्य स्थानि-

---

१ This is the reading of A B B^{p} $\overset{h}{B}$ D K R $\overset{m}{S}$ P $\overset{2}{P}$ J V. जनित्वाः is read by Rw, but not on the authority of any manuscripts. Sâyaṇa follows the reading of our MSS., and the proposed emendation requires a further change, viz. of accent.

1 S′ Kd जनिहृङ्भ्यां°.

वत्त्वाद् "अतो हलादेर्लघोः" इति वृद्धेरप्रसङ्गः ॥

चतुर्थी ॥

द्यौष्ट्वा पिता पृथिवी माता जरामृत्युं कृणुतां संविदाने ।
यथा जीवा अदितेरुपस्थे प्राणापानाभ्यां गुपितः शतं हिमाः ॥ ४ ॥

द्यौः । त्वा । पिता । पृथिवी । माता । जराऽमृत्युम् । कृणुताम् । संवि-
दाने इति समऽविदाने ।
यथा । जीवाः । अदितेः । उपऽस्थे । प्राणापानाभ्याम् । गुपितः । शतम् ।
हिमाः ॥ ४ ॥

हे माणवक त्वा त्वां पिता पितृभूतो द्यौः द्युलोकः माता मातृभूता पृथिवी च संविदाने अन्योन्यम् ऐकमत्यम् आपन्ने जरामृत्युम् दीर्घायुष कृणुताम् कुरुताम् । आयुषः परिमाणं दर्शयति । अदितेः अखण्डनीयायाः पृथिव्या उपस्थे उत्सङ्गे प्राणापानाभ्याम् उक्तलक्षणाभ्यां गुपितः रक्षितः । गुपू रक्षणे इत्यस्माद् निष्ठायां "यस्य विभाषा" इति इट प्रतिषेधो व्यत्ययेन [न] प्रवर्तते । शतं हिमाः शतसंख्याकान् हेमन्तान् । संवत्सरान् इत्यर्थः । "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया । हिमशब्दस्य हेमन्तपरत्वं तैत्तिरीयके समाम्नायते । "शतं हिमा इत्याह । शतं त्वा हेमन्तान् इन्धिषीयेति वावैतद् आह" इति [तै० सं० १. ५. ८. ५] । यथा येन प्रकारेण त्वं जीवाः जीवेः । जीव प्राणधारणे इत्यस्मात् लेटि आडागमः । तथा जरामृत्युं कृणुताम् इति पूर्वत्र संबन्धः ॥

पञ्चमी ॥

इममग्न आयुषे वर्चसे नय प्रियं रेतो वरुण मित्रराजन् ।
मातेवासा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥ ५ ॥

इमम् । अग्ने । आयुषे । वर्चसे । नय । प्रियम् । रेतः । वरुण । मित्रऽ-
राजन् ।

माताऽइव । अस्मै । अदिते । शर्म । यच्छ । विश्वे । देवाः । जरत्ऽअष्टिः । यथा । असत् ॥ ५ ॥

हे अग्ने इमम् माणवकम् आयुषे शतसंवत्सरजीवनाय वर्चसे तेजसे । ☒"क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वाद् उभयत्र चतुर्थी☒ । तद् उभयं नय प्रापय ॥ हे वरुण मित्र राजन् राजमान । उभयोर्विशेषणम् एतत् । अत एव दाशतय्याम् आम्नायते । "राजाना मित्रावरुणा सुपाणी" इति [ऋ॰सं॰१.७१.९] । हे युवां प्रियम् पुत्रादिजनकत्वेन अभिमतम् । ☒प्रीङ् प्रीतौ इत्यस्मात् "इगुपधज्ञाप्रीकिरः कः" इति कः । यद्यपि वृत्तौ "इगुपधज्ञा॰" इत्यत्र प्रीणातेरेव ग्रहणं कृतं तथापि आत्रेयधातुवृत्त्यनुसारेण अस्मादपि को द्रष्टव्यः । "अचि श्नुधातु॰" इत्यादिना इयङ्☒ । तथाभूतं रेतः इमं माणवकं नयतम् । पुत्रादिजननसमर्थं कुरुतम् इत्यर्थः ॥ हे अदिते देवमातस्त्वं मातेव जननीव अस्मै माणवकाय शर्म सुखं यच्छ । हे विश्वे देवाः यूयमपि अयं माणवको जरदष्टिः जरापर्यन्तजीवनस्य अष्टिर्व्याप्तिर्यस्य स तथोक्तः । ☒"जीर्यतेरतृन्" । व्यत्ययेन भावे कर्तृप्रत्ययः☒ । यद्वा जरतो जीर्यतोपि अष्टिः सर्वव्यापारविषया[2] व्याप्तिर्यस्य तादृशो यथा असत् भवेत् । तथा दीर्घायुषं कुरुतेति शेषः । ☒अस्तेर्लेटि अडागमः☒ ॥

इति द्वितीयकाण्डे पञ्चमेनुवाके द्वितीयं सूक्तम् ॥

"पार्थिवस्य" इति सूक्तेन तृषार्तभैषज्यकर्मणि सूर्योदयकाले सूत्रोक्तप्रकारेण व्याधितम् उपवेश्य मथितं सक्तूदकम् अभिमन्त्र्य पाययेत् ॥

अनेनैव सूक्तेन नद्यादिषु उदकम् अभिमन्त्र्य उद्धृत्य "सवासिनौ[3]" [६] इत्यर्धर्चेन व्याधिताव्याधितौ एकासनस्थौ एकवस्त्रपरिहितौ[4] कृत्वा उभावपि मन्थं पाययेत् प्रयोक्ता ॥

अत्र सूत्रम् । "पार्थिवस्येत्युद्यति पृष्ठसंहितावुपवेशयति[5] प्राङ्मुखं व्याधितं

---

1 S′Kd उभये. 2 S′Kd °विषयः. 3 S′Kd पासंवा° for सवा°. 4 S′Kd °परिमितौ. 5 S′Kd °संहिता°.

"प्रत्यङ्मुखम् अव्याधितं शाखासूपवेश्य वैतसे[1] चमसे उपमन्थनीभ्यां[2] तृण्णा-
"गृहीतस्य शिरसि मन्थम् उपमथ्य अतृषिताय[3] प्रयच्छति तस्मिन् तृणां संन-
"यत्युद्धृतम् उदकं पाययति सवासिनाविति मन्त्रोक्तम" इति [कौ० ४. ३] ॥

"पार्थिवस्य" [१,२] इति द्वाभ्यां गोदानचौलकर्मणोः कुमारस्य मूर्ध्नि व्रीहियवशमीरभिमन्त्र्य प्रक्षिपेत्[4] । सूत्रितं हि । "शिवे ते स्ताम [८. "२. १४,१५] इति परिदानान्तानि पार्थिवस्य [२. २९. १,२] मा म गा-
"म [१३. १. ५९, ६०] इति चतस्रः" इति [कौ० ७. ५] ॥

आशीर्ण ऊर्जम [३] इति तृतीयया तृतीयसवने पूतभृति आसिच्यमा-नम आशिरम् अनुमन्त्रयते । उक्तं वैताने । "आशिरं पूतभृत्यासिच्यमा-नम आर्शीर्ण[5] ऊर्जम इत्यनुमन्त्रयते" इति [वै० ३. १२] ॥

तत्र प्रथमा ॥

पार्थिवस्य॑ रसे॑ देवा॑[1] भगस्य॑ तन्वो॒३॑ बले॑ ।
आयु॑ष्य॒मस्मा॑[2] अग्निः॑ सूर्यो॑ वर्च॑ आ॑ धाद् बृह॒स्पति॑ः ॥ १ ॥

पार्थिवस्य । रसे॑ । देवा॒३॑ः । भगस्य॑ । तन्व॑ः । बले॑ ।
आयु॑ष्य॒म् । अस्मै॑ । अग्निः॑ । सूर्यः॑ । वर्चः॑ । आ । धा॒त् । बृह॒स्पति॑ः ॥ १ ॥

पार्थिवस्य पृथिव्याः संबन्धिनः । ✕ पूर्ववत् पृथिव्या अञ् ✕ । मथ्यमानसक्तादिकस्य रसे सारभूते मन्थोदके तृषारोगार्तपुरुषेण पीते[6] सति देवाः[*] इन्द्राद्या भगस्य भजनीयस्य एतन्नाम्नो देवस्य तन्वः शरीरस्य संबन्धिनि बले वीर्ये । योजयन्तु इति शेषः । भगसदृशबलयुक्तं कुर्वन्तु[7] इत्यर्थः । भगदेवताया अतिशयितबलत्वं तैत्तिरीयके समाम्नातम् ।

---

१ So A B B^{p} B^{h} D K R S^{m} P P^{2} J. Sâyaṇa would read देवा, *i.e.* as a nominative. २ K V आयुष्यं°. We with A B B^{p} B^{h} D R S^{m} P P^{2} J. ३ So P P^{2} J K. P once read देवाः. ४ K आयुष्यम्. P आयुष्यम्. We with P^{3}.

---

1 S′ Kd वेतसे. 2 S′ Kd °मंथनाभ्यां. Dârila explains: "वैतसीभ्यां शाखाभ्याम्." Keśava: "वैतसशलाकाभ्याम्." Sâyaṇa refers to these explanations when he says at the end of couplet 6: वैतसशलाकाभ्यां मथितं सक्तूदकम् &c. 3 S′ Kd तृपिताय for अतृपिताय. We with *Kauśika*. 4 S′ Kd प्रक्षिप्येत्. 5 S′ Kd आर्सान for आशीर्ण. 6 S′ Kd प्रीते. 7 S′ Kd कुर्वित्यर्थः.

श्रेष्ठो देवानां भगवो भगासि
तत् त्वा विदुः फल्गुनीस्तस्य वित्तात्।
अस्मभ्यं क्षत्रम् अजरं सुवीर्यं
गोमद् अश्ववद् उपसन्नुदेह [तै० ब्रा० ३. १, १. ८]।

इति । भगस्येति । भज सेवायाम् इत्यस्मात् "पुंसि संज्ञाया घः प्रायेण" इति घः । "चजोः कु घिण्ण्यतोः" इति कुत्वम् ॥ यद्वा देवाः इन्द्राद्याः पार्थिवस्य व्रीहियवादिलक्षणस्य रसे सारांशे उक्तलक्षणे बले च इमं पुरुषम् । योजयन्तु इति वाक्यशेषः ॥ अपि च अस्मै पुरुषाय अग्निः आयुष्यम् शतसंवत्सरलक्षणम् आ धात् आदधातु करोतु ॥ तथा सूर्यः सर्वस्य प्रेरक आदित्यः बृहस्पतिः बृहतां मन्त्राणां पालको देवश्च अस्मै वर्चः शरीरकान्तिं श्रुताध्ययनजन्यं तेजश्च यथोचितम् आदधातु ॥

द्वितीया ॥

आयुरस्मै धेहि जातवेदः प्रजां त्वष्टरधिनिधेह्यस्मै ।
रायस्पोषं सवितरा सुवास्मै शतं जीवाति शरदस्तवायम् ॥ २ ॥

आयुः । अस्मै । धेहि । जातऽवेदः । प्रऽजाम् । त्वष्टः । अधिऽनिधेहि । अस्मै ।
रायः । पोषम् । सवितः । आ । सुव । अस्मै । शतम् । जीवाति । शरदः ।
तव । अयम् ॥ २ ॥

हे [जातवेदः] जातानां वेदितरग्ने अस्मै आयुः शतसंवत्सरसंमितं धेहि प्रयच्छ । अग्नेरायुषो दातृत्वम् "आयुर्दा अग्ने" [२. १३. १] इत्यादिमन्त्रसिद्धम् ॥ तथा हे त्वष्टः अस्मै प्रजाम् पुत्रपौत्रादिलक्षणाम् अधिनिधेहि अधिकं स्थापय । "यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत् प्रजायते" [तै० सं० १. ५. ९. १] इत्यादिश्रुतौ त्वष्टुः प्रजानां बहुधोत्पादकत्वं प्रसिद्धम् ॥ तथा हे सवितः सर्वस्य प्रेरक देव अस्मै रायः धनस्य गवादिलक्षणस्य पोषम् पुष्टिं समृद्धिम् आ सुव अभिमुखं प्रेरय । षू प्रेरणे । तौदादिकः । रायः । "ऊडिदम्०" इत्यादि-

ना विभक्तेरुदात्तत्वम्। "षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु" इति विसर्जनीयस्य सत्वम्॥ सवितुर्धनप्रदत्वम् "स हि रत्नानि दाशुषे सुवाति सविता भगः" [ऋ० ५. ८२. ३] इत्यादिश्रुतिप्रसिद्धम्। हे अघ्न्यादिदेवाः तव। प्रत्येकापेक्षया एकवचनम्। युष्मदनुगृहीतः सन् [अयं] शतं शरदः जीवाति जीवतु। ॥जीव प्राणधारणे। लेटि आडागमः॥ ॥

तृतीया ॥

आ॒शीर्ण॒ ऊर्ज॑मुत सौप्रजा॒स्त्वं दक्षं॑ धत्तं द्रवि॑णं॒ सचे॑तसौ।
जय॑ं क्षेत्रा॑णि॒ सह॑सायमिन्द्र कृण्वा॒नो अ॒न्यानध॑रान्त्स॒पत्ना॑न् ॥ ३ ॥

आ॒ऽशीः। नः॒। ऊर्ज॑म्। उ॒त। सौ॒प्र॒जाः॒ऽत्वम्। दक्ष॑म्। ध॒त्त॒म्। द्रवि॑णम्। स॒ऽचे॑तसौ।

जय॑म्। क्षेत्रा॑णि। सह॑सा। अ॒यम्। इ॒न्द्र॒। कृ॒ण्वा॒नः। अ॒न्यान्। अध॑रान्। स॒ऽप॒त्ना॑न् ॥ ३ ॥

नः अस्माकम् आशीः आशिषम् आशास्यमानां धनधान्यादिसंपत्तिं धत्तम् इति संबन्धः। ॥"सुपां सुलुक्०" इति द्वितीयैकवचनस्य सुः॥ यद्वा आशीः फलप्रार्थना। सत्या भवतु इति शेषः। ॥आङः शासु इच्छायाम् इत्यस्मात् कर्मणि भावे वा क्विप्। "आशासः क्वावित्वम्" इति वचनाद् उपधाया इत्वम्॥ ॥ तथा ऊर्जम् अन्नं हे द्यावापृथिव्यौ धत्तम्॥ उत अपि च सौप्रजास्त्वम्। सुप्रजसो भावः [सौप्रजास्त्वम्]। शोभनापत्यत्वं कुरुतम्। ॥"नित्यम् असिच् प्रजामेधयोः" इत्यसिच् समासान्तः। छान्दसौ वृद्धिदीर्घौ॥ ॥ सचेतसौ समानमनसौ युवां दक्षम्। बलनामैतत्। बलं द्रविणम् धनं च धत्तम् प्रयच्छतम्॥ यद्वा आशीरिति रेफान्तोयम्। तृतीयसवने सोमावसेकार्थस्य पयसो वाचकः। तत् आशीराख्यं द्रव्यं पूतभृति आसिच्यमानं नः अस्मभ्यम् ऊर्जं शोभनापत्यत्वं च। करोतु इति शेषः। ॥"अपस्पृधेथाम्०" इत्यत्र "आताँश्रितमाशीराशीर्ता॑ः" इति आङ्पूर्वात् श्रीञ्

1 S′ Kd धनंधा°. 2 So S′ Kd distinctly.

पाके इत्यस्मात् क्विपि शिरादेशो निपातितः ॥ हे इन्द्र त्वत्प्रसादाद् अयं पुरुषः सहसा अभिभवनसाधनेन बलेन शत्रूणां जयं क्षेत्राणि च कृण्वानः आत्मसात् कुर्वाणः अन्यानपि सपत्नान् शत्रून् अधरान् अधःकृतान् पराजितान् । करोतु इत्यर्थः ॥

चतुर्थी ॥

इन्द्रेण दत्तो वरुणेन शिष्टो मरुद्भिरुग्रः प्रहितो न आगन् ।
एष वां द्यावापृथिवी उपस्थे मा क्षुधन्मा तृषत् ॥ ४ ॥

इन्द्रेण । दत्तः । वरुणेन । शिष्टः । मरुत्ऽभिः । उग्रः । प्रऽहितः । नः । आ । अगन् ।
एषः । वाम् । द्यावापृथिवी इति । उपऽस्थे । मा । क्षुधत् । मा । तृषत् ॥४॥

तृणागृहीतः पुरुषः इन्द्रेण देवेन दत्तः लब्धजीवनः । "दो दद् घोः" इति दज्ञावः । वरुणेन अरिष्टनिवारकेण देवेन शिष्टः अनुज्ञातः । "शास इदङ्हलोः" इत्युपधाया इत्वम् । "शासिवसिघसीनां च" इति षत्वम् । मरुद्भिः मरुद्गणैः उग्रः उद्गूर्णबलः सन् प्रहितः प्रेषितः । हि गतौ इत्यस्मात् कर्मणि निष्ठा । [नः] अस्मान् आगन् आगमत् । गमेर्लुङि "मन्त्रे घस०" इति च्लेर्लुक् । "मो नो धातोः" इति नत्वम् ॥ एवम् आगत एषः द्यावापृथिवी हे द्यावापृथिव्यौ वाम् युवयोरुपस्थे उत्सङ्गे वर्तमानो मा क्षुधत् क्षुत्पीडां मा प्रापत् । मा तृषत् तृषार्तिं मा गमत् । क्षुध बुभुक्षायाम् जितृष पिपासायाम् । उभयोर्माङि लुङि पुषादित्वाद् अङ् ॥

पञ्चमी ॥

ऊर्जमस्मा ऊर्जस्वती धत्तं पयो अस्मै पयस्वती धत्तम् ।
ऊर्जमस्मै द्यावापृथिवी अधातां विश्वे देवा मरुत ऊर्जमापः ॥ ५ ॥

---

१ A B B^{r} B^{h} D K R S^{m} P^{a} J V all have द्यावापृथिवी (P^{a} J K द्यावापृथिवी !). P alone reads द्यावापृथिवी. We with Rw and Sâyaṇa. २ B^{h} देवा corrected from देवा. A B D K R S^{m} P P^{2} J V देवा (P P^{2} J देवाः). We with Rw and Sâyaṇa.

ऊर्जम्। अस्मै। ऊर्जस्वती इति। धत्तम्। पयः। अस्मै। पयस्वती इति। धत्तम्।
ऊर्जम्। अस्मै। द्यावापृथिवी इति। अधाताम्। विश्वे। देवाः। मरुतः। ऊर्जम्। आपः॥ ५॥

ऊर्जस्वती हे ऊर्जस्वत्यौ बलवत्यौ द्यावापृथिव्यौ। ऊर्ज बलप्राणनयोः इत्यस्माद् असुन्। "तसौ मत्वर्थे" इति भत्वाद् रुत्वाभावः। असै तृषिताय ऊर्जम् बलं बलकरम् अन्नं वा धत्तम् प्रयच्छतम्॥ तथा पयस्वती हे पयस्वत्यौ अस्मै पयः उदकं धत्तम्॥ प्रार्थितं फलं लब्धम् इति सहसा रोगनिवृत्तये सिद्धवद् अनुवदति ऊर्जम् इत्यर्धर्चेन। द्यावापृथिवी उक्तलक्षणे ते द्यावापृथिव्यौ अस्मै ऊर्जम् प्रार्थितम् अन्नं बलं वा अधाताम् दत्तवत्यौ। तथा विश्वे देवाः मरुतः आपः अब्देवताश्च ऊर्जम्। अधुः इति वचनविपरिणामेन संबन्धः॥

षष्ठी॥

शिवाभिष्टे हृदयं तर्पयाम्यनमीवो मोदिषीष्ठाः सुवर्चाः।
सवासिनौ पिबतां मन्थमेतमश्विनौ रूपं परिधाय मायाम्॥ ६॥

शिवाभिः। ते। हृदयम्। तर्पयामि। अनमीवः। मोदिषीष्ठाः। सुऽवर्चाः।
सऽवासिनौ। पिबताम्। मन्थम्। एतम्। अश्विनोः। रूपम्। परिऽधाय। मायाम्॥ ६॥

हे तृषार्त ते तव हृदयं नीरसं शिवाभिः सुखकरीभिरद्भिस्तर्पयामि। "युष्मत्तत्ततक्षुःष्वन्तःपादम्" इति भिसो विसर्जनीयस्य षत्वम्॥ अनन्तरं त्वम् अनमीवः तृषारोगरहितः सुवर्चाः शोभनतेजोयुक्तः सन् मोदिषीष्ठाः मोदस्व। मुद हर्षे इत्यस्माद् आशिषि लिङ्। अनमीव इति। बहुव्रीहौ "नञ्सुभ्याम्" इति उत्तरपदान्तो-

१ See footnote १ on the previous page. २ See footnote २ on the previous page.
३ B P J मथ°. We with A ^{h}B D K R ^{m}S ^{2}P V. ४ P J मथम्. We with ^{2}P K.

दात्तत्वम । सुवर्चा इति । बहुव्रीहौ "सोर्मनसी अलोमोषसी" इत्युत्तरपदाद्युदात्तत्वम ॥ सवासिनौ समानम् एकं वस्त्रं वसानौ समानम् एकत्र वसन्तौ वा । वस आच्छादने इत्यस्माद् वस निवासे इत्यस्माद् वा समानशब्दोपपदाद् "व्रते" इति णिनिप्रत्ययः । तत्र सूत्रे व्रतशब्देन शास्त्रीयो नियम उक्तः । "समानस्य च्छन्दसि०" इत्यादिना समानशब्दस्य सभावः ॥ । व्याधिताव्याधितौ तौ अश्विनोः देवभिषजो रूपं मायाम् मायामयं परिधाय धृत्वा एतं मन्थं पिबताम् पीतं कुरुताम् । यद्यपि सक्तूदकं द्विशलाकया समिधा मथितं मन्थ उच्यते तथापि अत्र सूत्रे विशेषविधानाद् वैतसे चमसे वैतसशलाकाभ्यां मथितं सक्तूदकं मन्थशब्देन विवक्षितम् ॥

सप्तमी ॥

इन्द्र॑ एतां स॑सृजे विड्ढो अग्र॑ ऊ॒र्जां स्व॒धाम॒जरां॑ सा त॑ एषा ।
तया॑ त्वं जीव शर॒दः सु॒वर्चा॒ मा त॒ आ सु॑स्रोद् भिष॒जस्ते अक्रन् ॥ ७ ॥

इन्द्रः । एताम् । ससृजे । विड्ढः । अग्रे । ऊर्जाम् । स्वधाम् । अजराम् ।
सा । ते । एषा ।
तया । त्वम् । जीव । शरदः । सुऽवर्चाः । मा । ते । आ । सुस्रोत् । भिषजः । ते । अक्रन् ॥ ७ ॥

अग्रे पुरा विड्ढः वृत्राद्यसुरैस्ताडित इन्द्रः तृषार्तः सन् तन्निवृत्तये ऊर्जम[*] बलकरीं स्वधाम । अन्ननामैतत् । अन्नवत्पुष्टिकरीम् अजराम् जराया निवर्तयित्रीम् एताम् मन्थलक्षणाम् ऊर्जं[2] ससृजे सृष्टवान् ॥ हे व्याधित ते तुभ्यं [सा] एषा दीयमाना । सेवकबलकर[3]त्वाद्युक्तगुणसद्भावप्रतिपादनाय तत्तादात्म्यव्यपदेशः ॥ विड्ढ इति । व्यध ताडने इत्यस्माद् निष्ठायां "ग्रहिज्या०" इत्यादिना संप्रसारणम् । [*]ऊर्जम इति । ऊर्ज बलप्राणनयोः । अस्माद् भावे क्विप् । ऊर्ग् बलं तद्वन्तं करोतीति णिचि "विन्म-

१ R ऊर्जा. We with A B B[P] B[h] D K S[m] P P[2] J.

1 See note 3, page 301. 2 S′ Kd repeat ऊर्जम्. 3 S′ Kd omit °क°.

तोर्लुक्" । ततः कर्तरि क्विप् । यद्वा ऊर्ज्यते प्राण्यते अनयेति अण्यन्तादेव वा करणे क्विप् । स्वधेति । स्वेभ्यो धीयते स्वस्मिन् वा धीयत इति स्वधा । "धञर्थे कविधानम्" इति कः । स्वम् आत्मानं भोक्तृशरीरं दधाति पुष्णातीति वा स्वधा । "आतोनुपसर्गे कः" ॥ तया ऊर्जा सुवर्चाः सन् त्वं शरदः शतसंख्याका जीव ॥ पीतो मन्थस्ते तव शरीरात् मा आ सुस्रोत् प्रच्युतो मा भूत् । शरीरे स्थित्वा बलादिकं करोतु इत्यर्थः ॥ भिषजः आदिवैद्यास्ते तव अक्रन् इदं भैषज्यम् अकार्षुः । सु गतौ । लङि छान्दसः शपः श्लुः । अक्रन् । करोतेः "मन्त्रे घस०" इति च्लेर्लुक् ॥

इति पञ्चमेनुवाके तृतीयं सूक्तम् ॥

"यथेदं भूम्याम्*" इति सूक्तेन स्त्रीवशीकरणकर्मणि वृक्षत्वक्शरखण्डतगराञ्जनकुष्ठादिद्रव्याणि पेषयित्वा आज्येन आलोड्य स्त्रिया अङ्गम् अनुलिम्पेत् । "यथेदं भूम्याम्* अधि [२. ३०] यथा वृक्षम् [६. ८]" इति प्रक्रम्य सूत्रितम् । "संस्पृष्टयोर्वृक्षलिवुजयोः[1] शकलावन्तरेषुतगराञ्जनकुष्ठ[2] [मदुघरेप्समथित]तृणम् आज्येन संनीय संस्पृशति" इति [कौ० ४. ११] ॥

तत्र प्रथमा ॥

यथेदं भूम्या अधि तृणं वातो मथायति ।
एवा मंशामि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः ॥ १ ॥

यथा । इदम् । भूम्याः । अधि । तृणम् । वातः । मथायति ।
एव । मंशामि । ते । मनः । यथा । माम् । कामिनी । असः ।
यथा । मत् । न । अपऽगाः । असः ॥ १ ॥

भूम्याम्* पृथिव्याम् । अधिः उपर्यर्थः । भूम्या उपरि इदम् परिदृश्यमानं तृणं वातः वात्यालक्षणो वायुः यथा येन प्रकारेण मथ[3]यति म-

---

१ P P[2] J अपऽगा ।, omitting the visarga. We with K who adopts S.

---

1 S' Kd °लिञ्जयोः for °लिवुजयोः. 2 S' Kd शकलावतरणेपुतगरांजनकुष्ठंतृण°. We with *Kaus'ika*. 3 S' Kd मथयति.

ग्नाति अनवस्थितं कृत्वा भ्रामयति । ‘‘छन्दसि शायजपि’’ इत्यत्र ‘‘शायच् छन्दसि सर्वत्र’’ इति वचनाद् अहावपि श्नः शायजादेशः । शायचश्चित्त्वाद् अन्तोदात्तत्वम् । ‘‘यावद्यथाभ्याम्’’ इति निघातप्रतिषेधः । हे स्त्रि एव एवं ते मनः मश्नामि आलोडयामि । यथा येन प्रकारेण मां कामयमानं कामिनी काङ्क्षिष्यन्ती असः भवेः । यथा येन प्रकारेण मत् मत्तः सकाशाद् अपगाः अपसृत्य अन्यत्र गन्त्री नासः न भवेः । तथा मश्नामीति पूर्वत्र संबन्धः । कामिनीति । कर्मेर्णिङन्ताद् औणादिक इनिप्रत्ययः । तस्य ‘‘भविष्यति गम्यादयः’’ इति भविष्यदर्थत्वम् । ततो ङीप् । ‘‘अकेनोर्भविष्यदाधमर्ण्ययोः’’ इति कर्मणि षष्ठीप्रतिषेधः । तस्माद्[1] माम् इति द्वितीया । अपगा इति । ‘‘जनसनखनक्रमगमो विट्’’ इति गमेर्विट् प्रत्ययः । ‘‘विड्वनोरनुनासिकस्यात्’’ इति आत्त्वम् ॥

द्वितीया ॥

सं चेन्नयाथो अश्विना कामिना सं च वक्षथः ।
सं वां भगासो अग्मत सं चित्तानि समु व्रता ॥ २ ॥

सम । च । इत् । नयाथः । अश्विना । कामिना । सम । च । वक्षथः ।
सम । वाम् । भगासः । अग्मत । सम । चित्तानि । सम । ऊं इति ।
व्रता ॥ २ ॥

अश्विना हे अश्विनौ कामनाविषयभूतां स्त्रियम । इत् इत्यवधारणे । सं नयाथः मत्समीपं प्रापयतम । नयतेर्लेटि आडागमः । ‘‘चवायोगे प्रथमा’’ इति प्रथमा तिङ्भक्तिर्न निहन्यते ॥ आनीय च कामिना मया सं वक्षथः संयोजयतम । वहेर्लेटि अडागमः । ‘‘सिब्बहुलम्०’’ इति सिप् । परस्परसमुच्चयार्थौ चकारौ । वाम युवयोर्भगासः भगाः भाग्यानि । ‘‘आज्जसेरसुक्’’ । सम अग्मत संगच्छन्ताम् । मयेति शेषः । ‘‘समो गम्यृच्छि०’’ इत्यात्मने-

1 S′ Kd न्यामिति for तस्माद् माम् इति.

पदम् । छान्दसे लुङि च्लेर्लुक् । "गमहन०" इत्युपधालोपः ॥ तथा चित्तानि ज्ञानानि । समग्मतेत्यनुषङ्गः ॥ एवं व्रता व्रतानि । कर्मनामैतत् । उशब्दः अप्यर्थे । विविधानि कर्माण्यपि समग्मतेति संबन्धः ॥

तृतीया ॥

यत् सुपर्णा विवक्षवो अनमीवा विवक्षवः ।
तत्र मे गच्छताद्धवं शल्य इव कुल्मलं यथा ॥ ३ ॥

यत् । सुऽपर्णाः । विवक्षवः । अनमीवाः । विवक्षवः ।
तत्र । मे । गच्छतात् । हवम् । शल्यःऽइव । कुल्मलम् । यथा ॥ ३ ॥

सुपर्णाः शोभनपक्षाः पारावतादयः पक्षिणः यत् स्त्रीविषयं वाक्यं विवक्षवः वक्तुम् इच्छवो भवन्ति अनमीवाः अरोगिणो हृष्टाः कामिजनाश्च यद् विवक्षवो भवन्ति तत्र विषये क्रियमाणं मे मम संबन्धिनं हवम् आह्वानं कुल्मलं यथा कुत्सितमलोपेतं मृदुलं शरीरावयवविशेषमिव सा कामिनी शल्यः बाण इव गच्छतात् प्राप्नोतु । मद्वाक्यं श्रुत्वा मत्परवशा भवतु इत्यर्थः । विवक्षवः । ब्रुवः सनि वच्यादेशे "सनाशंसभिक्ष उः" इति उप्रत्ययः । "न लोकाव्ययनिष्ठा०" इति षष्ठीप्रतिषेधे यत् इति द्वितीया । सुपर्णाः अनमीवा इत्युभयत्र "नञ्सुभ्याम्" इत्युत्तरपदान्तोदात्तत्वम् । यथेति पादान्ते [फि० ४. १७] इति यथाशब्दो निहन्यते ॥

चतुर्थी ॥

यदन्तरं तद् बाह्यं यद् बाह्यं तदन्तरम् ।
कन्यानां विश्वरूपाणां मनो गृभायौषधे ॥ ४ ॥

यत् । अन्तरम् । तत् । बाह्यम् । यत् । बाह्यम् । तत् । अन्तरम् ।
कन्यानाम् । विश्वऽरूपाणाम् । मनः । गृभाय । ओषधे ॥ ४ ॥

यत् अर्थजातम् अन्तरम् अभ्यन्तरं मनः विषयीकरोति तदेव बाह्यम्

---

१ ^{m}S इवा. We with A B B^{P} ^{h}B D K R V. २ P गच्छताम्. We with ^{2}P J.

बहिष्ठं वाग्विषयो भवति । यद् बाह्यम् उक्तलक्षणं च तत् एव अन्तरं मानसं भवति । अनेन वाङ्मनसयोः परस्परं विसंवादो निरस्तः । ॥ बाह्यम् इति । "बहिषष्टिलोपो[2] यञ् च" इति यञ् प्रत्ययः लोपश्च ॥ एवं निर्दुष्टं विश्वरूपाणाम् अनवद्यसंपूर्णावयवानां कन्यानाम् अभुक्तपूर्वाणां मनः हे ओषधे तृणादिरूपे गृभाय गृहाण । त्वदनुलेपनेन तां मदनुरक्तचित्तां कुर्वित्यर्थः । ॥ कन्यानाम् इति । तिल्यशिक्यमर्त्यकार्ष्मर्य[3]धान्यकन्याराजन्यमनुष्याणाम् अन्तः [फि° ४. ८] इति अन्तस्वरितत्वम् । गृभाय । ग्रहेर्लोटि "छन्दसि शायजपि" इति श्नः शायजादेशः । "हृग्रहोर्भश्छन्दसि" इति भत्वम् ॥ ॥

पञ्चमी ॥

एयमगन् पतिकामा जनिकामोहमागमम् ।
अश्वः कनिक्रद्द् यथा भगेनाहं सहागमम् ॥ ५ ॥

आ । इयम् । अगन् । पतिऽकामा । जनिऽकामः । अहम् । आ । अगमम् ।
अश्वः । कनिक्रदत् । यथा । भगेन । अहम् । सह । आ । अगमम् ॥ ५ ॥

इयम् कामयमाना स्त्री पतिकामा पतिं भर्तारम् अभिलष्यन्ती आगन् मत्समीपम् आगमत् । ॥ गमेर्लुङि तिपि च्लेर्लुकि "मो नो धातोः" इति नत्वम् । पतिकामेति । "शीलिकामिभक्ष्याचरिभ्यो णः" इति णप्रत्ययान्तत्वात् ङीप् न भवति ॥ ॥ अहमपि जनिकामः जनिर्जाया तां कामयमानः सन् आगमम् तां प्राप्तवान् अस्मि ॥ किं च कनिक्रदत् भृशं हेषाशब्दं कुर्वन् अश्वः यथा वडवया संगच्छते तथा अहं भगेन सह आगमम् । ॥ कनिक्रदत् इति । क्रन्देराह्वानार्थाद् "दाधर्ति°" इत्यादिसूत्रे इतिशब्दस्य प्रकारवाचित्वात् कनिक्रदच्छब्दोपि शत्रन्तो निपातितो द्रष्टव्यः ॥ ॥

इति पञ्चमेनुवाके चतुर्थं सूक्तम् ॥

---

1 S′ Kd अंतरमान°. 2 S′ Kd °लोपश्चेति ण्यप्रत्ययः for °लोपो यञ् च इति यञ् प्रत्ययः. 3 S′ Kd °तिष्यशिक्यमर्त्यकाष्मर्षधान्य°. 4 S′ Kd °भिक्ष्या°. 5 S′ Kd दाधर्त्यादिसूत्रे.

"इन्द्रस्य या मही" इति सूक्तेन शरीरगतविविधक्रिमिरोगेषु तच्छान्तये घृतमिश्रान् कृष्णचणकान् जुहुयात् ॥

तथा गोवालवेष्टितं शरकाण्डं संभिद्य अग्नौ प्रताप्य आदध्यात् ॥

एवमेव रथ्यापांसुं सव्यहस्तेनादाय दक्षिणहस्तेन संमृज्य दक्षिणामुखः एतत् सूक्तं जपन् व्याधितस्योपरि किरति ॥

तथैव एतत् सूक्तं जपन् व्याधितो हस्ताभ्यां पांसुं मर्दयेत् ॥

तथा अनेन सूक्तेन पलाशोदुम्बराद्याः[2] समिध आदध्यात् ॥

तद् उक्तं कौशिकेन । "इन्द्रस्य या महीति खल्वाङ्गान्[3] अल्गण्डुहन-
"नान् घृतमिश्रान् जुहोति । बालान्[4] असितकाण्डे सव्यं परिवेष्ट्य सं-
"भिनत्ति प्रतपत्यादधाति सव्येन दक्षिणामुखः पांसुम् उपमथ्य परिकि-
"रति संमृद्नात्यादधाति" इति [कौ० ४. ३] ॥

तत्र प्रथमा ॥

इन्द्रस्य या महीं दृषत् क्रिमेर्विश्वस्य तर्हणी ।
तयाहं पिनष्मि सं क्रिमीन् दृषदा खल्वाँ इव ॥ १ ॥
इन्द्रस्य । या । मही । दृषत् । क्रिमेः । विश्वस्य । तर्हणी ।
तया । पिनष्मि । सम् । क्रिमीन् । दृषदा । खल्वान्ऽइव ॥ १ ॥

इन्द्रस्य देवस्य संबन्धिनी या मही महती । ऋअच्छब्दलोपश्छान्दसः ऋ । दृषत् शिलास्ति । तामेव विशिनष्टि । विश्वस्य सर्वस्य क्रिमेस्तर्हणी हन्त्री । ऋतृहेर्हिंसार्थात् करणे ल्युट् । ङीप् ऋ । तया उक्तप्रभावया दृषदा क्रिमीन् शरीरान्तर्गतान् सर्वान् क्षुद्रजन्तून् सं पि-

---

१ S[m] धृषत्. We with A B B[P] B[h] D R P P[2] J V. २ A K V कृमे°. We with B[h] D R S[m] P P[2] J. ३ A B[h] D K S[m] V कृमीन्. We with R P P[2] J. ४ D पल्वाँ.

---

1 S′ Kd दक्षिणमुखः. 2 S′ Kd पलाशौदु°. पलाशोदुम्बराद्याः is the reading of Kes'ava. 3 S′ Kd खल्वांगांनलगंडूहननान्. The MSS. of *Kaus'ika* have: खल्वंगानलगंडून्हननाद्धृत°, where Dârila explains, "खल्वंगाः कृष्णचणकाः । तानाज्यमिश्रान् जुहोति । अल्गंडवः क्रिमिविशेषाः" । 4 S′ Kd वालकमसिकांडं. The MSS. of *Kaus'ika*: वालान्कलमाखे कांडे, where Dârila explains: क्रिमीणां वालान् गृहीत्वा । कलमाषवर्णे शरे.

नप्मि संचूर्णयामि । ✠ पिषॢ संचूर्णने । रुधादित्वात् श्नम ✠ । तत्र दृष्टान्तः । दृषदा पेषण्या खल्वान् चणकानिव ॥

द्वितीया ॥

दृष्टमदृष्टमतृहमथो कुरूरुमतृहम् ।
अल्गण्डून्त्सर्वाञ्छलुनान् क्रिमीन् वचसा जम्भयामसि ॥ २ ॥

दृष्टम् । अदृष्टम् । अतृहम् । अथो इति । कुरूरुम् । अतृहम् ।
अल्गण्डून् । सर्वान् । शलुनान् । क्रिमीन् । वचसा । जम्भयामसि ॥ २ ॥

दृष्टम चक्षुर्गोचरम अदृष्टम तदगोचरम अन्तरवस्थितं क्रिमिजातम अतृहम तृणेह्मि हन्मि । ✠ तृह हिंसायाम । छान्दसे लुङि व्यत्ययेन च्लेरङ् ✠ ॥ अथो अपि च कुरीरम । कुरीरं जालम । तद्वद् अन्तरवस्थितं क्रिमिकुलम अतृहम । नाशयामीत्यर्थः ॥ तानेव विशेषतो दर्शयति अल्गण्डून् इति । एतन्नाम्नः क्रिमिविशेषान् शलगान् एतन्नाम्नश्च सर्वान् अन्यानपि क्रिमीन् वचसा मन्त्रेण [जम्भयामसि] जम्भयामः नाशयामः । ✠ जभेर्णौ "रधिजभोरचि" इति नुम ✠ ॥

तृतीया ॥

अल्गण्डून् हन्मि महता वधेन दूना अदूना अरसा अभूवन् ।
शिष्टानशिष्टान् नि तिरामि वाचा यथा क्रिमीणां नकिरुच्छिषाते ॥ ३ ॥

अल्गण्डून् । हन्मि । महता । वधेन । दूनाः । अदूनाः । अरसाः । अभूवन् ।

---

१ K V S कुरीर°. S[m] J कुरूर°. We with A B B[P] B[h] D R P P[2]. २ B[h] S[m] °मतृहम्. We with A D R K. ३ Rw read अलाण्डून्. We with A B B[P] B[h] D K R S[m] P P[2] J V, Sâyana, Dârila and Kes'ava. ४ K °सर्वान् श्लु°; R °सर्वा छ्लु°. We with A B[h] D S[m] V. ५ B B[P] वर्चसा. We with A B[h] D K R S[m] P P[2] J V. ६ K S कुरीरम्. We with P P[2] J. ७ See note ३. ८ The MSS. vary in the spelling of the word क्रिमि in this and in the following hymns, some writing कृ°, and others क्रि°, and that too indiscriminately.

---

1 S' Kd अंतरमंस्थि°.

शिष्टान्। अशिष्टान्। नि। तिरामि। वाचा। यथा। क्रिमीणाम्। नकिः। उत्ऽशिषातै ॥ ३ ॥

अल्गण्डून् शोणितमांसदूषकान् जन्तून् महता प्रभूतेन वधेन हननसाधनेन मन्त्रौषधादिना हन्मि। वधेनेति। "हनश्च वधः" इति करणे अप् वधादेशश्च। अल्लोपे उदात्तनिवृत्तिस्वरेण अन्तोदात्तत्वम ॥ ते च दूनाः मत्कृतौषधादिना परितप्ताः अदूनाः अपरितप्ताश्च ये सन्ति ते सर्वे अरसाः शुष्का निर्जीवा अभूवन्। दूना इति। टुदु उपतापे। तस्मान्निष्ठा। "दुग्वोर्दीर्घश्च" इति दीर्घो निष्ठानत्वं च। दूङ् परितापे इत्यस्मादेव वा। "स्वादय ओदितः" इति ओदित्त्वातिदेशाद् "ओदितश्च" इति निष्ठानत्वम ॥ तथा शिष्टान्। कान्। अशिष्टान् प्राग् अहतान् क्रिमिविशेषान् वाचा मन्त्रेण नि तिरामि निहन्मि। निपूर्वस्तिरतिर्हिंसने। यथा येन प्रकारेण क्रिमीणां नानाविधानां मध्ये कश्चिदपि नकिः उच्छिषातै नैवोच्छिष्यात्। तथा नि तिरामीति संबन्धः। नकिर्नेत्यर्थे। नकीम् नकिः आकृतम् इति नवोत्तराणि पदानि [निघ० ३. १२] इत्युक्तत्वात्। उच्छिषातै। शिषू विशेषणे इत्यस्मात् उत्पूर्वात् लेटि आडागमः। व्यत्ययेन आत्मनेपदम्। टेरेत्वे कृते "वैतोन्यत्र" इति ऐत्वम्। छान्दसो विकरणस्य लुक ॥

चतुर्थी ॥

अन्वान्त्यं शीर्षण्य१मधो पार्ष्ण्यं[1] क्रिमीन्[2]।
अवस्कवं व्यध्वरं क्रिमीन् वचसा जम्भयामसि ॥ ४ ॥

अनुड[3]आन्त्यम। शीर्षण्यम्। अधो इति। पार्ष्ण्यम। क्रिमीन्।
अवस्कवम। विऽअध्वरम। क्रिमीन्। वचसा। जम्भयामसि ॥ ४ ॥

अन्वान्त्यम् अनुक्रमेण आन्त्रेषु भवं क्रिमिजातं शीर्षण्यम् शिरसि भ-

---

१ $\overset{h}{B}$ K S पार्ष्णियं. We with A B B^p D R $\overset{m}{S}$ P $\overset{2}{P}$ J V. २ A $\overset{m}{S}$ $\overset{2}{P}$ J K $\overset{h}{B}$ V क्रिमिम्. R क्रिमिन्. We with S D P. ३ $\overset{2}{P}$ J °आत्र्यम्. We with P.

वं च । ⁂उभयत्र "शरीरावयवाच्च" इति यत् । "ये च तद्धिते" इति शिरःशब्दस्य शीर्षन् आदेशः । "ये चाभावकर्मणोः" इति प्रकृतिभावः । "तित् स्वरितः" इत्युभयत्र स्वरितत्वम् ⁂ । अथो अपि च पार्ष्णेयम् पार्ष्णिभवं क्रिमिम् । ⁂शरीरावयववाचिनः पार्ष्णिशब्दाद् व्यत्ययेन ढञ् ⁂ । एतान् उक्तान् क्रिमीन् । जम्भयामसीत्युत्तरत्र संबन्धः ॥ अवस्कवम् अवाग्गमनस्वभावम् । अन्तरन्तः प्रविश्य वर्तमानम् इत्यर्थः । ⁂स्कुञ् आप्रवणे । अस्माद् अवपूर्वात् पचाद्यच् ⁂ । व्यध्वरम् विविधमार्गोपेतम् । नानाद्वाराणि कृत्वा तत्र गच्छन्तम् इत्यर्थः । ⁂विविधोध्वा व्यध्वम् । "उपसर्गाद् अध्वनः" इत्यच् प्रत्ययः समासान्तः । रो मत्वर्थीयः ⁂ । यद्वा ध्वरो हिंसा । विविधैरौषधादिभिरपि न विद्यते ध्वरो यस्य स तथोक्तः । एवं नानाजातीयान् सर्वान् क्रिमीन् वचसा मन्त्रेण जम्भयामसि जम्भयामः ॥

पञ्चमी ॥

ये क्रिमयः पर्वतेषु वनेष्वोषधीषु पशुष्वप्स्वन्तः ।
ये[1] अस्माकं तन्व[2]मा[2]विविशुः सर्वं तद्धन्मि जनिम क्रिमीणाम् ॥ ५ ॥

ये । क्रिमयः । पर्वतेषु । वनेषु । ओषधीषु । पशुषु । अप्ऽसु । अन्तः ।
ये । अस्माकम् । तन्व[2]म् । आऽविविशुः । सर्वम् । तत् । हन्मि । जनिम ।
क्रिमीणाम् ॥ ५ ॥

पर्वतादिषु अन्तः मध्ये ये क्रिमयः स्थिताः ते* अस्माकं तन्वः* तनूः शरीराणि आविविशुः व्रणमुखेन अन्नपानादिद्वारेण वा प्रविष्टाः । सर्वम् निरवशेषं तत् उक्तविधं क्रिमीणां जनिम जन्म उत्पत्तिमेव हन्मि नाशयामि ॥

इति द्वितीयकाण्डे पञ्चमेनुवाके पञ्चमं सूक्तम् ॥

[इति पञ्चमोनुवाकः] ॥

---

१ KS ते. We with A B B^{P} $\overset{h}{B}$ D R $\overset{m}{S}$ P $\overset{2}{P}$ J V. २ S K V तन्वं आ°. We with A B B^{P} $\overset{h}{B}$ D R $\overset{m}{S}$ P $\overset{2}{P}$ J.

षष्ठेनुवाके पञ्च सूक्तानि। तत्र "उद्यन्नादित्यः" इति प्रथमसूक्तेन गोक्रिमिभैषज्यकर्मणि संध्यात्रयेपि क्रिमियुतव्रणमुखं दर्भैस्ताडयेत्॥

तथा अनेन सूक्तेन साज्यकृष्णचणकहोमादिकं पूर्वसूक्तोक्तप्रकारेणैव कुर्यात्॥

सूत्रितं हि। "उद्यन्नादित्य इत्युद्यति गोनामेत्याह असाविति। सू-
"क्तान्ते ते हता इति दर्भैरभ्यस्यति मध्यंदिने च प्रतीचीम् अपराह्णे बा-
"लस्तुकाम् आच्छिद्य खल्वादीनि" इति [कौ० ४. ३]॥

तत्र प्रथमा॥

उद्यन्नादित्यः क्रिमीन् हन्तु निम्रोचन् हन्तु रश्मिभिः।
ये अन्तः क्रिमयो गवि॥ १॥

उत्ऽयन्। आदित्यः। क्रिमीन्। हन्तु। निऽम्रोचन्। हन्तु। रश्मिऽभिः।
ये। अन्तः। क्रिमयः। गवि॥ १॥

आदित्यः उद्यन् उदयं प्राप्नुवन् रश्मिभिर्व्यापनशीलैः स्वकिरणैः क्रिमीन् हन्तु हिनस्तु। निम्रोचन् अस्तं गच्छंश्च रश्मिभिः क्रिमीन् हन्तु। ✕रश्मिभिरिति। अशे रश च [उ० ४. ४६] इति मिप्रत्ययो रशादेशश्च ✕॥ कुत्रत्यान् क्रिमीन् इति तत्राह। ये क्रिमयः गवि। जातावेकवचनम्। गोशरीरेषु अन्तः मध्ये सन्ति। तान् क्रिमीन् इति पूर्वत्र संबन्धः॥

द्वितीया॥

विश्वरूपं चतुरक्षं क्रिमिं सारङ्गमर्जुनम्।
शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः॥ २॥

विश्वऽरूपम्। चतुःऽअक्षम्। क्रिमिम्। सारङ्गम्। अर्जुनम्।
शृणामि। अस्य। पृष्टीः। अपि। वृश्चामि। यत्। शिरः॥ २॥

---

१ **A J K** पृष्ठी°. We with **B B̂ D R S̃ P P̂ V**.

---

1 **S′ K**d °सूत्रोक्त°. 2 **S′ K**d °रभिषिच्य for °रभ्यस्यति, which we with *Kaus'ika*, Kes'ava and Dârila. Kes'ava: **दर्भैराहन्ति क्रिमीणां मुखम्.** 3 **S′ K**d **बाह्य°** for **बाल°** which we with *Kaus'ika*. Dârila: **बालस्तुका वालजटा.** 4 **S′ K**d **खल्वादीनिति** for **खल्वादीनि इति.** We with *Kaus'ika*, Dârila and Kes'ava.

विश्वरूपम् नानाकारं चतुरक्षम् चतुर्नेत्रम् । "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति षच् समासान्तः । सारङ्गम् शबलवर्णम् अर्जुनम् शुभ्रवर्णम् एवम् अनेकाकारं क्रिमिं शृणामि हन्मि । शॄ हिंसायाम् । "ष्वादीनां[1] ह्रस्वः" ॥ अस्य उक्तलक्षणस्य क्रिमेः पृष्टीः[2] पार्श्वावयवानपि यच्छिरः शरीरान्तर्गतमांसादिभक्षकं प्रधानम् अङ्गं तदपि वृश्चामि छिनद्मि ॥

तृतीया ॥

अत्रिवद् वः क्रिमयो हन्मि कण्ववज्जमदग्निवत् ।
अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन् ॥ ३ ॥

अत्रिऽवत् । वः । क्रिमयः । हन्मि । कण्वऽवत् । जमदग्निऽवत् ।
अगस्त्यस्य । ब्रह्मणा । सम् । पिनष्मि । अहम् । क्रिमीन् ॥ ३ ॥

हे क्रिमयः वः युष्मान् अत्रिवत् कण्ववत् जमदग्निवत् । सर्वत्र प्रथमार्थे वतिः । ते यथा मन्त्रसामर्थ्यात् क्रिमीन् निघ्नन्ति एवम् अहम् अपि हन्मि ॥ तथा अगस्त्यस्य महर्षेर्ब्रह्मणा मन्त्रेण अहं क्रिमीन् सर्वान् सं पिनष्मि पुनरुद्भवो यथा न भवति तथा नाशयामि । एतेषां क्रिमिनिवारकत्वं श्रुत्यन्तरे प्रसिद्धम् । "अत्रिणा त्वा क्रिमे हन्मि कण्वेन जमदग्निना विश्वावसोर्ब्रह्मणा हतः" इति ॥

चतुर्थी ॥

हतो राजा क्रिमीणामुतैषां स्थपतिर्हतः ।
हतो हतमाता क्रिमिर्हतभ्राता हतस्वसा ॥ ४ ॥

हतः । राजा । क्रिमीणाम् । उत । एषाम् । स्थपतिः । हतः ।
हतः । हतऽमाता । क्रिमिः । हतऽभ्राता । हतऽस्वसा ॥ ४ ॥

क्रिमीणां राजा हतः अस्मत्प्रयुक्तमन्त्रौषधादिना नष्टः ॥ उत अपि च एषां क्रिमीणां स्थपतिः सचिवो [हतः] ॥ एवं हतमाता नष्टमा-

1 S' Kd ष्वादिना. 2 S' Kd पृष्टीः.

तृकः हतभ्राता हतभ्रातृकः हतस्वसा नष्टभगिनीकश्च क्रिमिर्हतः नष्टः ॥ सस्वामिकं सामात्यं सबान्धवं कृत्स्नं क्रिमिकुलं निरवशेषं नष्टम् इत्यर्थः। ॥ हतमातेत्यादिषु "नद्यृतश्च" इति नित्यं प्राप्तस्य कपः "ऋतश्छन्दसि" इति प्रतिषेधः ॥

पञ्चमी ॥

हतासो अस्य वेशसो हतासः परिवेशसः।
अथो ये क्षुल्लका इव सर्वे[1]* ते* क्रिमयो हताः ॥ ५ ॥

हतासः। अस्य। वेशसः। हतासः। परिवेशसः।
अथो इति। ये। क्षुल्लकाःइव। सर्वे। *ते[2]*। क्रिमयः। हताः ॥ ५ ॥

अस्य क्रिमिकुलस्य वेशसः निवेशनस्थानानि मुख्यगृहा हतासः हताः। एवं परिवेशसः परितः स्थिताः समीपगृहाश्च हतासः हताः। ॥ वेशसः। विशतेरधिकरणे औणादिकः असिप्रत्ययः ॥ अथो अपि च ये क्षुल्लका इव बीजावस्थाः सूक्ष्मरूपा दुर्लक्ष्या[2]ः क्रिमयः सन्ति ते सर्वेपि क्रिमयः हताः नाशिताः ॥

षष्ठी ॥

प्र ते शृणामि शृङ्गे याभ्यां वितुदायसि।
भिनद्मि ते कुषुम्भं[3] यस्ते विषधानः ॥ ६ ॥

प्र। ते। शृणामि। शृङ्गे इति। याभ्याम्। विऽतुदायसि।
भिनद्मि। ते। कुषुम्भम्। यः। ते। विषऽधानः ॥ ६ ॥

हे क्रिमे ते त्वदीये शृङ्गे विषाणे प्र शृणामि प्रभिनद्मि याभ्यां शृङ्गाभ्यां वितुदायसि विशेषेण नुदसि व्यथयसे[3]। ते इति संबन्धः। ॥ तुद व्यथने इत्यस्मात् परस्य शस्यापि व्यत्ययेन शायजादेशः ॥ ते

---

१ सर्वे ते क्रिमयो is the reading of **A B B^{p} B^{h} D K R S^{m} P P^{2} J V**. We with Sâyaṇa. २ **P P^{2} J** ते. We with Sâyaṇa. ३ **S** पुकुंभं; **K** पुकुम्भं; **B^{h} J** कुपुभं; **D** कुपम्भं. We with **A R S^{m} P P^{2} V**.

---

1 S′ Kd स्वस्वामिकं सामान्यं. 2 S′ Kd दुर्लक्षाः. 3 S′ Kd व्यथयतेइतिसं°.

तव षुकम्भम् अवयवविशेषं भिनद्मि विदारयामि । तमेवावयवं विशिनष्टि । ते तव संबन्धी यः अवयवः विषधानः । विषं धीयतेस्मिन्निति विषधानः विषस्थानम् । तम् इति पूर्वत्र संबन्धः । ॥ "करणाधिकरणयोश्च" इत्यधिकरणे ल्युट् ॥ ॥

इति षष्ठेनुवाके प्रथमं सूक्तम् ॥

"अक्षीभ्याम्" इति सूक्तेन अक्षिनासाकर्णशिरोजिह्वाग्रीवादिसर्वावयवजरोगभैषज्यकर्मणि बाह्वादिपर्वसु बद्धं व्याधितं संपाततोदकेन पर्वग्रन्थीन् विमुच्य[2] अवसिञ्चेत् । सूत्रितं हि । "अक्षीभ्यां त इति विवर्हम[3] उदपात्रेण संपातवतावसिञ्चति" इति [कौ० ४. ३] ॥

तथा अस्य सूक्तस्य अंहोलिङ्गगणे पाठात् तस्य गणस्य यत्रयत्र सर्वरोगभैषज्यादिषु विनियोग उक्तस्तत्र सर्वत्र अस्य विनियोगोनुसंधेयः । सूत्रितं हि । "ओषधिवनस्पतीनाम् अनुक्तान्यप्रतिषिद्धानि भैषज्यानाम् अंहोलिङ्गाभिः" इति [कौ० ४. ८] ॥ अत्र अक्षीभ्यां ते[२. ३३] मुञ्चामि त्वा[३. ११] उत देवाः[४. १३] आवतस्ते[५. ३०] शीर्षक्तिम्[९. ८] इति पञ्चप्रतीको गणो विवक्षितः ॥

तथैव अश्वमेधादिषु दीक्षावतो यजमानस्य भैषज्यकर्मणि एतत् सूक्तं विनियुक्तं वैताने । "अथ भैषज्याय यजमानम् अक्षीभ्यां ते मुञ्चामि त्वा" इति [वै० ७. ३] ॥

तत्र प्रथमा ॥

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि[1] ।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ॥ १ ॥

अक्षीभ्याम् । ते । नासिकाभ्याम् । कर्णाभ्याम् । छुबुकात् । अधि ।
यक्ष्मम् । शीर्षण्यम् । मस्तिष्कात् । जिह्वायाः । वि । वृहामि । ते ॥ १ ॥

हे यक्ष्मगृहीत ते तव अक्षीभ्याम् चक्षुर्भ्यां यक्ष्मम् रोगं वि वृहामि

---

१ B[h] alters छु° to चु°. S K चु°. We with A D R S[m] P P[2] J V.

---

1 S′ Kd °स्थाने. 2 S′ Kd विमुच्यविमुच्य. 3 So S′ Kd. *Kaus'ika*: °बर्ह°.

उद्वरामि । विश्लेषयामीत्यर्थः । ⁂ "ई च द्विवचने" इति अक्षिशब्दस्य ईकारान्तादेशः स चोदात्तः ⁂ ॥ तथा नासिकाभ्याम् घ्राणेन्द्रियाधिष्ठानाभ्यां कर्णाभ्याम् श्रोत्राभ्यां च चुंबुकाद् ओष्ठस्याधःप्रदेशाच्च । अधिः अनर्थकः ॥ अपि च शीर्षण्यम् शिरसि भवो रोगः शीर्षण्यः । ⁂ "शरीरावयवाच्च" इति यत् । "ये च तद्धिते" इति शिरसः शीर्षन् आदेशः । "ये चाभावकर्मणोः" इति [प्रकृति]भावः ⁂ । ईदृशं यक्ष्मं रोगं ते तव मस्तिष्कात् । शिरसोन्तरवस्थितो मांसविशेषो मस्तिष्कः । तस्मात् जिह्वाया रसनायाश्च सकाशाद् वि वृहामि उद्वरामि । पृथक्करोमीत्यर्थः । ⁂ वृहू उद्यमने इति धातुः ⁂ ॥

द्वितीया ॥

ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।
यक्ष्मं दोषण्यं१मंसाभ्यां बाहुभ्यां वि वृहामि ते ॥ २ ॥

ग्रीवाभ्यः । ते । उष्णिहाभ्यः । कीकसाभ्यः । अनूक्यात् ।
यक्ष्मम् । दोषण्यम् । अंसाभ्याम् । बाहुऽभ्याम् । वि । वृहामि । ते ॥ २ ॥

हे व्याधिगृहीत ते तव ग्रीवाभ्यः । अत्र ग्रीवाशब्देन तदवयवभूतानि चतुर्दश सूक्ष्माण्यस्थीनि उच्यन्ते बहुवचननिर्देशात् । तद् उक्तं शतपथे ब्राह्मणे । "ग्रीवाः पञ्चदशः । चतुर्दश वा एतासां करूकराणि वीर्यं पञ्चदशम् । तस्माद् एताभिरण्वीभिः सतीभिर्गुरुं[1] भारं हरति[2]" [श० ब्रा० १२. २. ४. १०] इति । ताभ्यो यक्ष्मं वि वृहामीति उत्तरत्र संबन्धः । तथा उष्णिहाभ्यः ऊर्ध्वं स्निग्धाभ्यः रक्तादिना उत्स्नाताभ्यो वा नाडीभ्यः । तद् उक्तं यास्केन । उष्णिग् उत्स्नाता भवति स्निह्यतेर्वा स्यात् कान्तिकर्मणः इति [नि० ७. १२] । उष्णिगेव उष्णिहा । ⁂ "टापं चापि हलन्तानाम्" इति टापः स्मरणात् ⁂ । तथा चापि अन्यत्र श्रूयते । "उष्णिहा छन्दः" इति [तै० सं० ४. ३. ५. १] । "सयुग्वोष्णिहया सविता

१ B B^{p} $\overset{h}{B}$ D $\overset{m}{S}$ दोषण्यं ३. We with A K V. २ P दोषण्यम्. We with $\overset{2}{P}$ J.

1 S′ Kd गुरु°. 2 S′ Kd बृहति (?= वहति).

"सं बभूव" [ऋ°१०.१३०.४] इति च । अत्र प्रकरणाद् व्युत्पत्तिसामान्येन उष्णिहाशब्दो धमनीवाचकः । तथा कीकसाभ्यः जत्रुवक्षोगतास्थिभ्यः । अनूक्यात् अनुक्रमेण उच्यन्ति समवयन्ति अस्थीनि अस्मिन्निति अनूक्यम् तत्संधिः । तस्मात् । तथा च वाजसनेयकम् । "अनूकं त्रयस्त्रिंशः । द्वात्रिंशद् वा एतस्य[2] करूकराण्यनूकं[3] त्रयस्त्रिंशम्" इति [श° ब्रा°१२.२.४.१४]। अनुपूर्वाद् उच समवाये इत्यस्मात् "कृत्यल्युटो बहुलम्" इति अधिकरणे ण्यत् । "तित् स्वरितः" इति स्वरितत्वम् । वि वृहामीति सर्वत्र संबन्धः ॥ तथा दोषण्यम् दोष्णोर्भवम् । पूर्ववद् यति "पद्दन्नः°" इत्यादिना दोषन् आदेशः । तथाविधं ते त्वदीयं यक्ष्मम् रोगम् अंसाभ्यां बाहुशिरोभ्यां बाहुभ्यां हस्ताभ्यां वि वृहामि उन्मूलयामि ॥

तृतीया ॥

हृदयात् ते परि क्लोम्नो हलीक्ष्णात् पार्श्वाभ्याम् ।
यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते वि वृहामसि ॥ ३ ॥

हृदयात् । ते । परि । क्लोम्नः । हलीक्ष्णात् । पार्श्वाभ्याम् ।
यक्ष्मम् । मतस्नाभ्याम् । प्लीह्नः । यक्नः । ते । वि । वृहामसि ॥ ३ ॥

हे रुग्ण ते तव हृदयात् हृदयपुण्डरीकाद् यक्ष्मं वि वृहामसीति उत्तरत्र संबन्धः ॥ तथा परि क्लोम्नः । हृदयसमीपस्थो मांसपिण्डविशेषः क्लोमा । तस्मात् । हलीक्ष्णात् एतत्संज्ञकात् तत्संबन्धाद् मांसपिण्डविशेषात् पार्श्वाभ्याम् दक्षिणोत्तराभ्यां मतस्नाभ्याम् उभयपार्श्वसंबन्धाभ्यां वृक्याभ्यां तत्समीपस्थपित्ताधारपात्राभ्यां वा प्लीह्नः उदरपार्श्वस्थितात् श्येनपत्राकाराद् मांसपिण्डात् यक्नः हृदयसमीपस्थाद् एतत्संज्ञकात् कालखण्डात् । "पद्दन्नः°" इत्यादिना यकृच्छब्दस्य यकन्नादेशः । उदात्तनिवृत्तिस्वरेण प्लीह्नः यक्नः इत्युभयत्र विभक्त्युदात्तत्वम् । हे

१ B यक्ण°. We with A B[h] D K R S[m] P P[2] J V.

1 S′ Kd जत्रुवक्षा°. 2 S′ Kd तस्य. 3 S′ Kd °राण्यनेकं.

रुग्ण ते त्वदीयं यक्ष्मं तेभ्योवयवेभ्यो वि वृहामसि विवृहामः। ॥ इदन्तो मसिः ॥ ॥

चतुर्थी ॥

आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादधि।
यक्ष्मं कुक्षिभ्यां प्लाशेर्नाभ्या वि वृहामि ते ॥ ४ ॥
आन्त्रेभ्यः। ते। गुदाभ्यः। वनिष्ठोः। उदरात्। अधि।
यक्ष्मम्। कुक्षिऽभ्याम्। प्लाशेः। नाभ्याः। वि। वृहामि। ते ॥ ४ ॥

हे यक्ष्मगृहीत ते तव आन्त्रेभ्यः पुरीतद्भ्यः गुदाभ्यः एतत्संज्ञकाभ्यः आन्त्रसमीपस्थेभ्यो मलमूत्रप्रवहणमार्गेभ्यः वनिष्ठोः स्थविरान्त्रात् उदरात् एतत्सर्वाधारभूताज्जठरात्। अधिः अनर्थकः। यक्ष्मं वि वृहामीति संबन्धः ॥ तथा कुक्षिभ्याम् दक्षिणोत्तराभ्याम् उदरभागाभ्यां प्लाशेः बहुच्छिद्रात् मलपात्रात् नाभ्याः नाभिमण्डलाच्च ते त्वदीयं यक्ष्मं वि वृहामि नाशयामि। एतन्मन्त्रद्वयप्रतिपादितानाम् अवयवानां विभागो माध्यंदिनब्राह्मणे सौत्रामण्यां यज्ञाङ्गैः पुरोडाशादिभिः संस्कार्यत्वेन स्पष्टम् आम्नातः। "हृदयमेवास्यैन्द्रः पुरोडाशः। यकृत् सावित्रः। क्लोमा वारुणः। म-
"तस्ने एवास्याश्वत्थं च पात्रम् औदुम्बरं च। पित्तं नैयग्रोधम्। आन्त्राणि
"स्थाल्यः। गुदा उपशयानि। श्येनपत्रे प्लीहासन्दी। नाभिः कुम्भः।
"वनिष्ठुः प्लाशिः शतातृण्णा तद् यत् सा बहुधा वितृण्णा भवति तस्मात्
"प्लाशिर्बहुधा विकृत्तः" इति [श०ब्रा० १२. ९. १. ३] ॥

पञ्चमी ॥

ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम्।
यक्ष्मं भसद्यं[1] श्रोणिभ्यां भासदं भंससो वि वृहामि ते ॥ ५ ॥
ऊरुऽभ्याम्। ते। अष्ठीवत्ऽभ्याम्। पार्ष्णिऽभ्याम्। प्रऽपदाभ्याम्।
यक्ष्मम्। भसद्यम्। श्रोणिऽभ्याम्। भासदम्। भंससः। वि। वृहामि। ते ॥ ५ ॥

---

१ D R भसद्यं ३. ४१. B $\overset{h}{B}\overset{m}{S}$ भसद्यं. We with K P $\overset{2}{P}$ J V. २ P $\overset{2}{P}$ उरु°. We with J.

हे रोगार्त ते तव ऊरुभ्याम् अष्ठीवद्भ्याम् जानुभ्याम् । ॥ "आसन्दीवद् अष्ठीवत्०" इत्यादिना अस्थिशब्दस्य मतुपि अष्ठीभावो निपातितः ॥ । पार्ष्णिभ्याम् पादयोरपरभागाभ्यां प्रपदाभ्याम् पादाग्राभ्यां यक्ष्मम् । वि वृहामीति सर्वत्र संबन्धः ॥ तथा भसद्यम् भसत् कटिप्रदेशः तत्र भवं यक्ष्मम् रोगं श्रोणिभ्याम् कट्योरधरभागाभ्यां वि वृहामि । एवं ते त्वदीयं भासदम् गुह्यप्रदेशभवं रोगं भंसः[2] भासमानाद् गुह्यस्थानाद् वि वृहामि ॥

षष्ठी ॥

अस्थिभ्यस्ते मज्जभ्यः स्नावभ्यो धमनिभ्यः ।
यक्ष्मं पाणिभ्यामङ्गुलिभ्यो नखेभ्यो वि वृहामि ते ॥ ६ ॥

अस्थिऽभ्यः । ते । मज्जऽभ्यः । स्नावऽभ्यः । धमनिऽभ्यः ।
यक्ष्मम् । पाणिऽभ्याम् । अङ्गुलिऽभ्यः । नखेभ्यः । वि । वृहामि । ते ॥ ६ ॥

अस्थिमज्जशब्दौ सर्वधातूपलक्षकौ । सूक्ष्माः सिराः स्नावशब्देन उच्यन्ते । धमनिशब्देन स्थूलाः । शिष्टं निगदसिद्धम् ॥

सप्तमी ॥

अङ्गेअङ्गे लोम्निलोम्नि यस्ते पर्वणिपर्वणि ।
यक्ष्मं त्वचस्यं ते वयं कश्यपस्य [2]वीबर्हेण विष्वञ्चं वि वृहामसि ॥ ७ ॥

अङ्गेऽअङ्गे । लोम्निऽलोम्नि । यः । ते । पर्वणिऽपर्वणि ।
यक्ष्मम् । त्वचस्यम् । ते । वयम् । कश्यपस्य । विऽबर्हेण । विष्वञ्चम् । वि ।
वृहामसि ॥ ७ ॥

इत्थं प्रसिद्धावयवेभ्यो रोगस्यापनोदनं [प्रतिपाद्य अप्रसिद्धावयवेभ्योपि अपनोदनं] प्रतिपाद्यते । हे रुग्ण ते तव अङ्गेअङ्गे अनुक्तेषु सर्वेष्ववयवे-

---

१ **A** $\overset{h}{\mathbf{B}}$ **D K** $\overset{m}{\mathbf{S}}$ omit the visarga. We with **R V**. २ **S K V** वि° for वी°. We with **A B** $\mathbf{B}^{P}$ $\overset{h}{\mathbf{B}}$ **D R** $\overset{m}{\mathbf{S}}$, and *Kaus'ika*.

---

1 **S' Kd** ष्ठीभावो. 2 **S' Kd** भससो भा° for भंसस: भा°.

षु लोम्निलोम्नि सर्वेषु रोमकूपेषु पर्वणिपर्वणि सर्वेषु संधिषु यो यक्ष्मो जातः। "नित्यवीप्सयोः" इति सर्वत्र द्विर्वचनम्। तं यक्ष्मं वि वृहामसीत्युत्तरत्र संबन्धः॥ तथा ते तव त्वचस्यम् त्वचि भवं यक्ष्मम्। त्वच संवरणे इत्यस्माद् असुन्। पूर्ववद् यत्। "यचि भम्" इति भत्वेन पदत्वाभावाद् रुत्वाभावः। वयं वि वृहामः। सूक्तार्थम् उपसंहरति। विष्वञ्चम् चक्षुरादिसर्वावयवव्याप्तं रोगजातं कश्यपस्य महर्षेर्विवर्हेण। विवृहत्यनेनेति विवर्हे सूक्तम्। तेन वयं वि वृहामसि विवृहामः। मन्त्रद्रष्टुर्महर्षेः संकीर्तनेन इदानीं प्रयुज्यमानस्यापि मन्त्रस्य अमोघवीर्यत्वं सूचितं भवति॥

इति षष्ठेनुवाके द्वितीयं सूक्तम्॥

"य ईशे पशुपतिः" इति सूक्तेन वशाशमनकर्मणि आज्यं जुहुयात्। तद् उक्तं सूत्रे। "य ईशे पशुपतिः पशूनाम् इति हुत्वा वशाम् अनक्ति" इति [कौ० ५. ८]॥

तथा सर्वलोकाधिपत्यकामः अनेन सूक्तेन इन्द्राग्न्योर्यागम् उपस्थानं वा कुर्यात्॥

तथैव अनेन सूक्तेन इष्टम् अन्नम् अभिमन्त्र्य ब्राह्मणेभ्यो दद्यात्॥

सूत्रितं हि। "य ईशे[२. ३४] ये भक्षयन्तः[२. ३५] इति इन्द्राग्नी लोककामोऽन्नं ददाति" इति [कौ० ७. १०]॥

तथैव अनेन पशुयागे संज्ञपनार्थं यूपात् प्रमुच्यमानं पशुम् अनुमन्त्रयेत। उक्तं वैताने। "अथ पशुर्[1]वैष्णवं पूर्णहोमम् उरु विष्णो[2]" इति प्रक्रम्य "य ईश इति प्रमुच्यमानम् अनुमन्त्रयते" इति [वै० २. ६]॥

अत्र प्रजानन्तः [५] इत्यनया वशाख्यपशोः संज्ञपनं कुर्यात्। अत्र सूत्रम्। "अथ प्राणान् आस्थापयति प्रजानन्त इति" [कौ० ५. ८] इति॥

तत्र प्रथमा॥

य ईशे पशुपतिः पशूनां चतुष्पदामुत यो द्विपदाम्।

---

1 So S'Kd. 2 S'Kd विष्णोरिति. We with *Kaus'ika* and with Sâyaṇa on VII. 26. 3. For the mantra उरु विष्णो &c see *Âs'valây. S'r. Sû.* V. 19. 3.

निष्क्रीतः स यज्ञियं भागमेतु रायस्पोषा यजमानं सचन्ताम् ॥ १ ॥

यः । ईशे । पशुऽपतिः । पशूनाम् । चतुःऽपदाम् । उत । यः । द्विऽपदाम् ।

निःऽक्रीतः । सः । यज्ञियम् । भागम् । एतु । रायः । पोषाः । यजमानम् । सचन्ताम् ॥ १ ॥

यः पशुपतिः पशूनां पालयिता रुद्रः चतुष्पदाम् गवादीनां पशूनाम् ईशे ईष्टे नियन्ता भवति । उत अपि च यः पशुपतिर्द्विपदाम् मनुष्यादीनां च ईष्टे । ईश ऐश्वर्ये । "लोपस्त आत्मनेपदेषु" इति तलोपः । अनुदात्तेच्चात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । "अधीगर्थदयेशां कर्मणि" इति कर्मणि षष्ठी । चतुष्पदां द्विपदाम् इत्युभयत्र "संख्यासुपूर्वस्य" इति पादशब्दस्य अन्त्यलोपः समासान्तः । "द्वित्रिभ्यां पाद्दन्°" इति द्विपदाम् इत्यस्य उत्तरपदान्तोदात्तत्वम् । तस्मात् पशुपतेः सकाशाद् निष्क्रीतः [सः] निष्कृष्य स्वाधीनीकृतोयं वशारूपः पशुः यज्ञियम् यज्ञार्हं भागम् एतु गच्छतु यज्ञभागतां प्रतिपद्यताम् । "यज्ञर्त्विग्भ्यां घखञौ" इति घः ॥ किं च रायः धनस्य पशुहिरण्यादिलक्षणस्य पोषाः समृद्धयः यजमानं सचन्ताम् समवयन्तु । "ऊडिदम्°" इति रायः षष्ठ्या उदात्तत्वम् । "षष्ठ्याः पतिपुत्र°" इति सत्वम् ॥

द्वितीया ॥

प्रमुञ्चन्तो भुवनस्य रेतो गातुं धत्त यजमानाय देवाः ।
उपाकृतं शशमानं यदस्थात् प्रियं देवानामपेतु पाथः ॥ २ ॥

प्रऽमुञ्चन्तः । भुवनस्य । रेतः । गातुम् । धत्त । यजमानाय । देवाः । उपऽआकृतम् । शशमानम् । यत् । अस्थात् । प्रियम् । देवानाम् । अपि । एतु । पाथः ॥ २ ॥

प्रमुञ्चन्तः इमं हन्यमानं पशुं त्यक्ता गच्छन्तो हे देवाः चक्षुराद्याः

प्राणा यूयम्। कीदृशं पशुम्। भुवनस्य भूतजातस्य रेतः[1] कारणं यागद्वारेण उत्पत्तिहेतुम्। यजमानाय अस्मै गातुम् गतिं धत्त पुण्यलोकान् गन्तुं मार्गं कुरुत॥ किं च उपाकृतम् उपाकरणेन संस्कृतं शशमानम् शाम्यन्तम्। संज्ञप्यमानम् इत्यर्थः। ॥ शाम्यतेस्ताच्छीलिकश्चानश्। छान्दसः शपः श्लुः॥। यद्वा शशमानम् अस्मात् लोकाद् उत्पत्य गच्छन्तम्। ॥ शश प्लुतगतौ। उदात्तेत्। पूर्ववत् चानश्। अत एव लसार्वधातुकानुदात्तत्वाभावः॥। एतादृशं पशुम्। व्याप्येति क्रियाध्याहारः। यत् मांसलक्षणं पायः अन्नम् अस्यात् तिष्ठति तद् देवानां प्रियं पायः मांसलक्षणम् अन्नम् अयम् उपाकृतः पशुः अप्येतु अपिगच्छतु। देवोपभोग्यान्नभावं प्रतिपद्यताम् इत्यर्थः। "विश्वेषां देवानां प्रियं पाथो अपीहि" [तै० सं० ३. ३. ३. ३] इत्यादौ यथा अनभिषुतस्य सोमस्य कर्तृत्वम् पायसः कर्मत्वम् एवम् अत्रापि पशोरन्नकर्तृत्वम्। अत एव याज्ञिका द्विबहुपशुकेषु कर्मसु अपीताम् अपि यन्तु इति ऊहं कुर्वन्ति॥ यद्वा देवा इति अध्यादय एव संबोध्याः। तथा हि। हे देवा अध्यादयः यूयम् भुवनस्य कृत्स्नस्य भूतजातस्य रेतः उत्पत्तिकारणं पुष्टिरूपम् उदकं प्रमुञ्चन्तः विसृजन्तः। अन्यत् समानम्॥

तृतीया॥

ये बध्यमानमनु दीध्यानाऽअन्वैक्षन्त मनसा चक्षुषा च।
अग्निष्टानग्रे प्र मुमोक्तु देवो विश्वकर्मा प्रजया संरराणः॥ ३॥

ये। बध्यमानम्। अनु। दीध्यानाः। अनुऽऐक्षन्त। मनसा। चक्षुषा। च। अग्निः। तान्। अग्रे। प्र। मुमोक्तु। देवः। विश्वऽकर्मा। प्रऽजया। सम्ऽरराणः॥ ३॥

ये सयूथ्याः पशवः वध्यमानम् इमं पशुम् अनुदीध्यानाः अनुदीप्यमाना अनुतप्ताः सन्तो मनसा चक्षुषा च स्नेहवशाद् अन्वैक्षन्त अनुपश्यन्ति न जहति स्नेहात् कारुण्याद् वा। ॥ ईक्ष दर्शने। छान्दसो

1 S' Kd रेतसः.

लङ् । "यङ्वृत्तान्नित्यम्" इति निघातप्रतिषेधः ॥ । तान् सर्वान् स-
यूथ्यान् पशून् अग्निर्देवः अग्रे प्रथमं प्र मुमोक्तु स्नेहपाशं प्रमोचयतु ॥
विश्वकर्मा विश्वं कर्म कर्तव्यं यस्य सः प्रजया स्वसृष्टया संरराणः सह श-
ब्दायमानः । दानार्थम् ऐकमत्यं प्राप्त इत्यर्थः । सोपि प्र मुमोक्तु । ॥ मु-
ञ्चतेश्छान्दसः शपः श्लुः । रै शब्दे इत्यस्मात् लिटः कानच् । "युष्म-
त्तत्ततक्षुःष्वन्तःपादम्" इति अग्निष्टान् इत्यत्र षत्वम् ॥ ॥

चतुर्थी ॥

ये ग्राम्याः पशवो विश्वरूपा विरूपाः सन्तो बहुधैकरूपाः ।
वायुष्टानग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया संरराणः ॥ ४ ॥

ये । ग्राम्याः । पशवः । विश्वऽरूपाः । विऽरूपाः । सन्तः । बहुऽधा ।
एकऽरूपाः ।

वायुः । तान् । अग्रे । प्र । मुमोक्तु । देवः । प्रजाऽपतिः । प्रऽजया ।
सम्ऽरराणः ॥ ४ ॥

ग्राम्याः ग्रामे भवा गवाद्या ये पशवो विश्वरूपाः सर्वरूपान्विता वि-
रूपाः विविधरूपा एवं बहुधा सन्तोपि एकरूपाः संज्ञप्यमानं पशुं प्रति
एकस्वभावाः सन्ति तान् सर्वान् वायुः [अग्रे प्र मुमोक्तु] प्रथमं प्रमोचयतु ।
प्रजापतिश्च स्वकीयया प्रजया ऐकमत्यं गच्छन् पश्चात् प्रमोचयतु ॥

पञ्चमी ॥

प्रजानन्तः प्रति गृह्णन्तु पूर्वे प्राणमङ्गेभ्यः पर्याचरन्तम् ।
दिवं गच्छ प्रति तिष्ठा शरीरैः स्वर्गं याहि पथिभिर्देवयानैः ॥ ५ ॥

प्रऽजानन्तः । प्रति । गृह्णन्तु । पूर्वे । प्राणम् । अङ्गेभ्यः । परि । आऽ-
चरन्तम् ।

दिवम् । गच्छ । प्रति । तिष्ठ । शरीरैः । स्वःऽगम् । याहि । पथिऽभिः ।
देवऽयानैः ॥ ५ ॥

प्रजानन्तः इह यागे उपयुक्तस्य तव माहात्म्यं प्रकर्षेण जानन्तः [पूर्वे]

पूर्वमेवान्तरिक्षे स्थिता देवाः तव अङ्गेभ्यः शरीरावयवेभ्यः पर्याचरन्तम् परितः सर्वतो निष्क्रम्य आभिमुख्येन आगच्छन्तं तव प्राणम् तत्सहितम् आत्मानं प्रति गृह्णन्तु ॥ ततस्त्वं देवैः परिगृहीतो दिवम् अन्तरिक्षं गच्छ ॥ तत्र च शरीरैः दिव्यभोगार्हैः [प्रति तिष्ठ] प्रतिष्ठितो भव । "व्यचोतस्तिङः" इति दीर्घत्वम् ॥ ततो देवयानैः देवा यैर्यान्ति तैः पथिभिः मार्गैः स्वर्गम् अभिलष्यमाणसुखोपभोगस्थानं याहि गच्छ ॥

इति द्वितीयकाण्डे षष्ठेनुवाके द्वितीयं सूक्तम् ॥

"ये भक्षयन्तः" इति सूक्तेन बहुजनमध्ये भुञ्जानो दृष्टिदोषनिवारणाय अन्नम् अभिमन्त्र्य[1] भुञ्जीत । अत्र सूत्रम् । "ये भक्षयन्त इति परिषद्येकभक्तम् अन्वीक्षमाणो भुङ्क्ते" इति । [कौ० ५. २] ॥

तथा सर्वलोकाधिपत्यकामः इन्द्राग्न्योर्यागम् उपस्थानम् अन्नदानं वा अनेन सूक्तेन कुर्यात् । सूत्रं तु पूर्वसूक्त एवोदाहृतम् ॥

तथा सर्वेषु सवयज्ञेषु अनेन सूक्तेन पुरस्ताद्धोमान् जुहुयात् । सूत्रितं हि । "य ईशे[२. ३४] ये भक्षयन्तः[२. ३५]" इति प्रक्रम्य "प्रथमं पशूपाकरण उत्तरेण सवपुरस्ताद्धोमान्[2]" इति [कौ. ७. १०] ॥

साकमेधाख्यपर्वणि "ये भक्षयन्तः" इत्यनेन वैश्वकर्मणयागानुमन्त्रणं कुर्यात् । उक्तं वैताने । "कार्तिक्यां साकमेधाः" इति प्रक्रम्य "वैश्वकर्मणं ये भक्षयन्त इति" इति [वै० २. ५] ॥

तथा अग्निचयने वैश्वकर्मणहोमानुमन्त्रणे अस्य विनियोगः । उक्तं वैताने । "ये[3] भक्षयन्तः[२. ३५] एतं सधस्थाः[६. १२३] इति द्वे येना सहस्रम्[९. ५. १७] इति वैश्वकर्मणहोमान्" इति [वै० ५. २] ॥

यज्ञस्य चक्षुरित्येषा दर्शपूर्णमासयोः पुरस्ताद्धोमे विनियुक्ता । "अग्नाव-
"ग्निः[४. ३९. ९] हृदा पूतम्[४. ३९. १०] पुरस्ताद् युक्तः[५. २९. १]
"यज्ञस्य चक्षुः[२. ३५. ५] इति जुहोति" इत्यादिसूत्रात् [कौ. १. ३] ॥

तत्र प्रथमा ॥

ये भक्षयन्तो न वसून्यानृधुर्यान्नमयो अन्वतप्यन्त धिष्ण्याः ।

---

1 S′ Kd अन्नमभिमभि°. 2 So S′ Kd. *Kaus'ika* aliter. 3 S′ Kd सूक्तं ये.

या तेषामवया दुरिष्टिः स्विष्टिं नस्तां कृणवद् विश्वकर्मा ॥ १ ॥

ये । भक्षयन्तः । न । वसूनि । आनृधुः । यान् । अग्नयः । अनुऽअतप्यन्त । धिष्ण्याः ।

या । तेषाम् । अवऽद्यौः । दुःऽइष्टिः । सुऽइष्टिम् । नः । ताम् । कृणवत् । विश्वऽकर्मा ॥ १ ॥

ये वयं भक्षयन्तो न भक्षयन्त इव अदन्त इव वसूनि धनानि आनृधुः । पुरुषव्यत्ययः । वर्धितवन्तः [स्मः । यद्वा न भक्षयन्तः नादन्तः] अपि तु पृथिव्यां धनानि निक्षिप्तवन्तः । यद्वा वसूनि भक्षयन्तः अयागार्थेन व्ययेन नाशयन्तः नानृधुः समृद्धा नाभूम । ऋधु वृद्धौ । अस्मात् लिटि द्विर्वचने "अत आदेः" इत्यभ्यासदीर्घत्वे "तस्मान्नुड् द्विहलः" इत्यत्र ऋकारैकदेशस्य रेफस्य हल्ग्रहणेन ग्रहणाद् द्विहल्त्वेन नुडागमः । [धिष्ण्याः] धिष्ण्येषु स्थानेषु स्थिता अग्नयः आहवनीयाद्याः यान् उद्दिश्य अन्वतप्यन्त अस्मद्विषयम् अनुतापं धृतवन्तः । यागादौ दक्षिणाद्यप्रदानेन यागवैकल्यात् तेषां धनवतां जन्म व्यर्थम् अहो शोच्या एत इति । एवम् अयष्टारो दुर्यष्टारश्च । तेषाम् द्विविधानाम् अस्माकं या अवयाः अवयजनं यागाननुष्ठानं दुरिष्टिः दुर्यागश्चास्ति ताम् अनिष्टिदुरिष्टिदोषपरिहारार्थं कृतां स्विष्टिम् शोभनाम् इष्टिं नः अस्माकं कृणवत् करोतु विश्वकर्मा विश्वकृद् देवः । अनिष्टिदुरिष्टिनिवारणसामर्थ्यं शोभनत्वम् इष्टेः । अवया इति । "अवे यजः" इति ण्विनि कृते "अवयाः श्वेतवाः०" इति निपातितः । दुरिष्टिरिति । प्रत्ययान्तविशेषणत्वे दुरो गतित्वाभावाद् अव्ययपूर्वपदप्रकृतिस्वरत्वम् । धात्वर्थविशेषणत्वे गतित्वात् "तादौ च निति०" इति प्रकृतिस्वरत्वम् । स्विष्टिशब्देप्येवम् । सोः प्रकृतिस्वरत्वे "उदात्तस्वरितयोर्यणः०" इति संहितायां ततः पर इकारः स्वर्यते ॥

---

१ BhKmS omit the visarga. We with A D R V. २ A B BP BhD R SmP P2J V K all read तान्. We with Sâyaṇa. ३ P P2 J. omit the visarga in अवऽद्याः We with Sâyaṇa. ४ P P2 J तान्. We with Sâyaṇa.

---

1 S' Kd व्यत्ययेन. 2 S' Kd अनिष्टिर्दुरिष्टिर्दो°. 3 S' Kd अनिष्टिर्दु°. 4 So S' Kd.

द्वितीया ॥

यज्ञपतिमृषय एनसाहुर्निर्भक्तं प्रजा अनुतप्यमानम् ।
मथ्व्यान्त्स्तोकानप यान् रराध सं नष्टेभिः सृजतु विश्वकर्मा ॥ २ ॥

यज्ञऽपतिम । ऋषयः । एनसा । आहुः । निःऽभक्तम् । प्रऽजाः । अ-
नुऽतप्यमानम् ।
मथ्व्यान् । स्तोकान् । अप । यान् । रराध । सम् । नः । तेभिः । सृ-
जतु । विश्वऽकर्मा ॥ २ ॥

ऋषयः अतीन्द्रियार्थदर्शिनः यज्ञपतिम् यजमानम् एनसा । इ-त्थंभावे तृतीया । [युक्तम्] एनस्विनम् आहुः । कथंभूतम् । नि-र्भक्तम् निर्भागं दौर्गत्ययुक्तम् प्रजाः अस्य यागवैकल्यनिमित्तेन एनसा प-रितप्यमानाः प्रजा अनु स्वयं तप्यमानम् एवंभूतं यज्ञपतिम् एनसा यु-क्तम् आहुः ॥ किं च मथ्व्यान् । मधुररसः सोमो मधुः । तद्विकारभू-तान् यान् स्तोकान् बिन्दून् अप रराध अपराद्धवान् । अन्तरितान् कृत-वान् इत्यर्थः । तेभिस्तैः स्तोकैः नः अस्मदीयं यज्ञपतिं सं सृजतु संयोजयतु [विश्वकर्मा] विश्वं कर्म करणीयं यस्य स प्रजापतिः । यज्ञप-तिम् । "पत्यावैश्वर्ये" इति पूर्वपदप्रकृतिस्वरत्वम् । मधव्यान् इति । "मये च" "मधोः" इति विकारे यप्रत्ययः ॥

तृतीया ॥

अदान्यान्त्सोमपान् मन्यमानो यज्ञस्य विद्वान्त्समये न धीरः ।
यदेनश्चकृवान् बद्ध एष तं विश्वकर्मन् प्र मुञ्चा स्वस्तये ॥ ३ ॥

अदान्यान् । सोमऽपान् । मन्यमानः । यज्ञस्य । विद्वान् । समऽअये ।
न । धीरः ।

---

१ SKV मधव्यान्. We with ABBDRSPPJ. २ So we read with ABBPBDKRSV. Rw have नस्तेभिः. ३ K मध°. We with PPJ. ४ BBP एषस्तं. We with ABDKRSV.

---

1 S′Kd °कारभूतांस्तोकानद्यान् for °कारभूतान् यान् स्तोकान्. 2 So S′Kd.

यत् । एनः । चकृऽवान् । वद्धः । एषः । तम् । विश्वऽकर्मन् । प्र । मुञ्च । स्वस्तये ॥ ३ ॥

यज्ञस्य वैदिकस्य क्रियाकलापस्य । ⌘"क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी⌘ । यज्ञम् विद्वान् जानन् । यद्वा यज्ञस्य स्वरूपं विद्वान् विद्वान् अहमेवेति विद्यामदेन मोहितः सोमपान् । ⌘"गापोष्टक्" इति टक्⌘ । स्वव्यतिरिक्तान् कृतसोमयागान् पण्डितानपि अदान्यान् अज्ञत्वारोपेण दानानर्हान् मन्यमानः । ⌘"छन्दसि च" इति यः⌘ । तत्र दृष्टान्तः । समये न धीरः समयन्ति संगच्छन्ते योद्धारोत्रेति समयः संग्रामः तत्र धीर इव । स यथा स्वभुजबलाभिमानेन प्रतिभटान् तिरस्कार्यान् मनुते एवम् अहंकारेण वद्ध एषः यद् एनश्चकृवान् तिरस्कारलक्षणं यत् पापं कृतवान् । ⌘करोतेर्लिटः क्वसुः⌘ । हे विश्वकर्मन् देव तम् एनोयुक्तं स्वस्तये अविनाशाय प्र मुञ्च तस्मात् पापात् प्रमोचय ॥

चतुर्थी ॥

घोरा ऋषयो नमो अस्त्वेभ्यश्चक्षुर्यदेषां मनसश्च सत्यम् ।
बृहस्पतये महिष द्युमन्नमो विश्वकर्मन् नमस्ते पाह्य१स्मान् ॥ ४ ॥

घोराः । ऋषयः । नमः । अस्तु । एभ्यः । चक्षुः । यत् । एषाम् । मनसः । च । सत्यम् ।
बृहस्पतये । महिष । द्युऽमत् । नमः । विश्वऽकर्मन् । नमः । ते । पाहि । अस्मान् ॥ ४ ॥

ये घोराः क्रूरा ऋषयः प्राणाश्चक्षुराद्याः । श्रूयते हि । "के ते ऋषय इति । प्राणा वा ऋषयः" इति । एभ्यः प्राणेभ्यो नमोस्तु ॥ एषां प्राणानां मनसः अन्तःकरणस्य च मध्ये यत् सत्यम् यथार्थदर्शि चक्षुः तस्मा अपि नमोस्तु । अत्र ऋषिशब्देन सामान्येन उपात्तस्यापि

---

१ S[m] पाह्य३स्मान्. We with D.

---

1 So S'Kd. See Pâṇ. V. 1. 67.

चक्षुषः पृथग् उपदेशः प्राधान्यद्योतनाय । अत एव दृष्टिदोषनिवारणकर्मणि अस्य विनियोग उपपन्नः ॥ तथा बृहस्पतये बृहतां देवानां पत्ये देवाय महि महत् प्रभूतं सत् शोभनं द्युमत् दीप्तिमत् । अनेन विशेषणत्रयेण करणत्रयस्यापि तदेकतानत्वम् उक्तम् । उक्तलक्षणं नमोस्तु ॥ तथा हे विश्वकर्मन् ते तुभ्यं नमोस्तु । क्रूरचक्षुर्जन्यदोषादिपरिहारेण अस्मान् पाहि पालय ॥ यद्वा नम इत्यन्ननाम । भुज्यमानम् अन्नम् इन्द्रियाधिष्ठातृदेवेभ्योस्तु । बृहताम् उक्तानाम् इन्द्रियाणां पतिः पालको नियन्ता अन्तरात्मा बृहस्पतिः । तस्मै महत्त्वाद्युक्तगुणविशिष्टं नमोस्तु ॥ तथा [हे विश्वकर्मन्] विश्वं कर्म करणीयं यस्य स तादृग्रूप परमात्मन् ते नमोस्तु । अनेन बहुजनदृष्ट्युपहतस्यापि अन्नस्य उक्तप्रकारेण देवतार्थत्वाद् भोक्तुस्तद्भोजननिमित्तदृष्टिदोषादिकं न भवतीत्यर्थः ॥

पञ्चमी ॥

यज्ञस्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रेण मनसा जुहोमि ।
इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः ॥ ५ ॥

यज्ञस्य । चक्षुः । प्रऽभृतिः । मुखम् । च । वाचा । श्रोत्रेण । मनसा । जुहोमि ।
इमम् । यज्ञम् । विऽततम् । विश्वऽकर्मणा । आ । देवाः । यन्तु । सुऽमनस्यमानाः ॥ ५ ॥

यज्ञस्य यागस्य चक्षुः चक्षुरिन्द्रियवत् प्रदर्शकः । तदधीनत्वाद् यज्ञसिद्धेः[2] । यद्वा यज्ञाधिदेवतायाश्चक्षुरिन्द्रियम् अयम् अग्निः । तथा च मन्त्रवर्णः । "अग्निना यज्ञश्चक्षुष्मान्" इति । तथा प्रभृतिः यज्ञस्य आदिभूतः । अग्निस्थापनपूर्वकत्वात् सर्वयज्ञानाम् । मुखं च आस्यमपि अग्निरेव । तथा च दाशतय्याम् आम्नायते । "त्वामग्न आदित्यास आस्यं त्वां जिह्वां शुचयश्चक्रिरे कवे" इति [ऋ० २. १. १३] । यद्वा मुखम्

१ DKB[h] °कर्मणा. We with ABRS[m]VPP[2]J.

1 S′Kd नियंतरात्मा for नियन्ता अन्तरात्मा. 2 S′Kd °सिद्धिः.

मुखमिव मुख्यः सर्वदेवतानां प्रयाजादिषु प्रथमयष्टव्यत्वात् । "अग्निर्मुखं प्रथमो देवतानाम्" [ऐ० ब्रा० १. ४] इत्यादिश्रुतेः ॥ यद्वा आज्यम् उच्यते यज्ञस्य चक्षुः । चक्षुःसंस्तुताज्यभागनिष्पादकत्वात् । प्रभृतिः आदिभूतं प्रथमं हूयमानत्वात् । मुखं च मुखवत् प्रधानभूतं मुख्यद्रव्यम् । "तं देवा अब्रुवन् । एष वाव यज्ञो यद् आज्यमप्येव नोत्रास्तु" [तै० सं० २. ६. ३. १] इत्यादिश्रुतेः । एवंलक्षणम् आज्यं वाचा मन्त्रेण श्रोत्रेण श्रोत्रवता । ⌘मत्वर्थीयः अकारः⌘ । उपलक्षणम् एतत् सर्वेन्द्रियाणाम् । अनन्यव्यापारश्रोत्रादियुक्तेन मनसा अन्तःकरणेन यष्टव्यदेवतां ध्यायन् जुहोमि अग्नौ प्रक्षिपामि । "यस्यै देवतायै हविर्गृहीतं स्यात् तां ध्यायेद् वषट्करिष्यन्" [ऐ० ब्रा० ३. ८] इति श्रुतेः । अग्निपक्षे उक्तगुणविशिष्टम् अग्निम् उद्दिश्य जुहोमि । आज्यम् इति सामर्थ्यात् लभ्यते । ततः विश्वकर्मणा देवेन विततम् विस्तृतम् उत्पादितम् इमम् अनुष्ठीयमानं यज्ञं देवाः इन्द्राद्या यष्टव्यदेवताः सुमनस्यमानाः सुमनस इव आचरन्तः अनुग्रहबुद्ध्युपेताः सन्तः आ यन्तु आगच्छन्तु । ⌘सुमनःशब्दात् "कर्तुः क्यङ् सलोपश्च" इति क्यङ् । तत्र वाग्रहणस्य अनुवृत्तस्य सलोपेन अभिसंबन्धात् तस्य च व्यवस्थितविभाषात्वाद् अत्र सलोपाभावः⌘ ॥

[इति] षष्ठेनुवाके चतुर्थं सूक्तम् ॥

"आ नो अग्ने" इति सूक्तेन पतिलाभकर्मणि आगमकृसरं[1] संपात्य कुमारीम् आशयेत् ॥

तथा तस्मिन्नेव कर्मणि तस्या एव अलंकारगुग्गुल्वौक्षाणां संपातितानां क्रमेण बन्धनं धूपनं प्रलेपनं च कुर्यात् । औक्ष[2]शब्दः अग्रे व्याख्यास्यते ॥

तथैव अनेन सूक्तेन रात्रौ व्रीहीन् हुत्वा कुमारीं दक्षिणेन प्रक्रामयेत् ॥

एवम् अनेनैव सूक्तेन संपातवतीं नावं कन्यकाम् आरोप्य "भगस्य नावम्" इति पञ्चम्यर्चा ताम् उत्तारयेत् ॥

---

1 So S'Kd. *Kaus'ika* and his commentators: कृशर. 2 S'Kd अक्ष°.

तथा पतिलाभविज्ञानकर्मणि सप्तदामतन्त्र्यां संपातवत्या सप्त वत्सान् बन्धयित्वा कुमार्यां मोचयेत्। सा यदि प्रदक्षिणं मुञ्चेत् तर्हि पतिलाभं जानीयात् ॥

तथा अनेनैव सूक्तेन अहतवस्त्रेण वेष्टितम् ऋषभं संपात्य विसर्जयेत् ॥

अत्र "पतिवेदनान्या[1] नो अग्न इत्यागमकृसरम् आशयति मृगाखराद् वेद्यां मन्त्रोक्तानि संपातवन्ति" इत्यादि [कौ° ४. १०] सूत्रं द्रष्टव्यम् ॥

तथा अनेनैव सूक्तेन विवाहकर्मणि आगमकृसरं संपात्य अभिमन्त्र्य कन्यकां प्राशयेत्। तद् उक्तं सूत्रकृता। "अथ विवाहः" इति प्रक्रम्य "पूर्वापरम्[७. ८६] इत्युपदधीत। पतिवेदनं[२. ३६] च" इति [कौ° १०. १]। अत्र पतिवेदनशब्देन पतिलाभसाधनत्वाद् इदमेव सूक्तं विवक्षितम् ॥

तत्र प्रथमा ॥

आ नो अग्ने सुमतिं संभलो गमेदिमां कुमारीं सह नो भगेन।
जुष्टा वरेषु समनेषु वल्गुरोषं पत्या सौभगमस्तु अस्यै ॥ १ ॥

आ। नः। अग्ने। सुऽमतिम्। सम्ऽभलः। गमेत्। इमाम्। कुमारीम्। सह। नः। भगेन।
जुष्टा। वरेषु। समनेषु। वल्गुः। ओषम्। पत्या। सौभगम्। अस्तु। अस्यै ॥ १ ॥

हे अग्ने संभलः संभाषकः समादाता वा कन्यार्थी पुरुषः नः अस्माकं कन्यावतां सुमतिम् शोभनां बुद्धिम् आ गमेत् आगच्छतु अस्मद्बुद्ध्यनुसारेण सर्वलक्षणसंपूर्णः अभिलषितो वरः प्राप्नोतु। यद्वा संभलो हिंसकः पूर्वम् अभिलाषविघाती कन्याम् अनिच्छन् पुरुषः सुमतिम् एतत्कामनायुक्तां कल्याणीं बुद्धिं प्राप्य नः अस्मान् आ गमेत्। कन्यां वरयितुम् इति शेषः। ✠ भल भल्ल परिभाषणहिंसादानेषु। अस्मात् संपूर्वात् पचाद्यच्। गमेदिति। "लिङ्याशिष्यङ्" इति अङ् प्र-

1 S′ Kd °वेदनाया for °वेदनान्या. 2 S′ Kd अपलपितो for अभिलपितो.

त्ययः ॥ आगत्य च भगेन भाग्येन सह नः अस्मदीयाम् इमां कुमारीम् । आ गमेत् इत्यनुषङ्गः । कुमारशब्दाद् "वयसि प्रथमे" इति ङीप् ॥ ततः समनेषु समानमनस्केषु । सलोपश्छान्दसः । यद्वा समानं मन्यमानेषु सहृदयेषु । मन्यतेः पचाद्यच् । वरेषु वरयितृषु कन्यावरणार्थम् आगतेषु वरपक्षीयेषु । उक्तं हि वरप्रेषणम् आपस्तम्बेन । "सुहृदः समवेतान् मन्त्रवतो वरान् प्रहिणुयात्" इति [आप°गृ°१.४] । तेषु जुष्टा प्रीता वरयितृपुरुषसंमता सती[1] वल्गुः रुचिरा प्रीतिजननी स्यात् । "जुष्टार्पिते च छन्दसि" "नित्यं मन्त्रे" इति जुष्टशब्द आद्युदात्तः । *ऊषम् ऊषति रुजति अपनुदति दुःखजातम् इति ऊषम् सुखकरम् । ऊष रुजायाम् इति धातोरच् । यद्वा वस निवासे इत्यस्माद् "घञर्थे कविधानम्" इति करणे कप्रत्ययः । यजादित्वात् संप्रसारणे "कृजादीनां के द्वे भवतः" इति द्विर्वचने सवर्णदीर्घे "शासिवसिघसीनाम्°" इति षत्वे च रूपम् । पत्या सह निवाससाधनं सौभगम् सौभाग्यम् अस्यै अस्याः[2] कुमार्यै [कुमार्याः] अस्तु भवतु । षष्ठ्यर्थे चतुर्थी । सौभगशब्दस्य अञ् प्रत्ययः उत्तरपदवृद्ध्यभावश्च प्राग् उक्तः ॥

द्वितीया ॥

सोमंजुष्टं ब्रह्मंजुष्टमर्यम्णा संभृतं भगंम् ।
धातुर्देवस्य सत्येन कृणोमि पतिवेदनम् ॥ २ ॥

सोमंऽजुष्टम् । ब्रह्मंऽजुष्टम् । अर्यम्णा । समऽभृतम् । भगंम् ।
धातुः । देवस्य । सत्येन । कृणोमि । पतिऽवेदनम् ॥ २ ॥

सोमजुष्टम् सोमदेवेन सेवितं ब्रह्मजुष्टम् ब्रह्मणा परिवृढेन गन्धर्वेण च जुष्टम् । अर्यम्णा । अत्र अर्यमशब्देन विवाहाग्निरुच्यते । "अर्यमणं नु देवं कन्या अग्निम् अयक्षत" इति [आश्व°गृ°१.७.१३] मन्त्रवर्णात् । तेन च संभृतम् स्वीकृतं भगम् कन्यारूपं भागधेयं धातुः "धाता गर्भं द-

1 Kd सतीववल्गुः उत् चिरा. S' सतीववल्गुः ववृचिरा. 2 S' Kd अस्याकु° for अस्याः कु°.

"धातु ते" इति [ऋ० १०. १८४. १] प्रसिद्धस्य देवस्य सत्येन अनुज्ञारूपेण यथार्थवचनेन पतिवेदनम् देवताव्यतिरिक्तस्य मनुष्यरूपस्य पत्युर्लम्भकं कृणोमि करोमि। सोमादिदेवतात्रयोपभोगानन्तरं कन्याया मानुषपतिसंबन्धः श्रुत्यन्तरे समाम्नायते। "सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः" [ऋ० १०. ८५. ४०] इति॥

तृतीया॥

इयमग्ने नारी पतिं विदेष्ट सोमो हि राजा सुभगां कृणोति।
सुवाना पुत्रान् महिषी भवाति गत्वा पतिं सुभगा वि राजतु॥ ३॥

इयम्। अग्ने। नारीं। पतिम्। विदेष्ट। सोमः। हि। राजा। सुभगाम्। कृणोति।

सुवाना। पुत्रान्। महिषी। भवाति। गत्वा। पतिम्। सुऽभगा। वि। राजतु॥ ३॥

हे अग्ने इयम् असदीया नारी कुमारी पतिं विदेष्ट विन्दतां लभताम्। ऽविदॢ लाभे इत्यस्माद् आशिषि लिङि "लिङ्याशिष्यङ्"। "छन्दस्युभयथा" इति लिङः सार्वधातुकत्वात् सीयुटः सलोपः। "सुट् तिथोः" इति सुडागमः ऽ॥ हि यस्मात् सोमो राजा सुभगाम् सौभाग्ययुक्तां[1] कृणोति करोति। ऽसुभगाम इति। "आद्युदात्तं द्यच् छन्दसि" इत्युत्तरपदाद्युदात्तत्वम् ऽ॥ पतिलाभानन्तरं पुत्रान् सुवाना जनयन्ती। ऽपूङ् प्राणिगर्भविमोचने। आदादिकः ऽ। महिषी महनीया श्रेष्ठा भार्या भवाति भवतु। ऽमहिषीति। मह पूजायाम्। अविमह्योष्टिषच् [उ० १. ४५]। टित्वान्ङीप् ऽ॥ इत्थं पतिं गत्वा लब्ध्वा सुभगा सौभाग्ययुक्ता सती विराजतु विशेषेण तेजस्विनी भवतु॥

---

१ $\overset{h}{B}$ नारि. D नारीं. We with A K R $\overset{m}{S}$ P $\overset{2}{P}$ J V.

---

1 S′Kd °युक्तं.

चतुर्थी ॥

यथाखरो मघवंश्चारुरेष प्रियो मृगाणां सुषदा बभूव ।
एवा भगस्य जुष्टेयमस्तु नारी संप्रिया पत्याविराधयन्ती ॥ ४ ॥

यथा । आऽखरः । मघऽवन् । चारुः । एषः । प्रियः । मृगाणाम् । सुऽसदाः । बभूव ।
एव । भगस्य । जुष्टा । इयम् । अस्तु । नारी । समऽप्रिया । पत्या । अँविऽराधयन्ती ॥ ४ ॥

मघवान् मंहनीयभोग्यपदार्थयुक्तः चारुः शोभनः मृगाणाम् आखरः निजावासप्रदेशः । ✕ खनु अवदारणे इत्यस्माद् आङ्पूर्वात् "डरो वक्तव्यः" इति डरः । टिलोपः ✕ । स प्रदेशः प्रियः सन् यथा येन प्रकारेण सुषदाः सुखेन स्थातुं योग्यो बभूव भवति । ✕ छान्दसो लिट् । सुपूर्वात् सदेरसुनि रूपम् ✕ । एव एवम् इयं नारी भगस्य भाग्येन जुष्टास्तु । किं कुर्वती । पत्या भर्त्रा सह संप्रिया संप्रियाणि सम्यक्प्रीतिकराणि भोग्यानि वस्तूनि अभिराधयन्ती अभिवर्धयन्ती । यद्वा पत्या सह संप्रिया संप्रीयमाणा अभिराधयन्ती पुत्रपश्वादिभिः समृद्धा भवन्ती ॥

पञ्चमी ॥

भगस्य नावमा रोह पूर्णामनुपदस्वतीम् ।
तयोपप्रतारय यो वरः प्रतिक्राम्यः ॥ ५ ॥

भगस्य । नावम् । आ । रोह । पूर्णाम् । अनुपऽदस्वतीम् ।
तया । उपऽप्रतारय । यः । वरः । प्रतिऽक्राम्यः ॥ ५ ॥

भगस्य भाग्यस्य प्राप्तिसाधनभूतां पूर्णाम् अभिमतफलैः परिपूरिताम

---

१ K मघवां चारु°; A B Bp B̄h D R S̄m V read मंघवंश्चारु°, which we adhere to. २ A B̄h R °रेष: प्रि°. We with D K S. ३ We read पत्याविं° with A B Bp B̄h D R S̄m P P̈ J V. Sâyaṇa and K पत्याभिराध°. ४ So We with P P̈ J. ५ So We with P P̈ J. See Sâyaṇa.

अनुपदस्वतीम् क्षयरहितां नावम् हे कन्ये त्वम् आ रोह ॥ तया उक्त-लक्षणया नावा उप॑ अभिलष्यमाणपतिसमीपं प्रतारय आत्मानं प्रापय। प्रतिकाम्यः अयमेव मे भर्ता स्याद् इति प्रतिनियतं काम्यमानो यो वरः पतिस्तस्य समीपम् इति पूर्वत्र संबन्धः ॥

षष्ठी ॥

आ क्रन्दय धनपते वरमामनसं कृणु।
सर्वं प्रदक्षिणं कृणु यो वरः प्रतिकाम्यः ॥ ६ ॥

आ। क्रन्दय। धनऽपते। वरम्। आऽमनसम्। कृणु।
सर्वम्। प्रऽदक्षिणम्। कृणु। यः। वरः। प्रतिऽकाम्यः ॥ ६ ॥

हे धनपते वैश्रवण वरम् वरयितारं पतिम् आ क्रन्दय एषा कन्या मे जाया भूयाद् इति संततम् उद्घोषय। अभिधापयेत्यर्थः। ‘‘आङः क्रन्द सातत्ये’’ इति णिच्। यद्वा वरम् आ क्रन्दय एतत्कन्याभिमुखम् आह्वय। ‘‘क्रदि आह्वाने’’ ॥ तथा आमनसम् अभिमुखमनस्कं कृणु कुरु ॥ किं च सर्वम् प्राणिजातं प्रदक्षिणम् प्रदक्षिणाचारं विवाहानुकूलव्यापारं कृणु कुरु। यो वरः प्रतिकाम्यः। उक्तोर्थः। तस्मै सर्वं प्रदक्षिणं कुरु इति संबन्धः ॥

सप्तमी ॥

इदं हिरण्यं गुग्गुल्वयमौक्षो अथो भगः।
एते पतिभ्यस्त्वामदुः प्रतिकामाय वेत्तवे ॥ ७ ॥

इदम्। हिरण्यम्। गुग्गुलु। अयम्। औक्षः। अथो इति। भगः।
एते। पतिऽभ्यः। त्वाम्। अदुः। प्रतिऽकामाय। वेत्तवे ॥ ७ ॥

इदं हिरण्यम् हिरण्मयालंकारः गुग्गुलु धूपनद्रव्यविशेषः प्रसिद्धः। अयम् औक्षः प्रलेपनद्रव्यम्। तत्स्वरूपं च कौशिकसूत्रभाष्यकारैर्दर्शितम।

आवपेत् सुरभीन् गन्धान् क्षीरं सर्पिस्तथोदके।

---

१ A B K R P J V गुग्गु°. We with D S P. २ P P J गुग्गुलु.

1 S' Kd omit °शेषः. 2 S' Kd आवयेत्.

एतद् आयनम् इत्याहुरौक्षं तु मधुना सह ।

इति [के० ४.१०,१०.५] । अथो अपि च तेषाम् अलंकारादीनाम् अधिष्ठाता [भगः] एतन्नामा देवः एते सर्वे धारणधूपनलेपनैः हे कुमारि त्वां पतिभ्यः सोमगन्धर्वाग्निभ्यः प्रतिकामाय प्रतिनियतम् एनां कन्यां कामयमानं मानुषं पतिं वेत्तवे वेत्तुं लब्धुम् अदुः दत्तवन्तः । दा-ञो लुङि "गातिस्था०" इति सिचो लुक् । प्रतिकामाय । "क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वात् चतुर्थी । वेत्तवे इति । "तुमर्थे सेसेनसे०" इत्यादिना विदेर्लाभार्थात् तवेप्रत्ययः ॥

अष्टमी ॥

आ ते नयतु सविता नयतु पतिर्यः प्रतिकाम्यः ।
त्वमस्यै धेह्योषधे ॥ ८ ॥

आ । ते । नयतु । सविता । नयतु । पतिः । यः । प्रतिऽकाम्यः ।
त्वम् । अस्यै । धेहि । ओषधे ॥ ८ ॥

हे कन्ये ते त्वाम् अभिलक्ष्य सविता सर्वस्य प्रेरको देवः आ नयतु वरम् आगमयतु । यः प्रतिकाम्यः । उक्तोर्थः । पतिः सोपि नयतु उपयम्य त्वां स्वगृहं प्रापयतु ॥ तथा हे ओषधे व्रीह्यात्मके त्वम् अस्यै कुमार्यै धेहि पतिं विधेहि । प्रयच्छेत्यर्थः । "ध्वसोरेद्धावभ्यासलोपश्च" इति एत्वाभ्यासलोपौ ॥

द्वितीये काण्डे षष्ठेनुवाके पञ्चमं सूक्तम् ॥

समाप्तश्च षष्ठोनुवाकः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजराजपरमेश्वरश्रीवीरप्रतापहरिहरमहाराजसाम्राज्यधुरंधरेण सायणार्येण विरचिते माधवीये अथर्ववेदार्थप्रकाशके द्वितीये काण्डे षष्ठोनुवाकः ॥

समाप्तं द्वितीयं काण्डम् ॥

श्रीगणाधिपतये नमः ॥

यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत् ।
निर्ममे तम् अहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

तृतीयकाण्डे षडनुवाकाः । तत्र प्रथमेनुवाके पञ्च सूक्तानि । तत्र "अग्निर्णः* शत्रून्" इति प्रथमं सूक्तम् । तस्य परसेनामोहनकर्मणि फलीकरणमिश्रितस्य वा कणिकि[1]कामिश्रितस्य वा ओदनपिण्डस्य सांग्रामिकाग्नौ उलूखलेन होमे विनियोगः ॥

तथा अस्मिन्नेव कर्मणि एकविंशतिं शर्कराः शूर्पे कृत्वा परसेनां प्रति निष्पुनीयात् ॥

तथैव अप्वाख्यायै देवतायै अनेन सूक्तेन चरुं जुहुयात् ॥

तद् उक्तं कौशिकेन । "अग्निर्नः शत्रून्[३.१] अग्निर्नो दूतः[३.२] "इति मोहनान्योदनेनोपयम्य फलीकरणान् उलूखलेन जुहोत्येवमणून् ए- "कविंशत्या शर्कराभिः प्रतिनिष्पुनात्यप्वां यजते" इति [कौ०२.५] ॥

तत्र प्रथमा ॥

अग्निर्नः शत्रून् प्रत्येतु विद्वान् प्रतिदहन्नभिशस्तिमरातिम् ।
स सेनां मोहयतु परेषां निर्हस्तांश्च कृणवज्जातवेदाः ॥ १ ॥

अग्निः । नः । शत्रून् । प्रति । एतु । विद्वान् । प्रतिऽदहन् । अभिऽशस्तिम् । अरातिम् ।

सः । सेनाम् । मोहयतु । परेषाम् । निःऽहस्तान् । च । कृणवत् । जातऽवेदाः ॥ १ ॥

अङ्गति गच्छति सर्वं व्याप्नोतीति अग्निः । अगिर्गत्यर्थः । अ-

---

१ Sâyaṇa's text: अग्निर्ण:. २ P कृणुवत्; P[2] कृणवत्. We with J.

---

1 So S′Kd. Dârila: कणिकिका; Kes'ava: कणिका.

स्माद् अङ्गेर्नलोपश्च [उ० ४. ५०] इति निप्रत्ययः । "नेड्वशि कृति" इति इट्प्रतिषेधः । नैरुक्तास्तु अग्निशब्दम् अक्षरसाम्येन बहुधा व्युत्पादयन्ति । तथा हि । अग्निरग्रणीः सर्वदेवतानां प्रधानभूतः "अग्निरग्रे प्रथमो देवतानाम्" [तै० ब्रा० २. ४. ३. ३] इति श्रुतेः । देवासुरसंग्रामे देवसेनाया अग्रे नयनाद् वा अग्रणीरग्निः । सेनानीरित्यर्थः । "अग्निर्देवानां सेनानीः" इति हि ब्राह्मणम् । यद्वा अग्रं प्रथमं यज्ञेषु कर्तव्येषु तादर्थ्येन प्रणीयत इत्यग्निः । सर्वत्र अग्रशब्दोपपदान्नयतेः "सत्सूद्विष०" इत्यादिना कर्तरि कर्मणि वा क्विप् । पृषोदरादित्वाद् रूपसिद्धिः । यद्वा अङ्गं शत्रुसेनारूपं नयति दाहेन आत्मसात् करोति [इति] वा अग्निः । अङ्गशब्दोपपदान्नयतेर्नमतेर्वा रूपसिद्धिः । अथ वा न क्नोपयति स्वसंबद्धपदार्थजातम् अनार्द्रं करोतीति वा अग्निः । क्नूयी शब्दे उन्दे च । अस्मान्नञ्पूर्वाद् रूपम् ॥ अपि वा अयनेन आहवनीयादिस्थानगमनेन[2] अभिव्यक्तः प्रज्वलितः नयति हवींषि देवान् प्रापयतीति । अयनेन हविषः स्वात्मप्राप्तिमात्रेण तद्धविर्दग्धं कुर्वन् देवान् नयतीति वा अग्निः । अस्मिन् पक्षे एतेः अञ्जेर्दहतेर्वा नयतेश्च यथाक्रमम[3] अकारादींस्त्रीन् वर्णान् उद्धृत्य अग्निः शब्दो व्युत्पाद्यः । एतत् सर्वं यास्केनोक्तम् । अग्निः कस्मात् । अग्रणीर्भवति । अग्रं यज्ञेषु प्रणीयते । अङ्गं नयति संनममानः । अक्नोपनो भवतीति स्थौलाष्ठीविः । न क्नोपयति न स्नेहयति । त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः । इतात् अक्तात् दग्धाद्वा नीतात् । स खल्वेतेः अकारम् आदत्ते गकारम् अनक्तेर्वा दहतेर्वा नीः परः इति [नि. ७. १४]ꣳ । स च "इन्द्रो मन्थतु" [कौ० २. ७] इत्यादिसूत्रोक्तप्रकारेण मन्थ[4]नादिसंस्कारसंस्कृतः सेनाग्निरत्र विवक्षितः । सोयम् अग्निः विद्वान् जयोपायं जानन् नः अस्माकं शत्रून् शातयितॄन् द्वेष्यान् मत्येतु प्रतिमुखं गच्छतु । प्रतिमुखो भवतु इत्यर्थः । किं कुर्वन् । अभिशस्तिम् आभिमुख्येन अभितो वा हिंसकम् । ꣳशसु हिंसायाम् । असात् कर्तरि क्तिच् । छान्दसं पूर्वपदप्रकृतिस्वरत्वम् । क्तिन्नन्तेन वा बहुव्रीहिः ꣳ । अरातिम् रा-

1 S' Kd नप्रत्ययः. 2 S' Kd °कमनेन. 3 S' Kd अयथाक्रम°. 4 S' Kd मथ°.

तिर्दानम् तेन च श्रेयोमात्रम् उपलक्ष्यते। असच्छ्रेयोविघातिनं शत्रुं प्रतिदहन् प्रातिकूल्येन प्रत्यङ्गं प्रतिपुरुषं वा भस्मसात् कुर्वन्। यद्वा। ✕प्रतिदहन् इति "लक्षणहेत्वोः क्रियायाः" इति हेतौ शतृप्रत्ययः✕। प्रतिदहनाद्धेतोः शत्रून् प्रत्येतु इति संबन्धः॥ अपि च सः अग्निः परेषाम् शत्रूणां सेनाम् इनेन अधिपतिना सह वर्तमानां शत्रुहननाय संभूय गमनयुक्तां वा। यथाहुः। सेना सेश्वरा समानगतिर्वा [नि०२. ११] इति। तां चतुरङ्गबलरूपिणीं मोहयतु व्याकुलचित्तां करोतु। युद्धविषयकार्याकार्यविभागज्ञानशून्यां करोतु इत्यर्थः। ✕मुह वैचित्त्ये✕॥ किं च जातवेदाः जातानां प्राणिनां वेदिता सर्वज्ञोयम् अग्निः शत्रून् निर्हस्तान् हस्तव्यापारशून्यान् आयुधग्रहणासमर्थान् कृणवत् कुर्यात्। ✕कृवि हिंसाकरणयोश्च। अस्मात् लिङ्यैं लेटि अडागमः। "धिन्विकृण्व्योर च" इति उप्रत्ययः। तत्संनियोगेन अकारोन्नादेशः। तस्य स्थानिवद्भावात् लघूपधगुणाभावः। जातवेदा इति। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च इति [उ०४.२२६] असुन् पूर्वपदप्रकृतिस्वरत्वं च✕॥

द्वितीया॥

यूयमुग्रा मरुत ईदृशे स्याभि प्रेत मृणत सहध्वम्।
अमीमृणन् वसवो नाथिता इमे अग्निर्हेषां दूतः प्रत्येतु विद्वान्॥ २॥

यूयम्। उग्राः। मरुतः। ईदृशे। स्य। अभि। प्र। इत। मृणत। सहध्वम्।
अमीमृणन्। वसवः। नाथिताः। इमे। अग्निः। हि। एषाम्। दूतः।
प्रतिऽएतु। विद्वान्॥ २॥

हे* उग्राः उद्गूर्णबलाः हे मरुतः एतन्नामानो गणदेवाः यूयम् ईदृशे अप्रधृष्ये संग्रामलक्षणे कर्मणि स्थ मत्सहायाः सन्तः संनिहिता भव-

---

१ KV मृणत:. We with A B B^{h} D R K^{m} S^{m} P P^{2} J. KV's reading represents the adoption of Sâyaṇa's reading without regard to the question of accent. २ Such is the accent read by A B B^{P} B^{h} D K K^{m} R S^{m} P P^{2} J V.

---

1 S' Kd आडागमः.

थ । ईदृशे इति । इदमशब्दोपपदात् "त्यदादिषु दृशोनालोचने कञ् च" इति कञ् प्रत्ययः । "इदंकिमोरीश् की" इति इदम ईश् आदेशः ॥ ततः अभि प्रेत आभिमुख्येन शत्रून् प्रहरणाय गच्छत ॥ अनन्तरं मृणतँः हिंसतः युध्यमानान् शत्रून् सहध्वम् अभिभवत । मृण हिंसायाम् । तुदादित्वात् शः ॥ तथा इमे वसवः वस्वाख्या गणदेवा नाथिताः जयार्थं प्रार्थिताः सन्तः अमीमृणन् शत्रून् अस्माकम् अभिघातयन्तु । मृणतेर्ण्यन्ताच्छान्दसे लुङि चङि "उर्ऋत्" "नित्यं छन्दसि" इति ऋदादेशः ॥ हिशब्दः चार्थे । एषाम् वसूनां दूतः दूतवद् अग्रेसरः प्रधानभूतः । "अग्निः प्रथमो वसुभिर्नो अव्यात्" [तै० सं० २.१.११.२] इति हि मन्त्रवर्णः । तथाविधः विद्वान् जाननग्निश्च प्रत्येतु शत्रून् प्रतिगच्छतु । यद्वा हि यस्माद् एषां वसूनां दूतः अनुचरः । "अग्निं दूतं वृणीमहे" [ऋ० १.१२.१] इत्यादिश्रुतेः । अतः सोपि तत्प्रेरितः प्रत्येतु इति ॥

तृतीया ॥

अमित्रसेनां मघवन्नस्मान् छत्रूयतीमभि ।
युवं तानिन्द्र वृत्रहन्नग्निश्च दहतं प्रति ॥ ३ ॥

अमित्रऽसेनाम् । मघऽवन् । अस्मान् । शत्रुऽयतीम् । अभि ।
युवम् । तान् । इन्द्र । वृत्रऽहन् । अग्निः । च । दहतम् । प्रति ॥ ३ ॥

हे मघवन् धनवन्निन्द्र अस्मान् त्वत्परिचरणकर्तॄन् निरपराधानपि शत्रूयतीम् शत्रूनिव आचरन्तीम् अमित्रसेनाम् शत्रुसेनाम् अभि । गच्छेति योग्यक्रियाध्याहारः । शत्रूयतीम् इति । शत्रुशब्दात् "उपमानाद् आचारे" इति क्यच् । "अकृत्सार्वधातुकयोः०" इति दीर्घः । तदन्तात् शतरि "उगितश्च" इति ङीप् । "अनित्यम् आगमशासनम्" इति नुमभावः । "शतुरनुमः०" इति ङीप उदात्तत्वम् । ननु शत्रूयतीम् इति शत्रुलक्षणस्य कर्मणः क्यजन्तधात्वर्थेन्तर्भावात् जीवति रोदिति इत्यादिवद्

---

१ K K^{m} V अमित्रसेनां मघ°. We with A B B^{p} B^{h} D R S^{m} P P^{2} J. २ R °स्मां छं°. We with A B B^{p} B^{h} D K^{m} S^{m} V.

अकर्मकेण भवितव्यम् । सत्यम् । उपमानकर्मणोन्तर्भावेपि उपमेयकर्मणः अनभिधानात् तदपेक्षया सकर्मकत्वाद् अस्मान् इति कर्मणि द्वितीया । तद् उक्तं भगवता पतञ्जलिना "सुप आत्मनः क्यच्" इत्यत्र । "पुत्रीयति माणवकम्" इति प्रस्तुत्य "द्वे ह्यत्र कर्मणी उपमानकर्म च उप-"मेयकर्म च । उपमानकर्म अन्तर्भूतम् । उपमेयकर्मणा सकर्मको भव-"ति" इति ॥ हे वृत्रहन् वृत्रस्यासुरस्य घातक इन्द्र त्वम् अग्निश्च युवम् युवां ताँम् उक्तां शत्रुसेनां प्रति दहतम् प्रातिकूल्येन भस्मीकुरुतम् ॥

चतुर्थी ॥

प्रसूत इन्द्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून् ।
जहि प्रतीचो अनूचः पराचो विष्वक् सत्यं कृणुहि चित्तमेषाम् ॥ ४ ॥

प्रऽसूतः । इन्द्र । प्रऽवता । हरिऽभ्याम् । प्र । ते । वज्रः । प्रऽमृणन् ।
एतु । शत्रून् ।
जहि । प्रतीचः । अनूचः । पराचः । विष्वक् । सत्यम् । कृणुहि । चित्तम् । एषाम् ॥ ४ ॥

हे इन्द्र ते* तव रथः प्रवता प्रवणवता मार्गेण । इन्द्रस्थानापेक्षया शत्रुसेनाप्रदेशः प्रवणः । अनेन अध्वनि रथस्य गतिप्रतिबन्धाभाव उक्तः । "उपसर्गाच्छन्दसि धात्वर्थे" इति वतिः । अत्र अर्थग्रहणसामर्थ्यात् वत्यन्तस्यापि अनव्ययत्वम् । हरिभ्याम् एतन्नामकाभ्याम् अश्वाभ्यां युक्तः सन् सु* सुष्ठु प्र* एतु शत्रुसेनां प्राप्नोतु ॥ ततस्ते त्वदीयो वज्रः प्रमृणन् प्रकर्षेण हिंसन् शत्रून् अस्मदरातीन् प्रैतु प्रगच्छतु ॥ त्वं च प्रतीचः प्रतिमुखम् आगच्छतः अनूचः अनु पश्चाद् आगच्छतः पराचः पराङ्मुखं गच्छतश्च शत्रून् जहि विनाशय । "हन्तेर्जः" इति हौ जादेशः । "असिद्धवद् अत्राभात्" इति तस्यासिद्धत्वात् "अतो हेः" इति हेर्लुगभावः । प्रतीच इत्यादिषु प्रत्याद्युपसर्ग उपपदे "ऋत्विग्०" इत्यादिना अञ्चतेः क्विन् । "अनिदिताम्०" इति नलोपः । शसि "अचः" इत्यकारलोपे "चौ" इति दीर्घत्वम् । प्रतीचः अनूचः इ-

त्यत्र उदात्तनिवृत्तिस्वरेण शस उदात्तत्वम् । "चौ" इति पूर्वपदान्तोदात्तस्य तदपवादत्वेपि व्यत्ययेनात्र न प्रवृत्तिः । पराच इत्यत्र उदात्तनिवृत्तिस्वरापवादत्वेन च चुस्वरे प्राप्ते परत्वाद् "अनिगन्तोञ्चतावप्रत्यये" इति गतेः प्रकृतिस्वरत्वम् ॥ किं च एषाम् शत्रूणां सत्यम् व्यवस्थितं शत्रुहननलक्षणैककार्योद्यतं चित्तम् अन्तःकरणं विष्वक् सर्वतः अञ्चनशीलम् अव्यवस्थितं कार्याकार्यविभागज्ञानशून्यं कृणुहि कुरु । ॥ "उतश्च प्रत्ययाच्छन्दसि वा वचनम्" इति हेर्लुगभावः ॥ ॥

पञ्चमी ॥

इन्द्र॒ सेना॑ मोहया॒मित्रा॑णाम् ।
अ॒ग्नेर्वा॑त॒स्य॒ भ्राज्या॒ तान् विपू॑चो॒ वि ना॑शय ॥ ५ ॥
इन्द्र॑ । सेना॑म् । मो॒ह॒य॒ । अ॒मित्रा॑णाम् ।
अ॒ग्नेः । वा॒त॑स्य । भ्राज्या॑ । तान् । विपू॑चः । वि । ना॒श॒य॒ ॥ ५ ॥

हे इन्द्र अमित्राणाम् शत्रूणां सेनाम् स्वकीयया मायया मोहय मूढा विचित्तां [विगत]कर्तव्यता[चेतसं] कुरु । इन्द्रस्य मायासंबन्धः श्रुत्यन्तरे प्रसिद्धः । "मायाभिरिन्द्र मायिनम्" [ऋ० १. ११. ७] इति ॥ ततः अग्नेः वातस्य वायोश्च मिलितयोस्तयोः [भ्राज्या] भ्राजिः दहनविषये या वेगिता गतिस्तथाविधया वेगगत्या तयोरेव वा गत्या तान् सेनागतान् शत्रून् विषूचः सर्वतः पलायमानान् कृत्वा वि नाशय । ॥ भ्राज्येति । भ्रज गतौ इत्यस्मात् वसिवपियजिरजिव्रजिभ्रजीत्यादिना [उ० ४. १२४] औणादिक इञ् प्रत्ययः ॥ ॥

षष्ठी ॥

इन्द्रः॑ सेना॑ मोहयतु मरुतो॑ घ्नन्त्वोज॑सा ।
चक्षूं॑ष्य॒ग्निरा द॑त्तां पुन॑रेतु परा॑जिता ॥ ६ ॥
इन्द्रः॑ । सेना॑म् । मो॒ह॒य॒तु । म॒रु॒तः॑ । घ्न॒न्तु॒ । ओज॑सा ।

---

१ The visarga is omitted by **A B B**^{p} **B**^{h} **D K**^{m} **S**^{m} **P P**^{2} **J V**. We with Sâyaṇa. ३ This is the reading of **A B B**^{p} **B**^{h} **D K**^{m} **R S**^{m} **P P**^{2} **J V**.

चक्षूंषि। अग्निः। आ। दत्ताम्। पुनः। एतु। परांऽजिता ॥ ६ ॥

इन्द्रः देवानाम् अधिपतिः सेनाम् शत्रुसंबन्धिनीं मोहयतु ॥ तथा तत्सखिभूता मरुतश्च तां सेनाम् ओजसा बलेन घ्नन्तु। ✕ हन्तेर्लोटि "गमहन०" इत्युपधालोपे "हो हन्तेः०" इति घत्वम् ✕ ॥ अग्निर्देवः चक्षूंषि शत्रूणाम् अक्षीणि आ धत्ताम् स्वयं स्वीकरोतु। अपहरतु इत्यर्थः ॥ एवं मोहनादिना पराजिता पराभूता पुनरेतु प्रतिनिवर्तताम् ॥

[इति] तृतीयकाण्डे प्रथमेनुवाके प्रथमं सूक्तम् ॥

"अग्निर्णो* दूतः" इति द्वितीयसूक्तेन परसेनामोहनकर्मणि पूर्वसूक्तोक्तानि कर्माणि कुर्यात्। सूत्रं तु तत्रैवोदाहृतम् ॥

तत्र प्रथमा ॥

अग्निर्नो[1] दूतः प्रत्येतु[2] विद्वान् प्रतिदहन्नभिशस्तिमरातिम्।
स चित्तानि मोहयतु परेषां निर्हस्तांश्च कृणवज्जातवेदाः ॥ १ ॥

अग्निः। नः। दूतः। प्रतिऽएतु। विद्वान्। प्रतिऽदहन्। अभिऽशस्तिम्। अरातिम्।
सः। चित्तानि। मोहयतु। परेषाम्। निःऽहस्तान्। च। कृणवत्। जातऽवेदाः ॥ १ ॥

अग्निः अङ्गनादिगुणयुक्तो दूतः देवानां दूतवद् अग्रेसरः विद्वान् नः अस्माकम् । शत्रून् इति शेषः। अन्यत् पूर्वसूक्ते व्याख्यातम्। सेनापदस्थाने चित्तानीति विशेषः ॥

द्वितीया ॥

अयमग्निरमूमुहद् यानि चित्तानि वो हृदि।
वि वो[3] धमत्वोकसः प्र वो[3] धमतु सर्वतः ॥ २ ॥

---

१ Sâyaṇa's text: अग्निर्णो. २ Such is the accent read by **A B B**^{p} **B**^{h} **D K K**^{m} **R S**^{m} **P P**^{2} **J V**, with doubtful correctness. **R**w read प्रत्येतु correctly, but against their MSS. which like ours read प्रत्येतु. ३ **B** in both places miscorrects वो into वो, obviously with a view to restore a word वोध!

अयम् । अग्निः । अमूमुहत् । यानि । चित्तानि । वः । हृदि ।
वि । वः । धमतु । ओकसः । प्र । वः । धमतु । सर्वतः ॥ २ ॥

हे शत्रवः वः युष्माकं हृदि हृदये यानि चित्तानि अस्मदाक्रमणविषयज्ञानानि सन्ति तानि सर्वाणि अयं हूयमानोग्निः अङ्गनादिगुणयुक्तः अमूमुहत् मोहयतु । ॒मुहेर्ण्यन्ताद् लुङि चङि रूपम॒ ॥ ततो वः युष्मान् ओकसः स्वस्वनिवासस्थानाद् वि धमतु विशेषेण निःसारयतु । स्थानभ्रष्टान् करोतु इत्यर्थः ॥ अपि च सर्वतः सर्वस्मादपि स्थानाद् वः युष्मान् प्र धमतु प्रकर्षेण गमयतु । स्थानशून्यान् करोतु इत्यर्थः । ॒ध्मा शब्दाग्निसंयोगयोः । अस्मात् लोटि शपि "पाघ्राध्मा०" इत्यादिना धमादेशः॒ ॥

तृतीया ॥

इन्द्र चित्तानि मोहयन्नर्वाङाकूत्या चर ।
अग्नेर्वातस्य ध्राज्या तान् विषूचो वि नाशय ॥ ३ ॥

इन्द्र । चित्तानि । मोहयन् । अर्वाङ् । आऽकूत्या । चर ।
अग्नेः । वातस्य । ध्राज्या । तान् । विषूचः । वि । नाशय ॥ ३ ॥

हे इन्द्र चित्तानि शत्रूणां मनांसि मोहयन् आकूत्या असच्छत्रुसंहरणबुद्ध्या सहितः सन् अर्वाङ् शत्रुसेनाभिमुखश्चर गच्छ ॥ अन्यद् व्याख्यातम् ॥

चतुर्थी ॥

व्याकृतय एषामितार्थो चित्तानि मुह्यत ।
अथो यद्यैषां हृदि तदेषां परि निर्जहि ॥ ४ ॥

वि । आऽकूतयः । एषाम् । इत[२] । अथो इति । चित्तानि[१] । मुह्यत ।
अथो इति । यत् । अद्य । एषाम् । हृदि । तत् । एषाम् । परि । निः ।
जहि ॥ ४ ॥

---

१ Such is the accent read by **A B B**P **B**^{h} **D K K**^{m} **R S**^{m} **P P**^{2} **J V.** २ **P**^{2} इत. We with **P J.**

हे व्याकूतयः विरूढाः संकल्पाः यूयम् एषाम् शत्रूणां मनांसि इत प्राप्नुत ॥ अथो अपि च हे* चित्तानि शत्रुसंबन्धीनि मनांसि यूयमपि मुह्यत मौढ्यं प्राप्नुत। यद्वा हे देवाः यूयम् एषाम् शत्रूणां व्याकूतयः विविधाकूत्युत्पादकाः सन्तः इत तान् गच्छत ॥ अथो अपि च तदीयानि चित्तानि मुह्यत मोहयत। मुह्यतिरत्र अन्तर्णीतण्यर्थः ॥ अथो अपि च हे इन्द्र एषाम् संग्रामार्थं प्रवृत्तानां शत्रूणां हृदि हृदये अद्य इदानीं यत् चिकीर्षितं कार्यजातम् अस्ति एषां संबन्धि तत् सर्वं परि निर्जहि परितः सर्वतो नाशय ॥

पञ्चमी॥

अमीषां चित्तानि प्रतिमोहयन्ती गृहाणाङ्गान्यप्वे[1] परेहि।
अभि प्रेहि निर्दह हृत्सु शोकैर्ग्राह्यामित्रांस्तमसा विध्य शत्रून् ॥ ५ ॥

अमीषाम्। चित्तानि। प्रतिऽमोहयन्ती। गृहाण। अङ्गानि। अप्वे। परा। इहि।
अभि। प्र। इहि। निः। दह। हृत्ऽसु। शोकैः। ग्राह्या। अमित्रान्। तमसा। विध्य। शत्रून् ॥ ५ ॥

हे अप्वे अपवाययति अपगमयति सुखं प्राणांश्चेति अप्वा पापदेवता। अपपूर्वाद् वेतेर्वीयतेर्वा[2] "डोन्यत्रापि दृश्यते" इति डप्रत्यये उपसर्गस्यान्त्यलोपश्छान्दसः। यास्कस्त्वाह। अप्वा यद् एनया विद्धोऽपवीयते[3] व्याधिर्वा भयं वा [नि॰६.१२] इति। हे तथाविधे पापदेवते अमीषाम् असच्छत्रूणां चित्तानि मनांसि प्रतिमोहयन्ती प्रत्येकं मौढ्यं गमयन्ती। हेतौ शतृप्रत्ययः। प्रतिमोहनाद्धेतोः [अङ्गानि गृहाण]। गृहाणेति। प्राप्तकाले लोट्। हे अप्वे त्वत्कर्तृकस्य शत्रुग्रहणस्यायं प्राप्तः कालः तदर्थं परेहि असतः पराङ्मुखी सती शत्रून् गच्छ ॥ गत्वा च अभि प्रेहि अभितः सर्वतः शत्रुशरीरं प्रसर्प।

---

१ B Bp $\overset{h}{\text{B}}$ D R have ऽ after °प्वे, and $\overset{m}{\text{S}}$ °न्यप्वे ३ परे°. We with K $\overset{m}{\text{K}}$ V.

---

1 S′ Kd अवाययति अपवाययति अपगमयति सुखं. 2 S′ Kd °र्वायतेर्वा. 3 S′ Kd विद्धोपमीयते.

प्रविशेत्यर्थः ॥ प्रविश्य च हृत्सु हृदयेषु स्थिता सती शोकैः रोगभयादिजन्यैर्निर्दह ॥ ततः तमसा तमोरूपया ग्राह्या पिशाच्या शत्रून् शातयितृन् अमित्रान् द्वेष्यान् विध्य ताडय । मारयेत्यर्थः । व्यध ताडने । "ग्रहिज्या०" इत्यादिना संप्रसारणम् ॥

षष्ठी ॥

असौ या सेना मरुतः परेषामस्मानैत्यभ्योजसा स्पर्धमाना ।
तां विध्यत तमसापव्रतेन यथैषामन्यो अन्यं न जानात् ॥ ६ ॥

असौ । या । सेना । मरुतः । परेषाम । अस्मान् । आऽएति । अभि । ओजसा । स्पर्धमाना ।

ताम् । विध्यत । तमसा । अपऽव्रतेन । यथा । एषाम् । अन्यः । अन्यम् । न । जानात् ॥ ६ ॥

हे मरुतः असौ परिदृश्यमाना परेषाम् शत्रूणां या सेना ओजसा स्वकीयेन बलातिशयेन स्पर्धमाना अस्माभिः सह संघर्षं युद्धोद्यमं कुर्वाणा सती अस्मान् अभि ऐति अस्मदभिमुखम् आगच्छति । स्पर्ध संघर्षे । लटः शानच् । "तास्यनुदात्तेत्०" इति लसार्वधातुकानुदात्तत्वे शपः पित्त्वाद् अनुदात्तत्वे धातुस्वरः ॥ ताम् तथाविधां शत्रुसेनाम् अपव्रतेन । व्रतम् इति कर्मनाम । अपगतकर्मणा सर्वव्यापारविघातकेन तमसा भवद्भिः प्रेरितेन मायामयेन अन्धकारेण विध्यत ताडयत ॥ तत्प्रकारं दर्शयति । एषाम् शत्रूणां मध्ये अन्यः कश्चित् पुरुषः अन्यम् स्वव्यतिरिक्तं पुरुषं यथा येन प्रकारेण न जानात् न जानीयात् । तथा विध्यतेति संबन्धः । परस्परवार्तानभिज्ञान् कृत्वा विनाशयतेत्यर्थः । जानात् इति । ज्ञा अवबोधने । लेटि "इतश्च लोपः०" इति इकारलोपः । "ज्ञाजनोर्जा" इति जादेशः ॥

[इति] तृतीये काण्डे प्रथमेनुवाके द्वितीयं सूक्तम् ॥

"अचिक्रदत्" इति सूक्तेन शत्रूत्सादितस्य राज्ञः पुनः स्वराष्ट्रप्रवेशार्थं शत्रुसेनाकारं पुरोडाशम् उदकेषु दर्भान् संस्तीर्य तत्र निनयेत् । त-

तो निमज्जनार्थं तं पुरोडाशं लोष्टेन पूरयेत् ॥

तथा अनेन सूक्तेन स्वराष्ट्रप्रवेशार्थं क्षीरौदनं संपात्य अभिमन्त्र्य राजानम् आशयेत् ॥

अत्र सूत्रम् । "अचिक्रदत्[३.३] आ त्वा गन्[३.४] इति य-
"स्माद् राष्ट्राद् अवरुद्धस्तस्याशायां सेनाविधं पुरोडाशं दर्भेषूदके निनय-
"ति" इत्यादि [कौ०२.७] ॥

अत्र "अचिक्रदत्" इत्यस्य साकमेधाख्यपर्वणि पूर्वेद्युः क्रियमाणायाम् आग्नेय्याम् इष्ट्यां प्रधानयागानुमन्त्रणे विनियोगः । उक्तं वैताने । "कार्तिक्यां साकमेधाः । पूर्वेद्युरिष्ट्याम् [2]अग्नेरनीकवतोचिक्रदत्" इति [वै० २.५]॥

तत्र प्रथमा ॥

अचिक्रदत् स्वपा इह भुवदग्ने व्यचिस्व रोदसी उरूची ।
युञ्जन्तु त्वा मरुतो विश्ववेदस आमुं नय नमसा रातहव्यम् ॥ १ ॥

अचिक्रदत् । स्वऽपाः । इह । भुवत् । अग्ने । वि । अचिस्व । रोदसी इति । उरूची इति ।
युञ्जन्तु । त्वा । मरुतः । विश्वऽवेदसः । आ । अमुम् । नय । नमसा ।
रातऽहव्यम् ॥ १ ॥

हे अग्ने असौ स्वराष्ट्रात् प्रच्युतो राजा अचिक्रदत् पुनः स्वराष्ट्रप्रवेशाय त्वाम् आह्वयति । प्रार्थयत इत्यर्थः । ऋकदि क्रदि क्लदि आह्वाने रोदने च । अस्माद् ण्यन्तात् लुङि चङि रूपम् । "अनित्यम् आगमशासनम्" इति नुमभावः ऋ ॥ स त्वदनुग्रहात् इह स्वराष्ट्रे स्वपाः स्वकीयानां प्रजानां पालकः सुकर्मा वा भुवत् भवतु । ऋभवतेर्लेटि अडागमः । छान्दसः शपो लुक् । "भूसुवोस्तिङि" इति गुणप्रतिषेधे उवङ् ऋ ॥ तद्रक्षणार्थं त्वं च उरूची उरूच्यौ उर्वञ्चने । व्यापनशीले इत्यर्थः । ऋउरुपूर्वाद् [अञ्चतेः] "अञ्चतेश्चोपसंख्यान-

१ So **P P̂ J K**, and not व्यंचस्व or व्यचिस्व.

1 So **S′ Kd.** *Kaus'ika*: शयनविधिं. But Kes'ava has सेनाविधं. 2 **S′ K**d अग्निरनीक°

म" इति ङीप् । उदात्त[निवृत्ति]स्वरेण ङीप उदात्तत्वम् । ईदृशौ रोदसी रोदस्यौ द्यावापृथिव्यौ व्यचस्व व्यामुहि । व्यचतिर्व्याप्तिकर्मा ॥ अपि च विश्ववेदसः सर्वविषयज्ञानयुक्ता मरुतः एतन्नामान एकोनपञ्चाशत्संख्याका देवाः हे अग्ने त्वा त्वां युञ्जन्तु प्रामुवन्तु । त्वत्सहाया भवन्तु इत्यर्थः । विश्ववेदस इति । विद् ज्ञाने इत्यस्माद् भावे असुन् । "बहुव्रीहौ विश्वं संज्ञायाम्" इति पूर्वपदान्तोदात्तत्वम् । [नमसा] नमस्कारेण युक्तं रातहव्यम् दत्तहविष्कम् अमुम् उक्तलक्षणं राजानम् आ नय पुनः स्वराष्ट्रं प्रापय ॥

द्वितीया ॥

दूरे चित् सन्तमरुषास इन्द्रमा च्यावयन्तु सख्याय विप्रम् ।
यद् गायत्रीं बृहतीमर्कमस्मै सौत्रामण्या दधृषन्त देवाः ॥ २ ॥

दूरे । चित् । सन्तम् । अरुषासः । इन्द्रम् । आ । च्यवयन्तु । सख्याय । विप्रम् । यत् । गायत्रीम् । बृहतीम् । अर्कम् । अस्मै । सौत्रामण्या । दधृषन्त । देवाः ॥ २ ॥

अरुषासः आरोचमानाः दीप्यमानाः । अरुषँ आरोचनाद् इति यास्कः [नि. १२. ७] । ऋत्विजः दूरे चित् सन्तम् । चित् शब्दः अप्यर्थे । स्वर्गे वसन्तं विद्यमानमपि विप्रम् । मेधाविनामैतत् । मेधाविनम् इन्द्रं सख्याय अस्य राज्ञः सखिकर्मणे साहाय्याचरणाय । "सख्युर्यः" इति यः । आ च्यावयन्तु आगमयन्तु ॥ आनेतव्यस्येन्द्रस्य आधिक्यं दर्शयति । यत् यस्मात् कारणाद् देवाः प्रसिद्धाः अस्मा इन्द्राय गायत्रीम् सोमाहरणादिना प्रख्यातवीर्यं गायत्र्याख्यं छन्दः बृहतीम् अस्मान्न्यूनाधिकाक्षराणाम् अन्येषां छन्दसां प्रधानभूताम् । बृहत्याः प्राधा-

१ B B B^{P} $\overset{h}{B}$ D R P J सख्याय. We with K $\overset{m}{K}$ $\overset{m}{S}$ $\overset{2}{P}$ V. २ J P सख्याय. We with $\overset{2}{P}$ K.

1 S' Kd तत्तद्धवि° for दत्तहवि°. 2 So S' Kd. 3 S' Kd बृहतः.

न्यं च अन्यत्र श्रूयते । "यानि च छन्दांस्यत्यरिच्यन्त यानि च नोदभवन् "तानि निर्वीर्याणि हीनान्यमन्यन्त । साब्रवीद् बृहती । मामेव भूत्वा "माम् उपसंश्रयतेति" [तै० ब्रा० १. ५. १२. ३] "बृहती छन्दसां स्वाराज्यं परीयाय" इति । अर्कम् अर्चनसाधनभूतं मन्त्रात्मकं बृहदुक्थात्मकं शस्त्रम् सौत्रामण्या । सुष्ठु त्रायत इति सुत्रामा इन्द्रः । तद्देवत्यया क्रियया दधृषन्त अधारयन् । गायत्र्यादिभिरिन्द्रम् अतिशयितवीर्यम् अकुर्वन्नित्यर्थः । यद्वा गायत्र्यादिकम् अस्मा इन्द्राय । प्रायच्छन् इति शेषः ॥ तथा सौत्रामण्या एतन्नामकेन हविर्यज्ञेन देवा दधृषन्त । पूर्वं विस्रस्तावयवम् इन्द्रं पुनः सर्वावयवोपेतम् अकुर्वन्नित्यर्थः । श्रूयते हि । "इन्द्रस्य सुषुवाणस्य दशधेन्द्रियं[1] वीर्यं परापतत् । तद् देवाः सौत्रामण्या समभरन्" [तै० सं० ५. ६. ३. ४] इति । तस्माद् अतिशयितवीर्ययोगात् तमेव आ च्यावयन्तु इति संबन्धः ॥

तृतीया ॥

अद्ध्यस्त्वा राजा वरुणो ह्वयतु सोमस्त्वा ह्वयतु पर्वतेभ्यः ।
इन्द्रस्त्वा ह्वयतु विड्भ्य आभ्यः श्येनो भूत्वा विश आ पतेमाः ॥ ३ ॥

अत्ऽभ्यः । त्वा । राजा । वरुणः । ह्वयतु । सोमः । त्वा । ह्वयतु । पर्वतेभ्यः ।
इन्द्रः । त्वा । ह्वयतु । विट्ऽभ्यः । आभ्यः । श्येनः । भूत्वा । विशः । आ । पत । इमाः ॥ ३ ॥

हे परैरवरुद्धराष्ट्र राजन् त्वा त्वां वरुणो राजा अद्भ्यः स्वसंबन्धिनीभ्यः सकाशाद् ह्वयतु आकारयतु[2] । ✕ अद्भ्य इति । "अपो भि" इति तकारः ✕ ॥ तथा सोमः लतारूपेणावस्थितः पर्वतेभ्यः स्वनिवासस्थानेभ्यः त्वा त्वां ह्वयतु ॥ इन्द्रश्च विट्पतिः । "स्वस्तिदा विशां[3] पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः" [ऋ० १०. १५२. २] इति श्रूयते ।

१ **B** omits the visarga after °भ्यः.

1 **S′ K**d दशधेयेंद्रियं. 2 **S′ K**d read this word after तकारः. 3 So **S′ K**d.

आभ्यः यासु प्रजासु त्वम् इदानीं निवससि आभ्यो विड्भ्यः प्रजाभ्यः सकाशात् त्वा त्वां ह्वयतु । राज्यभ्रष्टस्य राज्ञः त्रीणि निवासस्थानानि संभावितानि । समुद्रमध्यम् पर्वताः देशान्तरं वा । तेभ्यः सर्वेभ्यः स्वकीयेभ्यो वरुणादयस्त्वाम् आह्वयन्तु । पुनः स्वराज्यप्रवेशायेत्यर्थः ॥ एवं तैर्देवैराहूतस्त्वम् इमाः स्वकीयाः पूर्वं पालिता विशः प्रजाः श्येनो भूत्वा । श्येनः पक्षिविशेषः । स इव शीघ्रगतिः परैरनाधर्षितश्च भूत्वा आ पत आगच्छ । ☒पत्लृ गतौ । लोटि "अतो हेः" इति हेर्लुक्☒ ॥

चतुर्थी ॥

श्ये॒नो ह॒व्यं न॑य॒त्वा पर॑स्मादन्यक्षे॒त्रे अ॑प॑रुद्धं॒ चर॑न्तम् ।
अ॒श्वि॒ना॒ पन्था॑मृ॒तां कृ॑णुतां सु॒गं त॑ इ॒मं स॑जाता अभि॒संवि॑शध्वम् ॥ ४ ॥

श्ये॒नः । ह॒व्यम् । न॒य॒तु॒ । आ । पर॑स्मात् । अ॒न्य॒ऽक्षे॒त्रे । अ॑प॑ऽरुद्धम् । च॒र॑न्तम् ।

अ॒श्वि॒ना॑ । पन्था॑म् । कृ॒णु॒ता॒म् । सु॒ऽगम् । ते॒ । इ॒मम् । स॒ऽजा॒ताः॒ । अ॒भि॒ऽसंवि॑शध्वम् ॥ ४ ॥

श्येनः शंसनीयगतिः द्युस्थानो देवः अन्यक्षेत्रे परराष्ट्रे अवरुद्धम् शत्रुभिर्निरुद्धं चरन्तम् वर्तमानम् अत एव हव्यम् ह्वातव्यम् । ☒"बहुलं छन्दसि" इति ह्वः संप्रसारणम्☒ । ईदृशं तं राजानं परस्मात् परराष्ट्राद् आ नयतु स्वदेशं प्रति प्रापयतु ॥ तथा हे राजन् ते तव अश्विना अश्विनौ देवौ । ☒"सुपां सुलुक्°" इत्याकारः☒ । पन्थाम् पन्थानम् । ☒छान्दसम् आत्वं नलोपो वा☒ । आगमनमार्गं सुगम् सुखेन गन्तुं योग्यं निरोधकशत्रुशून्यं कृणुताम् कुरुताम् । ☒सुगम् इति । "सुदुरोरधिकरणे" इति डः☒ । हे सजाताः समानजन्मानो बन्धवः यूयम् इमम् पुनः स्व-

---

१ **S K V** अवरुद्धं. We with **A B B**^{r} **B**^{h} **D K**^{m} **R S**^{m} **P P**^{2} **J.** **V** too, who recognises अप° as a various reading. २ **B**^{h} **S**^{m} पथां. We with **A D K K**^{m} **R P P**^{2} **J V.** ३ **S K** अव°. We with **P P**^{2} **J.**

राष्ट्रं प्रविष्टं राजानम् अभिसंविशध्वम् अभितः सर्वतः प्रविश्य संविश-ध्वम् उपविश्य सेवध्वम् । ॥ विशेर्व्यत्ययेन आत्मनेपदम् ॥

पञ्चमी ॥

ह्वयन्तु त्वा प्रतिजनाः प्रति मित्रा अवृषत ।
इन्द्राग्नी विश्वे देवास्ते विशि क्षेममदीधरन् ॥ ५ ॥
ह्वयन्तु । त्वा । प्रतिऽजनाः । प्रति । मित्राः । अवृषत ।
इन्द्राग्नी इति । विश्वे । देवाः । ते । विशि । क्षेमम् । अदीधरन् ॥ ५ ॥

प्रतिजनाः हे राजन् त्वा त्वां वयन्तु सांतत्येन सेवन्ताम् । ॥ वे-ञ् तन्तुसंताने इत्यस्मात् लोट् । कर्तरि शप् ॥ तथा प्रतिमित्राः प्रतिकूलानि मित्राणि अवृषत विरोधं परित्यज्य संभजन्ताम् । ॥ वृ-ङ् संभक्तौ इत्यस्मात् छान्दसे लुङि "लिङ्सिचोरात्मनेपदेषु" इति पक्षे इडभावः । "उश्च" इति सिचः कित्त्वाद् गुणाभावः ॥ इन्द्रा-ग्नी विश्वे देवाश्च विशि । जातावेकवचनम् । विक्षु प्रजासु ते तव क्षे-मम् रक्षणम् अदीधरन् धारयन्तु कुर्वन्तु । ॥ धारयतेर्ण्यन्तात् लुङि चङि रूपम् ॥

षष्ठी ॥

यस्ते हवं विवदत् सजातो यश्च निष्ट्यः ।
अपाञ्चमिन्द्र तं कृत्वायेममिहाव गमय ॥ ६ ॥
यः । ते । हवम् । विऽवदत् । सऽजातः । यः । च । निष्ट्यः ।
अपाञ्चम् । इन्द्र । तम् । कृत्वा । अथ । इमम् । इह । अव । गमय ॥ ६ ॥

हे राजन् ते तव हवम् स्वराष्ट्रप्रवेशविषयं पुनराह्वानं यः सजातः समानजन्मा । समबल इत्यर्थः । यश्च निष्ट्यः नीचः । निकृष्टबल इ-

---

१ SKV वयन्तु. We with ABBP BDKRSPPJ. २ KKV °जाना:. We with ABBP BDRSPPJ. ३ DP अवृषत्. We with ABKKRSPJV. ४ Sâyaṇa would read देवास्ते. B seems to have देवास्ते. We with ABBP DKKRSPPJV. ५ So PPJ. K has वयन्तु with Sâyaṇa.

त्यर्थः । ॥ "अव्ययात् त्यप्" इत्यत्र "निसो गते" इति वचनात् त्यप् । "ह्रस्वात् तादौ तद्धिते" इति सकारस्य मूर्धन्यः ॥ । अनयोरन्यतरः कश्चिद् विवदत् विवदेत् नानुमन्येत । ॥ विपूर्वाद् वदेर्लेटि अडागमः ॥ । हे इन्द्र तम् उभयविधं शत्रुम् अपाञ्चम् अपगतं बहिष्कृतं कृत्वा अथ अनन्तरम् इमम् प्रकृतं राजानम् इह अस्मिन् राष्ट्रे अव गमय बोधय । अस्य राष्ट्रस्य अयमेव राजेति प्रख्यापयेत्यर्थः ॥

इति प्रथमेनुवाके तृतीयं सूक्तम् ॥

"आ त्वा गन्" इति सूक्तेन स्वराष्ट्रप्रवेशकर्मण्येव पूर्वसूक्तोक्तानि कर्माणि कुर्यात् । सूत्रं तु तत्रैवोदाहृतम् ॥

अत्र "पथ्या रेवतीः"[७] इत्येषा प्रायणीयेष्ट्यां पथ्यास्वस्तियागानुमन्त्रणे विनियुक्ता । "दीक्षान्ते प्रायणीयायाम्" इति प्रक्रम्य "पथ्या रेवतीः[७] वेदः स्वस्तिः"[७.२९.१] इति हि वैतानं सूत्रम् [३.३] ॥

तत्र प्रथमा ॥

आ त्वा गन् राष्ट्रं सह वर्चसोदिहि प्राङ् विशां पतिरेकराट् त्वं वि राज ।
सर्वास्त्वा राजन् प्रदिशो ह्वयन्तूपसद्यो नमस्यो भवेह ॥ १ ॥

आ । त्वा । गन् । राष्ट्रम् । सह । वर्चसा । उत् । इहि । प्राङ् । विशाम् ।
पतिः । एकऽराट् । त्वम् । वि । राज ।
सर्वाः । त्वा । राजन् । प्रऽदिशः । ह्वयन्तु । उपऽसद्यः । नमस्यः । भव । इह ॥ १ ॥

हे राजन् त्वा त्वां राष्ट्रम् शत्रुभिराक्रान्तं स्वकीयं राज्यम् आ गन् पुनरागमत् । ॥ गमेर्लुङि "मन्त्रे घस०" इति च्लेर्लुक् । "मो नो धातोः" इति नत्वम् ॥ ततस्त्वं वर्चसा बलेन सह उदिहि उदि-

---

१ B प्रति°. We with A B Bp D K Km R Sm P Pc J V.

---

1 S′Kd विविदत् विवदेत्. Sâyaṇa's text of the original also has विविदत्. But both his explanation of the word, (विवदेत् नानुमन्येत), and his grammatical note विपूर्वाद् वदेर्लेटि &c. show that he really meant to read and explain विवदत् and not विविदत्.
2 S′Kd पूर्वसूत्रोक्तानि. 3 S′Kd प्रायणीयाम् for प्रायणीयायाम्.

तः प्रख्यातो भव । ॒इणो लोट्॒ ॥ अनन्तरं प्राँक् पूर्वं विशाम् प्रजानां सर्वासां पतिः पालकः सन् एकराट् निःसपत्नो मुख्यो राजा भूत्वा त्वं वि राज विशेषेण दीप्यस्व । ॒एकराडिति । एकशब्दोपपदाद् राजतेः "सत्सूद्विष०" इति क्विप् । "व्रश्च०" इत्यादिना षत्वम् । जश्त्वचर्त्वे॒ ॥ हे राजन् त्वा त्वां सर्वाः प्रदिशः प्रकृष्टा दिशः प्राच्याद्याः तदभिमानिन्यो देवताः तत्रस्था जना वा ह्वयन्तु स्वामित्वेन अनुजानन्तु ॥ इह अस्मिन् स्वकीये राष्ट्रे उपसद्यः सर्वैरुपसदनीयः सेव्यः । ॒व्यत्ययेन यत्॒ । नमस्यः नमस्कार्यश्च भव । ॒"नमोवरिवश्चित्रङः क्यच्" इति क्यच् । तदन्ताद् "अचो यत्" इति कर्मणि यत् । अतोलोपयलोपौ । "तित् स्वरितः"॒ । यद्वा नमस्यः नमस्कारार्हः । ॒"छन्दसि च" इति यः । छान्दसम् अन्तस्वरितत्वम्॒ ॥

द्वितीया ॥

त्वां विशो वृणतां राज्याय त्वामिमाः प्रदिशः पञ्च देवीः ।
वर्ष्मन् राष्ट्रस्य ककुदि श्रयस्व ततो न उग्रो वि भजा वसूनि ॥ २ ॥

त्वाम् । विशः । वृणताम् । राज्याय । त्वाम् । इमाः । प्रऽदिशः । पञ्च । देवीः ।
वर्ष्मन् । राष्ट्रस्य । ककुदि । श्रयस्व । ततः । नः । उग्रः । वि । भज । वसूनि ॥ २ ॥

हे राजन् त्वां विशः प्रजा राज्याय । ॒राज्ञो भावः कर्म वा राज्यम् । "पत्यन्तपुरोहितादिभ्यो यक्" इत्यत्र पुरोहितादिषु "राजाऽसे" इति पाठाद् यक्॒ । राजभावाय राजकर्मणे वा वृणताम् संभजताम् ॥ तथा इमाः परिदृश्यमानाः प्रदिशः प्राच्याद्याः पञ्च मध्यदिशा सह पञ्चसंख्याका देवीः देव्यो द्योतमानाः । वृणताम् इति सं-

१ ^{m}S K ^{m}K V वृणतां राज्या°. We with A B B^{p} ^{h}B D P ^{2}P J R.

1 पूर्वमिवशां for पूर्वं विशां. 2 S′ Kd वश्चादिना for वश्च इत्यादिना.

वन्धः ॥ ततः राष्ट्रस्य वर्ष्मन् वर्ष्मणि शरीरे । ऋसप्तम्या लुक् । "न ङिसंबुद्ध्योः" इति नलोपप्रतिषेधः ऋ । स्वपालनीयभूशरीर इत्यर्थः । तत्रापि ककुदि ककुदीवोन्नते[1] स्थाने प्रशस्ते वा सिंहासने अय-स्व आस्स्व ॥ ततः उपवेशानन्तरम् उग्रः उङ्गूर्णबलः शत्रुभिरनभिभाव्यः सन् वसूनि धनानि नः अस्माकं सेवकानां वि भज यथायोग्यं प्रयच्छ । ऋ"व्यचोऽतस्तिङः" इति सांहितिको दीर्घः ऋ ॥

तृतीया ॥

अच्छा त्वा यन्तु हविनः सजाता अग्निर्दूतो अजिरः सं चरातै ।
जायाः पुत्राः सुमनसो भवन्तु बहुं बलिं प्रति पश्यासा उग्रः ॥ ३ ॥

अच्छ । त्वा । यन्तु । हविनः । सऽजाताः । अग्निः । दूतः । अजिरः । सम् । चरातै ।

जायाः । पुत्राः । सुऽमनसः । भवन्तु । बहुम् । बलिम् । प्रति । पश्यासै । उग्रः ॥ ३ ॥

हे राजन् त्वा त्वां सजाताः समानजन्मानः अन्ये राजानो हविनः । हवम् आह्वानम् आज्ञारूपम् एषाम् अस्तीति हविनः तादृशाः सन्तः । अच्छ इत्याभिमुख्ये । [यन्तु] अभिगच्छन्तु । सर्वे राजानस्त्वदाज्ञावशवर्तिनो[2] भवन्तु इत्यर्थः ॥ [तथा] अजिरः त्वया प्रेरितः गमनशीलो वा दूतस्त्वदीयो भटः अग्निः । लुप्तोपमम एतत् । अग्निरिव अप्रधृष्यः सं चरातै संचरतु । ऋसंपूर्वाच्चरतेर्लेटि आडागमः । "वैतोन्यत्र" इति ऐकारः । अजिर इति । अज गतिक्षेपणयोः इत्यस्मात् अजिरशिशिरशिथिल° [उ १. ५३] इत्यादिना किरजन्तो निपातितः ऋ ॥ अपि च जायाः भार्याः पुत्राश्च तदुपलक्षिताः सर्वे बान्धवाः सुमनसः पुनःस्वराष्ट्रप्राप्त्या सौमनस्ययुक्ता भवन्तु । ऋ"सोर्मनसी अलोमोषसी" इत्युत्तरपदाद्युदात्तत्वम् ऋ ॥ उग्रः उङ्गूर्णबलस्त्वं बहुम् अधिकं बहुवि-

1 S′Kd ककुदिवो°. 2 S′ has the words from °वर्तिनो up to अजि° at the end of a top line on a leaf, and they are much effaced. The restoration is, however certain. Kd, which is the daughter of S′, omits the letters altogether, leaving a gap to indicate the omission.

धं वा बलिम् उपायनं करं वा प्रति पश्यासै प्रतिमुखम् आगतं पश्य। प्रतिपूर्वाद् दृशेर्लेंटि व्यत्ययेन आत्मनेपदम्। अडैत्वे पूर्ववत्॥

चतुर्थी॥

अश्विना त्राग्रे मित्रावरुणोभा विश्वे देवा मरुतस्त्वा ह्वयन्तु।
अधा मनो वसुदेयाय कृणुष्व ततो न उग्रो वि भजा वसूनि॥ ४॥
अश्विना। त्वा। अग्रे। मित्रावरुणा। उभा। विश्वे। देवाः[1]। मरुतः।
त्वा। ह्वयन्तु।
अध। मनः। वसुऽदेयाय। कृणुष्व। ततः। नः। उग्रः। वि। भज।
वसूनि॥ ४॥

हे राजन् त्वा त्वाम् अग्रे प्रथमम् अश्विना अश्विनौ देवौ उभा उभौ मित्रावरुणा मित्रावरुणौ च। ह्वयन्तु इति संबन्धः॥ तथा त्वा त्वा विश्वे देवाः मरुतश्च ह्वयन्तु राज्यप्रवेशं कारयन्तु॥ अध अथ राज्यप्रवेशानन्तरम्। "निपातस्य च" इति सांहितिको दीर्घः। हे राजन् मनः त्वदीयं वसुदेयाय अर्थिभ्यो धनप्रदानाय कृणुष्व कुरु। कृ-वि हिंसाकरणयोश्च। व्यत्ययेन आत्मनेपदम्। वसुदेयायेति। "अचो यत्" इति भावे यत्। "ईद्यति" इति ईकारान्तादेशः। "यतोऽनावः" इत्याद्युदात्तत्वम्। समासे कृदुत्तरपदप्रकृतिस्वरत्वम्॥ ततो न इत्यादि व्याख्यातम्॥

पञ्चमी॥

आ प्र द्रव परमस्याः परावतः शिवे ते द्यावापृथिवी उभे स्ताम्।
तद्यं राजा वरुणस्तथाह स त्वायमह्वत् स उपेदमेहि॥ ५॥
आ। प्र। द्रव। परमस्याः। पराऽवतः। शिवे इति। ते। द्यावापृथिवी इति। उभे इति। स्ताम्।

---

१ P P देवाः. We with J.

तत् । अयम् । राजा । वरुणः । तथा । आह । सः । त्वा । अयम् ।
अह्वत् । सः । उप । इदम् । आ । इहि ॥ ५ ॥

हे दूरदेशस्थित राजन् परावतः । दूरनामैतत् । परमस्याः परावतः अत्यन्तदूरदेशात् आ म द्रव स्वराष्ट्राभिमुखं शीघ्रम् आगच्छ । ऋ प-रमस्या इति । व्यत्ययेन स्याडागमः । [परावत इति ।] "उपसर्गाच्छन्द-सि धात्वर्थे" इति वतिः । अत्र अर्थग्रहणसामर्थ्यात् लिङ्गसंख्यायोगः स-मर्थितः ऋ ॥ स्वराष्ट्रं प्रविशतः ते तव उभे द्यावापृथिवी द्यावापृथि-व्यौ शिवे मङ्गलकारिण्यौ स्ताम् भवताम् । ऋ अस्तेर्लोटि तसस्ताम् । "श्नसोरल्लोपः" इति अकारलोपः ऋ ॥ तत् तस्मिन् त्वदागमनविषये अयं वरुणो राजा तथा यथा प्रागुक्तं तथा तेनैव प्रकारेण आह ब्रूते । सोयम् उक्तो[2] वरुणस्त्वा त्वाम् आह्वत् आह्वयति । ऋ ह्वयतेश्छान्दसे लुङि "लिपिसिचिह्वश्च" इति अङ् । "आतो लोप इटि च" इति आकारलोपः ऋ ॥ स वरुणेनाहूतस्त्वम् इदम् स्वराष्ट्रम् उपैहि उ-पागच्छ ॥

षष्ठी ॥

इन्द्रेन्द्र मनुष्याꣳः परेहि सं ह्यज्ञास्था वरुणैः संविदानः ।
स त्वायमह्वत् स्वे सधस्थे स देवान् यक्षत् स उ कल्पयाद् विशः ॥ ६ ॥

इन्द्रेऽइन्द्र । मनुष्याꣳः । परा । इहि । सम् । हि । अज्ञास्थाः । वरुणैः ।
समऽविदानः ।
सः । त्वा । अयम् । अह्वत् । स्वे । सधऽस्थे । सः । देवान् । यक्षत् । सः ।
ऊं इति । कल्पयात् । विशः ॥ ६ ॥

इन्द्रेन्द्र । आदरार्थं पुनर्वचनम् । हे इन्द्र परमैश्वर्ययुक्त मनुष्याः म-नुष्यान् अस्मान् । ऋ शसो नत्वाभावश्छान्दसः ऋ । यद्वा मनो-रपत्यभूताः प्रजाः प्रति परेहि आगच्छ । हि यस्मात् कारणात् हे इ-

१ P P[2] J K अह! We with the Saṁhitâ and Sâyaṇa.

1 S'Kd तदागम°. 2 S'Kd उष्णो for उक्तो.

न्द्र त्वं वरुणैः वरुणेन संविदानः ऐकमत्यं प्राप्तः। पूजायां बहुवचनम। सम् अज्ञास्थाः एतदाह्वानविषये समानज्ञानवान् असि। तस्माद् आगच्छेति संबन्धः। ज्ञा अवबोधने। अस्मात् लुङि "संप्रतिभ्याम् अनाध्याने" इत्यात्मनेपदम॥ सोयं वरुणेन ऐकमत्यं प्राप्त इन्द्रः हे राजन् त्वा त्वाम् अह्वत् आह्वयति। ततः स्वराष्ट्रं प्रविशेति शेषः॥ प्रविश्य च स्वे स्वकीये सधस्थे सहस्थाने स्वराष्ट्रे। सहशब्दोपपदात् तिष्ठतेरधिकरणे कः। "सध मादस्थयोश्छन्दसि" इति सहस्य सधादेशः। तत्र वर्तमानः स राजा देवान् इन्द्रादीन् यक्षत् यजतु। यजेर्लेटि अडागमः। "सिब्बहुलम०" इति सिप्॥ स उ स एव राजा विशः प्रजाः कल्पयात् स्वस्वव्यापारेषु कल्पयतु नियुङ्क्ताम्। कल्पयतेर्लेटि आडागमः॥

सप्तमी॥

पथ्या॑ रे॒वतीॅर्बहुधा विरू॑पाः सर्वाः॑ सं॒गत्य॒ वरीॅयस्ते अक्रन्।
तास्त्वा॒ सर्वाः॑ संविदा॒ना ह्व॑यन्तु दश॒मीमु॒ग्रः सु॒मना॑ वशे॒ह॑ ॥ ७ ॥

पथ्या॑ऽइ॒ति॒ पथ्याः॑। रे॒वतीः॑। बहुऽधा। विऽरू॑पाः। सर्वाः॑। सम्ऽगत्य॑। वरीॅयः। ते॒। अक्रन्।
ताः। त्वा॒। सर्वाः॑। सम्ऽविदा॒नाः॑। ह्व॒य॒न्तु॒। द॒श॒मीम्। उ॒ग्रः। सु॒ऽमनाः॑। व॒श॒। इ॒ह॒॥ ७॥

रेवतीः रैमत्यः धनवत्यः। "छन्दसीरः" इति मतुपो वत्वम। "रयेर्मतौ बहुलम्" इति संप्रसारणम। पररूपत्वम। गुणः। "रेशब्दान्मतुप उदात्तत्वं वक्तव्यम्" इति मतुप उदात्तत्वम। "वा छन्दसि" इति पूर्वसवर्णदीर्घः। पथ्याः पथोऽनपेताः मार्गहितकारिण्यः एतत्संज्ञा देवताः। "धर्मपथ्यर्थन्यायाद् अनपेते" इति यत्। यद्वा पथ्याः पथि साधवः। छान्दसो यत्। रेवतीः

१ V K वसेह, though both recognise वशेह as a variant. २ K वस. We with P $\overset{2}{P}$ J.

1 S' Kd परपूर्वत्वं.

आपः । तदभिमानिन्यो देवताः । "आपो वै रेवतीः" [तै० ब्रा० ३.२.८.२] इति श्रुतेः । ता विशेष्यन्ते । बहुधा बहुप्रकारं वर्तमाना विरूपाः विविधाकाराः एवंविधा याः सन्ति ताः सर्वाः संगत्य संभूय हे राजन् ते तव वरीयः उरुतरं श्रेयः अक्रन् कुर्वन्तु । ॥ वरीय इति । उरुशब्दाद् ईयसुनि "प्रियस्थिर०" इत्यादिना वरादेशः । अक्रन्निति । करोतेर्लुङि "मन्त्रे घस०" इति च्लेर्लुक् ॥ । हे राजन् ताः सर्वा देवताः संविदानाः ऐकमत्यं प्राप्ताः सत्यः [त्वा] ह्वयन्तु त्वां राष्ट्रप्रवेशार्थम् आह्वयन्तु । ताभिराहूतः इह अस्मिन् राष्ट्रे उग्रः उद्गूर्णबलस्त्वं सुमनाः संतुष्टमनाः सन् दशमीम् नवतिसंवत्सरोर्ध्वभाविनीं वर्षदशकात्मिकां चरमावस्थाम् । ॥ अत्यन्तसंयोगे द्वितीया ॥ । तावत्पर्यन्तं वस[*] निवस । जरापर्यन्तं स्वकीयं राज्यं निष्कण्टकं भुङ्क्ष्वेत्यर्थः ॥

इति तृतीयकाण्डे प्रथमेनुवाके चतुर्थं सूक्तम् ॥

"आयमगन् पर्णमणिः" इत्यनेन सूक्तेन तेजोबलायुर्धनादिपुष्टये पलाशवृक्षमणिं वासितं कृत्वा संपात्य अभिमन्त्र्य बध्नीयात् । तथा च सूत्रम् । "आयमगन्[३.५] अयं प्रतिसरः[८.५] अयं मे वरणः[१०.३] अरातीयोः[१०.६] इति मन्त्रोक्तान् वासितान् बध्नाति" इति [कौ० ३.२] ॥ उक्तो[2] वासितशब्दार्थः ॥

तथा "आङ्गिरसीं संपत्कामस्य" इति [न० क० १७] विहितायां महाशान्तौ पलाशमणिबन्धनेपि एतत् सूक्तम् । उक्तं नक्षत्रकल्पे । "आयमगन्निति मन्त्रोक्तम् आङ्गिरस्याम्" इति [न० क० १९] ॥

तत्र प्रथमा ॥

आयमगन् पर्णमणिर्बली बलेन प्रमृणन्त्सपत्नान् ।
ओजो देवानां पय ओषधीनां वर्चसा मा जिन्वत्वप्रयावन् ॥ १ ॥

आ । अयम् । अगन् । पर्णऽमणिः । बली । बलेन । प्रऽमृणन् । सऽपत्नान् ।

---

1 S′Kd °वास. 2 See Sâyaṇa's preface to I. 9.

ओजः। देवानाम्। पयः। ओषधीनाम्। वर्चसा। मा। जिन्वतु।
अग्नयावन्॥ १॥

अयम् अस्मदादिभिः संपदर्थं धियमाणः पर्णमणिः। पर्णः पलाशवृक्षः सोमपर्णोद्भूतत्वात् "सोयं पर्णः सोमपर्णाद्धि जातः" [तै० ब्रा० १. २. १. ६] इति श्रुतेः। आगन् आगच्छतु। किंविधः। बली अतिशयितबलवान्। अभिमतफलं दातुं समर्थ इत्यर्थः। अत एव बलेन स्वकीयेन सामर्थ्यातिशयेन सपत्नान् शत्रून् प्रमृणन् प्रकर्षेण हिंसन्। आगच्छतु इति संबन्धः। पुनस्तमेव विशिनष्टि। देवानाम् इन्द्रादीनाम् ओजः बलरूपः तथा ओषधीनाम् सर्वासां पयः सारभूतः। ओषधिसारसोमजन्यत्वात्। एवंलक्षणः पर्णमणिः अग्नयावन् अग्नयावा मां विहाय अनपगन्ता सन् [मा] मां वर्चसा तेजसा जिन्वतु प्रीणयतु। तेजस्विनं करोतु इत्यर्थः। ॥ हिवि दिवि धिवि [जिवि] प्रीणनार्थाः। इदित्त्वाद् नुम्। अग्नयावन्निति। यातेर्वनिप्। "सुपां सुलुक्०" इति सोर्लुक्। नलोपाभावश्छान्दसः॥। यद्वा हे अग्नयावन् अग्नयातः सर्वदा धार्यमाण। ॥ "न ङिसंबुद्ध्योः" इति नलोपाभावः॥ हे मणे मा मां तेजसा जिन्वतु। ॥ पुरुषव्यत्ययः॥। जिन्वेत्यर्थः॥

द्वितीया॥

मयि क्षत्रं पर्णमणे मयि धारयताद् रयिम्।
अहं राष्ट्रस्याभीवर्गे निजो भूयासमुत्तमः॥ २॥

मयि। क्षत्रम्। पर्णऽमणे। मयि। धारयतात्। रयिम्।
अहम्। राष्ट्रस्य। अभिऽवर्गे। निऽजः। भूयासम्। उत्ऽतमः॥ २॥

हे पर्णमणे पलाशनिर्मितमणे[1] क्षत्रम्। बलनामैतत्। बलं क्षत्रियजाति[2] वा मयि मणिधारके धारयतात् धारय स्थापय॥ तथा रयिम् धनं च [मयि] धारयतात्। ॥ धारयतेर्हेस्तातङ् आदेशः॥ ॥ अहं च त्वद्धारणाद् राष्ट्रस्य राज्यस्य अभीवर्गे आवर्जने[3] स्वाधीनीकरणे निजः अ-

1 S′Kd पालाश°. 2 S′Kd °जातिर्वा. 3 S′Kd मावर्जने for आवर्जने.

नन्यसहायः उत्तमः उत्कृष्टतमो भूयासम् । स्वबाहुबलेनैव सर्वं राष्ट्रं वशीकृत्य सर्वश्रेष्ठो भवानीत्यर्थः । अभीवर्गे इति । अभिपूर्वाद् वृजेर्भावे घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति दीर्घः । उत्तम इति । "उत्तमशश्वत्तमौ सर्वत्र" इति उञ्छादिषु पाठाद् अन्तोदात्तः ॥

तृतीया ॥

यं निद्धुर्वनस्पतौ गुह्यं देवाः प्रियं मणिम् ।
तमस्मभ्यं सहायुषा देवा ददतु भर्तवे ॥ ३ ॥

यम् । निऽद्धुः । वनस्पतौ । गुह्यम् । देवाः । प्रियम् । मणिम् ।
तम् । अस्मभ्यम् । सह । आयुषा । देवाः । ददतु । भर्तवे ॥ ३ ॥

देवाः इन्द्राद्या यम् अभीष्टफलदत्वेन प्रसिद्धम् अत एव प्रियम् प्रियंकरं गुह्यम् गोपनीयं मणिं वनस्पतौ पलाशवृक्षे निदधुः निहितवन्तः । वनानां पतिर्वनस्पतिः । पारस्करादित्वात् सुट् । "उभे वनस्पत्यादिषु युगपत्" इत्युभयपदप्रकृतिस्वरत्वम् । गुह्यम् इति । गुहू संवरणे इत्यस्मात् "शंसिगुहिदुहिभ्यो वेति वक्तव्यम्" इति क्यप् । तम् तथाविधं मणिम् अस्मभ्यं भर्तवे भरणाय । तुमर्थे तवेन् प्रत्ययः । आयुषा सह देवाः ददतु प्रयच्छन्तु । डुदाञ् दाने इत्यस्मात् "अदभ्यस्तात्" इति झस्य अदादेशः ॥

चतुर्थी ॥

सोमस्य पर्णः सहः उग्रमाग्निन्द्रेण दत्तो वरुणेन शिष्टः ।
तं प्रियासं बहु रोचमानो दीर्घायुत्वाय शतशारदाय ॥ ४ ॥

सोमस्य । पर्णः । सहः । उग्रम् । आ । अग्न् । इन्द्रेण । दत्तः । वरुणेन । शिष्टः ।
तम् । प्रियासम् । बहु । रोचमानः । दीर्घायुऽत्वाय । शतऽशारदाय ॥ ४ ॥

सोमस्य द्युलोकस्थायाः सोमलतायाः पर्णः आहरणसमये भूमौ पतितपर्णाद् उद्भूतः । श्रूयते हि "तृतीयस्याम् इतो दिवि सोम आसीत् । तं

"गायत्र्याहरत्। तस्य पर्णम् अच्छिद्यत। तत् पर्णोंभवत्। तत् पर्णस्य "पर्णत्वम्" [तै० सं० ३. ५. ७. १] इति। उग्रम् उद्गूर्णं प्रभूतं सहः पराभिभवनक्षमं बलम् उक्तलक्षणबलरूपः एवंलक्षणो मणिः आगन् माम् आगच्छतु। कथंभूतः। इन्द्रेण देवेन दत्तः वरुणेन शिष्टः अनुशिष्टः अनुज्ञातः। तम् उक्तलक्षणं पर्णमणिम् बहु बहुविधं रोचमानः रोचमानम्। द्वितीयायाः "सुपां सुलुक्०" इति सुः। मणिं प्रियासम् भ्रियासं धारयेयम्। किमर्थम्। शतशारदाय शतसंवत्सरपरिमिताय दीर्घायुत्वाय चिरकालजीवनाय। दीर्घायुत्वायेति पदम् "दीर्घायुत्वाय बृहते रणाय" [२. ४. १] इत्यत्र व्याख्यातम्। शरदेव शारदम्। प्रज्ञादेराकृतिगणत्वात् स्वार्थिकः अण्। यद्वा शरदः ऋतोः संबन्धी शारदः संवत्सरः। "तस्येदम्" इति अण्। उभयत्र बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

पञ्चमी ॥

आ मारुक्षत् पर्णमणिर्मह्या अरिष्टतातये।
यथाहमुत्तरोसान्यर्यम्ण उत संविदः ॥ ५ ॥

आ। मा। अरुक्षत्। पर्णऽमणिः। मह्यै। अरिष्टऽतातये।
यथा। अहम्। उत्तरः। असानि। अर्यम्णः। उत। सम्ऽविदः ॥ ५ ॥

अयं पर्णमणिः मह्यै महत्यै अरिष्टतातये। रिष्टं हिंसनम् तदभावः अरिष्टम्। तत्क्रियायै। "शिवशमरिष्टस्य करे" इति अरिष्टशब्दात् करोत्यर्थे तातिल् प्रत्ययः। "लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वम्। मा माम् आरुक्षत् आरोहतु मयि चिरं वर्ततताम्। रुहेश्छान्दसे लुङि "शल इगुपधाद् अनिटः क्सः" इति क्सप्रत्ययः। अर्यम्णः। अरीन् यमयतीति अर्यमा अधिकबलः पुरुप्रदाता च। अर्यमा अधिकधनः। "यः खलु वै ददाति सोर्यमा" [तै० सं० २. ३. ४. १] इति श्रुतेः। तस्माद् अधिकात् उत अपि च संविदः समानज्ञानात्। समबलाद् इत्यर्थः। तस्माद् यथा येन प्रकारेण अहम् मणि-

1 So S'Kd. The vaidika reading is गायत्रिया°.

धारकः उत्तरः उत्कृष्टतरः असानि भवानि । तथा आरुक्षत् इति संबन्धः । अस्तेर्लोटि "आडुत्तमस्य पिच्च" इति आडागमः । अर्यम्ण इति । "अल्लोपोऽनः" इत्यकारलोपे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम ॥

षष्ठी ॥

ये धीवानो रथकारा१ः कर्मारा ये मनीषिणः ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान् ॥ ६ ॥
ये । धीवानः । रथऽकाराः । कर्मारः । ये । मनीषिणः ।
उपऽस्तीन् । पर्ण । मह्यम् । त्वम् । सर्वान् । कृणु । अभितः । जनान् ॥ ६ ॥

ये धीवानः धीवराः मात्स्यिकाः[1] । दधातेः कनिपि "घुमास्था०" इत्यादिना ईत्वम । ये च रथकाराः रथनिर्मातारो जातिविशेषाः । उक्तं हि ।

रथकारस्तु माहिष्यात् करण्यां यस्य संभवः

इति [अमरः] । वैश्यायां क्षत्रियाद् उत्पन्नो माहिष्यः[2] । शूद्रायां वैश्याद् उत्पन्ना करणी । ये कर्माराः अयस्कारप्रभृतयः ये च मनीषिणः मनस ईशितारो बुद्धिविशेषोपजीविनः । हे पर्ण तद्विकार मणे त्वम । विकारे प्रकृतिशब्दः । सर्वान् उक्तोपलक्षितान् जनान् मह्यम । षष्ठ्यर्थे चतुर्थी । मम अभितः सर्वतः उपस्तीन् सेवार्थं समीपे विद्यमानान् उपासीनान् वा कृणु कुरु । उपपूर्वाद् अस्तेः कर्तरि क्तिच् । "छन्दस्युभयथा" इति सार्वधातुकत्वाद् भूभावाभावः । अल्लोपश्च । आसेर्वा । आदिलोपश्छान्दसः ॥

सप्तमी ॥

ये राजानो राजकृतः सूता ग्रामण्यश्च ये ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान् ॥ ७ ॥
ये । राजानः । राजऽकृतः । सूताः । ग्रामण्यः । च । ये ।

---

१ B Bp रथकारा कर्मा°. We with A B[h] D K K[m] R S[m] P P[2] J V.

---

1 S' Kd मात्सिकाः. 2 S' Kd उत्पन्ना माहिषी for उत्पन्नो माहिष्यः.

उपऽस्तीन्। पर्ण। मह्यम्। त्वम्। सर्वान्। कृणु। अभितः। जनान् ॥ ७ ॥

ये राजानः अन्यदेशाधिपा राजकृतः राजानं कुर्वन्ति राज्ये अभिषिञ्चन्तीति राजकृतः सचिवाः सूताः। ब्राह्मण्यां क्षत्रियाद् उत्पन्नः सूतः। तज्जातीयाः सारथ्योपजीविनो वा। ये [च] ग्रामण्यः ग्रामस्य नेतारः। ॥ "सत्सूद्विष॰" इति क्विप्। "एरनेकाचः॰" इति यण् ॥ ॥ उपस्तीन् इत्यादि पूर्ववद् योज्यम् ॥

अष्टमी ॥

पर्णोऽसि तनूपानः सयोनिर्वीरो वीरेण मया।
संवत्सरस्य तेजसा तेन बध्नामि त्वा मणे ॥ ८ ॥

पर्णः। असि। तनूऽपानः। सऽयोनिः। वीरः। वीरेण। मया। समऽवत्सरस्य। तेजसा। तेन। बध्नामि। त्वा। मणे ॥ ८ ॥

हे मणे त्वं पर्णोसि अमृतमयस्य[2] सोमस्य पर्णविकारोसि ॥ अत एव तनूपानः तन्वाः[3] शरीरस्य पाता रक्षितासि ॥ वीरः वीरस्त्वं वीरेण वीर्यवता मया सयोनिः वीर्यवत्त्वकारणेन[4] समानजन्मासि ॥ तेन उक्तेन कारणेन संवत्सरस्य एतदुपलक्षितकालभेदनिर्वाहकस्य आदित्यस्य तेजसा युक्तं त्वा त्वां बध्नामि धारयामि त्वदीयतेजोवाप्तये धारयामि ॥

इति तृतीयकाण्डे प्रथमानुवाके पञ्चमं सूक्तम् ॥

[इति] प्रथमोनुवाकः ॥

द्वितीयेनुवाके पञ्च सूक्तानि। "तत्र पुमान् पुंसः" इति प्रथमं सूक्तम्। तेन अभिचारकर्मणि खदिरोत्थाश्वत्थमणिं संपात्य अभिमन्त्र्य बध्नीयात् ॥

तथा अनेन सूक्तेन पाशान् इङ्गिडालंकृतान् संपात्य अभिमन्त्र्य शत्रुमर्मणि निखनेत् ॥

तथैव अनेन सूक्तेन पूर्ववत् पाशान् अभिमन्त्र्य "तेधराञ्चः [७]" इत्यृचा नदीप्रवाहे प्रक्षिपेत् ॥

---

1 S′ Kd कृताः. 2 S′ Kd अकृत॰. 3 S′ Kd तन्वः. 4 S′ Kd °वत्त्वाकारेण.

एवमेव पूर्ववद् अभिमन्त्रितान् पाशान् "प्रैणान्नुदे" [८] इति ऋचा अश्वत्थशाखया प्रणुदेत् ॥

[सूत्रितं हि । "पुमान् पुंस इति मन्त्रोक्तम् अभिहुतालंकृतं बभ्राति "यावन्तः सपत्नास्तावन्तः पाशान् इङ्गिडालंकृतान् संपातवतोनूक्तान् ससू- "त्रांश्चम्वा मर्मणि निखनति नावि 'प्रैणान्' ८ 'नुदस्व काम' ९.२.४ "इति मन्त्रोक्तं शाखया प्रणुदति 'तेधराञ्चः' ७ इति प्रस्रावयति" इति । कौ० ६.२]

तथा "अभिचरतः अभिचर्यमाणस्य च" इति [न०क०१७] विहितायां महाशान्तौ मणिबन्धनेपि एतत् सूक्तम् । तद् उक्तं नक्षत्रकल्पे । "आ- ङ्गिरस्यां पुमान् पुंस इति मन्त्रोक्तम् अभिचरतोभिचर्यमाणस्य च" इति [न०क०१९] ॥

तत्र प्रथमा ॥

पुमान् पुंसः परिजातोश्वत्थः खदिरादधि ।
स हन्तु शत्रून् मामकान् यानहं द्वेष्मि ये च माम् ॥ १ ॥

पुमान् । पुंसः । परिऽजातः । अश्वत्थः । खदिरात् । अधि ।
सः । हन्तु । शत्रून् । मामकान् । यान् । अहम् । द्वेष्मि । ये । च ।
माम् ॥ १ ॥

पुमान् पुंस्त्वोपेतो वीर्यातिशययुक्तो वृक्षः पुंसः तादृशाद् वृक्षात् परि- जातः प्रादुर्भूतः । एतदेव विशिनष्टि । अश्वत्थः अश्वरूपः सन् अश्नि- स्तिष्ठत्यत्रेति अश्वत्थः । श्रूयते हि । "अग्निर्देवेभ्यो निरायत[2] । अश्वो रूपं कृत्वा सोश्वत्थे संवत्सरम् अतिष्ठत् । तद् अश्वत्थस्याश्वत्थत्वम्" [तै० ब्रा०१.१.३.९] इति । अस्मादेव अग्निसंबन्धाद् अश्वत्थस्य शत्रुहननस- मर्थत्वेन पुंस्त्वव्यपदेशः । खदिराद् अधि । अधिः पञ्चम्यर्थानुवादी । ख- दिरवृक्षाद् उद्भूतः । इतरवृक्षेभ्यः खदिरस्य अतिशयितसारवत्त्वेन पुंस्त्वनि- र्देशः । तथात्वं च गायत्रीसारजत्वात् । श्रूयते हि । "वषट्कारो वै गा-

1 So S'Kd, *Kausika*, Kes'ava, and Dârila. 2 So S'Kd. The vaidika reading is निलायत.

"यज्ञ्यै शिरोच्छिनत्। तस्यै रसः परापतत्। स पृथिवीं प्राविशत्। स ख-
"दिरोभवत्" [तै० सं० ३. ५. ७. १] इति। स खदिरोत्पन्नोश्वत्थो मणिरू-
पेण धार्यमाणः मामकान् मदीयान् शत्रून् शातयितॄन् हन्तु हिनस्तु।
तानेव शत्रून् विशिनष्टि। अहं यान् शत्रून् द्वेष्मि अपकारकारिणो द्वे-
ष्मि ये च शत्रवो माम्। द्विषन्तीति विपरिणामेन संबन्धः। तान् उभ-
यविधान् हन्तु इति संबन्धः॥

द्वितीया॥

तानश्वत्थ निः शृणीहि शत्रून् वैबाधदोधतः।
इन्द्रेण वृत्रघ्ना मेदी मित्रेण वरुणेन च॥ २॥

तान्। अश्वत्थ। निः। शृणीहि। शत्रून्। वैबाधऽदोधतः।
इन्द्रेण। वृत्रऽघ्ना। मेदी। मित्रेण। वरुणेन। च॥ २॥

हे वैबाध*। विविधं बाधते कण्टकैरिति विबाधः खदिरः। तत्रोत्पन्नो
वैबाधः। ⁂"तत्र जातः" इत्यण्⁂। तादृश अश्वत्थ तद्वि-
कारमणे। ⁂विकारे प्रकृतिशब्दः⁂। दोधतः भृशं कम्पयि-
तॄन्। ⁂धूञो यङ्लुगन्तात् शतरि अन्त्यलोपश्छान्दसः। "अभ्यस्ता-
नाम् आदिः" इत्याद्युदात्तत्वम्⁂। ईदृशान् तान् उक्तान् विवि-
धान् शत्रून् निः शृणीहि निःशेषं घातय। ⁂शॄ हिंसायाम्। क्या-
दिः। प्वादित्वात् ह्रस्वत्वम्⁂॥ मणेः शत्रुहननसामर्थ्यं दर्शयति इ-
न्द्रेणेत्यादिना। वृत्रघ्ना वृत्राख्यम् असुरं हतवता। ⁂हन्तेः "व्रह्मभ्रू-
णवृत्रेषु क्विप्" इति भूते काले क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वे अल्लोपे
"अनुदात्तस्य च यत्रोदात्तलोपः" इति विभक्तेरुदात्तत्वम्⁂। तादृ-
शेन इन्द्रेण मित्रेण वरुणेन च मेदी स्नेही। इन्द्रादिभिः शत्रुहननसाम-
र्थ्यं सारम् आपादितोयम् आश्वत्थो मणिरित्यर्थः। ⁂जिमिदा स्ने-
हे। ग्रहादित्वाद् णिनिः। घञन्ताद् वा मत्वर्थीय इनिः⁂॥

---

१ B सृंणीहि. We with A B D K K R S P P J V. २ So P P J and K.

---

1 So S' Kd. The vaidika reading is गायत्र्यै.

तृतीया ॥

यथाश्वत्थ निरभनोन्तर्महत्यर्णवे ।
एवा तान्त्सर्वान्निर्भिङ्ग्धि यानहं द्वेष्मि ये च माम् ॥ ३ ॥

यथा । अश्वत्थ । निःऽअभनः । अन्तः । महति । अर्णवे ।
एव । तान् । सर्वान् । निः । भिङ्ग्धि । यान् । अहम् । द्वेष्मि । ये । च ।
माम ॥ ३ ॥

हे अश्वत्थ मण्युपादानभूत वृक्ष महति विस्तीर्णे अर्णवे अन्तरिक्षे । "असिन् महत्यर्णवेन्तरिक्षे" [तै० सं० ४. ५. ११. १] इति लिङ्गाद् महार्णवः अन्तरिक्षम । तत्र अन्तः मध्ये अन्तःखदिरकोटरे यथा येन प्रकारेण निरभिनः निर्भिद्य उत्पन्नोसि । भिदिर् विदारणे । अस्मात् लङि हल्ङ्यादिना सिपो लोपे "दश्च" इति रुत्वम । एव एवं तान् वक्ष्यमाणान् उभयविधान् सर्वान् शत्रून् निर्भिन्ङ्धि निःशेषेण विदारय । भिदेर्लोटि "हुझल्भ्यः०" इति हेर्धिरादेशः । "श्नसोरल्लोपः" इत्यकारलोपः । "झरो झरि सवर्णे" इति दकारलोपः ॥ यान् अहम् इत्यादि गतम् ॥

चतुर्थी ॥

यः सहमानश्चरसि सासहान इव ऋषभः ।
तेनाश्वत्थ त्वया वयं सपत्नान्त्सहिषीमहि ॥ ४ ॥

यः । सहमानः । चरसि । ससहानःऽइव । ऋषभः ।
तेन । अश्वत्थ । त्वया । वयम । सऽपत्नान् । सहिषीमहि ॥ ४ ॥

यः अश्वत्थः सहमानः परान् अभिभवन् चरति वर्तते । किमिव । सासहानः स्वकीयेन दर्पेण सजातीयान् अन्यान् अत्यर्थम् अभिभवन् ऋ-

---

१ KBᵖ निरभिन्नो (!). We with ABBDKRSPPJV. २ ADK °महत्यर्णवे; PJ महति. We with BRSPV. ३ D °निर्भिङ्ग्धि; KV °निर्भिन्द्धि; ABKRSPPJ °निर्भिङ्ग्धि. ४ K निःऽअभिन्नः We with PPJ. ५ PJ महति. ६ PPJ भिङ्ग्धि. ७ KV °श्चरति. We with ABBᵖBDKRSPPJ. ८ K चरति.

षभ इव। ॥ सहेर्यङुगन्तात् लटः शानच् ॥। हे अश्वत्थ तेन उक्तलक्षणेन त्वया वयम् त्वद्विकारभूतमणिधारकाः सपत्नान् शत्रून् सहिषीमहि सहामहै। नाशयाम इत्यर्थः। ॥ सहेराशीर्लिङि रूपम् ॥ ॥

पञ्चमी ॥

सिनात्वेनान् निर्ऋतिर्मृत्योः पाशैरमोक्यैः।
अश्वत्थ शत्रून् मामकान् यानहं द्वेष्मि ये च माम् ॥ ५ ॥

सिनातु। एनान्। निःऽऋतिः। मृत्योः। पाशैः। अमोक्यैः।
अश्वत्थ। शत्रून्। मामकान्। यान्। अहम्। द्वेष्मि। ये। च।
माम् ॥ ५ ॥

निर्ऋतिः पापदेवता अमोक्यैः सर्वथा मोक्तुम् अशक्यैः। ॥ "कृत्याश्च" "शकि लिङ् च" इति शक्यार्थे मुचेर्ण्यत् प्रत्ययः। "चजोः कु घिण्ण्यतोः" इति कुत्वम ॥। तथाविधैर्मृत्योः पाशैः प्राणापहर्तृभिर्दामभिः [एनान् उक्तान् शत्रून्] सिनातु बध्नातु। ॥ षिञ् बन्धने। क्र्यादिः ॥ ॥ अश्वत्थ शत्रून् इत्यादि व्याख्यातम् ॥

षष्ठी ॥

यथाश्वत्थ वानस्पत्यानारोहन् कृणुषेधरान्।
एवा मे शत्रोर्मूर्धानं विष्वग् भिन्द्धि सहस्व च ॥ ६ ॥

यथा। अश्वत्थ। वानस्पत्यान्। आऽरोहन्। कृणुषे। अधरान्।
एव। मे। शत्रोः। मूर्धानम्। विष्वक्। भिन्द्धि। सहस्व। च ॥ ६ ॥

हे अश्वत्थ [यथा] त्वं वानस्पत्यान्। अत्र वनस्पतिप्ररोहाहों देशो वनस्पतिशब्देनोच्यते। तत्र भवा वानस्पत्याः। ॥ "दित्यदित्यादित्य०" इति भवार्थे ण्यः। यद्वा समूहार्थे ण्यः ॥। तान् वृक्षान् आरोहन् अधरान् नीचान् कृणुषे करोषि। एव एवं मे मदीयस्य शत्रोर्मूर्धानं शिरो विष्वक् सर्वतो भिन्द्धि विदारय। तथा सहस्व च अभिभव। विनाशयेत्यर्थः ॥

सप्तमी ॥

[1]तेऽधराञ्चः प्र स्रवन्तां छिन्ना नौरिव बन्धनात् ।
न वैबाधप्रणुत्तानां पुनरस्ति निवर्तनम् ॥ ७ ॥

ते । अधराञ्चः । प्र । स्रवन्ताम् । छिन्ना । नौःऽइव । बन्धनात् ।
न । वैबाधऽप्रनुत्तानाम् । पुनः । अस्ति । निऽवर्तनम् ॥ ७ ॥

ते पूर्वोक्ता द्विविधाः शत्रवः अधराञ्चः अधोमुखम् अञ्चन्तो गच्छन्तः प्र स्रवन्ताम् नदीप्रवाहस्य उपर्येव गच्छन्तु । न कदाचित् पारं प्राप्नुवन्तु इत्यर्थः । ☒ अधरशब्दोपपदाद् अञ्चतेः क्विन् । स्रवन्ताम् इति । च्युङ् स्रुङ् गतौ । भ्वादिः ☒ । तत्र दृष्टान्तः । बन्धनात् । बध्यते-स्मिन्निति बन्धनं तीरवृक्षादिकम् बध्नात्यनेन नावम् इति [वा] बन्धनं रज्जुः । ततश्छिन्ना वियुक्ता नौरिव । सा यथा तीरम् अप्राप्ता नदी-प्रवाहेण[2] अधो नीयते तद्वत् ॥ अश्वत्थस्य महिमप्रख्यापनार्थं पारप्राप्ति-शङ्कां वारयति नेति । वैबाधप्रणुत्तानाम् वैबाधः खदिरोत्पन्नोश्वत्थः तेन प्रणुत्तानां प्रणुन्नानाम् अवाङ्मुखं प्रेरितानां शत्रूणां पुनर्निवर्तनम् पुन-रागमनं नास्ति । ☒ "नुदविदोन्दत्राघ्राह्वीभ्योन्यतरस्याम्" इति वि-कल्पनाद् निष्ठानत्वाभावः ☒ ॥

अष्टमी ॥

प्रैणान् नुदे मनसा प्र चित्तेनोत ब्रह्मणा ।
प्रैणान् वृक्षस्य शाखयाश्वत्थस्य नुदामहे ॥ ८ ॥

प्र । एनान् । नुदे । मनसा । प्र । चित्तेन । उत । ब्रह्मणा ।
प्र । एनान् । वृक्षस्य । शाखया । अश्वत्थस्य । नुदामहे ॥ ८ ॥

एनान् प्रागुक्तान् शत्रून् मनसा शत्रुनिरसनविषयज्ञानवता अन्तःकर-णेन प्र णुदे स्थानाद् उच्चाटयामि ॥ चित्तेन मन्त्रार्थचिन्तनपरेण मनो-वृत्तिविशेषेण प्र णुदे ॥ उत अपि च ब्रह्मणा मन्त्रेण अभिमन्त्रितया

---

१ B[h] तेधु changed to तेधुः; A R तेधु°. We with D K K[m] S[m] V. २ B[h] चित्तैनो°.

---

1 S′ Kd insert तव before अधर°. 2 S′ Kd °प्रवाहेवाधो for °प्रवाहेण अधो.

अश्वत्थस्य वृक्षस्य शत्रुव्रश्चनसाधनस्य शाखया एनान् शत्रून् प्र णुदामहे। ☒ नुद प्रेरणे। तुदादिः। स्वरितेत्त्वाद् आत्मनेपदम् ☒ ॥

इति तृतीयकाण्डे द्वितीयेनुवाके प्रथमं सूक्तम् ॥

"हरिणस्य" इति सूक्तेन क्षेत्रियव्याधिभैषज्ये हरिणशृङ्गमणेर्बन्धनम् तच्छृङ्गसहितोदकपायनम् हरिणचर्मणः शङ्कुच्छिद्रभागं प्रज्वाल्य उदके प्रक्षिप्य तेनोदकेन उषःकाले[1] व्याधितस्यावसेचनम् यवहोमम् अभिमन्त्रितभक्तभक्षणं च कुर्यात्। तद् उक्तं संहिताविधौ। "हरिणस्येति बन्धनपायनाचमनानि[2] शङ्कुधानज्वालेनापनक्षत्रेवसिञ्चति[3]" इत्यादि [कौ०४.३]। अपनक्षत्रे[4] उषःकाले इत्यर्थः ॥

"कौमारीं व्याधितस्य बालस्य" इति [न०क०१७] विहितायां कौमार्याख्यायां महाशान्तौ हरिणविषाणाग्रे मणिबन्धनेपि एतत् सूक्तम्। [तद् उक्तं] नक्षत्रकल्पे। "हरिणस्येति विषाणाग्रं कौमार्याम्" इति [न०क०१९] ॥

तत्र प्रथमा ॥

हरिणस्य रघुष्यदोधि शीर्षणि भेषजम्।
स क्षेत्रियं विषाणया विषूचीनमनीनशत् ॥ १ ॥

हरिणस्य। रघुऽस्यदः। अधि। शीर्षणि। भेषजम्।
सः। क्षेत्रियम्। विऽसानया। विषूचीनम्। अनीनशत् ॥ १ ॥

रघुष्यदः रघु लघु शीघ्रं स्यन्दते गच्छतीति रघुष्यत्। ☒ स्यन्देः क्विप्। "अनिदिताम्०" इति नलोपः। "वालमूल०" इत्यादिना रघोर्लत्वविकल्पः ☒। तथाविधस्य हरिणस्य कृष्णमृगस्य अधि शीर्षणि शिरसि। अधिः सप्तम्यर्थानुवादी। ☒ "शीर्षश्छन्दसि" इति सप्तम्यां शीर्षन्नादेशः ☒। भेषजम् रोगनिवर्तकं शृङ्गरूपम् औषधम् अस्ति। सः हरिणः विषाणया स्वशृङ्गेण क्षेत्रियम् परक्षेत्रे चिकित्स्यं मातापितृशरीराद् आगतं क्षयकुष्ठापस्मारादिकं विषूचीनम् विष्वक् सर्वतः अनीनशत्

1 S′Kd °काले. 2 So S′Kd. *Kauśika* and his commentator Dârila (and Keśava too?) °पायनाचमनशंकु°. 3 S′Kd °धीनज्वा°. 4 *Kauśika*: °नावनक्षत्रे°.

नाशयतु । ॥ विषुपूर्वाद् अञ्चतेः क्विन् । "अनिदिताम्°" इति नलोपः । "विभाषाञ्चेरदिक् स्त्रियाम्" इति स्वार्थिकः खः । "अचः" इत्यकारलोपे "चौ" इति दीर्घः ॥ ॥

द्वितीया ॥

अनु॑ त्वा हरि॒णो वृषा॑ प॒द्भिश्चतु॒र्भिर॑क्रमीत् ।
विषा॑णे॒ वि ष्य गुप्ति॑तं यद॑स्य क्षेत्रि॒यं हृ॒दि ॥ २ ॥

अनु॑ । त्वा । हरि॒णः । वृषा॑ । प॒त्ऽभिः । चतुः॒ऽभिः । अक्रमीत् ॥
विऽसा॑ने । वि । स्य॒ । गुप्ति॑तम् । यत् । अ॒स्य॒ । क्षेत्रि॒यम् । हृ॒दि ॥ २ ॥

हे विषाणे क्षेत्रियरोगविनाशनाय मणिरूपेण धृतां त्वा[1] त्वाम् अनु वृषा सेचनसमर्थो युवा हरिणः मृगः चतुर्भिः पद्भिः पादैः अक्रमीत् आक्रान्तवान् । क्षेत्रियरोगं पादप्रहारैः पीडितवान् इत्यर्थः ॥ त्वं च अस्य रुग्णस्य हृदि हृदये गुल्फ[*]तम् गुल्फवद् ग्रथितं यत् क्षेत्रियम् रोगजातम् अस्ति तद् वि ष्य विनाशय । ॥ षो अन्तकर्मणि । अस्मात् लोटि "ओतः श्यनि" इति ओकारलोपः ॥ ॥

तृतीया ॥

अ॒दो यद॑व॒रोच॑ते॒ चतु॑ष्पक्षमिव॒ च्छ॒दिः ।
तेन॑[3] ते॒ सर्वं॑ क्षेत्रि॒यमङ्गे॑भ्यो नाशयामसि ॥ ३ ॥

अ॒दः । यत् । अ॒व॒ऽरोच॑ते । चतु॑ष्पक्षम्ऽइव । छ॒दिः ।
तेन॑ । ते॒ । सर्व॑म् । क्षे॒त्रि॒यम् । अङ्गे॑भ्यः । ना॒श॒या॒म॒सि॒ ॥ ३ ॥

अदः चन्द्रमण्डलस्थं विप्रकृष्टं यत् हरिणरूपं वस्तु अवरोचते अवभासते । यद्वा अदः परिदृश्यमानं यद् भूमौ आस्तृतं हारिणं चर्म अवरोचते । किमिव । चतुष्पक्षम् चतुष्कोणं छदिरिव । छाद्यते अनेन गृहम् इति छदिस्तृणकटः स इव । ॥ छद अपवारणे इत्यस्माद् ण्यन्तात् अर्चि-

---

१ V K गुल्फ़ितं, though they recognise गुप्ति॒तं as a variant. We with A B[P] B $\overset{h}{B}$ D $\overset{m}{K}$ R $\overset{m}{S}$ P $\overset{2}{P}$ J. २ So We with P $\overset{2}{P}$ J. ३ Rw तेनंते. We with A B B[P] $\overset{h}{B}$ D K $\overset{m}{K}$ R $\overset{m}{S}$ V.

1 S′ Kd read this त्वा after विषाणे and before क्षेत्रिय°.

शुचिहुसृपिछादिछर्दिभ्य इसिः [उ०२.१०७] इति इसिप्रत्ययः। "इसन्तन्किषु च" इत्युपधाह्रस्वत्वम्[1]। तेन चन्द्रमण्डलस्थहरिणात्मकेन पुरोवर्तिना वा चर्मणा हे रुग्ण ते तव सर्वम् क्षयकुष्ठादिरूपेण बहुविधं क्षेत्रियम् रोगम् अङ्गेभ्यः कृत्स्नावयवेभ्यो नाशयामसि नाशयामः॥

चतुर्थी॥

अमू ये दिवि सुभगे विचृतौ नाम तारके।
वि क्षेत्रियस्य मुञ्चतामधमं पाशमुत्तमम्॥ ४॥

अमू इति। ये इति। दिवि। सुभगे इति सुऽभगे। विऽचृतौ। नाम। तारके इति।
वि। क्षेत्रियस्य। मुञ्चताम्। अधमम्। पाशम्। उत्ऽतमम्॥ ४॥

दिवि द्युलोके अमू परिदृश्यमाने सुभगे शोभनभाग्ययुक्ते ये प्रसिद्धे। विचृतौ नाम तारके इत्यादि शिष्टम् "उदगातां भगवती" इत्यत्र [२.८.१] विस्तरेण व्याख्यातम्॥

पञ्चमी॥

आप इद् वा उ भेषजीरापो अमीवचातनीः।
आपो विश्वस्य भेषजीस्तास्त्वा मुञ्चन्तु क्षेत्रियात्॥ ५॥

आपः। इत्। वै। ऊं इति। भेषजीः। आपः। अमीवऽचातनीः।
आपः। विश्वस्य। भेषजीः। ताः। त्वा। मुञ्चन्तु। क्षेत्रियात्॥ ५॥

आप इद्वै। इदित्यवधारणे। उः पूरणः। आप एव खलु भेषजीः भेषजभूताः अभिषेकपानादिना रोगापनोदनेन सुखहेतवः। "केवलमामक०" इत्यादिना भेषजशब्दाद् ङीप्। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम्। "वा छन्दसि" इति जसि पूर्वसवर्णदीर्घत्वम्[2]। तथा आप एव ओषधिरूपेण परिणताः अमीवचातनीः अमीवचातन्यः रोगाणां

१ A S[m] P[2] विवृतौ. We with B[h] D K K[m] B P J V.

1 S′ Kd °छदिभ्यइसि°. 2 S′ Kd अप° for आप°.

नाशयित्र्यः । ⁂चातयतिर्नाशने इत्युक्तम⁂ । आप एव विश्वस्य सर्वस्य रोगस्य भेषजीः । औषधान्तरवद् न कस्यचिदेव रोगस्य भेषजं किं तु सर्वेषामपीत्यर्थः । अपां भेषजरूपत्वम् अन्यत्र स्पष्टम् आम्नातम् । "अप्सु मे सोमो अब्रवीद् अन्तर्विश्वानि भेषजा" [ऋ०१.२३.२०] इति । ताः एवम् उक्तसामर्थ्योपेता आपः हे व्याधिगृहीत त्वा त्वां क्षेत्रियात् रोगाद् मुञ्चन्तु वियोजयन्तु ॥

षष्ठी ॥

यदा॑सुतेः क्रि॒यमा॑णायाः क्षेत्रि॒यं त्वा॑ व्यान॒शे ।
वेदा॒हं तस्य॑ भेष॒जं क्षे॑त्रि॒यं ना॑शयामि॒ त्वत् ॥ ६ ॥

यत् । आ॒ऽसुतेः । क्रि॒यमा॑णायाः । क्षे॒त्रि॒यम् । त्वा॒ । वि॒ऽआ॒न॒शे ।
वेद॑ । अ॒हम् । तस्य॑ । भे॒ष॒जम् । क्षे॒त्रि॒यम् । ना॒श॒या॒मि॒ । त्वत् ॥ ६ ॥

हे रुग्ण त्वा त्वां क्रियमाणायाः स्वीक्रियमाणाया आसुतेः । आसूयते आसिच्यते इत्यासुतिर्द्रवीभूतम् अन्नम् । [तस्मात् अ]यथोपयुज्यमानाद् अन्नाद् यत् क्षेत्रियं कुष्ठादिरूपं व्यानशे व्याप्नोत् । ⁂अशू व्याप्तौ । लिटि "अश्नोतेश्च" इति दीर्घीभूताद् अभ्यासाद् उत्तरस्य नुट्⁂ । तस्य उक्तलक्षणस्य रोगस्य भेषजम् निवर्तकम् औषधं यवादिरूपम् अहम् चिकित्सको वेद जानामि । ⁂"विदो लटो वा" इति उत्तमे णलि रूपम्⁂ ॥ अतः त्वत् त्वत्तः सकाशात् क्षेत्रियं नाशयामि । ⁂त्वद् इति । "पञ्चम्या अत्" ["एकवचनस्य च"] इति युष्मदुत्तरस्य ङसेरदादेशः⁂ ॥

सप्तमी ॥

अप॒वासे नक्षं॑त्राणामप॒वास॒ उषसा॑मुत ।
अपा॒स्मत् सर्वं॑ दु॒र्भूत॑मप॑ क्षे॒त्रि॒यमु॑च्छतु ॥ ७ ॥

अप॒ऽवा॒से । नक्षं॑त्राणाम् । अप॒ऽवा॒से । उ॒षसा॑म् । उ॒त ।
अप॑ । अ॒स्मत् । सर्व॑म् । दु॒ःऽभूत॑म् । अप॑ । क्षे॒त्रि॒यम् । उ॒च्छ॒तु ॥ ७ ॥

---

१ J दुः । भूतम् ।. We with P $\hat{P}^3$ though $\hat{P}^2$ once read like J.

नक्षत्राणाम् तारकाणाम् । ☒ नक्षत्राणि नक्षतेर्गतिकर्मणः इति हि यास्कः [नि॰ ३. २०] । अमिनक्षि॰ [उ॰ ३. १०५] इत्यादिना नक्ष गतौ इत्यस्माद्[1] अत्रन् प्रत्ययः ☒ । तेषाम् अपवासे अपगमनकाले उषसः प्रारम्भे । उतशब्दो विकल्पार्थे । अथ वा उषसाम् । प्रतिदिवसम् आवृत्त्यपेक्षया उषसाम् इति बहुवचननिर्देशः । तासाम् अपवासे अपँग[2]मने । प्रभातकाले इत्यर्थः । तस्मिन् क्रियमाणेन अभिषेकादिना सर्वम् निखिलं दुर्भूतम् रोगनिदानभूतं दुष्कृतम् असत् असत्तः अप उच्छत्विति संबन्धः । अपगच्छतु इत्यर्थः । ततः क्षेत्रियम् कुष्ठापस्मारादिरूपम् अप उच्छतु असत्तः अपगच्छतु । सकारणं रोगजातं निवर्तताम् इत्यर्थः । ☒ उछी विवासे ☒ ॥

[इति] तृतीयकाण्डे द्वितीयेनुवाके द्वितीयं सूक्तम् ॥

"आ यातु मित्रः" इति सूक्तेन उपनयनकर्मणि माणवकं नाभिदेशे संस्पृश्य अनुमन्त्रयेत । सूत्रितं हि । "दक्षिणेन पाणिना [नाभिदेशे] "संस्तभ्य जपति 'अस्मिन् वसु वसवो धारयन्तु'[१. ९] 'विश्वे देवा "वसवः'[१. ३०] 'आ यातु मित्रः'[३. ८] 'अमुत्र भूयात्'[७. ५५]" इत्यादि [कौ॰ ७. ६] ॥

अस्य सूक्तस्य आयुष्यगणे पाठात् "मेधाजननायुष्यैर्जुहुयात्" [कौ॰ ७. ८] इत्यादिष्वपि विनियोगो द्रष्टव्यः ॥

एवमेव नक्षत्रकल्पेपि "आयुष्यैः[3] शान्तिः स्वस्तिगण ऐरावत्याम्" [न॰ क॰ १८] इत्यादिष्वपि अस्य विनियोगः ॥

परिशिष्टेपि ।

आयुष्यश्चाभयश्चैव तथा स्वस्त्ययनो गणः [प॰ ५. ३]

इत्यादिषु च ॥

"इहेदसाथ"[४] इत्यनया विवाहे शुल्कद्रव्यं पृथक्कृत्य इदं द्रव्यं तव इदं ममेति द्वाभ्यां निवर्तयेत् । सूत्रितं हि । "इहेदसाथेत्येतया शु-

1 S′Kd इत्यत्रन् for इत्यस्माद् अत्रन्. 2 S′Kd अवगमने. 3 So S′Kd. The *Nakshatrakalpa*: आयुष्यशान्तिस्वास्तिगणः.

"ल्कम् अपाकृत्य द्वाभ्यां निर्वर्तयतीह[1] तव राध्यताम् अत्र ममेति यथा "वा मन्यन्ते" इति [कौ०१०.५] ॥

"सं वो मनांसि"[५,६] इति द्वाभ्यां सांमनस्यकर्मणि ग्राममध्ये संपातितोदकुम्भनिनयनम् त्रिवर्षवत्सिकाया गोः पिशितानां प्राशनम् संपातितान्नप्राशनम् संपातितसुरायाः पायनम् तथाविधप्रपोदकपायनं च कुर्यात् । तथा च सूत्रम् । "सं वो मनांसि[५] संज्ञानं नः[७.५४] "इति सांमनस्यान्युदकुलिजं संपातवन्तं ग्रामं परिहृत्य मध्ये निनयत्येवं[2] "सुराकुलिजं त्रिहायण्या वत्सतर्याः शुक्लानि[3] पिशितान्याशयति भक्तं सुरां "प्रपां संपातवत् करोति" इति [कौ०२.३] ॥

तत्र प्रथमा ॥

आ या॑तु मि॒त्र ऋ॒तुभि॒: कल्प॑मानः॒ सं वे॒शय॑न् पृथि॒वीमु॒स्रिया॑भिः ।
अथा॒स्मभ्यं॒ वरु॑णो वा॒युर॒ग्निर्बृ॒हद् रा॒ष्ट्रं सं॑वे॒श्यं॑ दधातु ॥ १ ॥

आ । या॒तु । मि॒त्रः । ऋ॒तुऽभिः । कल्प॑मानः । सम्ऽवे॒शय॑न् । पृ॒थि॒वीम् ।
उ॒स्रिया॑भिः ।
अथ॑ । अ॒स्मभ्य॑म् । वरु॑णः । वा॒युः । अ॒ग्निः । बृ॒हत् । रा॒ष्ट्रम् । सम्ऽवे॒-
श्यं॑म् । दधा॒तु ॥ १ ॥

मित्रः । मीतेर्मरणात् त्रायते इति मित्रः एतन्नामको देवः । मित्रः प्रमीतेस्त्रायते इति हि निरुक्तम् [नि०१०,२१] । यद्वा सर्वेषां मित्रवद् उपकारकः । "मित्रं देवाः" इति प्रक्रम्य आम्नातम् । "सर्वस्य वा अहं मित्रम् अस्मि"[तै०सं०६.४.८.१] इति । स मित्रः आ यातु अस्मद्रक्षणार्थम आगच्छतु । कीदृशः । ऋतुभिः वसन्ताद्यैः कल्पमानः । ऋतुसांतत्येन दीर्घम् आयुः कर्तुं समर्थो भवन्नित्यर्थः । कृपू सामर्थ्ये । लटः शानच् । शपि "कृपो रो लः" इति लत्वम् । °अदुपदेशाल्लसार्वधातुक°" [इति] अनुदात्तत्वे शपः पित्त्वाद् अनुदात्तत्वे च

१ $\overset{h}{B}\overset{m}{K}$ °मान॒:. We with **ABKR**$\overset{m}{S}$**P**$\overset{2}{P}$**JV**.

1 So **S′Kd**. One of the MSS. of *Kaus'ika* has **निर्वर्त°**; the other **निर्वर्त°** corrected into **निवर्त°**. Kes'ava also **निवर्त°**. 2 **S′Kd** **निनयत्येव**. 3 **S′Kd** **शुक्लयानि**.

धातुस्वरेण आद्युदात्तत्वम्। किं कुर्वन्। उस्रियाभिः गोभिः। किरणैरित्यर्थः। पृथिवीम् विस्तीर्णां भूमिं संवेशयन् व्याप्नुवन्॥ अथ मित्रागमनानन्तरं वरुणः वायुः अग्निश्च अस्मभ्यं वृहत् महत् राष्ट्रम् राज्यं संवेश्यम् संवेशार्हम् अवस्थानयोग्यं दधातु विदधातु प्रकरोतु। प्रत्येकापेक्षया एकवचनम्। संपूर्वाद् विशेः अर्हार्थे यत् प्रत्ययः॥

द्वितीया॥

धाता रातिः सवितेदं जुषन्तामिन्द्रस्त्वष्टा प्रति हर्यन्तु मे वचः।
हुवे देवीमदितिं शूरपुत्रां सजातानां मध्यमेष्ठा यथासानि॥ २॥

धाता। रातिः। सविता। इदम्। जुषन्ताम्। इन्द्रः। त्वष्टा। प्रति। हर्यन्तु। मे। वचः।
हुवे। देवीम्। अदितिम्। शूरपुत्राम्। सजातानाम्। मध्यमेष्ठाः। यथा। असानि॥ २॥

धाता सर्वस्य विधाता एतन्नामा देवः रातिः दानशीलोर्यमा। "यः खलु वै ददाति सोर्यमा" [तै॰सं॰२.३.४.१] इति श्रुतेः। रा दाने इत्यस्मात् कर्तरि क्तिच्। सविता सर्वस्य प्रेरको देवश्च इदम् मदीयं हविः जुषन्ताम् सेवन्ताम्। जुषी प्रीतिसेवनयोः॥ एते धात्रादयः इन्द्रस्त्वष्टा च मे मदीयं वक्ष्यमाणं वचः वाक्यं स्तुतिलक्षणं वा प्रति हर्यन्तु आभिमुख्येन कामयन्ताम्। सादरं शृण्वन्तु इत्यर्थः। हर्य गतिकान्त्योः॥ शूरपुत्राम् शूरा विक्रान्ताः शौर्योपेताः पुत्रा मित्रवरुणादयो यस्याः सा तथोक्ता तां देवीम् दानादिगुणयुक्ताम् अदितिम् अदीनां देवमातरं हुवे आह्वयामि। ह्वेञो "बहुलं छन्दसि" इति संप्रसारणम्। किमर्थम्। सजातानाम् समानं जातानां बन्धूनां मध्यमेष्ठाः मध्यमेव मध्यमम्। मध्ये वर्तमानो यथा असानि भवानि। समृद्धकामः सन् स्वसमानैः सेव्यो यथा भवानि तथा कुर्वन्तु इत्यर्थः। मध्यमपूर्वात् तिष्ठतेर्विच्।

---

१ B h °सामि. We with A B D K K m R S m P P 2 J V.

सुषामादित्वात् षत्वम् । "तत्पुरुषे कृति बहुलम्" इति सप्तम्या अलुक् । असानि । असेर्लोटि "आडुत्तमस्य पिच्च" इत्याडागमः ॥

तृतीया ॥

हुवे सोमं सवितारं नमोभिर्विश्वानादित्याँ अहमुत्तरत्वे ।
अयमग्निर्दीदायद् दीर्घमेव सजातैरिद्धोमतिब्रुवद्भिः ॥ ३ ॥

हुवे । सोमम् । सवितारम् । नमःऽभिः । विश्वान् । आदित्यान् । अहम । उत्तरऽत्वे ।
अयम् । अग्निः । दीदयत् । दीर्घम् । एव । सऽजातैः । इद्धः । अमतिब्रुवत्ऽभिः ॥ ३ ॥

सोमं सवितारं विश्वान् सर्वान् आदित्यान् अदितेः पुत्रान् अन्यांश्च नमोभिः नमस्कारोपलक्षितैः स्तावकैर्मन्त्रैः अहं प्रयोक्ता उत्तरत्वे यजमानस्य श्रैष्ठ्ये । ॥ निमित्तसप्तम्येषा ॥ । श्रैष्ठ्यार्थं हुवे आह्वयामि ॥ तथा अयम आहुत्याधारभूतः अग्निर्दीदयत् दीप्यताम् । ॥ दीदेतिश्छान्दसो दीप्तिकर्मा । अस्मात् लेटि अडागमः ॥ । अमतिब्रुवद्भिः अमतिकूलवादिभिः अनुकूलं वदद्भिः सजातैः समानजन्मभिः पुरुषैः दीर्घमेव चिरकालमेव इद्धः समिद्धः तैरभिवर्धितः । यथाहम् असानि इति वाक्यशेषः । तथा दीप्यताम् इति संबन्धः । ॥ इद्ध इति । ञिइन्धी दीप्तौ । अस्माद् निष्ठायाम् इट्प्रतिषेधः । "अनिदिताम्°" इति नलोपः ॥

चतुर्थी ॥

इहेदसाथ न परो गमाथेर्यो गोपाः पुष्टपतिर्व आजत् ।
अस्मै कामायोप कामिनीर्विश्वे वो देवा उपसंयन्तु ॥ ४ ॥

इह । इत् । असाथ । न । परः । गमाथ । इर्यः । गोपाः । पुष्टऽपतिः । वः । आ । अजत् ।
अस्मै । कामाय । उप । कामिनीः । विश्वे । वः । देवाः । उपऽसंयन्तु ॥ ४ ॥

---

१ Sâyaṇa's text has दीदयत् and not दीदायत्, and it also reads °रिद्धो अप्रति° for °रिद्धोमति°.

हे कामिन्यः यूयम इहेत्। ॥इत् इत्यवधारणे॥। इहैव कन्यासमीपदेश एव असाथ भवत वर्तध्वम्। ॥अस्तेर्लेटि आडागमः॥ ॥ पुरः पुरस्ताद् न गमाथ। अनेतृकाः सत्यो न गच्छत। ॥पुर इति। "पूर्वाधरावराणाम् असि पुरधवश्चैषाम्" इति असिप्रत्ययः तत्संनियोगेन पूर्वशब्दस्य पुरादेशश्च। गमाथ। गमेर्लेटि आडागमः। छान्दसः शपो लुक्॥ ॥ *ईर्यः[2] मार्गप्रेरको गोपाः गोपायिता पालयिता पुष्टपतिः। पुष्टं पोषः। तस्य पतिः पोषयिता। पूषा देव इत्यर्थः। "पूषापोषयत्" [तै॰ब्रा॰१.६.२.२] इति हि श्रुतिः। ईदृशो देवो वः युष्मान् आजत् प्रेरयतु। ॥अज गतिक्षेपणयोः। *ईर्य[2] इति। ईर गतौ। अस्माद् ण्यन्ताद् "अचो यत्" इति व्यत्ययेन कर्तरि यत्। गोपाः। गुपू रक्षणे। "गुपूधूपविच्छि॰" इति आयप्रत्ययः। तदन्तात् क्विप्। अतो लोपे "वेरपृक्तलोपाद् वलिलोपो बलीयान्" इति यलोपः॥ ॥ तथा कामाय कामयमानाय। ॥कामयतेः पचाद्यच्॥। अस्मै वराय। यद्वा कामः कामना। ॥भावे घञ्। अस्मै इति षष्ठ्यर्थे चतुर्थी॥। अस्य वरस्य कामाय उप तत्समीपे कामिनीः कामः काम्यमानं फलम् तद् आसु विद्यत इति कामिन्यः स्त्रियो गाव[3]ः। ॥मत्वर्थीय इनिः॥। यद्वा कामयमानाः। ॥ग्रहादित्वाद् णिनिः॥। ईदृशीः वः युष्मान् विश्वे देवा उपसंयन्तु उपगमयन्तु। ॥इण् गतौ। अस्मात् लोटि "इणो यण्" इति यण्॥ ॥

पञ्चमी ॥

सं वो मनांसि सं व्रता समाकूतीर्नमामसि।
अमी ये विव्रता स्थन तान् वः सं नमयामसि ॥ ५ ॥

सम्। वः। मनांसि। सम्। व्रता। सम्। आऽकूतीः। नमामसि।
अमी इति। ये। विऽव्रताः। स्थन। तान्। वः। सम्। नमयामसि ॥ ५ ॥

---

१ P[3] स्थनः. We with P J.

---

1 S′ Kd अडा॰. 2 S′ Kd इर्यः for ईर्यः. 3 So S′ Kd.

हे विमनस्का जनाः वः युष्माकं मनांसि परस्परविरुद्धानि सं नमामसि । सम् इति एकीभावे । एकविषयग्रह्वाणि अविसंवादीनि कुर्मः ॥ तथा व्रता व्रतानि । कर्मनामैतत् । वचनादानादिकर्माणि सं नमयामः ॥ एवम् आकूतीः संकल्पान् सं नमयामः । ⌛नमेर्ण्यन्तात् लटि शपः "छन्दस्युभयथा" इत्यार्धधातुकत्वात् णिलोपः । "इदन्तो मसिः" ⌛ । ये अमी यूयं पूर्वं विव्रताः विरुद्धकर्माणः स्तन भवथ । ⌛अस्तेर्लोटि तशब्दस्य "तप्तनप्तनथनाश्च" इति तनादेशः । "श्नसोरल्लोपः" इत्यकारलोपः ⌛ । तान् विमनस्कान् वः युष्मान् सं नमयामसि संनमयामः । ⌛नमेर्ण्यन्तात् लटि "ज्वलह्वलह्मलनमाम् अनुपसर्गाद् वा" इति मित्त्वविकल्पस्य अनुपसर्गविषयत्वात् सोपसर्गस्य तु अमन्तत्वेन प्राप्तं मित्त्वं नित्यम् इति "मितां ह्रस्वः" इति उपधाह्रस्वत्वम् ⌛ ॥

षष्ठी ॥

अहं गृभ्णामि मनसा मनांसि मम चित्तमनु चित्तेभिरेत ।
मम वशेषु हृदयानि वः कृणोमि मम यातमनुवर्त्मान एत ॥ ६ ॥

अहम् । गृभ्णामि । मनसा । मनांसि । मम । चित्तम् । अनु । चित्तेभिः । आ । इत ।
मम । वशेषु । हृदयानि । वः । कृणोमि । मम । यातम् । अनुऽवर्त्मानः । आ । इत ॥ ६ ॥

हे विमनस्काः युष्मदीयानि विप्रतिपन्नानि मनांसि मनसा मदीयेन अहं गृह्णामि स्वाधीनीकरोमि ॥ तथा यूयमपि मम चित्तम् अनुचित्तेभिः अनुसारिभिर्युष्मदीयैश्चित्तैः एत आगच्छत ॥ मम वशेषु वशे इच्छामात्रे । ⌛व्यत्ययेन बहुवचनम् ⌛ । यद्वा वशेषु वशीकृतेषु

---

१ KPV गृह्णामि. B corrects गृभ्णामि into गृह्णामि. We with ABBr DKSPJR.
२ K कृणोतु. We with ABBDKRPPJV. ३ BDSR रेत for एत. We with AKKPPJV. ४ So We with PPJK.

स्वाधीनेष्वर्थेषु । ॒वश कान्तौ । इत्यस्माद् "वशिरण्योरुपसंख्यानम्" इति भावे कर्मणि वा अप्॒ । वः युष्मदीयानि हृदयानि कृ॑णोतु भवन्तः कुर्वन्तु । प्रत्येकविवक्षया एकवचनम् ॥ एवं मम यातम् गमनं यूयमपि अनुवर्त्मानः अनुसृतमार्गाः सन्तः ऐ॑त आगच्छत ॥

इति तृतीयकाण्डे द्वितीयेनुवाके तृतीयं सूक्तम् ॥

"कर्शफस्य" इति सूक्तेन विघ्नशमनकर्मणि स्पर्धारूपविघ्नविनाशार्थम् अरलुमणिबन्धनम् सर्पशृङ्गिदंष्ट्यादिविघ्नशमनार्थं संपातयुक्तवेणुदण्डधारणम् संग्रामे[2] शत्रुकृतमायादिरूपविघ्ननिवारणार्थं संपातयुक्तायुधधारणम् सर्वारम्भविघ्नशमनार्थं फलीकरणैर्धूपनं च कुर्यात् । सूत्रितं हि । "कर्शफस्येति पिशङ्गसू॑त्रम् अरलु॑दण्डं यद् आयुधं फलीकरणैर्धूपयति" इति [कौ॰ ५.७] ॥

तत्र प्रथमा ॥

कर्शफ॑स्य विशफस्य द्यौः॑ पि॒ता पृ॑थि॒वी मा॒ता ।
यथा॑भिच॒क्र दे॑वा॒स्तथा॑प॑ कृणुता पुनः॑ ॥ १ ॥
कर्शफ॑स्य । वि॒ऽशफस्य॑ । द्यौः । पि॒ता । पृ॒थि॒वी । मा॒ता ।
यथा॑ । अ॒भि॒ऽच॒क्र । दे॒वाः॒ । तथा॑ । अप॑ । कृ॒णु॒त॒ । पुनः॑ ॥ १ ॥

कर्शफस्य [करशफस्य] कृशशफस्य वा श्वापदस्य व्याघ्रादेः विशफस्य विगतशफस्य स्पर्धमानपुरुषकालसर्पादेः विस्पष्टशफस्य वा क्रूरगोमहिषादेः तस्य उभयविधस्य बहुविधविघ्नकारिणः द्यौः द्युलोकः पिता वृष्ट्यादिद्वारा उत्पादकः । पृथिवी माता स्वावयवावष्टम्भेन आधारत्वेन च मातृवज्जनयित्री । अनेन विघ्नहेतूनाम् एतेषां दृढमूलत्वात् तन्निवारणम् अल्पप्रयाससाध्यं न भवतीति सूचितम् । अथ वा पितृमातृभूतद्यावापृथिवीसंकीर्तनेन विघ्नोत्पादनाभावाय तेषां स्तुतिः कृता । एवं विघ्नकारिणां स्तुतिः श्रुत्यन्तरेपि दृश्यते । "द्यौर्वः पिता पृथिवी माता सोमो भ्राता-दितिः स्वसा" इति [ऋ॰ १.१९१.६] । "नमो अस्तु सर्पेभ्यो ये के

१ S K K̃ V द्यौष्पि॒ता. We with A B̃ D R S̃.

1 S′ Kd °नाशार्थेमरलमणि°. 2 S′ Kd संग्रामशत्रु°. 3 S′ Kd °सूत्रमरल°.

च पृथिवीम् अनु" [तै॰सं॰४.२.८.३] इति च ॥ तेषां विघ्नहेतूनाम् अपनोदनाय तत्प्रेरका देवाः प्रार्थ्यन्ते यथेत्यादिना । हे देवाः यूयं यथा येन प्रकारेण अभिचक्र उक्तान् विघ्नहेतून् पूर्वम् अस्मदभिमुखान् कृतवन्तः स्थ । करोतेः परोक्षे लिटि मध्यमबहुवचने रूपम् "यावद्यथाभ्याम्" इति निघातप्रतिषेधः ॥ तथा तेनैव प्रकारेण पुनः अप कृणुत अस्मत्तः अपगतान् कुरुत । निवर्तयतेत्यर्थः । कृवि हिंसाकरणयोश्च । "धिन्विकृण्व्योर च" इति उप्रत्ययः ॥

द्वितीया ॥

अश्ले॑ष्माणो॑ अधारयन् तथा॒ तन्मनु॑ना कृतम् ।
कृणोमि॒ वध्रि॒ विष्क॑न्धं मुष्का॒बर्हो॑ गवा॑मिव ॥ २ ॥

अश्ले॑ष्माणः । अधारयन् । तथा॑ । तत् । मनु॑ना । कृतम् ।
कृणोमि॑ । वध्रि॑ । विऽस्क॑न्धम् । मुष्क॒ऽआ॒बर्हः॑ । गवा॑मऽइव ॥ २ ॥

अश्लेष्माणः अश्लिष्टाः विघ्नैरभिमतकार्यसंप्राप्तिशून्या जनाः । श्लिष आलिङ्गने इत्यस्मात् श्लिष श्लेषणे इत्यस्मात् चौरादिकाद् वा औणादिको मनिन् । यद्वा श्लेष्मोपलक्षितत्रिदोषदूषितशरीररहिताः दिव्यदेहा देवाः अधारयन् । विघ्नशमनाय अरलुवृक्षविकारमणिं दण्डादिकं च धृतवन्तः ॥ तथा तद्वदेव तत् मण्यादिधारणं मनुना मनुष्यसृष्टेः कर्त्रा स्वायंभुवेन कृतम् अनुष्ठितम् ॥ एवम् अहमपि मण्यादिधारणेन विष्कन्धम् कार्यप्रवृत्तिप्रतिबन्धकं विघ्नजातं वध्रि । शुष्कचर्ममयी रज्जुर्वध्री । [वध्री] वरत्रा स्यात् इत्यभिधानात् [अ॰को॰२.१०.३१] । तद्युक्तम् उन्मूलनपाशयुक्तं कृणोमि । पाशेनाकृष्य उन्मूलयामीत्यर्थः । वध्रीशब्दाद् व्रीह्यादेराकृतिगणत्वाद् मत्वर्थीय इनिः । यद्वा वध्रः षण्डः ।

निसर्गपण्डो वध्रश्च पक्षपण्डस्तथैव च ।

इत्यादिस्मरणात् । अत्र वध्रशब्दो निर्वीर्यत्वरूपधर्मपरः । सोस्यास्तीति वध्रि

---

१ K K V अश्लेष्माणो. We with A B B D R S P P J V. २ So we with P P J. K follows Sâyaṇa. ३ P मुष्काऽआ°.

---

1 S' Kd निर्वीर्यत्वं रूपं धर्म°. 2 S' Kd वध्र for वध्रि.

निर्वीर्यं कार्याक्षमं करोमि । यद्वा वधिं वध्यं विनष्टं करोमि । अदिशदिभूशुभिभ्यः क्रिन् [उ०४, ६५] इति बाहुलकाद् वधेर्हिंसार्थादपि भवति । तत्र दृष्टान्तः । मुष्काबर्हो गवामिव गवाम् पुंगवाना मुष्काबर्हः । मुष्कम् आबृहति उन्मूलयतीति मुष्काबर्हः । कर्मण्यण् । यद्वा आबर्हणम् आबर्हः । भावे घञ् । मुष्कस्याबर्हो मुष्काबर्हः । स यथा तान् निर्वीर्यान् प्रजननाशक्तान् करोति तद्वत् ॥

तृतीया ॥

पिशङ्गे सूत्रे खृगलं[1] तदा बध्नन्ति वेधसः ।
अवस्युं[2] शुष्मं[3] काबवं वधिं कृण्वन्तु बन्धुरः ॥ ३ ॥

पिशङ्गे । सूत्रे । खृगलम् । तत् । आ । बध्नन्ति । वेधसः ।
अवस्युम्[4] । शुष्मम् । काबवम् । वधिम् । कृण्वन्तु । बन्धुरः ॥ ३ ॥

पिशङ्गे पिशङ्गवर्णे सूत्रे । प्रोतम् इति शेषः । खृगलम् तनुत्राणम् । "खृगलेव विस्रसः पातम् अस्मान्" [ऋ०२, ३९, ४] इत्यत्र मन्त्रे खृगलं तनुत्राणम् इति भरतस्वामिना व्याख्यातम् । कवचवत् परकृतविघ्नापनोदनेन रक्षकं तत् तम् उक्तगुणम् अरलुमणिं वेधसः विधातारः साधकाः आ बध्नन्ति शरीरे धारयन्ति ॥ बन्धुरः । बन्धेरौणादिक उरच् प्रत्ययः ॥ अस्माभिरपि बद्धः स मणिः अवस्युम् । अव इत्यन्ननाम । बालरूपम् अन्नम् अर्हतीति अवस्युः । "छन्दसि च" इति यत् प्रत्ययः । तं शुष्मम् शोषकम् । शुष शोषणे । अविसिविसिशुषिभ्यः कित् [उ०१, १४१] इति मन् प्रत्ययः । काबवम् । कबुः कर्बुरवर्णः क्रूरः प्राणी । तत्संबन्धी विघ्नः काबवः । कबृ वर्णे इत्यस्माद् औणादिक उप्रत्ययः । "तस्येदम्"

---

१ K V शृगलं. We with A B Bp B[h] D K[m] R P P[2] J. २ V P K अवस्यं. We with A B Bp B[h] D K[m] R S[m] P[2] J. ३ So we with P P[2] J. K follows Sâyaṇa. ४ P अवस्यम्. We with P[2] J K.

---

1 S' Kd वधिं.

इत्यर्थे अण् । ईदृशं विघ्नजातं वधिम निर्वीर्यं वध्यं वा कृण्वन्तु करोतु । व्यत्ययेन बहुवचनम । यद्वा बन्धुरः । जसः स्थाने "सुपां सुलुक्०" इति सुः । बन्धुराः अस्माभिर्धार्यमाणाः मणिदण्डादयः अवस्याद्युक्तलक्षणं विघ्नं वधिं कृण्वन्तु ॥

चतुर्थी ॥

येना॑ अवस्यव॒श्चर॑थ दे॒वा इ॑वासुरमा॒यया॑ ।
शुना॑ कपि॒रिव॒ दूष॑णो बन्धु॒रा का॒ब॒वस्य॑ च ॥ ४ ॥

येन॑ । अ॒व॒स्य॒वः॑ । चर॑थ । दे॒वाःऽइ॑व । अ॒सु॒रऽमा॒यया॑ ।
शुना॑म् । क॒पिःऽइ॑व । दूष॑णः । बन्धु॒रा । का॒ब॒वस्य॑ । च ॥ ४ ॥

हे जनाः अवस्यवः । अवः अन्नं यशो वा । तत् शत्रुजयेन आत्मन इच्छन्तः । "क्याच्छन्दसि" इति उप्रत्ययः । तादृशा यूयं येन परकृतमायारूपविघ्नेन मोहिताः सन्तश्चरथ संग्रामे वर्तध्वे । तत्र दृष्टान्तः । असुरमायया असुरसंबन्धिन्या मायया मोहिता देवा इव । तथाविधानां भवतां संबन्धिनो मायारूपविघ्नस्य काबवस्य प्रागुक्तलक्षणस्य विघ्नविशेषस्य च बन्धुरा संबद्धा[1] धृता खड्गादिरूपा हेतिः दूषयित्री भवतु । किमिव । शुनां कपिर्यथा दूषणः । उपमानापेक्षया पुंलिङ्गता । शुनाम् इति । "श्वयुवमघोनाम् अतद्धिते" इति संप्रसारणम् । "न गोश्वन्त्साववर्ण०" इति विभक्त्युदात्तत्वप्रतिषेधः । दूषणः । दुष वैकृत्ये । इत्यस्मात् "कृत्यल्युटो बहुलम्" इति कर्तरि ल्युट् । "दोषो णौ" इति ऊत्वम ॥

पञ्चमी ॥

दुष्ट्यै॑ हि त्वा॑ भ॒त्स्यामि॑ दूषयि॒ष्यामि॑ काब॒वम् ।
उदा॑शवो॒ रथा॑ इव श॒पथे॑भिः सं॒रिष्यथ ॥ ५ ॥

---

१ KBB^{h}K^{m}RPP^{2}JV भ॒त्स्यामि॑. We with ASS^{m}DV. २ KV °भिश्चरिष्यथ. We with ABB^{h}DK^{m}RS^{m}PP^{2}JV.

---

1 S′Kd °संबंधा.

दुष्ट्यै । हि । त्वा । भत्स्यामि । दूषयिष्यामि । काबवम् ।
उत् । आशवः । रथाःऽइव । शपथेभिः । सरिष्यथ ॥ ५ ॥

हे मणे त्वा त्वां हि यस्मात् दुष्ट्यै परकृतविघ्नदूषणाय भत्स्यामि बध्नामि । बन्धेर्लृटि "एकाच उपदेशेनुदात्तात्" इति इट्प्रतिषेधः । नलोपश्छान्दसः । यद्वा विघ्नगृहीतः संबोध्यः । हे विघ्नगृहीत सर्वारम्भविघ्ननिवारणाय त्वां भत्स्यामि दीपयामि । फलीकरणैर्धूपयामीत्यर्थः । भस भर्त्सनदीप्त्योः । छान्दस इडभावः । "सस्यार्धधातुके" इति तत्वम् ॥ तस्मात् काबवम् उक्तलक्षणं विघ्नविशेषं दूषयिष्यामि नाशयिष्यामि । "एकशतं विष्कन्धानि" इति वक्ष्यति । तेषु प्रधानत्वात् काबवस्य पुनःपुनरुपादानम् ॥ ततश्च उदाशवः । आशुरश्वः । गमनोन्मुखैर्वेगवद्भिः अश्वैर्युक्ता रथा इव हे जना यूयं शपथेभिः शपथैः परकृतैर्विघ्ननिमित्तैराक्रोशैः । वियुक्ताः सन्त इति शेषः । व्यापारेषु अनिरुद्धगतयः चरिष्यथ यथेष्टं संचरत । शपथेभिरिति । "बहुलं छन्दसि" इति भिस ऐसभावः ॥

षष्ठी ॥

एकशतं विष्कन्धानि विष्ठिता पृथिवीमनु ।
तेषां त्वामग्र उज्जहरुर्मणिं विष्कन्धदूषणम् ॥ ६ ॥

एकऽशतम् । विऽस्कन्धानि । विऽस्थिता । पृथिवीम् । अनु ।
तेषाम् । त्वाम् । अग्रे । उत् । जहरुः । मणिम् । विस्कन्धऽदूषणम् ॥ ६ ॥

एकशतम् एकं च शतं च एकशतम् । "संख्या" इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वम् । एकशब्दोपि कन्प्रत्ययान्तत्वेन आद्युदात्तः । एकोत्तरशतसंख्यानि विष्कन्धानि विघ्नाः पृथिवीम् अनु पृथिव्यां विष्ठिता विष्ठितानि विविधम् अवस्थितानि । विपूर्वात् तिष्ठतेः कर्तरि नि-

---

१ P P̂ J भत्स्यामि. २ K चरिष्यथ. We with P P̂ J. ३ So we with A B Bp B̂h D K K̂m R Ŝm V. Sâyaṇa's reading is उज्जहुः, though his text has उज्जहुः. ४ P̂ जहरुरुः. We with K P J.

ष्ठा । "द्यतिस्यतिमास्थाम इत् ति किति" [इति] इत्त्वम । "उपसर्गात् सुनोति०" इत्यादिना षत्वम । शेर्लोपः । "अनुर्लक्षणे" इत्यनोः कर्मप्रवचनीयत्वात् "कर्मप्रवचनीययुक्ते द्वितीया" इति पृथिवीम इति द्वितीया ॥ । तेषां विघ्नानां निवृत्तये हे मणे त्वाम अग्रे पूर्वम उज्जह्रुः देवा उद्धृतवन्तः । अतः विष्कन्धदूषणं मणिम इमम अरलुवृक्षविकारं मणिम । अहमपि धारयामीति वाक्यशेषः ॥

इति तृतीये काण्डे द्वितीयेनुवाके चतुर्थं सूक्तम ॥

"प्रथमा ह व्युवास" इति सूक्तेन सर्वेण पुष्ट्यर्थे अष्टकाकर्मणि आज्यमांसस्थालीपाकान् प्रत्येकं त्रिस्त्रिर्जुहोति । नवकृत्वः सूक्तावृत्तिः । माघकृष्णाष्टमी अष्टकेत्युच्यते । यथाहुः । "या माघ्याः पौर्णमास्या उपरिष्टाद् ह्यष्टका तस्याम अष्टमी ज्येष्ठया संपद्यते ताम एकाष्टकेत्याचक्षते" इति [आप० गृ० २१] । तस्यां तत् कर्म कार्यम । तत्र धानाकरम्भशष्कुलीपुरोडाशोदौदनक्षीरौदनतिलौदनान् अधिश्रयणपर्यग्निकरणादिभिः संस्कृत्य आज्येन संमिश्र्य विंशतिसंख्याकान् पिण्डान् कृत्वा पशोर्दक्षिणं बाहुं निर्लोमसचर्मखुरं प्रक्षाल्य निधाय अनेन सूक्तेन दर्व्या प्रत्यृचं हुत्वा अन्ते सदर्वीम एकविंशीम आहुतिं जुहुयात् । अयम अत्र क्रमः । "प्रथमा ह व्युवास" [१-५] इत्याद्याः पञ्च । "आयमगन्त्संवत्सरः" [८,९] इति द्वे । "इडया जुह्वतो वयम" [११,१२] इति द्वे । इति नवभिर्नव पिण्डान् हुत्वा "ऋतुभ्यष्ट्वा" [१०] इत्यस्याम ऋचि ऋतुभ्यष्ट्वा यजे स्वाहा आर्तवेभ्यस्त्वा यजे स्वाहा इत्येवं सानुषङ्गैरष्टधा विभक्तैर्मन्त्रैः अष्टौ पिण्डान् हुत्वा "इन्द्रपुत्रे सोमपुत्रे" [१३] इत्यन्तिमया अष्टादशीं जुहुयात् "अहोरात्राभ्यां त्वा यजे स्वाहा" [कौ० १४.२] इति सौत्रमन्त्रेण एकोनविंशीं हुत्वा "इडायास्पदम" [६] इत्येका "आ मा पुष्टे च" [७] इत्येकावसाना द्वितीया । एताभ्याम ऋग्भ्यां पशोर्दक्षिणं बाहुं विंशीं जुहुयात् । तदलाभे आज्यं जुहुयात् । "पूर्णा दर्वि" [७] इति अवसानद्व-

1 S' Kd अरलवृक्ष°. 2 S' Kd om. अहम्, reading मणिमपि. 3 S' Kd तस्य for तस्याम्. 4 S' Kd ततः for तत्र. 5 S' Kd °डाशादोदन° for °डाशोदौदन°. 6 S' Kd °तिलोदनान्. 7 S' Kd इडाया. 8 S' Kd इत्येवसानु°.

येन सदर्वीं पिण्डीम् एकविंशीं जुहोति। ततः धानाकरम्भादीनि हविरुच्छिष्टानि आज्यमिश्राणि कृत्वा "प्रथमा ह व्युवास" इति सर्वेण सूक्तेन तिस्र आहुतीर्जुहोति। इति पुष्ट्यर्थे अष्टकाकर्मण्ययं क्रमः। तद् उक्तं संहिताविधौ। "प्रथमा ह व्युवास सेत्यष्टक्यायाया[1] [वपां] सर्वेण सूक्तेन "तिस्र आहुतीर्[2]जुहोति। समवत्तानां स्थालीपाकस्य सहुतान्[3] आज्यमि-"श्रान् हुत्वा पश्चाद् अग्नेर्वाग्यतः संविशति। महाभूतानां कीर्तयन् सं-"जिहीते" इति [कौ० ३. २]॥

नित्येऽष्टकाकर्मणि आद्यन्तयोरुक्तं सूक्तहोमं विहाय ऋग्भिरुक्तप्रकारेण एकविंशतिम् आहुतीर्जुहुयात्। तद् उक्तं कौशिकेन। "अष्टकायाम् अ-"ष्टकाहोमान् जुहुयात्। तस्या हवींषि धानाः करम्भः शष्कुल्यः पुरो-"डाश उदौदनः[4] क्षीरौदन[5]स्तिलौदनो[6] यथोपपादे[7] पशुः। सर्वेषां हविषां "समुद्धृत्य दर्व्या जुहुयात् प्रथमा ह व्युवास सेति पञ्चभिः" इत्यादि [कौ० १४. २]॥

अस्य दर्विहोमत्वात् तन्त्रविकल्पे प्राप्ते नित्यमेव तन्त्रम् इति इषु[8]फा-लिमाठरयोर्मतम्। [तथा च कौशिकः] "न दर्विहोमे न हस्तहोमे न पूर्णहोमे तन्त्रं क्रियेतेत्येके[9] अष्टकायां क्रियेतेतीषु[10]फालिमाठरौ" इति [कौ० १४. २]॥

सोमयागे सोमक्रयणीपदहोमानुमन्त्रणे "इडायास्पदम्" [६] इत्येषा विनियुक्ता। [तद्] उक्तं वैतानसूत्रे। "सोमक्रयणीं प्रपाद्यमानाम्" इति प्रक्रम्य "पदाभि[11]होमम् इडायास्पदम्" इति [वै० ३. ३]॥

चातुर्मास्येषु साकमेधे पूर्णदर्विहोमे "पूर्णा दर्वि" [७] इत्येषा। तद् उक्तं वैताने। "कार्तिक्यां साकमेधाः" इति प्रक्रम्य "श्वो भूते पूर्णदर्व्यं[12] पूर्णा दर्वे" इति [वै० २. ५]॥

---

1 S′ Kd °ष्टकायां. We with *Kaus'ika* and his two commentators. 2 So S′ Kd. *Kaus'ika*, त्रिर्जुहोति for तिस्र आहुतीः. 3 S′ Kd सहाहुतान्. We with *Kaus'ika* and his two commentators. 4 S′ Kd उदोदनः. 5 S′ Kd क्षीरोद°. 6 S′ Kd °तिलोद°. 7 So S′ Kd and the *Kes'avî* too. 8 S′ Kd सुपाठि° for इषुफालि°. We with *Kaus'ika* and Kes'ava. 9 S′ Kd °त्येकाष्ट°. 10 S′ Kd क्रियेतेति सुपाठिमाठराविति for क्रियेतेतीषुफालिमाठरौ इति. We with *Kaus'ika* and Kes'ava. 11 S′ Kd °निहोम°. 12 S′ Kd पूर्णदर्व्यां पूर्णा दर्वीति. We with the *Vaitâna*.

राज्ञो रात्रौ आरात्रिकविधाने "यां देवाः प्रतिनन्दन्ति" [२] इत्येषा रात्रिदेवतावाहने विनियुक्ता । "संवत्सरस्य प्रतिमाम्" [३] इत्येषा च पिष्टमय्या रात्रिप्रतिकृतेरुपवेशने विनियुक्ता । तद् उक्तं परिशिष्टे । "अथातः पिष्टरात्र्याः कल्पं व्याख्यास्यामः" इति प्रक्रम्य "यां "देवाः प्रतिनन्दन्तीति रात्रिम् आवाहयेत् । संवत्सरस्य प्रतिमाम् इति "पिष्टमयीं प्रतिकृतिं कृत्वोदङ्मुखीम् उपवेशयेत्" [प० ६.१] इति ॥

तत्रैव रात्र्युपस्थाने "आ मा पुष्टे च पोषे च" इत्येता विनियुक्ताः । तद् उक्तं तत्रैव । "आ मा पुष्टे च पोषेत्येताभिरुपस्थाय" इति [प० ६.१]॥

तत्र प्रथमा ॥

प्रथमा ह व्युवास सा धेनुरभवद् यमे ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥ १ ॥

प्रथमा । ह । वि । उवास । सा । धेनुः । अभवत् । यमे ।
सा । नः । पयस्वती । दुहाम् । उत्तरामऽउत्तराम् । समाम् ॥ १ ॥

प्रथमा ह सृष्ट्यादौ उत्पन्ना खल्वेषा एकाष्टकासंबन्धिनी आद्या उषाः व्युवास तमोव्युदसनं कृतवती । ⧖ विपूर्वो वसिर्वर्जने वर्तते ⧖ । सृष्टेः प्राक् अहोरात्रविभागशून्यं कालं तद्युक्तम् अकरोद् इत्यर्थः । तथा च श्रुत्यन्तरे । "न वा इदं दिवा न नक्तम् आसीद् अ- "व्यावृत्तम् । ते देवा एता व्युष्टीरपश्यन् । ता उपादधत । ततो वा इदं "व्यौच्छत्" [तै० सं० ५.३.४.७] इति । यद्वा हशब्दः श्रुत्यन्तरप्रसिद्धौ । तथा हि । "इयमेव सा या प्रथमा व्यौच्छत्" [तै० सं० ४.३.११.१] इति प्रक्रम्य "प्रजाम् एका रक्षत्यूर्जम् एका" [तै० सं० ४.३.११.१] इत्यादिना प्रजारक्षणादिव्यापारपञ्चकविधानेन "ऋतस्य गर्भः प्रथमा व्यूषुषी" [तै० सं० ४.३.११.५] इति मन्त्रोक्तव्यापारपञ्चकभेदेन वा "पञ्च व्युष्टीरनु पञ्च दोहाः" [तै० सं० ४.३.११.४] इति पञ्चसंख्यानिर्दिष्टे नन्दादितिथ्यपेक्षया वा पञ्चोषसः प्रतिपादिताः । एतमेव भेदम् अपेक्ष्य

1 S' Kd पोषेत्येता.

"आस्वितरासु चरति प्रविष्टा" [४] इत्यग्रे समाम्नास्यते। तासां मध्ये एकाष्टकासंबन्धिन्युषाः प्रथमा सर्वत्रानुगमनात् प्रधानभूता सा व्युवासेति। सा तादृगुषोयुक्ता एकाष्टका यमे पितृणाम् अधिपतौ विषये धेनुः प्रीणयित्री अभवत्। अत्र एकाष्टकातिथेः पित्र्यकर्मणि अक्षयफलसाधनत्वेन धेनुत्वव्यपदेशः। अत एव अन्यत्राम्नायते। "एकाष्टकां पश्यत दोहानाम् अन्नं मांसवद् घृतवत् स्वधावत्" इति। सा एकाष्टका धेनुः नः अस्माकं पयस्वती पयउपलक्षितभोग्यवस्तुयुक्ता सती उत्तरामुत्तरां समाम्। अत्यन्तसंयोगे द्वितीया। उपर्युपरिभाविषु सर्वेषु वत्सरेषु दुहाम् अभिमतफलं दुग्धाम्। उत्तरामुत्तराम् इति। "नित्यवीप्सयोः" इति द्विर्वचनम्। "अनुदात्तं च" इति आम्रेडितानुदात्तत्वम्। दुहाम् इति। दुह प्रपूरणे। स्वरितेत्त्वाद् आत्मनेपदम्। "लोटि लोपस्त आत्मनेपदेषु" इति तलोपः॥

द्वितीया॥

यां देवाः प्रतिनन्दन्ति रात्रिं धेनुमुपायतीम्।
संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली॥ २॥

याम्। देवाः। प्रतिऽनन्दन्ति। रात्रिम्। धेनुम्। उपऽआयतीम्।
सम्ऽवत्सरस्य। या। पत्नी। सा। नः। अस्तु। सुऽमङ्गली॥ २॥

याम् एकाष्टकासंबन्धिनीं रात्रिम्। "रात्रेश्चाजसौ" इति ङीबभावश्छान्दसः। धेनुम् उक्तप्रकारेण धेनुरूपाम् उपायतीम् समीपम् आगच्छन्तीं दृष्ट्वा देवाः हविर्भुजः प्रतिनन्दन्ति प्रशंसन्ति। उपायतीम् इति। उपाङ्पूर्वाद् एतेर्लटः शत्रादेशः। "इणो यण्" इति यण्। "उगितश्च" इति ङीप्। "शतुरनुमो नद्यजादी" इति नद्या उदात्तत्वम्। या एकाष्टका संवत्सरस्य तदात्मकस्य कालस्य पत्नी जाया। तथा च श्रुत्यन्तरम्। "एषा वै संवत्सरस्य पत्नी यद् एकाष्टका। एतस्यां वा एष एतां रात्रिं वसति" [तै०सं०७,४,८,१] इ-

१ B °निंदंति.

1 S' Kd insert another या after कालस्य.

ति । सा एकाष्टका नः अस्मान् उद्दिश्य सुमङ्गली शोभनमङ्गलयुक्ता अस्तु भवतु । ⁂शोभनं मङ्गलं यस्या इति बहुव्रीहौ "नञ्सुभ्याम्" इत्युत्तरपदान्तोदात्तत्वम् । "°सुमङ्गलभेषजाच्च" इति विहितस्य ङीपः उदात्तनिवृत्तिस्वरेण उदात्तत्वम्⁂ ॥

तृतीया ॥

संवत्सरस्य प्रतिमां यां त्वा रात्र्युपास्महे ।
सा न आयुष्मतीं प्रजां रायस्पोषेण सं सृज ॥ ३ ॥

सम्ऽवत्सरस्य । प्रतिऽमाम् । याम् । त्वा । रात्रि । उप्ऽआस्महे ।
सा । नः । आयुष्मतीम् । प्रऽजाम् । रायः । पोषेण । सम् । सृज ॥ ३ ॥

हे रात्रि संवत्सरस्य प्रतिमाम् प्रतिकृतिरूपाम् प्रतिनिधित्वेन निर्मीयत इति प्रतिमा । ⁂"आतश्चोपसर्गे" इत्यङ्⁂ । यां त्वा त्वाम् उपास्महे सेवामहे । ⁂आस उपवेशने । अदादित्वात् शपो लुक्⁂ । सा त्वम् नः अस्माकं प्रजाम् पुत्रपौत्रादिरूपाम् आयुष्मतीम् चिरकालजीवनवतीं कुर्वती सती रायः धनस्य गवादिलक्षणस्य पोषेण पुष्ट्या सं सृज संयोजय । ⁂"षष्ठ्याः पतिपुत्र°" इति रायो विसर्जनीयस्य सत्वम्⁂ ॥

चतुर्थी ॥

इयमेव सा या प्रथमा व्यौच्छदास्वितरासु चरति प्रविष्टा ।
महान्तो अस्यां महिमानो अन्तर्वधूर्जिगाय नव्गज्जनित्री ॥ ४ ॥

इयम् । एव । सा । या । प्रथमा । विऽऔच्छत् । आसु । इतरासु । चरति । प्रऽविष्टा ।
महान्तः । अस्याम् । महिमानः । अन्तः । वधूः । जिगाय । नवऽगत् ।
जनित्री ॥ ४ ॥

इयमेव अद्यतनी एकाष्टकालक्षणा सा प्रथमम् उत्पन्ना उषाः । अनेन तादात्म्यप्रतिपादनेन अस्या अतिशयितमहत्त्वम् उक्तं भवति । त-

च्छब्दार्थम् आह । या उषाः प्रथमा प्रागुक्तप्रकारेण सृष्ट्यादौ उत्पन्ना सती व्यौच्छत् तमोनिरसनं कृतवती । ॥उछी विवासे॥ । सेयम् एकाष्टका उषाः आसु परिदृश्यमानासु [इतरासु] अन्यासु उषःसु प्रविष्टा अनुगता सती चरति वर्तते उदेति । श्रूयते हि । "एका सती बहुधोषो व्युच्छसि" [तै० सं० ४. ३. ११. ५] इति । ॥प्रपूर्वाद् विशेः कर्तरि निष्ठा । व्यत्ययेन अव्ययपूर्वपदप्रकृतिस्वरत्वम्॥ । यद्वा प्रविष्टा सूर्येणानुप्रविष्टा । ॥कर्मणि क्तः । "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम्॥ ॥ अस्याम् उक्तलक्षणायाम् उषसि अन्तः मध्ये महान्तः अपरिमिताः महिमानः माहात्म्यविशेषाः । वर्तन्त इति शेषः । यद्वा महिमानः महत्त्वोपेताः महान्तः मुख्याः सूर्यसोमाग्नयः अस्याम् अन्तर्वर्तन्ते । सूर्यादय एतदधीनाः प्रकाशन्त इत्यर्थः । "त्रय एनां महिमानः सचन्ते" [तै० सं० ४. ३. ११. १] इति श्रुतेः ॥ वधूः सूर्यस्य जाया उषाः । "सूर्यपत्नी विचरतः प्रजावती" इति [तै० सं० ४. ३. ११. १] श्रुत्यन्तरात् । नवगत् नवम् अभिनवं प्रतिदिवसम् उद्यन्तं सूर्यं तदविनाभावेन गच्छतीति नवम् अभिनवम् उत्पद्यमानं प्राणिजातं गच्छति व्याप्नोतीति वा नवगत् । यद्वा प्रतिदिनम् उत्पद्यमानमपि नवम् अभिनवम् उत्कृष्टम् एकविधं रूपं गच्छतीति नवगत् । तथा च मन्त्रवर्णः । "पुनःपुनर्जायमाना पुराणी समानं वर्णम् अभि शुम्भमाना" [ऋ० १. ९२. १०] इति । अथवा नवधा विभक्तान् अहर्भागान् प्रातरादीन् गच्छतीति नवगत् । ते च भागाः प्रातःसंगवमध्याह्नापराह्णसायाह्नाख्याः पञ्च तदन्तरालकालाश्च चत्वारः । श्रूयते हि तैत्तिरीयके प्रातरादीन् प्रस्तुत्य "समानस्याह्नः पञ्च पुण्यानि नक्षत्राणि । चत्वार्यश्लीलानि । तानि नव" [तै० ब्रा० १. ५. ३. ४] इति । स्मर्यते च ।

प्रातरातः संगवश्च रुग्णो मध्याह्नसंतपौ ।
अपराह्णं खनिः सायं नवधा भिद्यते त्वहः ।

इति । ॥नवपूर्वाद् गमेः क्विप् । "गमः क्वौ" इत्यनुनासिकलोपः । "ह्रस्वस्य पिति कृति०" इति तुक् । कृदुत्तरपदप्रकृतिस्वरत्वम्॥ । ए-

वंभूता उषाः जनित्री जनानां प्रकाशप्रदानेन साधु जनयित्री सती जिगाय जयति सर्वोत्कर्षेण वर्तते । जयतेर्लिटि "सन्लिटोर्जेः" इत्यभ्यासाद् उत्तरस्य कुत्वम् । जनित्रीति । जनेर्ण्यन्तात् साधुकारिणि तृन् । "बहुलम् अन्यत्रापि" इति णिलोपः ॥

पञ्चमी ॥

वानस्त्या ग्रावाणो घोषमक्रत हविष्कृण्वन्तः परिवत्सरीणम् ।
एकाष्टके सुप्रजसः सुवीरा वयं स्याम पतयो रयीणाम् ॥ ५ ॥

वानस्त्याः । ग्रावाणः । घोषम् । अक्रत । हविः । कृण्वन्तः । परिवत्सरीणम् ।

एकऽअष्टके । सुऽप्रजसः । सुऽवीराः । वयम् । स्याम् । पतयः । रयीणाम् ॥ ५ ॥

हे एकाष्टके त्वदर्थं वानस्त्याः वनस्पतिविकाराः उलूखलमुसलादयः । "°पत्युत्तरपदाण्ण्यः" । ग्रावाणः दृषदुपलादयः परिवत्सरीणम संवत्सरेण निर्वृत्तम् । "संपरिपूर्वात् ख च" इति निर्वृत्तार्थे खप्रत्ययः । ईदृशं हविः धानाकरम्भचरुपुरोडाशादिकं कृण्वन्तः अवहननपेषणादिद्वारा उत्पादयन्तः घोषम् प्रीतिकरं शब्दम् अक्रत अकृषत । कृञो लुङि आत्मनेपदे "मन्त्रे घस°" इति च्लेर्लुक् ॥ हे एकाष्टके एका चासावष्टका एकाष्टका । "दिक्संख्ये संज्ञायाम्" इति समासः । "अष्टका पितृदेवत्ये" इति इत्वाभावः । त्वदनुग्रहाद् वयं सुप्रजसः शोभनपुत्रपौत्रादियुक्ताः । "नित्यम् असिच् प्रजामेधयोः" इत्यसिच् समासान्तः । सुवीराः । विविधम् ईरयन्ति शत्रून् इति वीरा भृत्याः । वीरो वीरयत्यमित्रान् [नि° १.७] इति निरुक्तम् । वीर विक्रान्तौ । इत्यस्माद् वा पचाद्यच् । बहुव्रीहौ "वीरवीर्यौ च" इत्युत्तरपदाद्युदात्तत्वम् । सुभृत्याः सन्तो रयीणाम् धनानां पतयः स्वामिनः स्याम भवेम । "नाम् अन्यतरस्याम्" इति नाम उदात्तत्वम् ॥

---

१ $\overset{h}{B}\overset{m}{S}$ हविः कृ°. We with **D K** $\overset{m}{K}$ **R V**.

षष्ठी ॥

इडा॑यास्प॒दं घृ॒तव॑त् सरीसृ॒पं जा॑तवेद॒: प्रति॑ हव्या गृभाय ।
ये ग्रा॒म्या: प॒शवो॑ वि॒श्वरू॑पास्तेषां॑ सप्ता॒नां मयि॒ रन्ति॑रस्तु ॥ ६ ॥

इडा॑याः । प॒दम् । घृ॒तऽव॑त् । स॒रीसृ॒पम् । जा॒त॑ऽवेदः । प्रति॑ । ह॒व्या । गृ॒भा॒य॒ ।
ये । ग्रा॒म्याः । प॒शव॑: । वि॒श्वऽरू॑पाः । तेषा॑म् । स॒प्ता॒नाम् । मयि॑ । रन्ति॑: ।
अ॒स्तु॒ ॥ ६ ॥

इलाँयाः । गोनामैतत् । "इला धेनुः सहवत्सा न आगात्" इत्यादिश्रुतेः । ✠"इलाया वा" इति विसर्जनीयस्य सत्वम्✠ । तस्याः पदम् पादः घृतवत् घृतोपेतम् । "सा यत्रयत्र न्यक्रामत् ततो घृतम् अपीड्यत" [तै॰सं॰२. ६. ७. १] इति श्रुतेः । सरीसृपम् अत्यर्थं सर्पत् । ✠सृपेर्यङ्लुगन्तात् पचाद्यच् । "न धातुलोप आर्धधातुके" इति लघूपधगुणप्रतिषेधः✠ । इडापदात्मना भावितं पशोर्दक्षिणं पादम् हव्या हव्यानि धानाकरम्भादीनि हवींषि च । ✠शेलोंपः✠ । हे जातवेदः जातानां वेदितरग्ने प्रति गृभाय प्रतिगृहाण । ✠"हलः श्नः शानज्झौ" ["छन्दसि शायजपि"] इति श्नः शायजादेशः । "ह्रग्रहोर्भः॰" इति भः✠ ॥ गृहीतहविषस्तव प्रसादाद् ग्राम्याः ग्रामे भवा गोश्वाजाविपुरुषगर्दभोष्ट्राख्या विश्वरूपाः नानाकारा ये पशवः सन्ति तेषाम् उक्तानां सप्तानां पशूनां रन्तिः प्रीतिः मयि चास्तु । ततः समृद्धिर्भवतु इत्यर्थः । ✠रमेः क्तिनि अनुनासिकलोपाभावश्छान्दसः✠ ॥

सप्तमी ॥

आ मा॑ पुष्टे च॒ पोषे॑ च॒ रात्रि॑ दे॒वानां॑ सुम॒तौ स्या॑म ।
पूर्णा॑ द॒र्वे॒[२] परा॑ पत॒ सुपू॑र्णा॒ पुन॒रा प॑त ।
सर्वा॑न् य॒ज्ञान्त्सं॑भुञ्ज॒तीष॒मूर्जं॑ न॒ आ भ॑र ॥ ७ ॥

---

१ So we with **A B B**^{P} $\overset{h}{\mathbf{B}}$ **D K** $\overset{m}{\mathbf{K}}$ **R** $\overset{m}{\mathbf{S}}$ **P** $\overset{2}{\mathbf{P}}$ **J V.** २ This is the reading of **A B D R** $\overset{m}{\mathbf{S}}$ $\overset{2}{\mathbf{P}}$ **J.** $\overset{h}{\mathbf{B}}$ corrects to दर्वि॒. **K** दर्वि॒, but recognises द॒र्वे॒ as a variant. **V** दर्वि॒. The *Vaitâna:* द॒र्वे (II. 5). ३ **K** $\overset{m}{\mathbf{K}}$ **V** य॒ज्ञात्सं॑°. We with $\overset{h}{\mathbf{B}}$ $\overset{m}{\mathbf{S}}$ **P** $\overset{2}{\mathbf{P}}$ **J S.**

आ । मा । पुष्टे । च । पोषे । च । रात्रि । देवानाम् । सुऽमतौ । स्याम् ।
पूर्णा । दर्वे । परा । पत । सुऽपूर्णा । पुनः । आ । पत ।
सर्वान् । यज्ञान् । सम्ऽभुञ्जती । इषम् । ऊर्जम् । नः । आ । भर ॥ ७ ॥

हे रात्रि मा मां पुष्टे समृद्धे धने पोषे पुत्रपौत्रादिसमृद्धौ । ॥ परस्परसमुच्चयार्थौ चकारौ । आ [इति] उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ । आ स्थापय ॥ त्वत्प्रसादाद् वयं च देवानाम् इन्द्रादीनां सुमतौ कल्याण्यां बुद्धौ स्याम भवेम ॥ हे दर्वि* होमसाधनभूते त्वं पूर्णा हविर्भिः पूरिता सती परा पत परागच्छ । यष्टव्यान् देवान् प्रति गच्छ ॥ ततः सुपूर्णा अभिमतफलैः परिपूर्णा सती पुनरा पत अस्मान् आगच्छ । ॥ पत्लृ गतौ । पूर्णेति । पॄ पालनपूरणयोः इत्यस्मात् ण्यन्तात् "वा दान्तशान्तपूर्णदस्त[स्पष्ट]च्छन्नज्ञप्ताः" इति इडभावो णिलुक् च निपात्यते । "उदोष्ठ्यपूर्वस्य" इत्युत्वम् । "रदाभ्याम्०" इति नत्वम् । सुपूर्णेति । "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम् ॥ सर्वान् यज्ञान् यष्टव्यान् । ॥ "यजयाच०" इत्यादिना कर्मणि नङ् प्रत्ययः ॥ । संभुञ्जती हविषा सम्यक् पालयन्ती प्रीणयन्ती । ॥ भुजेः पालनार्थाद् आत्मनेपदाभावे शतृप्रत्ययः । "शतुरनुमः०" इति ङीप उदात्तत्वम् ॥ । ईदृशी सती देवेभ्यः सकाशाद् इषम् अन्नम् ऊर्जम् बलं च नः अस्मभ्यम् आ भर आहर ॥ पूर्णा दर्वीति* पृथग्ग्रहणात्[1] "ग्रहणम् आ ग्रहणाद्" [कौ० १. ८] इति न्यायात् विनियोगविषये "आ मा पुष्टे च" इत्येकावसाना ऋक् । पञ्चपटलिकायां तु त्र्यवसाना एकैव ऋग् इत्युक्तम् ॥

अष्टमी ॥

आयमगन्त्संवत्सरः पतिरेकाष्टके तव ।
सा न आयुष्मतीं प्रजां रायस्पोषेण सं सृज ॥ ८ ॥

---

१ So we with **P P J**. **K** adopts Sâyaṇa's version.

---

1 **S' K**d **पृथक्** for **पृथग्ग्रहणात्**. The **पृथग्ग्रहणम्** referred to is in the *Sûtra* quoted in the introduction to this hymn.

आ। अयम्। अगन्। समऽवत्सरः। पतिः। एकऽअष्टके। तव।
सा। नः। आयुष्मतीम्। प्रऽजाम्। रायः। पोषेण। सम्। सृज॥ ८॥

हे एकाष्टके तव पतिः अयं संवत्सरः आगन् आगतः। संवत्सरस्य पतित्वं प्राग् उक्तम्॥ सा त्वं पत्या सहिता नः अस्माकं प्रजाम् पुत्रपौत्रादिलक्षणाम् आयुष्मतीं कुर्वती रायः धनस्य पोषेण सं सृज संयोजय॥

नवमी॥

ऋतून् यज ऋतुपतीनार्तवानुत हायनान्।
समाः संवत्सरान् मासान् भूतस्य पतये यजे॥ ९॥

ऋतून्। यजे। ऋतुऽपतीन्। आर्तवान्। उत। हायनान्।
समाः। समऽवत्सरान्। मासान्। भूतस्य। पतये। यजे॥ ९॥

ऋतून् वसन्तादीन् यजे हविषा प्रीणयामि॥ ऋतुपतीन् तेषाम् ऋतूनाम् अधिष्ठातॄन् अग्न्यादीन् देवांश्च। यजे इति सर्वत्र संबन्धः॥ आर्तवान् ऋत्ववयवान् अन्यान् अनुक्तान् कलाकाष्ठादीन् कालविशेषान्। ‘ऋतोरण्’ इति अण् प्रत्ययः। उत अपि च हायनान् समाः संवत्सरान्। इत्येते शब्दा यद्यपि समानार्थास्तथापि अत्र हायनशब्देन संवत्सरसंबन्धिनः अहोरात्रा लक्ष्यन्ते। जहति जिहते वा भावान् इति हायनाः। ‘हश्च व्रीहिकालयोः’ इति ल्युट्। समाशब्देन समप्रविभक्ताश्चतुर्विंशतिसंख्याका अर्धमासाः। तान् संवत्सरान् द्वादशमासात्मकान् मासान् चैत्राद्यान् द्वादशसंख्याकान् यज इति संबन्धः॥ भूतस्य सद्भावं प्राप्तस्य चराचरात्मकस्य जगतः पतये यः पतिरन्तर्यामी अनवच्छिन्नकालात्मकः तस्मै। ‘क्रियाग्रहणं कर्तव्यम्’ इति कर्मणः संप्रदानत्वाच्चतुर्थी। तं भूतपतिं च यजे हविषा प्रीणयामि। यद्वा। भूतस्य पतय इति तादर्थ्ये चतुर्थी। भूतपतिप्रीणनाय ऋत्वादीन् यज[1] इति संबन्धः॥

1 S′ Kd यजत इति for यज इति.

दशमी ॥

ऋतुभ्यष्ट्वार्तवेभ्यो मास्यः संवत्सरेभ्यः ।
धात्रे विधात्रे समृधे भूतस्य पतये यजे ॥ १० ॥

ऋतुऽभ्यः । त्वा । आर्तवेभ्यः । मासऽभ्यः । सम्ऽवत्सरेभ्यः ।
धात्रे । विऽधात्रे । सम्ऽऋधे । भूतस्य । पतये । यजे ॥ १० ॥

हे एकाष्टके त्वा त्वाम् ऋतुभ्यः वसन्तादिभ्यः तत्प्रीत्यर्थम् । यजे इत्यनुषङ्गः । एवम् आर्तवेभ्यः ऋतुसंबन्धिभ्यः अहोरात्रादिभ्यः । त्वा यजे इति सर्वमन्त्रेषु अनुषङ्गः । मास्यः मासेभ्यः । ⁂ "पद्दन्नोमास्°" इत्यादिना मासशब्दस्य मास् इत्यादेशः । "स्वरस्वतवस्मासुषसा च त इष्यते छन्दसि" इति सकारस्य तत्वम् ⁂ । संवसन्त्यस्मिन्निति संवत्सरः । ⁂ संपूर्वाद् वसेरौणादिकः सरप्रत्ययः । "सस्यार्धधातुके" इति तत्वम् ⁂ । तेभ्यः [धात्रे] धाता धारयिता एतन्नामको देवः तस्मै विधात्रे सर्वस्य निर्मात्रे देवाय समृधे समर्धयित्रे एतन्नाम्ने देवाय । ⁂ वृधु वृद्धौ । संपूर्वाद् असात् क्विप् ⁂ । भूतस्य पतये उक्तलक्षणाय देवाय । ⁂ "षष्ठीयुक्तश्छन्दसि वा" इति पतिशब्दस्य घि[2]संज्ञायां "घेर्ङिति" इति गुणः ⁂ । [यजे हविषा प्रीणयामि] ॥

एकादशी ॥

इडया जुह्वतो वयं देवान् घृतवता यजे ।
गृहानलुभ्यतो वयं सं विशेमोप गोमतः ॥ ११ ॥

इडया । जुह्वतः । वयम् । देवान् । घृतऽवता । यजे ।
गृहान् । अलुभ्यतः । वयम् । सम् । विशेम् । उप । गोऽमतः ॥ ११ ॥

इडया । गोनामैतत् । तदुप[3]लक्षितेन मांसादिरूपेण हविषा घृतवता उपस्तरणाभिघारणार्थघृतयुक्तेन जुह्वतः होमं कुर्वन्तः अग्नौ हविः प्रक्षिपन्तः । ⁂ "तृतीया च होश्छन्दसि" इति कर्मणि तृतीया ⁂ । त-

१ So all our MSS. and Vaidikas.

1 S′Kd °मासोपसां च. 2 S′Kd omit घि°. 3 S′Kd तदुक्तलक्षि°.

याविधा वयं देवान् यजे । ॥ व्यत्ययेन एकवचनम् ॥ । यजामहे प्रीणयामः । ॥ जुह्वत इति । जुहोतेर्लटः शत्रादेशे "नाभ्यस्ताच्छतुः" इति नुम्प्रतिषेधः । "अभ्यस्तानाम् आदिः" इत्याद्युदात्तत्वम् ॥ ॥ तेषां देवानाम् अनुग्रहाद् वयम् अलुभ्यतः गार्ध्यम् अकुर्वाणाः संपूर्णाः सन्तः । ॥ लुभ गार्ध्ये । दिवादित्वात् श्यन् । "अनित्यम् आगमशासनम्" इति नुमभावः ॥ । यद्वा गृहविशेषणम् । अलुभ्यतः गार्ध्यरहितान् । काम्यमानसकलवस्तुसमेतान् इत्यर्थः । गोमतः । ॥ भूम्नि मतुप् ॥ । बहुभिर्गोभिर्युक्तान् [गृहान्] उप । ॥ क्रियाध्याहारः ॥ । उपेत्य सं विशेम सुखेन निवसेम ॥

द्वादशी ॥

एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् ।
तेन देवा व्यसहन्त शत्रून् हन्ता दस्यूनामभवच्चीपतिः ॥ १२ ॥

एकऽअष्टका । तपसा । तप्यमाना । जजान । गर्भम् । महिमानम् । इन्द्रम् । तेन । देवाः । वि । असहन्त । शत्रून् । हन्ता । दस्यूनाम् । अभवत् । शचीऽपतिः ॥ १२ ॥

एकाष्टका माघकृष्णाष्टमीत्युक्तम् । सा देवतात्वेन स्तूयते । तपसा तप्यमाना । ॥ व्यत्ययेन कर्मणि तृतीया । "तपस्तपःकर्मकस्यैव" इति कर्मवद्भावाद् यगात्मनेपदे । "०अदुपदेशाल्लसार्वधातुक०" [इति] अनुदात्तत्वेन यक उदात्तत्वे प्राप्ते व्यत्ययेन धातुस्वरः ॥ । यद्वा । ॥ तप ऐश्वर्ये । दिवादिः आत्मनेपदी । श्यनो नित्वाद् आद्युदात्तत्वम् ॥ । सर्वस्य ईशाना एकाष्टका तपसा संतापकरेण पुत्रार्थेन कर्मणा गर्भम् गर्भभूतं महिमानम् महत्त्वोपेतम् इन्द्रं जजान जनयामास । यद्वा गर्भं गरणीयं स्तुत्यं वन्दनीयम् । ॥ गॄ शब्दे । अर्तिगृभ्यां भन् [उ०३.१५२] इति भन् प्रत्ययः ॥ । गर्भस्थवद् अदृश्यं वा । ॥ गॄ निगरणे ।

---

१ BKASV व्यंपहन्त. We with KDR. २ P एका°. We with PJK.

1 S'Kd संतस्तान् for सन्तः. 2 S'Kd गृ for गृ.

अस्माद् वा भन्ऽ । एवंभूतम् इन्द्रम् ईशितारम् आदित्यं ज-
जान जनयामास प्राकाशयत् ॥ तेन उक्तलक्षणेन इन्द्रेण देवाः शत्रून्
शातयितॄन् असुरान् व्यसहन्त विशेषेण अभ्यभवन् ॥ स च इन्द्रः शचीप-
तिः शच्या देव्याः पतिः । यद्वा शचीति कर्मनाम । शचीनां कर्मणां पतिः
स्वामी दस्यूनाम् उपक्षपयितॄणां हन्ता अभवत् घातको भवतु । ऽश-
चीपतिरिति । वनस्पत्यादित्वाद् उभयपदप्रकृतिस्वरत्वम्ऽ ॥

त्रयोदशी ॥

इन्द्रपुत्रे सोमपुत्रे दुहितासि प्रजापतेः ।
कामान्नस्माकं पूरय प्रतिं गृह्णाहि नो हविः ॥ १३ ॥
इन्द्रऽपुत्रे । सोमऽपुत्रे । दुहिता । असि । प्रजाऽपतेः ।
कामान् । अस्माकम् । पूरय । प्रतिं । गृह्णाहि । नः । हविः ॥ १३ ॥

हे इन्द्रपुत्रे उक्तरीत्या इन्द्रः पुत्रो यस्यास्तादृशि हे सोमपुत्रे सोमः
पुत्रो यस्यास्तथाविधे । "यां देवाः प्रतिनन्दन्ति रात्रिम" [२] इति रात्रे-
काष्टकयोरभेदव्यवहाराद् रात्रौ चन्द्रस्य प्रकाशस्य उपलब्धेश्च पुत्रत्वोपचा-
रः । यद्वा गवामयनाख्ये संवत्सरसत्रे एकाष्टकाया सोमस्य क्रयणात् पु-
त्रत्वोपचारः । श्रूयते हि । गवामयनदीक्षां प्रस्तुत्य "तेषाम् एकाष्टका-
यां क्रयः संपद्यते" [तै०सं० ७.४.८.२] इति । ईदृशि हे एकाष्टके
त्वं प्रजापतेः प्रजानां देवानां मनुष्यादीनां स्रष्टुः दुहितासि पुत्री भवसि ॥
तथाविधा त्वम् अस्माकं कामान् काम्यमानान् प्रजापश्वादीन् अर्थान् पू-
रय समृद्धान् कुरु । तदर्थं नः अस्मदीयं हविः प्रति गृह्णाहि प्रतिगृहा-
ण स्वीकुरु । ऽग्रहेर्लोटि सिपो हिरादेशः । "हलः श्नः शान-
ज्झौ" इति शानजादेशो व्यत्ययेन न प्रवर्तते । "वा छन्दसि" इति
हेः पित्त्वेन ङित्त्वस्य निवर्तनात् "ई हल्यघोः" इति ईत्वमपि न
भवतिऽ ॥

इति द्वितीयेनुवाके पञ्चमं सूक्तम् ॥
द्वितीयोनुवाकः समाप्तः ॥

तृतीयेनुवाके पञ्च सूक्तानि । तत्र "मुञ्चामि त्वा" इति प्रथमसूक्तेन बालग्रहरोगे निरन्तरस्त्रीसंगतिजनितयक्ष्मणि च पूतिगन्धमत्स्यसहितम् ओदनम् अभिमन्त्र्य भोजनकाले व्याधितम् आशयेत् ॥

तथा अनेन सूक्तेन अरण्यतिलैधज्वालितोदपात्रेण उषःकाले [अरण्ये] गृहे वा व्याधितम् अवसिञ्चेत् मार्जयेत् आचामयेच्च[1] ॥

तथा अरण्यशणारण्यगोमयचित्त्यादिशान्तौषधिभिः प्रत्येकं प्रज्वालितेनोदकेन उषःकाले व्याधितस्य अवसेकमार्जनाचमनानि कुर्यात् ॥

तथा सर्वव्याधिनिवृत्तये च अनेन सूक्तेन व्याधितम् उपस्पृश्य अभिमन्त्रयेत् ॥

सूत्रितं हि । "मुञ्चामि त्वेति [ग्राम्ये] पूतिशफरीभिरोदनम् अरण्ये[2] तिलशणगोमयशान्ताज्वालेनावनक्षत्रेवसिञ्चति" [कौ° ४. ३] इति ॥ शान्ता ओषधयश्चित्तिः प्रायश्चित्तिरित्येवमाद्याः सूत्रकृतोक्ताः [कौ° १. ८] ॥

अस्य सूक्तस्य अंहोलिङ्गगणे पाठात् तस्य गणस्य "ओषधिवनस्पतीनाम् अनुक्तान्यप्रतिषिद्धानि भैषज्यानाम् अंहोलिङ्गाभिः" [कौ° ४. ८] इत्यादिना यत्रयत्र सूत्रकृता विनियोग उक्तस्तत्र सर्वत्र अस्य विनियोगो द्रष्टव्यः ॥

तथा क्रतुमध्ये व्याधितस्य यजमानस्य भैषज्येपि एतत् सूक्तम् । तथा च वैताने । "अथ भैषज्याय यजमानम् 'अक्षीभ्यां ते'[२. ३३] 'मुञ्चामि त्वा'[३. ११] 'उत देवाः'"[४. १३] इति [वै° ७. ३] ॥

तत्र प्रथमा ॥

मुञ्चामि॑ त्वा ह॒विषा॒ जीव॑नाय॒ कम॑ज्ञातय॒क्ष्मादु॒त रा॑जय॒क्ष्मात् ।
ग्राहि॑र्ज॒ग्राह॒ यद्ये॒तदे॑नं॒ तस्या॑ इन्द्राग्नी॒ प्र मु॑मु॒क्तमे॑नम् ॥ १ ॥

मुञ्चामि॑ । त्वा॒ । ह॒विषा॑ । जीव॑नाय । कम् । अ॒ज्ञा॒त॒ऽय॒क्ष्मात् । उ॒त ।
रा॒ज॒ऽय॒क्ष्मात् ।
ग्राहिः॑ । ज॒ग्राह॑ । यदि॑ । ए॒तत् । ए॒न॒म् । तस्याः॑ । इ॒न्द्रा॒ग्नी॒ इति॑ । प्र ।
मु॒मु॒क्त॒म् । ए॒न॒म् ॥ १ ॥

---

1 S′ Kd °चमयेत्. 2 S′ अरण्ये corrected into अरण्य°; Kd अरण्य°. We with *Kausika.*

हे व्याधिग्रस्त[1] त्वा त्वां हविषा अन्नेन अज्ञातयक्ष्मात् । अयम् एतत्संज्ञक इति अप्रज्ञातः शरीरगतो रोगः अज्ञातयक्ष्मः । यद्वा राजयक्ष्मव्यतिरिक्तः सर्वोपि रोगः अज्ञातयक्ष्मशब्दवाच्यः । तादृशाद् रोगाद् मुञ्चामि विश्लेषयामि । यज पूजायाम् इत्यस्मात् अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् [उ०१.१३७.] इति मन्प्रत्ययान्तो यक्ष्मशब्दः ॥ उत अपि च राजयक्ष्मात् यक्ष्माणां रोगाणां राजा क्षयरोगो राजयक्ष्मः । राजदन्तादित्वाद् उपसर्जनस्य परनिपातः । यद्वा राजा सोमः तं प्रथमं यो यक्ष्मो गृहीतवान् स राजयक्ष्मः । "राजानं यक्ष्म आरद् इति तद् राजयक्ष्मस्य जन्म" [तै०सं०२.५.६.५] इति श्रुतेः । तस्मादपि त्वा मुञ्चामि । किमर्थम् । जीवनाय जीवनार्थम । इह लोके चिरकालावस्थानार्थम इत्यर्थः । कम्[3] इति पूरणः ॥ तथा ग्राहिः ग्रहणशीला पिशाची [यदि] एतत् इदानीम् एनम् बालकं जग्राह गृहीतवती तस्याः सकाशात् हे इन्द्राग्नी युवाम् एनं प्र मुमुक्तम् प्रमोचयतम् । मुचेश्छान्दसो विकरणस्य श्लुः ॥

द्वितीया ॥

यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निर्ऋतेरुपस्थादस्पार्शमेनं शतशारदाय ॥ २ ॥

यदि । क्षितऽआयुः । यदि । वा । पराऽइतः । यदि । मृत्योः । अन्तिकम । निऽइतः । एव ।
तम । आ । हरामि । निःऽऋतेः । उपऽस्थात् । अस्पार्शम् । एनम । शतऽशारदाय ॥ २ ॥

यदि अयं व्याधिग्रस्तः क्षितायुः रोगेण क्षपितायुर्भवेत् । क्षि क्षये इत्यस्मात् कर्मणि निष्ठा । "निष्ठायाम् अण्यदर्थे" इति पर्युदस्तत्वाद् दीर्घा-

---

१ D निर्ऋतेे उप°. २ K S °स्पार्पमे°. We with A B Br B[h] D K[m] R S[m] P P[2] J V. ३ So we with P P[2] J.

---

1 S' Kd व्याधितग्रस्त. 2 S' Kd om. वा. 3 S' Kd किमिति.

भावः ॥ । यदि वा परेतः अस्माल्लोकात् परागतो भवेत् । यदि च मृत्योः वैवस्वतस्य अन्तिकं नीतः नितरां प्राप्त एव भवति । ॥ उपायान्तरेण अशक्यानेयत्वम् एवकारेण द्योत्यते । परेतो नीत इत्युभयत्र एतेः कर्मणि निष्ठा । "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम् । नीत इति । "स्वरितो वानुदात्ते पदादौ" इत्येकादेशः स्वर्यते ॥ । एवंभूतमपि तम् पुरुषं निर्ऋतेः मृत्योः उपस्थात् उपस्थानात् समीपात् आ हरामि इमं लोकम् आनयामि ॥ आहृत्य च एनं शतशारदाय शतसंवत्सरजीवनार्थम् अस्माँर्षम् प्रबलं करोमि । ॥ सृ गतिबलनयोः । छान्दसो लुङ् । पादादित्वात् "तिङ्तिङः" इति निघाताभावः ॥ ॥

तृतीया ॥

सहस्राक्षेण शतवीर्येण शतायुषा हविषाहार्षमेनम् ।
इन्द्रो यथैनं शरदो नयात्यति विश्वस्य दुरितस्य पारम् ॥ ३ ॥

सहस्रऽअक्षेण । शतऽवीर्येण । शतऽआयुषा । हविषा । आ । अहार्षम् । एनम् ।
इन्द्रः । यथा । एनम् । शरदः । नयाति । अति । विश्वस्य । दुःऽइतस्य । पारम् ॥ ३ ॥

सहस्राक्षेण । सहस्रम् इति बहुनाम । सहस्रम् अक्षीणि चक्षूंषि दर्शनशक्तयो यस्य हविषः फलत्वेन विद्यन्ते तत् सहस्राक्षम् । ॥ "बहुव्रीहौ सक्थ्यक्ष्णोः०" इति षच् समासान्तः ॥ । तेन शतवीर्येण । शतशब्दः अपरिमितवाची । शतसंख्याकानि श्रोत्रादीन्द्रियसंबन्धीनि वीर्याणि श्रवणादिशक्तयः फलत्वेन यस्य सन्ति तादृशेन शतायुषा शतसंवत्सरपरिमितम् आयुर्जीवनं फलभूतं यस्य तादृशेन हविषा अन्नादिना एनम् व्याधिगृहीतं [मृत्योः सकाशाद् आहार्षम् आनैषम् । यथा इन्द्रः एनं पुरुषं] शरदः शतसंख्याकान् संवत्सरान् । ॥ "०अत्यन्तसंयोगे" द्वितीया ॥ । तावत्कालपर्यन्तं विश्वस्य कृत्स्नस्य दुरितस्य आयुर्भङ्गनिमित्तस्य पापस्य पारम् अवसानम् अति नयाति अतिनयेत् अतिक्राम-

येत् । तथा तम् इन्द्रं हविषा प्रीणयामि इति शेषः । नयातीति । नयतेर्लेटि आडागमः ॥

चतुर्थी ॥

शतं जीव शरदो वर्धमानः शतं हेमन्तान्छतमु वसन्तान् ।
शतं त इन्द्रो अग्निः सविता बृहस्पतिः शतायुषा हविषाहार्षमेनम् ॥४॥

शतम् । जीव । शरदः । वर्धमानः । शतम् । हेमन्तान् । शतम् । ऊं इति । वसन्तान् ॥
शतम् । ते । इन्द्रः । अग्निः । सविता । बृहस्पतिः । शतऽआयुषा । हविषा । आ । अहार्षम् । एनम् ॥ ४ ॥

हे रोगाद् विमुक्त त्वं वर्धमानः अहरहरभिवृद्धिं प्राप्नुवन् शतं शरदः शतसंख्याकान् शरदृतून् जीव प्राणान् धारय ॥ तथा शतं हेमन्तान् हेमन्तर्तून् । उशब्दः समुच्चये । शतं वसन्तांश्च वर्धमानः । जीव इत्युभयत्र अनुषङ्गः । सर्वत्र "°अत्यन्तसंयोगे" द्वितीया ॥ यद्यपि शतं शरद इत्यनेनैव शतसंवत्सरपरिमितम् आयुर्लब्धम् तथापि हेमन्तवसन्तयोः पृथगुपादानं शीतोष्णवर्षत्वेन संवत्सरस्य त्रैविध्यप्रदर्शनार्थम् । अनेन आजीवनं तत्तद्धेतुप्रयुक्तशीतोष्णादिकृतदुःखजातं मा भूद् इत्युक्तं भवति । अत एव वर्धमान इति विशेषितम् ॥ तथा इन्द्रः अग्निः सविता सर्वस्य प्रेरकः बृहस्पतिश्च ते तव शतम् शतसंवत्सरपरिमितम् । आयुः कुर्वन्तु इति शेषः । शतायुषेत्यादि पूर्ववत् ॥

पञ्चमी ॥

प्र विंशतं प्राणापानावनड्वाहाविव व्रजम् ।
व्य१न्ये यन्तु मृत्यवो यानाहुरितरान्छतम् ॥ ५ ॥

---

१ DRK^{m} हेमतांछ°. We with ABKS^{m}V. २ BB^{h} व्य१न्ये. We with ADKK^{m}RS^{m}V. ३ AB °हुरित°. We with BDKK^{m}RS^{m}PP^{2}JV. ४ So we with ABDKK^{m}S^{m}V. R reads °रांछतम्.

---

1 So S′Kd distinctly. 2 S′Kd °कृतसुखदुःखजातं.

प्र । विशतम् । प्राणापानौ । अनड्वाहौऽइव । व्रजम् ।
वि । अन्ये । यन्तु । मृत्यवः । यान् । आहुः । इतरान् । शतम् ॥ ५ ॥

हे प्राणापानौ शरीरधारकौ युवां प्र विशतम् । यक्ष्मगृहीतस्य शरीरम् इति शेषः । मन्त्रसामर्थ्येन निर्गतयोरपि पुनःप्रवेशाभिधानेन अनिर्गतयोस्तयोः कैमुतिकन्यायेन स्थैर्यं प्रार्थितं भवति । तत्र दृष्टान्तः । अनड्वाहौ अनसः शकटस्य वोढारौ बलीवर्दौ व्रजम् स्वनिवासस्थानं गोष्ठमिव । "अनसि वहेः क्विबनसो डश्च" इति क्विप् । "चतुरनडुहोराम् उदात्तः" इत्यागमस्य आम उदात्तत्वम् । व्रजम् इति । व्रज गतौ इत्यस्माद् "गोचरसंचरवहव्रज०" इत्यादिना "हलश्च" इति प्राप्तस्य घञोपवादत्वेन घप्रत्ययान्तो [व्रजशब्दो] निपातितः । "अजिव्रज्योश्च" इति कुत्वाभावः ॥ अन्ये राजयक्ष्मव्यतिरिक्ता मृत्यवः मृतिहेतवो रोगादयः वि यन्तु विमुखा गच्छन्तु । तानेवाह । यान् इतरान् अन्यान् मृत्यून् शतम् शतसंख्याकान् आहुः कथयन्ति अभिज्ञाः । शतम् इति अपरिमितनाम । तथैव प्राग् आम्नातम् । "मेमम् अन्ये मृत्यवो हिंसिषुः शतं ये" [२.२८.१] इति । शाखान्तरेपि "ये ते सहस्रम् अयुतं पाशा मृत्यो मर्त्याय हन्तवे" [तै० ब्रा० ३.१०.८.२] इति । व्यन्य इति । संहितायाम् "उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य" इति अन्यशब्दस्य अकारः स्वर्यते ॥

षष्ठी ॥

इहैव स्तं प्राणापानौ माप गातमितो युवम् ।
शरीरमस्याङ्गानि जरसे वहतं पुनः ॥ ६ ॥

इह । एव । स्तम् । प्राणापानौ । मा । अप । गातम् । इतः । युवम् ।
शरीरम् । अस्य । अङ्गानि । जरसे । वहतम् । पुनः ॥ ६ ॥

हे प्राणापानौ युवाम् इहैव अस्मिन्नेव शरीरे [स्तम्] भवतम् । अ-

---

१ V K जवम्, recognising युवम् as a variant. We with A B D K[m] R S[m] P P[2] J V.
२ So we with P P[2] J. K with S.

स्तेलोंटि तसस्तम । "श्नसोरल्लोपः" इत्यकारलोपः ॥ । इतः अस्माच्छरीरात् जवं शीघ्रम् अकाले माप गातम् मापगच्छतम । ॥ एतेर्माङि लुङि "इणो गा लुङि" इति गादेशः ॥ । पुनःशब्दः त्वर्थे । किं तु अस्य व्याधितस्य शरीरम् अङ्गानि हस्तपादादीनि च जरसे जरार्थम । जरापर्यन्तम् इत्यर्थः । वहतम् धारयतम । ॥ जरस इति । "जराया जरस् अन्यतरस्याम्" इति जरसादेशः ॥ ॥

सप्तमी ॥

जरायै त्वा परि ददामि जरायै नि धुवामि त्वा ।
जरा त्वा भद्रा नेष्ट व्यन्ये यन्तु मृत्यवो यानाहुरितरान्छतम् ॥ ७ ॥

जरायै । त्वा । परि । ददामि । जरायै । नि । धुवामि । त्वा ।
जरा । त्वा । भद्रा । नेष्ट । वि । अन्ये । यन्तु । मृत्यवः । यान् । आहुः ।
इतरान् । शतम् ॥ ७ ॥

हे व्याधिविनिर्मुक्त त्वा त्वां जरायै परि ददामि । रक्षणार्थं दानं परिदानम । जरा अवसानपर्यन्तं त्वां यथा रक्षति तथा ददामीत्यर्थः । जीर्यन्ति अङ्गानि अस्याम अवस्थायाम इति जरा । ॥ जॄष् वयोहानौ । "षिद्भिदादिभ्योङ्" इति अङ् प्रत्ययः ॥ ॥ तथा त्वा त्वां जरायै नि धुवामि जरापर्यन्तं नितरां प्रेरयामि । तावत्पर्यन्तं रोगादिभ्यः पालयामि इत्यर्थः । ॥ धू विधूनने । तुदादित्वात् शः । तस्य ङित्त्वाद् गुणाभावः ॥ ॥ सा जरा त्वा त्वां भद्रा भन्दनीयानि कल्याणानि । ॥ शेर्लोपः ॥ । नेष्ट नयतु प्रापयतु । ॥ छान्दसो लुङ् । "बहुलं छन्दस्यमाङ्योगेपि" इत्यडभावः ॥ ॥ व्यन्य इत्यादि व्याख्यातम ॥

अष्टमी ॥

अभि त्वा जरिमाहित गामुक्षणमिव रज्वा ।

---

१ B B व्यन्ये. We with A D K K R S V. २ D °हुरित°. ३ R °रांछ°. We with A B D K K S V.

यस्त्वा॑ मृ॒त्युर॒भ्यधं॑त्त॒ जाय॑मानं सु॒पा॒शया॑ ।
तं ते॑ स॒त्यस्य॒ हस्ता॑भ्यामु॒दमु॑ञ्चद् बृह॒स्पति॑: ॥ ८ ॥

अ॒भि । त्वा॒ । ज॒रि॒मा । अ॒हि॒त॒ । गाम् । उ॒क्ष॒णम॑ऽइव । रज्वा॑ ॥
यः । त्वा॒ । मृ॒त्युः । अ॒भि॒ऽअधं॑त्त । जाय॑मानम् । सु॒ऽपा॒शया॑ ।
तम् । ते॒ । स॒त्यस्य॑ । हस्ता॑भ्याम् । उत् । अ॑मुञ्चत्[1] । बृ॒ह॒स्पति॑: ॥ ८ ॥

हे व्याधिविनिर्मुक्त जरिमा जरा त्वा त्वाम् अभ्यहित बद्धं करोतु । अभिपूर्वो दधातिर्बन्धने वर्तते । "अश्वाभिधानीम् आदत्ते" [तै० सं० ५. १. २. १] इतिवत् । दधातेर्लुङ् । "स्याश्वोरिच्च" इति इत्त्वकित्त्वे । किमिव । उक्षणम् उक्षाणम् । "वा षपूर्वस्य निगमे" इति दीर्घाभावः । सेचनसमर्थं गां रज्वेव । यो मृत्युः त्वा त्वां जायमानम् उत्पद्यमानमेव अकाले सुपाशया शोभनः पाशो यस्याः सा । पाशशब्दो ग्रन्थिविशेषोपेतवलयाकाररज्वग्रे प्रसिद्धः । यद् आह आपस्तम्बः । "मौञ्जेन दाम्नान्यतरतः पाशेन" [आप० सू० २. ५. ४] इति । तथाविधया रज्वा अभ्यधत्त अबध्नात् ते तव संबन्धिनं तम् मृत्युपाशं सत्यस्य अविनाशिनो ब्रह्मणो हस्ताभ्यां बृहस्पतिः उदमुञ्चत् उन्मोचयतु ॥

इति तृतीयकाण्डे तृतीयेनुवाके प्रथमं सूक्तम् ॥

"इहैव ध्रुवाम्" इति प्रथमं सूक्तं वास्तोष्पत्यगणे पठितम् । सूत्रितं हि । "इहैव ध्रुवाम्[३. १२] एह यातु[६. ७३] यमो मृत्युः[६. ९३] सत्यं बृहत्[१२. १] इत्यनुवाको वास्तोष्पतीयानि" इति [कौ० १. ८] । तेन गणेन नवशालावास्तुसंस्कारार्थं शालाभूमिं हलेन कर्षेत् ॥

तथा यत्रयत्र चतुर्गणी महाशान्तिः शान्त्युदकादौ प्रयुज्यते तत्र सर्वत्र अस्य विनियोगः ॥

तस्यामेव नवशालायां गर्तेषु उच्छ्रीयमाणस्थूणा अनेन सूक्तेन अभिमन्त्रयेत् ॥

तथा तत्रैव कर्मणि "इहैव ध्रुवाम्"[१, २] इति द्वाभ्याम् ऋग्भ्यां

---

१ $\hat{P}^2$ अमुचत्. We with P J.

शालाभूमिं दृढां घट्टयेत् ॥

"ऋतेन स्थूणाम" [६] इत्यनया ऋचा उच्छ्रितासु स्थूणासु घृताक्तं वंशम् आरोपयेत् ॥

नवगृहप्रवेशकाले "पूर्णं नारि" [८] इति ऋचा उदकुम्भसहिता पत्नीं गृहं प्रथमं प्रवेशयेत् ॥

तद् उक्तं संहिताविधौ । "वास्तोष्पतीयैः[1] कुलिजकृष्टे[2] दक्षिणतोग्नेः "संभारम् आहरति । वास्तोष्पत्यादीनि महाशान्तिम् आवपते"[3] इति प्रक्रम्य "इहैव ध्रुवाम् इति नीयमानाम्[4] उच्छ्रीयमाणाम्[5] अनुमन्त्रयते । "अभ्यज्य । ऋतेनेति मन्त्रोक्तम् । पूर्णं नारीत्युदकुम्भम् अग्निम् आदाय "प्रपद्यन्ते । ध्रुवाभ्यां हंहयति" इति [कौ० ५. ७] ॥

तत्र प्रथमा ॥

इ॒हैव ध्रु॒वां नि मि॑नोमि॒ शाला॑ं क्षे॒मे ति॑ष्ठाति घृत॒मुक्ष॑माणा ।
ता॑ं त्वा॑ शाले॒ सर्व॑वीराः सु॒वीरा॒ अरि॑ष्टवीरा॒ उप॒ सं च॑रेम ॥ १ ॥

इ॒ह । ए॒व । ध्रु॒वाम् । नि । मि॒नो॒मि॒ । शाला॑म् । क्षे॒मे॑ । ति॒ष्ठा॒ति॒ । घृ॒तम् । उ॒क्षमा॑णा ।
ताम् । त्वा॒ । शा॒ले॒ । सर्व॑ऽवीराः । सु॒ऽवीरा॑ः । अरि॑ष्टऽवीराः । उप॑ ।
सम् । च॒रे॒म॒ ॥ १ ॥

इहैव अस्मिन्नेव प्रदेशे गृहे [शालां] ध्रुवाम् स्थिरां नि मिनोमि प्रक्षिपामि । स्थूणानिखननादिना करोमीत्यर्थः । ॒डुमिञ् प्रक्षेपणे॒ । सा निमिता शाला घृतम् एतदुपलक्षितम् अभिमतफलम् उक्षमाणा सिञ्चन्ती प्रयच्छन्ती क्षेमे क्षेमेण । ॒तृतीयार्थे सप्तमी॒ । अन्यादिबाधराहित्येन तिष्ठाति तिष्ठतु । ॒लेटि आडागमः॒ ॥ हे शाले ताम् तादृशीं त्वा त्वां सर्ववीराः अनेकपुत्राद्युपेताः सुवीराः शोभनगुणपुत्राद्युपेताः अरिष्टवीराः न रिष्टा अरि-

1 S′ Kd वास्तोष्पत्यैः. 2 S′ Kd °कृष्टीदक्षि° for °कृष्टे । दक्षि°. 3 S′ Kd आवपतेति for आवपत इति. 4 S′ Kd मीयमाना°. 5 S′ Kd °माणानुमंत्रय°.

ष्टा रोगादिरहिताः तादृशपुत्रादिसमेताः। अत्र बाहुल्यशोभनगुणत्वहिंसाराहित्यलक्षणगुणविशेषसंबन्धाय वीरशब्दस्य त्रिरावृत्तिः। एवंभूताः सन्तो वयम् उप सं चरेम व्यवहरेम ॥ ॥ सर्ववीरा इति। "बहुव्रीहौ प्रकृत्या०" इति पूर्वपदप्रकृतिस्वरत्वम्। "प्रत्ययलक्षणेनाप्ययं स्वर इष्यते" इति वचनात् सर्वशब्दः "सर्वस्य सुपि" इत्याद्युदात्तः। सुवीरा इति। "वीरवीर्यौ च" इत्युत्तरपदाद्युदात्तत्वम्। अरिष्टवीरा इति। "बहुव्रीहौ प्रकृत्या०" इति पूर्वपदप्रकृतिस्वरत्वे अरिष्टशब्दः "अव्यये नञ्कुनिपातानाम्" इति अव्ययपूर्वपदप्रकृतिस्वरेण आद्युदात्तः ॥

द्वितीया ॥

इहैव ध्रुवा प्रति तिष्ठ शालेश्वावती गोमती सूनृतावती।
ऊर्जस्वती घृतवती पयस्वत्युच्छ्रयस्व महते सौभगाय ॥ २ ॥

इह। एव। ध्रुवा। प्रति। तिष्ठ। शाले। अश्वऽवती। गोऽमती। सूनृताऽवती। ऊर्जस्वती। घृतऽवती। पयस्वती। उत्। श्रयस्व। महते। सौभगाय ॥ २ ॥

हे शाले इहैव अस्मिन् देशे ध्रुवा स्थिरा सती प्रति तिष्ठ वर्तस्व। कथंभूता। अश्वावती बहुभिरश्वैरुपेता। "मादुपधाया०" इति मतुपो वत्वम्। "मन्त्रे सोमाश्वेन्द्रिय०" इत्या[दिना अश्वशब्दस्य दीर्घः। गोमती बहुभिर्गोभिर्युक्ता सूनृतावती बहुभिः प्रियसत्यवाग्भिर्बालादीनां वाणीभिर्युक्ता ऊर्जस्वती प्रभूतान्नवती। ऊर्जस्वतीति। ऊर्ज बलप्राणन]योः इत्यस्माद् असुन्॥ तदन्ताद् मतुप्। "तसौ मत्वर्थे" इति भत्वेन पदत्वाभावाद् रुत्वाद्यभावः। घृतवती बहुघृतयुक्ता पयस्वती बहुक्षीरा। सर्वत्र "भूमनिन्दाप्रशंसासु०" इति भूम्नि मतुप्। एवं बहुगुणा त्वम् अस्माकं महते प्रभूताय सौभगाय सुभगत्वाय उच्छ्रयस्व [उन्नता] भव। उत्कृष्टा भवेत्यर्थः। "सुभग मन्त्रे" इति उन्नात्रादिषु पाठाद् अञ्। "सर्वे विधयश्छन्दसि विकल्प्यन्ते" इति उत्तरपदवृद्ध्यभावः ॥

---

1 S' Kd बाहुलाशोभनगुणत्वंहिंसाराहित्यलक्षणगुणविशेषसंबंधीयवीर°. 2 S' Kd सर्वशब्दः.

तृतीया ॥

धरुण्यसि शाले बृहच्छन्दाः पूतिधान्या ।
आ त्वा वत्सो गमेदा कुमार आ धेनवः सायमास्पन्दमानाः ॥ ३ ॥

धरुणी । असि । शाले । बृहत्ऽछन्दाः । पूतिऽधान्या ।
आ । त्वा । वत्सः । गमेत् । आ । कुमारः । आ । धेनवः । सायम् ।
आऽस्पन्दमानाः ॥ ३ ॥

हे शाले त्वं धरुणी भोगजातस्य धारयित्री असि भवसि । "धारेर्णिलुक् च" इति उनन् प्रत्ययः । ततो ङीप् । यद्वा धरुणा धारकाः स्तम्भाः । प्रशस्तैः स्तम्भैरुपेता । "छन्दसीवनिपौ०" इति मत्वर्थीय ईकारः । छान्दसः सोर्लुक् ॥ तथा बृहच्छन्दाः प्रभूताच्छादना महद्भिश्छन्दोभिर्वेदैरुपेता वा पूतिधान्या पूतिगन्धोपेतजीर्णधान्ययुक्ता । बहुविधभोगदानादिनापि अक्षयधान्ययुक्ता इत्यर्थः । एवंभूतां त्वा त्वां वत्सः । जातावेकवचनम् । आ गमेत् आगच्छतु । "लिङ्याशिष्यङ्" । एवं कुमारः पुत्रादिः आ गमेत् । अस्यां शालायां गावः स्त्रियश्च वत्सपुत्रादिसमेता भवन्तु इत्यर्थः ॥ तथा धेनवः दोग्ध्यो गावः सायम् सायंकाले आस्यन्दमानाः प्रस्तुतं पय आस्रवन्त्यः आगच्छन्तु त्वाम् इति ॥

चतुर्थी ॥

इमां शालां सविता वायुरिन्द्रो बृहस्पतिर्नि मिनोतु प्रजानन् ।
उक्षन्नूद्ना मरुतो घृतेन भगो नो राजा नि कृषिं तनोतु ॥ ४ ॥

इमाम् । शालाम् । सविता । वायुः । इन्द्रः । बृहस्पतिः । नि । मिनोतु । प्रऽजानन् ॥

---

१ K K V °स्यन्दमानाः. We with A B D R S P P J. २ So we with P P J. Sâyaṇa has आस्यन्द°. ३ A B Br B D R K S P P J उच्छं°. We with S K V. ४ B °न्ता (=न्ना?); A D K R S P J V °त्ना; °न्ना° B P. We with K J V. ५ J इमाम् changed to इमम्; P इमम् changed to इमाम्; P इमम्.

---

1 S′ Kd धरुण्या. 2 S′ Kd om. प्र°. 3 S′ प्रसूतं; Kd प्रस्तुतं.

उ॒क्षन्तु॑। उ॒द्ना॑*। म॒रुत॑ः। घृ॒तेन॑। भग॑ः। न॒ः। राजा॑। नि। कृ॒षिम्।
त॒नो॒तु॒ ॥ ४ ॥

सविता सर्वस्य प्रेरको देवः प्रजानन् वायुः इन्द्रः बृहस्पतिश्च प्रजानन्। ॥प्रत्येकविवक्षया एकवचनम्॥। शालानिर्माणप्रकारं प्रकर्षेण जानन् इमां शालां नि मिनोतु स्तम्भादिस्थापनेन करोतु। ॥डुमिञ् प्रक्षेपणे॥ ॥ मरुतश्च घृतेन क्षरणशीलेन उद्ना उदकेन उक्षन्तु शालाभूमिं सिञ्चन्तु। ॥"पदन्नोमास्०" इत्यादिना उदकशब्दस्य उदन् आदेशः। भसंज्ञायाम् अल्लोपे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्॥। ततो नः अस्माकं राजा राजमानो भगः एतत्संज्ञो देवः कृषिम् शालाभूमेः कर्षणं नि तनोतु नितरां करोतु। ॥कृष विलेखने। इगुपधात् कित् [उ० ४. ११९] इति भावे इप्रत्ययः॥ ॥

पञ्चमी ॥

मानस्य पत्नि शरणा स्योना देवी देवेभिर्निमितास्यग्रे।
तृणं वसाना सुमना असत्खमथास्मभ्यं सहवीरं रयिं दाः ॥ ५ ॥

मानस्य। पत्नि। शरणा। स्योना। देवी। देवेभिः। निऽमिता। असि। अग्रे।
तृणम्। वसाना। सुऽमनाः। असः। त्वम्। अथ। अस्मभ्यम्। सहऽवीरम्। रयिम्। दाः ॥ ५ ॥

हे मानस्य पत्नि। ॥मान पूजायाम्। कर्मणि घञ्॥। माननीयस्य वास्तुपतेः पत्नि जायाभूते शाले। यद्वा मीयमानं धान्यादिकं मानम् तस्य पत्नि पालयित्रि शाले त्वं शरणा रक्षित्री स्योना सुखकरी ईदृशी देवी द्योतमाना अग्रे[2] सृष्ट्यादौ देवेभिः देवैः निर्मितासि प्राण्युपभोगाय सृष्टा भवसि ॥ सा त्वं तृणं वसाना आच्छादयन्ती। ॥वस आच्छादने इत्यस्मात् लटः शानच्॥। सुमनाः शोभनमनस्का अ-

१ P P̂ J उ॒छंतु. We with S. २ P̂ उ॒न्ना; P J उ॒त्ता. We with S.

1 S′ Kd नियमानं. 2 Kd त्वमग्रे; S′ त्वमग्रे which seems corrected into अग्रे.

सः भव । ⧖अस्तेर्लेंटि अडागमः⧗ ॥ अथ अनन्तरम् अस्मभ्यं त्वयि निवसन्त्यः सहवीरम् वीरैः पुत्रादिभिः सहितम् । ⧖"वोपसर्जनस्य" इति विकल्पनात् सहस्य सत्वाभावः⧗ । तादृशं रयिम् धनं दाः धेहि । ⧖ददातेश्छान्दसो लुङ्⧗ ॥

षष्ठी ॥

ऋतेन॒ स्थूणा॒मधि॑ रोह वंश॒ोग्रो वि॒राज॒न्नप॑ वृ॑ङ्क्ष्व॒ शत्रू॑न् ।
मा ते॑ रिषन्नुपस॒त्तारो॑ गृहाणा॑ शाले श॒तं जी॑वेम श॒रद॒ः सर्व॑वीराः॥६॥

ऋ॒तेन॑ । स्थूणा॑म् । अधि॑ । रो॒ह॒ । वं॒श॒ । उ॒ग्रः । वि॒ऽराज॑न् । अप॑ ।
वृ॒ङ्क्ष्व॒ । शत्रू॑न् ।
मा । ते॒ । रि॒षन् । उ॒प॒ऽस॒त्तारः॑ । गृ॒हाणा॑म् । शा॒ले॒ । श॒तम् । जी॒वे॒म॒ ।
श॒रदः॑ । सर्व॑ऽवीराः ॥ ६ ॥

हे वंश त्वम् ऋतेन अबाध्येन रूपेण सह स्थूणाम् शालामध्यस्तम्भम् अधि रोह अधि तिष्ठ । ततः उग्रः उद्गूर्णबलो विराजन् विशेषेण दीप्यमानः सन् शत्रून् अस्मद्वेष्यान् अप वृङ्क्ष्व अपवर्जय । ⧖वृजी वर्जने । रुधादिः⧗ ॥ हे शाले ते तव संबन्धिनां गृहाणाम् उपसत्तारः उपसदनकर्तारः । निवसन्त इत्यर्थः । माँर्षन् आर्ता हिंसिता मा भूवन् । त्वयि निवसन्तो वयं सर्ववीराः अभिलषितसर्वपुत्रपौत्रादिसमेताः शतं शरदः जीवेम ॥

सप्तमी ॥

एमां कु॑मा॒रस्तरु॑ण॒ आ व॒त्सो ज॑गा॒ता स॒ह ।
एमां प॑रि॒स्रुत॑ः कु॒म्भ आ दु॒हः क॒लशै॑रगुः ॥ ७ ॥

आ । इ॒माम् । कु॒मा॒रः । तरु॑णः । आ । व॒त्सः । ज॒गा॒ता । स॒ह ।
आ । इ॒माम् । प॒रि॒ऽस्रुतः॑ । कु॒म्भः । आ । दु॒हः । क॒लशैः॑ । अ॒गुः ॥ ७ ॥

---

१ **B** वक्ष्व. २ So **A B B**^{h} **D K K**^{m} **R S**^{m} **P P**^{2} **J V**. ३ **A P**^{2} **J** °श्रुतं॑:; **B** corrects into °श्रुतं॑:; **K K**^{m} °श्रुतं॑:. We with **D R S**^{m} **P V**. ४ **A B B**^{p} **D R P P**^{2} **J** कलशैरगुः. We with **S**^{m} and with **B**^{h} (as corrected from कलशैरगुः) and with **K K**^{m}. ५ **K P**^{2} **J** °श्रुतं॑:. We with **P**. ६ **P J** कलशैः We with **P**^{2} **J**.

इमां शालां तरुणः युवा कुमारः पुत्र आ गच्छतु ॥ तथा जगता गमनशीलेन गवादिना सह। ऋगमेः क्विपि "द्युतिगमिजुहोतीनां द्वे च" इति द्विर्वचनम्ऋ। वत्सः। ऋजातावेकवचनम्ऋ। आ गच्छतु ॥ तथा [इमां] परिस्रुतः परिस्रवणशीलस्य मधुनः कुम्भाँः आगुः आगच्छन्तु ॥ दध्नः कलँशीः दधिपूर्णा घट्यः आगुः। ऋएतेश्छान्दसो लुङ्ऋ ॥

अष्टमी ॥

पूर्णं नारि प्र भर कुम्भमेतं घृतस्य धाराममृतेन संभृताम्।
इमां पातॄनमृतेना समङ्ग्धीष्टापूर्तमभि रक्षात्येनाम् ॥ ८ ॥

पूर्णम्। नारि। प्र। भर। कुम्भम्। एतम्। घृतस्य। धाराम्। अमृतेन। समऽभृताम्।

इमाम्। पातॄन्*। अमृतेन। सम्। अङ्ग्धि। इष्टापूर्तम्। अभि। रक्षाति। एनाम् ॥ ८ ॥

हे नारि पूर्णम् उदकेन पूरितम् एतं कुम्भं प्र भर प्रहर शालां नय। कथंभूतम्। अमृतेन सुधामयोदकेन संभृताम् संपादितां घृतस्य क्षरणशीलस्य मधुघृतादेः धाराम्। कुर्वन्तम् इति शेषः ॥ इमां पात्रीम्* कलशीम् अमृतेन सुधारूपेण उदकेन समिन्धि* सम्यँगिद्धां संदीप्तां कुरु। ऋञिइन्धी दीप्तौ। लोटि व्यत्ययेन परस्मैपदम्। "हुझल्भ्यो हेर्धिः" इति हेर्धित्वे "श्नान्नलोपः" इति नलोपःऋ ॥ एनाम् प्रविश्यमानां शालाम् इष्टापूर्तम् तत्र क्रियमाणं श्रौतं स्मार्तं च कर्म अभि रक्षाति अभितः चोराग्न्यादिभयाद् रक्षतु ॥

---

१ A B Bp B[h] D K[m] R S[m] P P[2] J all read: इमां पातॄनमृतेना समङ्ग्धी°, and not पात्रीम् nor इमान् nor समिन्धि. पात्रीम् would be wrongly accented. इमाम् obviously refers to शालाम्. K and V have blindly adopted the reading of Sâyaṇa without regard to the accent of पात्रीम्, which they accent पात्रीम् like पातॄन् the older reading. २ So P P[2] J K इमाम्। पातॄन्। distinctly. ३ P P[2] J अङ्ग्धि.

---

1 S' Kd परिस्रुतः which is the reading in Sâyaṇa's text also. 2 Kd समत्समिधां; S' मत्समिद्धां. The emendation is conjectural.

नवमी ॥

इ॒मा आप॒: प्र भ॑राम्ययक्ष्मा॒ यक्ष्म॒नाश॑नी: ।
गृ॒हानुप॒ प्र सी॑दाम्य॒मृते॑न स॒हाग्निना॑ ॥ ९ ॥

इ॒माः । आप॑: । प्र । भ॒रा॒मि॒ । अ॒य॒क्ष्माः । यक्ष्म॑ऽनाशनीः ।
गृ॒हान् । उप॑ । प्र । सी॒दा॒मि॒ । अ॒मृते॑न । स॒ह । अ॒ग्निना॑ ॥ ९ ॥

इमाः कलशस्था आपः । ✕शसः स्थाने जस्✕ । प्र भरामि प्रहरामि प्रकर्षेण शालां नयामि । कीदृशीः । अयक्ष्माः यक्ष्मरहिताः यक्ष्मनाशनीः तत्सेवकानां[1] यक्ष्मनाशिनी[2]: ॥ अहमपि गृहान् उप प्र सीदामि । कीदृशः सन् । अमृतेन अविनाशिना अग्निना सह सहितः सन् ॥

[इति] तृतीयेनुवाके द्वितीयं सूक्तम् ॥

"यददः संप्रयती:" इति सूक्तं स्वाभिमतप्रदेशे नदीप्रवाहकरणे विनियुक्तम् । तत्रायं क्रमः । येन मार्गेण प्रवाहं निनीषति तं देशं प्रथमं खात्वा तत्र अनेन सूक्तेन उदकं प्रसिञ्चन् व्रजेत् ॥ तथा अनेन सूक्तेन काशशैवालपटे[3]रकवेतसशाखाः प्रत्येकम् अभिमन्त्र्य तत्र खाते[4] निखनेत् । "इदं व आपः" [७] इत्यस्या ऋचः प्रथमेन पादेन हिरण्यं खाते निदध्यात् । "अयं वत्सः" इति द्वितीयपादेन इषीका[5]ञ्जिमण्डूकं नीललोहितवर्णाभ्यां सूत्राभ्यां बद्ध्वा अभिमन्त्र्य खाते निदध्यात् । तस्य मण्डूकस्योपरि "इहेत्थम्" इति तृतीयपादेन अवकाम् अभिमन्त्र्य प्रक्षिपेत् । "यत्रेदम्" इति चतुर्थपादेन मण्डूकस्योपरि उदकं निनयेत् ॥

तथा ग्रामनगरादिकस्य नवोदकप्रवाहाद् भये संजाते नदीप्रवाहकरणे च कृष्णव्रीहिमयचरुम् कृष्णाया गोः क्षीरम् आज्यं च वै[6]तसेन स्रुवेण वरुणाय त्रिर्जुहुयात् । तथा वै[6]तसचमसे वै[6]तसीभ्याम् उ[7]पमन्थनीभ्यां दधिसक्तुमन्थम् उपमथ्य अनेन बलिहरणं कुर्यात् । ततोनेन सूक्तेन वेतसशाखाम्

1 S′Kd त्वत्सेव°. 2 S′Kd °नाशिन्य:. 3 So S′Kd, *Kaus'ika* and the *Kes'avî*. 4 S′Kd खातं. 5 S′Kd इषीकायांमंडूकं. We with *Kaus'ika*. 6 S′Kd वेत°. 7 Kd अप°.

अभिमन्त्र्य तया पाणिना वा मन्त्रितोदकेन नदीप्रवाहं सिञ्चन् व्रजेत् ॥

दूरगताया नद्याः पुनर्निवृत्तौ एतत् सूक्तं जपित्वा नदीप्रवेशमार्गे शयीत ॥

एवम् उक्तानि प्रसेचनकर्म हिरण्यकर्म[1] मण्डूककर्म पाणिकर्म इत्येतानि समुच्चयेन कार्याणीति भाष्यकारस्य दारिलस्य मतम् । विकल्पेनेत्यपरेषाम् ॥

अत्र कौशिकः । "यददः संप्रयतीरिति येनेच्छेन्नदी[2] प्रतिपद्येतेति प्रसि-
"ञ्चन् व्रजति । काशदिविधुवकवेतसान्[3] निमिनोति । इदं व आप इति
"हिरण्यम् अधिदधाति अयं वत्स इतीषीकाञ्जिमण्डूकं[4] नीललोहिताभ्यां
"सूत्राभ्यां सकक्षं बद्ध्वा । इहेत्थम् इत्यवकया प्रच्छादयति । यत्रेदम् इति
"निनयति । मारुतं क्षीरौदनं मारुतं शृतं मारुतैः परिस्तीर्य मारुतेन
"स्रुवेण मारुतेनाज्येन वरुणाय त्रिर्जुहोति । उक्तम् उपमन्थनं [दधिमन्थं]
"बलिं हृत्वा संप्रोक्षणीभ्यां प्रसिञ्चन् व्रजति । पाणिना वेत्रेण वा प्र-
"त्याहृत्योपरि निपद्यते" इति [कौ° ५. ४] ॥

तथा अनेनैव सूक्तेन मरुद्भ्यो मान्त्रवर्णिकीभ्यो वा देवताभ्य आज्यहोमम् काशदिविधुवकवेतसाख्यान् ओषधिविशेषान् एकस्मिन् पात्रे प्रक्षिप्य संपात्य अभिमन्त्र्य अप्सु मध्येऽधोमुखं निनयनम् तेषामेव काशादीनां संपातिताभिमन्त्रितानाम् अप्सु विस्रावनम् स्वशिरसो मेषशिरसश्च अभिमन्त्रितस्य अप्सु प्रक्षेपणम् मानुषकेशजरदुपानहां वंशाग्रे प्रबन्धनम् तुषसहितम् आमपात्रम् अभिमन्त्रितोदकेन प्रोक्ष्य त्रिपादे शिक्ये निधाय उदकमध्ये निधानं चेत्येतान्यभिवर्षणकर्माणि वृष्टिकामः कुर्यात् ॥

तथा अर्थोत्थापनविघ्नशमनकर्मणि अनेनैव सूक्तेन आज्यहोमं संपातिताभिमन्त्रितघटोदकेन आत्मावनम् अवसेकं च कुर्यात् ॥

सूत्रितं हि । "अर्थम् उत्थास्यन्नुपदधीत" इति प्रक्रम्य "अम्बयो
"यन्ति[१. ४] शंभुमयोभू[१. ५. ६] हिरण्यवर्णाः[१. ३३] यददः[३.
"१३]" इत्यादिना "अभिवर्षणावसेचनानाम्" इत्यन्तेन [कौ° ५. ५] ॥

---

1 S′ Kd omit °कर्म. 2 S′ Kd येनेच्छन्नदीप्रपद्येतेति. We with *Kaus'ika*. 3 S′ Kd °दिविधुक°. 4 S′ Kd इतीषीकायांमंडूकं. We with *Kaus'ika*. Dârila: इषीकेव रेखा यस्य स इषीकाञ्जिः.

तत्र प्रथमा ॥

यद्दः संप्रयतीरहावनदता हते ।
तस्मादा नद्योऽ३ नाम स्थ ता वो नामानि सिन्धवः ॥ १ ॥

यत् । अदः । सम्ऽप्रयतीः । अहौ । अनदत । हते ।
तस्मात् । आ । नद्यः । नाम । स्थ । ता । वः । नामानि । सिन्धवः ॥ १ ॥

अदः अमुष्मिन् । ⁂ "सुपां सुलुक्०" इति सप्तम्या लुक् ⁂ । अहौ आहन्तव्ये मेघे हते ताडिते हे आपः यूयं यत् यस्मात् संप्रयतीः संभूय इतस्ततश्च प्रयान्त्यः अनदत शब्दं कृतवत्यः स्थ । ⁂ नद अव्यक्ते शब्दे । अस्मात् लङि मध्यमबहुवचने रूपम् । "निपातैर्यद्यदिहन्त०" इति निघातप्रतिषेधः । "अन्येषामपि दृश्यते" [इति] सांहितिको दीर्घः । संप्रयतीरिति । संप्रपूर्वाद् एतेः शतरि इणो यणि "वा छन्दसि" इति पूर्वसवर्णदीर्घत्वम् । "शतुरनुमः०" इति नद्या उदात्तत्वम् ⁂ । तस्मात् कारणाद् यूयम् आ आभिमुख्येन अव्यवधानेनैव नद्यो नाम [स्थ] भवथ । ⁂ अनेन नदनान्नद्य इति निर्वचनं कृतं भवति । पचादिषु नदट् इति पाठात् "टिड्ढाणञ्०" इत्यादिना ङीप् । "यस्येति०" लोपे उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम् । "उदात्तस्वरितयोः०" इति विभक्तिः स्वर्यते ⁂ । हे सिन्धवः स्यन्दनशीला आपः वः युष्माकं नामानि आपः उदकम् इत्यादीनि । अन्यान्यपि सर्वाणि [ता] तानि तादृशानि । अन्वर्थानीत्यर्थः । ⁂ ता इति । "शेश्छन्दसि०" इति शेर्लोपः ⁂ ॥

द्वितीया ॥

यत् प्रेषिता वरुणेनाच्छीभं समवल्गत ।
तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु ष्ठन ॥ २ ॥

यत् । प्रऽइषिताः । वरुणेन । आत् । शीभम् । सम्ऽअवल्गत ।

---

१ D S[m] १ for ३. We with A B B[r] B[h] K K[m] R V. २ P[2] नद्यः. We with P J. ३ P P[3] J K ताः. We with S.

तत्। आप्नोत्। इन्द्रः। वः। यतीः। तस्मात्। आपः। अनु। स्तन॥ २॥

आप इति नाम व्युत्पादयति। यत् यदा वरुणेन राज्ञा आदित्येन वा प्रेषिताः प्रेरिता यूयम् आत् अनन्तरं शीभम्। क्षिप्रनामैतत्। शीघ्रं समवल्गत संभूय नृत्यन्त्य इव वेष्टितवत्यः। वल्गतिर्गत्यर्थो भौवादिकः। यद्योगेन निघातप्रतिषेधे "तिङि चोदात्तवति" इति गतेरनुदात्तत्वम्। तत् तदानीं यतीः गच्छन्तीः वः युष्मान् इन्द्रः आप्नोत्। तस्मात् कारणात् अनु अनन्तरं ततःप्रभृति आपः स्तन अप्शब्दवाच्या भवत। यद्वा आप इति नाम अनु ष्टन अनुभवत। आप्नोतेः कर्मणि क्विपि आप्नोतेर्ह्रस्वश्च [उ॰ २. ५८] इति ह्रस्वत्वे "अप्तृन्तृच्स्वसृनप्तृनेष्टृ॰" इत्यादिना सर्वनामस्थाने दीर्घः। स्तनेति। अस्तेर्लोण्मध्यमबहुवचनस्य तनादेशः। "उपसर्गप्रादुर्भ्याम् अस्तिर्यच्परः" इति षत्वस्याप्रसङ्गात् सुषामादित्वेन षत्वं वेदितव्यम्॥

तृतीया॥

अपकामं स्यन्दमाना अवीवरत वो हि कम्।
इन्द्रो वः शक्तिभिर्देवीस्तस्माद् वार्नाम वो हितम्॥ ३॥

अपऽकामम्। स्यन्दमानाः। अवीवरत। वः। हि। कम्।
इन्द्रः। वः। शक्तिऽभिः। देवीः। तस्मात्। वारिति। नाम। वः। हितम्॥३॥

वार् इति नाम प्रदर्शयति। अपकामम् विनैव कामेन स्यन्दमानाः सदा स्यन्दनं कुर्वाणाः वः युष्मान् इन्द्रः वः युष्माकं शक्तिभिः हेतुभिः अवीवरत वृतवान् युष्मान् स्वात्मसात् कर्तुम् ऐच्छत्। वर ईप्सायाम्। चुरादिरदन्तः। व्यत्ययेन सन्वद्भावः। वृणोतेर्वा स्वार्थिको णिच्। हिकम् इति हिशब्दार्थे। हिकम नुकम इति नवोत्तराणि पदानि [निघ॰ ३. १२] इति यास्केन परिपठितत्वात्। हे

---

१ So we with **A B B^{h} D K R S^{m} V**. २ **S K V** हितम्. We with **A B B^{p} B^{h} D K^{m} R S^{m} P P^{2} J V**. ३ **K** वः (!).

---

1 **S′ Kd** पेच्छन्.

देवीः देव्यो देवनशीलाः तस्मात् कारणाद् वः युष्माकं वार् इति नाम हिकम् प्रसिद्धम् । ॒वृणोतेर्ण्यन्तात् कर्मणि क्विप्॒ ॥

चतुर्थी ॥

एकों वो देवोप्यंतिष्ठत् स्यन्दंमाना यथावशम् ।
उदांनिषुर्महीरिति तस्मांदुदकमुंच्यते ॥ ४ ॥
एकंः । वः । देवः । अपि । अतिष्ठत् । स्यन्दंमानाः । यथाऽवशम् ।
उत् । आनिषुंः[1] । महीः । इति । तस्मांत् । उदकम् । उच्यते ॥ ४ ॥

उदकशब्दं निर्वक्ति । एकः असहायो देवः इन्द्रो यथावशम् यथाकामं स्यन्दमानाः इतस्ततश्च स्यन्दनशीला वः युष्मान् अप्यतिष्ठत् [अध्यतिष्ठत्] । अपिशब्दः अध्यर्थे । तेन इन्द्रबहुमानेन आपो वयं महीः महत्यो जाता इति उदानिषुः उच्छ्वसितवत्यः । ॒अन प्राणने । लुङि रूपम्॒ । तस्मात् कारणाद् उदकम् इति अपां नाम उच्यते निरुच्यते उदननात् । ॒उदकम् इति । उत्पूर्वाद् अनितेरौणादिकः कप्रत्ययो नकारलोपश्च॒ ॥

पञ्चमी ॥

आपों भद्रा घृतमिदापं आसन्नग्नीषोमौं बिभ्रत्याप इत् ताः ।
तीव्रो रसों मधुपृचांमरंगम आ मां प्राणेनं सह वर्चसा गमेत् ॥ ५ ॥
आपंः । भद्राः । घृतम् । इत् । आपंः । आसन् । अग्नीषोमौं । बिभ्रति । आपंः । इत् । ताः ।
तीव्रः । रसंः । मधुऽपृचांम । अरम्ऽगमः । आ । मा । प्राणेनं । सह । वर्चसा । गमेत् ॥ ५ ॥

आपः भद्राः भन्दनीयाः । ता एव घृतम् आज्यम् आसन् । तृणादिनिष्पादनेन घृतात्मिका भवन्ति । यद्वा घृतमित् अग्नौ हुतम् आज्यमेव आप आसन् ।

---

१ P[3] आनिषुः. We with P J K.

अग्नौ प्रास्ताहुतिः सम्यग् आदित्यम् उपतिष्ठते ।
आदित्याज्जायते वृष्टिः

इति [म°स्मृ°३. ७६] स्मरणात् ॥ किं च ता एव आपः अग्नीषोमौ बिभ्रति धारयन्ति । अन्नादिहविर्निष्पत्त्या अग्निम् रश्मिवृद्ध्या सोमम् । ✠"ईदग्नेः°" इति ईत्वम् । "अग्नेः स्तुत्स्तोमसोमाः" इति षत्वम् । "देवताद्वन्द्वे च" इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम्✠ ॥ तादृशीनाम् अपां [मधुपृचाम्] मधुना रसेन संपृक्तानां तीव्रः उद्भूतो रसः अरंगमः पर्याप्तगमनः न कदाचिदपि क्षीणः प्राणेन चक्षुरादिना वर्चसा बलेन च सह मा माम् आगन्[*] आगच्छतु । तदधीनत्वात् प्राणादिस्थितेः । ✠गमेश्छान्दसे लुङि "मन्त्रे घस°" इति च्लेर्लुक् । "मो नो धातोः" इति नत्वम्✠ ॥

षष्ठी ॥

आदित् पश्यामि उत वा शृणोम्या मा घोषो[1] गच्छति वाङ् मासाम् ।
मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः ॥ ६ ॥

आत् । इत् । पश्यामि । उत । वा । शृणोमि । आ । मा । घोषः । गच्छति । वाक् । मा । आसाम् ।
मन्ये । भेजानः । अमृतस्य । तर्हि । हिरण्यऽवर्णाः । अतृपम । यदा । वः ॥६॥

रसः प्राणेन सह आगच्छतु इत्युक्तम् । तद् इदानीं समर्थयते । आदित् अनन्तरमेव अहं पश्यामि । उत वा अपि च शृणोमि ॥ घोषः शब्दः उच्चार्यमाणश्च मा माम् आ गच्छति ॥ तथा वाक् वागिन्द्रियम् । कर्मेन्द्रियोपलक्षणम् एतत् । तच्च आसाम् अपां युष्माकं रसागमनेन मा माम् । आ गच्छतीत्यनुषङ्गः । ✠वाग्[*]मेति । संहितायां "यरोनुना[सिकेनुना]सिको वा" इति विकल्पेन अनुनासिकादेश[*]भावः✠ । किं बहुना । तर्हि तदानीम् अमृतस्य भेजानः अमृतमेव भजन् अहं मन्ये तर्कयामि । ✠पूर्ववत् कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी । भेजान इति । भजेश्छान्दसे लिटि "तृ[फल]भजत्रपश्च" इत्येत्वाभ्यासलो-

१ B गोषो.

पौ ॥ । कदा एवं वितर्क्यत इति चेत् । उच्यते । यदा हे हिरण्यवर्णाः हितरमणीयवर्णयुक्ता आपः वः युष्माकं युष्मत्सेवनेन[1] अतृपम् सुहितोभवम् । ॥ तृप तृन्फ तृप्तौ । तौदादिकः । लङि उत्तमैकवचने रूपम् । सुहितार्थयोगेत्र षष्ठी ॥ ॥

सप्तमी ॥

इ॒दं व॑ आपो हृद॑यमयं व॒त्स ऋ॒तावरीः ।
इ॒हेत्थमेत॑ शकरी॒र्यत्रे॒दं वे॒शया॑मि वः ॥ ७ ॥

इ॒दम् । व॒: । आ॒पः॒ । हृद॑यम् । अ॒यम् । व॒त्सः । ऋ॒त॒ऽव॒री॒: ।
इ॒ह । इ॒त्थम् । आ । इ॒त॒ । श॒क॒री॒: । यत्र॑ । इ॒दम् । वे॒शया॑मि । व॒: ॥ ७ ॥

हे आपः वः युष्माकम् इदम् हिरण्यं खाते प्रक्षिप्यमाणं हृदयं हृदयस्थानीयम्[2] । अपां रेतोरूपत्वात् हिरण्यस्य हृदयरूपता । श्रूयते हि । "आपो वरुणस्य पत्नय आसन् । ता अग्निरभ्यध्यायत्[3] । ताः समभवत् । तस्य रेतः परापतत् । तद्धिरण्यम् अभवत्" इति [तै॰ब्रा॰१.१.३.८] । यद्वा हृदयम् अन्तःकरणम् । यथा लोके हृदयं विहाय क्षणमपि शरीरं नावतिष्ठते किं तु सहैव वर्तते तथा यूयमपि हृदयरूपं हिरण्यं प्रति [एत] । आगच्छतेत्यर्थः ॥ तथा हे ऋतावरीः ऋतवर्यः । ऋतं सत्यं यज्ञो वा यासां तास्तथोक्ताः । ॥ ऋतशब्दात् "छन्दसीवनिपौ॰" इति मत्वर्थीयो वनिप् । "वनो र च" इति ङीब्रेफौ । "अन्येषामपि दृश्यते" इति ऋतशब्दस्य सांहितिको दीर्घः । "वा छन्दसि" इति शसः पूर्वसवर्णदीर्घत्वम् ॥ । सत्योपेताः हे आपः अयम् खाते प्रक्षिप्यमाणो मण्डूकः वत्सः युष्माकं वत्सस्थानीयः । यथा लोके गावो वत्सम्[4] अनुधावन्ति एवं यूयमपि वत्सस्तुतमण्डूकम् अनुधावतेति भावः ॥ हे शकरीः शकर्यः शक्ताः अभिमतफलप्रदानसमर्था आपः । ॥ शकॢ शक्तौ इत्यस्माद् "अन्येभ्योपि दृश्यन्ते" इति वनिप् । पूर्ववद् ङीब्रेफपूर्वसवर्णदीर्घाः ॥ । इह अस्मिन् खातदेशे इत्थम् अनेन प्रकारेण । य-

1 S′ Kd युष्मत्———नेन for युष्मत्सेवनेन. 2 S′ Kd °स्थानंयम् for °स्थानीयम्. 3 S′ and Kd °भ्यधायत्. 4 S′ Kd यथामनु for वत्सम् अनु.

यात्र मण्डूकस्योपरि प्रक्षिप्यमाणा अवका रूढमूला भवन्ति तथा एत आगच्छत स्थिरप्रवाहा भवत ॥ यत्र यस्मिन् खातदेशे इदम् इदानीं वः युष्मान् वेशयामि प्रवेशयामि निनयामि । यद्वा इदम् इति उदकनाम । वः युष्माकम् अंशभूतम् इदम् उदकं यत्र अवकाछन्ने मण्डूके वेशयामि । इहेति पूर्वत्र संबन्धः ॥

इति तृतीयेनुवाके तृतीयं सूक्तम् ॥

"सं वो गोष्ठेन" इति सूक्तेन गोपुष्टिकामः अभिनवं [पयो गृष्टेः श्लेष्ममिश्रितं कृत्वा संपात्य अभिमन्त्र्य अश्नाति ॥

तथा अनेन सूक्तेन गाम् अभिमन्त्र्य ददाति गोपुष्टिकाम एव ॥

एवम् अनेन सूक्तेन उदपात्रम् अभिमन्त्र्य गोवाटे निनयति ॥

अपि च करीषं सव्येन हस्तेन आक्रम्य दक्षिणेन अर्धं विक्षिपति गोवाटे गोपुष्टिकामः ॥

तथैव अनेन सूक्तेन सारूपवत्से ओदने शकृत्पिण्डान् गुग्गुलुलवणे च एकीकृत्य पश्चाद् अग्नेर्निखनति त्रिरात्रं यावत् । चतुर्थेहनि प्रातः संपात्य अभिमन्त्र्य अश्नाति । अविकृतश्चेत् स ओदनः । विकृते तु सति अनशनम् । अनशितेपि च फलं संपन्नम् इति मन्तव्यम् ॥

उक्तं हि कौशिकेन । "सं वो गोष्ठेन ३. १४ प्रजावतीः ७. ७९ प्र-
"जापतिः ९. ७ इति गोष्ठकर्माणि । गृष्टेः पीयूषं श्लेष्ममिश्रम् अश्नाति ।
"गां ददाति । उदपात्रं निनयति । समुह्य सव्येनाधिष्ठायार्धं दक्षिणेन
"विक्षिपति । सारूपवत्से शकृत्पिण्डान् गुग्गुलुलवणे प्रतिनीय पश्चाद्
"अग्नेर्निखनति] । तिसृणां प्रातरश्नाति" । [कौ° ३. २] इति ॥

तत्र प्रथमा ॥

सं वो गोष्ठेन सुषदा सं रय्या सं सुभूत्या ।
अहर्जातस्य यन्नाम तेना वः सं सृजामसि ॥ १ ॥

---

1 S′Kd omit all that part of the introduction which we have enclosed in brackets. The restoration is based upon *Kaus'ika* and his two commentators Dârila and Kes'ava.

सम् । वः । गोऽस्थेन । सुऽसदा । सम् । रय्या । सम् । सुऽभूत्या ।
अहःऽजातस्य । यत् । नाम । तेन । वः । सम् । सृजामसि ॥ १ ॥

हे गावः वः युष्मान् सुषदा । सुखेन सीदन्ति निवसन्ति गावोऽत्रेति सुषत् । ॥ सदेरधिकरणे क्विप् ॥ । सुखनिवासेन गोष्ठेन गोशालया । सं सृजामसि इति व्यवहितक्रियापदेन सर्वत्र संबन्धः । संसृजामः । तथा रय्या आहारादिरूपेण धनेन संसृजामः ॥ सुभूत्या समृद्ध्या च संसृजामः ॥ तथा अहर्जातस्य । अहन्यहनि जायत इत्यहर्जातः प्राणिविशेषः । तस्य यन्नाम अहर्जात इति तेन नाम्ना वः युष्मान् सं सृजामसि संसृजामः । एतन्नामयोगेन गवां पुत्रपौत्रादिरूपेण अहरहरुत्पत्तिरुक्ता ॥

द्वितीया ॥

सं वः सृजत्वर्यमा सं पूषा सं बृहस्पतिः ।
समिन्द्रो यो धनंजयो मयि पुष्यत यद् वसु ॥ २ ॥

सम् । वः । सृजतु । अर्यमा । सम् । पूषा । सम् । बृहस्पतिः ।
सम् । इन्द्रः । यः । धनम्ऽजयः । मयि । पुष्यत । यत् । वसु ॥ २ ॥

[हे गावः अर्यमा एतन्नामको देवः वः युष्मान् सं सृजतु] उत्पादयतु । पूषा पोषकः समृद्धिकरो देवः [सं] सृजतु । बृहस्पतिर्देवः सं सृजतु । य इन्द्रः धनंजयः । [धनानि] शत्रुसंबन्धीनि जयति अपहरतीति धनंजयः । ॥ "संज्ञायां भृतृवृजि[धारि]सहि°" इत्यादिना खच् । "अरुर्द्विषदजन्तस्य मुम्" इति पूर्वपदस्य मुम आगमः । चिन्स्वरेण अन्तोदात्तः ॥ । स इन्द्रः सं सृजतु । एवम् अर्यमादिभिरुत्पाद्य संवर्धिता हे गावः यूयं यद् वसु क्षीरघृतादिकं धनम् अस्ति तद् मयि साधके पुष्यत पोषयत । ॥ पुष पुष्टौ । दैवादिकः । "युष्मदस्मदोर्ङसि[2]" "ङयि च[2]" इति अस्मद आद्युदात्तत्वम्[3] ॥

तृतीया ॥

संजग्माना अबिभ्युषीरस्मिन् गोष्ठे करीषिणीः ।

---

1 S′ Kd भूत्या for सुभूत्या. Sâyaṇa's text: संभूत्या. 2 So S′ Kd. 3 S′ Kd उदात्तत्वम्.

बिभ्रतीः सोम्यं मध्वनमीवा उपेतन ॥ ३ ॥
सम्ऽअगग्माना: । अबिभ्युषीः । अस्मिन् । गोऽस्थे । करीषिणीः ।
बिभ्रतीः । सोम्यम् । मधु । अनमीवाः । उपऽएतन ॥ ३ ॥

अस्मिन् मदीये गोष्ठे संजग्माना: पुत्रपौत्रादिभिः संगच्छमानाः । सं-पूर्वाद् गमेरकर्मकात् छान्दसो लिट् । "समो गम्यृच्छि०" इत्यात्मनेपदविधानात् कानच् । अबिभ्युषीः चोरव्याघ्रादिभ्यः अबिभ्यत्यः । जिभी भये इत्यस्मात् छान्दसे लिटि क्वसुः । उगित्त्वाद् ङीप् । "वसोः संप्रसारणम्" । छान्दसो जसः पूर्वसवर्णदीर्घः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ तथा करीषिणीः । करीषं शकृत् । भूम्नि मत्वर्थीय इनिः । चिरकालजीवनेन प्रभूतकरीषयुक्ता इत्यर्थः । अनमीवाः अमीवो रोगस्तद्रहिताः । सोम्यम् सोममयम् । "सोमः खलु [वै] सांनाय्यम्" [तै० ब्रा० ३, २, ३, ११] इति श्रुतेः । सोमार्हं वा । "सोममर्हति यः" "मये च" इति सोमशब्दाद् यप्रत्ययः । तथाविधं मधु मधुरसं क्षीरं बिभ्रतीः धारयन्त्यः पीनोध्यः सत्यः उपेतन उपेत उपगच्छत । "तप्तनप्तनथनाश्च" इति तस्य तनादेशः ॥

चतुर्थी ॥

इहैव गाव एतनेहो शकेव पुष्यत ।
इहैवोत प्र जायध्वं मयि संज्ञानमस्तु वः ॥ ४ ॥
इह । एव । गावः । आ । इतन । इहो इति । शकाऽइव । पुष्यत ।
इह । एव । उत । प्र । जायध्वम् । मयि । समऽज्ञानम् । अस्तु । वः ॥ ४ ॥

हे गावः यूयम् इहैव मदीये गोष्ठ एव एतन आगच्छत । इहो इह उ । उशब्दः अवधारणे । इहैव शकेव शका मक्षिका सा यथा क्षणेनैव समृद्धा असंख्याता भवति तथा यूयं पुष्यत भूयस्यो भवत ॥ उत अपि च इहैव गोष्ठे प्र जायध्वम् पुत्रपौत्रादिरूपेण प्रजाता भवत । "ज्ञा-

---

१ So our MSS. and Vaidikas. २ A गाव ए°. ३ P P² J गावः. We with the Saṁhitâ.

---

1 S' Kd उगितत्वा°. 2 S' Kd इह for इहैव. 3 S' Kd क्षपेणैव.

जनोर्जा" इति जादेशः ॥ । मयि साधके वः युष्माकं समृद्धाना संज्ञानम् संप्रीतिरस्तु । मां विहाय न गच्छतेति भावः ॥

पञ्चमी ॥

शिवो वो गोष्ठो भवतु शारिशाकेव पुष्यत ।
इहैवोत प्र जायध्वं मया वः सं सृजामसि ॥ ५ ॥
शिवः । वः । गोऽस्थः । भवतु । शारिशाकाऽइव । पुष्यत ॥
इह । एव । उत । प्र । जायध्वम् । मया । वः । सम् । सृजामसि ॥ ५ ॥

हे गावः वः युष्माकं गोष्ठः वासस्थानं शिवः सुखकरो भवतु ॥ यूयं शारिशाकेव । क्षणेन सहस्रशोऽभिवर्धमानाः प्राणिविशेषाः शारिशाकाः । तद्वत् पुष्यत समृद्धा भवत ॥ इहैवोतेति निगदसिद्धोर्थः ॥

षष्ठी ॥

मया गावो गोपतिना सचध्वमयं वो गोष्ठ इह पोषयिष्णुः ।
रायस्पोषेण बहुला भवन्तीर्जीवा जीवन्तीरुप वः सदेम ॥ ६ ॥
मया । गावः । गोऽपतिना । सचध्वम् । अयम् । वः । गोऽस्थः । इह ।
पोषयिष्णुः ।
रायः । पोषेण । बहुलाः । भवन्तीः । जीवाः । जीवन्तीः । उप । वः ।
सदेम ॥ ६ ॥

हे गावः यूयं गोपतिना गोस्वामिना मया सचध्वम समवेता भवत । ष्वच समवाये । भौवादिकः । गोपतिना । गवां पतिः गोपतिः । "पत्यावैश्वर्ये" इति पूर्वपदप्रकृतिस्वरत्वम ॥ इह मदीये गृहे अयं गोष्ठः वः युष्मान् पोषयिष्णुः पोषकः । पोषयतेः "णेश्छन्दसि" इति इष्णुच् प्रत्ययः । "न लोकाव्यय०" इति षष्ठीनिषेधाद् व इति द्वितीया ॥ रायः धनस्य पोषेण । "षष्ठ्याः पतिपुत्र०" इति विसर्जनीयस्य सत्वम ॥ । धनसमृद्ध्या बहु-

१ B D इहैवोत प्र°. २ P गावः; P गावः corrected to गावः. We with J K.

1 S' Kd °विशेषः. 2 S' Kd गोस्वामिना गोस्वामिना.

लाः असंख्याता भवन्तीः जीवन्तीः चिरकालजीवनोपेता वः युष्मान् जीवाः चिरजीविनो वयम् उप सदेम उपगच्छेम । ॒सदेराशीर्लिङि "लिङ्याशिष्यङ्" इति अङ् प्रत्ययः ॒ ॥

इति तृतीयेनुवाके चतुर्थं सूक्तम् ॥

"इन्द्रम् अहं वणिजम्" इति वाणिज्यलाभार्थं [विनियुज्यते । विक्रयार्थं पण्यानि विपणिं नयन् वणिक् कर्म वाणिज्यलाभार्थं कुर्यात् । तद् यथा । "इन्द्रम् अहम्" इति सूक्तेन वस्त्रं वस्त्रं वा पूगीफलं वा अश्वान् वा हस्तिनो वा रत्नादि वा संपात्य अभिमन्त्र्य तत उत्थापयति । सूत्रितं हि । "इन्द्रम् अहम् इति पण्यं संपातवद् उत्थापयति" इति कौ० ७. १] ॥

[तथा अनेनैव सूक्तेन पण्यकामः इन्द्रं यजते उपतिष्ठते वा । सूत्रितम् । "इन्द्रम् अहम् इति पण्यकामः" इति कौ० ७. १०] ॥

[तथा ऋव्याच्छमने कर्मणि "विश्वाहा ते" ८ इति ऋचा पूर्णाहुतिं जुहोति । सूत्रितं च । "विश्वाहा ते ८ इति पूर्णाहुतिं जुहोति" इति कौ० ९. २] ॥

तत्र प्रथमा ॥

इन्द्रंमहं वणिजं चोदयामि स न ऐतु पुरएता नो अस्तु ।
नुदन्नरातिं परिपन्थिनं मृगं स ईशानो धनदा अस्तु मह्यम् ॥ १ ॥

इन्द्रंम । अहम् । वणिजम् । चोदयामि । सः । नः । आ । एतु । पुरःएता । नः । अस्तु ।
नुदन् । अरातिम् । परिऽपन्थिनम् । मृगम् । सः । ईशानः । धनऽदाः । अस्तु । मह्यम् ॥ १ ॥

अहम् व्यवहर्ता इन्द्रम् परमैश्वर्योपेतं देवं वणिजम् वाणिज्यकर्तारं चोदयामि प्रेरयामि प्रवर्तयामि । ॒णुद प्रेरणे ॒ ॥ सः वणिक्केन प्रेरित इन्द्रो नः अस्मान् ऐतु आगच्छतु । आगत्य च नः अस्माकं पुरएता पुरतो गन्ता अस्तु भवतु । ॒"पूर्वाधरावराणाम् असि पुरधवश्चैषाम्" इति पूर्वशब्दाद् असिप्रत्ययः तत्संनियोगेन पुरादेशश्च ।

शत्रन्तेन समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । किं कुर्वन् । अरातिम् वाणिज्यविघातकं शत्रुं परिपन्थिनम् पर्यवस्थातारं मार्गनिरोधकं चोरम् । "छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि" इति इनिप्रत्ययान्तो निपातितः । मृगम् व्याघ्रादिकं च नुदन् हिंसन् ईशानः ईश्वरो नियन्ता स इन्द्रः मह्यम् वणिजे धनदाः वाणिज्यलाभरूपधनप्रदाता अस्तु भवतु । ईशान इति । ईश ऐश्वर्ये । अदादित्वात् शपो लुक् । अनुदात्तेत्त्वात् "°लसार्वधातुक°" [इति] अनुदात्तत्वे धातुस्वरः । धनदाः । ददातेः "आतो मनिन्°" इति विच् प्रत्ययः ॥

द्वितीया ॥

ये पन्थानो बहवो देवयानां अन्तरा द्यावापृथिवी संचरन्ति ।
ते मा जुषन्तां पयसा घृतेन यथा क्रीत्वा धनमाहराणि ॥ २ ॥

ये । पन्थानः । बहवः । देवऽयानाः । अन्तरा । द्यावापृथीवी इति । समऽचरन्ति ।
ते । मा । जुषन्ताम् । पयसा । घृतेन । यथा । क्रीत्वा । धनम् । आऽहराणि ॥ २ ॥

ते[1] प्रसिद्धा देवयानाः देवा यान्ति येष्विति देवयानाः । अधिकरणे ल्युट् । देवानुकूल्ययुक्ता[2] इत्यर्थः । यद्वा दीव्यन्ति व्यवहरन्तीति देवा वणिजः । ते यत्र यान्ति ते देवयानाः । प्रहता इत्यर्थः । ईदृशा बहवः बहुदेशसंबन्धिनो ये पन्थानः मार्गाः द्यावापृथिवी अन्तरा द्यावापृथिव्योर्मध्ये संचरन्ति वर्तन्ते । द्यौश्च पृथिवी च द्यावापृथिव्यौ । "दिवो द्यावा" इति द्यावादेशः । "वा छन्दसि" इति पूर्वसवर्णदीर्घः । "नोत्तरपदेनुदात्तादौ°" इति प्रतिषेधस्य "°अपृथिवीरुद्रपूषमन्थिषु" इति पर्युदस्तत्वाद् "देवताद्वन्द्वे च" इत्युभयपदप्रकृतिस्वरत्वम् । "अन्तरान्तरेण युक्ते" इति द्वितीया । ते मार्गाः पयसा घृतेन च मा मां जुषन्ताम् सेवन्ताम् । मार्गश्रमनिवर्तकक्षीरघृतोपलक्षितान्नपानोपेता

1 So S′Kd. Sâyaṇa's reading appears from his commentary to be ये ते पन्थानो for ये पन्थानो. His text also has: ये ते पंथानो. 2 S′Kd दैवानु°.

भवन्तु इत्यर्थः । यथा येन प्रकारेण अहं क्रीत्वा पण्यं विक्रीय धनम् लाभसहितं मूल्यधनम् आहराणि स्वगृहं प्रापयाणि । तथा जुषन्ताम् इति संबन्धः । ⧖ हरतेः प्रार्थनायां लोट् ⧖ ॥

तृतीया ॥

इ॒ध्मेना॑ग्न इ॒च्छमा॑नो घृ॒तेन॑ जु॒ह्वोमि॑ ह॒व्यं त॑र॒से॒ बला॑य ।
याव॒दीशे॒ ब्रह्म॑णा॒ वन्द॑मान इ॒मां धिय॑ꣳ शत॒सेया॑य दे॒वीम् ॥ ३ ॥

इ॒ध्मेन॑ । अ॒ग्ने॒ । इ॒च्छमा॑नः । घृ॒तेन॑ । जु॒ह्वोमि॑ । ह॒व्यम् । त॒र॒से । बला॑य ॥
याव॑त् । ईशे॑ । ब्रह्म॑णा । वन्द॑मानः । इ॒माम् । धिय॑म् । श॒त॒ऽसेया॑य ।
दे॒वीम् ॥ ३ ॥

हे अग्ने इच्छमानः वाणिज्यलाभं कामयमानः । ⧖ इषु इच्छायाम् । व्यत्ययेन शानच् । "इषुगमियमां छः" इति छादेशः । "०अदुपदेशाल्लसार्वधातुक०" [इति] अनुदात्तत्वे शप्प्रत्ययस्वरः[1] ⧖ । सोहम् इध्मेन इन्धनसाधनेन समित्समूहेन घृतेन आज्येन च सह हव्यम् हविः जुहोमि । किमर्थम् । तरसे वेगाय शीघ्रगमनाय बलाय शरीरसामर्थ्याय च । ब्रह्मणा मन्त्रेण स्तोत्ररूपेण वन्दमानः त्वां स्तुवन् देवीम् द्योतमानां व्यवहारकुशलाम् इमाम् मदीयां धियम् बुद्धिं शतसेयाय । शतम् इति[2] अपरिमितनाम । असंख्यातधनलाभाय यावद् अहम् ईशे शक्नोमि लब्धुम् । तावज्जुहोमीति संबन्धः । यद्वा यावद् अहम् ईशे ईश्वरो धनाढ्यो भवामि तावत् स्तोत्रेण स्तुवन् द्योतमानाम् इमां धियम् । धीरिति कर्मनाम । इदम् वाणिज्यलाभनिमित्तं होमलक्षणं कर्म । करोमीति शेषः । ⧖ ईश इति । ईश ऐश्वर्ये । लटि उत्तमैकवचने अनुदात्तेत्वात् "०लसार्वधातुक०" [इति] अनुदात्तत्वे धातुस्वरः । "यावद्यथाभ्याम्" इति निघातप्रतिषेधः । शतसेयायेति । षणु दाने । व्यत्ययेन यत्प्रत्यये "[ये] विभाषा" इत्यात्वे "ईद्यति" इति ईत्वे गुणः । "यतोऽनावः" इत्याद्यु-

१ Such is the accent read by our MSS. and Vaidikas. The *Rigveda* has: जुहोमि.

1 S' Kd शप्प्रत्ययः. 2 S' Kd शतसहस्रम् for शतम्.

दात्तत्वे धातुस्वरः । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । यद्वा धातूनाम् अनेकार्थत्वात् षो अन्तकर्मणीत्यस्मादेव यत् प्रत्ययः ॥

इमामग्ने शरणिं मीमृषो नो यमध्वानमगाम दूरम् ।
शुनं नो अस्तु प्रपणो विक्रयश्च प्रतिपणः फलिनं मा कृणोतु ।
इदं हव्यं संविदानौ जुषेथां शुनं नो अस्तु चरितमुत्थितं च ॥ ४ ॥

इमाम् । अग्ने । शरणिम् । मीमृषः । नः । यम् । अध्वानम् । अगाम । दूरम् । शुनम् । नः । अस्तु । प्रऽपणः । विऽक्रयः । च । प्रतिऽपणः । फलिनम् । मा । कृणोतु ।
इदम् । हव्यम् । सम्ऽविदानौ । जुषेथाम् । शुनम् । नः । अस्तु । चरितम् । उत्ऽथितम् । च ॥ ४ ॥

येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तन्मे भूयो भवतु मा कनीयोग्ने सातघ्नो देवान् हविषा नि षेध ॥ ५ ॥

येन । धनेन । प्रऽपणम् । चरामि । धनेन । देवाः । धनम् । इच्छमानः ॥
तत् । मे । भूयः । भवतु । मा । कनीयः । अग्ने । सातऽघ्नः । देवान् । हविषा । नि । सेध ॥ ५ ॥

येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तस्मिन् म इन्द्रो रुचिमा दधातु प्रजापतिः सविता सोमो अग्निः ॥ ६ ॥

येन । धनेन । प्रऽपणम् । चरामि । धनेन । देवाः । धनम् । इच्छमानः ।
तस्मिन् । मे । इन्द्रः । रुचिम् । आ । दधातु । प्रजाऽपतिः । सविता ।
सोमः । अग्निः ॥ ६ ॥

चतुर्थी । हे अग्ने नः अस्माकम् इमां शरणिम् प्रवासनिबन्धनां व्रतलोपलक्षणां हिंसां मीमृषः क्षमस्व । मृष तितिक्षायाम् । स्वार्थिको णिच् । छान्दसो लुङ् । यम् अध्वानम् मार्गं दूरम् अगाम[1] गतवन्तः स्मः । तदध्वगमनजनिताम् इमां शरणिम् इति पूर्व-

1 S′ Kd दूरमागवतवंतस्म for दूरम् अगाम गतवन्तः स्मः.

त्रान्वयः। ॥ इण् गतौ। लुङि "इणो गा लुङि" इति गादेशः॥ यद्वा यम् अध्वानं दूरम् अगाम इमां शरणिम्। ॥ वर्णव्यत्ययः॥ इमम् अध्वानम् नः अस्मान् मीमृषः मर्षय तितिक्षय। तज्जनितदुःखनिवर्तने सह्यं कुर्वित्यर्थः॥ प्रपणः व्यवहर्तुं पण्यद्रव्यस्य परिमाणकल्पनम्। विक्रयः तस्यैव सलाभमूल्यस्वीकारेण परेषां प्रदानम्। तद् उभयमपि नः अस्माकं शुनम् सुखं यथा भवति तथा अस्तु भवतु। ॥ विक्रय इति। क्रीणातेः "एरच्" इति अच् प्रत्ययः॥ ॥ तथा प्रतिपणः। प्रत्यानेतुं परद्रव्यस्य परिमाणकल्पनं प्रतिपण इत्युच्यते। सोपि मा माम्। ॥ प्रपणः। पण व्यवहारे इत्यस्मात् "नित्यं पणः परिमाणे" इति अच् प्रत्ययः॥। फलिनम् प्रभूतलाभोपेतं कृणोतु करोतु॥

पञ्चमी। इन्द्राग्न्योः प्रकृतत्वात् तावेवात्र प्रयुक्तौ प्रार्थ्येते। हे इन्द्राग्नी युवां संविदानौ संजानानौ ऐकमत्यं गतौ। ॥ संपूर्वाद् वेत्तेरकर्मकात् "समो गम्यृच्छि०" इत्यात्मनेपदम्। अदादित्वात् शपो लुक्॥। इदम् मया हूयमानं हव्यम् हविः जुषेथां सेवेथाम्॥ युवयोः प्रसादात् नः अस्माकं चरितम् आचरितं विक्रयादिकम् उत्थितम् तस्माद् व्यवहाराद् उत्पन्नं लाभयुक्तं धनं च शुनम् सुखम् अस्तु॥ हे देवाः धनेन मूल्यधनेन धनम् वृद्धियुक्तं धनम् इच्छमानः कामयमानोहं येन धनेन प्रपणम् व्यवहर्तुं परिमाणकल्पनं चरामि करोमि। तदपि शुनम् अस्तु इति पूर्वेण संबन्धः॥

षष्ठी। हे अग्ने सातघ्नः सातं लाभः। ॥ षणु दाने इत्यस्माद् भावे निष्ठा। "जनसनखनां सञ्झलोः" इति आत्वम्॥। सातं लाभं घ्नन्तीति सातघ्नः। ॥ "बहुलं छन्दसि" इति हन्तेः क्विप्। शसि "गमहन०" इत्युपधालोपः। "हो हन्तेः०" इति धत्वम्॥। लाभप्रतिबन्धकान् देवान् हविषा हूयमानेन नि षेध परितोष्य निवार-

---

1 S′Kd तितक्षय. 2 S′Kd read इत्युच्यते after प्रपणः in the grammatical note following. 3 Sâyaṇa takes the mantra as consisting of two lines only (द्व्यवसाना). 4 Kd विधियुक्तं, S′ विद्धियुक्तं 5 S′Kd परिमाणं कल्पने. 6 So S′Kd.

य । ॒षिधु गत्याम् । भौवादिकः । "उपसर्गात् सुनोति॰" इत्यादिना षत्वम् ॒ ॥ येन धनेनेत्यादि पूर्ववत् । हे देवाः युष्मत्प्रसादात् तन्मे मदीयं धनं भूयः बहुतरं भवतु । कनीयः अल्पतरं मा भवतु । ॒भूय इति । बहुशब्दाद् ईयसुनि "बहोर्लोपो भू च बहोः" इति ईयस आदेर्लोपः बहोर्भूभावश्च । कनीय इति । "युवाल्पयोः कन् अन्यतरस्याम्" इति अल्पशब्दस्य कन् आदेशः ॒ ॥

सप्तमी । येनेति यत् प्रकृतं धनं तस्मिन् मे मदीये धने रुचिम् सर्वजनप्रीतिं धनप्रदानेन आदानेच्छाम् इन्द्र आ दधातु स्थापयतु ॥ तथा प्रजापत्यादयश्च रुचिं कुर्वन्तु ॥

उप॑ त्वा नम॑सा व॒यं होत॑र्वैश्वानर स्तु॒मः ।
स नः॑ प्र॒जास्वा॒त्मसु॒ गोषु॑ प्रा॒णेषु॑ जागृहि ॥ ७ ॥

उप॑ । त्वा । नम॑सा । व॒यम् । होतः॑ । वै॒श्वा॒न॒र॒ । स्तु॒मः । सः । नः॒ । प्र॒ऽजासु॑ । आ॒त्मऽसु॑ । गोषु॑ । प्रा॒णेषु॑ । जा॒गृ॒हि॒ ॥ ७ ॥

अष्टमी । हे होतः देवानाम् आह्वातः वैश्वानर विश्वनरहित अग्ने त्वा त्वां वयं नमसा हविर्लक्षणेन अन्नेन सह उप स्तुमः उपेत्य स्तोत्रं कुर्मः ॥ स स्तुतस्त्वं नः अस्माकं प्रजासु पुत्रपौत्रादिलक्षणासु आत्मसु अस्मासु गोषु अस्मदीयेषु पशुषु प्राणेषु च जागृहि बुध्यस्व । प्रजादिषु दुःखलेशोपि यथा न प्राप्नोति तथा रक्षन् अवहितो वर्तस्वेत्यर्थः ॥

वि॒श्वाहा॑ ते॒ सद॒मिद्भ॑रेमा॒श्वायेव॒ तिष्ठ॑ते जातवेदः ।
रा॒यस्पोषे॑ण॒ समि॒षा मद॑न्तो॒ मा ते॑ अग्ने॒ प्रति॑वेशा रिषाम ॥ ८ ॥

वि॒श्वाहा॑ । ते॒ । सद॑म् । इत् । भ॒रे॒म॒ । अ॒श्वा॑यऽइव । तिष्ठ॑ते । जा॒त॒ऽवे॒दः॒ ।
रा॒यः । पोषे॑ण । सम् । इषा । मद॑न्तः । मा । ते॒ । अ॒ग्ने॒ । प्रति॑ऽवेशाः । रि॒षा॒म॒ ॥ ८ ॥

नवमी । हे जातवेदः जातानां वेदितरग्ने तिष्ठते स्वगृहे नित्यं वर्तमानाय ते तुभ्यं विश्वाहा सर्वाण्यहानि । ॒"॰अत्यन्तसंयोगे" द्वितीया ॒ । सदमित् सदैव भरेम हरेम । हविरिति शेषः । तत्र दृष्टान्तः । अश्वायेव ।

स्वगृहे वर्तमानाय अश्वाय कालेकाले यथा घासः प्रदीयते तद्वत् ॥ हे अग्ने ते तव प्रतिवेशाः परिचरणादिना प्रत्यासन्ना वयं रायः धनस्य पोषेण समृद्ध्या इषा इष्यमाणेन अन्नेन च सं मदन्तः संमाद्यन्तो हृष्यन्तः । ⁂व्यत्ययेन शप्⁂ । मा रिषाम विनष्टा मा भूम । ⁂रुष रिष हिंसायाम् । पुषादित्वात् च्लेरङादेशः⁂ ॥

इति तृतीयकाण्डे तृतीयेनुवाके पञ्चमं सूक्तम् ॥

समाप्तश्च तृतीयोनुवाकः ॥

चतुर्थेनुवाके पञ्च सूक्तानि । तत्र "प्रातरग्निम्" इति प्रथमं सूक्तम् । तेन मेधाकामः सुस्वोत्थाय[1] मुखप्रक्षालनं हस्तेन कुर्यात् । तद् उक्तं कौशिकेन । "पूर्वस्य मेधाजननानि" इति प्रक्रम्य "प्रातरग्निम[३.१६] "गिरावरगराटेषु[६. ६९] दिवस्पृथिव्याः[९. १] इति संहाय मुखं वि- "मार्ष्टि" इति [कौ० २. १] ॥

तथा अनेन सूक्तेन दधिमधुनी संपात्य अभिमन्त्र्य वर्चस्कामं ब्राह्मणम् आशयेत् । क्षत्रियं तु दधिमधुमिश्रम् अन्नम् आशयेत् । वैश्यादिकं तु केवलभक्तम् आशयेत् । तथा च कौशिकः । "ममाग्ने वर्चः[५. ३] इति वर्चस्यानि" इति प्रक्रम्य "प्रातरग्निम[३. १६] गिरावरगराटेषु[६. ६९] "दिवस्पृथिव्याः[९. १] इति दधिमध्वाशयति कीलालमिश्रं क्षत्रियं की- "लालम् इतरान्" इति [कौ० २. ३] ॥

तथा वर्चस्यकर्मणि स्नातकसिंहव्याघ्रादीनां सप्तानाम् अन्यतमस्य नाभिलोममणिं लाक्षाहिरण्येन वेष्टयित्वा अनेन सूक्तेन संपात्य अभिमन्त्र्य बध्नीयात् ॥

तथा वर्चस्कामानां क्षत्रियादीनां स्नातकादि[2]सप्तमर्माणि प्रच्छिद्य स्थालीपाके प्रक्षिप्य अनेन सूक्तेन संपात्य अभिमन्त्र्य स्थालीपाकेन सह प्राशनम् संपातिताभिमन्त्रितजलेनात्मावनम् अवसेचनं [च] वर्चस्कामस्य कार्यम् ॥

सूत्रितं हि । "स्नातकसिंहव्याघ्रवस्तवृष्णिवृषभराज्ञां नाभिलोमानि" इति प्रक्रम्य ["प्रातरग्निम् ३. १६] गिरावरगराटेषु [६. ६९] दिवस्पृथिव्याः "[९. १] इति सप्तमर्माणि स्थालीपाके पृक्तान्यश्नात्यकुशलं यो ब्राह्मणो

1 S' Kd सुप्तोत्थाय. 2 S' Kd स्नातकानि सप्त°.

"लोहितम् अश्नीयाद् इति गार्ग्य उक्तो लोममणिः सर्वैरात्मावयत्यवसिञ्चति" इति [कौ०२.४] ॥

तत्र प्रथमा ॥

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हवामहे ॥ १ ॥

प्रातः । अग्निम् । प्रातः । इन्द्रम् । हवामहे । प्रातः । मित्रावरुणा ।
प्रातः । अश्विना ॥
प्रातः । भगम् । पूषणम् । ब्रह्मणः । पतिम् । प्रातः । सोमम् । उत ।
रुद्रम् । हवामहे ॥ १ ॥

अद्न्यादयः प्रसिद्धा देवाः । तान् [प्रातः] प्रातःकाले वर्चसे फलाय मेधाजननफलाय च हवामहे । क्रियाफलस्य कर्तृगामित्वात् "स्वरितञितः०" इत्यात्मनेपदम् । "बहुलं छन्दसि" इति ह्वः संप्रसारणम् । मित्रावरुणा । मित्रश्च वरुणश्च मित्रावरुणौ । "देवताद्वन्द्वे च" इति पूर्वपदस्य आनङ् आदेशः । "सुपां सुलुक्०" इति पूर्वसवर्णदीर्घः । "देवताद्वन्द्वे च" इत्युभयपदप्रकृतिस्वरत्वम् । पूषणम् । "इन्हन्पूषार्यम्णां शौ" इति नियमात् "सर्वनामस्थाने चासंबुद्धौ" इति अमि प्राप्तस्य दीर्घस्य निवृत्तिः । ब्रह्मणस्पतिम् । "षष्ठ्याः पतिपुत्र०" इति विसर्जनीयस्य सत्वम् । उतशब्दः अप्यर्थे ॥

द्वितीया ॥

प्रातर्जितं भगमुग्रं हवामहे वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद् यं मन्यमानस्तुरश्चिद् राजा चिद् यं भगं भक्षीत्याह ॥ २ ॥

प्रातःऽजितम् । भगम् । उग्रम् । हवामहे । वयम् । पुत्रम् । अदितेः ।
यः । विऽधर्ता ॥
आध्रः । चित् । यम् । मन्यमानः । तुरः । चित् । राजा । चित् । यम् ।
भगम् । भक्षि । इति । आह ॥ २ ॥

प्रातर्जितम् । प्रातःकाले जयति स्वाभिमतं साधयतीति प्रातर्जित् । ॥ "सत्सूद्विष०" इत्यादिना क्विप् ॥ । उग्रम् उद्गूर्णबलम् अनभिभवनीयम् । अदितेः । अदितिरदीना देवमाता । तस्याः पुत्रं भगं वयं वर्चःप्रभृतिफलकामा हवामहे आह्वयामः । स एव विशेष्यते । य आदित्यो भगः विधर्ता सर्वस्य विधारयिता वृष्ट्यादिप्रदानेन पोषकः आध्रः आधारयितव्यो दरिद्रः । चिच्छब्दः अप्यर्थे । दरिद्रोपि तुरश्चित् त्वरमाणः समृद्धोपि मन्यमानः स्वाभिमतफलसाधनं जानानः यं भगं देवं भक्षि भजेयेत्याह ब्रूते[2] । राजा चित् राजापि यं भगं देवं भजेयेत्याह । सर्व एव यस्य भक्तताम् आशासत इत्यर्थः । तं भगम् इति पूर्वत्रान्वयः । ॥ तुरः । तुर त्वरणे इत्यस्माद् इगुपधलक्षणः कः । भक्षीति । भजेश्छान्दसो लिङर्थे लुङ् । उत्तमैकवचने "बहुलं छन्दस्यमाङ्योगेपि" इत्यडभावः । यच्छब्दस्य आहेत्यनेन संबन्धात् भक्षीत्यस्य निघातः ॥ । यद्वा उक्तः सर्वोपि जनः यं भगं देवं मन्यमानः स्तुवन् । मन्यतिः स्तुतिकर्मा । भगम् । धननामैतत् । भगं भजनीयं धनं भक्षि भज विभज प्रयच्छ मह्यम इति यं देवम् आह इति प्रार्थयते । तम् आह्वयाम इति संबन्धः । ॥ भक्षि । लोटि भजेश्छान्दसः शपो लुक् ह्यादेशाभावश्च ॥ ॥

तृतीया ॥

भग॒ प्रणे॑तर्भग॒ सत्य॑राधो भगे॒मां धिय॒मुद॑वा॒ ददन्नः ।
भग॒ प्र णो॑ जनय॒ गोभि॒रश्वै॒र्भग॒ प्र नृभि॑र्नृ॒वन्तः॑ स्याम ॥ ३ ॥

भग॑ । प्रऽने॑तः । भग॑ । सत्य॑ऽराधः । भग॑ । इ॒माम् । धिय॑म् । उत् ।
अव॒ । दद॑त् । नः॒ ।
भग॑ । प्र । नः॒ । जन॒य॒ । गोभिः॑ । अश्वैः॑ । भग॑ । प्र । नृऽभिः॑ । नृ॒ऽवन्तः॑ । स्याम॒ ॥ ३ ॥

हे भग प्रणेतः प्रकर्षेण सर्वस्य जगतो नेतः । विशेषणान्तरसंबन्धाय

1 S′ Kd वर्मप्रभृ°. 2 S′ Kd भक्षयेत्याह for भजेयेत्याह.

पुनःपुनर्भगेत्यामन्त्रणम् । हे सत्यराधः सत्यम् अनश्वरं राधो धनं यस्य स तथोक्तः[1] । राध इति धननाम । राध्नुवन्त्यनेन इति यास्कः [नि° ४.४] । "आमन्त्रितं पूर्वम् अविद्यमानवत्" इति भगेत्यामन्त्रितस्य अविद्यमानवत्त्वात् "आमन्त्रितस्य च" इति प्रणेतरित्यस्य षाष्ठिकम् आद्युदात्तत्वम् । न च "नामन्त्रिते समानाधिकरणे सामान्यवचनम्" इत्यविद्यमानवत्त्वनिषेधः[2] । भगेत्यस्य विशेषवचनत्वात् । प्रणयनात् प्रणेतेति प्रणेतृत्वस्य साधारणत्वेन तद्वाचिनः सामान्यवचनत्वम् तद्वैशिष्ट्येन भगेत्यस्य विशेषवचनत्वम् । प्रणेतरित्यस्य विधेयविशेषणत्वेन प्रणेतॄन् अस्मान् कुरु इति पृथग्वाक्यत्वेन पर्यवसानात् "समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः" इति वचनात् भग सत्यराध इत्यादेर्वाक्यान्तरत्वेन पूर्वपदापेक्षया निघाताप्रसङ्गः । हे भग इमाम् अस्मदीयां धियम् स्तुतिम् उदव उद्रक्ष सफलां कुरु । "व्यचोतस्तिङः" इति सांहितिको दीर्घः । किं कुर्वन् । नः अस्मभ्यं ददत् प्रयच्छन् मेधाजननादिफलम् । ददातेः शतरि "नाभ्यस्ताच्छतुः" इति नुम्प्रतिषेधः । "अभ्यस्तानाम् आदिः" इत्याद्युदात्तत्वम् । हे भग नः अस्मान् गोभिरश्वैश्च प्र जनय प्रभूतान्[3] कुरु ॥ हे भग नृभिः पुत्रपौत्रादिभिर्भृत्यादिभिश्च वयं नृवन्तः तद्युक्ताः प्र स्याम प्रभवेम ॥ नृभिर्नृवन्त इति "गवाम् असि गोपतिः" [ऋ° ७.९८.६] इतिवत् वृत्त्यवृत्तिभ्यां स्वामित्वं बहुत्वं च विवक्ष्यते । नृभिरिति । "नृ चान्यतरस्याम्" इति हलादिविभक्तिर्नोदात्ता । नृवन्त इति । छान्दसं मतुपो वत्वम् । "हृस्वनुड्भ्याम्°" इति मतुप उदात्तत्वम् ॥

चतुर्थी ॥

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदितौ मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ॥ ४ ॥

उत । इदानीम् । भगऽवन्तः । स्याम । उत । प्रऽपित्वे । उत । मध्ये । अह्नाम् ।
उत । उतऽइतौ । मघऽवन् । सूर्यस्य । वयम् । देवानाम् । सुऽमतौ । स्याम ॥४॥

1 S′ Kd यथोक्तः. 2 S′ Kd °मानत्वनि°. 3 S′ Kd प्रभृतान्.

उत अपि च इदानीम् अस्मिन् कर्मानुष्ठानसमये वयं भगवन्तः भगेन देवेन युक्ताः तत्स्वामिकाः भगेन धनेन सौभाग्येन वा युक्ताः स्याम भवेम ॥ उत अपि च प्रपित्वे सायाह्ने अह्नां मध्ये मध्याह्नेपि [उत अपि च उदितौ उदयकाले] हे मघवन् । मघम् इति धननाम । [वयं सूर्यस्य तथा देवानाम् अ]ग्न्यादीनां सुमतौ शोभनायाम् अनुग्रहात्मिकायां बुद्धौ स्याम भवेम । देवा अपि अस्मान् अनुगृह्णीयुरित्यर्थः ॥

पञ्चमी ॥

भग॑ एव भग॑वाँ अस्तु दे॒वस्तेना॑ व॒यं भग॑वन्तः स्याम ।
तं त्वा॑ भग॒ सर्व॒ इज्जो॑हवीमि॒ स नो॑ भग पुरए॒ता भ॑वे॒ह ॥ ५ ॥

भग॑ः । ए॒व । भग॑ऽवान् । अ॒स्तु॒ । दे॒वः । तेन॑ । व॒यम् । भग॑ऽवन्तः । स्या॒म॒ ।
तम् । त्वा॒ । भ॒ग॒ । सर्व॑ः । इत् । जो॒ह॒वी॒मि॒ । सः । नः॒ । भ॒ग॒ । पु॒रः॒ऽए॒ता । भ॒व॒ । इ॒ह ॥ ५ ॥

भग एव देवो भगवान् धनवान् अस्तु । तेन तदीयेन धनेन वयं भगवन्तः धनवन्तः स्याम भवेम । हे भग तम् तादृशं त्वा त्वां सर्व इत् सर्व एव जनः जोहवीमि जोहवीति पुनःपुनराह्वयति । ✕"तिङां तिङो भवन्ति" इति तिपः स्थाने मिप्✕ । हे भग स त्वम् इह अस्मिन् व्यापारे नः अस्माकं पुरएता पुरतो गन्ता भव ॥

षष्ठी ॥

सम॑ध्व॒रायो॒षसो॑ नमन्त दधि॒क्रावे॑व॒ शुच॑ये प॒दाय॑ ।
अ॒र्वा॒ची॒नं व॑सु॒विद॑ं॒ भग॑ं मे॒ रथ॑मि॒वाश्वा॑ वा॒जिन॒ आ व॑हन्तु ॥ ६ ॥

सम् । अ॒ध्व॒राय॑ । उ॒षसः॑ । न॒म॒न्त॒ । द॒धि॒क्रावा॑ऽइव । शुच॑ये । प॒दाय॑ ।
अ॒र्वा॒ची॒नम् । व॒सु॒ऽविद॑म् । भग॑म् । मे॒ । रथ॑म्ऽइव । अश्वाः॑ । वा॒जि॒नः॑ । आ । व॒ह॒न्तु॒ ॥ ६ ॥

उषसः उषोदेवताः अध्वराय यज्ञार्थं सं नमन्त । ✕लोडर्थे लङ्✕ । संनमन्ताम् । संगच्छन्ताम् इत्यर्थः ॥ दधिक्रावेव । अश्व-

नामैतत् । दधिः धारयिता सन् क्रामतीति दधिक्रावा अश्वः । दधत् क्रामतीति वा दधत् क्रन्दतीति वा [नि० २. २७] इत्यादि निरुक्तम् । दधातेः "आहगमहनजन०" इत्यादिना किप्रत्ययो लिङ्वद्भावश्च । तस्मिन्नुपपदे "अन्येभ्योपि दृश्यन्ते" इति क्रमेः क्वनिप् । "विङ्वनोरनुनासिकस्यात्" इति आत्वम् । स यथा शुचये [पदाय] शुद्धाय गमनाय संनद्धो भवति एवं संनता उषोदेवताः वसुविदम् धनानां लम्भकं भगं देवं मे मम अर्वाचीनम् अभिमुखम् आ वहन्तु आगमयन्तु । तत्र दृष्टान्तः । वाजिनः वेगवन्तः अश्वाः रथमिव ॥

सप्तमी ॥

अश्वा॑वतीर्गो॒म॑तीर्न उ॒षासो॑ वी॒र॑वतीः सद॒मुच्छ॑न्तु भ॒द्राः ।
घृ॒तं दुहा॑ना वि॒श्व॒तः प्र॒पी॑ता यू॒यं पा॑त स्व॒स्ति॒भिः सदा॑ नः ॥ ७ ॥

अश्व॑ऽवतीः । गो॒ऽम॑तीः । नः॒ । उ॒षस॑ः । वी॒र॒ऽव॑तीः । सद॑म् । उ॒च्छ॒न्तु॒ । भ॒द्राः ।
घृ॒तम् । दुहा॑नाः । वि॒श्व॒तः॑ । प्र॒ऽपी॑ताः । यू॒यम् । पा॒त॒ । स्व॒स्ति॒ऽभिः॑ ।
सदा॑ । नः॒ ॥ ७ ॥

उषासः उषोदेवताः अश्वावतीः बहुभिरश्वैरुपेताः । "मन्त्रे सोमाश्वेन्द्रिय०" इति मतौ परतो दीर्घः । गोमतीः गोमत्यो वीरवतीः वीरवत्यः पुत्रादिभिरुपेताः । "वा छन्दसि" इति सर्वत्र पूर्वसवर्णदीर्घः । भद्राः शिवंकर्यश्च सत्यः नः अस्मभ्यं सदम् सदा सर्वदा उच्छन्तु व्युष्टा भवन्तु ॥ घृतम् उदकं दुहानाः विश्वतः सर्वैर्गुणैः प्रपीताः आप्यायिता यूयम् उषसः स्वस्तिभिः अविनाशैः सदा सर्वदा नः अस्मान् पात रक्षत ॥

[इति] चतुर्थेनुवाके प्रथमं सूक्तम् ॥

"सीरा युञ्जन्ति" इति द्वितीयसूक्तेन कृषिनिष्पत्तिकर्मणि क्षेत्रं गत्वा युगलाङ्गलं बध्नाति । अनेनैव सूक्तेन दक्षिणम् अनड्वाहं युगे युनक्ति । ततः कर्ता अनेन सूक्तेन प्राचीनं कृषन् सूक्तसमाप्त्यनन्तरं हालिकाय

हलं प्रयच्छेत् । तेन तिसृषु सीतासु कृष्टासु उत्तरसीतान्ते अग्निम् उपसमाधाय अनेन सूक्तेन पुरोडाशेन इन्द्रम् स्थालीपाकेन अश्विनौ च यजन् उत्तरस्यां सीतायां संपातान् आनयेत् ॥

तथा वृषलाभकर्मणि सारूपवत्से ओदने शकृत्पिण्डगुग्गुलुलवणानि प्रक्षिप्य अनेन सूक्तेन संपात्य अभिमन्त्र्य अश्नाति ॥

"सीते वन्दामहे"[८] इत्यृचा हालिकेन कृष्यमाणास्तिस्रः सीताः कर्ता प्रत्येकम् अनुमन्त्रयते । अत्र "सीरा युञ्जन्नीति युगलाङ्गलं प्रतनोति दक्षिणम् उष्टारं प्रथमं युनक्ति" इत्यादि "अनडुत्सांपदम्" इत्यन्तं कौशिकसूत्रं द्रष्टव्यम् [कौ° ३. ३] ॥

तथा अङ्गुतशान्तौ सीतामध्ये लाङ्गलसंसर्गे पुच्छसंसर्गे वा एतत् सूक्तं शान्त्युदके अनुयोजनीयम् । "अथ यत्रैतल्लाङ्गले संसृजतः" इत्यादि कौशिकसूत्रम् "शुनासीराण्यनुयोजयेत्" इत्यन्तम् [कौ° १३. १४] ॥

यज्ञवास्तुसंस्कारकर्मणि "इन्द्रः सीतां नि गृह्णातु"[४] इति नवाग्निस्थापनदेशे उल्लेखनं कार्यम् । तत्प्रकारश्च कौशिकेन दर्शितः । "यथा वितानं यज्ञवास्त्वध्यवस्येत्" इति प्रक्रम्य "देवस्य त्वा सवितुः[१९. "५१. २] इति विमानकाष्ठं गृह्णाति । [यत्राग्निं निधास्यन् भवति तत्र "लक्षणं करोति] । इन्द्रः सीतां निगृह्णात्विति दक्षिणत आरभ्योत्तरत "आलिखति" इत्यादिना [कौ° १४. १] ॥

अग्निचयनकर्मणि अग्निक्षेत्रकर्षणाय युज्यमानं सीरं "सीरा युञ्जन्ति" इति ब्रह्मा अनुमन्त्रयते । "लाङ्गलं पवीरवत्"[३] इति कर्षणावस्थस्य लाङ्गलस्यानुमन्त्रणम् । "कृते योनौ"[२] इति तस्मिन् कृष्टक्षेत्रे ओषधीरावपन्तम् अध्वर्युम् अनुमन्त्रयेत । तथा च वैतानं सूत्रम । "सीरा युञ्जन्नीति सीरं युज्यमानम्" इत्यादि [वै° ५. १] ॥

तत्र प्रथमा ॥

सीरा॑ युञ्जन्ति क॒वयो॑ यु॒गा वि त॑न्वते॒ पृथ॑क् ।
धीरा॑ दे॒वेषु॑ सु॒म्न॒यौ ॥ १ ॥

---

1 S′ Kd शांत्युदकेनयोज°. 2 S′ Kd अथ यत्रैतंलांगलं संसृजेत्यादि. 3 S′ Kd उल्लेखनकार्य°.
4 So S′ Kd. *Kaus'ika* लेखनमादाय for विमानकाष्ठं गृह्णाति. 5 *Kaus'ika*: निदधास्यन्.

सीरा॑ । युञ्ज॒न्ति॒ । क॒वय॑: । युगा । वि । त॒न्व॒ते॒ । पृथ॑क् ।
धीरा॑: । दे॒वेषु॑ । सु॒म्न॒ऽयौ ॥ १ ॥

कवयः । मेधाविनामैतत् । मेधाविनो जनाः सीरा सीराणि लाङ्गलानि । ॥ "शेश्छन्दसि०" इति शेर्लोपः ॥ । युञ्जन्ति कर्षणार्थं योजयन्ति । धीराः धीमन्तस्ते [युगा] युगानि च पृथक् वि तन्वते बलीवर्दानां स्कन्धेषु प्रसारयन्ति । किमर्थम् । देवेषु देवविषये सुम्नयौ सुखकरयज्ञेच्छौ सति । यजमाने इत्यर्थः । "यज्ञो वै सुम्नं धीरा देवेषु यज्ञं तन्वानाः" इति वाजसनेयकम् [श० ब्रा० ७.२.२.४] । ॥ "छन्दसि परेच्छायाम्" इति सुम्नशब्दात् क्यच् । "न च्छन्दस्यपुत्रस्य" इति ईत्वदीर्घयोर्निषेधः । "क्याच्छन्दसि" इति उप्रत्ययः ॥ । यद्वा देवविषये सुम्नं सुखकरं हविर्लक्षणम् अन्नं यातः प्रापयत इति सुम्नयौ बलीवर्दौ । तौ च युञ्जन्तीति संबन्धः । ॥ यातेः "आतो मनिन्०" इति विच् ॥ ॥

द्वितीया ॥

युन॑क्त सीरा॒ वि यु॒गा त॑नोत कृ॒ते योनौ॑ वपतेह॒ बीज॑म् ।
वि॒राज॑: श्नु॒ष्टिः सभ॑रा असन्नो॒ नेदी॑य॒ इत् सृ॒ण्य॑: प॒क्वमा य॑वन् ॥ २ ॥
युन॑क्त । सीरा॑ । वि । यु॒गा । त॒नो॒त॒ । कृ॒ते । योनौ॑ । व॒प॒त॒ । इ॒ह । बीज॑म् ।
वि॒ऽराज॑: । श्नु॒ष्टिः । सऽभ॑राः । अस॑त् । नः॒ । नेदी॑यः । इ॒त् । सृ॒ण्य॑: ।
प॒क्वम् । आ । य॒व॒न् ॥ २ ॥

हे कृषी[वलाः सीरा युनक्त सीराणि लाङ्गलानि युगैः सह योजयत ॥ तथा युगा वि तनोत युगानि बलीवर्दानां स्कन्धेषु प्रसारयत ॥ अपि च] योनौ अङ्कुरोत्पत्तियोग्ये इह अस्मिन् कृते[2] कृष्टक्षेत्रे बीजम् व्रीहियवादिकं वपत ॥ विराजः अन्नस्य व्रीहियवादिरूपस्य । "अन्नं वै विराट्" [तै०

---

१ ^{h}B वि॒राज॒: श्नु॒ष्टी॒: सभ॑रा असन्नो; K वि॒राज॒: श्लु॒ष्टि॒: सभ॑रा असन्नो; ^{m}S R B वि॒राज॒: श्नु॒ष्टि॒: सभ॑रा असन्नो; ^{2}P वि॒ऽराज॑: । स्नु॒ष्टि॒: । सऽभ॑राः । अस॑न् । नः॒ ।. J वि॒ऽराज॑: । स्नु॒ष्टि॒: । सऽभ॑राः । अस॑त् । नः॒ ।. We with A P D ^{m}K V. २ ^{m}S K ^{h}B B D इच्छृण्यः; A इछृण्यः. We with R ^{m}K V. ३ This is the reading of all our MSS. and Vaidikas.

---

1 S′ Kd सुम्नधीरा देवेषु यज्ञं तन्वा इति. 2 S′ Kd कृष्टक्षेत्रे for कृते कृष्टक्षेत्रे.

ब्रा० ३. ८. १०. ४] इति श्रुतेः । श्रुष्टिः आशुप्रापकः स्तम्बः सभराः फलभारसहितः नः अस्माकम् असत् भवतु । ॥ अस्तेर्लेटि अडागमः ॥ सफलं व्रीह्यादिकं नेदीय [इत्] अन्तिकतमम् अल्पेनैव कालेन पक्वम् परिणतफलोपेतं सत् सृण्यः । ॥ द्वितीयार्थे षष्ठी ॥ । सृणिम् अङ्कुशं लवनसाधनं दात्रादिकम् आ यवम् आयौतु प्राप्नोतु । ॥ यौतेश्छान्दसे लङि "तिङां तिङो भवन्ति" इति तिपो मिप् ॥ । "यदा [वा] अन्नं पच्यतेथ तत्सृण्योपचरन्ति" [श० ब्रा० ७. २. २. ५] इति वाजसनेयकम् ॥

तृतीया ॥

लाङ्गलं पवीरवत् सुशीमं सोमसत्सरु ।
उदिद् वपतु गामविं प्रस्थावद् रथवाहनं पीवरीं च प्रफर्व्यम् ॥ ३ ॥

लाङ्गलम् । पवीरऽवत् । सुऽशीमम् । सोमसत्ऽसरु ।
उत् । इत् । वपतु । गाम् । अविम् । प्रस्थाऽवत् । रथऽवाहनम् । पीबरीम् । च । प्रऽफर्व्यम् ॥ ३ ॥

पवीरवत् पवीरं पविर्वज्रम् । ॥ स्वार्थिको रप्रत्ययः ॥ । यद् वज्रमिव निशितधारं लाङ्गलाग्रे प्रोतं सदयोमयं शल्यं भूमिं विपाटयति तत्सहितम् । ॥ पविशब्दात् "कृदिकारात् अक्तिनः" इति ङीष् ॥ । सुशीमम् कर्षकस्य सुखकरं सोमसत्सरु व्रीह्यादिसंपादनद्वारा सोमयागनिष्पादकः सरुः भूमौ प्रच्छन्नगमनम् कर्षकहस्तग्राह्योवयवविशेषो वा यस्य तत् तथोक्तम् । ॥ सर छद्मगतौ इत्यस्मात् भृमृशीतृचरित्सरीत्यादिना [उ० १. ७] उप्रत्ययः ॥ । एवंगुणविशिष्टं लाङ्गलम् उदिद् वपतु । इत् इत्यवधारणे । उद्वरतु । संपादयतु इत्यर्थः । किं तद् इत्याह । गाम् अविं च प्रस्थावत् प्रस्थानयुक्तं गमनसमर्थम् । ॥ प्रपूर्वात् तिष्ठतेः "आतश्चोपसर्गे" इति भावे अङ् ॥ । रथवाहनम् रथवाहनसमर्थम् अश्वबलीवर्दादिकं पीवरीम् स्थूलां सर्वकामसमर्थां प्रफर्व्यम् । प्रथमवयाः कन्या प्रफर्वी । ताम् । ॥ "वा छ-

1 S' Kd वलनसाधनं.

न्दसि" इति अभिपूर्वत्वस्य विकल्पनाद् यण् ॥ । कर्षणेन धान्यादिसमृद्धौ सत्याम् एतद्गवादिसमृद्धिर्भवतीति भावः ॥

चतुर्थी ॥

इन्द्रः सीतां नि गृह्णातु तां पूषाभि रक्षतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥ ४ ॥

इन्द्रः । सीताम् । नि । गृह्णातु । ताम् । पूषा । अभि । रक्षतु ।
सा । नः । पयस्वती । दुहाम् । उत्तरामऽउत्तराम् । समाम् ॥ ४ ॥

इन्द्रो देवः सीताम् लाङ्गलपद्धतिं नि गृह्णातु नीचीनं गृह्णातु । तां पूषा पोषको देवः अभि रक्षतु सर्वतः पालयतु । सा सीता नः अस्मभ्यं पयस्वती । पय इत्युपलक्षितम् अभिमतफलम् । तद्युक्ता सती उत्तरामुत्तरां समाम् उत्तरोत्तरं संवत्सरम् । ॥ "°अत्यन्तसंयोगे" द्वितीया ॥ । सर्वेष्वपि कालेषु इत्यर्थः । दुहाम् दुग्धाम् । अभिमतफलम् इति शेषः । यद्वा पयस्वती उदकवती सती दुहाम् व्रीहियवादिसस्यानि दुग्धाम् उत्तरोत्तरं संवत्सरम् इति द्विकर्मकः । ॥ "अकथितं च" इति कर्मसंज्ञा । दुहाम् इति । "लोपस्त आत्मनेपदेषु" इति तलोपः ॥

पञ्चमी ॥

शुनं सुफाला वि तुदन्तु भूमिं शुनं कीनाशा अनु यन्तु वाहान् ।
शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तमस्मै ॥ ५ ॥

शुनम् । सुऽफालाः । वि । तुदन्तु । भूमिम् । शुनम् । कीनाशाः । अनु ।
यन्तु । वाहान् ।
शुनासीरा । हविषा । तोशमाना । सुऽपिप्पलाः । ओषधीः । कर्तम् । अस्मै ॥ ५ ॥

सुफालाः शोभनानि लाङ्गलमुखानि अस्माकं शुनम् सुखं यथा भवति तथा भूमिं वि तुदन्तु विकृषन्तु ॥ कीनाशाः कर्षकाः शुनं यथा

---

१ B $\overset{h}{B}$ पूषा अभि. We with A K $\overset{m}{K}$ D $\overset{m}{S}$ R V. २ $\overset{m}{S}$ कीनाशानु. ३ So our MSS. K follows Sâyaṇa. 4 B B^{p} $\overset{h}{B}$ $\overset{m}{K}$ P V सुपिप्पला. We with A D R $\overset{m}{S}$ $\overset{1}{P}$ J K V. 5 P सुऽपिष्पलाः. We with $\overset{2}{P}$ J K.

भवति तथा वाहान् बलीवर्दान् अनु यन्तु अनुगच्छन्तु। वाह्यन्त इति वाहाः। कर्मणि घञ्। "कर्षात्वतो घञोन्त उदात्तः" इति अन्तोदात्तत्वम्॥ शुनासीरा हे शुनासीरौ वायवादित्यौ। शुनो वायुः सीर आदित्यः इति हि यास्कः [नि० ९. ४०]। यद्वा शुनः सुखकरो देवः। सीरो लाङ्गलाभिमानी देवः। तौ युवां हविषा अस्मदीयेन तोषमाणा तोषमाणौ तुष्यन्तौ अस्मै यजमानाय ओषधीः व्रीहियवाद्याः सुपिप्पलाः शोभनफलोपेताः कर्तम् कुरुतम्॥

षष्ठी॥

शुनं वाहाः शुनं नरः शुनं कृषतु लाङ्गलम्।
शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिङ्गय॥ ६॥

शुनम्। वाहाः। शुनम्। नरः। शुनम्। कृषतु। लाङ्गलम्।
शुनम्। वरत्राः। बध्यन्ताम्। शुनम्। अष्ट्राम्। उत्। इङ्गय॥ ६॥

वाहाः बलीवर्दाः शुनम् सुखं कुर्वन्तु। नरः कर्षकाः शुनम् सुखं कृषन्तु। लाङ्गलम् हलं [शुनं] यथा भवति तथा कृषतु। कृष विलेखने। तौदादिकः॥ वरत्राः रज्जवः शुनम् सुखं वध्यन्ताम्॥ अष्ट्राम् प्रतोदं शुनम् सुखार्थम् उदिङ्गय प्रेरय। अत्र शुनासीरयोर्मध्ये शुनः संबोध्यः॥

सप्तमी॥

शुनासीरेह स्म मे जुषेथाम्।
यद् दिवि चक्रथुः पयस्तेनेमामुप सिञ्चतम्॥ ७॥

शुनासीरा। इह। स्म। मे। जुषेथाम्।
यत्। दिवि। चक्रथुः। पयः। तेन। इमाम्। उप। सिञ्चतम्॥ ७॥

शुनासीरा शुनासीरौ देवौ इह स्म इह खलु अस्मिन् क्षेत्रे मे मदीयं हविः जुषेताम् सेवेताम्। यत् तौ देवौ दिवि आकाशे पयः उदकं चक्रतुः कृतवन्तौ तेन वृष्टिजलेन इमाम् कृष्यमाणां भूमिम् उप सिञ्चताम् आर्द्रीकुरुताम्॥

अष्टमी ॥

सीते॒ वन्दा॑महे त्वा॒र्वाची॑ सुभगे भव ।
यथा॑ नः सु॒मना॒ अस॒ो यथा॑ नः सुफ॒ला भुव॑ः ॥ ८ ॥
सीते॑ । वन्दा॑महे । त्वा॒ । अ॒र्वाची॑ । सुऽभगे॒ । भ॒व॒ ।
यथा॑ । नः॒ । सु॒ऽमना॑ः । अस॑ः । यथा॑ । नः॒ । सु॒ऽफ॒ला । भुव॑ः ॥ ८ ॥

हे सीते त्वा त्वां वन्दामहे नमस्कुर्मः । हे सुभगे सुभाग्ये सीताभिमानिदेवते त्वम् अर्वाची अस्मदभिमुखी भव । यथा येन प्रकारेण नः अस्माकं सुमनाः शोभनमनस्का असः स्याः । यथा येन प्रकारेण नः अस्माकं सुफला शोभनफलोपेता भुवः भवेः । तथा अर्वाची भवेति संबन्धः । अस्तेर्भवतेश्च लेटि अडागमः । शव्लुकि "भूसुवोस्तिङि" इति गुणप्रतिषेधे उवङ् ॥

नवमी ॥

घृते॑न॒ सीता॒ मधु॑ना॒ सम॑क्ता॒ विश्वै॑र्दे॒वैर॑नु॒मता॒ मरु॑द्भिः ।
सा नः॑ सीते॒ पय॑सा॒भ्याव॑वृत्स्वो॒र्जस्वती॑ घृ॒तव॒त् पिन्व॑माना ॥ ९ ॥
घृते॑न । सीता॑ । मधु॑ना । सम्ऽअ॑क्ता । विश्वै॑ः । दे॒वैः । अ॒नु॒ऽम॒ता ।
मरु॑त्ऽभिः ।
सा । नः॒ । सी॒ते॒ । पय॑सा । अ॒भि॒ऽआव॑वृत्स्व । ऊर्ज॑स्वती । घृ॒तऽव॑त् ।
पिन्व॑माना ॥ ९ ॥

घृतेन उदकेन मधुना मधुररसेन समक्ता सम्यग् अक्ता सिक्ता । "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम् । सा सीता विश्वैर्देवैः मरुद्भिश्च अनुमता अङ्गीकृता । हे सीते सा त्वं पयसा उदकेन नः अस्मान् अभ्यावववृत्स्व अभिमुखम् आवर्तस्व । "बहुलं छन्दसि" इति वृतेः शपः श्लुः । कथंभूता । ऊर्जस्वती बलोपेता घृतवत् घृतयुक्तम् अन्नं पिन्वमाना सिञ्चन्ती । पिवि सेचने । व्यत्ययेन

---

१ B $\overset{h}{B}$ वदामहे. २ P $\overset{2}{P}$ J K सुऽफलाः. We with Sâyaṇa.

आत्मनेपदम् । "०अदुपदेशाल्लसार्वधातुक०" [इति] अनुदात्तत्वे धातुस्वरः ॥

[इति] चतुर्थेनुवाके द्वितीयं सूक्तम् ॥

"इमां खनामि" इति तृतीयसूक्तेन सपत्नीजयकर्मणि बाणापर्णीपत्र-चूर्णं लोहितवर्णाजाया दध्युदकेन संमिश्र्य अभिमन्त्र्य सपत्नीशयने परि-किरेत् । "अभि तेधाम्" इति पादेन तत्पत्राण्यभिमन्त्र्य शयन-स्यात् प्रक्षिपेत् । "उप तेधाम्" इति पादेन तत्पत्राण्यभिमन्त्र्य शयन-स्योपरि प्रक्षिपेत् । तद् उक्तं कौशिकेन । "इमां खनामीति बाणापर्णीं लोहिताजाया द्रप्सेन संनीय शयनम् अनु परिकिरति" [कौ० ४. १२] इत्यादि ॥

विवादजयकर्मणि "अहम् अस्मि सहमाना" इत्यादिसूक्तशेषं जपन् ऐशान्या दिशः सभास्थलं व्रजेत् । "अहम् अस्मीत्यपराजितात् परिषदम् आव्रजति" इत्यादि कौशिकसूत्रम् [कौ० ५. २] ॥

तत्र प्रथमा ॥

इमां खनाम्योषधिं वीरुधां बलवत्तमाम् ।
यया सपत्नीं बाधते यया संविन्दते पतिम् ॥ १ ॥

इमाम् । खनामि । ओषधिम् । वीरुधाम् । बलवत्ऽतमाम् ।
यया । सऽपत्नीम् । बाधते । यया । सम्ऽविन्दते । पतिम् ॥ १ ॥

इमाम् पाठाख्याम् ओषधीं[1] वीरुधाम् । विरोहन्तीति वीरुधः लतारू-पा ओषधयः । तासां मध्ये बलवत्तमाम् स्वकार्यकरणे अतिशयेन बल-वतीं खनामि खननेन संपादयामि । यया ओषध्या सपत्नीम् । समा-नः एकः पतिर्यस्याः सा सपत्नी । ॒"नित्यं सपत्न्यादिषु" इति ङीप् नकारान्तादेशश्च ॒ । ताद्दशीं बाधते हिनस्ति । ॒"यद्वृ-त्तान्नित्यम्" इति निघातप्रतिषेधः ॒ । यया च ओषध्या पतिम् भ-र्तारं संविन्दते सम्यक् [2]असाधारण्येन लभते ताम् इमाम् ओषधीम्[1] इति संबन्धः ॥

---

1 So S'Kd, ओषधीं, and Sâyaṇa's text also has ओषधीं. 2 S'Kd अ० omitted.

द्वितीया ॥

उत्तानपर्णे सुभगे देवजूते सहस्वति ।
सपत्नीं मे परा णुद पतिं मे केवलं कृधि ॥ २ ॥
उत्तानऽपर्णे । सुऽभगे । देवऽजूते । सहस्वति ।
सऽपत्नीम् । मे । परा । नुद । पतिम् । मे । केवलम् । कृधि ॥ २ ॥

हे उत्तानपर्णे उत्तानानि ऊर्ध्वमुखानि पर्णानि पत्राणि यस्यास्तादृशि हे सुभगे सौभाग्यहेतुभूते हे देवजूते देवेन स्रष्ट्रा प्रेरिते । यद्वा देवेन इन्द्रादिना प्राप्ते । "पाठाम इन्द्रो व्याश्नाद् असुरेभ्यस्तरीतवे" [२. २७. ४] इति हि निगमः । हे सहस्वति अभिभवनवति ईदृशे हे पाठे मे मम सपत्नीं परा नुद पराङ्मुखीं प्रेरय । पत्युः सकाशाद् दूरं गमयेत्यर्थः । ततश्च मे मम पतिं केवलम् असाधारणं कृधि कुरु । ⁂ "शुशृणुपृकृवृभ्यश्छन्दसि" इति हेर्धिरादेशः ⁂ ॥

तृतीया ॥

नहि ते नाम जग्राह नो अस्मिन् रमसे पतौ ।
परामेव परावतं सपत्नीं गमयामसि ॥ ३ ॥
नहि । ते । नाम । जग्राह । नो इति । अस्मिन् । रमसे । पतौ ।
पराम् । एव । पराऽवतम् । सऽपत्नीम् । गमयामसि ॥ ३ ॥

हे सपत्नि ते तव नाम नामधेयमपि अहं नहि जग्राह न गृह्णामि । ⁂ जग्राहेति । ग्रहेः उत्तमे णलि रूपम् ⁂ । अस्मिन् संनिहिते मदीये पतौ पत्यौ नो रमसे नैव रमस्व । ⁂ पताविति । "षष्ठीयुक्तश्छन्दसि वा" इति षष्ठीयोगाभावेपि छान्दसी घिसंज्ञा ⁂ ॥ अपि च तां सपत्नीं परां परावतमेव । परावत् इति दूरनाम । अतिशयितदूरदेशमेव गमयामसि गमयामः प्रापयामः ॥

चतुर्थी ॥

उत्तराहमुत्तर उत्तरेदुत्तराभ्यः ।

---

१ D K नुद.

अधः सपत्नी या ममाधरा साधराभ्यः ॥ ४ ॥
उत्ऽतरा । अहम् । उत्ऽतरे । उत्ऽतरा । इत् । उत्ऽतराभ्यः ।
अधः । सऽपत्नी । या । मम । अधरा । सा । अधराभ्यः ॥ ४ ॥

हे उत्तरे उत्कृष्टतरे पाठे त्वत्प्रसादाद् अहम् उत्तरा उत्कृष्टतरा भूयासम् ॥ अपि च उत्तराभ्यः लोके या उत्कृष्टतराः सन्ति ताभ्योप्यहम् उत्तरेत् । इच्छब्दः अवधारणे । उत्कृष्टतरैव भवेयम् ॥ अधँ[1] अनन्तरं मम या सपत्नी विद्यते सा अधराभ्यः निकृष्टाभ्योपि अधरा निकृष्टतरा भवतु ॥

पञ्चमी ॥

अहमस्मि सहमानाथो त्वमसि सासहिः ।
उभे सहस्वती भूत्वा सपत्नीं मे सहावहै ॥ ५ ॥
अहम् । अस्मि । सहमाना । अथो इति । त्वम् । असि । ससहिः ॥
उभे इति । स्वहस्वती इति । भूत्वा । सऽपत्नीम् । मे । सहावहै ॥ ५ ॥

हे पाठाख्ये ओषधि अहं त्वत्प्रसादात् सहमाना अस्मि सपत्न्या अभिभवित्री भवामि ॥ अथो अपि च त्वमपि सासहिरसि शत्रूणाम् अभिभवित्री भवसि ॥ ततश्च आवाम् उभे अपि सहस्वती अभिभवनवत्यौ भूत्वा मे मम सपत्नीं सहावहै अभिभवाव ॥ "अहमस्मि" इत्यादिसूक्तशेषस्य विवादजयकर्मणि विनियोगस्य दर्शितत्वात् तदनुसारेण सपत्नीशब्दस्य विपरिणामेन सपत्नपरतयापि योज्यम् ॥

षष्ठी ॥

अभि तेधां सहमानामुप तेधां सहीयसीम ।
मामनु प्र ते मनो वत्सं गौरिव धावतु पृथा वारिव धावतु ॥ ६ ॥
अभि । ते । अधाम् । सहमानाम् । उप । ते । अधाम् । सहीयसीम् ॥
माम् । अनु । प्र । ते । मनः । वत्सम् । गौःऽइव । धावतु । पृथा । वाःऽइव । धावतु ॥ ६ ॥

---

१ B B̂ अध स°.

सहमानाम् अभिभवनशीलाम् इमां पाठाख्याम् ओषधिं हे सपत्नि ते तव शयनस्थानम् अभि अधाम् अभितः सर्वतः शयनस्य अधःप्रदेशे धारयामि ॥ तथा सहीयसीम् सोढृतमाम् अतिशयेनाभिभवित्रीम् इमाम् ओषधिं ते शयनस्थानम् उप अधाम् शयनस्योपरिदेशे धारयामि ॥ हे सपत्नि ते त्वदीयम् ओषधिप्रभावेन वशीकृतं मनः मामनु प्र धावतु अनुसृत्य प्रवर्तताम् ॥ तत्र वत्सं गौरिवेत्यादि दृष्टान्तद्वयम् । यथा गौः प्रस्नुतस्तनी स्वकीयं वत्सम् इतस्ततो धावन्तं स्नेहवशाद् अनुधावति यथा च वाः वारि उदकं पथा निम्नेन मार्गेण स्वभावतोनुधावति तथा । सपत्नी सर्वथा मदधीनचित्ता भवतु इत्यर्थः ॥

[इति] चतुर्थेनुवाके तृतीयं सूक्तम् ॥

"संशितं मे" इति चतुर्थसूक्तेन परसेनोद्वेजनकर्मणि आज्यं हुत्वा सितपदीम् अजाम् अविं वा संपात्य अभिमन्त्र्य शत्रुसेनां प्रति विसर्जयेत् ॥

तथा संग्रामजयार्थम् अनेन सूक्तेन आज्यहोमम् सक्तुहोमम् धनुरिध्माधानम् इषुसमिदाधानम् राज्ञे अभिमन्त्रितधनुःप्रदानं च कुर्यात् । "संशितं म इति सितपदीं संपातवतीम् अवसृजति" इत्यादि "प्रदानान्तानि" इत्यन्तं कौशिकसूत्रम् [कौ० २. ५] ॥

तथा अग्निचयने उन्नीयमानम् उख्यम् अग्निं "संशितं मे" इति ब्रह्मा अनुमन्त्रयेत । उक्तं वैतानें "संशितं म इत्युख्यम् उन्नीयमानम्" इति [वै० ५. १] ॥

महाव्रते आजिधावने "अवसृष्टा परा पत" [८] इत्यनया अवसृष्टबाणानुमन्त्रणम् । तथा च वैतानसूत्रे । "अवसृष्टा परा पतेति चतुर्थीम् इषुम् अवसृष्टाम्" [वै० ६. ४] इति ॥

तत्र प्रथमा ॥

संशितं म इदं ब्रह्म संशितं वीर्यं१ बलम् ।
संशितं क्षत्रमजरमस्तु जिष्णुर्येषामस्मि पुरोहितः ॥ १ ॥

---

१ B B[h] D K K[m] ३ for १.

समऽशितम् । मे । इदम् । ब्रह्म । समऽशितम् । वीर्यम् । बलम् ।
समऽशितम् । क्षत्रम् । अजरम् । अस्तु । जिष्णुः । येषाम् । अस्मि ।
पुरःऽहितः ॥ १ ॥

मे मदीयम् इदं ब्रह्म ब्राह्मणत्वं संशितम् जातिभ्रंशकरदोषपरिहारेण सम्यक् तीक्ष्णीकृतं भवतु । तीक्ष्णीकृते हि ब्राह्मणत्वे स्वेन क्रियमाणं शान्तिकपौष्टिकादि कर्म समृद्धफलं भवतीति आदौ तत्प्रार्थना । यद्वा ब्रह्मशब्दो वेदवाची । प्रयुज्यमानमन्त्रात्मकम् इदं ब्रह्म तीक्ष्णीकृतम् । अमोघफलं भवतु इत्यर्थः । ॥ शो तनूकरणे इत्यस्मात् कर्मणि निष्ठा । "शाच्छोरन्यतरस्याम्" इति इत्त्वम् । "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम् ॥ । तथा मदीयं वीर्यम् मन्त्रप्रभावजनितं सामर्थ्यं शारीरं बलं च संशितम् सम्यक् तीक्ष्णीकृतम् अस्तु । तथा मदीयं क्षत्रम् क्षत्रियजातिः संशितम् मन्त्रप्रभावेन तीक्ष्णीकृतं सत् अजरम् जरारहितम् । अत्र शरीरावयवानां सेनावयवहस्त्यश्वादीनां च क्षयो जराशब्देन विवक्षितः । तद्रहितं जिष्णुं जयशीलम् अस्तु । ॥ अजरम् इति । न विद्यते जरा यस्येति नञो बहुव्रीहौ "नञो जरमरमित्रमृताः" इति उत्तरपदाद्युदात्तत्वम् । जि जये इत्यस्मात् "ग्लाजिस्थश्च ग्स्नुः" इति ग्स्नुप्रत्ययान्तो जिष्णुशब्दः ॥ । कस्माद् एवम् अन्यगतं फलं प्रार्थ्यत इति तत्राह । येषाम् इति । पूजार्थं बहुवचनम् । यस्य क्षत्रियस्य अहं पुरोहितः ऐहिकामुष्मिकसकलश्रेयोविषये पुरस्ताद् निहितः अस्मि भवामि । यस्माद् एवं पौरोहित्ये वृतोस्मि अतो मदीयस्य राज्ञो जयार्थम् एवं प्रार्थ्यत इत्यर्थः । ॥ दधातेः कर्मणि निष्ठा । "पूर्वाधरावराणाम्°" इति असिप्रत्ययान्तः पुरःशब्दः । तस्य च "पुरोव्ययम्" इति गतित्वाद् "गतिरनन्तरः" इति पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥

द्वितीया ॥

समहमेषां राष्ट्रं स्यामि समोजो वीर्यं१ बलम् ।

---

१ D S^{m} B^{h} K ३ for १.

---

1 S' Kd ममदीयं (? for मे मदीयं?). 2 S' Kd योत्र for क्षयो.

वृश्चामि॒ शत्रू॑णां बा॒हून॒नेन॑ ह॒विषा॒हम् ॥ २ ॥

सम् । अ॒हम् । ए॒षाम् । रा॒ष्ट्रम् । स्या॒मि॒ । सम् । ओजः॑ । वी॒र्य॑म् । बल॑म् ।
वृ॒श्चामि॑ । शत्रू॑णाम् । बा॒हून् । अ॒नेन॑ । ह॒विषा॑ । अ॒हम् ॥ २ ॥

पूर्वत्र येषाम् इति यच्छब्दनिर्दिष्टोर्थः एषाम् इति इदमा परामृश्यते । येषां राज्ञां देशे अहं निवसामि एषां राष्ट्रम् जनपदं सं श्यामि सम्यक् तीक्ष्णीकरोमि । धनकनकसमृद्धं करोमीत्यर्थः । शो छेदने । "ओतः श्यनि" इति ओकारलोपः । ओजः । बलनामैतत् । "उङ्गेर्बले बलोपश्च [उ० ४. १९१] इति असुन्प्रत्ययस्मरणात् । येन बलेन क्षेत्रज्ञस्य शरीरे अवस्थितिर्भवति तद् ओजःशब्दवाच्यम् । उक्तं हि आचार्यैः ।

क्षेत्रज्ञस्य तद् ओजस्तु केवलाश्रय इष्यते ।
यथा स्नेहः प्रदीपस्य यथाभ्रम् अशनित्विषः । इति ॥

तादृशं शरीरदार्ढ्यनिमित्तम् ओजः तज्जनितं वीर्यम् पराभिभवसामर्थ्यम् अन्यदपि हस्त्यश्वादिलक्षणं बलं च । सं श्यामीति संबन्धः । मन्त्रसामर्थ्येन दृढीकरोमीत्यर्थः ॥ तथा [अहं] मदीयस्य राज्ञः शत्रूणां बाहून् अनेन हूयमानेन आज्यसक्तादिरूपेण हविषा वृश्चामि छिनद्मि । आयुधग्रहणासमर्थान् भ्रष्टवीर्यान् करोमीत्यर्थः । ओव्रश्चू छेदने । तुदादित्वात् शः[2] । तस्य ङित्त्वात् "ग्रहिज्या०" इत्यादिना संप्रसारणम् । विकरणस्वरेण मध्योदात्तः । पादादित्वाद् अनिघातः ॥

तृतीया ॥

नी॒चैः प॑द्यन्ता॒मध॑रे भवन्तु ये नः॑ सू॒रिं म॒घवा॑नं पृत॒न्यान् ।
क्षि॒णामि॒ ब्रह्म॑णामित्रा॒नुन्न॑याम्या॒त्मान॒हम् ॥ ३ ॥

नी॒चैः । प॒द्य॒न्ता॒म् । अध॑रे । भ॒व॒न्तु॒ । ये । नः॒ । सू॒रिम् । म॒घऽवा॑नम् ।
पृ॒त॒न्यान् ।

---

१ K °न्यम्. K V °न्यान् as a variant. We with A R K[m] S[m] P P[2] J V. २ So P P[2] J distinctly.

---

1 So S′ Kd. 2 श: omitted by S′ Kd.

क्षिणामिं । ब्रह्मणा । अमित्रान्। उत्। नयामि । स्वान् । अहम् ॥ ३ ॥

मदीयाः शत्रवः नीचैः पद्यन्ताम् अवाङ्मुखाः पतन्तु । ततश्च अधरे निकृष्टाः पादाक्रान्ता भवन्तु । कीदृशास्ते शत्रव इति उच्यते । नः अस्मदीयं सूरिम् कार्याकार्यविभागज्ञं मघवानम् । मघम् इति धननाम । प्रभूतधनयुक्तं राजानं जेतुं ये शत्रवः पृतन्यान् पृतन्यन्ति पृतनां सेनाम् आत्मन इच्छन्ति । ते नीचैः पद्यन्ताम् इति संबन्धः । ॥ पृतनाशब्दात् "सुप आत्मनः क्यच्" । "कव्यध्वरपृतनस्यर्चि लोपः" इति क्यचि परतोन्त्यलोपः । तदन्तात् लेटि आडागमः ॥ उक्तप्रयोजनसिद्धये ब्रह्मणा परिवृढेन अमोघवीर्येण मन्त्रेण अमित्रान् शत्रून् अहं क्षिणोमि हिनस्मि । ॥ रि क्षि हिंसायाम । स्वादित्वात् श्नुः ॥ न केवलं शत्रूणां हिंसनम् अपि तु स्वान् स्वकीयान् राज्ञः उन्नयामि । उत्कृष्टं जयं प्रापयामीत्यर्थः ॥

चतुर्थी ॥

तीक्ष्णीयांसः परशोरग्नेस्तीक्ष्णतरा उत ।
इन्द्रस्य वज्रात् तीक्ष्णीयांसो येषामस्मि पुरोहितः ॥ ४ ॥

तीक्ष्णीयांसः । परशोः । अग्नेः । तीक्ष्णऽतराः । उत ।
इन्द्रस्य । वज्रात् । तीक्ष्णीयांसः । येषाम् । अस्मि । पुरःऽहितः ॥ ४ ॥

येषां राज्ञाम् अहं पुरोहितः अस्मि ते राजानः परशोः वृक्षच्छेदनसमर्थात् निशितधारात् तीक्ष्णीयांसः अतिशयेन तीक्ष्णाः शत्रुबलच्छेदनसमर्था भवन्तु ॥ तथा अग्नेः विश्वदहनसमर्थादपि तीक्ष्णतराः अतिशयेन तीक्ष्णाः । क्षणमात्रेण कृत्स्नं शत्रुबलं दग्धुं समर्था भवन्तु इत्यर्थः । उतशब्दः अप्यर्थे । स च भिन्नक्रमो योजितः ॥ तथा इन्द्रस्य वज्रात् । स खलु वृत्रासुरादिहनने शिलोच्चयपक्षच्छेदनादौ च अकुण्ठि-

1 S′ Kd °युक्तराजानः जेतुं ये शत्रवः पृतन्यं for °युक्तं राजानं जेतुं ये शत्रवः पृतन्यान् पृतन्यन्ति. This incorrect version of the *Bhâshya* as well as Sâyaṇa's reading पृतन्यं for पृतन्यान् in his text is the origin of the reading पृतन्यम् promulgated by Gaṇeshabhaṭṭa Dâdâ and adopted by his nephews **K** and **V**. 2 S′ Kd अडागमः.

तशक्तित्वेन प्रसिद्धः । ततोपि तीक्ष्णीयांसः अतिशयेन तीक्ष्णा निशिताः । अप्रतिहतगतयो भवन्तु इत्यर्थः ॥

पञ्चमी ॥

एषामहमायुधा सं स्यामेषां राष्ट्रं सुवीरं वर्धयामि ।
एषां क्षत्रमजरमस्तु जिष्णवेषां चित्तं विश्वेवन्तु देवाः ॥ ५ ॥

एषाम् । अहम् । आयुधा । सम् । स्यामि । एषाम् । राष्ट्रम् । सुऽवीरम् । वर्धयामि ।
एषाम् । क्षत्रम् । अजरम् । अस्तु । जिष्णु । एषाम् । चित्तम् । विश्वे । अवन्तु । देवाः ॥ ५ ॥

[अहम] एषाम् अस्मदीयानां राज्ञाम् आयुधा आयुधानि बाणखड्गकुन्तादीनि सं श्यामि सम्यक् तीक्ष्णीकरोमि ॥ एषां राष्ट्रम् राज्यं सुवीरम् शोभनवीरोपेतं वर्धयामि समृद्धं करोमि । ✕ सुवीरम् इति "वीरवीर्यौ च" इति उत्तरपदाद्युदात्तत्वम् ✕ ॥ अपि च एषां राज्ञां क्षत्रं क्षतात्[1] त्रायकं बलं क्षत्रियत्वं वा अजरम् जरारहितं जिष्णु जयशीलं चास्तु ॥ तथा एषां चित्तम् युद्धोन्मुखं मनः विश्वे सर्वे देवाः अवन्तु रक्षन्तु ॥

उद्धर्षन्तां मघवन् वाजिनान्युद् वीराणां जयतामेतु घोषः ।
पृथग् घोषा उलुलयः केतुमन्त उदीरताम् ।
देवा इन्द्रज्येष्ठा मरुतो यन्तु सेनया ॥ ६ ॥

उत् । हर्षन्ताम् । मघऽवन् । वाजिनानि । उत् । वीराणाम् । जयताम् । एतु । घोषः ।
पृथक् । घोषाः । उलुलयः । केतुऽमन्तः । उत् । ईरताम् ।
देवाः । इन्द्रऽज्येष्ठाः । मरुतः । यन्तु । सेनया ॥ ६ ॥

---

१ Such is the accent of **A B B̂ D K R S̊ J**. **P** changes सुऽवीरं to सुऽवीरम्. **P̂** cancels the ⊥ from वी but does not accent it otherwise. **K̊ V** सुवीरं (pada: सुऽवीरम्).
२ **R** (and **P P̂ J**) उलूलयः. We with **A B B̂ D K K̊ S̊ V**.

---

1 **S' Kd** क्षतात्त्रायतंकं for क्षतात् त्रायकम्.

प्रेता॒ जय॑ता नर उ॒ग्रा व॑: सन्तु बा॒ह॑व: ।
तीक्ष्णे॑षवोब॒लध॑न्वनो हतोग्रायु॑धा अब॒लानु॒ग्रबा॑हवः ॥ ७ ॥
प्र । इ॒त॒ । जय॑त । न॒रः॒ । उ॒ग्राः॒ । वः॒ । स॒न्तु॒ । बा॒ह॑वः ।
तीक्ष्ण॑ऽइ॑षवः । अ॒ब॒ल॑ऽध॑न्वनः । ह॒त॒ । उ॒ग्र॑ऽआ॑युधाः । अ॒ब॒लान् ।
उ॒ग्र॑ऽबा॑हवः ॥ ७ ॥

षष्ठी । हे मघवन् धनवन्निन्द्र त्वत्प्रसादाद् वाजिनानि वलानि हस्त्यश्वरथादीनि युद्धविषये उद्धर्षन्ताम् उत्कृष्टहर्षयुक्तानि भवन्तु ॥ तथा जयताम् जयं प्राप्नुवताम् अस्मदीयानां वीराणाम् शूराणां जयप्रयुक्तो घोषः सिंहनादाख्यः उदेतु उन्नच्छतु । परश्रोत्राण्यभिभूय वर्तताम् इत्यर्थः । एतदेव विवियते पृथग् इति । उल्लुलय इति । अनुकरणशब्दोयम् । उल्लुलु इत्येवमात्मकाः केतुमन्तः प्रज्ञानवन्तः सर्वैः प्रज्ञायमाना जयप्रयुक्ता घोषाः पृथक् इतस्ततः उत् ईरताम् उन्नच्छन्तु । ॒ईर गतौ । लोटि अदादित्वात् शपो लुक्॒ ॥

सप्तमी । इन्द्रज्येष्ठाः इन्द्रो ज्येष्ठः श्रेष्ठः स्वामी येषां तथाविधा मरुतो देवा युद्धेषु अस्माकं साहायकम् आचरितुं [सेनया] स्वस्वसेनया सार्धं यन्तु प्राप्नुवन्तु ॥ हे नरः नेतारः अस्मदीया भटाः प्रेत प्रक्रम्य युद्धभूमिं गच्छत । ततो देवैरनुगृहीताः शत्रून् जयत ॥ वः युष्माकं तीक्ष्णेषवः निशितबाणाद्यायुधोपेता बाहवः उग्राः उन्नूर्णबलाः शत्रुप्रहरणसमर्थाः सन्तु भवन्तु ॥ ततो यूयम् उग्रायुधाः निशितनिस्त्रिंशबाणाद्यायुधोपेताः अत एव उग्रबाहवः उन्नूर्णहस्ताः सन्तः अबलधन्वनः वलरहितधनुराद्यायुधोपेतान् अत एव अबलान् वलशून्यान् हत हिंस्त । पञ्चत्वं प्रापयतेत्यर्थः । ॒हन्तेर्लोण्मध्यमवहुवचने अदादित्वात् शपो लुक् । "अनुदात्तोपदेश०" इत्यादिना अनुनासिकलोपः॒ ॥

अष्टमी ॥

अव॑सृष्टा परा॑ पत॒ शर॑व्ये॒ ब्रह्म॑संशिते ।

---

१ B D S शर॑व्ये॒३व्र॰. We with A K B R K V.

---

1 S' Kd तीक्ष्णेशव:. 2 S' Kd निहितनि°.

जयामित्रान् प्र पद्यस्व जह्येषां वरंवरं मामीषां मोचि कश्चन ॥ ८ ॥

अवसृष्टा । परा । पत । शरव्ये । ब्रह्मसंशिते ।

जय । अमित्रान् । प्र । पद्यस्व । जहि । एषाम् । वरम्ऽवरम् । मा ।

अमीषाम् । मोचि । कः । चन ॥ ८ ॥

हे ब्रह्मसंशिते ब्रह्मणा मन्त्रेण तीक्ष्णीकृते [शरव्ये हिंसाकुशले इषो त्वम्] अवसृष्टा अस्माभिर्धनुषो विनिर्मुक्ता परा पत परागच्छ शत्रुसेनाभिमुखं गच्छ । गत्वा च तान् अमित्रान् शत्रून् जय ॥ तत्प्रकारम् आह प्र पद्यस्वेत्यादिना । प्रथमं शत्रून् प्र पद्यस्व प्रविश ॥ एषां मध्ये वरंवरम् श्रेष्ठं हस्त्यश्वपदातिलक्षणं[1] बलं जहि मारय । ॥ "हन्तेर्जः" इति जादेशः । तस्य "असिद्धवद् अत्रा भात्" इति असिद्धत्वात् हेर्लुगभावः ॥ ॥ अमीषाम् दूरे दृश्यमानानां शत्रूणां मध्ये कश्चन कोपि वीरो मा मोचि मुक्तो मा भूत् । सर्वोपि त्वया हन्तव्य इत्यर्थः । ॥ मोचीति । मुच्लृ मोक्षणे इत्यस्मात् कर्मणि माङि लुङि रूपम् । अमीषाम् इति । "एत ईद्बहुवचने" इति ईत्वभत्वे ॥ ॥

[इति] तृतीयकाण्डे चतुर्थेनुवाके चतुर्थं सूक्तम् ॥

"अयं ते योनिः" इति सूक्तेन निर्ऋतिकर्मणि शर्करामिश्रान् व्रीहीन् जुहुयात् । "अयं ते योनिरिति [जीर्णकोष्ठाद्] व्रीहीन् शर्करामिश्रान्" [कौ० ३. १] इत्यादि कौशिकसूत्रम् ॥

तथा अर्थोत्थापनविघ्नशमनकर्मणि अनेन सूक्तेन आज्यसमिदादिभिस्त्रयोदशभिर्द्रव्यैर्जुहुयात् । तस्मिन्नेव कर्मणि अस्य सूक्तस्य जपं वा कुर्यात् ॥

तथा च कौशिकः । "अयं ते योनिः[३. २०] आ नो भर[५. ७] धीती वा[७. १] इत्यर्धम् उत्थास्यन्नुपदधीत जपति" इति [कौ० ५. ५] ॥

"अयं ते योनिः" इत्यनया अरण्योरात्मनि वा अग्नेः समारोपणं कुर्यात् । सूत्रितं हि । "अयं ते योनिरित्यरण्योरग्निं समारोपयत्यात्मनि वा" इति [कौ० ५. ४] ॥

---

1 S′Kd °पदादिलक्ष°.

सवयज्ञेषु "सोमं राजानम्" [४] इत्यनया भृग्वङ्गिरोविदश्चतुर आर्षेयान् आह्वयेत् ॥

अग्निचयने अनयैव गार्हपत्येष्टकाम् उपधीयमानाम् अनुमन्त्रयेत । तथा च वैतानम् । "अयं ते योनिरिति गार्हपत्येष्टकां निधीयमानाम्" इति [वै० ५. १] ॥

अग्निचयने औदुम्बरसमिदाधानानन्तरम् "अग्ने अच्छा वदेह नः" इति तिस्रः "अर्यमणं बृहस्पतिम्" इति द्वे जपेत् । "वाजस्य नु प्रसवे" इत्यनया वाजप्रसवीयहोमानुमन्त्रणम् । तथा च वैतानं सूत्रम् । "उद् एनम् उत्तरं नय[६. ५] इति समिध आधीयमानाः" [इति प्रक्रम्य] "चत्वारि शृङ्गा[ऋ० ४. ५८. ३] अभ्यर्चत[७. ८७] इति जपति । "अग्ने अच्छ इति तिस्रः[२-४] अर्यमणं बृहस्पतिम्[७, ८] इति द्वे "वाजस्य नु प्रसवे[८] इति वाजप्रसवीयहोमान्" इति [वै० ५. २] ॥

तत्र प्रथमा ॥

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आ रोहाधा नो वर्धया रयिम् ॥ १ ॥
अयम् । ते । योनिः । ऋत्वियः । यतः । जातः । अरोचथाः ।
तम् । जानन् । अग्ने । आ । रोह् । अध । नः । वर्धय । रयिम् ॥ १ ॥

हे अग्ने ते तव अयम् अरणिर्यजमानो वा ऋत्वियः ऋतौ गर्भग्रहणकाले भवो योनिः उत्पत्तिकारणम् । ऋतुशब्दाद् भवार्थे "छन्दसि घस्" । "सिति च" इति पदसंज्ञया भसंज्ञाया बाधनात् ओर्गुणाभावे यण् । यतः यस्मात् योनेः जातः उत्पन्नः सन् अरोचथाः दीप्यसे । छान्दसो लङ् । तम् तादृशं योनिं जानन् ममेदम् उत्पत्तौ कारणम् इत्यवगच्छन् आ रोह प्रविश । मा परित्याक्षीः ॥ अध अनन्तरम् नः अस्माकं रयिम् धनं वर्धय समृद्धं कुरु । "निपातस्य च" इति अधशब्दस्य सांहितिको दीर्घः । "अन्येषाम् अपि दृश्यते" इति वर्धयेत्यस्य दीर्घः ॥

---

१ V (with S) रोहाधा. We with A B^{h} D K K^{m} R S^{m} P P^{2} J V.

द्वितीया ॥

अग्ने॒ अच्छा॑ वदे॒ह नः॑ प्र॒त्यङ् नः॑ सु॒मना॑ भव ।
प्र णो॑ यच्छ विशां पते धन॒दा अ॑सि न॒स्त्वम् ॥ २ ॥

अग्ने॑ । अच्छ॑ । व॒द॒ । इ॒ह । नः॒ । प्र॒त्यङ् । नः॒ । सु॒ऽमनाः॑ । भ॒व॒ ।
प्र । नः॒ । य॒च्छ॒ । वि॒शा॒म् । प॒ते॒ । ध॒न॒ऽदाः । अ॒सि॒ । नः॒ । त्वम् ॥ २ ॥

हे अग्ने इह अस्मिन् फले प्राप्तव्ये नः अस्मान् अच्छ वद । "निपातस्य च" इति सांहितिको दीर्घः । आभिमुख्येन प्रियं ब्रूहि ॥ तथा प्रत्यङ् अस्मान् प्रत्यञ्चन् अस्मदभिमुखं गच्छन् नः अस्माकं सुमनाः शोभनमनस्को भव ॥ हे विशां पते सर्वासां प्रजानां वैश्वानरात्मना पालक । "सुबामन्त्रिते पराङ्गवत् स्वरे" इति षष्ठ्यन्तस्य आमन्त्रितानुप्रवेशाद् "आमन्त्रितस्य च" इति षष्ठ्यामन्त्रितसमुदायस्य आष्टमिकम् अनुदात्तत्वम् । हे तादृश अग्ने नः अस्मभ्यं प्र यच्छ । धनदा इति विशेष्यमाणत्वाद् अर्थाद् अत्र धनानीति संबध्यते । अस्मदपेक्षितानि धनानि प्रदेहि इत्यर्थः । यतस्त्वं नः अस्माकं धनदा असि धनानां दाता भवसि । धनानि दातुं समर्थस्त्वमेवासीत्यर्थः ॥

तृतीया ॥

प्र णो॑ यच्छत्वर्य॒मा प्र भग॒ः प्र बृह॒स्पति॑ः ।
प्र दे॒वीः प्रोत सू॒नृता॑ र॒यिं दे॒वी द॑धातु मे ॥ ३ ॥

प्र । नः॒ । य॒च्छ॒तु॒ । अ॒र्य॒मा । प्र । भगः॑ । प्र । बृह॒स्पतिः॑ ।
प्र । दे॒वीः॒ । प्र । उ॒त । सू॒नृता॑ । र॒यिम् । दे॒वी । द॒धा॒तु॒ । मे॒ ॥ ३ ॥

नः अस्मभ्यम् अर्यमा देवः प्र यच्छतु यद् दातव्यं धनं तत् सर्वं ददातु । दाण् दाने । शपि "पाघ्रा०" इत्यादिना यच्छादेशः । भगश्च बृहस्पतिश्च इमावपि देवौ अस्मभ्यं धनं प्र यच्छताम् । बृहता देवानां पतिः बृहस्पतिः । "तद्बृहतोः करपत्योः०" इति पारस्करादिषु पाठात् सुट्तलोपौ । "उभे वनस्पत्यादिषु०" इति उभयपदप्रकृति-

स्वरत्वम् ॥ । देवीः देव्यः इन्द्राणीप्रभृतयः धनम् अस्मभ्यं प्र यच्छन्तु । ॥ जसि "वा छन्दसि" इति पूर्वसवर्णदीर्घः ॥ ॥ उत अपि च सूनृता प्रियवागात्मिका देवी सरस्वती रयिम् धनं मे मह्यं [प्र दधातु] प्रयच्छतु । ॥ शोभना चासौ ऋता चेति सूनृता । पृषोदरादित्वाद् रूपसिद्धिः ॥ ॥

चतुर्थी ॥

सोमं॑ राजा॑नमव॑से॒ऽग्निं गी॒र्भिर्ह॑वामहे ।
आ॒दि॒त्यं विष्णु॑ सू॒र्यं॑ ब्र॒ह्माणं॑ च॒ बृह॒स्पति॑म् ॥ ४ ॥

सोम॑म् । राजा॑नम् । अव॑से । अ॒ग्निम् । गी॒:ऽभिः । ह॒वा॒म॒हे॒ ।
आ॒दि॒त्यम् । विष्णु॑म् । सू॒र्य॑म् । ब्र॒ह्माण॑म् । च॒ । बृह॒स्पति॑म् ॥ ४ ॥

राजानम् राजमानम् । यद्वा ईश्वरम् । "सोमोस्माकं ब्राह्मणानां राजा" [तै० सं० १. ८. १०. २] इति श्रुतेः । तादृशं सोमम् अग्निं च अवसे अभिमतफलप्रदानेन रक्षणाय गीर्भिः स्तुतिरूपाभिर्वाग्भिः हवामहे आह्वयामः । तथा आदित्यम् अदितेः पुत्रम् । "मित्रश्च वरुणश्च"[1] [तै० आ० १. १३. ३] इत्यादिश्रुत्यन्तरप्रसिद्धं देवं विष्णुम् त्रैविक्रमं रूपम् आस्थाय सर्वव्यापिनं देवं सूर्यम् सर्वस्य प्रेरकं मण्डलान्तरवर्तिहिरण्मयपुरुषरूपं देवं ब्रह्माणम् एषां देवानां स्रष्टारं प्रजापतिं बृहस्पतिम् एषां हितकरणे अवस्थितम् एतत्संज्ञं च । तान् एतान् आदित्यादीन्[2] देवान् उक्तप्रयोजनसिद्धये हवामहे इति संबन्धः ॥

पञ्चमी ॥

त्वं नो॑ अग्ने अ॒ग्निभि॒र्ब्रह्म॑ य॒ज्ञं च॑ वर्धय ।
त्वं नो॑ देव॒ दात॑वे र॒यिं दाना॑य चोदय ॥ ५ ॥

त्वम् । नः । अ॒ग्ने॒ । अ॒ग्नि॒ऽभिः । ब्रह्म॑ । य॒ज्ञम् । च॒ । व॒र्ध॒य॒ ।
त्वम् । नः । दे॒व॒ । दात॑वे । र॒यिम् । दाना॑य । चो॒द॒य॒ ॥ ५ ॥

1 S' Kd omit च. 2 S' Kd इत्यादीन् for आदित्यादीन्.

हे अग्ने त्वम् अग्निभिः त्वद्विभूतिरूपैरन्यैरग्निभिः सार्धं नः अस्माकं ब्रह्म मन्त्रमयं स्तोत्रं तत्साध्यं यज्ञं च वर्धय फलसमृद्धं कुरु ॥ हे देव त्वं दानवे चरुपुरोडाशादिहवींषि दत्तवते [नः] यजमानाय रयिम् धनं दानाय दानार्थं नोदय[1] प्रेरय ॥

षष्ठी ॥

इन्द्रवायू उभाविह सुहवेह हवामहे ।
यथा नः सर्व इज्जनः संगत्यां सुमना असद् दानकामश्च नो भुवत् ॥ ६ ॥

इन्द्रवायू इति । उभौ । इह । सुऽहवा । इह । हवामहे ।
यथा । नः । सर्वः । इत् । जनः । सम्ऽगत्याम् । सुऽमनाः । असत् । दा-
नऽकामः । च । नः । भुवत् ॥ ६ ॥

इन्द्रश्च वायुश्च इन्द्रवायू । "देवताद्वन्द्वे च" इति प्राप्तस्य आनङः "उभयत्र वायोः प्रतिषेधो वक्तव्यः" इति प्रतिषेधः । "देवताद्वन्द्वे च" इति उभयपदप्रकृतिस्वरत्वस्य "नोत्तरपदेनुदात्तादौ०" इति प्रतिषेधः । "समासस्य" इति अन्तोदात्तत्वम् । एतत्संज्ञावुभौ देवौ इह अस्मिन् कर्मणि हवामहे आह्वयामः । एतयोरेवाह्वाने किं निमित्तम इति तद् आह सुहवेति । इह अस्मिन् फलविषये देवेषु मध्ये एतौ देवौ[2] सुहवा सुहवौ सुह्वानौ सुखेन ह्वातुं शक्यौ । ह्वयतेः "बहुलं छन्दसि" इति अनैमित्तिके संप्रसारणे कृते सुपूर्वाद् अस्मात् "ईषद्दुःसुषु०" इति खल् । "लिति" इति प्रत्ययात्पूर्वस्योदात्तत्वम् । "सुपां सुलुक्०" इति पूर्वसवर्णदीर्घः । यस्माद् एवं सुह्वानौ तस्माद् आह्वयाम इत्यर्थः ॥ यथा नः अस्माकं सर्व इत् सर्व एव जनः संगत्याम् संगमने प्राप्तौ सुमना असत् शोभनमनस्को भवेत् । न केवलं सौमनस्यमेव प्रार्थ्यते अपि तु सर्वो जनः नः अस्मभ्यं दानकामश्च दानाभिलाषयुक्तश्च यथा भुवत्[3] भवेत् । तथा आह्वयाम इति संबन्धः । अस्तेर्भवतेश्च लेटि अडागमः । "भूसुवोस्तिङि" इति गुणाभावः ॥

1 Sâyaṇa's text also has नोदय. 2 S′Kd देवौ अतः for देवौ. 3 S′Kd भवत्, though Sâyaṇa's text has: भुवत्.

सप्तमी ॥

अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय ।
वातं विष्णुं सरस्वतीं सवितारं च वाजिनम् ॥ ७ ॥
अर्यमणम् । बृहस्पतिम् । इन्द्रम् । दानाय । चोदय ॥
वातम् । विष्णुम् । सरस्वतीम् । सवितारम् । च । वाजिनम् ॥ ७ ॥

हे स्तोतः अर्यमादीन् देवान् अस्मभ्यम् [दानाय] अभिमतफलदानाय चोदय स्तुत्या प्रेरय । यथा ते तुष्टाः अस्मभ्यं धनं प्रयच्छन्ति तथा स्तुतिवाक्यैस्तोषयेत्यर्थः ॥ तत्र वाचम् इति सरस्वतीविशेषणम् वाग्रूपा या सरस्वतीति । एतच्च नदीरूपायास्तस्या निवृत्त्यर्थम् । वाजिनम् इति सवितृविशेषणम् । वाजः अन्नं वेगो वा तद्वन्तं सवितारम् इति ॥

अष्टमी ॥

वाजस्य नु प्रसवे सं बभूविमेमा च विश्वा भुवनान्यन्तः ।
उतादित्सन्तं दापयतु प्रजानन् रयिं च नः सर्ववीरं नि यच्छ ॥ ८ ॥
वाजस्य । नु । प्रऽसवे । सम् । बभूविम । इमा । च । विश्वा । भुवनानि । अन्तः ।
उत । आदित्सन्तम् । दापयतु । प्रऽजानन् । रयिम् । च । नः । सर्वऽवीरम् । नि । यच्छ ॥ ८ ॥

वाजस्य अन्नस्य प्रसवे उत्पत्तौ तद्धेतुभूते कर्मणि वा नु क्षिप्रं वयं सं बभूविम संप्राप्ता अभूम । यद्वा वृष्ट्यादिद्वारेण अन्नस्योत्पादको देवो वाजस्य प्रसवः । "सवजवौ छन्दसि वक्तव्यौ" इति अजन्तः सवशब्दः । "थाथ०" इत्यादिना उत्तरपदान्तोदात्तत्वम् ॥ तस्य संप्राप्तव्यताम् उपपादयति इमा चेति । इमा इमानि परिदृश्यमानानि विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि अन्तः वाजप्रसवस्य मध्ये वर्तन्ते । "अन्नाद् भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते" [तै० आ० ८. २] इत्यादिश्रुतेः ॥ स च वाजप्रसवः उक्तलक्षणः प्रजानन् सर्वप्राणिहृदयग-

तम् अभिप्रायविशेषं जानन् उत अदित्सन्तम् दातुम् अनिच्छन्तमपि पुरुषं दापयतु वुद्धिप्रेरणेन अस्मभ्यं दाने प्रवर्तयतु । ऋअदित्सन्तम इति । "सनि मीमाघुरभलभ०" इत्यादिना इसादेशः । "सस्यार्धधातुके" इति तत्वम् । "अत्र लोपोभ्यासस्य" इति अभ्यासलोपः । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ऋ ॥ तथा नः अस्माकं रयिम् विद्यमानं धनं च सर्ववीरम् । वीर्याज्जायन्ते इति वीराः पुत्रादयः । सर्वैर्वीरपुरुषैरुपेतं नि यच्छात् नियच्छतु नियमयतु सुचिरं स्थापयतु । ऋयमेलेंटि आडागमः । "इषुगमियमां छः" इति छत्वम् ऋ ॥

नवमी ॥

दुहां मे पञ्च प्रदिशो दुहामुर्वीर्यथाबलम् ।
प्रापेयं सर्वा आकूतीर्मनसा हृदयेन च ॥ ९ ॥

दुहाम् । मे । पञ्च । प्रऽदिशः । दुहाम् । उर्वीः । यथाऽबलम् ।
प्र । आपेयम् । सर्वाः । आऽकूतीः । मनसा । हृदयेन । च ॥ ९ ॥

[पञ्च] पञ्चसंख्याकाः प्रदिशः प्राच्याद्याश्चतस्रः मध्यं चेति महादिशः मे मह्यं दुहाम् अभिमतफलं दुहताम् । ऋ"बहुलं छन्दसि" इति दुहेः परस्य झादेशस्य अतो रुडागमः । "लोपस्त आत्मनेपदेषु" इति तशब्दस्य लोपः ऋ ॥ तथा उर्वीः उर्व्यः षट्संख्याकाः मन्त्रान्तरे प्रसिद्धाः । "षण्मोर्वीरंहसस्पान्तु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्च" [आश्व० १. २] इति । ता द्युपृथिव्याद्याः षड् उर्व्यः यथाबलम् यथाशक्ति अस्मदपेक्षितं धनं दुहाम् दुहतां प्रयच्छन्तु । दिशाम् उर्वीणां च स्त्रीत्वाद् धेनुत्वारोपेण दुहेः प्रयोगः ॥ ततश्च अहं सर्वा आकूतीः संकल्पान् प्रापेयम् प्राप्नवानि । ऋआप्लृ व्याप्तौ इत्यस्माद् आशिषि लिङि "लिङ्याशिष्यङ्" इति अङ् प्रत्ययः ऋ । केन साधनेनेति उच्यते । मनसा संकल्पविकल्पहेतुभूतया अन्तःकरणवृत्त्या हृदयेन हृदयोपलक्षितान्तःकरणेन च । यद्यत् फलजातं संकल्पयामि तत् सर्वं फलं मनोव्यापारमात्रेण प्राप्नुयाम इत्याशासे इत्यर्थः ॥

---

१ P $\dot{P}^2$ J अपेयम्. We with Sâyaṇa.

दशमी ॥

गोसनिं॒ वाच॑मुदेयं॒ वर्च॑सा मा॒भ्युदि॑हि ।
आ रु॑न्धां स॒र्वतो॑ वा॒युस्त्वष्टा॑ पोषं॑ दधातु मे ॥ १० ॥

गो॒ऽसनि॑म् । वाच॑म् । उ॒दे॒य॒म् । वर्च॑सा । मा॒ । अ॒भि॒ऽउदि॑हि ।
आ । रु॒न्धा॒म् । स॒र्वतः॑ । वा॒युः । त्वष्टा॑ । पोष॑म् । दु॒धा॒तु॒ । मे॒ ॥ १० ॥

गां सनोति प्रयच्छतीति गोसनिः । "छन्दसि वनसनरक्षिमथाम" इति इन् प्रत्ययः । गवोपलक्षितसर्वधनप्रदां वाचम् अहम् उदेयम् उद्यासम् उच्यासम् । वद व्यक्तायां वाचि । "लिङ्याशिष्यङ्" इति अङ् प्रत्ययः ॥ हे वाग्देवते त्वं वर्चसा तेजसा मा माम् अभ्युदिहि अभ्युद्गच्छ । अभिमतफलं दातुं मां प्राप्नुहीत्यर्थः ॥ "सैषानस्तमिता देवता यद् वायुः" इति श्रुत्यन्तरप्रसिद्धः सूत्रात्मा वायुः सर्वतः सर्वाभ्यो दिग्भ्यः आ रुन्धाम् प्राणात्मना आवृणोतु ॥ त्वष्टा देवः मे मम पोषम् शरीरादेः पुष्टिं दधातु धारयतु । प्रयच्छतु इत्यर्थः ॥

[इति] तृतीयकाण्डे चतुर्थेनुवाके पञ्चमं सूक्तम् ॥

समाप्तश्चतुर्थोनुवाकः ॥

पञ्चमेनुवाके पञ्च सूक्तानि । तत्र "ये अग्नयः" इति प्रथमं सूक्तम् । तत्र आद्याभिः सप्तभिः क्रव्यादोपहतगृहगोष्ठक्षेत्रादिशान्त्यर्थं मणिधारणहोमादिकर्माणि कुर्यात् । तानि च संपातितपालाशवृक्षमणिबन्धनम् आज्यहोमः पालाशसमिदाधानम् पालाशेन उदञ्चनेन उदकहोमः पालाशयाम् उदपात्र्यां यवान् प्रक्षिप्य उदकसहितयवहोमः ॥

तथा अनेन दशर्चेन सर्वेण सूक्तेन क्रव्याच्छमने सक्तूदकं काम्पीलसमिद्धयेन मथित्वा तं मन्थं पालाशया दर्व्या प्रत्यृचं जुहुयात् ॥

तथा वशाशमनकर्मणि अनेन सूक्तेन वशाम् अभिमन्त्र्य ब्राह्मणाय दद्यात् ॥

तथा च कौशिकः । "ये अग्नय इति क्रव्यादोपहते[1] पालाशं बध्नाति । "जुहोति । आदधाति । उदञ्चनेन उदपात्र्यां यवान् अङ्गिरानीयोल्लोपम[2] । "ये अग्नय इति पालाश्या दर्व्या मन्थम् उपमथ्य काम्पीलीभ्याम् उ- "पमन्थनीभ्याम् । शमनं च ।" [कौ० ५. ७.] इति ॥

तथा वपां वा हवींषि वा काकोलूकं[3]श्वमानुषादयो गृहीत्वा गच्छेयुः तत्प्रायश्चित्तार्थम् अनेन दशर्चेन सूक्तेन आज्यं जुहुयात् । तथा च सू- त्रम् । "अथ यत्रैतद् वपां [वा] हवींषि वा वयांसि द्विपदचतुष्पदं वा[4]- भिमृश्यावगच्छेयुः ये अग्नयः[३. २१] नमो देववधेभ्यः[६. १३]" इ- त्यादि [कौ० १३. ३१.] ॥

तथा बृहद्गणेपि आद्याः सप्तर्चः परिगणिताः । ततस्तस्य गणस्य य- त्रयत्र विनियोगस्तत्र सर्वत्र आसां विनियोगो द्रष्टव्यः ॥

तथा सोमस्कन्दने "ये अग्नयः" इति सप्तभि[5]र्ब्रह्मा जुहुयात् । उ- क्तं वैताने । "यत्र विजानाति ब्रह्मन्[6] सोमोस्कन्" इति प्रक्रम्य "ये [अग्नयो] अप्स्वन्तरिति सप्तभिरभिजुहोति" [वै० ३. ६] इति ॥

आवसथ्याधाने क्रव्याच्छमनानन्तरं गृहम् आगत्य "ये अग्नयः" इ- ति सप्तभिराज्यं जुहुयात् । सूत्रितं हि । "अन्तर्धिः[१२. २. ४४] प्र- त्यञ्चम् अर्कम्[१२. २. ५५] ये अग्नयः[३. २१] नमो देववधेभ्यः"[६. १३] इति [कौ० ९. ४] ॥

तत्रैव क्रव्यादाग्नेः शमने "हिरण्यपाणिम्" इत्यादिभिरन्त्याभिस्तिसृभिः क्रव्यादग्नौ सक्तुमन्थं जुहुयात् । सूत्रितं हि । "व्याकरोमि[१२. २. ३२] इति गार्हपत्यक्रव्यादौ समीक्षते[7]" [कौ० ९, २] इति प्रक्रम्य "अन्येभ्यस्त्वा [१२. २. १६] हिरण्यपाणिम्[८-१०] इति शमयति" [कौ० ९. ३] इति ॥

चातुर्मास्ये साकमेधपर्वणि आतिथ्येष्ट्यनन्तरं "दिवं पृथिवीम्" [७] इत्यनया अग्न्युपस्थानं कार्यम् । उक्तं वैताने । "उदस्य केतवः[१३. २]

---

1 So S'Kd. *Kaus'ika*: क्रव्यादनुपहत इति पालाशं, which Dârila explains thus: यदि जानीयात् क्रव्यादनुपहतः विनाशायेति. Kes'ava has: क्रव्यादोपहतगृहे क्षेत्रे वान्यत्र गोष्ठे वा यत्र क्वचित् तत्र शांतिरुच्यते. 2 S'Kd °नीयोल्लोभं for °नीयोल्लोपं which we with *Kaus'ika*. 3 S'Kd °लूकाश्व°. 4 S'Kd द्विपदचतुष्पदं वाभिमृश्याभिगच्छे°. We with *Kaus'ika*. 5 S'Kd सप्तभिर्ब्रह्माणि जुहु°. 6 S'Kd ब्रह्मसोम्येस्कंददिति. We with the *Vaitâna*. 7 S'Kd समीक्षित इति. We with *Kaus'ika*.

"इत्यादित्यम् उपतिष्ठन्ते। दक्षिणाञ्चो दिवं पृथिवीम् इत्यग्नीन्" इति [वै० २. ५] ॥

तत्र प्रथमा ॥

ये अग्नयो अप्स्वन्तर्ये वृत्रे ये पुरुषे ये अश्मसु।
य आविवेशौषधीर्यो वनस्पतींस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ १ ॥

ये। अग्नयः। अप्ऽसु। अन्तः। ये। वृत्रे। ये। पुरुषे। ये। अश्मऽसु।
यः। आऽविवेश। ओषधीः। यः। वनस्पतीन्। तेभ्यः। अग्निऽभ्यः।
हुतम्। अस्तु। एतत् ॥ १ ॥

अप्सु उदकेषु अन्तः मध्ये ये अग्नयः वाडवाद्याः सन्ति ये वा अग्नयो वृत्रे आवरणस्वभावे मेघे वैद्युतादिरूपेण विद्यन्ते। तत् को वृत्रः मेघ इति नैरुक्ताः इति [नि० २. १६] यास्कवचनाद् वृत्रशब्दो मेघवाची। यद्वा वृत्रे वृत्रासुरशरीरे अन्तरवस्थिता ये अग्नयः सन्ति तथा पुरुषे मानुषशरीरे अशितपीतपरिणामहेतुत्वेन ये अग्नयो वैश्वानरात्मना वर्तन्ते ये वा अग्नयः अश्मसु सूर्यकान्तादिशिलासु अन्तर्वर्तन्ते तथा योग्निः ओषधीः व्रीहियवादिरूपाः फलपरिपाकार्थम् आविवेश यश्च वनस्पतीन् वृक्षान् आविवेश तेभ्यः सर्वजगदनुग्राहकेभ्यः अग्निभ्यः एतत् प्रदीयमानं हविः हुतम् अस्तु दत्तं भवतु ॥ एक एवाग्निः स्वविभूतिरूपैरन्यैरग्निभिः कृत्स्नं जगद् अनुप्रविश्य पोषयतीति तस्य बहुत्वेन स्तुतिः। अत एव अग्नीनां प्रधानभूताग्निशाखात्वं दाशतय्याम् आम्नातम्। "वया इद् अग्ने अग्नयस्ते अन्ये" [ऋ० १. ५९. १] इति ॥

द्वितीया ॥

यः सोमे अन्तर्यो गोष्वन्तर्य आविष्टो वयःसु यो मृगेषु।
य आविवेश द्विपदो यश्चतुष्पदस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ २ ॥

---

१ A B K $\overset{m}{K}$ V °विवेशौषधी°. We with $\overset{h}{B}$ D R $\overset{m}{S}$. २ B $\overset{m}{S}$ आविष्टो. We with A $\overset{h}{B}$ D K $\overset{m}{K}$ R P $\overset{2}{P}$ J V.

---

1 S′ Kd उपतिष्ठते. We with the *Vaitâna*. 2 S′ Kd °मित्यग्निम्. We with the *Vaitâna*. 3 S′ Kd °पीतेपरि°.

यः । सोमे । अन्तः । यः । गोषु । अन्तः । यः । आऽविष्टः । वयःऽसु ।
यः । मृगेषु ।
यः । आऽविवेश । द्विऽपदः । यः । चतुःऽपदः । तेभ्यः । अग्निऽभ्यः ।
हुतम् । अस्तु । एतत् ॥ २ ॥

सोमे लतारूपे अमृतमयरसपरिपाकाय योग्निः अन्तराविष्टः प्रविष्टः यश्च गोषु । उपलक्षणम् एतत् । गोमहिषादिषु ग्राम्यपशुषु योग्निः अन्तः प्रविष्टः पक्वं पयः करोति । गोष्विति । "सावेकाच०" इति प्राप्तस्य विभक्त्युदात्तत्वस्य "न गोश्वन्०" इति प्रतिषेधः । तथा वयःसु पक्षिषु यः अग्निः अनुप्रविष्टः तथा [यो] मृगेषु हरिणादिषु अनुप्रविष्टः । किं बहुना । योग्निः द्विपदः पादद्वयोपेतान् मनुष्यादीन् [योग्निः] चतुष्पदः पादचतुष्टयोपेतान् अन्यानपि प्राणिनः जाठरात्मना आविवेश । उक्तं हि भगवता ॥

अहं वैश्वानरो भूत्वा प्राणिनां देहम् आश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ।

इति [भ० गी० १५.१४] ॥ द्विपद इति । द्वौ पादावस्येति विगृह्य समासे "संख्यासुपूर्वस्य" इति पादशब्दान्त्यलोपः समासान्तः । ततः शसि "पादः पत्" इति पद्भावः । "द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ" इति उत्तरपदान्तोदात्तत्वम् । एवं चतुष्पद इत्यत्रापि एवमेव रूपसिद्धिः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम । तेभ्य इत्यादि पूर्ववत् ॥

तृतीया ॥

य इन्द्रेण सरथं याति देवो वैश्वानर उत विश्वदाव्यः ।
यं जोहवीमि पृतनासु सासहिं तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ ३ ॥
यः । इन्द्रेण । सऽरथम् । याति । देवः । वैश्वानरः । उत । विश्वऽदाव्यः ।
यम् । जोहवीमि । पृतनासु । सऽसहिम् । तेभ्यः । अग्निऽभ्यः । हुतम् ।
अस्तु । एतत् ॥ ३ ॥

---

१ J मृगेषु. We with P $\hat{P}$.

यो देवः दानादिगुणयुक्तोग्निः इन्द्रेण सरथम् समानरथम् एकं रथम् आरुह्य याति गच्छति। अनयोः समानरथत्वं च "य इन्द्राग्नी चित्रतमो रथो वाम" इति [ऋ० १. १०८. १] मन्त्रान्तरे स्पष्टम् अवगतम्। यश्चाग्निः वैश्वानरः विश्वनरहितः उत अपि च विश्वदाव्यः विश्वदावसंबन्धी विश्वस्य दाहको दावाग्निः तथा पृतनासु संग्रामेषु सासहिम् अत्यर्थम् अभिभवितारं यम् आथर्वणप्रसिद्धं सांग्रामिकम् अग्निं जोहवीमि जयार्थं चोदितैर्हविर्भिः पुनःपुनर्जुहोमि यद्वा युद्धसाहाय्यार्थं[2] पुनःपुनराह्वयामि। ॥ "ह्वः संप्रसारणम्" "अभ्यस्तस्य च" इति ह्वयतेः संप्रसारणम्। "गुणो यङ्लुकोः" इति अभ्यासस्य गुणः। "अनुदात्ते च" इति अभ्यस्ताद्युदात्तत्वम् ॥। "जेतारम् अग्निं पृतनासु सासहिम्" [तै० सं० ४. १. १०. २] इति मन्त्रान्तरम्। तेभ्य इत्यादि गतम्॥

चतुर्थी॥

यो देवो विश्वाद् यमु काममाहुर्यो दातारं प्रतिगृह्णन्तमाहुः।
यो धीरः शक्रः परिभूरदाभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत्॥ ४॥

यः। देवः। विश्वऽअत्। यम्। ऊं इति। कामम्। आहुः। यम्। दातारम्। प्रतिऽगृह्णन्तम्। आहुः॥
यः। धीरः। शक्रः। परिऽभूः। अदाभ्यः। तेभ्यः। अग्निऽभ्यः। हुतम्। अस्तु। एतत्॥ ४॥

यो देवः दानादिगुणयुक्तः अग्निः विश्वात् विश्वं सर्वम् अत्ति भक्षयतीति विश्वात्। ॥"अदोनन्ने" इति विट् प्रत्ययः॥। यम् उ। उशब्दः अवधारणे। यमेवाग्निं कामम् कामयितारं काम्यमानफलात्मकं वा आहुः कथयन्ति तथा यम् अग्निं दातारम् इष्टफलस्य प्रदातारं प्रतिगृह्णन्तम् प्रतिग्रहीतारं च आहुः कथयन्ति यश्चाग्निः धीरः धीमान् शक्रः सर्वकार्येषु शक्तः। ॥शक्लृ शक्तौ इत्यस्मात् स्फायितञ्चीत्यादिना [उ०

---

१ P आहुः. We with $\dot{P}^2$ J.

---

1 S′ Kd यदिंद्रा° for य इन्द्रा°. 2 S′ Kd °सहायार्थं.

२.१३] रक् ॥ । परिभूः शत्रूणां परिभविता अदाभ्यः केनचिदपि अहिंस्यः । तेभ्य इत्यादि गतम् ॥

पञ्चमी ॥

यं त्वा होतारं मनसाभि संविदुस्त्रयोदश भौवनाः पञ्च मानवाः ।
वर्चोधसं यशसं सूनृतावते तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ ५ ॥

यम् । त्वा । होतारम् । मनसा । अभि । समऽविदुः । त्रयःऽदश । भौ-
वनाः । पञ्च । मानवाः ॥
वर्चःऽधसं । यशसं । सूनृतांऽवते । तेभ्यः । अग्निऽभ्यः । हुतम् । अस्तु ।
एतत् ॥ ५ ॥

हे अग्ने यं त्वा त्वां होतारम् देवानाम् आह्वातारं मनसा बुद्ध्या अभि संविदुः आभिमुख्येन संविदन्ति सम्यग् जानन्ति । ॥ "विदो लटो वा" इति झेरुसादेशः ॥ । के पुनस्ते इत्याह । त्रयोदश । त्रयश्च दश च त्रयोदश । ॥ "त्रेस्त्रयः" इति त्रिशब्दस्य पूर्वपदस्य त्रयस् आदेशः । "संख्या" इति पूर्वपदप्रकृतिस्वरत्वम् ॥ । त्रयोदश-संख्याका भौवनाः । भवन्ति सत्तां लभन्ते अस्मिन् भूतजातानीति भुवनः संवत्सरः । ॥ भवतेरौणादिकः क्युन् प्रत्ययः ॥ । तत्संबन्धिनश्चैत्राद्या मासा भौवनाः । ते हि संसर्पांहस्पत्याख्येन अधिमासेन सह त्रयोदश भवन्ति । "अस्ति त्रयोदशो मास इत्याहुः" [तै० सं० ६. ५. ३. ४] इति हि ब्राह्मणम् । तथा मानवाः मनुना सृष्ट्यादौ कल्पिता वसन्ताद्याः पञ्चर्तवः । हेमन्तशिशिरयोः समासाभिप्रायम् एतत् । ॥ पञ्चर्तवः संवत्सरस्येति हि ब्राह्मणम् इति यास्कः [नि० ४. २७] ॥ । यद्वा । "विश्वकर्मन् भौवन मां दिदासिथ" [ऐ० ब्रा० ८. २१] । "विश्वकर्मा भौवनः स्वात्मनि सर्वाणि भूतानि जुहवांचकार" [नि० १०. २६] इत्यादिश्रुत्यन्तरप्रसिद्धा भुवनाख्यस्य महर्षेः पुत्रा विश्वकर्मप्रभृतयस्त्रयोदशसंख्याकाः । पञ्च मानवाः निषादपञ्चमाश्चत्वारो वर्णाः । गन्धर्वाप्सरसो देवा असुरा रक्षांसि इत्येके । एवमात्मकाः सर्वे त्वाम् अभि

संविदुरिति संबन्धः । तस्मै वर्चोधसे । वर्चस्तेजः दधाति धारयति प्रयच्छतीति वा वर्चोधाः । ⁂दधातेरसुन् प्रत्ययः⁂ । यशसे यशस्विने । यद्वा व्याप्नुवते । ⁂अशू व्याप्तौ इत्यस्माद् अशेर्युट् च [उ० ४. १९०] इति असुन् युडागमश्च⁂ । सूनृतावते । प्रियसत्यात्मिका वाक् सूनृता । तद्वते एवंभूताय तुभ्यं तेभ्यः प्रागुक्तेभ्यस्त्वद्विभूतिरूपेभ्यः अग्निभ्यश्च । गतम् अन्यत् ॥

षष्ठी ॥

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे ।
वैश्वानरज्येष्ठेभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ ६ ॥

उक्षऽअन्नाय । वशाऽअन्नाय । सोमऽपृष्ठाय । वेधसे ।
वैश्वानरऽज्येष्ठेभ्यः । तेभ्यः । अग्निऽभ्यः । हुतम् । अस्तु । एतत् ॥ ६ ॥

उक्षान्नाय । उक्षाणः सेचनसमर्था वृषभाः । ते हविरात्मना अन्नं यस्य स तथोक्तः । [तस्मै] । [वशान्नाय] । वशा वन्ध्या गावः । ता अन्नं यस्य तस्मै । सोमपृष्ठाय हूयमानः सोमः पृष्ठे उपरिभागे यस्य स सोमपृष्ठः । तस्मै । वेधसे आहुतिद्वारेण सर्वस्य जगतो विधात्रे । ⁂विध विधाने इत्यस्माद् असुन्⁂ । स्मर्यते हि ।

अग्नौ प्रास्ताहुतिः सम्यग् आदित्यम् उपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ।

इति [म० स्मृ० ३. ७६] । तेभ्यो वैश्वानरज्येष्ठेभ्यः । एक उक्षान्नः । अपरो वशान्नः । अन्यः सोमपृष्ठः । ते सर्वे वैश्वानरज्येष्ठाः । विश्वनरहितो जाठररूपेणावस्थितोऽग्निर्ज्येष्ठः अग्रजो येषाम् । स खलु जीवदवस्थायामपि उक्षादिशरीरम् अनुप्रविश्य भुङ्क्ते । संज्ञपनोत्तरकालम् अन्येषाम् अग्नीनां भोग इति ज्यायस्त्वकनीयस्त्वभावः । तेभ्यः इत्यादि गतम् ॥

सप्तमी ॥

दिवं पृथिवीमन्वन्तरिक्षं ये विद्युतमनुसंचरन्ति ।
ये दिक्ष्वन्तर्ये वाते अन्तस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ ७ ॥

---

१ B B^{P} R दिक्ष्वंत°. We with A $\overset{h}{B}$ K $\overset{m}{S}$ $\overset{m}{K}$ V.

दिवम्। पृथिवीम्। अनु। अन्तरिक्षम्। ये। विऽद्युतम्। अनुऽसंचरन्ति॥
ये। दिक्षु। अन्तः। ये। वाते। अन्तः। तेभ्यः। अग्निऽभ्यः। हुतम्।
अस्तु। एतत्॥ ७॥

दिवम् द्युलोकं पृथिवीम् भूलोकम् अन्तरिक्षम् अन्तरा क्षान्तं द्यावापृथिव्योर्मध्यवर्तिनं लोकं च अनुप्रविश्य ये अग्नयः संचरन्ति। ये च विद्युतम् मेघस्थितां तडितं विद्योतमानं ज्योतिश्चक्रं वा अनुप्रविश्य संचरन्ति। ये चाग्नयः लोकत्रयव्यापिकासु दिक्षु अन्तः मध्ये वर्तन्ते। ये च वाते वायौ सर्वजगदाधारभूते सूत्रात्मनि अन्तः संचरन्ति। तेभ्यः इत्यादि गतम्॥

अष्टमी॥

हिरण्यपाणिं सवितारमिन्द्रं बृहस्पतिं वरुणं मित्रमग्निम्।
विश्वान् देवानङ्गिरसो हवामह इमं क्रव्यादं शमयन्त्वग्निम्॥ ८॥

हिरण्यऽपाणिम्। सवितारम्। इन्द्रम्। बृहस्पतिम्। वरुणम्। मित्रम्। अग्निम्।
विश्वान्। देवान्। अङ्गिरसः। हवामहे। इमम्। क्रव्यऽअदम्। शमयन्तु। अग्निम्॥ ८॥

हिरण्यपाणिम्। स्तोतृभ्यो दातुं हिरण्यं पाणौ यस्य स तथोक्तः हितरमणीयपाणिः हिरण्यपाणिः हिरण्मयहस्तो वा। कुतश्चित् कारणात् छिन्नहस्तस्य सवितुः हिरण्मयो हस्तः प्रतिनिहित इत्याख्यायिका। अत एवान्यत्र आम्नातम्। "हिरण्यहस्तो असुरः सुनीथः" [ऋ०१.३५.१०] इति। ईदृशं सवितारम् सर्वस्य प्रेरकं देवम् इन्द्रादींश्च विश्वान् सर्वान् देवान् अङ्गिरसः एतत्संज्ञकान् महर्षीन् हवामहे आह्वयामः। यद्वा अङ्गिरसः[1] आङ्गिरसगोत्रजा वयम् इति योज्यम्। ते च आहूताः सवित्रादयः इमं क्रव्यादम्। क्रव्यं मांसम् अत्तीति क्रव्यात् दुष्टोऽग्निः। "क्रव्ये च" इति अदेर्विट् प्रत्ययः। ईदृशम् अग्निं शमयन्तु शान्तं कुर्वन्तु॥

1 S' Kd अंगिरस°.

नवमी ॥

शान्तो अग्निः क्रव्याच्छान्तः पुरुषरेषणः।
अथो यो विश्वदाव्यं१स्तं क्रव्यादमशीशमम् ॥ ९ ॥

शान्तः। अग्निः। क्रव्यऽअत्। शान्तः। पुरुषऽरेषणः।
अथो इति। यः। विश्वऽदाव्यः। तम्। क्रव्यऽअदम्। अशीशमम् ॥ ९ ॥

यः क्रव्यात् उक्तविधः अग्निः स सवित्रादीनाम् अनुग्रहात् शान्तः सुखकरो भवतु। यः पुरुषरेषणः पुरुषस्य हिंसकोग्निः सोपि शान्तः सुखकरो भवतु ॥ अथो अपि च योग्निः विश्वदाव्यः सर्वस्य दाहको दावाग्निः तं क्रव्यादम् मांसभक्षकम् अग्निम् अशीशमम् शान्तम् अकार्षम्। ⁂ शमेर्ण्यन्तात् लुङि चङि रूपम् ⁂ ॥

दशमी ॥

ये पर्वताः सोमपृष्ठा आपं उत्तानशीवरीः।
वातः पर्जन्य आदग्निस्ते क्रव्यादमशीशमन् ॥ १० ॥

ये। पर्वताः। सोमऽपृष्ठाः। आपः। उत्तानऽशीवरीः।
वातः। पर्जन्यः। आत्। अग्निः। ते। क्रव्यऽअदम्। अशीशमन् ॥ १० ॥

सोमपृष्ठाः सोमः पृष्ठे उपरिभागे येषां तादृशा ये पर्वताः मुञ्जवत्प्रभृतयो गिरयः सन्ति उत्तानशीवरीः उत्तानशयनस्वभावा या आपः सन्ति। ⁂ "अन्येभ्योपि दृश्यन्ते" इति शीङः क्वनिप्। "वनो र च" इति ङीब्रेफौ। जसि "वा छन्दसि" इति पूर्वसवर्णदीर्घः ⁂। वातादयः प्रसिद्धाः। आत् इति आनन्तर्यवाची। ते सर्वे अनुक्रान्ताः पर्वतादयः क्रव्यादम् मांसभक्षकम् उपद्रवकारिणम् अग्निम् अशीशमन् शान्तम् अकृषत। इतः परं नास्माकं भयशङ्का विद्यत इत्यर्थः ॥

[इति] तृतीये काण्डे पञ्चमेनुवाके प्रथमं सूक्तम् ॥

---

१ B $\overset{h}{B}$ R $\overset{m}{S}$ विश्वदाव्यं३स्तं. We with A K $\overset{m}{K}$ V. २ A B $\overset{h}{B}$ D R $\overset{m}{S}$ °शीशमं (P $\overset{2}{P}$ J °शीशमम्). We with K $\overset{m}{K}$ V.

"हस्तिवर्चसम्" इति द्वितीयसूक्तेन तेजस्कामो हस्तिदन्तं स्पृष्ट्वा उपतिष्ठते ॥

तथा हस्तिदन्तमणिम् अनेन संपात्य अभिमन्त्र्य बध्नीयात् ॥

तद् उक्तं कौशिकेन । "ममाग्ने वर्चः[५.३] इति वर्चस्यानि" [कौ०२.३] इति प्रक्रम्य "हस्तिवर्चसम् इति हस्तिनं[2] हास्तिदन्तं बध्नाति" इति [कौ०२.४] ॥

तथा अनेन सूक्तेन पुरोहितो हस्तिनम् अभिमन्त्र्य राज्ञे प्रातःप्रातः प्रयच्छेत् । तद् उक्तं परिशिष्टे । "अथ पुरोहितकर्माणि" इति प्रक्रम्य "वातरंहाः[६.९२] इत्यश्वम् हस्तिवर्चसम[३.२२] इति हस्तिनम्" इति [प० ४.१] ॥

"ब्राह्मीं ब्रह्मवर्चसकामस्य वस्त्रशयनाग्निज्वलने च" इति [न०क०१७] विहितायां ब्राह्म्याख्यायां महाशान्तौ हस्तिदन्तमणिबन्धनेपि एतत् सूक्तम । तद् उक्तं नक्षत्रकल्पे । "हस्तिवर्चसम् इति हस्तिदन्तं[3] ब्राह्म्याम" इति [न०क०१९] ॥

तत्र प्रथमा ॥

हस्तिवर्चसं प्रथतां बृहद् यशो अदित्या यत् तन्वः संबभूव ।
तत् सर्वं समदुर्मह्यमेतद् विश्वे देवा अदितिः सजोषाः ॥ १ ॥

हस्तिऽवर्चसम । प्रथताम । बृहत । यशः । अदित्याः । यत । तन्वः ।
समऽबभूव ।
तत । सर्वं । सम । अदुः । मह्यम । एतत । विश्वे । देवाः । अदितिः ।
सऽजोषाः ॥ १ ॥

हस्तिवर्चसम । हस्तोस्यास्तीति हस्ती गजः । ✕"हस्ताज्जातौ" इति गजजातावभिधेयायाम् इनिप्रत्ययः ✕ । तस्य यद् वर्चः अप्रधृष्यं तेजः तद् हस्तिवर्चसम । ✕"ब्रह्महस्तिभ्यां वर्चसः" इति अच् समा-

---

१ K K[m] V आदित्या. We with A B B[h] D R S[m] P P[2] J. २ K आदित्याः. We with P P[2] J.

---

1 So S' Kd. Kes'ava: दृष्ट्वा. 2 S' Kd हस्तिनो. We with *Kaus'ika*. 3 So S' Kd.

सान्तः ॥ । तत् प्रथताम् असासु प्रथितं प्रख्यातं भवतु । ॥ प्र-थ प्रख्याने इति धातुः ॥ । कीदृशं तत् हस्तिवर्चसम् इति तद् आह अदित्या इति । अदितिः अखण्डनीया अदीना वा देवमाता । तस्याः तन्वः शरीराद् यत् बृहत् महद् अधिकं यशः प्रख्यातं तेजः संबभूव समुत्पन्नम् अभवत् । तत् एतत् यशः विश्वे सर्वे देवाः तैः सजोषाः समानप्रीतिः अदितिश्च सर्वे संभूय मह्यं तेजस्कामाय अदुः ददतु प्रयच्छन्तु । ॥ डुदाञ् दाने । छान्दसे लुङि "गातिस्था०" इति सिचो लुक् ॥ ॥

द्वितीया ॥

मित्रश्च॑ वरु॑णश्चेन्द्रो॑ रु॒द्रश्च॑ चेत॑तु॒*।
देवासो॑ विश्वधा॑यस॒स्ते मा॑ञ्जन्तु॒[2] वर्च॑सा ॥ २ ॥

मित्रः । च॒ । वरु॑णः । च॒ । इन्द्रः॑ । रु॒द्रः । च॒ । चेत॑तु॒*।
देवासः॑ । विश्वऽधा॑यसः । ते । मा॒ । अ॒ञ्ज॒न्तु॒ । वर्च॑सा ॥ २ ॥

अहरभिमानी देवो मित्रः । वरुणः रात्र्यभिमानी । इन्द्रः परमैश्वर्ययुक्तः स्वर्गाधिपतिः । रोदयति सर्वम् अन्तकाले इति रुद्रः संहर्ता देवः । ॥ रोदेर्णिलुक् च [उ०२.२२] इति रक् प्रत्ययः णेश्च लुक् ॥ । एते सर्वे प्रत्येकं चेतनु । अनुग्राह्योयम् इति मां जानातु । ॥ चिती संज्ञाने ॥ । विश्वधायसः विश्वं सर्वं जगद् दधति पोषयन्तीति विश्वधायसः । ॥ वहिहाधाञ्भ्यश्छन्दसि [उ० ४. २२०] इति विश्वशब्दोपपदाद् दधातेरसुन् प्रत्ययः । णिदित्यनुवृत्तेस्तस्य णिद्वद्भावाद् "आतो युक् चिण्कृतोः" इति युक् ॥ । विश्वस्य पोषकाः ते पूर्वोक्ता मित्रादयो देवासः देवाः । ॥ "आज्जसेरसुक्" ॥ । मा वर्चस्कामं मां वर्चसा काम्यमानेन तेजसा अञ्जन्तु अक्तम् आश्लिष्टं कुर्वन्तु । ॥ अञ्जू व्यक्तिम्रक्षण[कान्ति]गतिषु । "श्नसोरल्लोपः" इति अकारलोपः । "श्नान्नलोपः" ॥ ॥

---

१ A B $\overset{h}{B}$ D $\overset{m}{K}$ R $\overset{m}{S}$ V चेततुः. Also P $\overset{2}{P}$ J (चेनतुः). We with Sâyaṇa. २ B मांजतु. We with A $\overset{h}{B}$ D K $\overset{m}{K}$ R $\overset{m}{S}$ P $\overset{2}{P}$ J V.

तृतीया ॥

येनं हुस्ती वर्चसा संबभूव येन राजा मनुष्येष्वप्स्वं१न्तः ।
येनं देवा देवतामग्रं आर्यन् तेन मामद्य वर्चसाग्नें वर्चस्विनं कृणु ॥ ३ ॥

येनं । हुस्ती । वर्चसा । सम्ऽबभूवं । येनं । राजा । मनुष्येषु । अप्ऽसु ।
अन्तः ।
येनं । देवाः । देवतांम् । अग्रें । आंयन्* । तेनं । माम् । अद्य । वर्चसा ।
अग्नें । वर्चस्विनंम् । कृणु ॥ ३ ॥

येन वर्चसा वलकरेण तेजसा हस्ती गजः संवभूव संप्राप्तोभवत् । मनुष्येषु मनोरपत्येषु । ॥ "मनोर्जातावञ्यतौ षुक् च" इति मनुशब्दाद् यत् प्रत्ययः षुगागमश्च । "तित् स्वरितः" इति अन्तस्वरितत्वम् ॥ । मनुष्यजातीयेषु मध्ये येन वर्चसा राजा नृपतिः वर्चस्वी भवति । तथा अप्सु उदकेषु अन्तः मध्ये येन वर्चसा प्राणिनो वर्चस्विनो भवन्ति । यद्वा । आपः इति अन्तरिक्षनाम । अप्सु अन्तरिक्षलोके अन्तः मध्ये तत्र संचारिणो यक्षगन्धर्वादयः येन वर्चस्विनो भवन्ति । देवाः इन्द्रादयः अग्रे सृष्ट्यादौ देवताम् देवत्वं देवभावं येन वर्चसा आयन् प्राप्नुवन् । हे अग्ने तेन सर्वेण वर्चसा अद्य अस्मिन् काले मां वर्चस्विनम् तेजस्विनं कृणु कुरु । ॥ वर्चस्विनम् इति । तद्धितवृत्त्यन्तर्गतस्यापि वर्चसो वर्चसेति पुनरुपादानं तेनेति विशेषणसंबन्धार्थम् वाचम् अवोचत् इतिवत् ॥ ॥

चतुर्थी ॥

यत् ते वर्चो जातवेदो बृहद् भवत्याहुतेः ।
यावत् सूर्यस्य वर्च आसुरस्य च हस्तिनः ।
तावन्मे अश्विना वर्च आ धत्तां पुष्करस्रजा ॥ ४ ॥

---

१ B R °प्स्वंऽतः. We with A $\overset{h}{B}$ D $\overset{m}{S}$ K $\overset{m}{K}$ V. २ K V तेनं देवा.....अग्रं आयं तेनं; P $\overset{2}{P}$ J येनं । देवाः ।.....आयम् । &c. A $\overset{h}{B}$ D K B B^p R $\overset{m}{S}$ येनं देवा देवतामग्रं आयं तेनं. We with Sâyaṇa. ३ Sâyaṇa is silent on the accent here. All our MSS. and Vaidikas read as above.

यत् । ते । वर्चः । जातऽवेदः । बृहत् । भवति । आऽहुतेः ।
यावत् । सूर्यस्य । वर्चः । आसुरस्य । च । हस्तिनः ।
तावत् । मे । अश्विना । वर्चः । आ । धत्ताम् । पुष्करऽस्रजा ॥ ४ ॥

हे जातवेदः जातानां वेदितः हे आहुते आहुतिभिर्हूयमानाग्ने ते तव बृहत् अधिकं यत् वर्चः तेजो भवति सूर्यस्य सर्वप्रेरकस्य आदित्यस्य यावत् यत्परिमाणं वर्चः तेजोस्ति । ॥ "यत्तदेतेभ्यः परिमाणे वतुप्" । "आ सर्वनाम्नः" इति आत्वम् । "राजसूयसूर्य०" इत्यादिना सूर्यशब्दः क्यबन्तो निपातितः ॥ । तथा आसुरस्य असुराणां संबन्धिनो हस्तिनश्च यावद् वर्चोस्ति तावत्परिमाणं वर्चः मे मह्यं पुष्करस्रजा पद्मस्रगलंकृतौ अश्विना अश्विनौ देवौ आ धत्ताम् स्थापयताम् । प्रयच्छताम् इत्यर्थः । ॥ अश्विना पुष्करस्रजा इत्युभयत्र "सुपां सुलुक्०" इति सुप आकारः ॥ ॥

पञ्चमी ॥

यावच्चतस्रः प्रदिशश्चक्षुर्यावत् समश्नुते ।
तावत् समैन्द्रियं मयि तद्धस्तिवर्चसम् ॥ ५ ॥
यावत् । चतस्रः । प्रऽदिशः । चक्षुः । यावत् । समऽअश्नुते ।
तावत् । समऽऐतु । इन्द्रियम् । मयि । तत् । हस्तिऽवर्चसम् ॥ ५ ॥

चतस्रः चतुःसंख्याकाः प्रदिशः प्रकृष्टाः प्राच्याद्या महादिशः यावत्परिमितं व्याप्नुवन्ति । तथा चक्षुः रूपग्राहकम् इन्द्रियं यावत्पर्यन्तं नक्षत्रमण्डलावधि समश्नुते सम्यग् व्याप्नोति तावत्परिमाणम् इन्द्रियम् इन्द्रस्य परमैश्वर्ययुक्तस्य लिङ्गम् असाधारणं चिह्नं समेतु अस्मान् संप्राप्नोतु ॥ ईदृशं तत् प्रागुक्तं हस्तिवर्चसं मयि भवतु ॥

षष्ठी ॥

हस्ती मृगाणां सुषदामतिष्ठावान् बभूव हि ।
तस्य भगेन वर्चसाभि षिञ्चामि मामहम् ॥ ६ ॥

हस्ती । मृगाणाम् । सुऽसदाम् । अतिस्थाऽवान् । बभूव । हि ।
तस्य । भगेन । वर्चसा । अभि । सिञ्चामि । माम् । अहम् ॥ ६ ॥

सुषदाम् । सुखेन सीदन्ति स्वेच्छया वर्तन्त इति सुषदः । "सत्सूद्विष०" इति क्विप् । "सदिरप्रतेः" इति षत्वम । अरण्ये स्वेच्छया वर्तमानानां मृगाणाम् हरिणादीनां मध्ये हस्ती वनगजः अतिष्ठावान् बलातिशयेनातिक्रम्य अवस्याता बभूव [हि] । अतिपूर्वात् तिष्ठतेः "आतो मनिन्क्वनिव्वनिपश्च" इति वनिप् । नलोपाभावश्छान्दसः । यद्वा अतिक्रम्य अवस्थानम् अतिष्ठा तद्वान् । "आतश्चोपसर्गे" इति भावे अङ् । ततो मतुप् । "उपसर्गात् सुनोति०" इति षत्वम । तस्य तथाविधस्य हस्तिनः भगेन भजनीयेन भाग्यरूपेण वा वर्चसा तेजसा बलादिना माम अहम् अभि षिञ्चामि । एकस्यैव अस्मदर्थस्य शरीराद्युपाधिभेदेन भेदात् कर्मकर्तृभावः ॥

[इति] पञ्चमेनुवाके द्वितीयं सूक्तम् ॥

"येन वेहद् बभूविथ" इति तृतीयसूक्तेन पुंसवनकर्मणि बाणम् अभिमन्त्र्य स्त्रिया मूर्ध्नि विवृहेत् ॥

तथा अनेन सूक्तेन आज्यं हुत्वा शरमणिं संपात्य अभिमन्त्र्य बध्नीयात् ॥

तथा [फाल[1]]चमसे सरूपवत्साया गोर्दुग्धे व्रीहियवौ प्रक्षिप्य आलोड्य अध्यण्डे विवृहेत[2] ॥

तथा पलाशविदार्यौ एकत्र पिष्ट्वा अनेन सूक्तेन अभिमन्त्र्य दक्षिणेनाङ्गुष्ठेन स्त्रिया दक्षिणस्यां नासिकायां नस्यं कुर्यात् ॥

सूत्रितं हि । "पुंसवनानि रजउद्वासायाः पुंनक्षत्रे येन वेहद् इति बाणं मूर्ध्नि विवृहति" इत्यादि [कौ० ४. ११] ॥

तत्र प्रथमा ॥

येन वेहद् बभूविथ नाशयामसि तत् त्वत् ।
इदं तदन्यत्र त्वदप दूरे नि दध्मसि ॥ १ ॥

1 This is supplied from Dârila and Kes'ava. 2 S' Kd विवृहत्.

येनं। वेहत्। बभूविंथ। नाशयांमसि। तत्। त्वत्।
इदम्। तत्। अन्यत्रं। त्वत्। अपं। दूरे। नि। दध्मसि॥ १॥

येन वन्ध्यात्वापादकेन पापेन तज्जन्यरोगादिना वा हे नारि वेहत् गर्भघातिनी वन्ध्या बभूविथ भवसि। छान्दसो लिट्। तत् पापादिकं त्वत् त्वत्तः सकाशाद् नाशयामसि नाशयामः अपहन्मः। इदं तत् नष्टसजातीयं वेहत्त्वापादकं पापरोगादिकं पुनर्यथा त्वयि नोत्पद्यते तथा त्वत् त्वत्तोन्यत्र दूरे दूरदेशे अप नि दध्मसि अपनिदध्मः अपक्षिपामः। "इदन्तो मसिः"॥

द्वितीया॥

आ ते योनिं गर्भं एतु पुमान् बाणं इवेषुधिम्।
आ वीरोत्र जायतां पुत्रस्ते दशमास्यः॥ २॥

आ। ते। योनिम्। गर्भः। एतु। पुमान्। बाणःऽइव। इषुऽधिम्।
आ। वीरः। अत्र। जायताम्। पुत्रः। ते। दशऽमास्यः॥ २॥

हे स्त्रि ते तव योनिम् प्रजननस्थानं पुमान् पुंस्त्वोपेतो गर्भ एतु आगच्छतु। तत्र दृष्टान्तः। बाण इवेति। यथा बाणः इषुधिम् निषङ्गं स्वावासस्थानं स्वभावतः प्राप्नोति तद्वत्। अनिवारितगतिर्गर्भः स्वस्थानं प्रविशतु इत्यर्थः। इषवोत्र धीयन्ते धार्यन्त इति इषुधिः। "कर्मण्यधिकरणे च" इति किप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वम्॥ स च ते त्वदीयो गर्भः [पुत्रः पुत्रत्वेन परिणतः] दशमास्यः दश मासान् भृतः तावत्कालभरणेन सर्वावयवसंपूर्णः वीरः वीर्येण बलेन उपेतः सन् अत्र अस्मिन् प्रसूतिकाले आ जायताम् अभिमुखम् उत्पद्यताम्[1]। द-
शमास्य इति। "तम् अधीष्टो भृतो भूतो भावी" "मासाद् वयसि यत्खञौ" इति यत्। "तद्धितार्थोत्तरपदसमाहारे च" इति संख्याया उत्तरपदेन समासः॥

1 S' Kd आभि°.

तृतीया ॥

पुमाँसं पुत्रं जनय तं पुमाननु जायताम् ।
भवासि पुत्राणां माता जातानां जनयाश्च यान् ॥ ३ ॥

पुमाँसम् । पुत्रम् । जनय । तम् । पुमान् । अनु । जायताम् ।
भवासि । पुत्राणाम् । माता । जातानाम् । जनयाः । च । यान् ॥ ३ ॥

हे नारि *त्वं पुमांसम् पुंस्त्वोपेतं[1] पुत्रं जनय । अनु तस्योत्पन्नस्य पुत्रस्य अनन्तरं पुमानेव जायताम् पुत्र एवोत्पद्यताम् । श्यनि "ज्ञाजनो-र्जा" इति जादेशः ॥ एवम् अविच्छेदेन जातानां पुत्राणां त्वं माता भवासि भव । भवतेर्लेटि आडागमः । यांश्च पुत्रान् ततः परं जनयाः जनयेः । तेषामपि माता भवेत्यर्थः । जनया इति । जनेर्ण्यन्तात् लेटि आडागमः । "जनीजृष्क्नसुरञ्जोमन्ताश्च" इति तदुपधाह्रस्वत्वम् ॥

चतुर्थी ॥

यानि भद्राणि बीजान्यृषभा जनयन्ति च ।
तैस्त्वं पुत्रं विन्दस्व सा प्रसूर्धेनुका भव ॥ ४ ॥

यानि । भद्राणि । बीजानि । ऋषभाः । जनयन्ति । च ।
तैः । त्वम् । पुत्रम् । विन्दस्व । सा । प्रऽसूः । धेनुका । भव ॥ ४ ॥

भद्राणि भन्दनीयानि अमोघवीर्याणि यानि बीजानि ऋषभाश्च गोषु जनयन्ति वत्सरूपेणोत्पादयन्ति । तैः तथाविधैरमोघवीर्यैर्बीजैः हे नारि त्वं पुत्रं विन्दस्व लभस्व । विदॢ लाभे । स्वरितेत्त्वाद् आत्मनेपदम् । "शे मुचादीनाम्" इति नुम् ॥ सा त्वं प्रसूः प्रसूता सती धे-

---

१ K V त्वं. We with A B B^{P} B^{h} D K^{m} R S^{m} P P^{2} J. २ A B B^{P} B^{h} D K^{m} R S^{m} P P^{2} J V. यां, which was originally intended for यान्, though afterwards mistaken for याम्, as is shown by the pada MSS. writing याम् and the Vaidikas reciting with a म् with the pada MSS. K यान् with Sâyaṇa. Sâyaṇa's text: यन्.

1 S/ Kd हे नारि त्वं पुमांसं त्वं पुंस्त्वोपेतं &c.

नुका भव। धेनुरेव धेनुका। स्वार्थिकः कः। धेनुवत् सपुत्रा वर्धस्व। मृतापत्या मा भूरित्यर्थः॥

पञ्चमी॥

कृणोमि॑ ते प्राजाप॒त्यमा यो॒निं॒ गर्भ॑ एतु॒ ते।
वि॒न्दस्व॒ त्वं पु॒त्रं नारि॒ यस्तु॒भ्यं॒ शमस॒च्छमु॒ तस्मै॒ त्वं भ॑व॥ ५॥

कृणोमि। ते। प्राजाऽपत्यम्। आ। योनिम्। गर्भः। एतु। ते।
विन्दस्व। त्वम्। पुत्रम्। नारि। यः। तुभ्यम्। शम्। असत्। शम्।
ऊं इति। तस्मै। त्वम्। भव॥ ५॥

हे नारि ते तव प्राजापत्यम् प्रजापतिना ब्रह्मणा निर्मितं प्रजोत्पत्तिकरं कर्म कृणोमि करोमि। ✕कृवि हिंसाकरणयोश्च। "धिन्विकृण्व्योर च" इति उप्रत्ययः अकारश्चान्तादेशः। तस्य अतो लोपे सति स्थानिवद्भावात् लघूपधगुणाभावः। प्रजापतिशब्दात् पत्युत्तरपदलक्षणो ण्यः✕। ते तव योनिम् गर्भाशयस्थानं गर्भः एतु अभिगच्छतु। तत्त्वं पुत्रं विन्दस्व लभस्व। कीदृशः स पुत्र इति विशिनष्टि। यः पुत्रः तुभ्यं शम् असत् सुखहेतुर्भवेत्। तस्मै पुत्राय त्वमपि शं सुखहेतुः भव। भवसीत्यर्थः। तं पुत्रम् इति संबन्धः॥

षष्ठी॥

यासा॑ं द्यौः पि॒ता पृ॑थि॒वी मा॒ता स॑मु॒द्रो मू॒ल॑ं वी॒रुधां॑ ब॒भूव॑।
ताꣳ॑ पुत्र॒विद्या॑य॒ दैव्यः॑ प्राव॒न्त्वोष॑धयः॥ ६॥

यासा॑म्। द्यौः। पि॒ता। पृ॒थि॒वी। मा॒ता। स॒मु॒द्रः। मू॒ल॑म्। वी॒रुधा॑म्।
ब॒भूव॑।
ताः। त्वा॒। पु॒त्र॒ऽविद्या॑य। दैव्यः॑। प्र। अ॒व॒न्तु॒। ओष॑धयः॥ ६॥

यासां वीरुधाम् विरोहणस्वभावानाम् ओषधीनां द्यौः द्युलोकः पिता

---

१ B त्वं. S त्यं. २ Such is the accent of all our MSS. and Vaidikas. ३ B BP K K V द्यौष्पि°. We with A B D R S. ४ So A B B D K K R S V. And P P J too.

वृष्ट्युदकलक्षणरेतःसेकेन जनयिता [बभूव] भवति । तादृशस्य रेतसो धारणेन पृथिवी [यासां] माता जनयित्री भवति । समुद्रः समुन्दनशीलः जलराशिरेव यासाम् उत्पत्तौ उत्पन्नानां च वृद्धौ मूलम् मूलकारणं भवति । ता देवीः दानादिगुणयुक्ता देवतारूपा वा ओषधयः पुत्रविद्याय पुत्रलाभाय त्वा त्वां प्रावन्तु प्रकर्षेण रक्षन्तु । देवीरिति । "वा छन्दसि" इति जसि पूर्वसवर्णदीर्घः ॥

[इति] पञ्चमेनुवाके तृतीयं सूक्तम् ॥

"पयस्वतीः" इत्यस्य धान्यसमृद्धिकर्मसु विनियोगः । "पयस्वतीरिति स्फातिकरणं शान्तफल०" इत्यादि "आ भक्तयातनाद् अनुमन्त्रयते" इत्यन्तं सूत्रं द्रष्टव्यम [कौ० ३. ४] ॥

"पयस्वतीः" इत्याद्यया पितृमेधकर्मणि शवदाहानन्तरं स्नानं कुर्यात् ॥

तत्र प्रथमा ॥

पयस्वतीरोषधयः पयस्वन्मामकं वचः ।
अथो पयस्वतीनामा भरेहं सहस्रशः ॥ १ ॥

पयस्वतीः । ओषधयः । पयस्वत् । मामकम् । वचः ।
अथो इति । पयस्वतीनाम् । आ । भरे । अहम् । सहस्रऽशः ॥ १ ॥

ओषधयः व्रीहियवाद्याः पयस्वतीः पयस्वत्यः सारवत्यो भवन्तु । "तसौ मत्वर्थे" इति भसंज्ञया[2] पदसंज्ञाया बाधनाद् रुत्वाभावः ॥ तथा मामकम् मदीयं वचः वचनं पयस्वत् सारयुक्तं सर्वैरुपादेयं भवतु । अस्मच्छब्दात् शैषिके अणि "तवकममकावेकवचने" इति ममकादेशः ॥ अथो अपि च पयस्वतीनाम् सारवतीनाम् ओषधीनां संबन्धि धान्यं सहस्रशः अनेकप्रकारेण आ भरेयं* आहरेयम् । संपादयेयम् इत्यर्थः । "बह्वल्पार्थाच्छस्कारकाद् अन्यतरस्याम्" इति सहस्रशब्दात् शस् प्रत्ययः ॥

1 S′ Kd तदनु for आ भक्तयातनाद् अनु°. We with *Kausika*. 2 S′ Kd भसंज्ञाया.

द्वितीया ॥

वेदाहं पयस्वन्तं चकारं धान्यं बहु ।
संभृत्वा नाम यो देवस्तं वयं हवामहे योयो अयज्वनो गृहे ॥ २ ॥

वेद । अहम् । पयस्वन्तम् । चकार । धान्यम् । बहु ।
सम्ऽभृत्वा । नाम । यः । देवः । तम् । वयम् । हवामहे । यःऽयः ।
अयज्वनः । गृहे ॥ २ ॥

पयस्वन्तम् सारवन्तं देवम् अहं वेद जानामि । स देवः धान्यम् व्रीहियवादिकं बहु चकार अधिकं स्फीतं कृतवान् ॥ तथा संभृत्वा संभरणशीलः यत्र कुत्रापि सर्वत्र स्थितस्य सारांशस्य मधुकरवत् संभर्ता [नाम] एतत्संज्ञो यो देवस्तं देवं वयं हवामहे स्तुतिभिराह्वयामः । संभृत्वेति । संपूर्वाद् भृञः "अन्येभ्योपि दृश्यन्ते" इति क्वनिप् । "ह्रस्वस्य पिति०" इति तुक् ॥ अधुना संभर्तव्यं निर्दिशति योय इति । अयज्वनः अकृतयागस्य धनाढ्यस्य गृहे योयो व्रीहियवगोहिरण्यादिरूपः पदार्थोस्ति । [1]तं सर्वम् आहृत्य संभृत्वा [2]नाम देवः अस्मभ्यं प्रयच्छतु इत्यर्थः । अयज्वन इति । "सुयजोर्ङ्वनिप्" । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

तृतीया ॥

इमा याः पञ्च प्रदिशो मानवीः पञ्च कृष्टयः ।
वृष्टे शापं नदीरिवेह स्फातिं समावहान् ॥ ३ ॥

इमाः । याः । पञ्च । प्रऽदिशः । मानवीः । पञ्च । कृष्टयः ।
वृष्टे । शापम् । नदीःऽइव । इह । स्फातिम् । सम्ऽआवहान् ॥ ३ ॥

इमाः परिदृश्यमाना याः प्रदिशः प्रकृष्टा दिशः प्राच्याद्याः पञ्च सन्ति तथा मानवीः मानव्यः [मनोः] सकाशाद् उत्पन्नाः पञ्च कृष्टयः ।

---

१ So all our MSS. and Vaidikas. २ $\overset{h}{B}$ D $\overset{m}{S}$ देवस्त्वं. We with A B K $\overset{m}{K}$ R P $\overset{2}{P}$ J V.

---

1 S′ Kd तत्सर्व°. 2 S′ Kd वाम.

मनुष्यनामैतत् । निषादपञ्चमाश्चत्वारो वर्णाः पञ्चविधा मनुष्याः सन्ति ते सर्वे इह अस्मिन् यजमाने स्फातिम् धनधान्यसमृद्धिं समावहान् समावहन्तु सम्यक् प्रापयन्तु । तत्र दृष्टान्तः वृष्ट इति । देवे वृष्टे वर्षजलं मुञ्चति सति नदीरिव नद्य इव नदनशीला आपो यथा प्रवाहमध्यस्थं शापम् प्राणिजातं वेगेन देशान्तरं प्रापयन्ति तद्वद् इत्यर्थः । ✠ स्फातिम् इति । स्फायी वृद्धौ । अस्मात् क्तिनि "तितुत्र०" इति इट्प्रतिषेधः । "लोपो व्योर्वलि" इति यकारलोपः । समावहान् इति । उपसर्गद्वययुक्ताद् वहेर्लेटि आडागमः ✠ ॥

चतुर्थी ॥

उदुत्सं॑ श॒तधा॑रं स॒हस्र॑धारमक्षि॒तम् ।
एवास्माके॒दं धा॒न्यं॑ स॒हस्र॑धारमक्षि॒तम् ॥ ४ ॥

उत् । उत्सम् । श॒तऽधा॑रम् । स॒हस्र॑ऽधारम् । अक्षि॒तम् ।
एव । अ॒स्माक॑ । इ॒दम् । धा॒न्यं॑म् । स॒हस्र॑ऽधारम् । अक्षि॒तम् ॥ ४ ॥

उत्सम् जलोत्पत्तिस्थानं[1] शतधारम् शतसंख्याकाभिरुदकस्य धाराभिर्युक्तम् तथा सहस्रधारम् अपरिमितधारोपेतं सत् अक्षितम् क्षयरहितम् । उत् इति उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । उद्भवतीत्यर्थः ॥ एव एवम् [अस्माक] अस्माकम् । ✠ अन्त्यलोपश्छान्दसः ✠ । इदम् परिदृश्यमानं कुसूलादिस्थं धान्यं सहस्रधारम् अपरिमितधाराभिर्युक्तं बहुप्रकारेण उपायेन अभिवृद्धं सत् अक्षितम् क्षयरहितं भवतु ॥

पञ्चमी ॥

श॒तह॑स्त स॒माह॑र॒ सह॑स्रहस्त॒ सं किर॑ ।
कृ॒तस्य॑ का॒र्य॑स्य चे॒ह स्फा॒तिं स॒मा॑वह ॥ ५ ॥

श॒तऽह॑स्त । स॒मऽआह॑र । सह॑स्रऽहस्त । सम् । किर॑ ।
कृ॒तस्य॑ । का॒र्य॑स्य । च॒ । इ॒ह । स्फा॒तिम् । स॒मऽआव॑ह ॥ ५ ॥

---

१ So **A B B**^{r} **B**^{h} **D K**^{m} **R S**^{m} **P P**^{2} **J**. **K** स॒मावंहान्. **V** स॒मावंह, स॒मावंहम्, स॒मावंहान्.
२ **P** का॒र्यस्य. We with **P**^{2} **J K**.

---

1 **S' Kd** जनोत्पत्ति°.

हे शतहस्त शतसंख्याकैर्हस्तैरुपेत देव समाहर। बहुभिस्त्वदीयैर्हस्तैर्धनधान्यं समाहृत्य प्रयच्छेत्यर्थः॥ हे सहस्रहस्त इदमपि हेतुगर्भविशेषणम्। यतस्त्वं सहस्रसंख्याकैर्हस्तैरुपेतः अतस्तैर्हस्तैः सं किर अस्मासु धनं विक्षिप। ✕कृ विक्षेपे। तुदादित्वात् शः। "ऋत इद्धातोः" इति इत्त्वम्✕। तथा सति [कृतस्य नि]ष्पन्नस्य कार्यस्य कर्तुम् अर्हस्य च धनधान्यादेः इह अस्मिन् स्थाने स्फातिम् समृद्धिं समावहम्[*] संप्राप्नोसि॥

षष्ठी॥

तिस्रो मात्रा गन्धर्वाणां चतस्रो गृहपत्न्याः।
तासां या स्फातिमत्तमा तया त्वाभि मृशामसि॥ ६॥

तिस्रः। मात्राः। गन्धर्वाणाम्। चतस्रः। गृहऽपत्न्याः।
तासाम्। या। स्फातिमत्ऽतमा। तया। त्वा। अभि। मृशामसि॥ ६॥

गन्धर्वाणाम् विश्वावसुप्रभृतीनां संबन्धिन्यः तिस्रो मात्राः समृद्धिहेतवः कलाः सन्ति। तथा गृहपत्न्याः पतिव्रतायाः। यद्वा जातावेकवचनम्। गन्धर्वाणां संबन्धिन्यो या गृहपत्न्यः सन्ति तासाम् अप्सरसां स्वभूता याः चतस्रो मात्राः समृद्धिहेतवः अंशाः। तासां मात्राणां मध्ये या स्फातिमत्तमा अतिशयितसमृद्धियुक्ता तया हे धान्य त्वा त्वाम् अभि मृशामसि अभिमृशामः अभितः संस्पृशामः। अभिमर्शनेन वर्धस्वेत्यर्थः॥

सप्तमी॥

उपोहश्च समूहश्च क्षत्तारौ ते प्रजापते।
तावि॒हा व॑हतां स्फा॒तिं ब॒हुं भू॒मान॒मक्षि॑तम्॥ ७॥

उप॑ऽऊहः। च। सम्ऽऊहः। च। क्षत्तारौ। ते। प्र॒जाऽप॑ते।
तौ। इ॒ह। आ। व॒ह॒ता॒म्। स्फा॒तिम्। ब॒हुम्। भू॒मान॑म्। अक्षि॑तम्॥ ७॥

उप समीपम् ऊहति प्रापयति धान्यादिकम् इति उपोहः एतत्संज्ञो देवः। समूहः प्राप्तं धनं समूहति अभिवर्धयतीति समूहकरणसमर्थो दे-

१ D व॑हतं. We with A B B[h] K K[m] R S[m] P P[2] J V.

वः समूहः । परस्परसमुच्चयार्थौ चकारौ । तावुभौ हे प्रजापते ते तव क्षत्तारौ सारथी अभिमतकार्यसंपादकौ ॥ तौ तादृशौ इह अस्मिन् स्थाने स्फातिम् समृद्धिम् आ वहतम् प्रापयताम् । एतदेव विवृणोति बहुम् इति । बहुम् अनेकप्रकारं भूमानम् धनधान्यविषयं बहुभावम् अक्षितम् क्षयरहितम् । एवमात्मिकां स्फातिम् इति संबन्धः । ॥ भूमानम् इति । बहुशब्दाद् इमनिचि "बहोर्लोपो भू च बहोः" इति इमनिच आदिवर्णलोपो बहोर्भूभावश्च ॥ ॥

[इति] पञ्चमेनुवाके चतुर्थं सूक्तम् ॥

"उत्तुदस्वा" इति सूक्तं जपन् स्त्रीवशीकरणकामः अङ्गुल्या स्त्रियं नुदेत् ॥ तथा अनेन सूक्तेन एकविंशतिं बदरीकण्टकान् घृताक्तान् आदध्यात् ॥ तथा एकविंशतिबदरीप्रान्तानि सूत्रेण वेष्टयित्वा अनेन सूक्तेन सकृज्जुहुयात् ॥

एवम् अनेनैव सूक्तेन कुष्ठं नवनीतेन अभ्यज्य त्रिकालम् अग्नौ प्रतपेत् ॥

तथा अनेन सूक्तेन खड्गाया[1] अधोमुखपट्टिकां गृहीत्वा त्रिरात्रं स्वप्यात् ॥

तथा अनेन सूक्तेन उष्णोदकं त्रिपादे शिक्ये प्रबध्य अङ्गुष्ठाभ्यां[2] मर्दयन् शयीत ॥

तथा लिखितां प्रतिकृतिं सूत्रोक्तलक्षणया इष्वा विध्येत् ॥

तद् उक्तं कौशिकेन । "उत्तुदस्वेत्यङ्गुल्योपनुदति[3] । एकविंशतिं प्राचीनकण्टकान् अलंकृतान्[4] अनूक्तान् आदधाति" इत्यादि "सितालकाण्डया हृदये विध्यति" इत्यन्तम् । [कौ० ४, ११] ॥

तत्र प्रथमा ॥

उ॒त्तु॒दस्वोत् तु॑दतु मा धृ॑था॒ः शय॑ने॒ स्वे ।
इष॒ुः काम॑स्य॒ या भी॒मा तया॑ विध्यामि॒ त्वा हृ॒दि ॥ १ ॥

उ॒त्ऽतु॒दः । त्वा॒ । उत् । तु॒द॒तु । मा । धृ॒था॒ः । शय॑ने । स्वे ।
इष॒ुः । काम॑स्य । या । भी॒मा । तया॑ । वि॒ध्यामि॒ । त्वा॒ । हृ॒दि ॥ १ ॥

---

1 Kes'ava: खड्गा अधोमुखपट्टिका गृ°. 2 So S' Kd. *Kaus'ika* and Kes'ava: अङ्गुष्ठाभ्यामर्दयन्. 3 S' Kd °चरत्येक° for °नुदति । एक°. We with *Kaus'ika*. 4 S' Kd °लंकृनन्वक्तानादधा°.

उत्तुदति उत्कृष्टम् ऊर्ध्वमुखं वा व्यथयतीति उत्तुदः एतत्संज्ञो देवः त्वा त्वाम् उत् तुदतु उद्व्यथयतु कामार्तां करोतु। ॥तुद व्यथने इति धातुः॥ ॥ सूचिभिरिव उत्तुदेन[1] मदनविकारैरुद्व्यथिता त्वं स्वे स्वकीये शयने। ॥अधिकरणे ल्युट्॥। शयनस्थाने मा ह्रैथाः[*] शयनविषयम् आदरं मा कार्षीः। ॥ह्रैङ् आदरे। अस्माद् माङि लुङि "ह्रस्वाद् अङ्गात्" इति सिचो लोपः॥ ॥ कामस्य पञ्चशरस्य या भीमा भयकारिणी इषुरस्ति तया हृदि हृदये [त्वा] त्वां विध्यामि ताडयामि। ॥व्यध ताडने। "ग्रहिज्या०" इत्यादिना संप्रसारणम्। भीमेति। बिभेत्यस्या इति भीमा। "भीमादयोपादाने" इति अपादानेर्थे भियः षुग्वा [उ० १. १४५] इति औणादिको मक् प्रत्ययः॥ ॥

द्वितीया ॥

आधीपर्णां कामशल्यामिषुं संकल्पकुल्मलाम्।
ता सुसंनतां कृत्वा कामो विध्यतु त्वा हृदि ॥ २ ॥

आधीऽपर्णाम्। कामऽशल्याम्। इषुम्। संकल्पऽकुल्मलाम्। ताम्। सुऽसंनताम्। कृत्वा। कामः। विध्यतु। त्वा। हृदि ॥ २ ॥

आधीपर्णाम् आधयो मानस्यः पीडाः पर्णानि पत्राणि यस्याः सा तथोक्ता। कामशल्याम् कामः अभिलाषः रिरंसापरपर्यायः। स एव शल्यं बाणाग्रे प्रोतम् आयसं मर्मभेदकम् अङ्गं यस्याः सा कामशल्या। संकल्पकुल्मलाम्। इदं मे स्याद्[2] इदं मे स्याद् इति भोगविषयसंकल्पनं संकल्पः। स एव कुल्मलं दारुशल्ययोः संश्लेषद्रव्यं यस्याः सा तथोक्ता। ईदृशीं ताम् इषुं सुसंनताम् सुष्ठु सम्यङ्नतां कोदण्डारूढां कृत्वा कामः स्मरः तया इष्वा हे कामिनि त्वा त्वां [हृदि] विध्यतु ताडयतु ॥

तृतीया ॥

या स्मीहानं शोषयति कामस्येषुः सुसंनता।
प्राचीनपक्षा व्योषा तया विध्यामि त्वा हृदि ॥ ३ ॥

---

१ B ह्लिहा°.

---

1 S′ Kd उत्तु for उत्तुदेन. 2 S′ Kd स्यामिदं for स्याद् इदं.

या । स्रीहानम् । शोषयति । कामस्य । इषुः । सुऽसंनता ।
प्राचीनऽपक्षा । विऽओषा । तया । विध्यामि । त्वा । हृदि ॥ ३ ॥

कामस्य स्मरस्य सुसंनता सुष्ठु सम्यङ्नता ऋजुगामिनी या इषुः हृदयं प्रविश्य तत्परिसरवर्तिनं स्रीहानम् एतत्संज्ञं प्राणाश्रयं मांसखण्डं शोषयति दहति । सा पुनर्विशेष्यते । प्राचीनपक्षा प्राचीनाः प्राञ्चना ऋजवः पक्षा यस्याः सा प्राचीनपक्षा व्योषा विविधम् ओषति दहतीति व्योषा । ⁂उष दाहे इत्यस्मात् पचाद्यच्⁂ । तया उदीरितगुणविशिष्टया इष्वा हे कामिनि त्वा त्वां हृदि हृदये विध्यामि ताडयामि ॥

चतुर्थी ॥

शुचा विद्धा व्योषया शुष्कास्याभि सर्प मा ।
मृदुर्निमन्युः केवली प्रियवादिन्यनुव्रता ॥ ४ ॥

शुचा । विद्धा । विऽओषया । शुष्कऽआस्या । अभि । सर्प । मा ।
मृदुः । निऽमन्युः । केवली । प्रियऽवादिनी । अनुऽव्रता ॥ ४ ॥

व्योषया विदाहयुक्तया शुचा शोचयित्र्या शोकात्मिकया वा इष्वा विद्धा ताडिता सती शुष्कास्या शुष्ककण्ठा उपतापेन तालुशोषणात् स्वमनीषितं प्रकटयितुम् असमर्था मा माम् अभि सर्प अभिगच्छ । मन्निवासस्थानम् आगच्छेत्यर्थः । आगत्य च निमन्युः न्यक्कृतप्रणयकलहा मृदुः मृदुभाषिणी केवली असाधारणा मदेकशरणा प्रियवादिनी अनुकूलभाषणशीला अनुव्रता अनुकूलक्रियाचरणपरा भव । ⁂केवलीति । "केवलमामक०" इत्यादिना ङीप्⁂ ॥

पञ्चमी ॥

आजामि त्वाजन्या परि मातुरथो पितुः ।
यथा मम क्रतावसो मम चित्तमुपायसि ॥ ५ ॥

---

१ B $\overset{h}{B}$ A D R $\overset{m}{S}$ व्योषया. We with K $\overset{m}{K}$ V. २ P J विऽओषया. $\overset{2}{P}$ doubtful. We with the Saṁhitâ. ३ P मृदुः. We with $\overset{3}{P}$ J.

---

1 S′ Kd व्युदाह°.

आ । अजामि । त्वा । आऽअजन्या । परि । मातुः । अथो इति । पितुः ।
यथा । मम । क्रतौ । असः । मम । चित्तम् । उपऽआयसि ॥ ५ ॥

हे कामिनि त्वा त्वाम् आजन्या । अभिमुखम् अजति क्षिपति प्रेरयतीति आजनी कशा । "अश्वाजनीत्यश्वाजनिम् आदाय" इति कशायाम् अजनिशब्दः प्रयुक्तः । तया कशया आजामि आताड्य अभिमुखं प्रेरयामि । परि मातुः [मातुः] पर्यन्तदेशात् अथो अपि च पितुः पर्यन्तात् । उपलक्षणम् एतत् । यस्य कस्यापि समीपे स्थितां त्वाम् आक्षिपामीत्यर्थः । ॥ अज गतिक्षेपणयोरिति धातुः ॥ । यथा येन प्रकारेण मम मदीये क्रतौ कर्मणि संकल्पे वा असः भवसि । मम चित्तम् मदीयां बुद्धिम् उपायसि येन प्रकारेण उपगच्छसि । तथा आजामीति संबन्धः ॥

षष्ठी ॥

व्यस्यै मित्रावरुणौ हृदश्चित्तान्यस्यतम् ।
अथैनामक्रतुं कृत्वा ममैव कृणुतं वशे ॥ ६ ॥
वि । अस्यै । मित्रावरुणौ । हृदः । चित्तानि । अस्यतम् ।
अथ । एनाम् । अक्रतुम् । कृत्वा । मम । एव । कृणुतम् । वशे ॥ ६ ॥

हे मित्रावरुणौ अस्यै । ॥ षष्ठ्यर्थे चतुर्थी ॥ । अस्याः स्त्रिया हृदः हृदयात् हृदयपुण्डरीकात् चित्तानि ज्ञानानि व्यस्यतम् विक्षिपतम् ॥ अथ अनन्तरम् एनां स्त्रियम् अक्रतुम् कार्याकार्यविभागज्ञानशून्यां कृत्वा ममैव वशे कृणुतम् मदधीनामेव कुरुतम् ॥

इति पञ्चमेनुवाके पञ्चमं सूक्तम् ॥

[इति] तृतीये काण्डे पञ्चमोनुवाकः ॥

षष्ठेनुवाके षट् सूक्तानि । तत्र "येस्यां स्थ" इत्याभ्यां सूक्ताभ्या स्वसेनाया उत्साहजननकर्मणि प्रत्यृचं प्रतिदिशम् उपस्थानं कुर्यात् । सूत्रितं हि । "दिग्युक्ताभ्याम[३.२६,२७] नमो देववधेभ्यः[६.१३] इत्युपतिष्ठते" इति [कौ० २. ५] ॥

तथा आभ्यां सूक्ताभ्यां स्वस्ययनकर्मणि आज्यपलाशादिशान्तसमित्पुरोडाशादिशष्कुल्यन्तानि त्रयोदश द्रव्याणि जुहुयात् । सूत्रितं हि । "दि-
"[1]ग्युक्ताभ्याम[३.२६,२७] दोषो गाय[६.१] पातं नः इति [2]पञ्च[६.
"३-७] अनडुच्यः[६.५९] यमो मृत्युः[६.९३] विश्वजित्[६.१०७]
"शकधूमम[६.१२८] भवाशर्वौ[११.२] इत्युपदधीत" इति [कौ०७.१]॥

तथा आभ्यां सूक्ताभ्याम् अस्मिन्नेव कर्मणि हुतशेषेण प्रतिदिशं बलिहरणम् उपस्थानं च कुर्यात् । सूत्रितं हि । "दिश्यान् बलीन् हरति प्रतिदिशम् उपतिष्ठते मध्ये पञ्चमम्" इति [कौ०७.२] ॥

तथा च सर्पवृश्चिकादिभयनिवृत्तिकामः गृहक्षेत्रादिषु सिकता अभिमन्त्र्य परितः प्रकिरेत् ॥

तथा [आभ्यां] सूक्ताभ्यां तृणमालां संपात्य गृहनगरादि[3]द्वारे बध्नीयात् ॥

तथा आभ्यां गोमयम् अभिमन्त्र्य तस्य[4] गृहे विसर्जनम् द्वारि निखननम् अग्नौ होमं [च] कुर्यात् ॥

तथा अनेन सूक्तद्वयेन अपामार्गमञ्जरीं गुडूचीं वा अभिमन्त्र्य पूर्ववद् गृहादिषु विसर्जनादिकं कुर्यात् ॥

सूत्रितं हि । "युक्तयोः[२६,२७] मा नो देवाः[६.५६] यस्ते सर्पः [१२.१.४६] इति शयनशालोर्वराः परिलिखति" इत्यादि [कौ०७.१]॥

तथा त्रिंशन्महाशान्तितन्त्रभूतायां शान्तौ "येस्याम" इत्यनेन प्रतिदिशं होमः "प्राची दिक्" इत्यनेन प्रतिदिशम् उपस्थानम् । तद् उक्तं नक्षत्रकल्पे । "येस्यां प्रतिदिशं हुत्वा प्राची दिग् उपतिष्ठते" इति [न०क०२२]॥

तत्र प्रथमा ॥

येऽ३स्यां स्थ प्राच्यां दिशि हेतयो नाम देवास्तेषां वो अग्निरिषवः ।
ते नो मृडत ते नोधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥ १ ॥

---

१ **A B B**[P] **K** [m]**S V** १ for ३. We with [h]**B** [m]**K R**.

---

1 **S′ K**d युक्ताभ्यां for दिग्युक्ताभ्यां. 2 The *Kesarî* would only take VI. 3, and not the five hymns beginning with VI. 3. 3 **S′ K**d गृहेनगरादिकंद्वारे. 4 **S′ K**d तद्गृहे for तस्य गृहे which we with the spirit of Kes'ava.

ये। अस्याम्। स्य। प्राच्याम्। दिशि। हेतयः। नाम। देवाः। तेषाम्।
वः। अग्निः। इषवः।
ते। नः। मृडत। ते। नः। अधि। ब्रूत। तेभ्यः। वः। नमः। तेभ्यः।
वः। स्वाहा॥ १॥

हे देवाः दानादिगुणयुक्ता गन्धर्वाः ये यूयम् अस्यां प्राच्यां दिशि अस्मदावासस्थानात् पूर्वस्यां दिशि हेतयो नाम स्थ। अस्मदुपद्रवकारिणां हन्तारो नाम भवथ। "ऊतियूति०" इत्यादिना हेतिशब्दः क्तिन्नन्तो निपातितः अन्तोदात्तः। प्राच्याम् इति। प्रपूर्वाद् अञ्चतेः "ऋत्विग्०" इत्यादिना क्विन्। "अनिदिताम्०" इति नलोपः। "अञ्चतेश्चोपसंख्यानम्" इति ङीप्। "अचः" इति अकारलोपे "चौ" इति पूर्वपदस्य दीर्घत्वम्। "अनिगन्तोञ्चतावप्रत्यये" इति पूर्वपदप्रकृतिस्वरत्वम्। तेषाम् पूर्वदिग्वासिनां वः युष्माकम् अग्निरिषवः अग्नितुल्याः शराः। यद्वा अग्निरेव इषुरूपेण वर्तत इत्यर्थः। अतो रक्षितुं शक्ताः स्थेति भावः। ते यूयं नः अस्मान् मृडत सुखयत। तादृशैर्बाणैः शत्रुसर्पवृश्चिकादीन् निहत्य अस्माकं सुखहेतवो भवतेत्यर्थः। तथा ते यूयं नः अस्मान् अधि ब्रूत अस्मदीया एते इति आधिक्येन वदत। अधिवचनं पक्षपातेन वचनम्। "ब्राह्मणायाधिब्रूयात्" [तै० सं० २. ५. ११. ९] "अध्यवोचद् अधिवक्ता प्रथमो दैव्यो भिषक्" [तै० सं० ४. ५. १. २] इत्यादिश्रुतेः। तेभ्यो वः युष्मभ्यं नमः नमस्कारोस्तु। "नमःस्वस्ति" इत्यादिना चतुर्थी। "बहुवचनस्य वस्नसौ" इति चतुर्थ्यन्तस्य युष्मदो वसादेशः अनुदात्तः। तेभ्यो वः युष्मभ्यं स्वाहा इदम् आज्यादिकं हविः स्वाहुतम् अस्तु॥

द्वितीया॥

येऽस्यां स्थ दक्षिणायां दिश्यविष्यवो नाम देवास्तेषां वः काम इषवः।
ते नो मृडत ते नोधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा॥ २॥

---

१ See the previous note.

ये । अ॒स्याम् । स्य । दक्षि॑णायाम् । दि॒शि । अ॒वि॒ष्यवः॑ । नाम॑ । दे॒वाः॑ ।
तेषा॑म् । वः॒ । काम॑ः । इष॑वः ।
ते । नः॒ । मृ॒ड॒त॒ । ते । नः॒ । अधि॑ । ब्रू॒त॒ । तेभ्यः॑ । वः॒ । नमः॑ । ते-
भ्यः॑ । वः॒ । स्वाहा॑ ॥ २ ॥

हे देवाः दानादिगुणयुक्ता गन्धर्वाः ये यूयम् अस्यां दक्षिणायां दिशि । स्याडभावश्छान्दसः । असदावासस्थानाद् दक्षिणस्यां दिशि अवस्यवो नाम स्थ अवनेच्छवः एतत्संज्ञा भवथ । अवतेः असुन्प्रत्ययान्तात् "छन्दसि परेच्छायामपि" इति क्यच् । "[क्या]च्छन्दसि" इति उप्रत्ययः । तेषां वः युष्माकं कामः इष्टविषयोभिलाष एव इषवः । इषुरूपेण वर्तत इत्यर्थः । कामप्रापका युष्मदीयाः शरा इत्युक्तं भवति । ते नो मृलतेत्यादि गतम् ॥

तृतीया ॥

ये३॒स्यां स्य प्र॒तीच्यां॑ दि॒शि वैरा॒जा नाम॑ दे॒वास्तेषां॑ व॒ आप॒ इष॑वः ।
ते नो॑ मृडत॒ ते नोऽधि॑ ब्रूत॒ तेभ्यो॑ वो॒ नम॒स्तेभ्यो॑ वः॒ स्वाहा॑ ॥ ३ ॥
ये । अ॒स्याम् । स्य । प्र॒तीच्या॑म् । दि॒शि । वै॒रा॒जाः॑ । नाम॑ । दे॒वाः॑ ।
तेषा॑म् । वः॒ । आपः॑ । इष॑वः ।
ते । नः॒ । मृ॒ड॒त॒ । ते । नः॒ । अधि॑ । ब्रू॒त॒ । तेभ्यः॑ । वः॒ । नमः॑ । तेभ्यः॑ ।
वः॒ । स्वाहा॑ ॥ ३ ॥

हे देवाः ये यूयम् अस्यां प्रतीच्यां दिशि वैराजा नाम स्थ विराट् अन्नं तस्य प्रदातारः एतत्संज्ञा भवथ । प्रतीच्याम् इति । प्राच्याम् इत्यत्रोक्तप्रकारेण रूपसिद्धिः । स्वरस्तु "चौ" इति पूर्वप्रतेरन्त उदात्तः । तेषां वः युष्माकम् आपः वृष्ट्युदकानि इषवः इषुस्थानीयाः । ते नो मृलतेत्यादि गतम् ॥

चतुर्थी ॥

ये३॒स्यां स्यो॒दीच्यां॑ दि॒शि प्र॒विध्य॑न्तो॒ नाम॑ दे॒वास्तेषां॑ वो॒ वात॒ इष॑वः ।

ते नो मृडत ते नोधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥ ४ ॥

ये । अस्याम् । स्थ । उदीच्याम् । दिशि । प्रऽविध्यन्तः । नाम । देवाः ।
तेषाम् । वः । वातः । इषवः ।
ते । नः । मृडत । ते । नः । अधि । ब्रूत । तेभ्यः । वः । नमः । तेभ्यः ।
वः । स्वाहा ॥ ४ ॥

हे* देवाः दानादिगुणयुक्ता गन्धर्वाः ये यूयम् अस्याम् उदीच्याम् उत्तरस्यां दिशि प्रविध्यन्तो नाम स्थ अस्मद्विंसकान् प्रकर्षेण ताडयन्तः एतत्संज्ञा भवथ । उदीच्याम् इति । उत्पूर्वाद् अञ्चतेः पूर्ववत् क्विनादि । "उद [ईत्]" इति धात्वकारस्य ईकारः । "अनिगन्त०" इति गतेः प्रकृतिस्वरत्वम् । तेषां वः युष्माकं वातः । लुप्तोपमम् एतत् । वातवद्वेगयुक्ता इषवः । वायुरेव वा इषुत्वेन वर्तत इत्यर्थः ॥ गतम् अन्यत् ॥

पञ्चमी ॥

येऽस्यां स्थ ध्रुवायां दिशि निलिम्पा नाम देवास्तेषां व ओषधीरिषवः ।
ते नो मृडत ते नोधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥ ५ ॥

ये । अस्याम् । स्थ । ध्रुवायाम् । दिशि । निऽलिम्पाः । नाम । देवाः । तेषाम् । वः । ओषधीः । इषवः ।
ते । नः । मृडत । ते । नः । अधि । ब्रूत । तेभ्यः । वः । नमः । तेभ्यः ।
वः । स्वाहा ॥ ५ ॥

हे* देवाः दानादिगुणयुक्ता ये यूयम् अस्यां ध्रुवायाम् स्थिरायां भूमिरूपायाम् अधस्ताद् दिशि निलिम्पा नाम स्थ नितरां लिप्ताः आश्रिताः एतत्संज्ञा भवथ । तेषां वः युष्माकम् ओषधीः ओषधयो व्रीहियवतरुगुल्माद्या इषवः वाणाः ॥ गतम् अन्यत् ॥

षष्ठी ॥

येऽस्यां स्थोर्ध्वायां दिश्यवस्वन्तो नाम देवास्तेषां वो बृहस्पतिरिषवः ।

ते नो मृडत ते नोधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥ ६ ॥

ये । अस्याम । स्थ । ऊर्ध्वायाम् । दिशि । अवस्वन्तः । नाम । देवाः । तेषाम् । वः । बृहस्पतिः । इषवः ।

ते । नः । मृडत । ते । नः । अधि । ब्रूत । तेभ्यः । वः । नमः । तेभ्यः । वः । स्वाहा ॥ ६ ॥

हे देवाः ये यूयम् अस्याम् ऊर्ध्वायां दिशि उपरिष्टाद् दिशि अवस्वन्तो नाम स्थ अवनं रक्षणं तद्वन्तः एतत्संज्ञा भवथ । तेषां वः युष्माकं बृहस्पतिरिषवः बृहतां देवानां मन्त्राणां वा पतिः बृहस्पतिर्देवः । "तद्बृहतोः करपत्योः°" इति सुट्तलोपौ । स एव इषुत्वेन वर्तते[1] । तद्वद् अमोघवीर्या युष्मदीयाः शरा इत्यर्थः ॥ गतम् अन्यत् ॥

[इति] तृतीयकाण्डे षष्ठेनुवाके प्रथमं सूक्तम् ॥

"प्राची दिक्" इति सूक्तस्य पूर्वसूक्तेन सह स्वसेनोत्साहजननकर्मणि स्वस्त्ययनकर्मादौ च विनियोगोभिहितः । सूत्रं च तत्रैवोदाहृतम् ॥

तत्र प्रथमा ॥

प्राची दिगग्निरधिपतिरसितो रक्षितादित्या इषवः ।

तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।

योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥ १ ॥

प्राचीं । दिक् । अग्निः । अधिऽपतिः । असितः । रक्षिता । आदित्याः । इषवः ।

तेभ्यः । नमः । अधिपतिऽभ्यः । नमः । रक्षितृऽभ्यः । नमः । इषुऽभ्यः ।

नमः । एभ्यः । अस्तु ॥

यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः । तम् । वः । जम्भे । दध्मः ॥ १ ॥

प्राची प्राञ्चना प्रकृष्टा पूर्वा दिक् । असदनुग्रहार्थं वर्तताम् इत्यर्थः । तस्या दिशः अग्निरधिपतिः अधिष्ठाता स्वामी । असितः कृष्णवर्णः सर्पः

---

१ A B $\overset{h}{B}$ K $\overset{m}{K}$ V १ for ३. We with R $\overset{m}{S}$.

---

1 S′ Kd वर्तत इत्येतद्वदमोघ° for वर्तते । तद्वदमोघ°.

तस्यां दिशि रक्षिता जगद्रक्षणार्थम् अवस्थितः । आदित्याः अदितेः पुत्रा धात्रर्यमादयः तस्या दिश इषवः आयुधानि । तेभ्यः पूर्वदिग्वर्तिभ्यः अदृश्युपलक्षितेभ्योधिपतिभ्यो नमः नमस्कारोस्तु ॥ तथा तत्रत्येभ्यो रक्षितृभ्यः असितप्रभृतिभ्यो नमोस्तु ॥ तत्रत्येभ्य इषुभ्यः इषुसंस्तुतेभ्य आदित्येभ्यो नमोस्तु ॥ एवम् अधिपत्यादीन् पृथक्पृथक् नमस्कृत्य पुनः समुच्चयेन नमस्करोति । एभ्यः उक्तेभ्यः अधिपत्यादिभ्यः सर्वेभ्यो नमोस्तु अस्मदीयो नमस्कारोस्तु । यद्वा अधिपत्यादिभ्यो यो नमस्कारः कृतः स एभ्यः प्रीतिकरो भवतु इत्यर्थः ॥ एवं नमस्कारेण परितोष्य इष्टफलं प्रार्थयते । यः शत्रुः अस्मान् द्वेष्टि बाधते यं शत्रुं वयं द्विष्मः तं शत्रुम् हे अघ्न्यादयः वः युष्माकं जम्भे । खादनहेतुरास्यान्तर्गतो दन्तविशेषो जम्भः । तत्र दध्मः प्रक्षिपामः । तं खादतेत्यर्थः ॥

द्वितीया ॥

दक्षिणा दिगिन्द्रोधिपतिस्तिरश्चिराजी रक्षिता पितर इषवः ।
तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥ २ ॥

दक्षिणा । दिक् । इन्द्रः । अधिऽपतिः । तिरश्चिऽराजिः । रक्षिता । पितरः ।
इषवः ।
तेभ्यः । नमः । अधिऽपतिऽभ्यः । नमः । रक्षितृऽभ्यः । नमः । इषुऽभ्यः ।
नमः । एभ्यः । अस्तु ।
यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः । तम् । वः । जम्भे । दध्मः ॥ २ ॥

दक्षिणा दक्षिणतोवस्थिता या दिक् । सापि अस्मदनुग्रहार्थं वर्तताम् इत्यर्थः । ☒ "दक्षिणाद् आच्" इति आच्प्रत्ययान्तोत्र दक्षिणाशब्दः ☒ । तस्या दिशः इन्द्रः अधिपतिः अधिष्ठाता । तिरश्च्यः तिर्यग् अवस्थिता राजयः आवलयः यस्य तथाविधः सर्पः रक्षिता दक्षिणस्यां दिशि गोपायिता । पितरः पितृदेवताः तत्रत्या इषवः दुष्टनिग्रहकारीण्यायुधानि ॥ तेभ्यो नमोधिपतिभ्य इत्यादि पूर्ववद् योज्यम् ॥

तृतीया ॥

प्रतीची दिग् वरुणोधिपतिः पृदाकू रक्षितान्नमिषवः ।
तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥ ३ ॥

प्रतीचीं । दिक् । वरुणः । अधिपतिः । पृदाकुः । रक्षिता । अन्नम् । इषवः ।
तेभ्यः । नमः । अधिपतिभ्यः । नमः । रक्षितृभ्यः । नमः । इषुभ्यः ।
नमः । एभ्यः । अस्तु ।
यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः । तम् । वः । जम्भे । दध्मः ॥३॥

प्रतीची प्रतिमुखम् अञ्चन्ती पश्चाद्भागस्था दिक् । अस्मदनुग्रहार्थं वर्तताम् इत्यर्थः । तस्या दिशो वरुणः अधिपतिः स्वामी । पृदाकुः कुत्सितशब्दकारी । [illegible]पर्द कुत्सिते शब्दे इत्यस्माद् आकुप्रत्ययः । संप्रसारणम् अकारलोपश्च [illegible] । एतत्संज्ञः सर्पस्तत्रत्यो रक्षिता पालयिता । अन्नम् व्रीहियवादिलक्षणम् इषवः तत्रत्यदुष्टनिग्रहकारीण्यायुधानि ॥ तेभ्यो नम इत्यादि ॥

चतुर्थी ॥

उदीची दिक् सोमोधिपतिः स्वजो रक्षिताशनिरिषवः ।
तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥ ४ ॥

उदीची । दिक् । सोमः । अधिपतिः । स्वजः । रक्षिता । अशनिः । इषवः ।
तेभ्यः । नमः । अधिपतिभ्यः । नमः । रक्षितृभ्यः । नमः । इषुभ्यः ।
नमः । एभ्यः । अस्तु ।
यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः । तम् । वः । जम्भे । दध्मः ॥४॥

उदीची उत्तरा दिक् । अस्मदनुग्रहार्थं वर्तताम् इत्यर्थः । तस्या दिशः सोमः अधिपतिः स्वामी । स्वजः । स्वायत्तजन्मा स्वयमेवोत्पन्नः स्वजनशीलो वा सर्पः स्वजः । रक्षिता गोपायिता । अशनिः दम्भोलिः इषवः तत्रत्यदुष्टनिग्रहार्थान्यायुधानि ॥ तेभ्यो नम इत्यादि गतम् ॥

पञ्चमी ॥

ध्रुवा दिग् विष्णुरधिपतिः कल्माषग्रीवो रक्षिता वीरुध इषवः।
तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥ ५ ॥

ध्रुवा। दिक्। विष्णुः। अधिऽपतिः। कल्माषऽग्रीवः। रक्षिता। वीरुधः।
इषवः।
तेभ्यः। नमः। अधिपतिऽभ्यः। नमः। रक्षितृऽभ्यः। नमः। इषुऽभ्यः।
नमः। एभ्यः। अस्तु।
यः। अस्मान्। द्वेष्टि। यम्। वयम्। द्विष्मः। तम्। वः। जम्भे। दध्मः॥ ५॥

ध्रुवा स्थिरा अधोदिक् अस्मान् अनुगृह्णातु। तस्या दिशो विष्णुः अधिपतिः ईश्वरः। कल्माषग्रीवो रक्षिता। कल्माषः[1] कृष्णवर्णः ग्रीवासु यस्य स कल्माषग्रीवः एतदाख्यः सर्पो रक्षिता गोपायिता रक्षितव्यानाम्। वीरुधः विरोहणशीला ओषधयः इषवः दुष्टनिबर्हणायुधानि ॥ शिष्टं स्पष्टम् ॥

षष्ठी ॥

ऊर्ध्वा दिग् बृहस्पतिराधिपतिः श्वित्रो रक्षिता वर्षमिषवः।
तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥ ६ ॥

ऊर्ध्वा। दिक्। बृहस्पतिः। अधिऽपतिः। श्वित्रः। रक्षिता। वर्षम्। इषवः।
तेभ्यः। नमः। अधिपतिऽभ्यः। नमः। रक्षितृऽभ्यः। नमः। इषुऽभ्यः।
नमः। एभ्यः। अस्तु।
यः। अस्मान्। द्वेष्टि। यम्। वयम्। द्विष्मः। तम्। वः। जम्भे। दध्मः॥ ६॥

ऊर्ध्वा उपरिष्टाद् वर्तमाना दिक् मदीयम् अभिलषितं करोतु। त-

१ ^{h}B K ^{m}K V °पतिश्चित्रो. We with A B D R ^{m}S P ^{2}P J. २ A B ^{h}B D K V १ for ३. We with ^{m}K R ^{m}S.

1 S′ Kd कल्मायाः कृष्णवर्णः ग्री°.

स्या दिशः बृहस्पतिर्देवः अधिपतिः अधिष्ठाता श्वित्रः श्वेतवर्णः । ⌛स्फायितञ्चीत्यादिना [उ० २.१३] श्विता वर्णे इत्यस्माद् रक् प्रत्ययः⌛ । एतत्संज्ञः सर्पो रक्षिता शत्रुप्रभृतिभ्यस्त्राता । वर्षम् वर्षजलं मेघनिर्मुक्तम् इषवः दुष्टनिवारणायुधानि ॥ तेभ्यो नम इत्यादि व्याख्यातम् ॥

[इति] षष्ठेनुवाके द्वितीयं सूक्तम् ॥

"एकैकयैषा सृष्ट्या" इत्यनेन गवाश्वागर्दभीमानुषीणां यमलजनने अङ्गुते तच्छान्त्यर्थम् आज्यं हुत्वा मातृपुत्रयोर्मूर्ध्नि संपातम् आनीय उदपात्रे उत्तरसंपातं कृत्वा तेनोदकेन आचमनं प्रोक्षणं च कुर्यात् । सूत्रितं हि । "अथ यत्रैतद् यमसूर्गौः" इति [कौ० १३.१७] प्रक्रम्य "एकै-"कयैषा सृष्ट्या सं बभूवेत्यनेन सूक्तेन आज्यं जुह्वन्नमीषां मूर्ध्नि समातृ-"पुत्रयोरित्यनुपूर्वं संपातान् आनयति" इत्यादि [कौ० १३.१९] ॥

तत्र प्रथमा ॥

एकैकयैषा सृष्ट्या सं बभूव यत्र गा असृजन्त भूतकृतो विश्वरूपाः ।
यत्र विजायते यमिन्यपर्तुः सा पशून् क्षिणाति रिफती रुशती ॥ १ ॥

एकऽएकया । एषा । सृष्ट्या । सम् । बभूव । यत्र । गाः । असृजन्त । भूतऽकृतः । विश्वऽरूपाः ।
यत्र । विऽजायते । यमिनी । अपऽऋतुः । सा । पशून् । क्षिणाति । रिफती । रुशती ॥ १ ॥

एषा विधातृकृता [साधारणी] सृष्टिः एकैकया एकैकव्यक्त्या सृष्ट्या सृज्यमानया सं बभूव संभूता विधात्रा निर्मिता । एकैकव्यक्त्युत्पत्तिरेव न्याय्या । यमलजननं तु [न तथेत्यर्थः । यत्र एकैकव्यक्तिविशिष्टायां शुभसृष्ट्यां भूतकृतः पृथिव्यादीनां भूतानां कर्तारः एतत्संज्ञाः प्रसिद्धा ऋषयो विश्वरूपाः नानावर्णा गाः गवोपलक्षिता मानुषीवडवाद्या] असृजन्त उदपादयन् । एषा सा साधारणी सृष्टिरिति पूर्वेण संबन्धः । यत्र यस्याम् औत्पत्तिकसृष्टौ अपर्तुः अपकृष्टार्तवबीजोपेता सती गौः यमिनी

१ P असृजंत. We with $\dot{P}$ J.

यमलवत्सोपेता विजायते प्रसूते सा यमलसृष्टिः यजमानसंबन्धिनः पशून् गवाद्यान् क्षिणाति क्षयं प्रापयति। ङक्षि क्षये इति धातुः ङ। किं कुर्वती। रिफती। ङरिफ रिन्फ हिंसायाम् ङ। भक्षयन्ती। रुशती चोरव्याघ्रादिभिर्नाशयन्ती। ङरुश हिंसायाम् ङ। उभावपि तुदादी ङ ॥

द्वितीया ॥

एषा पशून्त्सं क्षिणाति क्रव्याद् भूत्वा व्यद्वरी।
उतैनां ब्रह्मणे दद्यात् तथा स्योना शिवा स्यात् ॥ २ ॥

एषा। पशून्। सम्। क्षिणाति। क्रव्यऽअत्। भूत्वा। विऽअद्वरी।
उत। एनाम्। ब्रह्मणे। दद्यात्। तथा। स्योना। शिवा। स्यात्॥ २ ॥

एषा यमसूर्गौः पशून् यजमानगृहे वर्तमानान् गवादीन् सं क्षिणाति संक्षयं विनाशं प्रापयति। ङक्षि क्षये। व्यत्ययेन श्ना ङ। क्रव्यंभूता। क्रव्याद् भूत्वा क्रव्यं मांसम् अत्तीति क्रव्यात्। ङ"क्रव्ये च" इति विट् प्रत्ययः ङ। मांसादनशीला भूत्वा। व्यध्वरी व्यध्वो दुःखहेतुर्दुष्टमार्गः तद्वती। ङरो मत्वर्थीयः ङ। यद्वा विरुद्धफलदा अध्वरा अभिचारयज्ञा व्यध्वराः। ङ"छन्दसीवनिपौ" इति मत्वर्थीय ईकारः ङ। उत इति प्रश्ने। एवंविधे दोषे किं कर्तव्यम् इत्यर्थः ॥ एनां यमजननीं ब्रह्मणे ब्राह्मणाय दद्यात्। तथा सति सा गौः स्योना सुखकरी। यद्वा पुत्रपश्वादिभिः संतता। ङषिवु तन्तुसंताने। औणादिको नप्रत्ययः। ततः ऊठि कृते "असिद्धं बहिरङ्गम्०" इत्यस्य "नाजानन्तर्ये०" इति निषेधाद् यण् ङ। शिवा कल्याणात्मिका च स्यात् भवेत् ॥

तृतीया ॥

शिवा भव पुरुषेभ्यो गोभ्यो अश्वेभ्यः शिवा।
शिवास्मै सर्वस्मै क्षेत्राय शिवा न इहैधि ॥ ३ ॥

शि॒वा । भ॒व॒ । पुरु॑षेभ्यः । गोभ्यः॑ । अश्वे॑भ्यः । शि॒वा ।
शि॒वा । अ॒स्मै । सर्वा॑स्मै । क्षेत्रा॑य । शि॒वा । नः॒ । इ॒ह । ए॒धि॒ ॥ ३ ॥

हे यमलवत्सजननि पुरुषेभ्यः मनुष्येभ्यः शिवा सुखकरी भव ॥ तथा गोभ्यः अश्वेभ्यश्च शिवा सुखहेतुर्भव ॥ अस्मै सर्वस्मै [क्षेत्राय] शालिगोधूमादिक्षेत्राय शिवा सुखकरी भव ॥ किं बहुना । इह अस्मिन् देशे नः अस्माकं सर्वविषयेषु शिवा एधि सुखप्रदा भव । ॒अस्तेर्लोटि "घ्वसोरेद्धौ०" इति एत्त्वे कृते तस्य "असिद्धवद् अत्रा भात्" इति असिद्धत्वात् "हुझल्भ्यो हेर्धिः" इति झलन्तलक्षणं हेर्धित्वं भवति॒ ॥

चतुर्थी ॥

इ॒ह पुष्टि॑रि॒ह रस॑ इ॒ह स॒हस्र॑सातमा भव ।
प॒शून् य॑मिनि पोषय ॥ ४ ॥
इ॒ह । पुष्टिः॑ । इ॒ह । रसः॑ । इ॒ह । स॒हस्र॑ऽसातमा । भ॒व॒ ।
प॒शून् । य॒मि॒नि॒ । पोष॑य ॥ ४ ॥

इह अस्मिन् गृहे पुष्टिः गवादिसर्वधनस्य पोषो भवतु । ततश्च इह अस्मिन् यजमानगृहे रसः क्षीराज्यादिरूपः समृद्धो भवतु ॥ हे यमिनि यमलवत्सजननि इह अस्मिन् यजमानगृहे सहस्रसातमा सहस्रसंख्याकं धनं सनोति प्रयच्छतीति सहस्रसाः । ॒षणु दाने । "जनसनखनक्रमगमो विट्" "विड्वनोरनुनासिकस्यात्" इति आत्त्वम् । तत आतिशायनिकस्तमप्॒ । अतिशयेन सहस्रधनस्य दात्री भवेत्यर्थः ॥ एवं यजमानसंबन्धिनः पशून् हे यमिनि पोषय समर्धय ॥

पञ्चमी ॥

यत्रा॑ सु॒हार्दः॑ सु॒कृतो॒ मद॑न्ति वि॒हाय॒ रोग॑ं त॒न्व॑१ः स्वायाः॑ ।
तं लो॒कं य॒मिन्य॑भि॒संब॑भूव॒ सा नो॒ मा हिं॑सीत् पुरु॒षान् प॒शूंश्च॑ ॥ ५ ॥
यत्र॑ । सु॒ऽहार्दः॑ । सु॒ऽकृतः॑ । मद॑न्ति । वि॒ऽहाय॑ । रोग॑म् । त॒न्वः॑ । स्वायाः॑ ।

---

१ **A B** ३ for १. **D** त॒न्वा॑ १ स्वायाः॑. $\overset{h}{\mathbf{B}}$ **R** त॒न्वा॑ः ३ स्वायाः॑. We with **K** $\overset{m}{\mathbf{K}}$ $\overset{m}{\mathbf{S}}$ **V**.

तम्। लोकम्। यमिनीं। अभिऽसंबभूव। सा। नः। मा। हिंसीत्। पुरुषान्। पशून्। च ॥ ५ ॥

यत्र यस्मिंश्च लोके सुहार्दः शोभनहृदयाः सुकृतः शोभनकर्माणः पुरुषाः मदन्ति हृष्यन्ति। ✕मदी हर्षे। व्यत्ययेन शप्✕। किं कृत्वा। स्वायास्तन्वः स्वकीयात् शरीराद् रोगम् ज्वरादिकं विहाय त्यक्त्वा। हृष्यन्तीत्यर्थः। तम् तादृशं लोकं यमिनी यमलवत्सजननी गौः अभिसंबभूव आभिमुख्येन संप्राप्नवती॥ अतः सा नः अस्माकं पुरुषान् पशूंश्च मा हिंसीत् मा हिनस्तु॥

षष्ठी॥

यत्रा सुहार्दौ सुकृतामग्निहोत्रहुतां यत्र लोकः।
तं लोकं यमिन्यभिसंबभूव सा नो मा हिंसीत् पुरुषान् पशूंश्च॥ ६॥

यत्र। सुऽहार्दाम्। सुऽकृताम्। अग्निहोत्रऽहुताम्। यत्र। लोकः।
तम्। लोकम्। यमिनीं। अभिऽसंबभूव। सा। नः। मा। हिंसीत्। पुरुषान्। पशून्। च ॥ ६ ॥

यत्र यस्मिन् लोके सुहार्दाम् शोभनहृदयानां शोभनज्ञानानां सुकृताम् शोभनं कर्म कृतवताम्। ✕"सुकर्मपाप०" इत्यादिना भूते क्विप्✕। तादृशानाम् [अग्निहोत्रहुताम् अग्निहोत्रहोमादिकं जुह्वताम्] अग्निहोत्रहोमादिकं शोभनं कर्म प्रतिष्ठितं[1] भवति। यत्र च स्थाने लोकः लोक्यते अनुभूयत इति लोकः तस्याग्निहोत्रादेः फलम् प्रतिष्ठितं भवति। तं लोकम् इत्यादि व्याख्यातम्॥

[इति] षष्ठेनुवाके तृतीयं सूक्तम्॥

"यद् राजानः" इति पञ्चर्चेन ओदनसवे कर्मणि पश्ववयवेषु पञ्चापूपनिधानं निरुप्तहविरभिमर्शनादिकं च कुर्यात्। तथा च सूत्रम्। "अग्नीन् आधास्यमानः सवान्[2] वा दास्यन्" इति [कौ० ८. १] प्रक्रम्य "यद्

1 S′ Kd प्रतिष्ठं भ०. 2 S′ Kd सवानादा० for सवान् वा दास्यन्. We with *Kaus'ika*.

"राजान इत्यवेक्षति पदस्नातस्य पृथक्पादेष्वपूपान् निदधाति नाभ्या पञ्चमम्" इत्यादि [कौ० ८. ५] ॥

"क इदं कस्मै" इति द्वाभ्यां दुष्टादुष्टप्रतिग्रहेतद्दोषशान्त्यर्थं प्रतिग्राह्यं पदार्थम् अभिमन्त्र्य गृह्णीयात् । सूत्रितं हि । "क इदं कस्मा अदात् "[७, ८] कामस्तदग्रे[१९. ५२] यद् अन्नम्[६. ७१] पुनर्मैत्विन्द्रियम् "[७. ६९] इति प्रतिगृह्णाति" इति [कौ० ५. ९] ॥

"भूमिष्ट्वा" [८] इत्यनया भूमिं प्रतिगृह्णीयात् ॥

ग्रहयज्ञे "यद् राजानः" इत्यनेन बुधस्य हविराज्ययोर्होमम् समिदाधानम् उपस्थानं च कुर्यात् । तद् उक्तं शान्तिकल्पे । "यद् राजानः[२९] इति सोमस्यांशो युधां पते[७. ८६. ३] इति बुधाय" इति [शा० क० १५] ॥

तत्र प्रथमा ॥

यद् राजानो विभजन्त इष्टापूर्तस्य षोडशं यमस्यामी सभासदः ।
अविस्तस्मात् प्र मुञ्चति दत्तः शितिपात् स्वधा ॥ १ ॥

यत् । राजानः । विऽभजन्ते । इष्टापूर्तस्य । षोडशम् । यमस्य । अमी इति । सभाऽसदः ।
अविः । तस्मात् । प्र । मुञ्चति । दत्तः । शितिऽपात् । स्वधा ॥ १ ॥

यमस्य धर्मराजस्य अमी दक्षिणस्यां दिशि द्युलोके परिदृश्यमानाः सभासदः सभायाम् उपविष्टा दुष्टनिग्रहे शिष्टपरिपालने च नियुक्ता राजानः राजमानाः ईश्वरा वा देवाः इष्टापूर्तस्य । इष्टं श्रुतिविहितं यागादि कर्म । पूर्तं स्मृतिविहितं वापीकूपतटाकादिनिर्माणलक्षणं कर्म । तस्य उभयविधस्य कर्मणः षोडशम् षोडशसंख्यापूरकं यत् पापं विभजन्ते पुण्यराशेर्विभक्तं कुर्वन्ति । अयम् अर्थः । श्रुतिस्मृतिविहितकर्मसु अनुष्ठीयमानेषु प्रमादालस्यादिना कियानपि पापस्य षोडश्या कलया अंशः समुपजायत एव तद् यमस्य सभ्याः परिशोधयन्तीति । षोडशम् इति । षोडशसंख्यायाः पूरकः । "तस्य पूरणे डट्" । "षष उलं दतृ-

1 S′Kd read: इत्यवेश्चतुष्पदस्थानस्य पृथक्पात्रेष्व° for इत्यवेक्षति पदस्नातस्य पृथक्पादेष्व°. 2 So S′Kd. Should we not read °ग्रहे तद्दो°? 3 S′Kd रभ for °पते.

दशधासूत्तरपदादेः ष्टुत्वं च" इति उत्वष्टुत्वे ॥ । तस्मात् राजभिर्विभज्य गृहीतात् पापात् अस्मिन् सवयज्ञे दत्तः अविः अस्मान् प्र मुञ्चतुं । यद्वा इष्टापूर्तस्य साधकं षोडशम । "षोडशकलो वै पुरुषः" [तै० ब्रा० १. ७. ५. ५] इति श्रुतेः षोडशकलम् आत्मानं यमस्य सभासदः अमी राजानः यत् विभजन्ते पशुशरीराद् विभक्तं कुर्वन्ति अविः अविशरीराभिमानी आत्मा तस्मात् शरीरवियोगजनिताद् दुःखात् प्र मुञ्चतुं प्रमुक्तो भवतु ॥ शितिपात् श्वेतपात् स दत्तोऽविः स्वधा । अन्ननामैतत् । यमसंबन्धिभ्यः सभासद्भ्यः अन्नं भवतु । यद्वा स्वधेति पितृणां हविर्दाने । ॥ "स्वधाकारो हि पितृणाम" इति [तै० ब्रा० ३. ३. ६. ४] श्रुतेः ॥ । हविष्ट्वेन दत्तो भवतु ॥

द्वितीया ॥

सर्वान् कामान् पूरयत्याभवन् प्रभवन् भवन् ।
आकूतिप्रोविर्दत्तः शितिपान्नोप दस्यति ॥ २ ॥

सर्वान् । कामान् । पूरयति । आऽभवन् । प्रऽभवन् । भवन् ।
आकूतिऽप्रः । अविः । दत्तः । शितिऽपात् । न । उप । दस्यति ॥ २ ॥

आभवन् आ समन्ताद् भवन् व्याप्नुवन् [प्रभवन्] फलदानाय समर्थो भवन् भवन् वर्धिष्णुः सन् क्रियमाणोयं यज्ञः अस्मदीयान् सर्वान् कामान् पुत्रपश्वादिविषयान् पूरयति संपूर्णा[न् करोति । आकूतिप्रः इदं मे स्याद् इदं मे स्याद् इति ये संकल्पास्ता आकूतयः । तान् पूरयतीति आकूतिप्रः शितिपात् श्वेतपाद् दत्तः अस्मिन् यज्ञे प्रार्पितोयम् अविः] नोप दस्यति नोपक्षीयते । अपि तु यथाभिलाषं वर्धत इत्यर्थः । ॥ दसु उपक्षये इति धातुः ॥ ॥

तृतीया ॥

यो ददाति शितिपादमविं लोकेन संमितम् ।

---

१ B $\overset{h}{B}$ समितम्. We with A D K $\overset{m}{K}$ R $\overset{m}{S}$ P $\overset{2}{P}$ J V.

---

1 S′ Kd दत्तो हविः for दत्तः अविः.

स नाकमभ्यारोहति यत्र शुल्को न क्रियते अबलेन बलीयसे ॥ ३ ॥

यः । ददाति । शितिऽपादम् । अविम् । लोकेन । समऽमितम् ।
सः । नाकम् । अभिऽआरोहति । यत्र । शुल्कः । न । क्रियते । अब-
लेन । बलीयसे ॥ ३ ॥

यो यजमानः शितिपादम् श्वेतपादं लोकेन लोक्यमानेन फलेन संमितम् सम्यक्परिच्छिन्नम् अमोघफलम् । यद्वा अनेन भूलोकेन संमितम् सदृशम् । भूलोकवत् सर्वफलप्रदम् इत्यर्थः । ईदृशम् अविं ददाति प्रयच्छति स दाता नाकम् । कम् सुखम् तद्विपरीतम् अकं दुःखम् न विद्यतेस्मिन् अकम् इति नाकः स्वर्गः । ✕ "नभ्राण्नपात्०" इत्यादिना नञः प्रकृतिभावः ✕ । उक्तं हि ।

दुःखेन यन्न संभिन्नं न च ग्रस्तम् अनन्तरम् ।
अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम् ।

ईदृशं लोकम् अभ्यारोहति अभिप्राप्नोति । तं लोकं विशिनष्टि । यत्रेति । यत्र यस्मिन् लोके अबलेन अपर्याप्तबलेन पुरुषेण बलीयसे बलवत्तराय । ✕ बलवच्छब्दाद् ईयसुनि "विन्मतोर्लुक्" इति मतोर्लुक् ✕ । तादृशाय शुल्को न क्रियते । शुल्को नाम अधिकबलस्य राज्ञो न्यूनबलेन परिसरवर्तिना अन्येन राज्ञा देयः करविशेषः । स नास्ति यस्मिन् लोक इत्यर्थः ॥

चतुर्थी ॥

पञ्चापूपं शितिपादमविं लोकेन संमितम् ।
प्रदातोपं जीवति पितॄणां लोकेक्षितम् ॥ ४ ॥

पञ्चऽअपूपम् । शितिऽपादम् । अविम् । लोकेन । समऽमितम् ।
प्रऽदाता । उप । जीवति । पितॄणाम् । लोके । अक्षितम् ॥ ४ ॥

पञ्चसंख्याका अपूपा यस्य पशोश्चतुर्षु पादेषु नाभ्यां च निहिता व-

१ So all our MSS. and Vaidikas. २ B पंचापूपं.

1 S' Kd यश्चपशोश्चतृपादेषु for यस्य पशोश्चतुर्षु पादेषु.

र्तन्ते तं पञ्चापूपं शितिपादम् श्वेतपादं लोकेन पृथिव्यादिकेन संमितम् सदृशम् अवस्थितम् [अविं] प्रदाता प्रकर्षेण ददत् पितृणाम् वस्वादिरूपं प्राप्तानां लोके सोमलोकाख्ये स्थाने अक्षितम् क्षयरहितं फलम् उप जीवति उपभुङ्क्ते। संमितं प्रदातेति। तृन्नन्तत्वात् "न लोकाव्यय०" इति कर्मणि षष्ठ्या निषेधे द्वितीयैव भवति। अक्षितम् इति। क्षि क्षये। भावे निष्ठा। "निष्ठायाम् अण्यदर्थे" इति पर्युदस्तत्वाद् दीर्घाभावात् "क्षियो दीर्घात्" इति दीर्घोपजीविनो नत्वस्यापि अभावः॥

पञ्चमी॥

पञ्चापूपं शितिपादमविं लोकेन संमितम्।
प्रदातोप जीवति सूर्यामासयोरक्षितम्॥ ५॥

पञ्चऽअपूपम्। शितिऽपादम्। अविम्। लोकेन। समऽमितम्।
प्रऽदाता। उप। जीवति। सूर्यामासयोः। अक्षितम्॥ ५॥

पादत्रयस्य स एवार्थः। मस्यते क्षयवृद्धिभ्यां परिमीयत इति मासः चन्द्रमाः। मसी परिमाणे इत्यस्मात् कर्मणि घञ्। सूर्यश्च मासश्च सूर्यामासौ। "देवताद्वन्द्वे च" इति पूर्वपदस्य आनङ्। सूर्याचन्द्रमसोर्लोके अक्षितम् क्षयरहितं फलम् उपभुङ्क्ते इत्यर्थः। अनयोश्चतुर्थीपञ्चम्योरीपद्भेदत्वाद् एकत्वाभिप्रायेण पञ्चर्चेनेत्युक्तम्॥

षष्ठी॥

इरैव नोप दस्यति समुद्र इव पयो महत्।
देवौ सवासिनाविव शितिपान्नोप दस्यति॥ ६॥

इराऽइव। न। उप। दस्यति। समुद्रःऽइव। पयः। महत्।
देवौ। सवासिनौऽइव। शितिऽपात्। न। उप। दस्यति॥ ६॥

शितिपात् श्वेतपादः सवयज्ञे दत्तः अविः इरेव भूमिरिव नोप दस्यति नोपक्षीयते। समुद्र इव समुद्रो यथा न क्षीयते एवं महत् अधिकं प-

१ So all our MSS. and Vaidikas.

यः क्षीरम् । तदात्मना परिणतो भवतीत्यर्थः ॥ तथा सवासिनौ समानं निवसन्तौ अश्विनौ देवाविव नोप दस्यति । तौ यथा खलु अश्विनौ देवौ सर्वफलप्रदत्वेन उपजीव्येते तथा अयम् अविरपि सर्वफलप्रदत्वेन नोपक्षीयत इत्यर्थः ॥

सप्तमी ॥

क इ॒दं कस्मा॑ अदा॒त् कामः॒ कामा॑यादात् ।
कामो॑ दा॒ता कामः॑ प्रतिग्रही॒ता कामः॑ समु॒द्रमा वि॑वेश ।
कामे॑न त्वा प्रति॑ गृह्णामि॒ कामै॒तत् ते॑ ॥ ७ ॥

कः । इ॒दम् । कस्मै॑ । अ॒दा॒त् । कामः॑ । कामा॑य । अ॒दा॒त् ।
कामः॑ । दा॒ता । कामः॑ । प्र॒ति॒ऽग्रही॒ता । कामः॑ । स॒मु॒द्रम् । आ । वि॒वे॒श॒ ।
कामे॑न । त्वा॒ । प्रति॑ । गृ॒ह्णा॒मि॒ । काम॑ । ए॒तत् । ते॒ ॥ ७ ॥

इदम् ईदृग् इति अनिरुक्तरूपः प्रजापतिः कशब्देनोच्यते । अर्थसामान्यात् किंशब्दोपि तस्यैव वाचकः । कशब्दाभिधेयः प्रजापतिः कस्मै प्रजापतये इदम् दक्षिणात्वेन देयं द्रव्यम् अदात् दत्तवान् । दाता च प्रतिग्रहीता च प्रजापतिरेव । एवम् अनुसंदधानस्य[1] प्रतिग्रहदोषो न जायत इत्यर्थः । तथा च तैत्तिरीयकम् । "क इदं कस्मा अदाद् इत्याह । प्रजापतिर्वै कः । स प्रजापतये ददाति" इति [तै॰ब्रा॰२.२.५.५] ॥ तथा कामः फलविषयोभिलाषः । आमुष्मिकफलाभिलाषी दाता । ऐहिकफलाभिलाषी प्रतिग्रहीता । अतः उभावपि कामात्मानौ । तथा च काम एव कामाय अदात् दत्तवान् नाहं प्रतिगृह्णामीति आत्मानं व्यावृत्य प्रतिग्रहे[2] कृते तद्दोषो न संस्पृशतीत्यर्थः । तथा च तैत्तिरीयकम् । "य एवं विद्वान् व्यावृत्य दक्षिणां[3] प्रतिगृह्णाति नैनं दक्षिणा ग्लीनाति" इति [तै॰ब्रा॰२.२.५.१] । उक्तम् अर्थम् उपपादयति । कामो दाता कामः प्रतिग्रहीतेति । व्याख्यातप्रायम् एतत् । उक्तो देवतारूपः कामः समुद्रम् समुद्रवन्निरवधिकं रूपम् आ विवेश प्राप्तवान् । "समुद्र इव हि कामः । नैव[4]

1 S′Kd °संधानस्य. 2 S′Kd प्रतिग्रहेः कृतो for प्रतिग्रहे कृते. 3 S′Kd दक्षिणा. 4 S′Kd नेव.

"हि कामस्यान्तोस्ति" [तै° ब्रा° २. २. ५. ६] इति हि तैत्तिरीयकम् । तादृशेन कामेन हे दक्षिणाद्रव्य त्वा त्वां प्रति गृह्णामि । नात्मनेत्यर्थः । हे काम एतत् प्रतिगृहीतं द्रव्यं ते तुभ्यं त्वदर्थमेव ॥

अष्टमी ॥

भूमिर्द्या प्रति गृह्णात्वन्तरिक्षमिदं महत् ।
माहं प्राणेन मात्मना मा प्रजया प्रतिगृह्य वि राधिषि ॥ ८ ॥

भूमिः । त्वा । प्रति । गृह्णातु । अन्तरिक्षम् । इदम् । महत् ।
मा । अहम् । प्राणेन । मा । आत्मना । मा । प्रऽजया । प्रतिऽगृह्य ।
वि । राधिषि ॥ ८ ॥

हे देय द्रव्य त्वा त्वां भूमिः भूदेवता प्रति गृह्णातु । तथा महत् अधिकं विस्तीर्णम् इदम् अन्तरिक्षं च त्वा त्वां प्रति गृह्णातु । अतः अहं प्रतिगृह्य प्रतिग्रहं कृत्वा तज्जनितदोषात् प्राणेन मुखनासिकाभ्यां संचरता जीवावस्थितिलिङ्गेन मा वि राधिषि राद्धो वर्जितो मा भूवम् । तथा आत्मना जीवेन तद्विशिष्टशरीरेण वा मा वि राधिषि । तथा प्रजया पुत्रपौत्रादिलक्षणया मा वि राधिषि । ⁂ माङि लुङि उत्तमैकवचने रूपम् ⁂ ॥

[इति] षष्ठेनुवाके चतुर्थं सूक्तम् ॥

"सह्रदयं सांमनुष्यँम्" इति सूक्तेन सांमनस्यकर्मणि ग्राममध्ये संपातितोदकुम्भनिनयनम् तद्वत् सुराकुम्भनिनयनम् त्रिवर्षवत्सिकाया गोः पिशितानां प्राशनम् संपातितान्नप्राशनम् संपातितसुरायाः पायनम् तथाविधप्रपोदकपायनं[1] च कुर्यात् । सूत्रितं हि । "सह्रदयम[३. ३०] तदू षु ते[५. १. ५] सं जानीध्वम्"[६. ६४] इति प्रक्रम्य "सांमनस्यान्युदकुलिजं[2] संपातवन्तं ग्रामं परिह्रत्य मध्ये निनयति" इत्यादि [कौ° २. ३] ॥

तथा उपाकर्मण्यपि आज्यहोमे अस्य सूक्तस्य विनियोगः । सूत्रितं हि ।

1 S' Kd °प्रोदक° for °प्रपोदक°. 2 S' Kd °न्युदजकुलिजं.

"अभिजिति शिष्यान् उपनीय श्वोभूते संभारान् संभरति" इति प्रक्रम्य "गणकर्मभिर्विश्वकर्मभिरायुष्यैः स्वस्त्ययनैराज्यं जुहुयात्" इति [कौ०१४. ३]। अत्र गणकर्मशब्देन "सहृदयम्" "तदू षु ते" इत्यादिगणो विवक्षितः॥

तत्र प्रथमा॥

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या॥ १॥

सऽहृदयम्। सामऽमनस्यम्। अविंऽद्वेषम्। कृणोमि। वः।
अन्यः। अन्यम्। अभि। हर्यत। वत्सम्। जातमऽइव। अघ्न्या॥ १॥

हे विवदमाना जनाः वः युष्माकम् अविद्वेषम् विद्वेषाभावोपलक्षितं सांमनस्यं कर्म कृणोमि करोमि। कीदृशं तत् सांमनस्यम्। सहृदयम् समानैर्हृदयैरुपेतम्। समानचित्तवृत्तियुक्तम् इत्यर्थः। सांमनुष्यम्[*2] मिथः संप्रीतियुक्ता मनुष्याः[3] संमनुष्याः तैर्निर्वर्तितं सांमनुष्यम्। ईदृशं समानज्ञानहेतुभूतं सख्यं करोमीत्यर्थः॥ ततो यूयमपि जातं वत्सम् अघ्न्याः[*] गोनामैतत्। अहन्तव्या गाव इव अन्योन्यं[*4] परस्परम् अभि हर्यत आभिमुख्येन कामयध्वम्। ✕ हर्य गतिकान्त्योः ✕॥

द्वितीया॥

अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम्[*3]॥ २॥

अनुऽव्रतः। पितुः। पुत्रः। मात्रा। भवतु। समऽमनाः।
जाया। पत्ये। मधुऽमतीम्। वाचम्। वदतु। शन्तिऽवाम्[*3]॥ २॥

---

१ B K[m] सहृदयं. २ So all our MSS. and Vaidikas except K and V, who with S.
३ All our MSS. and Vaidikas (except K who with S) have: °वान्. We with S.

---

1 S′ Kd अभिजिति अभिजिति. 2 From this it is clear that Sâyaṇa's reading was सांमनुष्यम्, and that it was not he who changed it from सांमनस्यम्. For though सांमनस्यम् is clearly required he explains सांमनुष्यम् and with difficulty explains it to mean much the same as सांमनस्यम्. He would have welcomed the latter if he had known it to exist. This passage also proves that Sâyaṇa's recension was inferior to ours. 3 S′ Kd मानुष्याः. 4 S′ Kd अन्योन्यपरस्प°.

पुत्रः तनयः पितुरनुव्रतः। व्रतम् इति कर्मनाम। अनुकूलकर्मा भवतु। यत् पिता कामयते तत्कर्मकारी भवतु॥ माता च संमनाः पुत्रादिभिः समानमनस्का भवतु॥ पत्ये भर्त्रे जाया भार्या मधुमतीम् माधुर्यवतीं शन्तिवाम् सुखयुक्तां वाचं वदतु ब्रवीतु। समानमनस्का भवतु इत्यर्थः। ॥ पत्ये। "पतिः समास एव" इति घिसंज्ञाया नियमात् केवलस्य अभावात् तत्कार्याभावे यण्। शन्तिवाम् इति। "कंशंभ्याम्०" इति शमशब्दात् तिप्रत्ययः। ततो मत्वर्थीयो वः॥ ॥

तृतीया ॥

मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ॥ ३ ॥

मा। भ्राता। भ्रातरम्। द्विक्षत्। मा। स्वसारम्। उत। स्वसा।
सम्यञ्चः। सऽव्रताः। भूत्वा। वाचम्। वदत। भद्रया ॥ ३ ॥

भ्राता सोदरः भ्रातरं मा द्विष्यात्[1] दायभागादिनिमित्तेन भ्रातृविषयम् अप्रियं मा कुर्यात्॥ उत अपि च स्वसारम् भगिनीं स्वसा मा द्विष्यात्। ॥ "ऋन्नेभ्यः०" इति प्राप्तस्य ङीपः "न षट्स्वस्रादिभ्यः" इति प्रतिषेधः॥ ॥ ते सर्वे भ्रात्रादयः सम्यञ्चः समञ्चनाः समानगतयः सव्रताः समानकर्माणो भूत्वा भद्रया कल्याण्या वाचा वागिन्द्रियेण वाचं वदतु[2] वदन्तु। ॥ व्यत्ययेन एकवचनम्। सम्यञ्च इति। संपूर्वाद् अञ्चतेः "ऋत्विग्०" इत्यादिना क्विन्। "समः समि" इति सम्यादेशः॥ ॥

चतुर्थी ॥

येन देवा न वियन्ति नो च विद्विषते मिथः।
तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः ॥ ४ ॥

---

१ **K** (with **S**) द्विष्य्°. **V** either द्विष्य्° or द्विक्ष्°. The reading explained by Sâyaṇa is द्विष्यात्. His text has: द्विष्य°. We with **A** ^{h}**B D** ^{m}**K R** ^{m}**S P** ^{2}**P J**. २ **P** ^{2}**P J** सऽव्रता, omitting the visarga. We with **K**.

---

1 So **S′ K**d. Sâyaṇa's text has द्विष्यत्.

येनं । देवाः । न । विऽयन्ति । नो इतिं । च । विऽद्विषतें । मिथः ।
तत् । कृण्मः । ब्रह्मं । वः । गृहे । सम्ऽज्ञानम् । पुरुषेभ्यः ॥ ४ ॥

येन ब्रह्मणा देवा इन्द्रादयः न वियन्ति विमातिं न प्राप्नुवन्ति । नो च नैव च मिथः परस्परं विद्विषते विद्वेषं न कुर्वते । द्विष अप्रीतौ । अदादित्वात् शपो लुक् । तत् संज्ञानम् समानज्ञाननिमित्तम् ऐकमत्यापादकं ब्रह्म मन्त्रात्मकं सांमनस्यं वः युष्माकं गृहे पुरुषेभ्यः । तादर्थ्ये चतुर्थी । तदर्थं कृण्मः कुर्मः । कृवि हिंसाकरणयोश्च । "धिन्विकृण्व्योर च" इति उप्रत्ययः । "लोपश्चास्यान्यतरस्यां म्वोः" इति उकारलोपः ॥

पञ्चमी ॥

ज्यायंस्वन्तश्चित्तिनो मा वि यौष्ट संराधयंन्तः सधुराश्चरंन्तः ।
अन्यो अन्यस्मै वल्गु वदंन्त एत सध्रीचीनान् वः संमनसस्कृणोमि ॥ ५ ॥

ज्यायंस्वन्तः । चित्तिनंः । मा । वि । यौष्ट । संम्ऽराधयंन्तः । संऽधुराः ।
चरन्तः ।
अन्यः । अन्यस्मै । वल्गु । वदंन्तः । आ । इत । सध्रीचीनान् । वः । सम्ऽमंनसः । कृणोमि ॥ ५ ॥

ज्यायस्वन्तः ज्यायस्त्वगुणोपेताः । ज्येष्ठकनिष्ठभावेन परस्परम् अनुसरन्त इत्यर्थः । चित्तिनः समानचित्तयुक्ताः संराधयन्तः समानसंसिद्धिकाः । समानकार्या इत्यर्थः । सधुराः समानकार्योद्वहनाः । "ऋक्पूरब्धूःपथाम्०" इति अकारः समासान्तः । इत्थं चरन्तः वर्तमाना यूयं मा वि यौष्ट मा पृथग् भूत । वियुक्ता मा भवतेत्यर्थः । युमिश्रणामिश्रणयोरित्यस्मात् माङि लुङि मध्यमबहुवचने रूपम् । इडभावश्छान्दसः । अन्योन्यस्मै परस्परं वल्गु शोभनं प्रियवाक्यं वदन्तः भाषमाणा यूयम् एत आगच्छत ॥ अहमपि हे जनाः वः युष्मान् स-

१ P सुऽ°. We with P J.

1 S′ Kd insert कृण्मः after पुरुषेभ्यः too. 2 So S′ Kd.

अधीचीनान् सहाञ्चतः कार्येषु सह प्रवृत्तान् संमनसः समानमनस्कान् कृणोमि करोमि। सध्रीचीनान् इति। सह अञ्चन्तीति विगृह्य अञ्चतेः "ऋत्विग्०" इत्यादिना किन्। "सहस्य सधिः" इति सध्यादेशः। "विभाषाञ्चेरदिक्स्त्रियाम्" इति स्वार्थिकः खः। ततो भसंज्ञायाम् "अचः" इति अकारलोपे "चौ" इति दीर्घत्वम् ॥

षष्ठी ॥

समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि।
सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः ॥ ६ ॥

समानी। प्रऽपा। सह। वः। अन्नऽभागः। समाने। योक्त्रे। सह। वः। युनज्मि।

सम्यञ्चः। अग्निम्। सपर्यत। अराः। नाभिमऽइव। अभितः ॥ ६ ॥

हे सांमनस्यकामाः वः युष्माकं समानी एका प्रपा पानीयशाला भवतु। अन्नभागश्च सहैव भवतु। परस्परानुरागवशेन एकत्रावस्थितम् अन्नपानादिकं युष्माभिरुपभुज्यताम् इत्यर्थः। तदर्थम् अहं वः युष्मान् समाने योक्त्रे एकस्मिन् बन्धने स्नेहपाशे सह युनज्मि सह बध्नामि ॥ अपि च सम्यञ्चः संगताः एकफलार्थिनो भूत्वा समानज्ञानाः सन्तः अग्निं सपर्यत पूजयत। सपर पूजायाम्। कण्ड्वादित्वाद् यक्। कथमिव स्थिता इति तत्राह। अरा नाभिमिव अभितः। रथचक्रस्य मध्यच्छिद्रं नाभिः। तस्या अभितो वर्तमाना अराः चक्रावयवाः कीलका नियतस्थानाः परिवेष्ट्य वर्तन्ते। एवम् एकम् अग्निम् अभितो वर्तमानाः परिचरतेत्यर्थः। "अभितः परितः समया०" इति स्मरणात् तद्योगाद् नाभिम् इति द्वितीया ॥

सप्तमी ॥

सध्रीचीनान् वः संमनसस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान्।

---

१ S °श्रुष्टी°. K °श्लुष्टी°. B श्रुष्टिं. We with A B D K R P J V.

---

1 S' स्नेहपाशेन. Kd स्नेहपाशेन corrected to स्नेहपाशे. 2 S' Kd एकमेकमग्निम् for एवम् एकम् अग्निम्.

देवा इवामृतं रक्षमाणाः सायंप्रातः सौमनसो वो अस्तु ॥ ७ ॥
सध्रीचीनान् । वः । समऽमनसः । कृणोमि । एकऽश्नुष्टीन् । समऽवनेन । सर्वान् ।
देवाःऽइव । अमृतम् । रक्षमाणाः । सायमऽप्रातः । सौमनसः । वः । अस्तु ॥ ७ ॥

सध्रीचीनान् सह प्रवर्तमानान् एककार्यकरणे सहोद्युक्तान् संमनसः समानमनस्कान् वः युष्मान् कृणोमि करोमि ॥ तथा युष्माकम् एकश्नुष्टिम्* एकविधं[1] व्यापनम् एकविधस्यान्नस्य भुक्तिं वा करोमि । संवननेन वशीकरणेन अनेन सांमनस्यकर्मणा युष्मान् सर्वान् । वशीकरोमीत्यर्थः ॥ अमृतम् द्युलोकस्थम् अजरामरत्वप्रापकं पीयूषं रक्षमाणाः ऐकमत्येन[2] पालयन्तः देवा [इव] इन्द्रादयो यथा सौमनस्ययुक्ता भवन्ति एवं वः युष्माकं सायंप्रातः एतदुपलक्षिते सर्वस्मिन् काले सौमनसः सौमनस्यं शोभनमनस्कत्वम् [अस्तु] भवतु ॥

इति पञ्चमं सूक्तम् ॥

"वि देवा जरसा" इति सूक्तेन उपनयनानन्तरम् आयुष्कामस्य माणवकस्य शरीरम् आचार्यः अभिमन्त्रयेत । तथा च कौशिकसूत्रम् । "वि देवा जरसा[३.३१] उत देवाः"[४.१३] इत्यादि "विषासहिम[१७.१] इत्यभिमन्त्रयते[3] ब्राह्मणोक्तम्" इत्यन्तम् [कौ० ७.९] ॥

तथा पितृमेधे दहनानन्तरम् उदकसमीपे एतत् सूक्तं ब्रह्मा जपेत् ॥

तथा आग्रहायणीकर्मणि "उदायुषा" [१०,११] इति द्वाभ्याम् उत्तिष्ठेत् । सूत्रितं हि । "आग्रहायण्यां पश्चाद् अग्नेर्दर्भेषु" इति प्रक्रम्य "उदायुषेत्यभ्युपोत्तिष्ठति[4]" इति [कौ० ३.७] ॥

तथा सोमक्रयणानन्तरम् "उदायुषा" [१०] इति ब्रह्मा उत्तिष्ठेत् । तथा च वैतानम् । "क्रीते कुरीरं निर्मुण्णाति । उदायुषेत्युपोत्तिष्ठति" इति [वै० ३.३] ॥

---

१ P[2] °श्नुष्टी°. We with P J.

---

1 S′ Kd एकविधानं for एकविधं. 2 S′ Kd एक°. 3 S′ Kd इत्यनुम°. 4 So S′ Kd. *Kaus'ika*: °पेत्युपोत्ति°.

तत्र प्रथमा ॥

वि देवा जरसावृतन् वि त्वमग्ने अरात्या ।
व्यहं सवेन पाप्मना वि यक्ष्मेण समायुषा ॥ १ ॥

वि । देवाः । जरसा । अवृतन् । वि । त्वम् । अग्ने । अरात्या ।
वि । अहम् । सवेन । पाप्मना । वि । यक्ष्मेण । सम् । आयुषा ॥ १ ॥

हे देवौ* देवौ अश्विनौ इमम् उपनीतं जरसा जरया वयोहान्या व्यवृतम्* वियोजयतम् । जृष् वयोहानौ इत्यस्मात् "षिद्भिदादिभ्योऽङ्" इति अङ् । "जराया जरस् अन्यतरस्याम्" इति जरस् आदेशः ॥ हे अग्ने त्वमपि अरात्या अदानेन अमित्रेण वा वि योजय ॥ अहं च सवेन पाप्मना रोगादिदुःखजनकेन पापेन इमं वि योजयामि । यक्ष्मेण च वि योजयामि । आयुषा चिरकालजीवनेन सं योजयामि ॥

द्वितीया ॥

व्यार्त्या पवमानो वि शक्रः पापकृत्यया ।
व्यहं सवेन पाप्मना वि यक्ष्मेण समायुषा ॥ २ ॥

वि । आर्त्या । पवमानः । वि । शक्रः । पापऽकृत्यया ।
वि । अहम् । सवेन । पाप्मना । वि । यक्ष्मेण । सम् । आयुषा ॥ २ ॥

पवमानः सर्वत्र संचरन् वायुः आर्त्या रोगादिजनितपीडया वि योजयतु ॥ शक्रः सर्वकार्येषु शक्त इन्द्रः पापकृत्यया । पापस्य कृत्या करणं पापकृत्या । "कृञः श च" इति भावे क्यप् । तया ब्रह्मचारिणं वि योजयतु ॥

तृतीया ॥

वि ग्राम्याः पशव आरण्यैर्व्याप्तृण्यासरन् ।
व्यहं सवेन पाप्मना वि यक्ष्मेण समायुषा ॥ ३ ॥

१ So all our MSS. and Vaidikas. २ So all our MSS. and other authorities.

1 S'Kd अमित्रेणेवा for अमित्रेण वा.

वि । ग्राम्याः । पशवः । आरण्यैः । वि । आपः[*1] । तृष्णया । असरन् ।
वि । अहम् । सर्वेण । पाप्मना । वि । यक्ष्मेण । सम् । आयुषा ॥ ३ ॥

ग्राम्याः ग्रामे भवा गोमहिषाद्याः पशवः आरण्यैः अरण्योत्पन्नैः श्वापदादिभिर्दुष्टमृगैः स्वभावतो विगता यथा भवन्ति । यथा च आपः तृष्णया पिपासया व्यसरन् विगता भवन्ति । जलव्यतिरिक्तस्य हि प्राणिजातस्य पिपासा । एवम् अहं सर्वेण पाप्मना ब्रह्मचारिणं विगमयामीत्यर्थः । गतम् अन्यत् ॥

चतुर्थी ॥

वी३मे द्यावापृथिवी इतो वि पन्थानो दिशंदिशम् ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥ ४ ॥

वि । इमे इति । द्यावापृथिवी इति । इतः । वि । पन्थानः । दिशंऽदिशम् ।
वि । अहम् । सर्वेण । पाप्मना । वि । यक्ष्मेण । सम् । आयुषा ॥ ४ ॥

इमे परिदृश्यमाने द्यावापृथिवी द्यावापृथिव्यौ वीतः विगच्छतः स्वभावतो वियुक्ते एव भवतः । दिशंदिशम् एकस्माद् ग्रामात् प्रतिदिशं[*2] गच्छन्तः पन्थानः मार्गाः वि यन्ति स्वभावतो विगताः पृथगवस्थाना भवन्ति । यथैवं[*3] तथा इमं माणवकं सर्वेण पाप्मना स्वभावतो वियुक्तं करोमि । गतम् अन्यत् ॥

पञ्चमी ॥

त्वष्टा दुहित्रे वहतुं युनक्तीतीदं विश्वं भुवनं वि याति ।
व्य१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥ ५ ॥

त्वष्टा । दुहित्रे । वहतुम् । युनक्ति । इति । इदम् । विश्वम् । भुवनम् ।
वि । याति ।
वि । अहम् । सर्वेण । पाप्मना । वि । यक्ष्मेण । सम् । आयुषा ॥ ५ ॥

---

१ P P[2] J K आपः. We with Sâyaṇa. २ A B B[h] D K[m] S[m] V १ for ३. We with R. ३ B[h] D K वहतं for वहतुं.

---

1 S′ Kd तथा. 2 S′ Kd प्रदिशं. 3 S′ Kd तथैवं.

त्वष्टा देवो दुहित्रे विवाहकाले स्वदुहितृप्रीत्यर्थं वहतुम् । पुरुषैरुह्यते जामातृगृहं प्राप्यत इति वहतुः । दुहित्रा सह प्रीत्या प्रस्थापनीयं वस्त्रालंकारादि द्रव्यं वहतुशब्देन विवक्षितम् । "मा हिंसिषुर्वहतुम[1] उह्यमानम्" [१४. २. ९] इत्यादिमन्त्रान्तरप्रसिद्धम् । तद् युनक्ति प्रस्थापय[2]ति इति बुद्ध्या तस्य अवकाशं दातुम् इदं विश्वं भुवनम् पृथिव्यन्तरिक्षादिरूपं वि याति परस्परं विगतं भवति । एवम् अहम् इमं माणवकं पाप्मना वियोजयामीत्यर्थः । गतम् अन्यत् ॥

षष्ठी ॥

अग्निः प्राणान्त्सं दधाति चन्द्रः प्राणेन संहितः ।
व्यहं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥ ६ ॥

अग्निः । प्राणान् । सम् । दधाति । चन्द्रः । प्राणेन । समऽहितः ।
वि । अहम् । सर्वेण । पाप्मना । वि । यक्ष्मेण । सम् । आयुषा ॥ ६ ॥

अग्निः अशितपीतपरिणामहेतुः अन्तरवस्थितो जाठररूपः प्राणान् चक्षुरादीन्द्रियाणि अन्नरसप्रापणेन सं दधाति संहितान् संश्लिष्टान् स्वस्वकार्यसमर्थान् करोति । तथा चन्द्रः सोमः प्राणेन प्राणवायुना तदाधारभूतेन मनसा वा संहितः सन् अमृतमयेन रसेन कृत्स्नम् आत्मानं पोषयतीत्यर्थः । "एतावद् वा इदम् अन्नं चैवान्नादश्च सोम एवान्नम् अग्निरन्नादः" इत्यादिश्रुतेः अग्नीषोमात्मकत्वाद् विश्वस्य अत्र तयोरुपादानम् । गतम् अन्यत् ॥

सप्तमी ॥

प्राणेन विश्वतोवीर्यं देवाः सूर्यं समैरयन् ।
व्यहं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥ ७ ॥

प्राणेन । विश्वतःऽवीर्यम् । देवाः । सूर्यम् । सम् । ऐरयन् ।
वि । अहम् । सर्वेण । पाप्मना । वि । यक्ष्मेण । सम् । आयुषा ॥ ७ ॥

विश्वतः सर्वतो वीर्यम् वीर्यभूतं सूर्यम् सर्वस्य प्राणिजातस्य प्रेरकम् आदित्यं प्राणेन जगत्प्राणरूपेण देवाः समैरयन् सर्वत्र प्रावर्तयन् । "यो-

1 S' Kd °वहतुमोह्यमानाम्. 2 S' Kd प्रसारयतीति.

"सौ तपन्नुदेति । स सर्वेषां भूतानां प्राणान् आदायोदेति" [तै० आ० १.१४.१] इत्यादिश्रुतेः । अतस्तादृशं प्राणात्मकं सूर्यं माणवके आयुषोभिवृद्धये संस्थापयामीत्यर्थः ॥

अष्टमी ॥

आयुष्मतामायुष्कृतां प्राणेन जीव मा मृथाः ।
व्यं१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥ ८ ॥

आयुष्मताम् । आयुःऽकृताम् । प्राणेन । जीव । मा । मृथाः ।
वि । अहम् । सर्वेण । पाप्मना । वि । यक्ष्मेण । सम् । आयुषा ॥ ८ ॥

आयुष्मताम् प्रशस्तेन दीर्घेण आयुषा तद्वताम् आयुष्कृताम् तादृशस्य आयुषः कर्तॄणां देवानां संबन्धिना प्राणेन दृढतरेण चिरकालावस्थायिना प्राणवायुना हे माणवक जीव प्राणान् धारय चिरकालं वर्तस्व । मा मृथाः प्राणान् मा त्याक्षीः । ⁂ "म्रियतेर्लुङ्लिङोश्च" इति आत्मनेपदम् । "हस्वाद् अङ्गात्" इति सिज्लोपः ⁂ ॥

नवमी ॥

प्राणेन प्राणतां प्राणैहैव भव मा मृथाः ।
व्यं१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥ ९ ॥

प्राणेन । प्राणताम् । प्र । अन । इह । एव । भव । मा । मृथाः ।
वि । अहम् । सर्वेण । पाप्मना । वि । यक्ष्मेण । सम् । आयुषा ॥ ९ ॥

प्राणताम् प्राणनव्यापारं कुर्वतां श्वसतां प्राणिनां सर्वेषां संबन्धिना प्राणेन प्राणवायुना हे माणवक प्राण प्राणनव्यापारं कुरु । ततश्च इहैव अस्मिन्नेव लोके भव वर्तस्व । मा मृथाः मा प्राणांस्त्याक्षीः । यद्वा हे प्राण इहैव माणवके भवेति योज्यम् ॥

दशमी ॥

उदायुषा समायुषोदोषधीनां रसेन ।
व्यं१हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥ १० ॥

---

१ JP अनं corrected from अन. We with P.

उत्। आयुंषा। सम्। आयुंषा। उत्। ओषधीनाम्। रसेंन।
वि। अहम्। सर्वेंण। पाप्मनां। वि। यक्ष्मेंण। सम्। आयुंषा॥ १०॥

अस्थामेति उपरि वक्ष्यमाणा क्रिया अत्रापि उपसर्गेण संबध्यते। आयुषा जीवनेन चिरकालावस्थानेन वयम् उत् अस्थाम उत्थिता मृत्योरुत्तीर्णा भवाम॥ तथा तादृशेन आयुषा सम् अस्थाम अस्मिन् लोके सम्यक् स्थिता भवाम। ओषधीनाम् व्रीहियवादीनां रसेन आयुष्करेण सारेण उत् अस्थाम उत्थिताः प्रवृद्धा अभूम॥ स्पष्टम् अन्यत्॥

एकादशी॥

आ पर्जन्यस्य वृष्ट्योदस्थामामृता वयम्।
व्यहं सर्वेंण पाप्मना वि यक्ष्मेंण समायुंषा॥ ११॥

आ। पर्जन्यस्य। वृष्ट्या। उत्। अस्थाम्। अमृताः। वयम्।
वि। अहम्। सर्वेंण। पाप्मना। वि। यक्ष्मेंण। सम्। आयुंषा॥ ११॥

आ समन्तात् स्थितस्य पर्जन्यस्य वृष्टिकारिणो देवस्य संबन्धिन्या वृष्ट्या जगत्प्राणभूतेन वर्षजलेन वयम् अमृताः मरणरहिता अमृतत्वं प्राप्ताः सन्तः उत् अस्थाम उत्थिता भवाम। ☒"छन्दसि लुङ्लङ्लिटः" इति तिष्ठतेर्लुङ्। "गातिस्था०" इति सिचो लुक्। अमृता इति। "नञो जरमरमित्रमृताः" इति उत्तरपदाद्युदात्तत्वम☒। व्यहम इत्यादि व्याख्यातम॥

इति तृतीये काण्डे षष्ठेनुवाके षष्ठं सूक्तम्।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः॥

॥ श्रीमद्राजाधिराजपरमेश्वरश्रीवीरहरिहरमहाराजसाम्राज्यधुरंधरेण सायणार्येण विरचिते अथर्ववेदार्थप्रकाशे तृतीयकाण्डः समाप्तः॥

---

1 S' Kd अथर्वणवेदप्रकाशे.

श्रीगणाधिपतये नमः । अविघ्नम् अस्तु ॥

यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत् ।
निर्ममे तम् अहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

चतुर्थे काण्डे[1] अष्टानुवाकाः । तत्र प्रथमेनुवाके पञ्च सूक्तानि । तत्र "ब्रह्म जज्ञानम्" इति आद्यं सूक्तं वेदकल्पाद्यध्ययनादौ विघ्नशमनार्थम् शास्त्रवादादौ प्रतिवादिजयार्थं च जपेत् । सूत्रितं हि । "ब्रह्म ज- "ज्ञानम् इत्यध्यायान् उपाकरिष्यन्नभिव्याहारयति प्राशम् आख्यास्यन् ब्र- "ह्मोद्यं वदिष्यन्" इति [कौ० ५.२] ॥

तथा गोपुष्टिकर्मणि गवां रोगशमने च अनेन सूक्तेन लवणम्[2] अभिमन्त्र्य गाः पाययेत् ॥

तथा अनेनैव प्रपातटाकादिस्थम् उदकम् अभिमन्त्र्य गाः पाययेत् ॥

सूत्रितं हि । "ब्रह्म जज्ञानम्[४.१] आ गावः[४.२१] एका च "मे[५.१५] इति गा लवणं पाययत्युपतापिनीः प्रजननकामाः । प्रपाम् "अवरुणद्धि" इति [कौ० ३.२] ॥

"ब्रह्म जज्ञानम्" इति आद्या बृहद्गणे पठिता । तस्य बृहद्गणस्य यत्रयत्र विनियोगस्तत्रतत्र अस्या विनियोगो द्रष्टव्यः ॥

तथा विवाहे चतुर्थिकाकर्मणि "ब्रह्म जज्ञानम्" इत्यनया वरः अङ्गुष्ठेन प्रजननदेशं नुदति । सूत्रितं हि । "ब्रह्म जज्ञानम् इत्यङ्गुष्ठेन व्यचस्करोति" इति [कौ० १०.५] ॥

उपाकर्मणि च "ब्रह्म जज्ञानम्" इत्येताम् उपाध्यायो जपेत् । सूत्रितं हि । "अव्यसश्च[१९.६८] इति जपित्वा सावित्रीं ब्रह्म जज्ञानम्[१] इत्येकाम्" इति [कौ० १४.३] ॥

"ब्रह्म जज्ञानम्" इति द्वाभ्यां प्रवर्ग्ये कर्मणि निधीयमानं महावी-

---

1 S′ Kd चतुर्थेनुवाके for चतुर्थे काण्डे. 2 S′ Kd लवन°.

रम् अनुमन्त्रयेत । सूत्रितं हि । "ब्रह्म जज्ञानम्[१] इयं पित्र्या[२] इति शस्त्रवद् अर्धर्चश आहावमतिगरवर्जम्" इति [वै० ३. ४] ॥

तथा अग्निचयने हिरण्मयरुक्मम् उपधीयमानं "ब्रह्म जज्ञानम्" इत्यनया अनुमन्त्रयेत । उक्तं वैताने । "ब्रह्म जज्ञानम् इति रुक्मं निधीयमानम्" इति [वै० ५. १] ॥

तथा "ब्राह्मीं[2] ब्रह्मवर्चसकामस्य वस्त्रशयनाग्निज्वलने च" [न० क० १७] इति विहितायां ब्राह्म्यां महाशान्तौ "ब्रह्म जज्ञानम्" इति विनियुक्तम् । तद् उक्तं नक्षत्रकल्पे । "ब्रह्म जज्ञानम् ब्रह्म[3] भ्राजत्" इति [न० क० १८] ॥

तथा तुलापुरुषविधौ "ब्रह्म जज्ञानम्" इति जुहुयात् । तद् उक्तं परिशिष्टे । "अथातस्तुलापुरुषविधिं व्याख्यास्यामः" इति प्रक्रम्य "महाव्याहृतिं सावित्रीं शान्तिं ब्रह्म जज्ञानम् इति हुत्वा" इति [प० ११. १] ॥

तत्र प्रथमा ॥

ब्रह्म॑ जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॒द् वि सी॑म॒तः सु॒रुचो॑ वे॒न आ॑वः ।
स बु॒ध्या॑ उपमा अ॑स्य वि॒ष्ठाः स॒तश्च॒ योनि॒मस॑तश्च॒ वि वः॑ ॥ १ ॥

ब्रह्म॑ । ज॒ज्ञा॒नम् । प्र॒थ॒मम् । पु॒रस्ता॑त् । वि । सी॒म॒तः । सु॒ऽरुचः॑ । वे॒नः । आ॒वः॒ ।
सः । बु॒ध्या॑ः । उ॒प॒ऽमाः । अ॒स्य॒ । वि॒ऽस्थाः । स॒तः । च॒ । योनि॑म् । अस॑तः । च॒ । वि । वः॒ ॥ १ ॥

"सत्यं ज्ञानम् अनन्तं ब्रह्म" [तै० आ० ८. १] इति त्रयन्तप्रसिद्धं सच्चित्सुखात्मकम् अपरिच्छिन्नं सर्वजगत्कारणं यत् परं ब्रह्म तत् पुरस्तात् पूर्वस्मिन् काले सृष्ट्यादौ प्रथमम् प्रथमकार्यं हिरण्यगर्भरूपं सूर्यात्मकं जज्ञानम् जातम् उत्पन्नम् । उक्तं हि ।

स वै शरीरी प्रथमः स वै पुरुष उच्यते

इति । यद्वा उक्तलक्षणं सूर्यात्मकं परं ब्रह्म प्रत्यहं पुरस्तात् पूर्वस्यां दिशि प्रथमं जज्ञानं पूर्वम् आविर्भूतं सत् पश्चात् स्वतेजसा कृत्स्नं जगद् व्याप्नो-

1 S′ Kd आहव°. We with the *Vaitâna*. 2 S′ Kd ब्राह्मी. 3 Is this for XI. 5. 24?

तीत्यर्थः। अथ वा प्रथमम् मुख्यं सर्वतेजसां प्रधानभूतम्। ॥ जनी प्रादुर्भावे इत्यस्मात् लिट्। "लिटः कानज्वा" इति कानजादेशः। "गमहन०" इति उपधालोपे "द्विर्वचनेचि" इति स्थानिवत्त्वाद् द्विर्वचनम्। "पूर्वाधरावराणाम् असि पुरधवश्चैषाम्" "अस्ताति च" इति पूर्वशब्दात् सप्तम्यर्थे अस्तातिप्रत्ययः तत्संनियोगेन पुर् आदेशश्च ॥। तच्च पूर्वस्यां दिशि प्रादुर्भूतं हैरण्यगर्भं सूर्यात्मकं परमं तेजो वेनः कान्तः मध्यमस्थानः प्रकाशप्रवर्षणादिहेतुर्देवः। ॥ वेनो वेनतेः कान्तिकर्मणः इति निरुक्तम् [नि० १०. ३८] ॥। तत्स्वरूपं "वेनस्तत् पश्यत्" [२. १] इत्यत्र विस्तरेणोक्तम्। स च दीप्यमानः परब्रह्मात्मको वेनः सीमतः सीमभ्यः लोकमर्यादाभ्यो दिक्प्रान्तदेशेभ्यः आरभ्य सुरुचः शोभनादीप्तीः स्वकीयाः सुष्ठु रोचमानान् लोकान् वा व्यावः विवृणोति विशेषेण आवृणोति। प्रभामण्डलेन अन्धतमसं निराकृत्य सर्वं जगत् छादयतीत्यर्थः। ॥ सीमत इति। सीमन्शब्दात् "अपादाने चाहीयरुहोः" इति तसिप्रत्ययः। आवरिति। वृञ् वरणे इत्यस्मात् "छन्दसि लुङ्लङ्लिटः" इति वर्तमाने लुङ्। "मन्त्रे घस०" इत्यादिना च्लेर्लुक्। हल्ङ्यादिलोपे "छन्दस्यपि दृश्यते" इति आडागमः ॥ ॥ न केवलं पार्थिवानेव लोकान् आवृणोति आन्तरिक्ष्[2]यानपीत्याह स इति। स च सूर्यात्मको वेनः बुध्याः बुध्नम् अन्तरिक्षम् तत्र भवा बुध्याः। ॥ "भवे छन्दसि" इति यत् ॥। अस्य कारणभूतस्य ब्रह्मणस्तेजसा उपमाः उपमीयमानाः परिच्छिद्यमाना विष्ठाः विविधम् अवस्थिताः। ईदृशान् आन्तरिक्ष्[3]यानपि लोकान् व्यावरिति संबन्धः। ॥ उपमा इति। "आतश्चोपसर्गे" इति कर्मणि अङ् प्रत्ययः। विष्ठा इति। विपूर्वात् तिष्ठतेः "आतश्चोपसर्गे" इति कर्तरि कः ॥। यद्वा अस्य प्रपञ्चस्य विष्ठाः विविधा अवस्थितीः वियदादिभूतभौतिकात्मिकाः व्यावृणोति। ॥ "आतश्चोपसर्गे" इति भावे अङ्। "उपसर्गात् सुनोति०" इत्यादिना षत्वम् ॥ ॥ किं बहुना। सतश्च विद्यमानस्य अभिव्यक्तनामरूपप्रपञ्चस्य योनिम् कारणम् असतश्च अव्याकृतावस्थस्य अन-

1 S' Kd °प्रवर्षमाणादि°. 2 S' Kd प्रभावम°. 3 S' Kd आंतरिक्ष्या°.

भिव्यक्तनामरूपात्मकस्य प्रपञ्चस्य योनिम् कारणभूतां सत्त्वरजस्तमोगुणात्मिकां मूलप्रकृतिं वि वः विवृणोति व्याप्नोति । ⁂पूर्ववत् लुङ्⁂ । यद्वा सच्छब्देन चक्षुर्ग्राह्यं पृथिव्यप्तेजोलक्षणं भूतत्रयम् उच्यते । असच्छब्देन च परोक्षं वाय्वाकाशलक्षणं भूतद्वयम् उच्यते । एतच्च प्रत्यक्षपरोक्षभेदेन द्वैविध्यम् अन्यत्र आम्नातम् । "सच्च त्यच्चाभवत्" [तै० आ० ८. ६] इति ॥ एतद् उक्तं भवति । उदीरितलक्षणं परं ब्रह्म स्वमायाशक्तिवशेन आदित्यापरपर्यायो वेनो भूत्वा स्वतेजसा भूतभौतिकात्मकं जगत् सकारणकं व्याप्नोतीति ॥

द्वितीया ॥

इ॒यं पित्र्या॑ राष्ट्र्येत्वग्रे॑ प्रथ॒माय॑ ज॒नुषे॑ भुवने॒ष्ठाः ।
तस्मा॑ ए॒तं सु॒रुचं॑ ह्वा॒रमे॑ह्यं[1] घ॒र्मं श्री॑णन्तु प्रथ॒माय॑ धा॒स्यवे॑ ॥ २ ॥

इ॒यम् । पित्र्या॑ । राष्ट्री॑ । ए॒तु । अग्रे॑[2] । प्र॒थ॒माय॑ । ज॒नुषे॑ । भु॒व॒ने॒ऽस्थाः । तस्मै॑ । ए॒तम् । सु॒ऽरुच॑म् । ह्वा॒रम् । अ॒ह्य॑म् । घ॒र्मम् । श्री॒ण॒न्तु । प्र॒थ॒माय॑ । धा॒स्यवे॑ ॥ २ ॥

पित्र्या । पिता कृत्स्नस्य जगत उत्पादयिता प्रजापतिः । तत आगता । ⁂"पितुर्यच्च" इति यत् प्रत्ययः⁂ । भुवनेष्ठाः भुवने भूतजाते नादात्मना व्याप्य तिष्ठतीति भुवनेष्ठाः । उक्तं हि आचार्यैः शब्दब्रह्मप्रकरणे ।

स तु सर्वत्र संस्यूतो जाते भूताकरे पुनः ।
आविर्भवति देहेषु प्राणिनाम् अर्थविस्तृतः

इति ॥ इयम् परिदृश्यमाना शब्दब्रह्मात्मिका वाग्देवता राष्ट्री । ईश्वरनामैतत् । राज्ञी सर्वजगद्व्यवहारस्य ईश्वरा नियन्त्री प्रथमाय प्रथमशब्दवाच्याय प्रागुक्ताय ब्रह्मणे जनुषे सूर्यात्मना जायमानाय । ⁂जनेरुसिः [उ० २. ११४] इति कर्तरि उसिप्रत्ययः । "क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वात् चतुर्थी⁂ । जायमानं प्रथमं मुख्यम् आदित्या-

---

१ So (ह्वारमे॑ह्यं) **A B** B^{P} $\overset{h}{B}$ **D K** $\overset{m}{K}$ **R V**; $\overset{m}{S}$ ह्वारम॒ह्यं; **P** $\overset{2}{P}$ **J** अ॒ह्य॒म्; **P** originally read अह्यम्. We adhere to the tradition. २ **P** $\overset{2}{P}$ अग्रे॑:. We with **J**.

त्मकं ब्रह्म अग्रे पूर्वम् एतु । स्तुतिरूपेण व्याप्नोतु । यद्वा इयं भूमिः पित्र्या पितुः कश्यपाद् [आगता राष्ट्री स्वा]श्रितस्य जगतो नियन्त्री प्रथमाय स्वर्गादिभोगयोग्याय जनुषे जन्मने । ॥तादर्थ्ये चतुर्थी॥ । तदर्यम् अग्रे प्रथमम् एतु प्रवर्ग्याधिष्ठानतां प्राप्नोतु । यः प्रवर्ग्यात्मक आदित्यः भुवनेष्ठाः भुवनशब्दवाच्यं लोकत्रयं व्याप्य स्थितः । तस्मै ताहशाय प्रथमाय धास्यवे । धासिरित्यन्ननाम । हविर्लक्षणम् अन्नम् इच्छते देवाय सुरुचम् सुष्ठु रोचमानं ह्वारम् कुटिलं वर्तमानम् । ॥ह्वृ कौटिल्ये इत्यस्मात् ण्यन्तात् पचाद्यच् । यद्वा ह्वर्यते कौटिल्येन प्राप्यत इति ह्वारः । कर्मणि घञ् । "कर्षात्वतः०" इति अन्तोदात्तत्वम॥ । अह्यम । ॥अहि गतौ॥ । गन्तव्यं सुकृतविशेषैः प्राप्यम । यद्वा अहनि भवः अह्यः । ॥"भवे छन्दसि" इति यत्॥ । "नस्तद्धिते" इति टिलोपः । "अहष्टखोरेव" इति नियमस्तु "सर्वे विधयश्छन्दसि विकल्प्यन्ते" इति न प्रवर्तते॥ । एवंगुणविशिष्टम् एतं धर्मम् प्रवर्ग्यं हविः श्रीणन्तु ऋत्विजः पयसा संस्कुर्वन्तु । यद्वा । ॥श्रीञ् पाके॥ । पचन्तु तपन्तु ॥

तृतीया ॥

प्र यो जज्ञे विद्वानस्य बन्धुर्विश्वा देवानां जनिमा विवक्ति ।
ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचैरुच्चैः स्वधा अभि प्र तस्थौ ॥ ३ ॥

प्र । यः । जज्ञे । विद्वान् । अस्य । बन्धुः । विश्वा । देवानाम् । जनिम । विवक्ति ।

ब्रह्म । ब्रह्मणः । उत् । जभार । मध्यात् । नीचैः । उच्चैः । स्वधाः । अभि । प्र । तस्थौ ॥ ३ ॥

अस्य प्रपञ्चस्य बन्धुः बन्धकः कारणभूतः यद्वा बन्धुवत् हितकारी विद्वान् निरावरणज्ञानेन सर्वं जगत् जानन् यो देवः प्र जज्ञे प्रथमम् उ-

---

१ BDRSPP²J यज्ञे.. AB^h जज्ञे corrected into यज्ञे. We with SKK^mV. २ BB^hS^m °रुच्चैस्वधा. We with ADKR.

---

1 S'Kd ह्वयते कुटिलेन for ह्वर्यते कौटिल्येन.

त्पन्नः । ⧖जनी प्रादुर्भावे इत्यस्मात् लिटि "गमहन०" इति उपधालोपः⧖ । यद्वा । ⧖जानातेर्लिट्⧖ । प्र जज्ञे प्रजानीते । ⧖"आतो लोप इटि च" इति आल्लोपे कृते "द्विर्वचनेचि" इति स्थानिवद्भावात् साच्कस्य द्विर्वचनम् । "यङ्वृत्तान्नित्यम्" इति निघातप्रतिषेधः⧖ ॥ स[1] प्रथमजो देवः देवानाम् अन्येषाम् इन्द्रादीनां विश्वा विश्वानि सर्वाणि जनिमा[2] जन्मानि विवक्ति अन्येभ्यः कथयति । ⧖वच परिभाषणे । आदादिकः । छान्दसः शपः श्लुः⧖ । स च ब्रह्मणः कारणभूतात् परब्रह्मणः सकाशात् त्रयीरूपं ब्रह्म मध्यात् मध्यभागात् नीचैः अधोभागात् उच्चैः उपरिभागाच्च उत् जभार उज्जहार उद्धृतवान्[3] । ⧖"हृग्रहोर्भः०" इति भत्वम्⧖ । एवं वेदस्य उद्धरणे सति स्वधाः । अन्ननामैतत् । चरुपुरोडाशहविर्लक्षणानि अन्नानि अभिलक्ष्य अन्यादिर्देवः प्र तस्थौ प्राप्तवान् । यद्वा वेदवाक्यविहितानि हवींषि ऋत्विग्भिर्दत्तानि देवान् अभिलक्ष्य प्र तस्थौ प्रतस्थिरे । वचनव्यत्ययः । ⧖"समवप्रविभ्यः स्थः" इति आत्मनेपदाभावश्छान्दसः[4]⧖ ॥

चतुर्थी ॥

स हि दि॒वः स पृ॑थि॒व्या ऋ॒तस्या मही क्षेमं॒ रोद॑सी अस्कभायत्।
महा॒न् मही अ॑स्क॒भाय॒द् वि जा॒तो द्यां सद्म॒ पार्थि॑वं च॒ रज॑ः ॥ ४ ॥

सः । हि । दि॒वः । सः । पृ॒थि॒व्याः । ऋ॒त॒ऽस्याः । मही इति॑ । क्षेम॑म् । रोद॑सी इति॑ । अ॒स्क॒भा॒य॒त् ।
महा॑न् । मही इति॑ । अ॒स्क॒भा॒य॒त् । वि । जा॒तः । द्याम् । सद्म॑ । पार्थि॑वम् । च॒ । रज॑ः ॥ ४ ॥

स हि स खलु सूर्यात्मकः प्रथमजो देवः दिवः द्युलोकस्य ऋतस्याः कारणभूतं यद् ऋतशब्दवाच्यं परं ब्रह्म तदात्मना स्थितः । तथा स एव पृथिव्याः संबन्धिऋतस्याः सत्यरूपेण स्थितः । अतो मही महत्यौ रोदसी

१ So all our MSS. and Vaidikas. Only **J** once read: अस्कभायत्.

1 **S′Kd** जानातेर्वा लिट्. 2 **S′Kd** insert a **च** after **स**. 3 **S′** seems to read उद्भृत°. 4 **S′Kd** °पदश्छांदसः.

रोदस्यौ द्यावापृथिव्यौ क्षेमम् अस्कभायत् अविनाशो यथा भवति तथा अस्कभ्नात् स्वस्थाने स्थापितवान् । ⁂स्कन्भुः सौत्रो धातुः गतिप्रतिबन्धे । "स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च" इति श्नाप्रत्ययः । "शायच् छन्दसि सर्वत्र" इति अहावपि श्नः शायजादेशः⁂ । एतदेव विवृणोति । महान् अधिकः द्यावापृथिव्यौ व्याप्य वर्तमानः मही महत्यौ द्यावापृथिव्यौ अस्कभायत् अस्कभ्नात् ॥ तथा जातः तयोर्मध्ये सूर्यात्मना प्रादुर्भूतः सन् द्याम् द्युलोकात्मकं सद्म सदनं पार्थिवम् पृथिवीसंबन्धि च रजः लोकम् । ⁂लोका रजांस्युच्यन्ते इति हि यास्कः [नि०४.१९]⁂ । स्वतेजसा व्यामोद् इत्यर्थः ॥ ⁂पार्थिवम् इति । "पृथिव्या आजौ" इति अञ् प्रत्ययः⁂ ॥

पञ्चमी ॥

स बुभ्यादाष्ट्र जनुषोभ्यग्रं बृहस्पतिर्देवता तस्य सम्राट् ।
अह्र्यच्छुक्रं ज्योतिषो जनिष्टाथ द्युमन्तो वि वसन्तु विप्राः ॥ ५ ॥

सः । बुभ्यात् । आष्ट्र । जनुषः । अभि । अग्रम् । बृहस्पतिः । देवता ।
तस्य । सम्ऽराट् ।
अहः । यत् । शुक्रम् । ज्योतिषः । जनिष्ट । अथ । द्युऽमन्तः । वि ।
वसन्तु । विप्राः ॥ ५ ॥

सः परब्रह्मात्मकः प्रथमजो देवः जनुषः जनिमतो लोकस्य बुभ्यात् । बुभं मूलम् । तत्संबन्धिदेशात् रसातलादिलक्षणाद् आरभ्य तस्यैव लोकस्य अग्रम् उपरिभागम् अभिलक्ष्य आष्ट आश्नुत व्याप्नोत् । ⁂अशू व्याप्तौ इत्यस्मात् लुङि ऊदित्त्वाद् इडभावपक्षे "झलो झलि" इति सिचो लोपः⁂ । अपि च देवता । ⁂"देवात् तल्" इति स्वार्थिकस्तल् प्रत्ययः⁂ । देवो दानादिगुणयुक्तो बृहस्पतिः तस्य ज-

---

१ B बुभ्यादाष्ट्र corrected from बुभ्यादाष्ट्र. A $\overset{h}{B}$ K V बुभ्यादाष्ट्र. D $\overset{m}{K}$ $\overset{m}{S}$ R बुभादाष्ट्र. P बुभ्यात् । आष्ट्र ।. $\overset{2}{P}$ J बुभात् । आष्ट्र ।. २ A B D $\overset{m}{K}$ R $\overset{m}{S}$ V: जनिष्ठाथ. P जनिष्टः । अथ ।. $\overset{2}{P}$ जनिष्टः । अथ ।. J जनिष्ठ । अथ ।. We with $\overset{h}{B}$ J S.

निमतो लोकस्य सम्राट् सम्यक् राजमानोधिपतिः । ⌛संपूर्वाद् राजतेः "सत्सूद्विष०" इत्यादिना क्विप् । "मो राजि समः क्वौ" इति समो मकारस्य मकारवचनाद् अनुस्वाराभावः⌛ । यद्वा तस्य प्रथमजस्य देवस्य प्रसादात् सम्राट् सम्यक् राजमानः अतिशयितदीप्तियुक्तः। वर्तत इत्यर्थः । यत् यदा शुक्रम् दीप्यमानम् अहः ज्योतिषो जनिष्ट द्योतमानात् सूर्याद् उत्पन्नम् अभूत् । अथ अनन्तरं द्युमन्तः दीप्तिमन्तो विप्राः मेधाविन ऋत्विजः वि वसन्तु स्वस्वव्यापारेषु विविधं वर्तन्ताम । यद्वा विवसतिः परिचरणकर्मा । वि वसन्तु हविर्भिर्देवान् परिचरन्तु ॥

षष्ठी ॥

नूनं तदस्य काव्यो हिनोति महो देवस्य पूर्व्यस्य धाम ।
एष जज्ञे बहुभिः साकमित्था पूर्वे अर्धे विषिते ससन्नु ॥ ६ ॥

नूनम् । तत् । अस्य । काव्यः । हिनोति । महः । देवस्य । पूर्व्यस्य । धाम । एषः । जज्ञे । बहुऽभिः । साकम् । इत्था । पूर्वे । अर्धे । विऽसिते । स-सन् । नु ॥ ६ ॥

काव्यः । कवय ऋत्विजः । तत्संबन्धी यज्ञः काव्यः । स च अस्य दृश्यमानस्य महः महतः पूर्वस्य सर्वदेवेभ्यः प्रथमम् उत्पन्नस्य [देवस्य] तत् धाम तेजोरूपं मण्डलात्मकं स्थानं नूनम् निश्चयं हिनोति प्रेरयति । उदयाद्रिं प्रापयतीत्यर्थः । ⌛हि गतौ वृद्धौ च इति धातुः⌛ ॥ एष च सूर्यः बहुभिः सहस्रसंख्याकै रश्मिभिः साकम् सार्धम् इत्था अनेन प्रकारेण पूर्वे पूर्वदिक्संबन्धिनि विषिते विशेषेण संबद्धे अर्धे देशे ससर्म । अन्नमैतत् । हविर्लक्षणम् अन्नम् उद्दिश्य नु क्षिप्रं जज्ञे जायते । उदेतीत्यर्थः । ⌛इत्येति । "था हेतौ च च्छन्दसि" इति इदमः थाप्रत्ययः⌛ ॥

---

१ **K V** पुर्वस्य for पुर्व्यस्य with Sâyaṇa. We with **A B B^{p} B^{h} D R S^{m} P P^{2} J V.** २ **B^{p} K V** recognise जंहो as a various reading. This shows how wrongly Gaṇeśa Bhaṭṭa Dâdâ affected the tradition of the readings of the Atharva-Veda-Saṁhitâ. He clearly misread the southern ज्ञ for ह्यो. The similarity between the two in the Nandi Nâgarî is great, they being written thus respectively: ज्ञ and ह्यो. ३ **B B^{h} D K^{m} S^{m}** ससंनु, but **P P^{2} J** ससन् । नु ।. We with **A R V.**

सप्तमी ॥

योऽथर्वाणं पितरं देवबन्धुं बृहस्पतिं नमसाव च गच्छात् ।
त्वं विश्वेषां जनिता यथासः कविर्देवो न दभायत् स्वधावान् ॥ ७ ॥

यः । अथर्वाणम् । पितरम् । देवऽबन्धुम् । बृहस्पतिम् । नमसा । अव ।
च । गच्छात् ।
त्वम् । विश्वेषाम् । जनिता । यथा । असः । कविः । देवः । न । दभा-
यत् । स्वधाऽवान् ॥ ७ ॥

यः देवः बृहस्पतिः अथर्वाणम् प्रजापतिम् । "अथर्वा वै प्रजापतिः" [गो०ब्रा०१,४] इति श्रुतेः । पितरम् लोकस्योत्पादकं देवबन्धुम् देवानां बन्धुं कारणभूतम् । यद्वा अथर्वाणम् महर्षिं पितरम् अस्माकं पितृभूतं देवबन्धुम् देवा इन्द्रादयो बन्धवो बान्धवा [यस्य] तथाविधं नमसा अन्नेन तथा अव गच्छात् अवगच्छेत् जानीयात् यथा येन प्रकारेण त्वं विश्वेषाम् सर्वेषां स्थावरजङ्गमात्मकानां भावानां जनिता जनयिता असः भवेः । "जनिता मन्त्रे" इति णिलोपो निपात्यते । अस्तेर्लेटि अडागमः । कविः क्रान्तदर्शी स देवः बृहस्पतिः स्वधावान् अन्नवान् हविर्लक्षणेन अन्नेन युक्तः सन् न दभायत् न दभ्नोति न हिनस्ति । सर्वम् अनुगृह्णातीत्यर्थः । दन्भु दम्भे । व्यत्ययेन श्ना । पूर्ववत् शायजादेशः ॥

[इति] चतुर्थे काण्डे प्रथमेनुवाके प्रथमं सूक्तम् ॥

"य आत्मदाः" इति सूक्तं वशाशमनकर्मणि शान्त्युदके अनुयोजयेत् । सूत्रितं हि । "य आत्मदा इति वशाशमनम्" इति प्रक्रम्य "शान्त्युदकं करोति तत्रैतत् सूक्तम् अनुयोजयति" इति [कौ०५,८] ॥
तथा संज्ञप्ताया वशाया यदि गर्भो दृश्येत तं गर्भम् अञ्जलौ गृही-

१ K V °स्पतिः with Sâyaṇa. We with A B Bp B^{h} K^{m} R S^{m} V and P P^{2} J. २ So P P^{2} J K.

1 S′ Kd आथर्वणं. 2 S′ Kd वंधवोवावांधवा. 3 S′ Kd जंगमात्मनां.

त्वा सूत्रोक्तप्रकारेण अनेन सूक्तेन जुहुयात् । सूत्रितं हि । "यद्यष्टापदी "स्याद् गर्भम् अञ्जलौ सहिरण्यं सयवं वा य आत्मदा इति खदायां "त्र्यरत्नावग्नौ सकृज्जुहोति" इति [कौ० ५. ९] ॥

तथा वशाशमनकर्मणि चरुहोमे अवदानहोमे च एतत् सूक्तम् । "य आत्मदा इति वशाशमनम्" [कौ० ५. ८] इति सामान्येन सूत्रितत्वात् ॥

चातुर्मास्ये वरुणप्रघासाख्यपर्वणि "य आत्मदाः" इत्यनया कायम् एककपालं हविरनुमन्त्रयते । उक्तं वैताने । "वारुणं मारुतं कायं वरुणोपां य आत्मदाः" इति [वै० २. ४] ॥

अग्निचयने प्राजापत्यपशोरवदानानुमन्त्रणे "य आत्मदाः" इति । उक्तं वैताने । "य आत्मदा इत्यवदानानाम्" इति [वै० ५. १] ॥

तत्रैव हिरण्मयपुरुषोपधाने "हिरण्यगर्भः" [७] इत्येषा । तद् उक्तं वैताने । "हिरण्यगर्भ इति हिरण्यपुरुषम्" इति [वै० ५. १] ॥

द्वितीयसूक्ते प्रथमा ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
योऽ३स्येशे द्विपदो यश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ १ ॥

यः । आत्मऽदाः । बलऽदाः । यस्य । विश्वे । उपऽआसते । प्रऽशिषम् । यस्य । देवाः ।
यः । अस्य । ईशे । द्विऽपदः । यः । चतुःऽपदः । कस्मै । देवाय । हविषा । विधेम ॥ १ ॥

यः प्रजापतिः आत्मदाः सर्वेभ्यः प्राणिभ्यः आत्मानं ददातीति आत्मदाः । प्राणप्रद इत्यर्थः । बलदाः बलस्य प्रदाता । ✕"आतो मनिन्०" इति उभयत्रापि विच् प्रत्ययः ✕ । विश्वे सर्वे प्राणिनः यस्य देवस्य प्रशिषम् प्रकृष्टं शासनम् आज्ञाम् उपासते भजन्ते । ✕आस उपवेशने । अदादित्वात् शपो लुक् । अनुदात्तेत्त्वात् लसार्वधातुकानु-

१ A B D K K^{m} S^{m} V १ for ३. We with B^{h} R. २ J K अस्य. We with P P^{2}.

1 S′ Kd खद्वायां. We with *Kausika*. Dârila: खदा गर्तः.

दात्तत्वे धातुस्वरः। "यङ्वृत्तान्नित्यम्" इति निघाताभावः। "तिङि चोदात्तवति" इति गतेरनुदात्तत्वम्। प्रशिषम् इति। "क्वौ च शासः" इति क्विबन्तस्य शास उपधाया इत्वम्। "शासिवसिघसीनां च" इति षत्वम्॥। तथा यस्य देवस्य प्रशासनं देवा अपि उपासते। यो देवः द्विपदः पादद्वययुक्तस्य[1] अस्य प्राणिजातस्य मनुष्यादेः ईशे ईष्टे। "लोपस्त आत्मनेपदेषु" इति तलोपः। पूर्ववत् लसार्वधातुकानुदात्तत्वे धातुस्वरः॥। तथा चतुष्पदः पादचतुष्टयोपेतस्य गोमहिषादेः प्राणिनः य ईष्टे तस्मै कस्मै। इदम् ईदृग् इत्यनिरुक्तरूपत्वात् किंशब्दवाच्याय प्रजापतये देवाय। "क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वात् चतुर्थी॥। ईदृशं देवं हविषा विधेम परिचरेम। विधतिः परिचरणकर्मा। द्विपद इति। द्वौ पादावस्येति विगृह्य समासे "संख्यासुपूर्वस्य" इति पादशब्दान्त्यलोपः। ततो ङसि भसंज्ञायां "पादः पत्" इति पद्भावः। "द्वित्रिभ्यां पाद्दन्मूर्धसु०" इति उत्तरपदान्तोदात्तत्वम्। चतुष्पद इत्यस्यापि रूपसिद्धिरेवमेव। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं विशेषः॥ ॥

द्वितीया ॥

यः प्रा॑णतो नि॑मिषतो म॑हित्वैको॒ राजा॒ जग॑तो ब॒भूव॑।
य॒स्य॑ च्छा॒यामृ॒तं य॒स्य॑ मृ॒त्युः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥ २ ॥

यः। प्रा॒ण॒तः। नि॒ऽमि॒ष॒तः। म॒हि॒ऽत्वा। एकः॑। राजा॑। जग॑तः। ब॒भूव॑।
य॒स्य॑। छा॒या। अ॒मृत॑म्। य॒स्य॑। मृ॒त्युः। कस्मै॑। दे॒वाय॑। ह॒विषा॑। वि॒धे॒म॒ ॥ २ ॥

यः प्रजापतिः महित्वा। तृतीयाया आकारः॥। महित्वेन माहात्म्येन प्राणतः प्रश्वसतः श्वासोच्छ्वासव्यापारं कुर्वतः। श्वस प्राणने अन च इति धातुः। लटः शत्रादेशे अदादित्वात् शपो लुक्॥। निमिषतः निमेषणम् अक्षिपक्ष्मपरिस्पन्दलक्षणं व्यापारं कुर्वतः। मिष स्पर्धायाम्। अत्रापि पूर्ववत् शतरि तुदादित्वात् शः।

1 S'Kd °युक्तकस्य.

उभयत्र "शतुरनुमः०" इति षष्ठ्या उदात्तत्वम् । एवंभूतस्य जगतः जङ्गमस्य प्राणिजातस्य एकः असाधारणो राजा अधिपतिः बभूव भवति । "छन्दसि लुङ्लिटः" इति सार्वकालिको लिट् "लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वम् । यस्य देवस्य अमृतम् मरणाभावोपलक्षितम् अमृतत्वं छायेव स्वाधीनं वर्तते । मृत्युः मरणं सर्वजनसंबन्धि छायेव यस्य वशे वर्तते । अमृतम् इति । "नञो जरमरमित्रमृताः" इति उत्तरपदाद्युदात्तत्वम् । कस्मै देवायेत्यादि व्याख्यातम् ॥

तृतीया ॥

यं क्रन्दसी अवतश्चस्कभाने भियसाने रोदसी अह्वयेथाम् ।
यस्यासौ पन्था रजसो विमानः कस्मै देवाय हविषा विधेम ॥ ३ ॥

यम् । क्रन्दसी इति । अवतः । चस्कभाने इति । भियसाने इति । रोदसी इति । अह्वयेथाम् ।
यस्य । असौ । पन्थाः । रजसः । विऽमानः । कस्मै । देवाय । हविषा ।
विधेम ॥ ३ ॥

क्रन्दसी क्रन्दन्ति क्रोशन्ति अनयोराश्रिता जना इति क्रन्दसी द्यावापृथिव्यौ । क्रदि क्रुदि आह्वाने रोदने च इति धातुः । अधिकरणे असुन् प्रत्ययः । अवतः । अवनम् अवः । "घञर्थे कविधानम्" इति भावे कः । अवनात् जगद्रक्षणाङ्गेतोः चस्कभाने संस्तभ्यमाने । यथा अधो न पततस्तथा निराधारप्रदेशे देवेन धार्यमाणे इत्यर्थः । स्कन्भेश्छान्दसो लिट् । "लिटः कानज्वा" इति तस्य कानजादेशः । भियसाने अधः पतनाद् बिभ्यत्यौ । जिभी भये इत्यस्माद् औणादिकः असानच् प्रत्ययः । रोदसी रोदस्यौ द्यावापृथिव्यौ । यस्माद् अनयोर्मध्ये वर्तमानः प्रजापतिः अरोदीत् तस्माद् रोदिति अनयोरिति व्युत्पत्त्या रोदसी इति द्यावापृथिव्योर्नाम संपन्नम् । तथा च तैत्तिरीयकम् । "सोरोदीत् प्रजापतिः" इति प्रक्रम्य

१ K °येताम् with Sâyaṇa. We with A B B^{p} $\overset{h}{\text{B}}$ D $\overset{m}{\text{K}}$ R $\overset{m}{\text{S}}$ P $\overset{j}{\text{P}}$ J.

"यद् अरोदीत् तद् अनयो रोदस्वम्" [तै० ब्रा० २. २. ९. ४] इति । ईदृश्यौ द्यावापृथिव्यौ आत्मरक्षणार्थं यं देवम् आह्वयेताम् । यस्य देवस्य संबन्धी असौ द्युलोकस्थः पन्थाः मार्गो रजसः उदकस्य वृष्टिलक्षणस्य विमानः विशेषेण निर्माता तस्मै । कस्मा इत्यादि गतम् ॥

चतुर्थी ॥

यस्य द्यौरुर्वी पृथिवी च महो यस्यादुर्वन्तरिक्षम् ।
यस्यासौ सूरो विततो महित्वा कस्मै देवाय हविषा विधेम ॥ ४ ॥

यस्य । द्यौः । उर्वी । पृथिवी । च । मही । यस्य । अदः । उरु । अन्तरिक्षम् ।
यस्य । असौ । सूरः । विऽततः । महिऽत्वा । कस्मै । देवाय । हविषा ।
विधेम ॥ ४ ॥

यस्य देवस्य महित्वा महित्वेन माहात्म्येन द्यौः उर्वी विस्तीर्णा जाता । [x]उरुशब्दाद् "वोतो गुणवचनात्" इति ङीष्[x] । पृथिवी च यस्य महिम्ना मही महती विस्तीर्णा जाता । यस्य च माहात्म्येन अदः एतद् अन्तरिक्षम् उरु विस्तीर्णम् अभवत् । असौ द्युलोके प्रत्यक्षं दृश्यमानः सूरः सूर्यः यस्य ब्रह्मणो महिम्ना विततः विस्तीर्णो जातः तस्मै । कस्मा इत्यादि समानम् ॥

पञ्चमी ॥

यस्य विश्वे हिमवन्तो महित्वा समुद्रे यस्य रसामिदाहुः ।
इमाश्च प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ ५ ॥

यस्य । विश्वे । हिमऽवन्तः । महिऽत्वा । समुद्रे । यस्य । रसाम् । इत् । आहुः ।
इमाः । च । प्रऽदिशः । यस्य । बाहू इति । कस्मै । देवाय । हविषा । विधेम ॥ ५ ॥

यस्य प्रजापतेर्देवस्य महित्वा महिम्ना विश्वे सर्वे हिमवन्तः हिमवत्पर्वतोपलक्षिता महागिरयः संजाताः । यस्य च महिम्ना समुद्रे उदधौ । रसाम्

---

१ $\overset{h}{B}$ D $\overset{m}{S}$ R ३ for १. We with A B K $\overset{m}{K}$ V.

---

1 S′ Kd तस्य.

रसोस्याम् अस्तीति रसा नदी । ॒अर्शआदित्वाद् अच्॒ । र-
सति शब्दायत इति वा रसा । ॒पचाद्यच् । रसा नदी भवति
रसतेः शब्दकर्मणः इति यास्कः । [नि°११.२५] जातावेकवचनम् ।
इच्छब्दः अवधारणे॒ । सर्वा नदीः अन्तर्भूता एव आहुः ब्रुव-
न्ति । समुद्रा नद्यश्च यस्य विभूतिरूपा इत्यर्थः । इमाश्च प्रदिशः प्र-
धानभूताश्चतस्रो दिशः यस्य देवस्य वाहू वाहुभूताः तस्मै । कस्मा इत्या-
दि गतम् ॥

षष्ठी ॥

आपो अग्रे विश्वमावन् गर्भं दधाना अमृता ऋतज्ञाः ।
यासु देवीष्वधि देव आसीत् कस्मै देवाय हविषा विधेम ॥ ६ ॥

आपः । अग्रे । विश्वम् । आवन् । गर्भम् । दधानाः । अमृताः । ऋतऽज्ञाः ।
यासु । देवीषु । अधि । देवः । आसीत् । कस्मै । देवाय । हविषा । वि-
धेम ॥ ६ ॥

अग्रे सृष्ट्यादौ सृष्टा आपः विश्वम् कृत्स्नं जगत् कारणरूपेण अवस्थि-
तम् आवन् अरक्षन् उपचितम् अकुर्वन् । किं कुर्वत्यः । गर्भम् विश्वज-
गद्विधानाय गर्भरूपेण अवस्थितं हिरण्यगर्भं दधानाः धारयन्त्यः अमृताः
अविनाशा ऋतज्ञाः । ऋतं सत्यं जगत्कारणं ब्रह्म । ब्रह्म जानानाः ।
स्मर्यते हि ।

अप एव ससर्जादौ तासु वीर्यम् अवाकिरत् ।
तद् अण्डम् अभवद्धैमम्

इति [म° स्मृ° १.९]। ॒दधाना इति । "अभ्यस्तानाम् आदिः" इति
आद्युदात्तत्वम् । ऋतज्ञा इति । ज्ञा अवबोधने । "आतोनुपसर्गे कः"
इति कः॒ । यासु अप्सु देवेषु[2] लिङ्गव्यत्ययः । देवीषु देवतारूपासु
देवः गर्भभूतः अध्यासीत् । अधिकम् अवर्धतेत्यर्थः । ता आप इति
संबन्धः । तस्मै अपां गर्भभूताय । कस्मा इत्यादि ॥

१ Such is the accent read by all our MSS. and Vaidikas.

1 S′Kd रस इति. 2 Sâyaṇa's text also has देवेषु.

सप्तमी ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीमुत द्यां कस्मै देवाय हविषा विधेम ॥ ७ ॥

हिरण्यऽगर्भः । सम् । अवर्तत । अग्रे । भूतस्य । जातः । पतिः । एकः । आसीत् ।
सः । दाधार । पृथिवीम् । उत । द्याम् । कस्मै । देवाय । हविषा ।
विधेम ॥ ७ ॥

[हिरण्यगर्भः] हिरण्यस्य हिरण्मयस्याण्डस्य गर्भः गर्भवद् अन्तरवस्थितः अग्रे सर्वजगत्सृष्टेः प्राक् समवर्तत उदपद्यत । स च जातः सन् भूतस्य सत्तया प्रतिभासमानस्य प्रपञ्चस्य एकः असाधारणः पतिः ईश्वर आसीत् । स्मर्यते हि ।

स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिगर्भः स भूतानां ब्रह्माग्रे समवर्तत

इति । स च पृथिवीम् इमां भूमिम् । उतशब्दः समुच्चये । द्याम् दिवं च दाधार धृतवान् । पृथिव्याद्युपलक्षितं कृत्स्नं जगत् सृष्टवान् इत्यर्थः ॥ गतम् अन्यत् ॥

अष्टमी ॥

आपो वत्सं जनयन्तीर्गर्भमग्रे समैरयन् ।
तस्योत जायमानस्योल्ब आसीद्धिरण्ययः कस्मै देवाय हविषा विधेम ॥८॥

आपः । वत्सम् । जनयन्तीः । गर्भम् । अग्रे । सम् । ऐरयन् ।
तस्य । उत । जायमानस्य । उल्बः । आसीत् । हिरण्ययः । कस्मै । देवाय ।
हविषा । विधेम ॥ ८ ॥

ईश्वरेण प्रथमसृष्टा आपः वत्सम् पुत्रभूतं हिरण्यगर्भं जनयन्तीः । ✕ हेतौ शतृप्रत्ययः ✕ । उत्पादनाङ्हेतोः अग्रे ततः प्राक्काले गर्भं समैर-

---

१ $\overset{m}{S}$ °स्योल्वा. २ P वत्सम्. We with $\overset{2}{P}$ J K.

यन् । ईश्वरेण विसृष्टं वीर्यं गर्भाशयं प्रापयन् । तस्य गर्भीभूतस्य हि जायमानस्य हिरण्यगर्भाख्यस्य प्रजापतेः । उतशब्दः अप्यर्थे । स च भिन्नक्रमः । उल्बोपि । गर्भवेष्टनः पट उल्वशब्दवाच्यः । सोपि हिरण्ययः हिरण्मयः सुवर्णमय एवासीत् । "तद् अण्डम् अभवद्वैमम्" इति प्रागुक्तहिरण्मयाण्डाभिप्रायम् एतत् । ⌛"ऋत्व्यवास्त्व्य०" इत्यादिना हिरण्यशब्दो निपातितः⌛ ॥ कस्मा इत्यादि व्याख्यातम् ॥

[इति] चतुर्थकाण्डे प्रथमेनुवाके द्वितीयं सूक्तम् ॥

"उदितस्त्रयो अक्रमन्" इति सूक्तेन गवादीनां व्याघ्रचोरादिभयनिवृत्त्यर्थं खादिरं शङ्कुं संपात्य अभिमन्त्र्य तेन गोसंचारभूमिं लिखन् गा अनुव्रजेत् ॥

तथा अनेन उदघटम्[1] अभिमन्त्र्य गोप्रचारदेशे निनयेत् । ततः पांसुकूटं तत्र कृत्वा अर्धं दक्षिणहस्तेन विक्षिपेत् ॥

एवमेव अनेन सूक्तेन सारूपवत्सम् ओदनम् इन्द्राय त्रिर्जुहुयात् ॥

सूत्रितं हि । "उदित इति खादिरं शङ्कुं संपातवन्तम् उज्झन् लिखँन् गा अनुव्रजति" इत्यादि [कौ० ७. २] ॥

तत्र प्रथमा ॥

उदितस्त्रयो॑ अक्रमन् व्या॒घ्रः पुरु॑षो॒ वृक॑ः ।
हिरु॒ग्घि यन्ति॒ सिन्ध॑वो॒ हिरु॑ग् दे॒वो वन॒स्पति॒र्हिरु॑ङ्नमन्तु शत्र॑वः ॥ १ ॥

उत् । इ॒तः । त्रय॑ः । अ॒क्र॒म॒न् । व्या॒घ्रः । पुरु॑षः । वृक॑ः ।
हिरु॑क् । हि । यन्ति॑ । सिन्ध॑वः । हिरु॑क् । दे॒वः । वन॒स्पतिः॑ । हिरु॑क् । न॒-
म॒न्तु॒ । शत्र॑वः ॥ १ ॥

व्याजिघ्रति विशिष्टाघ्राणमात्रेण प्राणिनो हन्तीति व्याघ्रः । ⌛घ्रा गन्धोपादाने इत्यस्मात् "आतश्चोपसर्गे" इति कप्रत्ययः⌛ । तथा पुरुषः चोरः । "परमेणोत तस्करः" इति उत्तरत्र तस्यैवानुकीर्तनात् । वृकः अरण्यश्वा प्राणिनां घातकः एते त्रयः इतः अस्मात् स्थानात् उद-

1 S′ Kd °टमभिमभिमं°. 2 So S′ Kd. *Kaus'ika* : निखनन्. Kes'ava : निखनन् उत्पाटयन्.

क्रमन् उदक्रामन् उक्रान्ता उत्थिता अभवन् । यद्वा इतः अस्मात् स्थानात् उदक्रमन् उत्थाय पलायन्ताम् । "क्रमः परस्मैपदेषु" इति दीर्घाभावश्छान्दसः । ते यथा हिरुक् । अन्तर्हितनामैतत् । अन्तर्हिता भवन्ति तथा सिन्धवः स्यन्दनशीला नद्यः यन्ति गच्छन्ति । हिशब्दः प्रसिद्धौ । यद्वा यथा हि सिन्धवो हिरुक् अन्तर्हिता गूढाशया यन्ति प्रवहन्ति तथा व्याघ्रादयो अन्तर्हिताः । दृग्गोचरा न भवन्तु इत्यर्थः ॥ तथा वनस्पतिः वनानां पतिः अधिष्ठाता देवः तत्र अन्तर्हितो वर्तते तद्वद् व्याघ्रादयोपि हिरुक् अन्तर्हिता भवन्तु । वनस्पतिरिति । पारस्करादित्वात् सुट् । "उभे वनस्पत्यादिषु०" इति उभयपदप्रकृतिस्वरत्वम् । अपि च व्याघ्रादीनां ये शत्रवः विरोधिनः सन्ति ते तान् व्याघ्रादीन् हिरुक् नमन्तु अन्तर्हितान् कुर्वन्तु । यद्वा शातनशीलास्ते व्याघ्रादयः अन्तर्हिताः सन्तः प्रह्वा भवन्तु ॥

द्वितीया ॥

परेणैतु पथा वृकः परमेणोत तस्करः ।
परेण दत्वती रज्जुः परेणाघायुरर्षतु ॥ २ ॥
परेण । एतु । पथा । वृकः । परमेण । उत । तस्करः ।
परेण । दत्वती । रज्जुः । परेण । अघऽयुः । अर्षतु ॥ २ ॥

परेण अस्मत्संचारमार्गाद् अन्येन पथा वृकः अरण्यश्वा एतु गच्छतु । उतशब्दः अप्यर्थे । तस्करः चोरोपि परमेण ततोपि दूरतरेण मार्गेण गच्छतु । "दिवाविभा०" इत्यादिना तच्छब्दोपपदे करोतेष्टः । "तद्दृहतोः करपत्योः०" इति चोरेभिधेये सुट् तलोपः । दत्वती दन्तवती रज्जुः रज्ज्वाकृतिः सर्पः परेण अन्येन मार्गेण गच्छतु । दन्ता अस्याः सन्तीति मतुपि "पद्दन्०" इत्यादिना दन्तशब्दस्य दद्भावः । तथा अघम् पापं हिंसनं परेषाम् इच्छतीति अघायुः । "छन्दसि परेच्छायामपि" इति क्यच् । "अश्वाघस्यात्" इति आत्वम् ।

---

१ B h S m °र्ष्यतु. We with A D K K m R P P 2 J V.

---

1 S′ Kd करोतेरच्.

"क्याच्छन्दसि" इति उप्रत्ययः ॥ । य एवंविधः अन्योपि हिंस्रः प्राणी अस्मत्संचरणप्रदेशे विद्यते सोपि परेण अन्येन पथा अर्षतु गच्छतु । ॥ ऋषी गतौ इति धातुः ॥ ॥

तृतीया ॥

अक्ष्यौ॑ च ते॒ मुखं॑ च ते॒ व्याघ्र जम्भयामसि ।
आत् सर्वा॑न् विंश॒तिं न॒खान् ॥ ३ ॥
अक्ष्यौ॑ । च॒ । ते॒ । मुख॑म् । च॒ । ते॒ । व्याघ्र॒ । जम्भ॒या॒म॒सि॒ ।
आत् । सर्वा॑न् । विं॒श॒तिम् । न॒खान् ॥ ३ ॥

हे व्याघ्र ते तव अक्षौ अक्षिणी च मुखं च आस्यं च जम्भयामसि जम्भयामः । ॥ जभि नाशने । "इदन्तो मसिः" ॥ ॥ [आत्] अनन्तरं विंशतिम् विंशतिसंख्याकान् पादचतुष्टये पञ्चशोवस्थितान् सर्वान् नखान् विनाशयामः । ॥ "पङ्क्तिविंशति°" इत्यादिना निपातितो विंशतिशब्दः । संख्येयानां बहुत्वेपि विंशतिसंख्याया एकत्वात् तदभिप्रायेण एकवचनम् ॥ ॥

चतुर्थी ॥

व्याघ्रं द॒त्वतां॑ व॒यं प्र॑थ॒मं ज॑म्भयामसि ।
आदु॑ ष्टे॒नमथो॒ अहिं॑ यातुधा॒नमथो॒ वृक॑म् ॥ ४ ॥
व्याघ्र॑म् । द॒त्वता॑म् । व॒यम् । प्र॒थ॒मम् । ज॒म्भ॒या॒म॒सि॒ ।
आत् । उ॒ इति॑ । स्ते॒नम् । अथो॒ इति॑ । अहि॑म् । यातु॑ऽधानम् ।
अथो॒ इति॑ । वृक॑म् ॥ ४ ॥

दत्वताम् दन्तवतां खादनशीलानां हिंस्राणां मध्ये व्याघ्रम् शार्दूलं प्रथमं वयं जम्भयामसि जम्भयामः नाशयामः । आदु अनन्तरमेव स्तेनम् तस्करं जम्भयामः ॥ अथो अनन्तरमेव अहिम् सर्पं यातुधानम् यक्षरक्षःप्रभृतिग्रहं वृकम् सालावृकं च नाशयामः ॥

---

१ **A K K**^{m} **R P P**^{2} अक्ष्यौ; **S**^{m} अक्ष्यौ. We with **B B**^{P} **B**^{h} **D**. २ Such is the accent of all our MSS. and Vaidikas. See **R**w. ३ **D P** विंशतिं. We with **A B B**^{P} **B**^{h} **K K**^{m} **R S**^{m} **P**^{2} **J V**.

पञ्चमी ॥

यो अद्य स्तेन आयति स संपिष्टो अपायति ।
पथामपध्वंसेनैत्विन्द्रो वज्रेण हन्तु तम् ॥ ५ ॥

यः । अद्य । स्तेनः । आऽअयति । सः । सम्ऽपिष्टः । अप । अयति ।
पथाम् । अपऽध्वंसेन । एतु । इन्द्रः । वज्रेण । हन्तु । तम् ॥ ५ ॥

अद्य इदानीं यः स्तेनः चोरः आयति आगच्छति । अय पय गतौ । स चोरः संपिष्टः अस्माभिश्चूर्णीकृतः सन् अपायति अपगच्छति । अपक्रामतु इत्यर्थः । स च पथाम् मार्गाणां मध्ये ध्वंसेन ध्वंसकेन कष्टेन मार्गेण अप एतु अपगच्छतु । तादृशेन मार्गेण अपगच्छन्तं तम् इन्द्रो देवः वज्रेण स्वकीयेन आयुधेन हन्तु हिनस्तु ॥

षष्ठी ॥

मूर्णा मृगस्य दन्ता अपिशीर्णा उ पृष्टयः ।
निम्रुक् ते गोधा भवतु नीचायच्छशयुर्मृगः ॥ ६ ॥

मूर्णाः । मृगस्य । दन्ताः । अपिऽशीर्णाः । ऊं इति । पृष्टयः ।
निऽम्रुक् । ते । गोधा । भवतु । नीचा । अयत् । शशयुः । मृगः ॥ ६ ॥

मृगस्य हिंस्रस्य व्याघ्रादेः दन्ताः मूर्णाः मूढाः खादनसमर्था न भवन्तु । मुर्छा मोहसमुच्छ्राययोः इत्यस्माद् निष्ठा । "राल्लोपः" इति छकारलोपः । "रदाभ्याम्०" इति निष्ठानत्वम् । "न ध्याख्यापृमूर्छिमदाम्" इति निषेधस्तु छान्दसत्वाद् न प्रवर्तते । शीर्णाः शिरसि भवा हिंसकाः शृङ्गादयः अवयवा अपि मूढा भवन्तु । उशब्दः समुच्चये । पृष्टयः पर्शवः । पार्श्वास्थीन्यपि मूढानि भवन्तु ॥ हे पान्थ ते तव गोधा एतत्संज्ञः प्राणी निम्रुक् भवतु दृष्टिविषयो न भवतु । °म्रुचु म्लुचु गत्यर्थाः इत्यस्मात् निपूर्वात् दर्शनवाचिनः क्विप् । श-

१ P °ध्वंसेन. We with P² J K. २ S^m अपंशीर्णा. We with A B B^h D K K^m R P P² J V.
३ P प्रष्टु°. We with P² J K.

1 S' Kd मूर्छा. 2 S' Kd निम्रुक्. 3 S' Kd म्रुचु.

शयुः । शयनशीलो दुष्टो मृगः । नीचा न्यग्भूतेन मार्गेण अयत् अयतु गच्छतु । ⁂ अयतेर्लेटि अडागमः । शशयुरिति । शीङ् स्वप्ने इत्यस्मात् °मृशी° [उ°१.७] इत्यादिना उप्रत्ययः । बाहुलकाद् द्विर्वचनम् ⁂ ॥

सप्तमी ॥

यत् संयमो न वि यमो वि यमो यन्न संयमः ।
इन्द्रजाः सोमजा आथर्वणमसि व्याघ्रजम्भनम् ॥ ७ ॥

यत् । समऽयमः । न । वि । यमः । वि । यमः । यत् । न । समऽयमः ।
इन्द्रऽजाः । सोमऽजाः । आथर्वणम् । असि । व्याघ्रऽजम्भनम् ॥ ७ ॥

इन्द्रजाः इन्द्राज्जातः [सोमजाः] सोमाज्जातः । ⁂ उभयत्र "जनसनखनक्रमगमो विट्" । "विड्वनोरनुनासिकस्यात्" इति आत्वम् ⁂ । एवंविधः संयमः संयमनं सम्यग् व्याघ्रादीनां मन्त्रसामर्थ्येन नियमनं यत् अस्ति नासौ वियमः विरुद्धयमनं भवति । कृतस्य संयमस्य अन्यथाभावो नास्तीत्यर्थः । तथा वियमः वियमनं विरुद्धप्रापणं यत् मन्त्रेण क्रियते नायं संयमः । तत् तथैव भवतीत्यर्थः[2] । आथर्वणस्य क्रियाकलापस्य न कुत्रापि अन्यथाभावोस्तीत्यर्थः ॥ अनेन सूक्तेन क्रियमाणं खादिरशङ्कालेखनादिकं क्रियाकलापं संबोध्य ब्रूते । हे क्रियाकलाप त्वम् आथर्वणम् अथर्वणा महर्षिणा दृष्टं कृतं वा व्याघ्रजम्भनम् । उपलक्षणम् एतत् । व्याघ्रादिदुष्टप्राणिहिंसकम् असि भवसि । ⁂ अथर्वन्शब्दाद् अणि "अन्" इति प्रकृतिभावः ⁂ ॥

[इति] चतुर्थकाण्डे प्रथमेनुवाके तृतीयं सूक्तम् ॥

"यां त्वा गन्धर्वः" इति सूक्तेन पुरुषस्य वीर्यकरणकर्मणि कपित्थकमूलम् ओषधिवत् खात्वा दुग्धे श्रपयित्वा अभिमन्त्र्य अधिज्यं धनुः उत्सङ्गे कृत्वा वीर्यकामः पुरुषः पिबेत् ॥
एवमेव कीलके मुसले वा उपविश्य पूर्ववद् अभिमन्त्र्य पिबेत् ॥

---

१ A B B^{p} $\overset{h}{B}$ D K $\overset{m}{K}$ R $\overset{m}{S}$ P $\overset{2}{P}$ J V all have the reading as given above.

---

1 S′ Kd शशन°. 2 S′ Kd क्रियते तत्तथैव भवति नायं संयम इत्यर्थः.

सूत्रितं हि। "यां त्वा गन्धर्वो अखनद् वृषणस्ते खनितारः" इति प्रक्रम्य "दुग्धंफाण्टावधिज्यम् उपस्थ आधाय पिबति मयूखे मुसले वासीनः" इति [कौ० ५. ४] ॥

तत्र प्रथमा ॥

यां त्वा गन्धर्वो अखनद् वरुणाय मृतभ्रजे।
तां त्वा वयं खनामस्योषधिं शेपहर्षणीम् ॥ १ ॥
याम्। त्वा। गन्धर्वः। अखनत्। वरुणाय। मृतऽभ्रजे।
ताम्। त्वा। वयम्। खनामसि। ओषधिम्। शेपःऽहर्षणीम् ॥ १ ॥

मृतभ्रजे नष्टवीर्याय वरुणाय पुनस्तस्य वीर्यं जनयितुं हे ओषधे यां त्वा त्वां गन्धर्वो अखनत् खननेन उद्धृतवान् [ताम्] तादृशीं त्वा त्वां शेपोहर्षणीम् शेपसः पुंस्प्रजननस्य वर्धनीं वीर्यप्रदानेन उन्नमयित्रीम् ओषधिम् कपित्थकाख्यां वयं खनामसि खनामः। ✕ शेपोहर्षणीम् इति। वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुक् च [उ० ४. २००] इति स्वाङ्गे अभिधेये शीङः असुन् पुगागमश्च। हृष्यतेः करणे ल्युट्। टित्त्वाद् ङीप् ✕ ॥

द्वितीया ॥

उदुषा उदु सूर्य उदिदं मामकं वचः।
उदेजतु प्रजापतिर्वृषा शुष्मेण वाजिना ॥ २ ॥
उत्। उषाः। उत्। ऊं इति। सूर्यः। उत्। इदम्। मामकम्। वचः।
उत्। एजतु। प्रजाऽपतिः। वृषा। शुष्मेण। वाजिना ॥ २ ॥

उषाः सूर्यस्य पत्नी देवी वाजिना बलवता शुष्मेण वीर्येण उदेजतु

---

१ So all our MSS. and Vaidikas. See also *Chaturâdhyâyî*. IV. 56. २ So **P P**^{2} **J**. Kes'ava Bhaṭṭa says that in some MSS. of the padas in Mâhulî, his town, a note is thus made here: **शेपोहर्षणीमिति शेपःऽहर्षणीम्**, from which it would, perhaps, appear that we ought to read **शेपोहर्षः°** for **शेपहर्षः°** in the Saṁhitâ. But see the previous note. Sâyaṇa's text is: **शेपोहर्षः°**.

1 The full text of this sautra mantra is: **वृषणस्ते खनितारो वृषा त्वमस्योषधे। वृषासि वृष्ण्यावति वृषणे त्वा खनामसि ॥**. 2 So Sâyaṇa with the *Kes'avî*. *Kaus'ika* and Dârila slightly differ. 3 So **S' K**d.

उद्वृत्तं करोतु । उशब्दः चार्थे । सूर्यश्च उदेजतु उत्कृष्टवीर्ययुक्तं करोतु । मामकम् मदीयम् इदम् मन्त्रात्मकं वचः उदेजतु ॥ तथा [वृषा वर्षकः] प्रजापतिः प्रजानां पतिः सर्वजगत्स्रष्टा देवः उक्तलक्षणेन वीर्येण उदेजतु लम्बमानं पुंस्प्रजननम् उत्कम्पयतु । एजृ कम्पने इति धातुः । प्रजापतिरिति । प्रजायन्ते इति प्रजाः । "उपसर्गे च संज्ञायाम्" इति डप्रत्ययः । षष्ठीसमासे "पत्यावैश्वर्ये" इति पूर्वपदप्रकृतिस्वरत्वम् ॥

तृतीया ॥

यथा॑ स्म ते वि॒रोह॑॑तो॒भित॑न्नमि॒वान॑ति ।
तत॑स्ते॒ शुष्म॑वत्तरमि॒यं कृ॑णो॒त्वोष॑धिः ॥ ३ ॥

यथा॑ । स्म॒ । ते॒ । वि॒ऽरोह॑॑तः । अ॒भित॑न्नम॒ऽइव । अन॑ति ।
तत॑ः । ते॒ । शुष्म॑वत्ऽतरम् । इ॒यम् । कृ॒णो॒तु॒ । ओष॑धिः ॥ ३ ॥

हे वीर्यकाम पुरुष ते तव विरोहि॑॑तः पुत्रपौत्रादिरूपेण विरोहणस्य निमित्तं पुंव्यञ्जनम् अभितन्नं फ॑ण्यङ्गमिव यथा स्म येन प्रकारेण खलु अनति चेष्टते ततः तेनैव प्रकारेण इयम् ओषधिः ते तव पुंव्यञ्जनं शुष्मवत्तरम् अतिशयितवीर्ययुक्तं कृणोतु करोतु ॥

चतुर्थी ॥

उच्छु॑॑ष्मौषधी॒नां सार॑ ऋषभा॒णाम् ।
सं पुं॑॑सामि॑न्द्र॒ वृष्ण्य॑म॒स्मिन् धे॑हि तनू॒वशि॑॑न् ॥ ४ ॥

उत् । शुष्मा॑ । ओष॑धीनाम् । सारा॑ । ऋषभा॒णाम् ।
सम् । पुं॑सा॑म् । इ॒न्द्र॒ । वृष्ण्य॑म् । अ॒स्मिन् । धे॒हि॒ । त॒नू॒ऽव॒शि॒न्॑ ॥ ४ ॥

---

१ J K V °रोहि॑°. Bp °रोहि॑° as a variant. We with A Bp S[m] D K[m] V P J. R °रोह॑°. changed to °रोहि॑°, which is again restored to °रोह॑°. २ K K[m] B[h] V उच्छु°. We with A Bp D R S[m] P P[2] J. ३ K S पूषा°. R पुंषा°. We with A B Bp B[h] D K[m] S[m] P P[2] J V. Here Sâyaṇa's reading is decidedly inferior to that of the MSS. ४ K °वशम् (without change of accent!). We with A B Bp B[h] D K[m] R S[m] V and P P[2] J. ५ K शुष्मा. We with P P[2] J. ६ See note ४.

---

1 So S′ Kd.

ओषधीनाम् अन्यासां वीर्ययुक्तानां वीरुधाम् इयम् ओषधिः शुष्मा वीर्यरूपा ऋषभाणाम् सेचनसमर्थानां वीर्यवतां सारा सारभूता। तादृशी ओषधिः इमं पुरुषम् उत् ईरयतु वीर्ययुक्तं करोतु। ॥ सार ऋषभाणाम् इति। "ऋत्यकः" इति प्रकृतिभावः ॥ हे इन्द्र संपूषाम् सम्यक् पोषयित्रीणाम् ओषधीनां संबन्धि यद् वृष्ण्यम् वीर्यम् अस्ति तद् अस्मिन् पुरुषे तनूवशम् शरीराधीनं कृत्वा धेहि धारय। ॥ संपूषाम् इति। पूष पुष्टौ इत्यस्मात् "क्विप् च" इति क्विप्। धेहीति। "ध्वसोरेद्धौ०" इति एत्वाभ्यासलोपौ ॥

पञ्चमी ॥

अपां रसः प्रथमजो॒ वनस्पतीनाम्।
उत सोमस्य भ्रातास्युतार्शमसि वृष्ण्यम् ॥ ५ ॥

अपाम्। रसः। प्रथमऽजः। अथो इति। वनस्पतीनाम्।
उत। सोमस्य। भ्राता। असि। उत। आर्शम्। असि। वृष्ण्यम् ॥ ५ ॥

हे कपित्थकमूल त्वम् अपाम् मथ्यमानानां प्रथमजः प्रथमम् उत्पन्नो रसः अमृतात्मकस्त्वम् असि। अथो अपि च वनस्पतीनाम् समानजातीयानां वृक्षाणा सारभूतोसि ॥ [उत अपि च] सोमस्य ओषधीनाम् अधिपतेः अमृतमयस्य देवस्य भ्राता सहजोसि। अमृतमथनकाले सहोत्पन्नत्वात् ॥ उत अपि च [आर्षम्] ऋषीणाम् अङ्गिरःप्रभृतीनां संबन्धि वृष्ण्यम् मन्त्रप्रभावजनितं वीर्यम् असि ॥

षष्ठी ॥

अद्याग्ने अद्य सवितरद्य देवि सरस्वति।
अद्यास्य ब्रह्मणस्पते धनुरिवा तानया पसः ॥ ६ ॥

अद्य। अग्ने। अद्य। सवितः। अद्य। देवि। सरस्वति।
अद्य। अस्य। ब्रह्मणः। पते। धनुःऽइव। आ। तानय। पसः ॥ ६ ॥

हे अग्ने अद्य इदानीम् अस्य वीर्यकामस्य पसः पुंव्यञ्जनं वीर्यप्रदा-

१ So all our MSS. and Vaidikas.

नेन धनुरिव आ तानय आततम् ऊर्ध्वायतं कुरु । अद्य सवितरित्यादिकम् एवं योज्यम् ॥ सविता सर्वस्य प्रेरको देवः ॥ देवी देवतारूपा सरस्वती । अनेन विशेषणेन नदीरूपाया व्यावृत्तिः । ब्रह्मणस्पतिर्मन्त्रस्याधिपतिर्देवः ॥ आ तानयेति । तनु विस्तारे इत्यस्मात् ण्यन्तात् लोट् । पसःशब्दस्य लिङ्गवाचित्वम् "आहतं गभे पसो निजल्गुलीति धाणिका" [तै० सं० ७.४.१९.३] इत्यादिमन्त्रान्तरप्रसिद्धम् ॥

सप्तमी ॥

आहं तनोमि ते पसो अधिज्यामिव धन्वनि ।
क्रमस्वर्शे इव रोहितमनवग्लायता सदा ॥ ७ ॥

आ । अहम् । तनोमि । ते । पसः । अधि । ज्याम्ऽइव । धन्वनि ।
क्रमस्व । ऋर्शःऽइव । रोहितम् । अनवऽग्लायता । सदा ॥ ७ ॥

हे वीर्यकाम ते त्वदीयं पसः पुंव्यञ्जनम् अहम् आ तनोमि मन्त्रप्रभावेन आततं वीर्ययुक्तं करोमि । तत्र दृष्टान्तः । धन्वनि धनुषि अध्यारोपितां ज्यामिव मौर्वीमिव ॥ तस्मात् त्वम् ऋषभ इव सेचनसमर्थो वृषभ इव रोहितम् अनु पुंव्यञ्जनम् अनु वल्गूयता नृत्यता मनसा सदा सर्वदा क्रमस्व भार्याम् आक्रमस्व ॥ "वृत्तिसर्गतायनेषु क्रमः" इति आत्मनेपदम् । वल्गूयतिः कण्ड्वादिः । ततो यगन्तात् लटः शत्रादेशः ॥

अष्टमी ॥

अश्वस्याश्वतरस्याजस्य पेत्वस्य च ।
अर्थ ऋषभस्य ये वाजास्तानस्मिन् धेहि तनूवशिन् ॥ ८ ॥

अश्वस्य । अश्वतरस्य । अजस्य । पेत्वस्य । च ।
अर्थ । ऋषभस्य । ये । वाजाः । तान् । अस्मिन् । धेहि । तनूऽवशिन् ॥ ८ ॥

---

१ So (*i.e.* क्रमस्वर्शे इव रोहितमनवग्लायता) we read with **A B B**^{p} **B**^{h} **D K**^{m} **V**. **V** follows Sâyaṇa, whose text is: क्रमस्व ऋष इव रोहितमनु वल्गूयता. २ So (अर्थ ऋ°) we read with **B B**^{p} **B**^{h} **D K R S**^{m} **V R V J**. **A** reads: अर्थर्ष°.

---

1 **S′ Kd** धाणुका.

अश्वः प्रसिद्धः । अश्वतरस्तु अश्वगर्दभयोः सांकर्येण उत्पन्नो जातिविशेषः । अजः छागः । पेत्वो मेषः । ऋषभः गोजातिः सेक्ता पुमान् । अथशब्दः चार्थे । एतेषाम् अश्वादीनां ये वाजाः यानि वीर्याणि सन्ति तान् वाजान् हे ओषधे तनूवशम्* तन्वाः शरीरस्य वशो यथा भवति तथा अस्मिन् वीर्यकामे पुंव्यञ्जने वा धेहि स्थापय ॥

[इति] चतुर्थे काण्डे प्रथमेनुवाके चतुर्थं सूक्तम् ॥

"सहस्रशृङ्गः" इति सूक्तेन स्व्यभिगमने तस्यास्तत्परिसरवर्तिनां च स्वापनार्थम् उदपात्रं संपात्य अभिमन्त्र्य तेन शयनशालां प्रोक्ष्य शेषम् अभ्यन्तर[1]द्वारे निनयेत् ॥

तथा नग्नः सन् अनेनैव उलूखलम् अभिमन्त्रयेत ॥

तथा गृहस्योत्तरां स्रक्तिं स्त्री[2]खट्वाया दक्षिणं पादं रज्जुं वा अभिमन्त्रयेत ॥

सूत्रितं हि । "सहस्रशृङ्ग इति स्वापनम् उदपात्रेण संपातवता शालां संप्रोक्ष्यापरस्मिन् द्वारपक्षे न्युञ्जति । एवं नग्न उलूखलम् उत्तरां "स्रक्तिं दक्षिणं शयनपादं तन्[3]तून् अभिमन्त्रयते" इति [कौ० ४. १२] ॥

तत्र प्रथमा ॥

सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत् ।
तेना सहस्रेणा वयं नि जनान्स्वापयामसि ॥ १ ॥

सहस्रऽशृङ्गः । वृषभः । यः । समुद्रात् । उत्ऽआचरत् ।
तेन । सहस्रेण । वयम् । नि । जनान् । स्वापयामसि ॥ १ ॥

सहस्रशृङ्गः सहस्ररश्मिः सूर्यः वृषभः वर्षिता कामानां वृष्टिजलस्य वा । स्मर्यते हि ।

आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः

इति [म० स्मृ० ३. ७६] । एवंभूतो य आदित्यः समुद्रात् अम्बुधेः । यद्वा समुद्रम् इति अन्तरिक्षनाम । अन्तरिक्षप्रदेशाद् उदयाचलपरिसर-

1 S' Kd अभ्यंतरे. We with the *Kes'avâ*. 2 S' Kd स्त्रीणां for स्त्रक्ति. We with *Kaus'ika*. 3 S' Kd तनून्.

वर्तिनः उदाचरत् उदगात् तेन उदितेन सहस्येन । सहः शत्रूणाम् अभिभवनम् । तत्र साधुः सहस्यः । तादृशेन आदित्येन [वयं] जनान् अवस्थितान् नि ष्वापयामसि निष्वापयामः । स्वापेन परवशान् कुर्मः ॥

द्वितीया ॥

न भूमिं वातो अतिं वाति नातिं पश्यति कश्चन ।
स्त्रियश्च सर्वाः स्वापयं[*1] शुनश्चेन्द्रसखा चरन् ॥ २ ॥

न । भूमिम् । वातः । अतिं । वाति । न । अतिं । पश्यति । कः । चन ।
स्त्रियः । च । सर्वाः । स्वापयं[*1] । शुनः । च । इन्द्रऽसखा । चरन् ॥ २ ॥

वातः वायुः भूमिं नाति वाति नातिमात्रं गच्छतु । अतिवातेन स्वापभङ्गो मा भूद् इत्यर्थः ॥ तथा कश्चन यः कोपि तत्रस्थो जनः नाति पश्यति अतिशयेन न पश्यतु । स्वापपरवशो भवतु इत्यर्थः ॥ अपि च हे वात त्वम् इन्द्रसखा । इन्द्रः आत्मा । स सखा यस्य प्राणवायोः तदात्मकः चरन् देहे वर्तमानः तत्र परितोवस्थिताः सर्वाः स्त्रियश्च शुनश्च स्वापय । श्वन्शब्दात् शसि "श्वयुवमघोनाम् अतद्धिते" इति संप्रसारणम् ॥

तृतीया ॥

प्रोष्ठेशयास्तल्पेशया नारीर्या वह्यशीवरीः ।
स्त्रियो याः पुण्यगन्धयस्ताः सर्वाः स्वापयामसि ॥ ३ ॥

प्रोष्ठेऽशयाः । तल्पेऽशयाः । नारीः । याः । वह्यऽशीवरीः ।
स्त्रियः । याः । पुण्यऽगन्धयः । ताः । सर्वाः । स्वापयामसि ॥ ३ ॥

प्रोष्ठेशयाः प्राङ्गणे[1] शयानाः तल्पेशयाः खट्वायां[2] शयानाः । उभयत्रापि "अधिकरणे शेतेः" इति अच् प्रत्ययः । "शयवासवासिष्वकालात्" इति सप्तम्या अलुक् । या एवंभूता नारीः नार्यः सन्ति

---

१ A D K $\overset{m}{K}$ R $\overset{m}{S}$ स्वापय॒ः. P $\overset{2}{P}$ J. स्वापयं॑ः. We with Sâyaṇa.

1 S′ Kd कणे° for प्राङ्गणे°. We with Sâyaṇa on *Ṛigveda* VII. 55. 8. 2 S′ Kd खट्वांशयानाः.

याश्च वह्यशीवरीः । वहत्यनेनेति वहनसाधनम् आन्दोलिकादि वह्यम् । तत्र शयनस्वभावा याः स्त्रियः सन्ति । [वह्यम् इति] "वह्यं करणम्" इति यत्प्रत्ययान्तो निपात्यते । तस्मिन्नुपपदे शेतेः "अन्येभ्योपि दृश्यन्ते" इति क्वनिप् । "वनो र च" इति ङीब्रेफौ । जसि "वा छन्दसि" इति पूर्वसवर्णदीर्घः । याश्च अन्याः स्त्रियः पुण्यगन्धयः शोभनगन्धयुक्ताः सन्ति । पुण्यस्य गन्ध इव गन्धो यासु इति विगृह्य "उपमानाच्च" इति गन्धस्य इत् अन्तादेशः । ता अनुक्रान्ताः सर्वाः स्त्रियः स्वापयामसि स्वापयामः ॥

चतुर्थी ॥

एजदेजदजग्रभं चक्षुः प्राणमजग्रभम् ।
अङ्गान्यजग्रभं सर्वा रात्रीणामतिशर्वरे ॥ ४ ॥

एजत्ऽएजत् । अजग्रभम् । चक्षुः । प्राणम् । अजग्रभम् ।
अङ्गानि । अजग्रभम् । सर्वा । रात्रीणाम् । अतिऽशर्वरे ॥ ४ ॥

एजदेजत् यद्यद् एजतिमद् अस्ति प्राणिजातं तत् सर्वम् अजग्रभम् स्वापेन गृहीतम् अकार्षम् । एजृ कम्पने इत्यस्मात् लटः शत्रादेशः । ग्रह उपादाने इत्यस्मात् ण्यन्तात् लुङि चङि अजग्रभम् इति रूपम् । "हग्रहोर्भः०" इति भत्वम् ॥ तथा चक्षुः प्राणम् तदीयं दर्शनसाधनम् इन्द्रियं प्राणसंचारस्थानाश्रितं गन्धग्राहकम् इन्द्रियं च अजग्रभम् स्वापेन गृहीतम् अकृषि ॥ तथा तदीयानि सर्वा सर्वाणि अङ्गानि हस्तपादादीनि अजग्रभम् अजग्रहम् ॥ एतत् सर्वं कस्मिन् काले कृतम् इति तद् आह । रात्रीणाम् इति । रात्रीणां संबन्धिनि अतिशर्वरे अतिशयिता शर्वरी यस्मिन् काले स कालः अतिशर्वरः । तमोभूयिष्ठे मध्यरात्रकाल इत्यर्थः ॥

पञ्चमी ॥

य आस्ते यश्चरति यश्च तिष्ठन् विपश्यति ।
तेषां सं दध्मो अक्षीणि यथेदं हर्म्यं तथा ॥ ५ ॥

यः । आस्ते । यः । चरति । यः । च । तिष्ठन् । विऽपश्यति ।
तेषाम् । सम् । दध्मः । अक्षीणि । यथा । इदम् । हर्म्यम् । तथा ॥ ५ ॥

असदभिसरणसमये यो जनः तत्र आस्ते यश्च [चरति] संचरति यश्च तत्र तिष्ठन् स्थितः सन् विपश्यति विविधम् इतस्ततः पश्यति । तेषां सर्वेषाम् अक्षीणि चक्षूंषि सं दध्मः । संहितानि निमीलितानि कुर्मः । तत्र दृष्टान्तः । इदम् दृश्यमानं हर्म्यं यथा दर्शनशक्तिशून्यं तथा । चक्षुष्मदपि प्राणिजातं मां द्रष्टुम् असमर्थं भवतु इत्यर्थः ॥

षष्ठी ॥

स्वप्नं माता स्वप्नं पिता स्वप्नु श्वा स्वप्नं विश्पतिः ।
स्वपन्त्वस्यै ज्ञातयः स्वत्वयमभितो जनः ॥ ६ ॥

स्वप्नं । माता । स्वप्नं । पिता । स्वप्नं । श्वा । स्वप्नं । विश्पतिः ।
स्वपन्तु । अस्यै । ज्ञातयः । स्वप्नं । अयम् । अभितः । जनः ॥ ६ ॥

यस्याः स्त्रियाः प्रस्वापनेन वशीकरणम् अत्र चिकीर्षितं तस्या माता प्रथमं स्वप्नु स्वपितु निद्रापरवशा भवतु । ञिष्वप् शये । अस्मात् लोटि अदादित्वात् शपो लुक् । "रुदादिभ्यः सार्वधातुके" इति इडभावश्छान्दसः ॥ तस्याः पिता च स्वप्नु निद्रातु ॥ यस्तस्य गृहस्य परिरक्षणाय श्वा द्वारि वर्तते सोपि स्वप्नु निद्रातु ॥ विश्पतिः गृहाधिपतिश्च स्वप्नु शेताम् ॥ अस्यै । षष्ठ्यर्थे चतुर्थी । अस्याः प्रेप्सितायाः स्त्रिया ये ज्ञातयः सन्ति तेपि स्वपन्तु । गृहाद् बहिः अभितः रक्षणार्थं नियुक्तः अयं जनश्च स्वप्नु निद्रागृहीतो भवतु । एवं मात्रादीनां स्वापनप्रार्थनेन स्वाभिलषितसिद्धिराशास्यते ॥

सप्तमी ॥

स्वप्नं स्वप्नाभिकरणेन सर्वं नि ष्वापया जनम् ।

---

१ A B Bp B D K K R S P P J V स्वा. We with Sâyaṇa. २ B D K S V स्वप्नः. We with A B K R P P J S. ३ So we with A B Bp B D K K R S P P J V.

---

1 S' Kd स्त्रियः for स्त्रियाः.

ओत्सूर्यमन्यान्त्स्वापयाव्युषं जागृतादहमिन्द्र इवारिष्टो अक्षितः॥७॥

स्वप्न। स्वप्नऽअभिकरणेन। सर्वम्। नि। स्वापय। जनम्।
आऽउत्सूर्यम्। अन्यान्। स्वापयं। आऽव्युषम्। जागृतात्। अहम्।
इन्द्रःऽइव। अरिष्टः। अक्षितः॥ ७॥

हे स्वप्न स्वप्नाभिमानिन् देव स्वप्नाधिकरणेन स्वप्नस्य यद् अधिकरणम् अधिष्ठानं शय्यादि तेन साधनेन सर्वं जनं नि ष्वापय नितरां स्वापय। अयमेवार्थः अवधिप्रदर्शनेन विव्रियते। मात्रादयो ये अन्ये अनुक्रान्ताः तान् अन्यान् ओत्सूर्यम् उद्यन् सूर्यो यस्मिन् काले स उत्सूर्यः कालः तावत्पर्यन्तं स्वापयेत्यर्थः॥ एवं सर्वजनस्य प्रस्वापने सति [अरिष्टः] अहिंसितः अक्षितः क्षयरहितश्च सन् अहम् इन्द्र इव भोगपरो भूत्वा आव्यूषम् उषःकालावधि जागृतात्। ✕पुरुषव्यत्ययः✕। जागरं करवाणि॥

[इति] चतुर्थे काण्डे प्रथमेनुवाके पञ्चमं सूक्तम्॥

[इति] चतुर्थे काण्डे प्रथमोनुवाकः॥

"ब्राह्मणो जज्ञे" "वारिदम्" इत्याभ्यां कन्दविषभैषज्यार्थम् उदकम् अभिमन्त्र्य विषावृतं पुरुषं पाययेत्। तथाविधोदकेन प्रोक्षेत्॥

तथा कृंसुकवृक्षशकलं सहोदकम् अभिमन्त्र्य पाययेत् प्रोक्षेच्च॥

तथा आभ्यां जीर्णहरिणचर्मावज्वालितं पतितमार्जनिकाशकलैर्वा अवज्वालितम् उदकम् आभ्याम् अभिमन्त्र्य तेनोदकेन विषावृतम् अवसिञ्चेत्॥

तथा आभ्यां सूक्ताभ्याम् उदपात्रं संपात्य अभिमन्त्र्य तेन स्रावयेत्॥

तथा विषलिप्ताभ्याम् ऊर्ध्वफलाभ्यां सक्तुमन्थं मथित्वा अभिमन्त्र्य पाययेत्॥

तथा मदनफलानि प्रत्यृचम् अभिमन्त्र्य यथा छर्दिर्भवति तथा प्रत्यृचं भक्षयेत्॥

---

१ See note ३ on the previous page.

---

1 S′ Kd जाग्र°. 2 S′ Kd क्रमुक°. 3 S′ Kd अजीर्ण°. We with *Kaus'ika*.

सर्पिषा सहितां हरिद्राम् अनेनैवाभिमन्त्र्य आविष्टविषं पाययेत् ॥

सूत्रितं हि । "ब्राह्मणो जज्ञ इति तक्षकायाञ्जलिं कृत्वा जपन्नाचामय-
"ति अभ्युक्षति । कृमुकशकलं संक्षुद्य दूर्शजरदजिनावकरज्वालेन संपातवद्
"उदपात्रम् ऊर्ध्वफलाभ्यां दिग्धाभ्यां मन्थम् उपमथ्य रयिधारणपिण्डान् अ-
"न्वृचं प्रकीर्य छर्दयते । हरिद्रां सर्पिषा पाययति" इति [कौ० ४. ४] ॥

अत्र "ब्राह्मणो जज्ञे" इति एकसूक्तप्रतीकोपादानेन विषापनोदनपरं "वारिदम्" इति समनन्तरं सूक्तमपि गृह्यते । "ग्रहणम् आ ग्रह-णात्" [कौ० १. ८.] इति परिभाषायाः सौत्रक्रम इव संहिताक्रमेपि प्रवृत्तिरस्तीति व्याख्यातृभिरभिहितत्वात् ॥

तत्र प्रथमा ॥

ब्राह्मणो जज्ञे प्रथमो दशशीर्षो दशास्यः ।
स सोमं प्रथमः पपौ स चकारारसं विषम् ॥ १ ॥

ब्राह्मणः । जज्ञे । प्रथमः । दशऽशीर्षः । दशऽआस्यः ।
सः । सोमम् । प्रथमः । पपौ । सः । चकार । अरसम् । विषम् ॥१॥

मनुष्यजातिवत् सर्पजातावपि चातुर्वर्ण्यम् अस्ति । तत्र प्रथमः सर्प-जातीयानाम् आदिभूतस्तक्षकाख्यो ब्राह्मणः ब्राह्मणजातिः जज्ञे उत्पन्नः । स विशेष्यते । दशशीर्षः दशसंख्यानि शीर्षाणि शिरांसि यस्य स तथो-क्तः । अत एव दशास्यः दशमुखः । यस्माद् अयं ब्राह्मणः तस्मात् स तक्षकः प्रथमः क्षत्रियादिजातीयेभ्यः पूर्वभावी सन् सोमं पपौ द्युलोक-स्थम् अमृतमयं सोमं पीतवान् । स च सोमपो ब्राह्मणः कन्दमूलादिज-नितम् एतद् विषम् अरसम् रसरहितं निर्वीर्यं चकार करोतु । ☒ छा-न्दसो लिट् । जज्ञे इति । जनी प्रादुर्भावे इत्यस्मात् लिट् । "गम-हन०" इति उपधालोपे "द्विर्वचनेचि" इति स्थानिवद्भावाद् द्विर्वच-नम् ☒ ॥

---

1 S′ Kd ऋमुक°. 2 S′ Kd संक्षिप्य. We with *Kaus'ika*. 3 S′ Kd दूर्षजर°. 4 S′ Kd दग्धा°. We with *Kaus'ika*. 5 S′ Kd °धारिण°. Dârila: रयिरिति धननाम । धारय-तीति धारणा भूमिः । तन्मयान्. 6 S′ Kd प्रतीर्य. 7 S′ Kd इत्येकेन सूक्त°.

द्वितीया ॥

यावंती द्यावापृथिवी वरिम्णा यावत् सप्त सिन्धवो वितष्ठिरे।
वाचं विषस्य दूषणीं तामितो निरवादिषम् ॥ २ ॥

यावंती इति। द्यावापृथिवी इति। वरिम्णा। यावत्। सप्त। सिन्धवः।
विऽतस्थिरे।
वाचम्। विषस्य। दूषणीम्। ताम्। इतः। निः। अवादिषम् ॥ २ ॥

द्यावापृथिवी द्यौश्च पृथिवी च द्यावापृथिव्यौ। "दिवो द्यावा" इति द्यावादेशः। "वा छन्दसि" इति पूर्वसवर्णदीर्घः। ते द्यावापृथिव्यौ वरिम्णा उरुत्वेन विस्तारेण यावती यावत्यौ यावत्परिमाणयुक्ते भवतः। यच्छब्दात् "यत्तदेतेभ्यः परिमाणे वतुप्" इति वतुप्। "आ सर्वनाम्नः" इति आत्वम्। वरिम्णेति। उरुशब्दाद् इमनिचि "प्रियस्थिर०" इत्यादिना वर् आदेशः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। तथा [सप्त] सप्तसंख्याकाः सिन्धवः समुद्रा यावत् यत्परिमाणवैशिष्ट्येन वितस्थिरे व्यावर्तन्ते। "समवप्रविभ्यः स्थः" इति आत्मनेपदम्। इतः अस्मात् तादृक्परिमाणविशिष्टयोर्द्यावापृथिव्योः सकाशात् सप्तसमुद्रवेष्टितस्थानाच्च विषस्य दूषणीम् कन्दमूलादिजनितविषस्य नाशनीं ताम् तादृशीं वाचम् मन्त्रात्मिकां निरवादिषम्। तालवोष्ठपुटव्यापारेण निर्गमय्य उच्चारयामीत्यर्थः। वदेश्छान्दसो लुङ्। "वदव्रजहलन्तस्याचः" इति वृद्धिः ॥

तृतीया ॥

सुपर्णस्त्वा गरुत्मान् विष[*1] प्रथममावयत्।
नामीमदो नारूरुप उतास्मा अभवः पितुः ॥ ३ ॥

सुऽपर्णः। त्वा। गरुत्मान्। विष[*1]। प्रथमम्। आऽवयत्।

---

१ A B B[P] B[h] D K[m] R S[m] P P[2] J V विषः. We with Sâyaṇa whom K follows. २ S[3] नारूरू°. B[h] नारूरू°. We with A B D K K[m] R V.

---

1 Sâyaṇa's text too has वितस्थिरे. 2 S′ Kd सिंधुसप्त° for सप्त°. 3 S′ Kd विषयस्य.

न । अमीमदः । न । अरूरुपः । उत । अस्मै । अभवः । पितुः ॥ ३ ॥

सुपर्णः शोभनपत्रयुक्तः । ब्रबहुव्रीहौ "नञ्सुभ्याम्" इति उत्तरपदान्तोदात्तत्वम् । एवंभूतो गरुत्मान् वैनतेयः हे विष त्वा त्वां प्रथमम् पूर्वम् आवयत् । आवयतिः अत्तिकर्मा । अभक्षयत् । अतो निर्वीर्यत्वाद् विषोपहतं पुरुषं नामीमदः मत्तं ज्ञानविकलं मा कार्षीः । अत एव नारूरुपः । ब्रयुप रुप लुप विमोहने इति धातुः । विमूढं मा कार्षीरित्यर्थः । ब्रउभयत्रापि ण्यन्तात् लुङि चङि रूपम् ॥ उत अपि तु अस्मै विषदुष्टाय पुरुषाय हे विष त्वं पितुः । अन्ननामैतत् । अन्नम् अभवः । ब्रछान्दसो लङ् । अन्नवज्जीर्णं भवेत्यर्थः ॥

चतुर्थी ॥

यस्त आस्यत् पञ्चाङ्गुरिर्वक्राच्चिदधि धन्वनः ।
अपस्कम्भस्य शल्यान्निरवोचमहं विषम् ॥ ४ ॥

यः । ते । आस्यत् । पञ्चऽअङ्गुरिः । वक्रात् । चित् । अधि । धन्वनः ।
अपऽस्कम्भस्य । शल्यात् । निः । अवोचम् । अहम् । विषम् ॥ ४ ॥

पञ्चाङ्गुरिः पञ्च अङ्गुरयः अङ्गुलयो यस्य स तथोक्तः । ब्र"वालमूललघ्वलमङ्गुलीनां वा [1]रो लम् आपद्यते" इति लत्वस्य विकल्पनाद् रेफः । एवंभूतो यो हस्तः ते त्वां वक्रात् वक्रीभूताद् [अधि] अधिज्याद् धन्वनः आस्यत् धनुर्यन्त्रेण पुरुषशरीरे प्राक्षिपत् । चिच्छब्दः अप्यर्थे । तं विषम् विषप्रदं हस्तम् अपस्कम्भस्य अपस्कभ्यते विधार्यते अन्तरिक्षे इति अपस्कम्भः ऋमुकवृक्षः तस्य शल्यात् शकलाद् निमित्ताद् [अहं] निरवोचम् मन्त्रेण निर्वीर्यं करोमि । यद्वा अपस्कभ्यते धनुषि धार्यते इति अपस्कम्भो बाणः । तस्य शल्यात् विषदिग्धाद् अयोमयाद् अग्रात् । यो विषम् आस्यत् इति संबन्धः । ब्रष्टभि स्कभि गतिप्रतिबन्धे । असात् कर्मणि घञ् । यद्वा तदीयं विषं निर्गतं ब्रवीमीत्यर्थः ॥

---

१ P सल्यात्. We with P J K.

---

1 So S' Kd.

पञ्चमी ॥

शल्याद् विषं निरवोचं प्राञ्जनादुत पर्णधेः।
अपाष्ठाच्छृङ्गात् कुल्मलान्निरवोचमहं विषम् ॥ ५ ॥

शल्यात्। विषम्। निः। अवोचम्। प्रऽअञ्जनात्। उत। पर्णऽधेः।
अपाष्ठात्। शृङ्गात्। कुल्मलात्। निः। अवोचम्। अहम्। विषम् ॥ ५ ॥

[शल्यात्] उक्तलक्षणाद् बाणादिशल्यात् संभूतं विषं निरवोचम् निर्गतं ब्रवीमि। तथा प्राञ्जनात् प्रलेपात्। उतशब्दः समुच्चये। पर्णधेः पर्णानि पत्राणि धीयन्तेस्मिन्निति पर्णधिः इषुकाण्डः विषमयपत्रयुक्तो वृक्षो वा। तस्माच्च यद् उद्भूतं विषम् अपाष्ठात् अपकृष्टावस्थाद् एतत्संज्ञाद् विषोपादानात् शृङ्गात् विषाणात् कुल्मलात् कुत्सितप्राणिमलाच्च यद् उद्भूतं विषम् तत् सर्वं विषम् अहं निरवोचम् निर्ब्रवीमि। मन्त्रसामर्थ्येन निर्गतं करोमीत्यर्थः ॥

षष्ठी ॥

अरसस्ते इषो शल्योथो ते अरसं विषम्।
उतारसस्य वृक्षस्य धनुष्टे अरसारसम् ॥ ६ ॥

अरसः। ते। इषो इति। शल्यः। अथो इति। ते। अरसम्। विषम्।
उत। अरसस्य। वृक्षस्य। धनुः। ते। अरसा। अरसम् ॥ ६ ॥

हे इषो बाण ते त्वदीयो विषदिग्धः शल्यः अरसः निर्विषो भवतु ॥ अथो अनन्तरं च ते त्वदीयं विषम् अरसम् रसरहितं निर्वीर्यं भवतु ॥ उत अपि च अरसस्य निःसारस्य वृक्षस्य संबन्धि ते त्वदीयं धनुः अरसारसम् अत्यर्थम् अरसं नीरसं निर्वीर्यं भवतु ॥

सप्तमी ॥

ये अपीषन् ये अदिहन् य आस्यन् ये अवासृजन्।
सर्वे ते वध्रयः कृता वधिर्विषगिरिः कृतः ॥ ७ ॥

---

१ P अपाष्टात्. २ Sâyaṇa's text has: येपीषन्.

ये । अपीषन् । ये । अदिहन् । ये । आस्यन् । ये । अवऽअसृजन् ।
सर्वे । ते । वध्रयः । कृताः । वधिः । विषऽगिरिः । कृतः ॥ ७ ॥

ये जनाः अपीषन् विषोपादानम् औषधम् अपिंषन् । चूर्णीकृत्य प्रयच्छन्तीत्यर्थः । छान्दसो लङ् । ये च जना अदिहन् अलिम्पन् । लेपनविषं प्रयुञ्जत इत्यर्थः । ये च आस्यन् विषम् अस्यन्ति दूरात् प्रक्षिपन्ति ये च अवासृजन् समीपस्थाः विषम् अन्नपानादिषु संसृजन्ति ते सर्वे जनाः एतन्मन्त्रप्रभावाद् वध्रयः निर्वीर्याः कृताः । विषगिरिः कन्दमूलादिविषोत्पत्तिहेतुः पर्वतश्च वधिः निर्वीर्यः कृतः ॥

अष्टमी ॥

वध्रयस्ते खनितारो वधिस्त्वमस्योषधे ।
वधिः स पर्वतो गिरिर्यतो जातमिदं विषम् ॥ ८ ॥

वध्रयः । ते । खनितारः । वधिः । त्वम् । असि । ओषधे ।
वधिः । सः । पर्वतः । गिरिः । यतः । जातम् । इदम् । विषम् ॥ ८ ॥

हे ओषधे विषोपादानभूते ते तव कन्दमूलादेः खनितारः खननेन उद्धर्तारो जनाः वध्रयः निर्वीर्या भवन्तु । त्वमपि मन्त्रप्रभावात् वधिरसि निर्वीर्या भवसि । स तादृशः पर्वतः पर्ववान् गिरिः शिलोच्चयः वधिः निर्वीर्यो भवति । यतः यस्माद् गिरेः इदम् कन्दमूलादिलक्षणं विषं जातम् उत्पन्नम् । स पर्वत इति संबन्धः । जातम् इति । जनेः कर्तरि निष्ठा । "श्वीदितो निष्ठायाम्" इति इट्प्रतिषेधः । "जनसनखनां सञ्झलोः" इति आत्वम ॥

[इति] चतुर्थे काण्डे [द्वितीयेनुवाके] प्रथमं सूक्तम् ॥

"वारिदं वारयातै" इति द्वितीयसूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः ॥

तत्र प्रथमा ॥

वारिदं वारयातै वरणावत्यामधि ।
तत्रामृतस्यासिक्तं तेना ते वारये विषम् ॥ १ ॥

वाः। इदम्। वारयातै। वरणंऽवत्याम्। अधि।
तत्र। अमृतस्य। आऽसिक्तम्। तेन। ते। वारये। विषम् ॥ १ ॥

वरणावत्याम्। वरणा नाम वृक्षविशेषाः ते अस्यां सन्तीति वरणावती। ॥"शरादीनां च" इति मतौ पूर्वपदस्य दीर्घः॥। तस्याम् [अधि]। अधिः सप्तम्यर्थानुवादी। तस्यां स्थितम इदम् विषहरं वाः वारि वारयातै असदीयं विषं वारयतु। ॥वारयतेर्लेटि आडागमः॥। वरणावत्युदकस्य कोतिशय इति तत्राह तत्रामृतस्येति। तत्र वरणावत्याम् अमृतस्य द्युलोकस्थस्य विषहरं स्वरूपम् आसिक्तम् प्रक्षिप्तं विद्यते। अतः तेन अमृतमयेन उदकेन ते त्वदीयं कन्दमूलादिजनितं विषं वारये निवारयामि ॥

द्वितीया ॥

अरसं प्राच्यं विषमरसं यदुदीच्यम्।
अथेदमधराच्यं करम्भेण वि कल्पते ॥ २ ॥

अरसम्। प्राच्यम्। विषम्। अरसम्। यत्। उदीच्यम्।
अथ। इदम्। अधराच्यम्। करम्भेण। वि। कल्पते ॥ २ ॥

प्राच्यम् प्राग्देशे भवं विषम् अरसम् नीरसं निर्वीर्यम् अस्तु। तथा उदीच्यम् उदग्देशे भवं यद् विषम् अस्ति तदपि अरसम् निर्वीर्यं भवतु। ॥"द्युप्रागपागुदक्प्रतीचो यत्" इति शैषिको यत् प्रत्ययः॥। अथ अनन्तरम् इदम् अधराच्यम्। अधरम् अधोदेशम् अञ्चतीति अधराक् पृथिव्या अधस्ताद् वर्तमाना दिक्। तत्र भवम् अधराच्यं विषम्। यद्वा "प्राग् अपाग् उदग् अधराक्" [२०.कु०८.१] "प्राक्ताद् अपाक्ताद् अधराद् उदक्तात्" [ऋ०७.१०४.१९] इत्यादिमन्त्रान्तरेषु प्रागादिदिक्त्रयसमभिव्याहारेण दक्षिणा दिक् अधराक्शब्दवाच्या। एतच्च प्रत्यग्दिशोप्युपलक्षकम्। एवं सर्वदिक्संबन्धि विषं कर-

१ So P P J K. २ A B B P B D K K R S P P J V all read the accent as given above.

म्भेण । "मन्थं संयुतं करम्भ इत्याचक्षते" [आप० १२. ४. १३] इति आपस्तम्ववचनाद् अत्र विषहरे प्रयोगे प्रयुज्यमानो मन्थः करम्भशब्दवाच्यः । तेन वि कल्पते । विगतसामर्थ्यं भवतीत्यर्थः । कृपू सामर्थ्ये । "कृपो रो लः" इति लत्वम ॥

तृतीया ॥

करम्भं कृत्वा तिर्यञ्ची पीवस्पाकमुदारथिम् ।
क्षुधा किल त्वा दुष्टनो जक्षिवान्त्स न रूरुपः ॥ ३ ॥

करम्भम् । कृत्वा । तिर्यञ्चम् । पीवः ऽपाकम् । उदारथिम् ।
क्षुधा । किल । त्वा । दुस्तनो इति दुः ऽतनो । जक्षिऽवान् । सः । न ।
रूरुपः ॥ ३ ॥

हे दुष्टनो दुष्टशरीर विष तिर्यम् तिरोभवं प्रच्छन्नत्वेन प्रयुक्तम् । तिरस्शब्दात् "भवे छन्दसि" इति यत् । "अव्ययानां भमात्रे०" इति टिलोपः । पीवस्साकम् । पीवो मेदः पच्यते येन तत् पीवस्साकम् । पचेः करणे घञ् । उदारथिम् उद्रिक्तार्तिजनकम् ईदृशं त्वा त्वां करम्भं कृत्वा करम्भशब्दवाच्यं मन्थं विभाव्य क्षुधा किल बुभुक्षया । किलेति अपरमार्थे । जक्षिवान् भक्षितवान् । पुरुषो भक्षितवान् । स भक्षितस्त्वं तं पुरुषं न रूरुपः मूर्छितं मा कुरु । जक्षिवान् इति । अदेर्लिटः क्वसुः । "लिट्यन्यतरस्याम्" इति घस्लृ आदेशः । "वस्वेकाजाद्घसाम्" इति इटि कृते उपधालोपे स्थानिवद्भावाद् द्विर्वचनादि । रूरुप इति । रुप विमोहने । ण्यन्तात् लुङि चङि रूपम ॥

चतुर्थी ॥

वि ते मदं मदावति शरमिव पातयामसि ।
प्र त्वा चरुमिव येषन्तं वचसा स्थापयामसि ॥ ४ ॥

---

१ A B Bp Bh D K Km R Sm P P2 J V all read पीवस्पाक°. २ P P2 रुरुपः. J changes रूरुपः to रुरुपः. ३ K V follow Sâyaṇa and read शरु°. We with A B Bp Bh D Km R Sm P P2 J V. ४ B K V पेषन्त°. We with A Bp Bh D Km R Sm P P2 J.

---

1 S' Kd तिरस्शब्दात्.

वि। ते। मदम्। मदुऽवति। शरमऽइव। पातयामसि।
प्र। त्वा। चरुमऽइव। येषन्तम्। वचसा। स्थापयामसि॥ ४॥

हे मदावति मूर्छाकरमदयुक्ते विषोपादानभूते ओषधे ते त्वदीयं मदम् मूर्छाकरं विषम् शरुमिव धनुषो विमुक्तं शरमिव वि पातयामसि विपातयामः। शरुम् इति। शॄ हिंसायाम् इत्यस्मात् शॄस्वृस्निहि° [उ०१.१०] इत्यादिना उप्रत्ययः। शरीराद् विश्लेषयामः। हे विष चरुम् चरणशीलं गूढचरं दूतमिव जेषन्तम्। जेषृ प्रयत्ने। प्रयतमानम् अङ्गप्रत्यङ्गानि व्याप्नुवन्तं त्वा त्वां वचसा मन्त्रेण प्र स्थापयामसि प्रस्थापयामः॥

पञ्चमी॥

परि ग्रामंमिवाचितं वचसा स्थापयामसि।
तिष्ठा वृक्ष इव स्थाम्न्यभ्रिखाते न रूरुपः॥ ५॥

परि। ग्रामंमऽइव। आऽचितम्। वचसा। स्थापयामसि।
तिष्ठ। वृक्षःऽइव। स्थाम्नि। अभ्रिऽखाते। न। रूरुपः॥ ५॥

ग्राममिव जनसमूहमिव आचितम् उपचितं विषम्। ग्रामदृष्टान्तेन विषस्य प्राबल्यम् उक्तम्। ईदृशमपि वचसा मन्त्रेण परिहृत्य अन्यत्र स्थापयामसि स्थापयामः। निरस्याम इत्यर्थः॥ हे अभ्रिषाते। अभ्रिः खननसाधनम्। तदीयखननेन लब्धे ओषधे स्थाम्नि स्थाने स्वकीये वृक्ष इव निश्चला भूत्वा तिष्ठ। मा व्याप्नुहीत्यर्थः। अत एव न रूरुपः पुरुषं नामूमुहः॥

षष्ठी॥

पवस्तैस्त्वा पर्यक्रीणन् दूर्शेभिरजिनैरुत।
प्रक्रीरसि त्वमोषधेभ्रिखाते न रूरुपः॥ ६॥

पवस्तैः। त्वा। परि। अक्रीणन्। दूर्शेभिः। अजिनैः। उत।

१, २. See foot-notes ३ and ४ respectively on the previous page.

---

1 So S′Kd distinctly.

प्रऽङ्क्षीः । असि । त्वम् । ओषधे । अभ्रिऽखाते । न । रूरुपः ॥ ६ ॥

हे ओषधे विषमूलिके त्वा त्वाम् पवस्तैः पवनाय अस्तैः संमार्जनीतृणैः पर्यक्रीणन् परिक्रीतवन्तो महर्षयः । पवस्तशब्दो दाशतय्यां द्यावापृथिव्योर्वाचकत्वेन दृष्टः । "द्वे पवस्ते परि तं न भूतः" [ऋ० १०. २७. ७] इति । तथा दूर्शैभिः दूर्शैः दुष्टदृश्यसंबन्धिभिः अजिनैः त्वग्भिश्च पर्यक्रीणन् । उतशब्दः समुच्चये । दूर्शैभिरिति । "बहुलं छन्दसि" इति भिस ऐसभावः ॥ यत एवम् अतो हेतोः त्वं प्रक्षीः प्रकर्षेण क्रीता असि भवसि । अतस्तैर्द्रव्यैस्त्वं प्रक्रीता सती अस्मात् स्थानान्निर्गच्छेति भावः । प्रपूर्वात् क्रीणातेः कर्मणि संपदादिलक्षणः क्विप् ॥ अभ्रिषाते इत्यादि व्याख्यातम् ॥

सप्तमी ॥

अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे ।
वीरान् नो अत्र मा दभन् तद् व एतत् पुरो दधे ॥ ७ ॥

अनाप्ताः । ये । वः । प्रथमाः । यानि । कर्माणि । चक्रिरे ।
वीरान्[४] । नः । अत्र । मा । दभन् । तत् । वः । एतत् । पुरः[५] । दधे ॥ ७ ॥

हे जनाः वः युष्माकम् अनाप्ताः अननुकूला ये शत्रवः प्रथमा प्रथमानि मुख्यानि यानि योगादीनि कर्माणि चक्रिरे कृतवन्तः तैः कर्मभिस्ते शत्रवः नः अस्माकं वीरान् वीर्याज्जातान् पुत्रपौत्रादीन् अत्र अस्मिन् देशे यद्वा एषु कर्मसु निमित्तभूतेषु मा दभन् मा हिंसन्तु । दन्भु दम्भे । तद् एतत् क्रियमाणं भैषज्यरूपं कर्म वः युष्माकं पुरः पुरस्ताद् दधे रक्षणार्थं धारयामि ॥

[इति] द्वितीयं सूक्तम् ॥

"भूतो भूतेषु" इति तृतीयसूक्तेन महति लघौ वा राजाभिषेककर्म-

---

१ P $\dot{P}^2$ J रुरुपः. २ P $\dot{P}^2$ J omit the visarga. ३ So P $\dot{P}^2$ J K. ४ P J वीरात्. We with K $\dot{P}^2$. ५ P परः. We with $\dot{P}^2$ J K.

---

1 S' Kd भूतम्.

णि शान्त्युदककलशेन उदपात्रेण च अभिषेकं जपं च पुरोहितः कुर्यात् ॥

तथा संपातितस्थालीपाकप्राशनम् अभिमन्त्रितम् अश्वम् आरोह्य अपराजितदिशं प्रति गमनं च कारयेत्। सूत्रितं हि। "भूतो भूतेष्विति राजानम् अभिषेक्ष्यन् महा[नदे] शान्त्युदकं करोति" इत्यादि [कौ० २. ८] ॥

तथा राजसूये आसन्द्यारोहणे राजाभिषेके च एतत् सूक्तम्। उक्तं वैताने। "राजसूयं" प्रक्रम्य "वैयाघ्रचर्मोपबर्हणायाम् आसन्द्यां भूतो भूतेष्वित्यारोहयति अभिषिञ्चति च" इति [वै० ७. १] ॥

तत्र प्रथमा ॥

भूतो भूतेषु पय आ दधाति स भूतानामधिपतिर्बभूव।
तस्य मृत्युश्चरति राजसूयं स राजा राज्यमनु मन्यतामिदम् ॥ १ ॥

भूतः। भूतेषु। पयः। आ। दधाति। सः। भूतानाम्। अधिऽपतिः। बभूव। तस्य। मृत्युः। चरति। राजऽसूयम्। सः। राजा। राज्यम्। अनु। मन्यताम्। इदम् ॥ १ ॥

भूतः समृद्धः अभिषेकेण प्राप्तैश्वर्यः भूतेषु समृद्धेषु जनपदेषु स्वाम्यमात्यादिप्रकृतिजनेषु वा पयः। उपलक्षणम् एतत्। क्षीरोपलक्षितं भोज्यं वस्तुजातम् आ दधाति स्थापयति। सर्वेषाम् अनुजीविनाम् अन्नप्रदो भवतीत्यर्थः ॥ अत एव सः अभिषिक्तो राजा भूतानाम् प्राणिनाम् अधिपतिः अधिष्ठाता स्वामी बभूव ॥ मृत्युः धर्मराजः धर्माधर्मप्रविभागेन दुष्टनिग्रहशिष्टपरिपालने कारयितुं तस्य राज्ञो राजसूयं चरति। राजा सूयते अनुज्ञायते जगद्रक्षणविधौ येन कर्मणा तद् राजसूयम् अभिषेकाख्यम् इदं कर्म अनुतिष्ठतीत्यर्थः ॥ स कृताभिषेको राजा राज्यम्। राज्ञः कर्म दुष्टनिग्रहशिष्टपरिपालनादिकं राज्यम्। तद् अनु मन्यताम् अङ्गीकरोतु। ॥ राज्यम् इति। "पत्यन्तपुरोहितादिभ्यो यक्" इति कर्मणि अभिधेये यक् प्रत्ययः। तत्र पुरोहितादिषु "राजाऽसे" इति पठितम् ॥

द्वितीया ॥

अभि प्रेहि माप वेन उग्रश्चेत्ता सपत्नहा ।
आ तिष्ठ मित्रवर्धनं तुभ्यं देवा अधि ब्रुवन् ॥ २ ॥

अभि । प्र । इहि । मा । अप । वेनः । उग्रः । चेत्ता । सपत्नऽहा ।
आ । तिष्ठ । मित्रऽवर्धनं । तुभ्यम । देवाः । अधि । ब्रुवन् ॥ २ ॥

हे राजन् सिंहासनं हस्त्यश्वरथादियानं च अभि प्रेहि अभिलक्ष्य प्रगच्छ । मा अप वेनः । ⁂वेनतिः कान्तिकर्मा⁂ । अपकामम् अनिच्छां मा कार्षीः ॥ उग्रः उन्नूर्णबलः दुरासदः चेत्ता चेतिता । कार्याकार्यविभागज्ञानशीलवान् इत्यर्थः । ⁂चिती संज्ञाने इत्यस्मात् ताच्छीलिकस्तृन्⁂ । अत एव सपत्नहा सपत्नानां शत्रूणां हन्ता । ⁂"बहुलं छन्दसि" इति हन्तेः क्विप्⁂ । राजासनादिसमीपं गत्वा च मित्रवर्धनः* यानि राजमित्राणि महामात्रादीनि सन्ति तेषां वर्धयिता सन् आ तिष्ठ राजासनं हस्त्यश्वादियानं च[1] आरोह । एवंभूताय तुभ्यं देवाः इन्द्रादयो लोकपालाः अधि ब्रुवन् [अधिब्रुवन्तु] । अधिवचनं पक्षपातेन वचनम् । मदीयोयम् इति त्वाम् अनुगृह्णन्तु इत्यर्थः ॥

तृतीया ॥

आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियं वसानश्चरति स्वरोचिः ।
महत् तद् वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥ ३ ॥

आऽतिष्ठन्तम । परि । विश्वे । अभूषन् । श्रियम । वसानः । चरति । स्वऽरोचिः ।

---

१ So we with **A B** Bp **B D K R S P P J V.** **K** adopts Sâyaṇa's मित्रवर्धनस्तु° but keeps his old accent! २ **A P J K** ब्रवन्. We with **B B D K R S V.** ३ **P J** ब्रुवन्. We with **P.** ४ **K V** महस्तद्विष्णो with Sâyaṇa. We with **A B** Bp **B D K R S P P J V.**

1 **S′ K**d न for च.

महत्। तत्। वृष्णः। असुरस्य। नाम। आ। विश्वऽरूपः। अमृतानि। तस्थौ॥ ३॥

आतिष्ठन्तम् सिंहासनादिकम् आरोहन्तं विश्वे सर्वे जनाः पर्यभूषन् परितः अलंकुर्वन्तु। ✕भूष अलंकारे। भौवादिकः✕। [यद्वा] परितो भवन्तु वर्तन्ताम्। सेवन्ताम् इत्यर्थः। ✕भवतेश्छान्दसे लुङि सिब्बहुलम्०" इति बहुलग्रहणात् सिप्✕॥ आस्थानानन्तरं श्रियं वसानः राजलक्ष्मीं धारयन् स्वरोचिः स्वायत्तदीप्तिः चरति राज्यपरिपालने वर्तते। ✕वसान इति। वस आच्छादने। अस्मात् लटः शानच्। अनुदात्तेच्चात् "०लसार्वधातुक०" [इति] अनुदात्तत्वे धातुस्वरः✕॥ विष्णोः[*1] अभिषेकजनितराजतेजसा दशदिगन्तान् व्याप्नुवतः असुरस्य शत्रूणां निरसितुः। ✕असु क्षेपणे। असेरुरन् [उ० १.४२] इति उरन् प्रत्ययः✕। यद्वा असून् प्राणान् राति प्रयच्छति पादाक्रान्तानां द्विषाम् इति असुरः। ✕रा दाने इत्यस्माद् "आतोनुपसर्गे कः" इति कः✕। ईदृशस्य तस्याभिषिक्तस्य राज्ञः तन्नाम अभिषेकसमये कृतं सुन्दरपाण्ड्यादिकं नाम महः[*] महत् अधिकं यन्नामश्रवणमात्राद् भीताः शत्रवः पलायन्ते [तादृशम्]। तादृङ्नामाङ्कितो राजा विश्वरूपः शत्रुमित्रकलत्रादिषु नानाविधरूपः सन् अमृतानि अमृतत्वप्रापकानि दण्डयुद्धादीनि अध्ययनादीनि च कर्माणि आ तस्थौ आतिष्ठतु। आचरतु इत्यर्थः॥

चतुर्थी॥

व्याघ्रो अधि वैयाघ्रे वि क्रमस्व दिशो महीः।
विशस्त्वा सर्वा वाञ्छन्त्वापोदिव्याः पयस्वतीः॥ ४॥

व्याघ्रः। अधि। वैयाघ्रे। वि। क्रमस्व। दिशः। महीः।
विशः। त्वा। सर्वाः। वाञ्छन्तु। आपः। दिव्याः। पयस्वतीः॥ ४॥

---

१ K महः। तत्। विष्णो इति, which is due to Sâyaṇa's text in S′Kd reading विष्णो असुरस्य, evidently wrongly.

1 S′Kd विष्णुः, though their text has विष्णो असुर° (not विष्णोरसुर°.)

वैयाघ्रे व्याघ्रस्य विकारश्चर्म वैयाघ्रम् । "अवयवे च प्राण्योषधिवृक्षेभ्यः" इति विकारार्थे अण् । "न य्वाभ्यां पदान्ताभ्याम्०" इति वृद्धिनिषेधः ऐजागमश्च । व्याघ्रचर्मणि अधि उपरि उपविष्टः सन् व्याघ्रः । लुप्तोपमम् एतत् । व्याघ्रवद् दुष्प्रधर्षो भूत्वा महीः महतीः प्राच्याद्या दिशः वि क्रमस्व विजयस्व । विक्रमेण शौर्येण व्याप्नुहीत्यर्थः । "वेः पादविहरणे" इति क्रमेरात्मनेपदम् ॥ हे राजन् एवं तेजस्विनं त्वा त्वां सर्वा विशः प्रजाः वाञ्छन्तु स्वामित्वेन इच्छन्तु । वाछि इच्छायाम् । त्वदाज्ञावशे वर्तन्ताम् इत्यर्थः ॥ तथा दिव्याः दिवि भवाः पयस्वतीः पयस्वत्यः सारवत्यः आपश्च त्वां वाञ्छन्तु । त्वद्विषये अनावृष्टिर्मा भूद् इत्यर्थः ॥

पञ्चमी ॥

या आपो॑ दि॒व्याः पय॑सा मद॑न्त्य॒न्तरि॑क्ष उ॒त वा॑ पृथि॒व्याम् ।
तासा॑ त्वा सर्वा॑सामु॒पाम॒भि षि॑ञ्चामि॒ वर्च॑सा ॥ ५ ॥
याः । आपः॑ । दि॒व्याः । पय॑सा । मद॑न्ति । अ॒न्तरि॑क्षे । उ॒त । वा॒ । पृ॒थि॒व्याम् ।
तासा॑म् । त्वा॒ । सर्वा॑साम् । अ॒पाम् । अ॒भि । सि॒ञ्चा॒मि॒ । वर्च॑सा ॥ ५ ॥

दिव्याः दिवि भवा या आपः पयसा स्वकीयेन सारभूतेन रसेन मदन्ति प्राणिनस्तर्पयन्ति । मद तृप्तियोगे । चुरादिरदन्तः । "छन्दस्युभयथा" इति शप आर्धधातुकत्वात् "णेरनिटि" इति णिलोपः । याश्च अन्तरिक्षे वर्तमाना आपः उत वा अपि वा पृथिव्याम् भूम्याम् अवस्थिताः तासां सर्वासां लोकत्रयव्याप्तानाम् अपां वर्चसा बलकरेण सारेण हे राजन् त्वा त्वाम् अभि षिञ्चामि ॥

षष्ठी ॥

अ॒भि त्वा॒ वर्च॑सासिञ्च॒न्नापो॑ दि॒व्याः पय॑स्वतीः ।
यथासो॑ मित्र॒वर्ध॑न॒स्तथा॑ त्वा सवि॒ता क॑रत् ॥ ६ ॥
अ॒भि । त्वा॒ । वर्च॑सा । अ॒सि॒च॒न् । आपः॑ । दि॒व्याः । पय॑स्वतीः ।

---

१ K °सृज्° for °सिच्° with Sâyaṇa. We with A B B^{p} $\overset{h}{\text{B}}$ D $\overset{m}{\text{K}}$ R $\overset{m}{\text{S}}$ P $\overset{j}{\text{P}}$ J V. २ K असृजन्.

यथा। असः। मित्रऽवर्धनः। तथा। त्वा। सविता। करत्॥ ६॥

हे राजन् त्वा त्वां प्रागुक्ता दिव्याः [पयस्वतीः] पयस्वत्यः आपः स्वकीयेन वर्चसा अभ्यसृंजन् आभिमुख्येन संसृजन्तु। यथा त्वं मित्रवर्धनः मित्राणां वर्धयिता असः भवेः। वृधेर्ण्यन्तात् नन्द्यादिलक्षणो ल्युप्रत्ययः। अस्तेर्लेटि अडागमः। सविता सर्वप्रेरको देवः त्वा त्वां तथा करत् करोतु॥

सप्तमी॥

एना व्याघ्रं परिषस्वजानाः सिंहं हिन्वन्ति महते सौभगाय।
समुद्रं न सुभुवस्तस्थिवांसं मर्मृज्यन्ते द्वीपिनमप्स्वन्तः॥ ७॥

एना। व्याघ्रम्। परिऽसस्वजानाः। सिंहम्। हिन्वन्ति। महते। सौभगाय। समुद्रम्। न। सुऽभुवः। तस्थिऽवांसम्। मर्मृज्यन्ते। द्वीपिनम्। अप्ऽसु। अन्तः॥ ७॥

"या आपो दिव्याः" इति प्राग् उक्ता आपः एना इति अन्वादिश्यन्ते। एना एता उक्ता आपः। "द्वितीयाटौःस्वेनः" इति एतच्छब्दस्य एनादेशः। ततः "सुपां सुलुक्०" इति जस आजादेशः। अत एव अन्तोदात्तत्वम्। इतरथा हि अनुदात्त इत्यनुवृत्तेरेनादेशोनुदात्तः। जसस्तु सुञ्वाद् अनुदात्ततेति। [व्याघ्रं व्याघ्रवत् पराक्रमयुक्तं परिषस्वजानाः परितः अभितः अतिशयेन आलिङ्गन्त्यः। मातरो वत्सम् इव अत्यन्तं प्रीणयन्त्य इत्यर्थः। परिषस्वजाना इति ष्वञ्ज सङ्गे। अस्मात् लिट्।] तस्य कानजादेशः। सिंहम् सहनशीलम् यद्वा सिंहतुल्यपराक्रमं राजानं हिन्वन्ति वीर्यप्रदानेन प्रीणयन्ति। हिविः प्रीणनार्थः। इदित्त्वान्नुम्। किमर्थम्। महते सौभगाय अधिकाय सौभाग्याय। "सुभग मन्त्रे" इति उणादिषु पाठाद् भावे अञ्। "स्त्रियादिर्नित्यम् इति आद्युदात्तत्वम"। "बृहन्महतोरुपसंख्यानम्" इति

१ B B^{h} S^{m} ३ for १. A R have no kampa. We with D K K^{m} V. २ So P P^{2} J K.

1 S' Kd हिवि प्रीण°.

महतो विभक्तिरुदात्ता ॥ । तत्र दृष्टान्तः । समुद्रं नेति । यथा नदीरूपा आपः समुद्रं प्रीणयन्ति तद्वद् अभिषेकसाधनभूता आपो राजानं प्रीणयन्तीत्यर्थः । यद्वा समुद्रशब्देन वरुण उच्यते । समुद्रं न वरुणमिव ॥ अप्सु उदकेषु परितो वर्तमानेषु अन्तः मध्ये तस्थिवांसम् स्थितवन्तं द्वीपिनम् शार्दूलवद् अप्रधृष्यं राजानं सुभुवः । सुष्ठु भवन्ति समृद्धा भवन्तीति सुभुवः सेवकजनाः । ते मर्मृज्यन्ते पुनःपुनः अङ्गप्रत्यङ्गानि अभिषेकेण शोधयन्ति । यद्वा पट्टवस्त्रकटकमुकुटादिभिरलंकुर्वन्ति । ॥मृजू शौचालंकारयोः । "°मर्मृज्यागनीगन्तीति च" इति निपातनाद् अभ्यासस्य रुगागमः । अप्स्विति । "ऊडिदम्°" इत्यादिना विभक्तेरुदात्तत्वम् ॥ ॥

इति चतुर्थकाण्डे द्वितीयेनुवाके तृतीयं सूक्तम् ॥

"एहि जीवम्" इति सूक्तेन उपनयनानन्तरम् आयुष्कामस्य माणवकस्य आञ्जनमणिं संपात्य अभिमन्त्र्य बध्नीयात् । सूत्रितं हि । "एहि जीवम् इत्याञ्जनमणिं बध्नाति" इति [कौ°७.९] ॥

"ऐरावतीं गजक्षये" [न°क°१७] इति विहितायाम् ऐरावत्याख्यायां महाशान्तौ आञ्जनमणिबन्धनेपि एतत् सूक्तम् । उक्तं नक्षत्रकल्पे । "एहि जीवम् इत्याञ्जनमणिम् ऐरावत्याम्" इति [न°क°१९] ॥

तत्र प्रथमा ॥

एहि जीवं त्रायमाणं पर्वतस्यास्यक्ष्यम् ।
विश्वेभिर्देवैर्दत्तं परिधिर्जीवनाय कम् ॥ १ ॥

आ । इहि । जीवम् । त्रायमाणम् । पर्वतस्य । असि । अक्ष्यम् ।
विश्वेभिः । देवैः । दत्तम् । परिऽधिः । जीवनाय । कम् ॥ १ ॥

हे आञ्जन एहि आगच्छ । कुतो हेतोरिति तत्राह । जीवम् इति ।

---

१ K °क्षम् with Sâyaṇa. None of our authorities have °स्यास्यक्ष्यम् or °स्यास्यक्षम्. We with A B Bᵖ B̂ʰ D K̂ᵐ R S̊ᵐ P P̊² J V. २ K अक्षम्.

---

1 S′Kd भवंतीति.

जीवंति[1] प्राणं धारयतीति जीवः आत्मा। तं त्रायमाणम् पालयत्। जीवात्मनः पालनाङ्गेतोरित्यर्थः। त्रैङ् पालने इत्यस्मात् हेतौ लटः शानच्। तथा पर्वतस्य त्रिककुन्नाम्नो गिरेः अक्षम् असि चक्षुर्भवसि॥ विश्वेभिः सर्वैर्देवैरिन्द्रादिभिरस्मभ्यं जीवनाय रोगादिराहित्येन चिरकालजीवनार्थं दत्तं सत् परिधिरसि। परितो धीयत इति परिधिः प्राकारः। मृत्योरनागमनाय प्राकारो भवसीत्यर्थः। परिधिः। परिपूर्वाद् धाञः "उपसर्गे घोः किः" इति किप्रत्ययः। कम् इति पदपूरणः॥

द्वितीया॥

परि॒पाणं॑ पुरु॑षाणां परि॒पाणं॑ गवा॑मसि।
अश्वा॑नामर्व॑तां परि॒पाणा॑य तस्थिषे॥ २॥

परि॒डपान॑म्। पुरु॑षाणाम्। परि॒डपान॑म्। गवा॑म्। अ॒सि॒।
अश्वा॑नाम्। अर्व॑ताम्। परि॒डपाना॑य। त॒स्थि॒षे॒॥ २॥

हे त्रिककुदाञ्जन त्वं पुरुषाणाम् मनुष्याणां परिपाणम् परिरक्षणसाधनम् असि। पातेः करणे ल्युट्। "वा भावकरणयोः" इति विकल्पेन णत्वम्। गवां च त्वं परिपाणम् परिरक्षणम् असि। गवाम् इति। "सावेकाचः॰" इति प्राप्तस्य [विभक्त्युदात्तत्वस्य] "न गोश्वन्सावर्वर्ण॰" इति प्रतिषेधः॥ अश्वानाम् अर्वताम् वडवानां च परिपाणाय[2] परिरक्षणाय तस्थिषे तिष्ठसि। "छन्दसि लुङ्लङ्लिटः" इति वर्तमाने लिट्। ऋादिनियमाद् इट्। अर्वताम् इति। "अर्वणस्त्रसावनञः" इति नकारान्तस्य तकारान्तता॥

तृतीया॥

उ॒तासि॑ परि॒पाणं॑ यातुजम्भ॒नमा॑ञ्जन।
उ॒तामृ॑त॒स्य॒ त्वं वे॒त्थाथो॑ असि जीव॒भोज॑न॒मथो॑ हरितभेष॒जम्॥ ३॥

उ॒त। अ॒सि॒। परि॒डपान॑म्। यातुऽजम्भ॒नम्। आ॒ऽअ॒ञ्ज॒न॒।

1 S' Kd जीवतीति. 2 S' Kd ककुदांजन. 3 S' Kd °पानाय.

उत । अमृतस्य । त्वम् । वेत्थ । अथो इति । असि । जीवऽभोजनम् ।
अथो इति । हरितऽभेषजम् ॥ ३ ॥

आ समन्तात् अनक्ति चक्षुषी अनेनेति आञ्जनम् । अञ्जू व्यक्तिम्रक्षण[कान्ति]गतिषु । अस्माद् आङ्पूर्वात् करणे ल्युट् । हे आञ्जन त्वं यातुजम्भनम् । यातवो यातनाः रक्षःपिशाचादिजनिताः पीडाः । तेषां नाशनं परिपाणम् परिरक्षणम् असि । उतशब्दः समुच्चये ॥ ईदृक् सामर्थ्यम् आञ्जनस्य कुत इत्यत आह । उत अपि च त्वम् अमृतस्य अमृतत्वसाधनस्य द्युलोकस्थस्य पीयूषस्य सारं वेत्थ वेत्सि जानासि । "विदो लटो वा" इति थल् आदेशः ॥ अथो अपि च जीवभोजनम् जीवानां जीवतां प्राणिनाम् अनिष्टनिवर्तनेन पालकम् असि । यद्वा भोगसाधनम् असि ॥ अथो अपि च हरितभेषजम् । हरितस्य पाण्ड्वादिरोगजनितस्य श्यामलत्वस्य निवर्तकम् असि ॥

चतुर्थी ॥

यस्याञ्जन प्रसर्पस्यङ्गमङ्गं परुष्परुः ।
ततो यक्ष्मं वि बाधस उग्रो मध्यमशीरिव ॥ ४ ॥

यस्य । आऽअञ्जन । प्रऽसर्पसि । अङ्गमऽअङ्गम् । परुःऽपरुः ।
ततः । यक्ष्मम् । वि । बाधसे । उग्रः । मध्यमशीःऽइव ॥ ४ ॥

हे आञ्जन यस्य पुरुषशरीरस्य अङ्गमङ्गं सर्वाणि हस्तपादादीन्यङ्गानि परुष्परुः सर्वाणि परूंषि पर्वाणि अङ्गसंधींश्च प्रसर्पसि प्रविश्य अन्तःसिरामुखैर्व्याप्नोषि । "नित्यवीप्सयोः" इति अङ्गशब्दपरुःशब्दयोर्द्विर्वचनम् । ततः तस्मात् पुरुषशरीराद् यक्ष्मम् रोगं वि बाधते* । पुरुषव्यत्ययः । विबाधसे । तत्र दृष्टान्तः । उग्रः उद्गूर्णबलः मध्यमशीरिव । मध्यमे अन्तरिक्षस्थाने शेते संचरतीति मध्यमशीः वायुः । स यथा मेघजालादिकं क्षणमात्रेण अपसारयति तद्वद् इत्यर्थः । यद्वा मध्यमशीः । "अ-

१ B $\overset{h}{B}$ प्रसर्प्य°, which, however, may be intended for प्रसर्प्प°.

1 So S'Kd. 2 S'Kd पानम्.

रिर्मित्रम् अरेर्मित्रम्" इति नीतिशास्त्रोक्तराजमण्डलमध्यवर्ती राजा। स यथा उद्गूर्णबलः सन् पर्यन्तवर्तिनो रिपून् निगृह्णाति तद्वद् इत्यर्थः। मध्यमशीः। मध्ये भवं मध्यमम्। "मध्यान्मः" इति मप्रत्ययः। तत्र शेत इति मध्यमशीः। "क्विप् च" इति शीङः क्विप्॥

पञ्चमी॥

नैनं प्राप्नोति शपथो न कृत्या नाभिशोचनम्।
नैनं विष्कन्धमश्नुते यस्त्वा बिभर्त्याञ्जन॥ ५॥

न। एनम्। प्र। आप्नोति। शपथः। न। कृत्या। न। अभिऽशोचनम्।
न। एनम्। विऽस्कन्धम्। अश्नुते। यः। त्वा। बिभर्ति। आऽअञ्जन॥ ५॥

हे आञ्जन [आञ्जन]द्रव्य त्वा त्वां यो जनो बिभर्ति धारयति। डुभृञ् धारणपोषणयोः। "भीह्रीभृहुमद०" इत्यादिना पितः प्रत्ययात् पूर्वस्य उदात्तत्वम्। एनम् तव धारकं पुरुषं शपथः परकृतः शापः न प्राप्नोति। तथा पराभिचारजनिता कृत्या च न प्राप्नोति। "कृञः श च" इति चकारात् संज्ञायां करोतेः क्यप्। "ह्रस्वस्य पिति०" इति तुक्। अभिशोचनम् अभिशोकः कृत्याजनितो न प्राप्नोति। विष्कन्धम् गतिप्रतिबन्धकं विघ्नजातमपि एनं नाश्नुते न व्याप्नोति॥

षष्ठी॥

असन्मन्त्राद् दुष्वप्न्याद् दुष्कृताच्छमलादुत।
दुर्हार्दश्चक्षुषो घोरात् तस्मान्नः पाह्याञ्जन॥ ६॥

असतऽमन्त्रात्। दुःऽस्वप्न्यात्। दुःऽकृतात्। शमलात्। उत।
दुःऽहार्दः। चक्षुषः। घोरात्। तस्मात्। नः। पाहि। आऽअञ्जन॥ ६॥

[असन्मन्त्र्यात्।] असन्तः अशोभना अभिचारार्था मन्त्रा असन्मन्त्राः। तत्र भवाद् दुःखात् दुष्वप्न्यात् दुःस्वप्नजनिताद् दुःखात् दुष्कृतात् जन्मान्तरकृतात् पापात् [उत] शमलात् अन्यस्मादपि क्रियमाणात्

१ So we with A B B^{P} B^{h} D K K^{m} R S^{m} P P^{2} J V.

पापात् दुर्हार्दः दौर्मनस्याद् घोरात् क्रूरात् परकीयाच्चक्षुषश्च तस्मात् अनुक्रान्तात् सर्वस्मात् हे आञ्जन नः अस्मान् पाहि रक्ष ॥

सप्तमी ॥

इ॒दं वि॒द्वानाञ्जन स॒त्यं व॑क्ष्यामि॒ नानृ॑तम ।
स॑नेय॒मश्वं॑ गाम॒हमा॒त्मानं॒ तव॑ पू॒रुष॑म् ॥ ७ ॥
इ॒दम् । वि॒द्वान् । आ॒ऽअञ्ज॑न । स॒त्यम् । व॒क्ष्यामि॒ । न । अनृ॑तम् ।
स॑नेय॑म् । अश्व॑म् । गाम् । अ॒हम् । आ॒त्मान॑म् । तव॑ । पु॒रु॒ष॑म् ॥ ७ ॥

हे आञ्जन विद्वान् तव माहात्म्यं जानन् इदं सत्यम् यथार्थमेव वक्ष्यामि न तु अनृतम् असत्यम् । अतस्तव पूरुषः दासभूतोहम् अश्वं गाम आत्मानम् जीवं सनेयम् संभजेयम् ॥

अष्टमी ॥

त्रयो॑ दा॒सा आञ्ज॑नस्य त॒क्मा ब॒लास॒ आद॑हिः ।
वर्षि॑ष्ठः पर्व॑तानां त्रिक॒कुन्नाम॑ ते पि॒ता ॥ ८ ॥
त्रयः॑ । दा॒सासः॑ । आ॒ऽअञ्ज॑नस्य । त॒क्मा । ब॒लासः॑ । आत् । अहिः॑ ।
वर्षि॑ष्ठः । पर्व॑तानाम् । त्रि॒ऽक॒कुत् । नाम॑ । ते॒ । पि॒ता ॥ ८ ॥

आञ्जनस्य आञ्जनसाधनस्य द्रव्यस्य त्रयो रोगा दासाः दासवद् वशवर्तिनः । तान् अनुक्रामति । तक्मा । ॒तकि कृच्छ्रजीवने[1] इति धातुः । तस्माद् औणादिको मनिन् ॒ । कृच्छ्रजीवनहेतुर्ज्वरस्तक्मशब्दवाच्यः । बलासः शारीरं बलम् अस्यति क्षिपतीति बलासः संनिपातादिः । आत् अनन्तरम् अहिः सर्पः । तज्जन्यविषविकार इत्यर्थः । एते प्राणापहारिणो रोगाः आञ्जनप्रभावेन निवर्तन्त इत्यर्थः ॥ अपि च पर्वतानां मध्ये वर्षिष्ठः वृद्धतमः त्रिककुत् [नाम] त्रीणि ककुदानि शृङ्गाणि यस्य

---

१ Such is the accent read by all our MSS. and Vaidikas. २ **A B B**^{p} **B**^{h} **D K K**^{m} **R S**^{m} **V पूरुषः**, without change of accent. Sâyaṇa has **पूरुषः**. His text is not accented. ३ **P P**^{2} **J K पुरुषः**.

1 **S' K**d °**जीवनमिति** for °**जीवने इति**.

स तथोक्तः। ⁂"त्रिककुत् पर्वते" इति अन्त्यलोपः समासान्तो निपात्यते⁂। एतत्संज्ञः पर्वतः हे आञ्जन ते तव पिता जनकः। ⁂व-र्षिष्ठ इति। वृद्धशब्दात् इष्ठनि "प्रियस्थिर०" इत्यादिना वर्षादेशः⁂॥

नवमी॥

यदाञ्जनं त्रैककुदं जातं हिमवतस्परि।
यातूंश्च सर्वान् जम्भयत्सर्वाश्च यातुधान्यः॥ ९॥

यत्। आऽअञ्जनम्। त्रैककुदम्। जातम्। हिमऽवतः। परि।
यातून्। च। सर्वान्। जम्भयत्। सर्वाः। च। यातुऽधान्यः॥ ९॥

हिमवतस्परि हिमवत्पर्वतात् परि उपरिभागे। ⁂"पञ्चम्याः परावध्यर्थे" इति विसर्जनीयस्य सत्वम⁂। त्रैककुदम्। तत्रस्थः त्रिककुन्नाम पर्वतः तत्संबन्धि यद् आञ्जनं जातम् उत्पन्नं तद् यातून् यातुधानांश्च सर्वान् अशेषान् सर्वा यातुधान्यः यातुधानीः। ⁂"वा छन्दसि" इति शसि पूर्वसवर्णदीर्घाभावः⁂। यातुधानस्त्रियश्च जम्भयत् नाशयद् वर्तते। अतः अस्मद्रोगादीन् नाशयतु इत्यर्थः॥

दशमी॥

यदि वासि त्रैककुदं यदि यामुनमुच्यसे।
उभे ते भद्रे नाम्नी ताभ्यां नः पाह्याञ्जन॥ १०॥

यदि। वा। असि। त्रैककुदम्। यदि। यामुनम्। उच्यसे।
उभे इति। ते। भद्रे इति। नाम्नी इति। ताभ्याम्। नः। पाहि।
आऽअञ्जन॥ १०॥

हे आञ्जन त्वं यदि वा त्रैककुदम् असि त्रिककुत्पर्वतसंबन्धि भवसि यदि वा यामुनम् यमुनायाः संबन्धि उच्यसे जनैः कथ्यसे ते उभे त्रैक-

---

१ $\overset{h}{B}$ D $\overset{m}{K}\overset{m}{S}$ सर्वा ज°. We with A R V. २ B K $\overset{h}{B}$ R °यंत्स°. We with A D $\overset{m}{K}\overset{m}{S}$ P $\overset{2}{P}$ J V.

1 S′ Kd °पर्वतपरि. 2 S′ Kd अस्मा°. 3 S′ Kd त्रैककु°.

कुदं यामुनम इति नाम्नी नामनी संज्ञे भद्रे कल्याण्यौ । ताभ्यां ना-) मभ्याम् हे आञ्जन नः अस्मान् पाहि रक्ष ॥

[इति] चतुर्थं सूक्तम् ॥

"वाताज्जातः" इति सूक्तेन उपनयनानन्तरम् आयुष्कामस्य माणवकस्य शङ्खमणिं संपात्य अभिमन्त्र्य बध्नीयात् । तद् उक्तं कौशिकेन । "उपनयनम्" [कौ० ७. ६] प्रक्रम्य "वाताज्जात इति कृशनम्" इति [कौ० ७. ९] ॥ "वारुणीं जलभये" [न० क० १७] इति विहितायां वारुण्याख्यायां महाशान्तौ शङ्खमणिबन्धनेपि एतत् सूक्तम् । उक्तं नक्षत्रकल्पे । "वाताज्जात इति शङ्खं वारुण्याम्" इति [न० क० १९] ॥

तत्र प्रथमा ॥

वाताज्जातो अन्तरिक्षाद् विद्युतो ज्योतिषस्परि ।
स नो हिरण्यजाः शङ्खः कृशनः पातंहसः ॥ १ ॥
वातात् । जातः । अन्तरिक्षात् । विऽद्युतः । ज्योतिषः । परि ।
सः । नः । हिरण्यऽजाः । शङ्खः । कृशनः । पातु । अंहसः ॥ १ ॥

वातात् वायोः जातः उत्पन्नः शङ्खः तथा अन्तरिक्षात् तदधिष्ठिताद् अन्तरिक्षलोकाद् विद्युतः तडितः । यद्वा विद्योतमानात् । ज्योतिषः ज्योतिर्मण्डलाच्च परि अधि उपरिभागे जातः । "पञ्चम्याः परावध्यर्थे" इति विसर्जनीयस्य सत्वम् । स तादृशो वातादिकारणकः हिरण्यजाः हिरण्यात् सुवर्णाद् उत्पन्नः कृशनः कर्शयिता शत्रूणां तनूकर्ता एवं महानुभावः शङ्खः अंहसः पापात् नः अस्मान् पातु रक्षतु ॥

द्वितीया ॥

यो अग्रतो रोचनानां समुद्रादधि जज्ञिषे ।
शङ्खेन हत्वा रक्षांस्यत्रिणो वि षहामहे ॥ २ ॥
यः । अग्रतः । रोचनानाम् । समुद्रात् । अधि । जज्ञिषे ।
शङ्खेन । हत्वा । रक्षांसि । अत्रिणः । वि । सहामहे ॥ २ ॥

हे शङ्ख यस्त्वं रोचनानाम् रोचमानानां भास्वराणां नक्षत्रादीनाम् अग्रतः अग्रे प्रमुखे वर्तमानः श्रेष्ठः समुद्रादधि समुद्रस्योपरि जज्ञिषे जायसे । ॥रुच दीप्तौ इत्यस्माद् "अनुदात्तेतश्च हलादेः" इति युच्॥ । तेन ज्योतिर्मयेन शङ्खेन त्वया रक्षांसि हत्वा अत्त्रिणः अदनशीलान् पिशाचादीन् वि सहामहे विशेषेण अभिभवामः । ॥अत्त्रिण इति । अदेस्त्रिनिश्च [उ०४, ६८] इति औणादिकस्त्रिनिप्रत्ययः॥ ॥

तृतीया ॥

शङ्खेनामीवामर्मतिं शङ्खेनोत सदान्वाः ।
शङ्खो नो विश्वभेषजः कृशनः पात्वंहसः ॥ ३ ॥

शङ्खेन । अमीवाम् । अमतिम् । शङ्खेन । उत । सदान्वाः ।
शङ्खः । नः । विश्वऽभेषजः । कृशनः । पातु । अंहसः ॥ ३ ॥

अमीवाम् रोगम् अमतिम् सर्वानर्थमूलम् अज्ञानं च शङ्खेन मणिरूपापन्नेन । विषहामहे इत्यनुषङ्गः । उत अपि च शङ्खेन सदान्वाः सदा नोनूयमानाः अलक्ष्मीः अभिभवामः । एवं विश्वभेषजः सर्वस्योपद्रवजातस्य निराकर्ता कृशनः । हिरण्यनामैतत् । विकारे प्रकृतिशब्दः । हिरण्याज्जातः शङ्खः नः अस्मान् अंहसः पापात् पातु रक्षतु ॥

चतुर्थी ॥

दिवि जातः समुद्रजः सिन्धुतस्पर्याभृतः ।
स नो हिरण्यजाः शङ्ख आयुष्प्रतरणो मणिः ॥ ४ ॥

दिवि । जातः । समुद्रऽजः । सिन्धुतः । परि । आऽभृतः ।
सः । नः । हिरण्यऽजाः । शङ्खः । आयुःऽप्रतरणः । मणिः ॥ ४ ॥

दिवि द्युलोके अन्तरिक्षे प्रथमं जातः उत्पन्नः ततः समुद्रजः समुद्रे जातः । ॥"सप्तम्यां जनेर्डः" इति डप्रत्ययः॥ । सिन्धुतः सिन्धोः समुद्रात् नदीमुखाद् वा पर्याभृतः परित आहृतः स तादृशः हि-

१ A B आयुःप्र°. D आयुप्र°. We with $\overset{h}{B}$ K $\overset{m}{K}$ R $\overset{m}{S}$ V.

रण्यजाः हिरण्याज्जातः शङ्खः शङ्खविकारो मणिः नः अस्माकम् आयुः-प्रतरणः आयुषः प्रवर्धयिता भवतु ॥

पञ्चमी ॥

समुद्राज्जातो मणिर्वृत्राज्जातो दिवाकरः ।
सो अस्मान्त्सर्वतः पातु हेत्या देवासुरेभ्यः ॥ ५ ॥

समुद्रात् । जातः । मणिः । वृत्रात् । जातः । दिवाऽकरः ।
सः । अस्मान् । सर्वतः । पातु । हेत्याः । देवऽअसुरेभ्यः ॥ ५ ॥

समुद्रात् अम्बुधेः । यद्वा समुद्रम् इति अन्तरिक्षनाम । अन्तरिक्षात् जातो मणिः मण्युपादानभूतः शङ्खः वृत्रात् लोकत्रयावरकाद् वृत्रासुरशरीरात् । यद्वा आवरकस्वभावाद् मेघात् । जातः विनिर्मुक्तो दिवाकरः सूर्यः । लुप्तोपमम् एतत् । तद्वत् प्रभातिशययुक्तोयं शङ्ख इत्यर्थः । [स] शङ्खविकारो मणिः हेत्यां[*] हननेन हेतुना देवासुरेभ्यः । उपलक्षणम् एतत् । देवासुरप्रभृतिभ्यो भयहेतुभ्यः सर्वतः सर्वस्माद् उपद्रवजाताद् अस्मान् पातु रक्षतु ॥

षष्ठी ॥

हिरण्यानामेकोसि सोमात् त्वमधि जज्ञिषे ।
रथे त्वमसि दर्शत इषुधौ रोचनस्त्वं प्र ण आयूंषि तारिषत् ॥ ६ ॥

हिरण्यानाम् । एकः । असि । सोमात् । त्वम् । अधि । जज्ञिषे ।
रथे । त्वम् । असि । दर्शतः । इषुऽधौ । रोचनः । त्वम् । प्र । नः । आयूंषि । तारिषत् ॥ ६ ॥

हे शङ्ख त्वं हिरण्यानाम् सुवर्णरजतादिभासुरद्रव्याणां मध्ये एकोसि मुख्यो भवसि । यतः त्वं सोमात् अमृतमयात् सोममण्डलाद् अधि जज्ञिषे जातोसि । अधिः पञ्चम्यर्थानुवादी ॥ तथा संग्रामेषु त्वं रथे दर्शतोसि दर्शनीयो भवसि । ⁂ दृशेरौणादिकः अतच् प्रत्ययः ⁂ ॥ त-

१ A B K R S तार्षत्. We with D K P P J V. २ P P J K सोमा ।. We with Sâyaṇa.

1 So S' Kd. 2 If Sâyaṇa had known हेत्याः to be a reading he would doubtless have preferred it to the instrumental हेत्या.

था इषुधौ शराधारभूते निषङ्गे म्रियमाणस्त्वं रोचनः रोचमानः दीप्यमानो दृश्यसे ॥ एवंमहानुभावः शङ्खः तद्विकारो मणिः नः अस्माकम् आयूंषि प्र तारिषत् प्रवर्धयतु । प्रपूर्वस्तिरतिर्वर्धनार्थः । तस्मात् लेटि अडागमः । "सिब्बहुलम्०" इति सिप् । तस्य आर्धधातुकत्वेन इटि कृते "०स च णिद् वक्तव्यः" इति वचनाद् वृद्धिः ॥

सप्तमी ॥

देवानामस्थि कृशनं बभूव तदात्मन्वच्चरत्यप्स्वन्तः ।
तत् ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय कार्शनस्त्वाभि रक्षतु ॥ ७ ॥

देवानाम् । अस्थि । कृशनम् । बभूव । तत् । आत्मन्ऽवत् । चरति । अप्ऽसु । अन्तः ।
तत् । ते । बध्नामि । आयुषे । वर्चसे । बलाय । दीर्घायुऽत्वाय । शतऽशारदाय । कार्शनः । त्वा । अभि । रक्षतु ॥ ७ ॥

देवानाम् इन्द्रादीनां संबन्धि यद् रक्षाकरम् अस्ति तत् कृशनम् शङ्खस्य कारणभूतं सुवर्णं बभूव । तत् कृशनम् आत्मन्वत् शङ्खरूपशरीरयुक्तं सत् अप्सु उदकेषु अन्तः चरति प्राण्यात्मना वर्तते । हे उपनीत तत् तथाविधं शङ्खरूपेण अवस्थितं कृशनं ते तव बध्नामि । किमर्थम् । [आयुषे] आयुरादिफलसिद्ध्यर्थम् । आयुः चिरकालजीवनम् । वर्चः शरीरकान्तिः । बलं प्रसिद्धम् ॥ आयुषे इत्युक्तमेव अर्थं विवृणोति दीर्घायुत्वायेति । दीर्घम् आयुरस्य दीर्घायुः । तस्य भावस्तत्त्वम् । छन्दसीणः [उ०१,२] इति एतेरुण् प्रत्ययः । आयुषो दैर्घ्यमपि स्पष्टयति शतशारदायेति । शरदा ऋतुना सह वर्तन्त इति शारदाः संवत्सराः । शतं शारदाः परिमाणम् अस्य तत् शतशारदम् । तावत्का-

---

१ $\overset{h}{B}DR\overset{m}{S}$ ३ for १. We with AK$\overset{m}{K}$V. २ ABB^{p} $\overset{h}{B}D\overset{m}{K}R\overset{m}{S}P\overset{2}{P}JV$ कर्शन°. We with Sâyaṇa whom KV follow. ३ P$\overset{2}{P}$J कृर्शनः. We with JK.

1 S′Kd प्रपूर्वास्तर°.

लव्यापिजीवनायेत्यर्थः । स कार्शनः कृशनसंबन्धी मणिः हे माणवक त्वा त्वाम् अभि रक्षतु सर्वतः पालयतु ॥

इत्यथर्ववेदार्थप्रकाशे चतुर्थे काण्डे द्वितीयोनुवाकः ॥

"अनड्वान् दाधार" इति आद्येन सूक्तेन अनडुत्सवे निरुप्तहविरभिमर्शनम् संपातम् दातृवाचनं च कुर्यात् । तद् आह कौशिकः । "अनड्वान् [४.११] इत्यनड्वाहम् सूर्यस्य रश्मीन् [४.३८.५-७] इति कर्कीम्"[1] [कौ° ८.७] इति ॥ अभिमर्शनादीनां[2] सूत्रं तु "आशानाम्" [१.३१] इति सूक्त एव उदाहृतम् ॥

तत्र प्रथमा ॥

अनड्वान् दाधार पृथिवीमुत द्यामनड्वान् दाधारोर्वन्तरिक्षम् ।
अनड्वान् दाधार प्रदिशः षडुर्वीरनड्वान् विश्वं भुवनमा विवेश ॥ १ ॥

अनड्वान् । दाधार् । पृथिवीम् । उत । द्याम् । अनड्वान् । दाधार् । उरु । अन्तरिक्षम् ।
अनड्वान् । दाधार् । प्रऽदिशः । षट् । उर्वीः । अनड्वान् । विश्वम् । भुवनम् । आ । विवेश् ॥ १ ॥

अनः शकटं वहतीति अनड्वान् शकटवहनसमर्थो वृषभः । सोयं कर्षणभारवहनादिना पृथिवीम् भूमिं दाधार धारयति पोषयति । धृञ् धारणे इत्यस्मात् छान्दसो वर्तमाने लिट् । तुजादित्वाद् अभ्यासदीर्घत्वम् । यद्वा अनडुच्छब्देन वृषरूपो धर्मोभिधीयते । धर्मो[3] वृषभाकृतिर्भूत्वा पृथिव्यादिधारणं करोतीति योज्यम् । श्रूयते हि । "धर्मो विश्वस्य जगतः प्रतिष्ठा" इति [तै° आ° १०.६३] ॥ उत द्याम् द्युलोकं स्वर्गलोकमपि स एव दाधार । कर्षणादिनिष्पन्नेन चरुपुरोडाशादिहविषा द्युलोकं पोषयतीत्यर्थः ॥ तथा उरु विस्तीर्णम् अन्तरिक्षलोकमपि स धारयति । [अनड्वान्] प्रदिशः प्राच्याद्या महादिशश्च [दाधार]

---

१ $\overset{h}{B}$ D $\overset{m}{S}$ ३ for १. We with K $\overset{m}{K}$ R V.

---

1 S′ Kd कर्किम्. We with *Kaus'ika*. 2 S′ Kd अभिमर्शना अभिमर्शनादीनां. 3 S′ Kd धर्मवृष°.

धारयति ॥ षडुर्वीः उर्वीशब्दवाच्याः "द्यौश्च पृथिवी च अहश्च रात्रिश्च आपश्चौषधयश्च" [आश्व० १. २] इति षट्संख्याकाः सन्ति । ता अपि असौ धारयति । पृथिव्या द्यो[1]श्च पृथगुपादानाद् इतरचतुष्टयापेक्षम् उर्वीग्रहणम् ॥ इत्थं ब्रह्मणा सृष्टः अनड्वान् विश्वम् सर्वं [भुवनम्] पृथिव्यादिभ्यः अन्यमपि लोकम् आ विवेश रक्षणार्थं प्रविश्य वर्तते ॥

द्वितीया ॥

अनड्वानिन्द्रः स पशुभ्यो वि चष्टे त्रयांछुक्रो वि मिमीते अध्वनः ।
भूतं भविष्यद् भुवना दुहानः सर्वां देवानाँ चरति व्रतानि ॥ २ ॥

अनड्वान् । इन्द्रः । सः । पशुऽभ्यः । वि । चष्टे । त्रयान् । शुक्रः । वि । मिमीते । अध्वनः ।
भूतम् । भविष्यत् । भुवना । दुहानः । सर्वां । देवानाम् । चरति । व्रतानि ॥ २ ॥

सः प्रागुक्तः अनड्वान् पशुभ्यः पशवो गोमहिषाद्याः । ताद्र्थ्ये चतुर्थी । तेषाम् अर्थे इन्द्रः सन् वि चष्टे प्रकाशते । रिरंसावशाद् इन्द्रवत् पशूनां दृष्टौ भासत इत्यर्थः । यद्वा । अयम् अनड्वान् इन्द्र एव । इन्द्रो यथा वृष्टिजलसेकेन चराचरात्मकं सर्वं जगद् उत्पादयति एवम् अनड्वानपि रेतःसेकेन पशून् उत्पादयन् तज्जन्यपयोदध्यादिद्रव्येण कृत्स्नं जगद् उत्पादयतीति एककार्यकरत्वाद् अनयोरभेदः ॥ स च अन्येभ्यः पशुभ्यः सकाशात् वि चष्टे वीर्यवत्त्वेन प्रकाशते । चष्टिः पश्यतिकर्मा ॥ स च शक्रः सर्वकर्मसु शक्तः इन्द्रात्मको वा स्तियान् । स्तिया आपो भवन्ति स्थायनात् [नि० ६. १७] इति यास्कवचनात् स्थायतेरेतद् रूपम् । अत्र तु अयम् अर्थः । स्तियान् संस्थानप्रभवान् अध्वनः अध्ववद् अविच्छिन्नान् पशुसंतानान् वि मिमीते विशेषेण निर्मिमीते । माङ् माने शब्दे च ।

१ K wrongly त्रयान्; a mal-adoption of Sâyaṇa's reading. We with A B B^{p} B^{h} D K^{m} R S^{m} P P^{2} J V.

1 S' Kd द्यौश्च.

शपः श्लुः । "भृञाम इत्" इति अभ्यासस्य इत्त्वम् ॥ एवम् इन्द्रात्मकोनड्वान् भूतम् भूतकालावच्छिन्नं वस्तु भविष्यत् आगामिकालावच्छिन्नं वस्तु भुवना भुवनानि वर्तमानकालावच्छिन्नसङ्गावानि च वस्तूनि दुहानः उत्पादयन् देवानाम् इन्द्राद् अन्येषामपि व्रतानि कर्माणि सर्वा सर्वाणि चरति अनुतिष्ठति । भुवना सर्वा इत्युभयत्र "शेश्छन्दसि बहुलम्" इति शेर्लोपः ॥

तृतीया ॥

इन्द्रो जातो मनुष्येष्वन्तर्घर्मस्तप्तश्चरति शोशुचानः ।
सुप्रजाः सन्त्स उदारे न सर्षद् यो नाश्नीयादनडुहो विजानन् ॥ ३ ॥

इन्द्रः । जातः । मनुष्येषु । अन्तः । घर्मः । तप्तः । चरति । शोशुचानः ।
सुऽप्रजाः । सन् । सः । उत्ऽआरे । न । सर्षत् । यः । न । अश्नीयात् ।
अनडुहः । विऽजानन् ॥ ३ ॥

मनुष्येषु मनोरपत्येषु मनुष्यजातीयेषु अन्तः मध्ये तावत् अनड्वान् प्रागुक्तरीत्या इन्द्रो जातः ॥ तथा सोऽनड्वान् घर्मः दीप्तः सूर्यः सन् तप्तः । कर्तरि क्तः । कृत्स्नं जगत् तपन् संतापयुक्तं कुर्वन् शोशुचानः अत्यर्थं दीप्यमानः चरति वियति संचरति । यद्वा घर्मः प्रवर्ग्यः तप्तः वैकङ्कतखादिरादिभिरिध्मैः[1] संतप्तः शोशुचानः अत्यर्थं शोचन् चरति वर्तते । तादृग्घर्मरूपः अनड्वान् जात इत्यर्थः । सोपि हि कर्षणादिव्यापारजनितश्रमेण तप्तः संतप्तगात्रः अतिशयितशोकयुक्तश्च सन् चरति । अतस्तप्तत्वादिधर्मसामान्याद् अनडुहो घर्मतादात्म्यम् ॥ इत्थं नः अस्माकं संबन्धिनः अनडुहः दीयमानस्य माहात्म्यं विजानन् विशेषेण अवगच्छन् यः प्रतिग्रहीता अश्नीयात् भुञ्जीत स सुप्रजाः शोभनप्रजोपेतः सन् आरे दूरे देहावसानकाले उत् अस्माच्छरीरात् उत्क्रान्तः न सं[2] सर्षत् न संसरति पुनः संसारधर्मान् न प्राप्नोति । किंतु सूर्यादिलोकं प्राप्नोतीत्यर्थः ॥ अत एव सोमयागविशेषस्य अनडुहां लोकः प्रा-

1 S'Kd वैकंकते°. 2 Sâyaṇa's text is: °प्रजाः सं स उदारे न सर्पद् योनोश्नी°.

प्यत्वेन आम्नायते। "अग्निष्टोमेन अनडुहो लोकम् आप्नोति ज्योतिष्मतो लोकान् जयति" इति ॥ सुप्रजा इति। "नित्यम् असिच् प्रजामेधयोः" इति असिच् समासान्तः। सर्षत् इति। सृ गतौ इत्यस्मात् लेटि अडागमः। "सिब्बहुलम्०" इति सिप् ॥

चतुर्थी ॥

अनड्वान् दुहे सुकृतस्य लोक ऐनं पाययति पवमानः पुरस्तात्।
पर्जन्यो धारा मरुत ऊधो अस्य यज्ञः पयो दक्षिणा दोहो अस्य ॥ ४ ॥

अनड्वान्। दुहे। सुऽकृतस्य। लोके। आ। एनम्। पाययति। पवमानः। पुरस्तात्।

पर्जन्यः। धाराः। मरुतः। ऊधः। अस्य। यज्ञः। पयः। दक्षिणा। दोहः। अस्य ॥ ४ ॥

सुकृतस्य यागादिजनितपुण्यस्य फलभूते लोके इन्द्रादिदेवतात्मकः अयम् अनड्वान् दुहे अपेक्षितम् अक्षयं फलं दुग्धे। "लोपस्त आत्मनेपदेषु" इति तलोपः। तत्प्रकारमेव विभज्य दर्शयति। पुरस्तात् पूर्वं पवमानः पवित्रेण शोध्यमानः अमृतमयः सोमः एनम् अनड्वाहम् आ पाययति आप्यायितं रसभरितं करोति ॥ ततश्च पर्जन्यः वृष्टिप्रेरको देवो धारा भवति ॥ मरुतः एकोनपञ्चाशत्संख्या देवगणाः अस्य अनडुहः ऊधो भवन्ति[1] ॥ योऽयं कृतः सवयज्ञः स एव पयः दोह्यं भवति ॥ येयं तस्मिन् यज्ञे दत्ता दक्षिणा सा अस्य अनडुहो [दोहः] दोहक्रिया संपद्यते ॥ इत्थम् इन्द्रादिदेवतात्मकस्य अनडुहो दोहोपि देवतात्मकः संपन्न इति अक्षयफलत्वम् ॥

पञ्चमी ॥

यस्य नेशे यज्ञपतिर्न यज्ञो नास्य दाता शे न प्रतिग्रहीता।
यो विश्वजिद् विश्वभृद् विश्वकर्मा धर्मं नो ब्रूत यतमश्चतुष्पात् ॥ ५ ॥

1 So S' Kd.

यस्यं । न । ईशें । यज्ञऽपतिः । न । यज्ञः । न । अस्य । दाता । ईशें । न ।
प्रतिऽग्रहीता ।
यः । विश्वऽजित् । विश्वऽभृत् । विश्वऽकर्मा । घर्मम् । नः । ब्रूत । यतमः ।
चतुःऽपात् ॥ ५ ॥

यस्य देवतात्मकस्य अनडुहः । ⧖ "अधीगर्थदयेशाम्०" इति कर्मणि षष्ठी ⧖ । यम् इत्यर्थः । यज्ञपतिः यजमानः नेशे नेष्टे । ⧖ "लोपस्त आत्मनेपदेषु" इति तलोपः । यज्ञपतिः । "पत्यावैश्वर्ये" इति पूर्वपदप्रकृतिस्वरत्वम् ⧖ । यज्ञः यागक्रिया च नेशे नेष्टे । दाता प्रतिग्रहीता च अस्य अनडुहो नेशे नेष्टे । सर्वत्र ईशितृत्वमेव अनडुहः न ईशितव्यत्वम् इत्युक्तम् अर्थं समर्थयते । य इन्द्रादिदेवतारूपः अनड्वान् विश्वजित् विश्वस्य सर्वस्य जेता विश्वभृत् विश्वस्य सर्वस्य वाय्वात्मना भर्ता यद्वा अन्नप्रदानेन पोषयिता । विश्वकर्मा । "प्रजापतिः परमेष्ठी" [७] इत्याम्नास्यते तदभिप्रायेणेदम् । विश्वं सर्वं जगत् कर्म कर्तव्यं यस्य स विश्वकर्मा । तथा यतमः यज्जातीयः चतुष्पात् पादचतुष्टयोपेतः सन् नः अस्मभ्यं घर्मम् दीप्यमानम् आदित्यं ब्रूत ब्रूते कथयति । ⧖ लटि टेरेत्वाभावश्छान्दसः ⧖ । तत्स्वरूपम् उपदिशतीत्यर्थः । नास्य दातेति संबन्धः । ⧖ यतम इति । "वा बहूनां जातिपरिप्रश्ने०" इति यच्छब्दात् डतमच् ⧖ ॥

षष्ठी ॥

येनं देवाः स्वरारुरुहुर्हित्वा शरीरममृतस्य नाभिम् ।
तेनं गेष्म सुकृतस्यं लोकं घर्मस्यं व्रतेन तपसा यशस्वंः ॥ ६ ॥

येनं । देवाः । स्वः । आऽरुरुहुः । हित्वा । शरीरम् । अमृतस्य । नाभिम् ।
तेनं । गेष्म । सुऽकृतस्यं । लोकम् । घर्मस्यं । व्रतेनं । तपसा । यशस्वंः ॥ ६ ॥

येन देवतात्मना अनडुहा देवाः [स्वः] स्वर्गं लोकम् [आरुरुहुः] आरूढवन्तः । तत्प्रकार उच्यते । पार्थिवम् एतच्छरीरं हित्वा त्यक्त्वा । ⧖ ओ-

---

१ So P P² J K. ² B D R S^m देवा स्वरा°. We with A K K^m V.

हाक् त्यागे इत्यस्मात् क्त्वाप्रत्यये "जहातेश्च क्ति" इति हित्वम्॥ । अमृतस्य अमरणस्य नाभिम् बन्धकम् । मोक्षद्वारभूतम् इत्यर्थः । तेन अनडुहा सुकृतस्य पुण्यस्य फलभूतं लोकं जेष्म जयेम । ॥जयतेर्लिङि "बहुलं छन्दसि" इति शपो लुक् । "सिञ्बहुलम्०" इति सिप्॥ । कथंभूताः सन्तः । घर्मस्य दीप्यमानस्य सूर्यस्य संबन्धिना व्रतेन कर्मणा तपसा दीक्षादिनियमजनितेन अनशनादिना च यशस्यवः । "न तस्येशे कश्चन तस्य नाम महद् यशः" [तै० आ० १०. १. २] इति यशःशब्दस्य अद्वितीयब्रह्मपरत्वेन श्रुतत्वाद् अत्रापि यशःशब्देन तद् विवक्ष्यते । यशःशब्दोपलक्षितं निरतिशयं मोक्षसुखम् आत्मन इच्छन्तः ॥ ॥यशःशब्दात् "सुप आत्मनः क्यच्" । "क्याच्छन्दसि" इति उप्रत्ययः॥ ॥

इन्द्रो॑ रू॒पेणा॒ग्निर्व॑हे॒न प्र॒जाप॑तिः परमे॒ष्ठी वि॒राट्।
वि॒श्वान॑रे अक्रमत वैश्वान॒रे अ॑क्रमतानडु॒ह्य॑क्रमत।
सो॑ऽहंहयत॒ सो॑ऽधारयत ॥ ७ ॥

इन्द्रः॑। रू॒पेण॑। अ॒ग्निः॑। वहे॑न। प्र॒जाऽप॑तिः। प॒र॒मे॒ऽष्ठी। वि॒ऽराट्।
वि॒श्वान॑रे। अ॒क्र॒म॒त॒। वै॒श्वा॒न॒रे। अ॒क्र॒म॒त॒। अ॒न॒डु॒हि॑। अ॒क्र॒म॒त॒।
सः। अ॒हं॒ह॒य॒त॒। सः। अ॒धा॒र॒य॒त॒ ॥ ७ ॥

मध्यमेतदनडुहो यत्रैष वहु आहितः।
एतावदस्य प्राचीनं यावान् प्रत्यङ् समाहितः ॥ ८ ॥

मध्यम्। एतत्। अनडुहः। यत्र। एषः। वहः। आऽहितः।
एतावत्। अस्य। प्राचीनम्। यावान्। प्रत्यङ्। समऽआहितः ॥ ८ ॥

सप्तमी ॥ रूपेण आकृत्या अयम् अनड्वान् इन्द्रो भवति ॥ वहेन युगवहेन प्रदेशेन स्कन्धेन अग्निः अग्न्यात्मको भवति । "अग्निदग्धमिव वा

---

१ A $\overset{h}{B}$ °क्रमत्. We with B D K $\overset{m}{K}$ R $\overset{m}{S}$ P $\overset{2}{P}$ J V. २ $\overset{2}{P}$ अहंहयत and अधारयत.

1 S' Kd श्रवः° for यशः°.

अस्य वहं भवति" इति ब्राह्मणम् । वहत्यनेनेति वहः । ⁂"गो-चरसंचर०" इत्यादिना करणे घप्रत्ययान्तो निपातितः⁂ ॥ प्रजापतिः प्रजानां पतिः प्रजासृष्टिकर्ता । परमेष्ठी परमे सत्यलोके तिष्ठतीति परमेष्ठी आदिब्रह्मा । विराट् स्थूलप्रपञ्चस्य कर्ता "तस्माद् विराड् अजायत" [तै० आ० ३.१२.२] इति श्रुतिप्रसिद्धः । एते त्रयः क्रमेण विश्वानरादिषु व्याप्य वर्तन्ते । तत्र विश्वानर इति सर्वनरात्मकस्य "विश्वानरस्य वस्पतिम् अ-नानतस्य शवसः" [ऋ० ८. ६८. ४] इति श्रुत्यन्तरप्रसिद्धस्य देवस्य सं-ज्ञा । तस्मिन् प्रजापतिः अक्रमत तादात्म्येन प्रविष्टः । वैश्वानर इति विश्वनरहितः अग्निः । तत्र परमेष्ठी अक्रमत तदात्मना संक्रान्तवान् । उ-क्तप्रभावे अनडुहि विराड् अक्रमत तद्रूपेण प्राविशत् । अतः अयम् अ-नड्वान् विराडात्मक इत्यर्थः ॥ यद्वा इन्द्रो देवः रूपेण स्वकीयेन वि-श्वानरे देवे अक्रमत । अग्निर्वहेन वहनसामर्थ्येन वैश्वानरे अक्रमत । प-रमेष्ठी परमे सत्यलोके स्थितः प्रजापतिः विराट् । ⁂"सुपां सुलु-क्०" इति तृतीयाया लुक्⁂ । विराजा अन्नेन अनडुहि अक्रम-त ॥ अतः प्रजापत्यात्मकोयम् अनड्वान् इति स्तुतिः ॥

अष्टमी ॥ सः अनडुच्छरीरे प्रविष्टः प्रजापतिः तस्य अनडुहः एतत् मध्यम् अङ्गम् अहंहयत दृढम् अकरोत् । तथा स प्रजापतिः अधार-यत[2] तद् मध्यं भारवहनसमर्थम् अकरोत् ॥ तद् मध्यं विशिनष्टि । यत्र यस्मिन् मध्ये पृष्ठभागे एष वहः भारः आहितः स्थापितः । एतद् मध्यम् इति संबन्धः । भारवहनप्रदेशस्य मध्यत्वम् उपपादयति । ए-तावद् इति । अस्य अनडुत्संबन्धिनो मध्यदेहस्य प्राचीनम् प्राग्भागः एतावत् एतत्परिमाणयुक्तम् प्रत्यङ् प्रत्यग्भागो यावान् यत्परिमाणवान् स-माहितः सम्यङ् निर्वर्तितः[3] । एवं प्राक्प्रत्यग्भागावुभावपि समानौ । त-योर्मध्यदेशेन भारं वहतीत्यर्थः ॥

नवमी ॥

यो वेदानड्वाहो दोहान् सप्तानुपदस्वतः ।

---

1 All our MSS. and Vaidikas as well as the *Sarvânukrama* end stanza 7 with अक्रमत, and not with अधारयत. 2 S′ Kd अधारयत्. 3 S′ Kd निवर्तितः.

प्रजां च लोकं चाप्नोति तथा सप्तऋषयो विदुः ॥ ९ ॥

यः। वेद। अनडुहः। दोहान्। सप्त। अनुपदस्वतः।
प्रऽजाम्। च। लोकम्। च। आप्नोति। तथा। सप्तऽऋषयः। विदुः॥ ९॥

यः पुरुषः अनडुहः बलीवर्दस्य [सप्त] सप्तसंख्याकान् अनुपदस्वतः क्षयरहितान् दोहान् व्रीह्यादिसप्तग्राम्यौषधिरूपान् वेद जानाति। यद्वा अनडुहः प्रजापतिरूपत्वस्य उक्तत्वात् तत्सृष्टौ लोकसमुद्रादयो ये सप्तसंख्याकाः सन्ति तान् सर्वान् सप्तधा विभक्तान् अनडुहो दोहान् [यो] जानाति स विद्वान् प्रजाम् पुत्रपौत्रादिकां यागादिभिः प्राप्यं [लोकम्] स्वर्गादिलोकं च प्राप्नोति। यथैतद् उक्तम् तथा तेनैव प्रकारेण अनडुन्माहात्म्यं सप्तर्षयो विदुः जानन्ति॥ ते च आश्वलायनेन अनुक्रान्ताः।

विश्वामित्रो जमदग्निर्भरद्वाजोथ गौतमः।
अत्रिर्वसिष्ठः कश्यप इत्येते सप्तऋषयः॥

इति [आश्व० प० १२. १]। सप्तर्षिप्रख्यानामेव इयम् अनडुहि प्रजापतिविद्या नान्येषाम् इति विद्यास्तुतिः॥

दशमी॥

पद्भिः सेदिमवक्रामन्निरां जङ्घाभिरुत्खिदन्।
श्रमेणानड्वान् कीलालं कीनाशश्चाभि गच्छतः॥ १०॥

पत्ऽभिः। सेदिम। अवऽक्रामन्। इराम्। जङ्घाभिः। उत्ऽखिदन्।
श्रमेण। अनड्वान्। कीलालम्। कीनाशः। च। अभि। गच्छतः॥ १०॥

अयम् प्रजापत्यात्मकः अनड्वान् पद्भिः पादैश्चतुर्भिः सेदिम् अवसादकरीम् अलक्ष्मीम् अवक्रामन् अवाङ्मुखीम् अधितिष्ठन् इराम् भूमिं जङ्घाभिः उत्खिदन् कर्षणेन उद्भिन्दन् स्वकीयेन श्रमेण कर्षणादिव्यापारज-

---

१ K V सप्तर्ष°. We with A B B D K R S P P J. २ P विदुः. ३ K कीनाशस्याभि, adopted from Sâyaṇa, and yet with the old accent! We with A B B D K R S P P J V. ४ P ईरान्. P J K इरान्. We with Sâyaṇa. ५ K कीनाशस्य for कीनाशः। च। with Sâyaṇa.

---

1 S' Kd °म्योषधि°. 2 S' Kd सप्तर्ष°.

नितदुःखेन अभि गच्छतः स्वाभिमुखं गच्छतः कीनाशस्यँ कर्षकस्य कीलालम् अन्नम् । प्रयच्छतीत्यर्थः ॥

एकादशी ॥

द्वादश॒ वा एता रात्री॒र्व्रत्या॑ आहुः प्र॒जाप॑तेः ।
तत्रोप॒ ब्रह्म॒ यो वेद॒ तद् वा अ॑न॒ड्वाहो॑ व्र॒तम् ॥ ११ ॥
द्वादश । वै । एताः । रात्रीः । व्रत्याः । आहुः । प्रजाऽपतेः ।
तत्र । उप । ब्रह्म । यः । वेद । तत् । वै । अनड्वाहः । व्रतम् ॥ ११ ॥

अनडुहि संक्रान्तस्य यज्ञात्मकस्य प्रजापतेः [द्वादश वा एता] व्रत्याः व्रतार्हा द्वादशसंख्याका रात्रीः आहुः कथयन्ति । वैशब्दः श्रुत्यन्तरप्रसिद्धिं द्योतयति । "द्वादश रात्रीर्दीक्षितः स्यात् । द्वादश मासाः संवत्सरः । संवत्सरो विराट् । विराजम् आप्नोति" इति [तै० सं० ५. ६. ७. १] । "तस्माद् दीक्षितो द्वादशाहं भृतिं वन्वीत" इति च ॥ तत्र तावति काले अनडुद्रूपम् उपगतं प्रजापत्यात्मकं ब्रह्म यो वेद विद्यात् स एवं अस्मिन् अनडुत्सवे अधिक्रियत इत्यर्थः । तत् एतत् ज्ञानम् अनडुहः प्रजापत्यात्मकस्य व्रतम् अनुष्ठेयं कर्म ॥

द्वादशी ॥

दुहे॒ सा॒यं दुहे॒ प्रा॒तर्दुहे॒ म॒ध्यंदि॑नं॒ परि॑ ।
दोह्रा॒ ये अ॑स्य सं॒यन्ति॒ तान् वि॒द्मानु॑पदस्वतः ॥ १२ ॥
दुहे । सायम् । दुहे । प्रातः । दुहे । मध्यंदिनम् । परि ।
दोह्राः । ये । अस्य । सम्ऽयन्ति । तान् । विद्म । अनुपऽदस्वतः ॥ १२ ॥

सायम् सायाह्ने उक्तलक्षणम् अनड्वाहं दुहे । देवतारूपेण उपासीनस्तत्फलं प्राप्नोमीत्यर्थः । तथा प्रातःकालेपि दुहे । मध्यन्दिनं परि मध्याह्नेपि दुहे । ✠ "लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः" इति लक्षणे परेः कर्मप्रवचनीयत्वम् । तद्योगाद् मध्यंदिनम् इति द्वि-

---

१ P J वि॒द्म. We with $\dot{P}$ K.

---

1 S′ Kd °क्षितस्यात्. 2 S′ Kd एकस्मिन् for एव अस्मिन्.

तीया ॥ । [यद्वा] सायमादिकालत्रयेपि उक्तरीत्या अनड्वान् दुहे । सवयज्ञानुष्ठातुः फलानि दुग्धे । ॥ "लोपस्त आत्मनेपदेषु" इति तलोपः ॥ । एवम् अस्य अनडुहो दोहा ये संयन्ति फलेन संगच्छन्ते अनुपदस्वतः । उपदासः क्षयः । तद्रहितांस्तान् दोहान् विद्म जानीमः ॥ ॥ "विदो लटो वा" इति मसो मादेशः ॥ ॥

[इति] तृतीयेनुवाके प्रथमं सूक्तम् ॥

"रोहिण्यसि" इति सूक्तेन शस्त्राद्यभिघातजनितरुधिरप्रवाहनिवृत्तये अस्थ्यादिभङ्गनिवृत्तये च लाक्षोदकं कथितम् अभिमन्त्र्य उषःकाले क्षतप्रदेशम् अवसिञ्चेत् ॥

तथा अनेन सूक्तेन घृतदुग्धम् अभिमन्त्र्य क्षताङ्गं पुरुषं पाययेत् ॥

तथा तेनैव द्रव्येण क्षतदेशम् अभ्यञ्ज्यात् ॥

सूत्रितं हि । "रोहिणीत्यवनक्षत्रेवसिञ्चति पृषातकं पाययत्यभ्यनक्ति" इति [कौ० ४, ४] ॥

तत्र प्रथमा ॥

रोहण्यसि रोहण्यस्थ्नश्छिन्नस्य रोहणी ।
रोहयेदमरुन्धति ॥ १ ॥

रोहणी । असि । रोहणी । अस्थ्नः । छिन्नस्य । रोहणी ।
रोहय । इदम् । अरुन्धति ॥ १ ॥

हे रोहिणि लोहितवर्णे लाक्षे । रोहितशब्दात् "वर्णाद् अनुदात्तात् तोपधात् तो नः" इति ङीप् तकारस्य च नकारः ॥ । त्वं [रोहिणी] रोहित्री प्ररोहयित्री असि भवसि । अतस्त्वं खड्गादिधारया छिन्नस्य अङ्गस्य सकाशात् प्रवहतः अस्नः असृजः । "पद्दन्०" इत्यादिना असृक्शब्दस्य असन् आदेशः ॥ । रुधिरस्य रोहिणी रो-

१ K रोहिण्यसि रोहिण्यस्नश्छिन्नस्य रोहिणी with Sâyaṇa. We with A B B^{p} B^{h} D K^{m} R S^{m} P P^{2} J V.

1 Our MSS. of *Kaus'ika* read रोहिण्यसि, but Dârila and the *Kes'avî* explain रोहण्यसि.

धयित्री स्वस्थाने स्थापयित्री भव । हे अरुन्धति अन्यैरनभिभूते अरोधनशीले वा देवि इदम् स्रुतरक्तम् अङ्गं रोहय प्ररोहय । संपूर्णरुधिरम् अव्रणं कुर्वित्यर्थः ॥

द्वितीया ॥

यत् ते रिष्टं यत् ते द्युत्तमस्ति पेष्टृ त आत्मनि ।
धाता तद् भद्रया पुनः सं दधत् परुषा परुः ॥ २ ॥
यत् । ते । रिष्टम् । यत् । ते । द्युत्तम् । अस्ति । पेष्टृम् । ते । आत्मनि ।
धाता । तत् । भद्रया । पुनः । सम । दधत् । परुषा । परुः ॥ २ ॥

हे शस्त्राद्यभिहत ते तव यद् अङ्गं रिष्टम् हिंसितम् यच्च ते त्वदीयम् अङ्गं द्युत्तम् द्योतितं शस्त्रप्रहारादिजनितवेदनया प्रज्वलितमिव [अस्ति] भवति । तथा ते तव आत्मनि शरीरे प्रेष्ठम् प्रियतमं यद् अन्यद् अङ्गं मुद्गरप्रहारादिभिर्भग्नं भवति धाता सर्वस्य जगतो विधाता देवः तत् सर्वम् अङ्गं भद्रया कल्याण्या लाक्षारूपया ओषध्या परुषा पर्वणा परुः अन्यत् पर्व भग्नं पुनः सं दधत् संदधातु संयुनक्तु ॥

तृतीया ॥

सं ते मज्जा मज्ज्ञा भवतु समु ते परुषा परुः ।
सं ते मांसस्य विस्रस्तं समस्थ्यपि रोहतु ॥ ३ ॥
सम । ते । मज्जा । मज्ज्ञा । भवतु । सम । ऊं इति । ते । परुषा । परुः ।
सम । ते । मांसस्य । विऽस्रस्तम् । सम । अस्थि । अपि । रोहतु ॥ ३ ॥

हे प्रहृत ते तव शरीरस्थो मज्जा एतत्संज्ञः षष्ठो धातुः प्रहारेण विभक्तः मज्ज्ञा मज्जाख्यधातुना प्रहारविभक्तेन शं सुखं यथा भवति तथा भवतु संयुक्तो भवतु । यद्वा भवतु प्राप्नोतु । भू प्राप्तौ ।

---

१ K प्रेष्ठम् with Sâyaṇa. We with A B B^{p} B^{h} D K^{m} R S^{m} P P^{2} J V. २ K प्रेष्ठम्. ३ D R मन्या. We with A B B^{p} B^{h} K^{m} S^{m} P P^{2} J V. ४ K K^{m} V विश्रंस्तं. We with A B B^{p} B^{h} D R S^{m} P P^{2} J. ५ P P^{2} J मज्ञा. ६ K °श्रंस्तम्.

---

1 S′ Kd श्रुत°.

व्यत्ययेन परस्मैपदम् ॥ तथा ते त्वदीयशरीरस्य परुषा भग्नेन पर्वणा परुः भग्नं पर्व शँम् सुखं यथा भवति तथा प्राप्नोतु। संधीयताम् इत्यर्थः ॥ ते तव शरीरगतस्य मांसस्य प्रहाराभिघातेन यद् विस्रस्तं तत् शँम् सुखं यथा भवति तथा [अपि रोहतु] अपिरूढं प्ररूढं पुनरुत्पन्नं भवतु। तथा तव शरीरगतं यद् अस्थि भग्नम् आसीत् तच्च [शँम्] सुखेन प्ररूढं संहितं भवतु ॥

चतुर्थी ॥

मज्जा मज्ज्ञा सं धीयतां चर्मणा चर्म रोहतु।
असृक् ते अस्थि रोहतु मांसं मांसेन रोहतु ॥ ४ ॥

मज्जा। मज्ज्ञा। सम्। धीयताम्। चर्मणा। चर्म। रोहतु।
असृक्। ते। अस्थि। रोहतु। मांसम्। मांसेन। रोहतु ॥ ४ ॥

मज्जाख्यो धातुः मज्ज्ञा मज्जधातुना सं धीयताम् संहितः संयुक्तो भवतु। चर्मणा शस्त्रादिप्रहारभिन्नेन चर्म रोहतु प्ररूढं भवतु। संयुज्यताम् इत्यर्थः। असृक् रक्तं ते त्वच्छरीरगतं यद् अस्थ्नः[1] सकाशात् विश्लिष्टं पुनस्तद् अस्थि रोहतु प्राप्नोतु। मन्त्रौषधिसामर्थ्येन संयुज्यताम् इत्यर्थः ॥ यद्वा चर्मणा चर्मेति तृतीयान्तस्य तत्र दृष्टत्वात् असृजा अस्थ्ना इति तृतीयान्तं पदम् अध्याहृत्य योज्यम्। [असृजा] असृग् रोहतु अस्थ्ना अस्थि रोहत्विति। शिष्टं निगदसिद्धम् ॥

पञ्चमी ॥

लोम लोम्ना सं कल्पया त्वचा सं कल्पया त्वचम्।
असृक् ते अस्थि रोहतु च्छिन्नं सं धेह्योषधे ॥ ५ ॥

लोम। लोम्ना। सम्। कल्पय। त्वचा। सम्। कल्पय। त्वचम्।
असृक्। ते। अस्थि। रोहतु। छिन्नम्। सम्। धेहि। ओषधे ॥ ५ ॥

हे लाक्षात्मिके ओषधे शरीरस्थं लोम लोम्ना प्रहारविश्लिष्टेन सं कल्पय संकृत्तं पुनः स्वस्थानगतं कुरु ॥ तथा त्वचमपि विश्लिष्टत्वचा सं

1 S' Kd ऋग्भिः ते त्वच्छरीरगतं प्र अस्थ्नः for रक्तं ते त्वच्छरीरगतं यत् अस्थ्नः.

कल्पय संकॢप्तां कुरु ॥ असृक् ते अस्थि रोहतु इति पूर्ववत् । एवम् अन्यदपि छिन्नम् भग्नं यद्यद् अङ्गम् अस्ति तत् सर्वं सं धेहि संहितं संश्लिष्टं व्यापारक्षमं कुर्वित्यर्थः ॥

षष्ठी ॥

स उत् तिष्ठ प्रेहि प्र द्रव रथः सुचक्रः सुपविः सुनाभिः ।
प्रति तिष्ठोर्ध्वः ॥ ६ ॥

सः । उत् । तिष्ठ । प्र । इहि । प्र । द्रव । रथः । सुऽचक्रः । सुऽपविः । सुऽनाभिः ।
प्रति । तिष्ठ । ऊर्ध्वः ॥ ६ ॥

हे शस्त्रप्रहारादिभिर्विश्लिष्टावयव पुरुष स तादृशः मन्त्रौषधिसामर्थ्येन संहितगात्रः सन् उत् तिष्ठ शयनाद् उन्नच्छ । प्रेहि तस्मात् स्थानात् प्रगच्छ । प्र द्रव प्रधाव वेगेन गच्छ । उक्तम् अर्थं दृष्टान्तेन द्रढयति रथ इत्यादिना । सुचक्रः सुदृढैश्चक्रैर्युक्तः सुपविः सुदृढः पविर्नेमिश्चक्रधारा यस्य स तथोक्तः सुनाभिः सुदृढया नाभ्या अक्षच्छिद्रेण युक्तः एवंगुणविशिष्टो रथः यथा प्रगमनादिव्यापारं कुर्वन् प्रतिष्ठितो भवति एवं त्वमपि सुदृढाङ्गो भूत्वा ऊर्ध्वः उत्थितः सन् प्रति तिष्ठ प्रतिष्ठितो भव ॥

सप्तमी ॥

यदि कर्तं पतित्वा संशश्रे यदि वाश्मा प्रहृतो जघान ।
ऋभू रथस्येवाङ्गानि सं दधत् परुषा परुः ॥ ७ ॥

यदि । कर्तम् । पतित्वा । सम्ऽशश्रे । यदि । वा । अश्मा । प्रऽहृतः । जघान ।
ऋभुः । रथस्यऽइव । अङ्गानि । सम् । दधत् । परुषा । परुः ॥ ७ ॥

यदि कर्तम् कर्तकं छेदकम् आयुधं पुरुषशरीरे पतित्वा संशश्रे संशृ-

---

१ B corrects सुपविः into सुप्रविः. २ K यदि कर्तुं प्रति त्वा (!). V यदि कर्तुं पतित्वा; B[m]S कर्तुं; D यदि कर्तुं corrected from यदि कर्तुं; K[m] यदि कर्तुं. We with A B[h] R. ३ K कर्तुम् । प्रतिऽत्वा ।।

1 S′Kd °कृतं. 2 S′Kd कर्तुं. Sâyaṇa's text also has कर्तुं.

णाति संहिनस्ति । ⧖ शृ हिंसायाम् इत्यस्मात् छान्दसो लिट् ⧖ । यदि वा अपि वा अश्मा पाषाणः प्रहृतः परेण पुरुषशरीरे प्रक्षिप्तः सन् जघान हन्ति पुरुषं हिनस्ति । तेन आयुधेन अश्मना [च] हिंसितं परुः पर्व परुषा पर्वान्तरेण सं दधत् मन्त्रौषधप्रभावः संदधातु । तत्र दृष्टान्तः । ऋभू रथस्येवेति । सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुर्ऋभुर्विभ्वा वाज इति [नि° ११. १६] [इति] यास्कवचनात् सुधन्वनः पुत्रा ऋभ्वादयो रथनिर्माणादिना देवत्वं प्राप्ताः । तथात्वं च दाशतय्याम् "तक्षन् रथं सुवृतं विद्मनापसः" [ऋ° १. १११. १] इत्याद्यार्भवसूक्तेषु प्रसिद्धम् । ऋभुर्यथा रथस्य अङ्गानि अक्षचक्रेषायुगादीनि निर्माय संदधाति एवम् आथर्वणो मन्त्रो विश्लिष्टम् अङ्गं संदधातीत्यर्थः ॥

[इति] द्वितीयं सूक्तम् ॥

"उत देवाः" इति सूक्तेन उपनयनानन्तरम् आयुष्कामं माणवकम् अभिमृश्य अनुमन्त्रयेत । सूत्रितं हि । "वि देवा जरसा[३. ३१] उत देवाः[४. १३] आवतस्ते[५. ३०]" इत्यादि "विषासहिम[१७. १] इत्यनुमन्त्रयते ब्राह्मणोक्तम्" इत्यन्तम् [कौ° ७. ९] ॥

तथा ऋषिहस्ते माणवकशरीरानुमन्त्रणेपि एतत् सूक्तम् । सूत्रितं हि । "मुञ्चामि त्वा[३. ११] उत देवाः[४. १३] आवतस्ते[५. ३०]" इत्यादि "विषासहिम[१७. १] इत्यनुमन्त्रयेत" इत्यन्तम् [कौ° ७. ९] ॥

तथा लघुगणे "हिरण्यवर्णाः[१. ३३] शंतातीयम[४. १३] यद्यन्तरिक्षे[७. ६८]" [कौ° १. ९] इति शंतातीयपदेन शंतातिशब्दयुक्तस्य अस्य सूक्तस्य विवक्षितत्वाद् अस्य गणस्य यत्रयत्र विनियोगः तत्र सर्वत्र अस्य विनियोगो द्रष्टव्यः ॥

तथा अंहोलिङ्गगणेपि अस्य सूक्तस्य पाठात् तस्य गणस्य यत्रयत्र भैषज्यादिषु विनियोगस्तत्र सर्वत्र अस्य विनियोगो द्रष्टव्यः ॥

तथा क्रतुमध्ये व्याधितस्य यजमानस्य भैषज्यकरणेपि एतत् सूक्तम् । सूत्रितं हि । "अथ भैषज्याय यजमानम् 'अक्षीभ्यां ते'[२. ३३] 'मुञ्चामि त्वा'[३. ११] 'उत देवाः'[४. १३]" इति [वै° ७. ३] ॥

1 S' Kd रथस्येति. 2 S' Kd °पोयुगा°. 3 So S' Kd. *Kausika* इत्यभि°.

तत्र प्रथमा ॥

उ॒त दे॑वा अव॑हितं॒ देवा॒ उन्न॑यथा॒ पुन॑ः ।
उ॒तागं॑श्च॒क्रुषं॑ देवा॒ देवा॑ जी॒वय॑था॒ पुन॑ः ॥ १ ॥

उ॒त । दे॒वा॒ः । अव॑ऽहितम् । देवा॑ः । उत् । न॒य॒थ॒ । पुन॑ः ।
उ॒त । आग॑ः । च॒क्रुष॑म् । दे॒वा॒ः । देवा॑ः । जी॒वय॑थ । पुन॑ः ॥ १ ॥

उतशब्दः अप्यर्थे । हे देवाः इमम् उपनीतं धर्मविषये अवहितम् सावधानम् अप्रमत्तं कुरुत । यद्वा अवहितम् अवस्थापितं कुरुत । यथा-सौ चिरकालम् अवतिष्ठते तथा कुरुतेत्यर्थः । ॥ अवपूर्वाद् धाञः कर्मणि निष्ठा । "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम् ॥ हे देवाः यूयं संभावितात् अनवधानाद् एनं पुनः उन्नयथ उन्नमयथ । यद्वा अध्ययनतदर्थज्ञानादिलक्षणं यद् उत्कृष्टं फलं तद् उपनीतं प्रापयथ । ॥ देवा इत्यस्य पादादित्वात् षाष्ठिकम् आमन्त्रिताद्युदात्तत्वम् ॥ उत अपि च हे देवाः आगः अपराधं विहिताननुष्ठानादिजनितं पापं चक्रुषम् चकृवांसं कृतवन्तम् । ॥ करोतेर्लिटः कसुः । अमि भत्वाभावेपि छान्दसं वसोः संप्रसारणम् ॥ । अज्ञानात् पापं कृतवन्तमपि एनं तस्मात् पापाद् रक्षतेत्यर्थः ॥ एवं संभवदायुर्भङ्गनिमित्तापराधपरिहारेण हे देवाः यूयं पुनरिमं जीवयथ शतसंवत्सरपरिमितजीवनयुक्तं कुरुत ॥ इत्थम् आमन्त्रितभेदेन वाक्यचतुष्टयं साध्याध्याहारेण योजयितव्यम् । यद्वा पूर्वोत्तरार्धे द्वे वाक्ये । तत्र एकैको देवशब्दो गौणः । अपरः संज्ञा । हे दानादिगुणयुक्ता देवाः अवहितमपि एनं पुनरुन्नयथ । आगः कृतवन्तमपि एनं पुनर्जीवयथेति । अक्षरार्थस्तु स एव ॥

द्वितीया ॥

द्वावि॒मौ वातौ॑ वात॒ आ सिन्धो॒रा प॑रा॒वत॑ः ।
दक्षं॑ ते अ॒न्य आ॑वातु व्य॑१॒॑न्यो वा॑तु॒ यद् रप॑ः ॥ २ ॥

---

१ So we with **A B B**P **B D K K**^{m} **R S**^{m} **P P**^{2} **J V**. See **R**w. २ **B B**^{h} **D R S**^{m} ३ for १. We with **A K K**^{m} **V**.

द्वौ । इमौ । वातौ । वातः । आ । सिन्धोः । आ । पराऽवतः ।
दक्षम् । ते । अन्यः । आऽवातु । वि । अन्यः । वातु । यत् । रपः ॥ २ ॥

इमौ दृश्यमानौ द्वौ वातौ । "पश्चाद्वातं प्रति मीवति पुरोवातमेव जनयति" [तै० सं० २. ४. ९. १] इति श्रुत्यन्तरप्रसिद्धौ वायू आ सिन्धोः आ समुद्रात् । मर्यादायाम् आकारः । समुद्रपर्यन्तम् । तथा आ परावतः । परावत् इति दूरनाम । समुद्रादपि यो दूरदेशः तावत्पर्यन्तं वा वातः गच्छतः । ॥वा गतिगन्धनयोः । आदादिकः॥ । यद्वा इमौ प्राणापानात्मकौ द्वौ वातौ वातः शरीरेषु संचरतः आ सिन्धोः । अत्र सिन्धुशब्देन स्यन्दनशीलानि स्वेदायनानि उच्यन्ते । तावत्पर्यन्तम् । आ परावतः । परावच्छब्देन शरीराद् बाह्यदेशो द्वादशाङ्गुलपरिमितो विवक्षितः । तावत्पर्यन्तं च प्राणापानयोः संचारस्थानम् । उक्तं हि ।

नाडीभ्याम् अस्तम् अभ्येति घ्राणतो द्विषडङ्गुलः

इति ॥ तयोर्वातयोः अन्यः पुरोवातः प्राणो वा हे उपनीत ते तव दक्षम् बलम् आवातु आगमयतु । अन्यः पश्चाद्वातः अपानवायुर्वा तव यद् रपः पापम् अस्ति । ॥रपो रिप्रम् इति पापनामनी भवतः इति हि निरुक्तम् [नि० ४. २१]॥ । तत् पापं वि वातु त्वत्सकाशाद् विगमयतु ॥

तृतीया ॥

आ वात वाहि भेषजं वि वात वाहि यद् रपः ।
त्वं हि विश्वभेषज देवानां दूत ईयसे ॥ ३ ॥

आ । वात । वाहि । भेषजम् । वि । वात । वाहि । यत् । रपः ।
त्वम् । हि । विश्वऽभेषज । देवानाम् । दूतः । ईयसे ॥ ३ ॥

हे वात वायो भेषजम् सर्वव्याधिनिवर्तकम् औषधम् आ वाहि आगमय । हे वात वायो यद् रपः पापं व्याधिनिदानम् अस्ति तद् वि वाहि विगमय असत्तो विनाशय ॥ हे विश्वभेषज सर्वव्याधिनिवर्तक हि यस्मात् त्वं देवानाम् इन्द्रादीनां दूतः चारः सन् सर्वजगद्रक्षणाय ईयसे संचरसि । ॥ईङ् गतौ । दिवादित्वात् श्यन्॥ ॥ यद्वा देवा-

नाम इन्द्रियाणां दूतः दूतवद् आसन्नवर्ती सन् तत्पोषणाय ईयसे । कृत्स्नं शरीरं व्याप्य वर्तस इत्यर्थः ॥

चतुर्थी ॥

त्रायंन्तामिमं देवास्त्रायंन्तां मरुतां गणाः ।
त्रायंन्तां विश्वा भूतानि यथायमरपा असत् ॥ ४ ॥
त्रायंन्ताम् । इमम् । देवाः । त्रायंन्ताम् । मरुताम् । गणाः ।
त्रायंन्ताम् । विश्वा । भूतानि । यथा । अयम् । अरपाः । असत् ॥ ४ ॥

देवाः इन्द्रादयः इमम् उपनीतं माणवकं त्रायन्ताम् । यद्वा "अग्निर्वाग् भूत्वा मुखं प्राविशत्" [ऐ०आ० २. ४. २] इत्यादिश्रुतिप्रसिद्धा अग्न्याद्या इन्द्रियाधिष्ठातृदेवता देवाः । ते तत्तदिन्द्रियपाटवप्रदानेन इमं रक्षन्तु इत्यर्थः ॥ तथा मरुताम् एकोनपञ्चाशत्संख्याकानाम् "ईहङ् चान्याहङ् च" [तै० सं० १. ८. १३. २] इत्यादिश्रुत्यन्तरप्रसिद्धसंज्ञकानां ये गणाः सप्तसंख्याकाः सन्ति तेपि इमं त्रायन्ताम् संरक्षन्तु । यद्वा मरुताम् प्राणापानव्यानादीनां देहे अवस्थितानां गणाः । पूजार्थं बहुवचनम् ॥ तथा विश्वा विश्वानि सर्वाणि अन्यानि भूतानि भूतजातानि यथा येन प्रकारेण अयं पुरुषः अरपा असत् अपापो भवेत् तथा त्रायन्ताम् इमं पालयन्तु ॥ त्रैङ् पालने । अरपा इति । न विद्यन्ते रपांसि पापानि यस्मिन्निति बहुव्रीहौ "नञ्सुभ्याम्" इति उत्तरपदान्तोदात्तत्वम् ॥

पञ्चमी ॥

आ त्वागमं शंतातिभिरथो अरिष्टतातिभिः ।
दक्षं त उग्रमाभारिषं परा यक्ष्मं सुवामि ते ॥ ५ ॥
आ । त्वा । अगमम् । शंतातिऽभिः । अथो इति । अरिष्टतातिऽभिः ।
दक्षम् । ते । उग्रम् । आ । अभारिषम् । परा । यक्ष्मम् । सुवामि । ते ॥ ५ ॥

हे उपनीत त्वा त्वां शंतातिभिः शंकरैः सुखकरैर्मन्त्रैः अथो अपि च

---

१ ^{h}B P ^{2}P त्रायताम्. We with A B Bp D K ^{m}K R ^{m}S J V. २ ^{m}S असत्.

---

1 S′ Kd रक्षंतु.

अरिष्टतातिभिः[1] अरिष्टम् अहिंसा तत्करैः श्रेयोहेतुभिः कर्मभिश्च आगमम् आगतवान् अस्मि। ॒गमेर्लुङि लृदित्वात् च्लेः अङ् आदेशः। "शिवशमरिष्टस्य करे" इति उभयत्र करणेर्थे तातिल् प्रत्ययः। "लिति" इति प्रत्ययात् पूर्वस्य उदात्तत्वम्॒॥ अपि च उग्रम् उद्गूर्णं दक्षम् समृद्धिकरं बलं ते तव आभार्षम्* आहार्षम्। ॒"हृग्रहोर्भः०" इति भत्वम्॒। "दक्षं ते अन्य आवातु"[२] इति वायुप्रार्थनया तत्सकाशाद् आनैषम्[2] ॥ तथा यक्ष्मम् रोगं ते तव सकाशात् परा सुवामि पराङ्मुखं प्रेरयामि ॥ ॒षू प्रेरणे। तौदादिकः॒॥

षष्ठी ॥

अयं मे हस्तो भगवानयं मे भगवत्तरः।
अयं मे विश्वभेषजोयं शिवाभिमर्शनः ॥ ६ ॥

अयम्। मे। हस्तः। भगऽवान्। अयम्। मे। भगवत्ऽतरः।
अयम्। मे। विश्वऽभेषजः। अयम्। शिवऽअभिमर्शनः ॥ ६ ॥

मे मदीयः अयम् अभिमर्शनसाधनो हस्तः भगवान् भाग्यवान्। तथा मे मदीयोयम् ऋषिहस्तः भगवत्तरः अतिशयितभाग्ययुक्तः। मे मम अयं हस्तो विश्वभेषजः विश्वानि भेषजानि सर्वव्याधिनिवर्तकानि औषधानि यस्मिन्नृषिहस्ते स तथोक्तः। यस्माद् एवंगुणविशिष्टो मदीयो हस्तः तस्माद् अयं शिवाभिमर्शनः सुखकरस्पर्शनयुक्तो भवतु ॥

सप्तमी ॥

हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी।
अनामयित्नुभ्यां हस्ताभ्यां ताभ्यां त्वाभि मृशामसि ॥ ७ ॥

हस्ताभ्याम्। दशऽशाखाभ्याम्। जिह्वा। वाचः। पुरःऽगवी।
अनामयित्नुऽभ्याम्। हस्ताभ्याम्। ताभ्याम्। त्वा। अभि। मृशामसि ॥ ७ ॥

दशशाखाभ्याम् दश अङ्गुलयः शाखाभूता ययोः ताद्दशाभ्यां हस्ताभ्यां प्रजापतिसंबन्धिभ्यां सृज्यमाना जिह्वा वागिन्द्रियाधिष्ठानभूता रसना वा-

1 S′Kd repeat the word. 2 S′Kd आनयिष्यं.

चः शब्दस्य पुरोगवी पुरतो गन्त्री भवति । यत्रयत्र शब्दः प्रयुज्यते तत्र सर्वत्र तस्य शब्दस्योच्चारणाय पुरतो व्याप्रियत इत्यर्थः ॥ अनामयित्नुभ्याम् अनामयशीलाभ्याम् आरोग्यहेतुभ्यां ताभ्यां प्रजापतिसंबन्धिभ्यां हस्ताभ्याम् हे उपनीत त्वा त्वाम् अभि मृशामसि अभितः संस्पृशामः । ⌛"इ-दन्तो मसिः"⌛ ॥

[इति] तृतीयं सूक्तम् ॥

"अजो ह्यग्नेः" इति सूक्तेन अजौदनसवे हविरभिमर्शनादिकं कुर्यात् । सूत्रितं हि । "तस्मिन्नन्वारब्धं दातारं वाचयति तन्त्रं[1] सूक्तं पच्छंस्तानेन[2] यौ ते पक्षौ" इत्युपक्रम्य "क्रमध्वम् अग्निना नाकम्[२] पृष्ठात् पृथिव्या अहम् अन्तरिक्षम् आरुहम्[३] स्वर्यन्तो नापेक्षन्ते[४]" इति [कौ० ८.९] ॥

"क्रमध्वम् अग्निना" इत्याद्यास्तिस्रः सर्वेषु सवयज्ञेषु वाचने विनियुक्ताः॥

"अजो ह्यग्नेः" इत्यनया ऋचा अग्निचयने उपधीयमानम् अजशिरोनुमन्त्रयेत । "अजो हीत्यजशिंरः" इति हि वैतानं सूत्रम् [वै० ५.२] ॥

"अग्ने प्रेहि" इत्यनया सर्वेषु सवयज्ञेषु आज्यं जुहुयात् । सूत्रितं हि । "अग्ने प्रेहि[५] समाचिनुष्व[११.१.३६] इत्याज्यं जुहुयात्" [इति] [कौ० ८.४] ॥

"अजम् अनज्मि"[६] इत्यनया अजौदनसवे दर्भेषूद्धृतं पाशुकं हविः आज्येनाभ्यञ्ज्यात् । सूत्रितं हि । "उद्धृतम् अजम् अनज्मीत्याज्येनानक्ति" इति [कौ० ८.५] ॥

"पञ्चौदनम्"[७,८] इति द्वाभ्यां सवयज्ञे पञ्चधा विभक्तौदनसहितान् शिरःपार्श्वाद्यवयवान् प्राच्यादिदिक्षु स्थापयेत् । सूत्रितं हि । "पञ्चौदनम् इति मन्त्रोक्तम् ओदनान् पृथक्पादेषु निदधाति मध्ये पञ्चमम्" इति [कौ० ८.५] ॥

"शृतम् अजम्"[९] इत्यनया शिरःपादाद्यवयवोपेतं चर्म जुहुयात् । सूत्रितं हि । "शृतम् अजम् इत्यनुबद्धशिरःपादम् अजस्य चर्म[5]" इति [कौ० ८.५] ॥

---

1 S′ Kd तंत्र for तन्त्रं. 2 S′ Kd °स्थानेन. Our MSS. of *Kaus'ika* and of the *Kes'avî*: °स्नानेन, which we adhere to. 3 This is a sautra mantra. 4 S′ Kd °शरीर इति for °शिरः इति. 5 S′ Kd add जुहोति after चर्म. We with *Kaus'ika*.

वाजपेये "पृष्ठात् पृथिव्याः"[३] इत्येतां यूपम् आरुह्य यजमानो जपेत्। उक्तं वैताने। वाजपेयं प्रक्रम्य "पृष्ठात् पृथिव्या अहम् इत्यारूढः" इति [वै० ४. ३]॥

वरुणप्रघासाख्ये पर्वणि अग्निप्रणयनकाले "अग्ने मेहि"[५] इति ब्रह्मा जपन् गच्छेत्। तद् उक्तं वैताने। "आषाढ्यां वरुणप्रघासेऽग्नौ प्रणीयमाने अग्ने मेहीति जपन्नेति" इति [वै० २. ४]॥

सोमयागे उत्तरवेद्यग्निप्रणयनेपि एषा जप्या। उक्तं वैताने। "अग्नौ प्रणीयमाने अग्ने मेहीति जपित्वा बहिर्वेद्युपविशति" इति। [वै० ३. ५]॥

तत्र प्रथमा॥

अजो ह्यग्नेरजनिष्ट शोकात् सो अपश्यज्जनितारमग्रे।
तेन देवा देवतामग्र आयन् तेन रोहान् रुरुहुर्मेध्यासः॥ १॥

अजः। हि। अग्नेः। अजनिष्ट। शोकात्। सः। अपश्यत्। जनिता-
रम्। अग्रे।
तेन। देवाः। देवताम्। अग्रे। आयन्*। तेन। रोहान्। रुरुहुः। मे-
ध्यासः॥ १॥

अजः छागः अग्नेः शोकात् तापाद् अजनिष्ट उदपद्यत। हिशब्दः श्रुत्यन्तरप्रसिद्धिं द्योतयति। तथा च तैत्तिरीयके अजस्याग्निसकाशाद् उत्पत्तिराम्नाता। "स आत्मनो वपाम् उदक्खिदत्। ताम् अग्नौ प्रागृह्णात्। ततोजस्तूपरः समभवत्" इति [तै० सं० २. १. १. ४]। सः जातोजः अग्रे सर्वप्रजापतिपशुसृष्टेः प्राग् जनितारम् जनयितारं प्रजापतिम् अग्निं वा अपश्यत् दृष्टवान्। जनयितृगौरवेण आत्मनो गौरवम् अज्ञासीद् इत्यर्थः। "जनिता मन्त्रे" इति णिलोपो निपात्यते॥ तेन प्रथमसृष्टेन अजेन देवाः इन्द्रादयः देवताम् देवत्वं देवभावम् अग्रे सृष्ट्या-

---

१ BD ३ for १. We with A K K̃ R S̃ V. २ A रोहादुरुहु° for रोहान् रुरुहु°. We with B B̃ D K K̃ R S̃ V. ३ P P̃ J K आयम्. We with the Saṁhitâ.

---

1 So S′Kd. The *Vaitâna*: °प्रघासेऽग्नेः. 2 S′Kd उदपद्येत. 3 S′Kd ततोस्तूपरः. 4 So S′Kd.

दौ आयन् तत्साध्ययागद्वारा प्राप्नुवन्। देवताम् इति। "तस्य भावस्त्वतलौ" इति तल् प्रत्ययः॥ तथा मेध्यासः मेधार्हाः। "छन्दसि च" इति यप्रत्ययः। "आज्जसेरसुक्"। यज्ञार्हा अन्येपि ऋषिजनाः रोहान्। रोह्यन्ते प्राप्यन्त इति रोहाः स्वर्गादिलोकाः। रुहेर्ण्यन्तात् कर्मणि घञ्। तान् तेन अजेन साधनेन यागद्वारा रुरुहुः आरूढवन्तः। तस्माद् ईदृक्साधनकः अजौदनसवो देवत्वादिसर्वफलप्राप्तिसाधक इत्यर्थः॥

द्वितीया॥

क्रमध्वमग्निना नाकमुख्यान् हस्तेषु बिभ्रतः।
दिवस्पृष्ठं स्वर्गत्वा मिश्रा देवेभिराध्वम॥ २॥

क्रमध्वम। अग्निना। नाकम। उख्यान्। हस्तेषु। बिभ्रतः।
दिवः। पृष्ठम। स्वः। गत्वा। मिश्राः। देवेभिः। आध्वम॥ २॥

हे जनाः अग्निना सवयज्ञार्थम् उत्पादितेन तत्साध्यान् सवयज्ञान् अनुष्ठाय तत्फलभूतं नाकम् दुःखसंभेदरहितम् उत्तमं लोकं क्रमध्वम् आरोहत। कथंभूताः सन्तः। अक्षान् अक्षवत् प्रकाशकान् अनुष्ठितान् यज्ञान् हस्तेषु बिभ्रतः धारयन्तः। यागादिजनितसुकृतविशेषान् अवलम्ब्य तत्फलभूतं लोकं प्राप्नुतेत्यर्थः। क्रमध्वम् इति। "अनुपसर्गाद् वा"। इति क्रमेरात्मनेपदम्। बिभ्रत इति। डुभृञ् धारणपोषणयोः। अस्मात् लटः शत्रादेशः। "भृञामित्" इति अभ्यासस्य इत्त्वम्। "अभ्यस्तानाम् आदिः" इति आद्युदात्तः॥ तदनन्तरं दिवः अन्तरिक्षस्य पृष्ठम् पृष्ठवंशवद् उन्नतप्रदेशं स्वः स्वर्गाख्यं लोकं गत्वा प्राप्य देवेभिः देवैः आजानशुद्धैः मिश्राः मिश्रिताः समानैश्वर्येण एकीभूताः आध्वम् उपविशत। "षष्ठ्याः पतिपुत्र°" इति दिवो विसर्जनीयस्य सत्वम्। देवेभिरिति। "बहुलं छन्दसि" इति भिस ऐसभावः। ततो "बहुवचने झल्येत्" इति एत्त्वम्। आध्वम इति। आस उपवेशने। अदादित्वात्

---

१ K नाकमक्षान् with Sâyaṇa without change of accents! We with A B B^{p} B^{h} D K^{m} R S^{m} P P^{2} J V. २ K अक्षान्. See previous note.

शपो लुक्। "झलां जश् झशि" इति सकारस्य जश्त्वम। दकारः ॥

तृतीया ॥

पृष्ठात् पृथिव्या अहमन्तरिक्षमारुहमन्तरिक्षाद् दिवमारुहम।
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम ॥ ३ ॥

पृष्ठात्। पृथिव्याः। अहम। अन्तरिक्षम। आ। अरुहम। अन्तरिक्षात्। दिवम। आ। अरुहम।
दिवः। नाकस्य। पृष्ठात्। स्वः। ज्योतिः। अगाम। अहम ॥ ३ ॥

पृथिव्याः पृष्ठात् भूलोकाद् अहम अन्तरिक्षम आरुहम अन्तरिक्षलोकम आरोहामि। रुहेश्छान्दसो लुङ्। "कृमृदरुहिभ्यश्छन्दसि" इति च्लेः अङ् आदेशः। तस्माद् अन्तरिक्षलोकाद् दिवम द्युशब्दवाच्यं तृतीयं लोकम आरुहम आरोहामि ॥ नाकस्य नास्मिन् अकं दुःखम अस्तीति नाकः तादृशस्य दिवः द्युलोकस्य पृष्ठात् उपरिदेशात् स्वः। आदित्यनामैतत्। आदित्यमण्डलस्थं हिरण्मयपुरुषाख्यं ज्योतिः अहम अगाम प्राप्नोमि। एतेश्छान्दसो लुङ्। "इणो गा लुङि" इति गादेशः ॥ इत्थं सोपानक्रमेण पृथिव्यादिलोकेषु नानाविधान् भोगान् भुक्त्वा अन्ते सूर्यसायुज्यं प्राप्नोतीत्यर्थः ॥

चतुर्थी ॥

स्वर्यन्तो नापेक्षन्त आ द्यां रोहन्ति रोदसी।
यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे ॥ ४ ॥

स्वः। यन्तः। न। अप। ईक्षन्ते। आ। द्याम। रोहन्ति। रोदसी इति।
यज्ञम। ये। विश्वतःऽधारम। सुऽविद्वांसः। विऽततेनिरे ॥ ४ ॥

स्वः स्वर्गं यज्ञफलभूतं यन्तः गच्छन्तः नापेक्षन्ते पुत्रपश्वादिजनितम ऐहिकसुखम अल्पं नेच्छन्ति। किं तु द्याम अन्तरिक्षं रोदसी द्यावापृथिव्यौ चेति लोकत्रयं प्रागुक्तरीत्या आ रोहन्ति। के पुनस्ते। ये यजमा-

१ BDRS[m] ३ for १. We with AKK[m]V.

नाः विश्वतोधारम् विश्वतः सर्वतो धारकम् यद्वा विश्वतः सर्वतो धारकाः अविच्छिन्नफलप्राप्त्युपाया यस्मिंस्ताहशम् यज्ञं सुविद्वांसः सुष्ठु जानन्तः वितेनिरे वितन्वन्ति विस्तारयन्ति । ॥छान्दसो वर्तमाने लिट्॥ । ते स्वर्यन्त इति संबन्धः ॥

पञ्चमी ॥

अग्ने॒ प्रेहि॑ प्रथ॒मो दे॒वता॑ना॒ं चक्षु॑र्दे॒वाना॑मुत मानु॑षाणाम् ।
इ॒यक्ष॑माणा॒ भृगु॑भिः स॒जोषा॒ः स्व॒र्यन्तु॒ यज॑माना॑ः स्व॒स्ति ॥ ५ ॥

अग्ने॑ । प्र । इ॒हि॒ । प्र॒थ॒मः । दे॒वता॑नाम् । चक्षुः॑ । दे॒वाना॑म् । उ॒त । मा-
नु॑षाणाम् ।

इ॒यक्ष॑माणाः । भृगु॑ऽभिः । स॒ऽजोषाः॑ । स्व॒रिति॑ स्वः । य॒न्तु॒ । यज॑मानाः । स्व॒स्ति ॥५॥

हे प्रणीयमान अग्ने त्वं प्रेहि प्रगच्छ आहवनीयदेशं प्रामुहि । कीदृशस्त्वम् । देवतानाम् यष्टव्यानां प्रथमः मुख्यः । अत एव दर्शपूर्णमासयोस्तावद् अग्निः प्रथमम् इज्यते । चातुर्मास्येषु च पञ्चसंचरेषु आग्नेयः प्रथमो यागः । सोमयागे च दीक्षणीयायाम् आग्नावैष्णवयागे अग्निः प्रथमभावी । अत एव मन्त्रवर्णः । "अग्निरग्रे प्रथमो देवतानाम्" इति [तै० ब्रा० २. ४. ३. ३] । तथा देवानाम् इन्द्रादीनां हविर्वहनेन अयम् अग्निः चक्षुः चक्षुरिन्द्रियवत् प्रियः । उत अपि च मानुषाणाम् मनोरपत्यभूतानां मनुष्याणां चक्षुः आहवनीयादिरूपेण पुण्यलोकस्य दर्शयिता । ॥"मनोर्जातावञ्यतौ षुक् च" इति अञ् प्रत्ययः षुगागमश्च॥ । यस्माद् एवम् अग्निर्देवानां मानुषाणां च चक्षुः तस्मात् तदीयप्रकाशेन इयक्षमाणाः प्रथमं यष्टुम् इच्छन्तः पश्चाद् यजमानाः यागं कुर्वाणाश्च जनाः भृगुभिः एतत्संज्ञैर्महर्षिभिः सजोषाः समानप्रीतयः सन्तः स्वः स्वर्गं कर्मफलभूतं स्वस्ति क्षेमेण यन्तु प्राप्नुवन्तु । ॥इयक्षमाणा इति । यजेः सन् । "सन्यतः" इति अभ्यासस्य इत्त्वे आदिवर्णलोपश्छान्दसः । सजोषाः । जुषी प्रीतिसेवनयोः । भावे घञ् । ततो बहुव्रीहौ "समानस्य छन्दसि०" इति सभावः । "परादिश्छन्दसि बहुलम्" इति

---

१ BB^{h}DS^{m} °माना स्व°. We with AKK^{m}RV.

उत्तरपदाद्युदात्तत्वम् । यद्वा समानं जोषमाणाः प्रीयमाणाः । असुनि "सुपां सुलुक्०" इति जसः सुः । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

षष्ठी ॥

अजर्मनज्मि पयसा घृतेन दिव्यं सुपर्णं पयसं बृहन्तम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम् ॥ ६ ॥

अजम् । अनज्मि । पयसा । घृतेन । दिव्यम् । सुऽपर्णम् । पयसम् । बृहन्तम् ।
तेन । गेष्म । सुऽकृतस्य । लोकम् । स्वः । आऽरोहन्तः । अभि । नाकम् । उत्ऽतमम् ॥ ६ ॥

हवीरूपम् आपन्नम् अजं पयसा पयोविकारेण पयोवद् रसवता वा घृतेन आज्येन अनज्मि अभिघारयामि । अञ्जू व्यक्तिमृक्षणगतिषु । रुधादित्वात् श्नम् । "श्नान्नलोपः" । कीदृशम् अजम् । दिव्यम् दिवि भवं द्युलोकार्हं वा सुपर्णम् शोभनपक्षयुक्तं पयसम् । छान्दसो वर्णविकारः । वयसं पक्षिरूपम् आपन्नं बृहन्तम् महान्तं यजमानं स्वर्गं प्रापयितुं शक्तम् ॥ तेन ईदृक्प्रभावेन अजेन सुकृतस्य पुण्यस्य फलभूतं लोकं गेष्म वयं गच्छेम । ततश्च उत्तमम् उत्कृष्टं नाकम् दुःखसंस्पर्शशून्यं स्वः स्वर्गं सूर्यात्मकं वा परमं ज्योतिः अभि आरोहन्तः अभिगच्छन्तः भवेमेत्यर्थः ॥

सप्तमी ॥

पञ्चौदनं पञ्चभिरङ्कुलिभिर्दर्व्योद्धर पञ्चधैतमोदनम् ।
प्राच्यां दिशि शिरो अजस्य धेहि दक्षिणायां दिशि दक्षिणं धेहि पार्श्वम् ॥ ७ ॥

पञ्चऽओदनम् । पञ्चऽभिः । अङ्कुलिऽभिः । दर्व्या । उत् । हर । पञ्चधा । एतम् । ओदनम् ।
प्राच्याम् । दिशि । शिरः । अजस्य । धेहि । दक्षिणायाम् । दिशि । दक्षिणम् । धेहि । पार्श्वम् ॥ ७ ॥

हे पाचक पञ्चौदनम् पञ्चधा विभक्तम् ओदनम् । "दिक्संख्ये संज्ञायाम्" इति समासः । पञ्चभिरङ्गुलिभिः करणैः दर्व्या साधनेन उद्धर । स्थाल्याः सकाशाद् उद्धृत्य बर्हिषि स्थापयेत्यर्थः । एतम् उद्धृतम् ओदनं पञ्चधा विभज्य तत्र एकं भागम् अजस्य पक्वं [शिरः] शिरोगतमांसं च प्राच्यां दिशि धेहि स्थापय । पुनः एकम् ओदनभागम् अजस्य [दक्षिणम् पार्श्वम्] दक्षिणपार्श्वस्थं मांसं च दक्षिणायाम् दक्षिणस्यां दिशि [धेहि] स्थापय ॥

अष्टमी ॥

प्रतीच्यां दिशि भसदस्य धेह्युत्तरस्यां दिश्युत्तरं धेहि पार्श्वम् ।
ऊर्ध्वायां दिश्यजस्यानूकं धेहि दिशि ध्रुवायां धेहि पाजस्यमन्तरिक्षे मध्यतो मध्यमस्य ॥ ८ ॥

प्रतीच्याम् । दिशि । भसदम् । अस्य । धेहि । उत्तरस्याम् । दिशि । उत्तरम् । धेहि । पार्श्वम् ।
ऊर्ध्वायाम् । दिशि । अजस्य । अनूकम् । धेहि । दिशि । ध्रुवायाम् । धेहि ।
पाजस्यम् । अन्तरिक्षे । मध्यतः । मध्यम् । अस्य ॥ ८ ॥

प्रतीच्याम् पश्चिमायां दिशि अस्य अजस्य भसदम् । भसत् कटिप्रदेशः । तत्रत्यं मांसम् ओदनभागसहितं धेहि स्थापय ॥ उत्तरस्याम् उदीच्यां दिशि ओदनभागसहितम् [उत्तरं पार्श्वम्] उत्तरपार्श्वसंबन्धि मांसं धेहि ॥ तथा ऊर्ध्वायां दिशि अस्य [अजस्य] अनूकम् पृष्ठवंशस्थं मांसम् ओदनभागसहितं धेहि स्थापय ॥ ध्रुवायाम् स्थिरायां भूम्यात्मिकायाम् अधस्ताद् दिशि पाजस्यम् । पाज इति बलनाम । तत्र हितम् उदरगतम् ऊवध्यं धेहि स्थापय । निखनेत्यर्थः । मध्यतः मध्यभागे अन्तरिक्षे आकाशे अस्य अजस्य [मध्यम्] शरीरमध्यवर्तिं आकाशम् संयोजयेत्यर्थः ॥

---

१ $\overset{h}{B}$ ३ for १. R दिश्या३ज°. We with A D K $\overset{m}{K}$ $\overset{m}{S}$ V. २ So we with A B B^p $\overset{h}{B}$ D K $\overset{m}{K}$ R $\overset{m}{S}$ V. See Rw.

---

1 S′ Kd शरीरं for शरीर°.

नवमी ॥

शृतमजं शृतया प्रोर्णुहि त्वचा सर्वैरङ्गैः संभृतं विश्वरूपम्।
स उत् तिष्ठतो अभि नाकमुत्तमं पद्भिश्चतुर्भिः प्रति तिष्ठ दिक्षु ॥ ९ ॥

शृतम्। अजम्। शृतया। प्र। ऊर्णुहि। त्वचा। सर्वैः। अङ्गैः। सम्ऽभृतम्। विश्वऽरूपम्।
सः। उत्। तिष्ठ। इतः। अभि। नाकम्। उत्ऽउत्तमम्। पत्ऽभिः।
चतुःऽभिः। प्रति। तिष्ठ। दिक्षु ॥ ९ ॥

हे शमितः शृतम् पक्वम् अजं श्रँथया विशसनेन विभक्तया त्वचा तदीयेन चर्मणा सपादवालशीर्षेण प्रोर्णुहि प्रकर्षेण च्छादय। ऊर्णुञ् छादने। कीदृशम् अजम्। सर्वैः अशेषैः अङ्गैः हस्तपादाद्यवयवैः संभृतम् संयुक्तं विश्वरूपम् सर्वाकारम्॥ हे अज स तादृशः सर्वाङ्गसहितस्त्वम् उत्तमम् उत्कृष्टं नाकम् स्वर्गम् अभिलक्ष्य इतः अस्माद् भूलोकाद् उत् तिष्ठ उन्नच्छ। ऊर्ध्वकर्मत्वाद् आत्मनेपदाभावः॥ तथा चतुर्भिः पद्भिः पादैः दिक्षु प्राच्यादिषु चतसृषु प्रति तिष्ठ प्रतिष्ठितो भव। पद्भिरिति। "पद्दन्०" इत्यादिना पादशब्दस्य पद् आदेशः। "ऊडिदंपदादि०" इति विभक्त्युदात्तत्वम्। चतुर्भिरिति। "झल्युपोत्तमम्" इति उकार उदात्तः। दिक्ष्विति। "सावेकाचः०" इति विभक्तेरुदात्तत्वम्॥

[इति] चतुर्थं सूक्तम्॥

"समुत्पतन्तु" इति सूक्तेन वृष्टिकामः मरुद्भ्यो मान्त्रवर्णिकीभ्यो वा देवताभ्य आज्यहोमः। काशदिविधुवकवेतसाख्या ओषधीः एकस्मिन् पात्रे कृत्वा संपात्य अभिमन्त्र्य जलमध्ये अधोमुखं निनयनम्। तासामेव काशादीनां संपातिताभिमन्त्रितानाम् अप्सु स्रावनम्। श्वशिरसो मेषशिरसश्च[1] अभिमन्त्रितस्य अप्सु प्रक्षेपणम्। मानुषकेशजरदुपानहां वंशाग्रे बन्धनम् नुषसहितम् आमपात्र[म् अभि]मन्त्रितोदकेन संप्रोक्ष्य त्रिपादे[2]

1 S′ Kd °शिरश्च. 2 S′ Kd त्रिपदे. We with *Kaus'ika* and the *Kes'avî*.

शिक्ये निधाय अप्सु प्रक्षेपणं च इत्येतानि अभिवर्षणकर्माणि कुर्यात् । सूत्रितं हि । "समुत्पतन्तु[४.१५] प्र नभस्व[७.१९] इति वर्षकामो द्वादशरात्रम्" इत्यादि "त्रिपादेऽश्मानम् अवधाय अप्सु निदधाति" इत्यन्तम् [कौ० ५.५] ॥

तथा उपतारकाद्भुतशान्तौ अनेन सूक्तेन आज्यं जुहुयात् । सूत्रितं हि । "अथ यत्रैतद् उपतारकम्" इति प्रक्रम्य "समुत्पतन्तु प्र नभस्वेति वार्षीर्जुहुयात् । सा तत्र प्रायश्चित्तिः" इत्यन्तम् [कौ० १३.११] ॥

चातुर्मास्यान्वारम्भणीयेष्टौ "अभि क्रन्द"[६] इति पर्जन्यचरुयागाभिमन्त्रणम् । उक्तं वैताने । "पूर्वेद्युर्वैश्वानरपार्जन्येष्टिर्वा अग्ने वैश्वानर [२.१६.४] अभि क्रन्द स्तनय[६]" इति [वै० २.४] ॥

धूमकेतूत्पातदर्शने पञ्चपशुयागमध्ये प्राजापत्यपशुपुरोडाशस्थाने "आग्नेयस्य प्राजापत्यस्य क्षीरौदनान्" इति विहितं क्षीरौदनं "प्रजापतिः सलिलात्"[११] इत्यृचा जुहुयात् । सूत्रितं हि । ["अथ यत्रैतद् धूमकेतुः" इति प्रक्रम्य] "प्रजापतिः सलिलात्[११] इति प्राजापत्यस्य" इति [कौ० १३.३५] ॥

"प्राजापत्यां प्रजापश्वन्नकामस्य प्रजाक्षये च" इति [न० क० १७] विहितायां महाशान्तौ "प्रजापतिः सलिलात्" इत्येषा आवपनीया । उक्तं नक्षत्रकल्पे । "प्रजापतिः सलिलाद् इति प्राजापत्यायाम्" इति [न० क० १८] ॥

तत्र प्रथमा ॥

सुमुत्पतन्तु प्रदिशो नभस्वतीः समभ्राणि वातजूतानि यन्तु ।
महच्छृषभस्य नदतो नभस्वतो वाश्रा आपः पृथिवीं तर्पयन्तु ॥ १ ॥

सुमऽउत्पतन्तु । प्रऽदिशः । नभस्वतीः । सम् । अभ्राणि । वातऽजूतानि । यन्तु ।
महाऽऋषभस्य । नदतः । नभस्वतः । वाश्राः । आपः । पृथिवीम् । तर्पयन्तु ॥ १ ॥

1 So S′Kd. *Kaus'ika*: °तारकाः. 2 So S′Kd. *Kaus'ika*: वर्षीः. 3 S′Kd omit वा.

प्रदिशः प्रकृष्टाः प्राच्याद्या दिशः नभस्वतीः नभस्वता वायुना युक्ताः सत्यः समुत्पतन्तु मेघैः संहता उद्गच्छन्तु। ॥ नभस्वतीरिति। एकस्य मतुपो लोपो द्रष्टव्यः। "वा छन्दसि" इति पूर्वसवर्णदीर्घः ॥ अभ्राणि। अपो बिभ्रति वृष्ट्यर्थम् उदकं धारयन्तीति उदकपूर्णा मेघा अभ्रशब्देनोच्यन्ते। तानि च वातजूतानि वातेन वायुना प्रेरितानि भूत्वा सं यन्तु संगच्छन्तां संहतानि भवन्तु ॥ महर्षभस्य[1] महांश्चासौ ऋषभश्च महर्षभः। ॥ "आन्महतः०" इति आँत्वम् ॥ नदतः ध्वनिं कुर्वतः यथा लोके महान् ऋषभः सेचनसमर्थः पुंगवो दृप्तः सन् गर्जति तादृगाकारयुक्तस्य गर्जतो नभस्वतः वायुप्रेरितस्य मेघस्य संबन्धिन्य आपः वाश्राः शब्दायमानाः पृथिवीम् भूमिं तर्पयन्तु तृप्ताम् ओषधिप्ररोहणसमर्थां कुर्वन्तु। ॥ वाश्रा इति। वाशृ शब्दे। स्फायितञ्चीत्यादिना [उ० २, १३] रक् प्रत्ययः ॥ ॥

द्वितीया ॥

समीक्षयन्तु तविषाः सुदानवोपां रसा ओषधीभिः सचन्ताम्।
वर्षस्य सर्गा महयन्तु भूमिं पृथग् जायन्तामोषधयो विश्वरूपाः ॥ २ ॥

सम। ईक्षयन्तु। तविषाः। सुऽदानवः। अपाम्। रसाः। ओषधीभिः। सचन्ताम्।

वर्षस्य। सर्गाः। महयन्तु। भूमिम्। पृथक्। जायन्ताम्। ओषधयः। विश्वऽरूपाः ॥ ३ ॥

तविषाः। महन्नामैतत्। महान्तः सुदानवः शोभनदाना मरुतः समीक्षयन्तु वृष्टिं संदर्शयन्तु। यथा वृष्टिर्भवति तथा अस्मान् अनुगृह्णन्तु इत्यर्थः ॥ अपाम् वृष्ट्युदकानां रसाः ओषधीभिः व्रीहियवादिभिः पृथिव्याम् उप्तैर्बीजैः सचन्ताम् समवयन्तु। ॥ षच समवाये ॥ उक्त एवार्थो विव्रियते वर्षस्येति। वर्षस्य वृष्ट्युदकस्य सर्गाः सृज्यन्त इति सर्गा धाराः। ॥ कर्मणि घञ् ॥। भूमिम् पृथ्वीं महयन्तु पू-

1 Sâyaṇa's text too has महर्षभ°. 2 So S' Kd.

जयन्तु । ॐमह पूजायाम्ॐ । वर्षधाराभिरलंकृताद् भूप्रदेशाद् विश्वरूपाः नानाविधा ओषधयः व्रीहियवाद्याः पृथक् अवान्तरजातिभेदेन जायन्ताम् उत्पद्यन्ताम् ॥

तृतीया ॥

समीक्षयस्व गायतो नभांस्यपां वेगासः पृथगुद् विजन्ताम् ।
वर्षस्य सर्गा महयन्तु भूमिं पृथग् जायन्तां वीरुधो विश्वरूपाः ॥ ३ ॥

सम । ईक्षयस्व । गायतः । नभांसि । अपाम् । वेगासः । पृथक् । उत् । विजन्ताम् ।
वर्षस्य । सर्गाः । महयन्तु । भूमिम् । पृथक् । जायन्ताम् । वीरुधः । विश्वऽरूपाः ॥ ३ ॥

हे मरुद्गण त्वं गायतः स्तुवतः अस्मान् नभांसि अभ्राणि समीक्षयस्व दर्शय ॥ अपां वेगासः वेगाः वेगयुक्ताः प्रवाहाः पृथक् भेदेन उद् विजन्ताम् उच्चलन्तु । ॐओविजी भयचलनयोःॐ ॥ उत्तरार्धर्चः पूर्ववत् । ओषधीनां स्थाने वीरुध इति विशेषः । वीरुधः विरोहणशीला आरण्या ओषधिवनस्पतयः ॥

चतुर्थी ॥

गणास्त्वोप गायन्तु मारुताः पर्जन्य घोषिणः पृथक् ।
सर्गा वर्षस्य वर्षतो वर्षन्तु पृथिवीमनु ॥ ४ ॥

गणाः । त्वा । उप । गायन्तु । मारुताः । पर्जन्य । घोषिणः । पृथक् ।
सर्गाः । वर्षस्य । वर्षतः । वर्षन्तु । पृथिवीम् । अनु ॥ ४ ॥

हे पर्जन्य वृष्ट्यभिमानिन् देव त्वा त्वां घोषिणः गर्जनघोषयुक्ता मारुताः मरुत्संबन्धिनो गणाः उप गायन्तु उपश्लोकयन्तु ॥ वर्षस्य वृष्टिजलस्य पृथक् नानात्वेन सर्गाः सृज्यमानाः वर्षन्तः सिञ्चन्तो बिन्दवः पृथिवीम् अनु वर्षन्तु अनुगतम् आर्द्रीकुर्वन्तु ॥

पञ्चमी ॥

उदीरयत मरुतः समुद्रतस्त्वेषो अर्को नभ उत् पातयाथ ।
महच्चृषभस्य नदतो नभस्वतो वाश्रा आपः पृथिवीं तर्पयन्तु ॥ ५ ॥

उत्। ईरयत। मरुतः। समुद्रतः। त्वेषः। अर्कः। नभः। उत्। पातयाथ।
महाऽच्चृषभस्य। नदतः। नभस्वतः। वाश्राः। आपः। पृथिवीम्। तर्पयन्तु ॥ ५ ॥

हे मरुतः समुद्रतः समुद्रमध्याद् उदीरयत वृष्टिजलम् ऊर्ध्वं प्रेरयत ॥ त्वेषः दीप्तिमत् अर्कः अर्चनसाधनम् उदकम् तद्युक्तं नभः अभ्रम् उत् पातयाथ उन्नमयत ॥ महर्षभस्येत्यादि व्याख्यातम् ॥

षष्ठी ॥

अभि क्रन्द स्तनयार्दयोदधिं भूमिं पर्जन्य पयसा समङ्धि ।
त्वया सृष्टं बहुलमेतु वर्षमाशारैषी कृशगुरेत्वस्तम् ॥ ६ ॥

अभि। क्रन्द। स्तनय। अर्दय। उदऽधिम्। भूमिम्। पर्जन्य। पय-
सा। सम्। अङ्धि।
त्वया। सृष्टम्। बहुलम्। आ। एतु। वर्षम्। आशारऽएषी। कृशऽगुः।
एतु। अस्तम् ॥ ६ ॥

हे पर्जन्य अभि क्रन्द अभितः शब्दं कुरु । स्तनय मेघान् प्रविश्य घोषय । उदधिम् जलधिम् अर्दय उदकादानेन पीडय । पयसा वृष्टेन उदकेन भूमिं समङ्धि समक्तां संसिक्तां कुरु ॥ त्वया सृष्टम् प्रेरितं बहुलम् सान्द्रं वर्षम् वर्षणसमर्थम् अभ्रम् एतु आगच्छतु ॥ आसारैषी । आसारो धारासंपातः तमिच्छतीति आसारैषी सूर्यः । कृशगुः कृशाः तनूकृता गावो रश्मयो यस्य तथाविधः सन् अस्तम् एतु अदर्शनं प्राप्नोतु ।

---

१ K K^m V समुद्रजस्त्वे°. We with A B B^P B^h D R S^m P P^2 J. २ K समुद्रजः. ३ K महऽ°. ४ K V °सारैषी° with Sâyaṇa. We with A B B^P B^h D K^m R S^m P P^2 J V. ५ K आसार°.

---

1 S' Kd कृशानूकृता for कृशाः तनूकृता.

"दिवा चित् तमः कृण्वन्ति पर्जन्येनोदवाहेन" [ऋ° १. ३८. ९] इति हि मन्त्रान्तरम् ॥

सप्तमी ॥

सं वो॑वन्तु सु॒दान॑व॒ उत्सा॑ अजग॒रा उ॒त ।
मरु॒द्भि॒: प्र॒च्यु॒ता मे॒घा वर्षं॑न्तु पृथि॒वीमनु॑ ॥ ७ ॥
सम् । व॒: । अ॒व॒न्तु । सु॒ऽदान॑व: । उत्सा॑: । अ॒ज॒ग॒रा: । उ॒त ।
म॒रुत्ऽभि॑: । प्र॒ऽच्यु॒ता: । मे॒घा: । वर्षं॑न्तु । पृ॒थि॒वीम् । अनु॑ ॥ ७ ॥

सुदानवः शोभनदाना मरुतः हे जना वः युष्मान् सम् अवन्तु संतर्पयन्तु । अजगरा उत । उतशब्दोत्र वितर्के । अजगरात्मना वितर्क्यमानाः स्थूला उत्साः वारिप्रवाहाः । उत्पद्यन्ताम् इत्यर्थः । यद्वा हे[1] सुदानवः वः युष्माकं संबन्धिनः उक्तलक्षणा उत्साः समवन्तु संतर्पयन्तु इति एकवाक्यता ॥ ईदृशानाम् उत्सानाम् उत्पत्तिः कथं सेत्स्यतीत्यत्राह मरुद्भिरिति । मरुद्भिः वायुविशेषैः प्रच्युताः स्वस्थानात् प्रेरिता मेघाः पृथिवीम् अनु वर्षन्तु ॥

अष्टमी ॥

आशा॑मा॒शां वि द्यो॑तता॒ं वाता॑ वान्तु दि॒शोदि॑शः ।
मरु॒द्भि॒: प्र॒च्यु॒ता मे॒घाः सं य॑न्तु पृथि॒वीमनु॑ ॥ ८ ॥
आशा॑म॒ऽआशाम् । वि । द्यो॒त॒ता॒म् । वाता॑: । वा॒न्तु । दि॒श:ऽदि॑श: ।
म॒रुत्ऽभि॑: । प्र॒ऽच्यु॒ता: । मे॒घा: । सम् । य॒न्तु । पृ॒थि॒वीम् । अनु॑ ॥ ८ ॥

आशामाशाम् दिशंदिशम् आश्रित्य विद्युद् वि द्योततां स्फुरतु ॥ दिशोदिशः सर्वस्या अपि दिशो वाता वान्तु मेघस्य उद्गमयितारो वायवः संचरन्तु । यद्वा दिशोदिश इति द्वितीया । सर्वा अपि दिशः प्राप्य वायवो वान्तु ॥ तदनन्तरं [मरुद्भिः प्रच्युताः] वायुप्रेरिता मेघाः पृथिवीम् भूमिम् अनुलक्ष्य सं यन्तु संगता भवन्तु । वृष्ट्यर्थं संहन्यन्ताम् इत्यर्थः ॥

---

१ P प्रच्यु°. We with $\dot{P}^2$ J K.

---

1 This shows that Sâyaṇa, especially in his alternative explanations, sometimes disregards his accents.

नवमी ॥

आपो॑ वि॒द्युद्भ्रं व॒र्षं सं वो॑वन्तु सु॒दान॑व॒ उत्सा॑ अजग॒रा उ॒त।
म॒रुद्भि॒: प्रच्यु॑ता मे॒घाः प्रा॑वन्तु पृथि॒वीमनु॑ ॥ ९ ॥

आप॑:। वि॒ऽद्यु॑त्। अ॒भ्रम्। व॒र्षम्। सम्। व॒:। अ॒व॒न्तु॒। सु॒ऽदान॑वः।
उत्सा॑:। अ॒ज॒ग॒राः। उ॒त।
म॒रुत्ऽभि॑:। प्रऽच्यु॑ताः। मे॒घाः। प्र। अ॒व॒न्तु॒। पृ॒थि॒वीम्। अनु॑ ॥ ९ ॥

हे[1] सुदानवः शोभनदाना मरुतः वः युष्माकं संबन्धिनः अबादिपदार्थाः समवन्तु जगत् संतर्पयन्तु। आपो मेघस्थानि उदकानि। विद्युत् सौदामिनी। अभ्रम् उदकपूर्णो मेघः। वर्षम् वृष्टिजलम्॥ अजगरसमानाकारा उत्साः वारिप्रवाहाश्च युष्मत्संबन्धिनः संतर्पयन्तु। लोकम् इत्यर्थः। तदर्थं मरुद्भिः प्रच्युताः प्रेरिता मेघाः पृथिवीम् अनु प्रावन्तु[2] प्रावन्तु। ※"उपसर्गस्यायतौ" इति विधीयमानं लत्वं व्यत्ययेन अत्रापि भवति※ ॥

दशमी ॥

अ॒पाम॒ग्निस्तनू॑भि: संविदा॒नो य ओष॑धीनामधि॒पा ब॒भूव॑।
स नो॑ वर्षं व॑नुतां जा॒तवे॑दाः प्रा॒णं प्र॒जाभ्यो॑ अ॒मृतं॑ दि॒वस्परि॑ ॥ १० ॥

अ॒पाम्। अ॒ग्निः। त॒नूभि॑:। स॒म्ऽवि॒दा॒नः। यः। ओष॑धीनाम्। अ॒धि॒ऽपाः। ब॒भूव॑।
सः। नः॒। व॒र्षम्। व॒नु॒ता॒म्। जा॒तऽवे॑दाः। प्रा॒णम्। प्र॒ऽजाभ्यः॑। अ॒मृ॒तम्। दि॒वः। परि॑ ॥ १० ॥

अपाम् मेघस्थानां तनूभिः शरीरैः संविदानः ऐकमत्यं गतो यो वैद्युताग्निः ओषधीनाम् उत्पत्स्यमानानाम् अधिपा बभूव अधिपतिः ईश्वरो भवति। जातवेदाः जातानां वेदिता सः अग्निः नः अस्मभ्यं वर्षं वनुताम्

१ P वि॒द्युत्.

1 See the previous note. 2 This shows that Sâyaṇa's readings were genuine.

प्रयच्छतु । कीदृशं वर्षम् । प्रजाभ्यः । ⁂षष्ठ्यर्थे चतुर्थी⁂ । प्रजानां प्राणम् जीवनप्रदं [दिवस्परि] दिवः संबन्धि अमृतम् अमृतत्वप्रापकम् । यद्वा दिवः द्युलोकाद् अन्तरिक्षाद् वनुताम् इति संबन्धः ॥

एकादशी ॥

प्रजापतिः सलिलादा समुद्रादार्पं ईरयन्नुदधिमर्दयाति ।
प्र प्यायता वृष्णो अश्वस्य रेतोर्वाङेतेन स्तनयित्नुनेहि ॥ ११ ॥

प्रजाऽपतिः । सलिलात् । आ । समुद्रात् । आपः । ईरयन् । उदधिम् । अर्दयाति ।
प्र । प्यायताम् । वृष्णः । अश्वस्य । रेतः । अर्वाङ् । एतेन । स्तनयित्नुना । आ । इहि ॥ ११ ॥

प्रजापतिः प्रजानां पालयिता वृष्टिप्रदः संवत्सरात्मकः सूर्यः सलिलात् । ⁂षल गतौ इत्यस्माद् इलच् प्रत्ययः⁂ । व्यापनशीलात् समुद्राद् आपः । ⁂व्यत्ययेन जस्⁂ । अपः उदकानि आ समन्तात् ईरयन् वृष्ट्यर्थं प्रेरयन् उदधिम् जलधिम् अर्दयाति अर्दयतु रश्मिभिरादानेन पीडयतु । ⁂अर्दयतेर्लेटि आडागमः⁂ । विष्णोः व्यापनशीलस्य अश्वस्य अश्ववद् वेगवतो मेघस्य रेतः वृष्ट्युपादानभूतं वीर्यं प्र प्यायताम् प्रवर्धताम् । एतेन प्रवृद्धवीर्येण स्तनयित्नुना मेघेन हे पर्जन्य त्वम् अर्वाङ् अस्मदभिमुखः सन् एहि आगच्छ ॥

द्वादशी ॥

अपो निषिञ्चन्नसुरः पिता नः श्वसन्तु गर्गरा अपां वरुणावः नीचीरपः सृज[२] ।
वदन्तु पृश्निबाहवो मण्डूका[३] इरिणानु ॥ १२ ॥

अपः । निऽसिञ्चन् । असुरः । पिता । नः । श्वसन्तु । गर्गराः । अपाम् । वरुण । अवः । नीचीः । अपः । सृज ।

---

१ So we with **A B B**ᵖ **B**ʰ **D K K**ᵐ **R S**ᵐ **P P**² **J V.** २ So we read and divide with all our MSS. and Vaidikas. ३ **B**ʰ मण्डूका इरि°. ४ **P** निऽसिंचन्.

वदन्तु। पृश्निऽबाहवः। मण्डूकाः। इरिणा। अनु ॥ १२ ॥

असुरः मेघानां क्षेप्ता। यद्वा असवः प्राणाः। तान् रातीत्यसुरः। वृष्टिजलेन प्राणप्रद इत्यर्थः। "आपोमयः प्राणः" इति हि ब्राह्मणम् [छा० ६. ५. ४]। एवंभूतो नः अस्माकं पिता उत्पादयिता सूर्यः अपः निषिञ्चन् वृष्ट्युदकानि न्यग्भावेन सिञ्चन्। वर्तताम् इत्यर्थः। श्रूयते हि। "यदा खलु [वा] असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेथ वर्षति" इति [तै० सं० २. ४. १०. २] ॥ ततश्च अपाम् उदकानां गर्गराः। अनुकरणशब्दोयम्। ईदृग्ध्वनियुक्ताः प्रवाहाः श्वसन्तु उच्छ्वसिता भवन्तु ॥ हे वरुण त्वमपि अवनीचीः अवनिं भूमिम् अञ्चन्ति गच्छन्तीत्यवनीच्यः आपः। अवनिशब्दोपपदाद् अञ्चतेः "ऋत्विग्०" इत्यादिना क्विन्। "अनिदिताम्०" इति नलोपः। "अञ्चतेश्चोपसंख्यानम्" इति ङीप्। "अचः" इति अकारलोपे "चौ" इति दीर्घत्वम्। भूमिं प्रामुवतीरपः अपं सृज मेघेभ्यः अपगमय ॥ अनन्तरं पृश्निबाहवः श्वेतबाहवो मण्डूकाः इरिणानु। इरिणशब्दो निस्तृणभूवचनः। "शेश्छन्दसि बहुलम्" इति शेर्लोपः। इरिणानि अनुप्राप्य वृष्टिजलेन लब्धप्राणाः सन्तः वदन्तु शब्दं कुर्वन्तु ॥

त्रयोदशी ॥

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः।
वाचं पर्जन्यजिन्विताम् प्र मण्डूका अवादिषुः ॥ १३ ॥

समऽवत्सरम्। शशयानाः। ब्राह्मणाः। व्रतऽचारिणः।
वाचम्। पर्जन्यऽजिन्विताम्। प्र। मण्डूकाः। अवादिषुः ॥ १३ ॥

व्रतं नियमविशेषं चरन्ति अनुतिष्ठन्तीति व्रतचारिणः। लुप्तोपमम् एतत्। व्रतचारिणो ब्राह्मणा इव संवत्सरं शशयानाः संवत्सरकालपर्यन्तं वातातपाभ्यां शुष्काः शयानाः संवत्सरान्ते वृष्टिजलेन लब्धसंज्ञा मण्डूकाः पर्जन्यजिन्विताम् पर्जन्यप्रीतां वाचम् अवादिषुः अवोचन्। पर्जन्यप्रीति-

१ All our MSS. and Vaidikas except **K** read **वातं**. We with Sâyaṇa.

करं घोषं कृतवन्त इत्यर्थः । ॥ वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव । तं मण्डूका अन्वमोदन्त । स मण्डूकान् अनुमोदमानान् दृष्ट्वा तुष्टाव [नि० ९. ६] इत्यादि निरुक्तम् अत्र अनुसंधेयम् ॥ ॥

चतुर्दशी ॥

उप॒प्रव॑द मण्डूकि व॒र्षमा व॑द तादुरि ।
मध्ये॑ ह्र॒दस्य॑ प्लवस्व वि॒गृह्य॑ च॒तुर॑ः प॒दः ॥ १४ ॥

उप॒ऽप्रव॑द । म॒ण्डू॒कि॒ । व॒र्षम् । आ । व॒द॒ । ता॒दु॒रि॒ ।
मध्ये॑ । ह्र॒दस्य॑ । प्ल॒व॒स्व॒ । वि॒ऽगृह्य॑ । च॒तुर॑ः । प॒दः ॥ १४ ॥

हे मण्डूकि त्वं हर्षम् उपेत्य प्रवद प्रकृष्टं घोषं कुरु । हे तादुरि । तदुरस्य अपत्यं स्त्री तादुरी । हे तादृशि वर्षम् वृष्टिम् आ वद आभाषय । यादृशेन त्वद्घोषेण वृष्टिर्जायते तादृशं शब्दं कुर्वित्यर्थः ॥ वृष्टिजलेन ह्रदे पूर्णे सति तस्य ह्रदस्य मध्ये चतुरः पदः आत्मीयान् चतुःसंख्याकान् पादान् विगृह्य प्लवनानुगुणं प्रसार्य प्लवस्व प्लवतर । प्लवनेन यथेच्छं विहरेत्यर्थः ॥

पञ्चदशी ॥

खण्व॒खा३इ॒ खैम॒खा३इ॒ मध्ये॑ तदुरि ।
व॒र्षं व॑नुध्वं पितरो म॒रुता॑ मन॑ इच्छत॑ ॥ १५ ॥

खण्व॒खा॑३इ॑ । खैम॑खा३इ॑ । मध्ये॑ । त॒दु॒रि॒ ।
व॒र्षम् । व॒नु॒ध्व॒म् । पि॒त॒रः॒ । म॒रुता॑म् । मन॑ः । इ॒च्छ॒त॒ ॥ १५ ॥

खण्वखा खैमखा तदुरी इति मण्डूकस्त्रीजातेः संज्ञाविशेषाः । हे खण्वखे [हे] खैमखे हे तदुरि इति तिस्रः संबोध्यन्ते । ॥ "एचोप्रगृह्यस्या-

---

१ **A B K K R S V** खण्व॒खा३इ॒ खैम॒खा३इ॒. **D** खण्व॒खा३इं॑ खैम॒खा३इ॒. The figure ३ indicates the pluta *i. e.*, protracted vowel. But if the two words are vocatives (see Sâyaṇa) should we not rather have खण्वंखा३इ॒ खैमंखा३इ॒ ? २ **A B B D R S** इच्छतः. We with **K K V.** ३ **P P** खण्व॒खा३इं॑ । We with **J.** ४ **P** खैम॒खा३इं॑. We with **P J.** ५ **P P J** इच्छ॒तः. We with **S K.**

---

1 **Kd** पादावन and **S′** पादान्वन for पादान्.

दूराद्भूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ" इति विगृह्य अवर्णस्य लुतः ॥ । हे तत्संज्ञा हे मण्डूक्यः ह्रदस्य मध्ये वर्तमाना यूयं युष्मदीयेन घोषेण वर्षम् वृष्टिं वनुध्वम् प्रयच्छत[1] । हे पितरः पालयितारो मण्डूकाः [*मारुतम्] मरुत्संबन्धि वृष्ट्यभिमुखं मनः इच्छत घोषेण वशीकुरुत ॥

षोडशी ॥

महान्तं कोशमुदचाभि षिञ्च संविद्युतं भवतु वातु वातः ।
तन्वतां यज्ञं बहुधा विसृष्टा आनन्दिनीरोषधयो भवन्तु ॥ १६ ॥

महान्तम् । कोशम् । उत् । अच । अभि । सिञ्च । सऽविद्युतम् । भवतु । वातु । वातः ।
तन्वताम् । यज्ञम् । बहुऽधा । विऽसृष्टाः । आऽनन्दिनीः । ओषधयः । भवन्तु ॥ १६ ॥

महान्तम् अधिकं कोशम् । मेघनामैतत् । मेघम् हे पर्जन्य त्वम् उदच समुद्राद् उदकपूर्णम् उद्धर । ॥ अञ्चु गतौ इत्यस्य एतद् रूपम् ॥ । तेन मेघेन अभि षिञ्च सर्वां भूमिम् अभितः सिक्तां कुरु । तदर्थं तं मेघं सविद्युतम् विद्युत्सहितं कुरु । ततो वृष्टिर्भवतु । यद्वा सविद्युतम् । ॥ लुगभावश्छान्दसः ॥ । सविद्युत् विद्युत्सहितम् अन्तरिक्षं भवतु । वातः वायुः वृष्ट्यनुकूलं वातु संचरतु । बहुधा बहुप्रकारं विसृष्टाः वृष्ट्या प्रेरिता आपः यज्ञं तन्वताम् विस्तारयन्तु । यज्ञादिक्रियाहेतवो भवन्तु इत्यर्थः । ओषधयः व्रीहियवाद्या ग्राम्याः आरण्यास्तरुगुल्माद्याः आनन्दिनीः वृष्टिजलेन हर्षयुक्ता भवन्तु ॥

[इति] पञ्चमं सूक्तम् ॥

इति अथर्ववेदार्थप्रकाशे चतुर्थकाण्डे तृतीयोनुवाकः ॥

चतुर्थेनुवाके पञ्च सूक्तानि । तत्र "बृहन्नेषाम्" इति आद्येन सूक्तेन अभिचारकर्मणि शत्रुं क्रोशन्तम् अनुब्रूयात् [कौ० ६. २] ॥ धूमकेतूत्पातशान्तौ वारुणपशुप्रयोगे "उतेयं भूमिः" [३] इत्येषा [कौ० १३. ३५] ॥

१ B BP सं°.

1 S' Kd प्रयच्छ. 2 This is the reading in Sâyaṇa's text.

तत्र प्रथमा ॥

बृहन्नेषामधिष्ठाता अन्तिकादिव पश्यति ।
यस्तायन्मन्यते चरन्तसर्वं देवा इदं विदुः ॥ १ ॥

बृहन् । एषाम् । अधिऽस्थाता । अन्तिकात्ऽइव । पश्यति ।
यः । तायत् । मन्यते । चरन् । सर्वम् । देवाः । इदम् । विदुः ॥ १ ॥

बृहन् महान् परिवृढो वा वरुणः एषाम् दुरात्मनां शत्रूणाम् अधिष्ठाता नियन्ता सन् तैः कृतं सर्वम् अन्यायम् अन्तिकादिव पश्यति समीपदेशादिव जानाति । न तस्य व्यवधायकं किंचिद् अस्तीत्यर्थः । यो वरुणः तायत् सांतत्येन वर्तमानं स्थिरवस्तु चरत्[*] चरणशीलं नश्वरं च वस्तु मन्यते । स्थावरजङ्गमात्मकं सर्वं जगज्जानातीत्यर्थः । स बृहन् इति संबन्धः । [x] तायत् इति । तायृ संतानपालनयोः । अस्मात् लटः शत्रादेशः [x] । ईदृग्विधज्ञानसङ्गावं वरुणस्य उपपादयति सर्वम् इति । व्यवहितं विप्रकृष्टं स्थिरं नश्वरं स्थूलं सूक्ष्मम् इति एतादृग् इदं सर्वम् अतिरोहितज्ञानत्वाद् देवाः विदुः जानन्ति । [x] विद ज्ञाने । "विदो लटो वा" इति झेः उस् आदेशः [x] ॥

द्वितीया ॥

यस्तिष्ठति चरति यश्च वञ्चति यो निलायं चरति यः प्रतङ्कम् ।
द्वौ संनिषद्य यन्मन्त्रयेते राजा तद् वेद वरुणस्तृतीयः ॥ २ ॥

यः । तिष्ठति । चरति । यः । च । वञ्चति । यः । निऽलायन् । चरति । यः ।
प्रऽतङ्कम् ।
द्वौ । सम्ऽनिषद्य । यत् । मन्त्रयेते इति । राजा । तत् । वेद । वरुणः ।
तृतीयः ॥ २ ॥

---

१ So we read with **A B** B^{p} $\overset{h}{\text{B}}$ **D K** $\overset{m}{\text{K}}$ **R** $\overset{m}{\text{S}}$ **V.** २ **P** $\overset{2}{\text{P}}$ स्तायत्. **J** तायत् corrected into स्तायत्. ३ So **P** $\overset{2}{\text{P}}$ **J.** **K** has चरत्. ४ So all our MSS. and Vaidikas. ५ So **P** $\overset{1}{\text{P}}$ **J K.** ६ **P** प्रतंकम्.

---

1 S′ Kd संबंधनीयः.

पूर्वस्याम् ऋचि एषाम् इत्युक्तम्। तत्र इदमा के पुनः प्रतिनिर्दिश्यन्त इति तान् निर्दिशति यस्तिष्ठतीति पूर्वार्धेन। यः शत्रुस्तिष्ठति अभिमुखम् अवतिष्ठते यश्चरति गच्छति यश्च वञ्चति कौटिल्येन प्रतारयति यः शत्रुः निलायम्[*] निलयनेन अनिर्गमनेन चरति। यद्वा निलीनः अदृश्यः सन् चरति। ॥ अयतेर्निस्पूर्वात् णमुल्। निपूर्वात् लीयतेर्वा। उभयथापि समानोर्थः। "उपसर्गस्यायतौ" इति लत्वम् ॥। यः शत्रुः प्रतङ्कम् प्रकर्षेण कृच्छ्रजीवनं प्राप्य चरति वर्तते। ॥ तकि कृच्छ्रजीवने। अस्मात् प्रपूर्वात् णमुल् ॥। एषां शत्रूणाम् इति पूर्वेण संबन्धः॥ अन्तिकादिव पश्यतीति यद् उक्तं तदपि समर्थयते द्वौ संनिषद्येत्युत्तरार्धेन। द्वौ पुरुषौ रहसि [1]संनिषद्य उपविश्य यत् कार्यं मन्त्रयेते गुप्तं भाषेते। ॥ मत्रि गुप्तभाषणे इति धातुः ॥। तयोर्गुप्तं[2] भाषमाणयोः तृतीयः त्रित्वसंख्यापूरकः सन् राजा ईश्वरो वरुणः स्वसार्वज्ञ्येन तत् सर्वं वेद। जानातीत्यर्थः। ततश्च अकार्यचिन्तावसर एव तान्[3] निग्रहीतुं वरुणः शक्नोतीत्यर्थः। ॥ "त्रेः संप्रसारणं च" इति पूरणार्थे तीयप्रत्ययः संप्रसारणं च ॥ ॥

तृतीया ॥

उ॒तेयं भूमि॒र्वरु॑णस्य॒ राज्ञ॑ उ॒तासौ द्यौर्बृ॑ह॒ती दूरेअ॑न्ता।
उ॒तो स॑मु॒द्रौ वरु॑णस्य कु॒क्षी उ॒तास्मिन्नल्पे॑ उद॒के निली॑नः ॥ ३ ॥

उ॒त। इ॒यम्। भूमिः। वरु॑णस्य। राज्ञः। उ॒त। अ॒सौ। द्यौः। बृ॒ह॒ती। दूरेऽअ॑न्ता।
उ॒तो इति॑। स॒मु॒द्रौ। वरु॑णस्य। कु॒क्षी इति॑। उ॒त। अ॒स्मिन्। अल्पे॑। उ॒द॒के। निऽली॑नः ॥ ३ ॥

उतशब्दः अप्यर्थे। इयं सर्वाधिष्ठानत्वेन निहिता भूमिरपि राज्ञः ईश्वरस्य दुष्टनिग्रहे अधिकृतस्य वरुणस्य वंशे[4] वर्तते ॥ उत अपि च असौ विप्रकृष्टा बृहती महती दूरेअन्ता दूरे विप्रकृष्टे देशे अन्ते अन्तिके

1 S′ Kd omit सं°. 2 S′ Kd गुप्तभाष°. 3 S′ Kd तां for तान्. 4 S′ Kd विशे for वशे.

च भवतीति दूरेअन्ता । यत एवं व्याप्य वर्तते अतो बृहतीति भावः । एवंरूपा द्यौश्च वरुणस्य राज्ञो वशे वर्तते । बृहती दूरेअन्तेति विशेषणद्वयं भूम्या अपि योज्यम् । अत एव दूरेअन्ते इति द्यावापृथिव्योर्नामसु पठितम् [निघ० ३.३०] ॥ उतो अपि च समुद्रौ पूर्वपश्चिमौ वरुणस्य राज्ञः कुक्षी दक्षिणोत्तरपार्श्वभेदेन अवस्थिते द्वे उदरे । एवं भूम्यादिकं कृत्स्नं जगद् व्याप्य वर्तमानोपि अस्मिन् अल्पेपि उदके तटाकह्रदादिगते निलीनः अन्तर्हितो भवति ॥

चतुर्थी ॥

उत॒ यो द्याम॑ति॒सर्पा॑त् प॒रस्ता॒न्न स मु॑च्याते॒ वरु॑णस्य॒ राज्ञः॑ ।
दि॒वः स्पश॒: प्र च॑रन्तीद॒मस्य॑ सहस्रा॒क्षा अति॑ पश्यन्ति॒ भूमि॑म् ॥ ४ ॥

उ॒त । यः । द्याम् । अ॒ति॒ऽसर्पा॑त् । प॒रस्ता॑त् । न । सः । मु॒च्या॒ते॒ । वरु॑णस्य । राज्ञः॑ ।

दि॒वः । स्पशः॑ । प्र । च॒र॒न्ति॒ । इ॒दम् । अ॒स्य॒ । स॒हस्र॑ऽअक्षाः । अति॑ । प॒श्य॒न्ति॒ । भूमि॑म् ॥ ४ ॥

उत अपि च यः शत्रुः अनर्थकारी अस्माकं पुरस्तात् द्याम् अन्तरिक्षप्रदेशम् अतिसर्पात् अतिक्रम्य सर्पेद् गच्छेत् । यद्वा सुकृतप्राप्यं द्यां स्वर्गम् अतिक्रम्य अपथे प्रवर्तेतेत्यर्थः । स शत्रुः वरुणस्य राज्ञः पाशेभ्यो न मुच्यातै न मुच्येत । तैर्बद्ध एव वर्तताम् इत्यर्थः । ⧖मुचेः कर्मणि लेटि आडागमः । "वैतोन्यत्र" इति ऐकारः⧖ ॥ कथं द्युलोकस्थो वरुणः मनुष्यकृतम् अपराधं जानातीति तत्राह दिवः स्पश इति । दिवः द्युलोकान्निर्गताः अस्य वरुणस्य स्पशः चारा इदं पार्थिवं स्थानं प्र चरन्ति प्राप्य संचरन्ति । ते च सहस्राक्षाः सहस्रसंख्याकैर्दर्शनोपायैर्युक्ताः सन्तः भूमिम् अति पश्यन्ति । भूलोकवृत्तान्तं सर्वम् अतिशयेन साक्षात्कुर्वन्तीत्यर्थः ॥

---

१ $\overset{m}{K}$ V दि॒वः स्प॰. We with A B $\overset{h}{B}$ K R $\overset{m}{S}$.

---

1 S′ Kd द्यौरिति for दूरेअन्तेति. 2 S′ Kd अस्मान्. 3 So S′ Kd.

पञ्चमी ॥

सर्वं तद् राजा वरुणो वि चष्टे यदन्तरा रोदसी यत् पुरस्तात्।
संख्याता अस्य निमिषो जनानामक्षानिव श्वघ्नी नि मिनोति तानि ॥५॥

सर्वम्। तत्। राजा। वरुणः। वि। चष्टे। यत्। अन्तरा। रोदसी इति।
यत्। पुरस्तात्।
समऽख्याताः। अस्य। निऽमिषः। जनानाम्। अक्षान्ऽइव। श्वऽघ्नी।
नि। मिनोति। तानि ॥ ५ ॥

रोदसी अन्तरा द्यावापृथिव्योर्मध्ये यत् प्राणिजातं वर्तते तथा पुरस्तात् स्वस्य पुरोभागे यत् प्राणिजातम् अस्ति तत् सर्वं वरुणो राजा वि चष्टे विशेषेण पश्यति ॥ तस्मात् तेषां जनानाम् प्राणिनां निमिषः निमेषण-व्यापारस्य। उपलक्षणम् एतत्। अक्षिपरिस्पन्दोपलक्षितस्य अस्य साध्व-साधुकर्मणः संख्याता परिमाणयिता वरुणः तानि पापिनां शिक्षाकर्माणि तत्तत्पापानुसारेण नि मिनोति निक्षिपति। डुमिञ् प्रक्षेपणे। तत्र दृष्टान्तः। अक्षानिवेति। स्वघ्नी स्वम् आत्मानं स्वकीयं धनं च हन्तीति कितवः स्वघ्नी। तथा च यास्कः। श्वघ्नी कितवो भवति स्वं हन्ति [नि० ५, २२] इति। यथा कितवः अक्षान् आत्मनो जयार्थं निक्षिपति तद्वद् इत्यर्थः ॥

षष्ठी ॥

ये ते पाशा वरुण सप्तसप्त त्रेधा तिष्ठन्ति विषिता रुशन्तः।
छिनन्तु सर्वे अनृतं वदन्तं यः सत्यवाद्यति तं सृजन्तु ॥ ६ ॥

ये। ते। पाशाः। वरुण। सप्तऽसप्त। त्रेधा। तिष्ठन्ति। विऽसिताः। रुशन्तः।
छिनन्तु। सर्वे। अनृतम्। वदन्तम्। यः। सत्यऽवादी। अति। तम्।
सृजन्तु ॥ ६ ॥

---

१ A शिनंतु. Bp K J छिनत्तु. $\overset{h}{B}$ R छिन्नंतु. We read छिनंतु with B Bp D K P $\overset{2}{P}$ J $\overset{m}{S}$ V. सिनन्तु is probably the correct reading, but none of our authorities sanction it, unless the शिनंतु read by A is meant for सिनन्तु.

---

1 S' Kd स्वकीये धनं. 2 S' Kd स्वघ्नी.

हे वरुण ये त्वदीयाः पाशाः सप्तसप्त उत्तममध्यमाधमभेदेन प्रत्येकं सप्तसंख्याकाः त्रेधा त्रिप्रकारं विसिताः तत्रतत्र पापिनां निग्रहाय जालवद् बद्धाः । एतच्च त्रैविध्यम् "उदुत्तमं वरुण" [ऋ०१.२४.१५] इति मन्त्रान्तरादप्यवसितम् । रुषन्तः तत्तत्पापानुसारेण पापिष्ठान् हिंसन्तस्तिष्ठन्ति सर्वे ते पाशाः अनृतं वदन्तम् पापकृतम् असदीयं शत्रुं छिनत्तुं छिन्दन्तु । यस्तु सत्यवादी सत्यवदनशीलः पुण्यकृत् तम् अति सृजन्तु विमुञ्चन्तु ॥

सप्तमी ॥

शतेन॒ पाशै॒रभि धे॑हि वरुणै॒नं मा ते॑ मोच्यनृत॒वाङ् नृ॒चक्षः॑ ।
आस्तां॑ जा॒ल्म उ॒दरं॒ श्रंश॑यित्वा कोश॑ इवाब॒न्धः॑ प॑रिकृ॒त्यमा॑नः ॥ ७ ॥

श॒तेन॑ । पाशैः॑ । अ॒भि । धे॒हि॒ । व॒रु॒ण॒ । एन॑म् । मा । ते॒ । मो॒चि॒ । अ॒नृ॒त॒ऽवाक् । नृ॒ऽचक्षः॑ ।
आस्ता॑म् । जा॒ल्मः॑ । उ॒दर॑म् । श्रंश॑यित्वा । कोश॑ःऽइव । अ॒ब॒न्धः॑ । प॒रि॒ऽकृ॒त्यमा॑नः ॥ ७ ॥

हे वरुण शतेन शतसंख्याकैस्त्वदीयैः पाशैः एनम् अनृतवादिनं शत्रुम् अभि धेहि बधान । बद्ध्वा निगृहाणेत्यर्थः । अभिपूर्वो दधातिर्बन्धने वर्तते यथा "अश्वाभिधानीम् आ दत्ते" [तै०सं०५.१.२.१] इति । हे नृचक्षः नृणां मनुष्याणां साध्वसाधुचरित्राणां विवेकेन द्रष्टः । चक्षिङः असुनि "असनयोश्च" इति ख्याञादेशाभावः । ईदृश हे वरुण अनृतवाक् अनृतं ब्रुवन् पुरुषः ते त्वत्तः [मा] मोचि विमुक्तो विसृष्टो मा भूत् । किं तु जाल्मः असमीक्ष्यकारी स्वकीयम् उदरं स्रंसयित्वा जलोदररोगेण स्रस्तं कृत्वा अवन्धः बन्धरहितः प्रान्तेषु अकृतबन्धनः असेः कोश इव परिकृत्यमानः आस्ताम् त्वत्पाशबद्ध एव वर्तताम् । अत एव अन्यत्राम्नातम् । "अनृते खलु वै क्रियमाणे वरुणो गृह्णाति"

---

१ B श्रंस° corrected into श्रस°. A D K K[m] V श्रंस°. We with B[h] R S[m] P P[2] J. २ A B B[p] B[h] D K K[m] R S[m] P P[2] J °बंधः. P °वन्धः. B °वधः. We with Sâyaṇa.

---

1 S′ Kd प्रत्येकसप्त°.

[तै० ब्रा० १. ७. २. ६] इति । ⧗परिकृत्यमान इति । कृती छेदने । अस्मात् कर्मणि यक् ⧗ ॥

अष्टमी ॥

यः समाम्योऽ३ वरुणो यो व्याम्योऽ३ यः सँदेश्योऽ३ वरुणो यो विँदेश्यः ।
यो दैवो वरुणो यश्च मानुषः ॥ ८ ॥

यः । समऽआम्यः । वरुणः । यः । विऽआम्यः । यः । समऽदेश्यः । वरुणः । यः । विऽदेश्यः ।
यः । दैवः । वरुणः । यः । च । मानुषः ॥ ८ ॥

समानम् आमयति व्याधितो भवति [पुरुषोनेनेति] समाम्यः । ईदृशो यो वरुणः । ⧗लुप्ततद्धितोयं निर्देशः⧗ । वारुणः । पाश इत्यर्थः । विगमनेन[1] विविधं वा आमयति पुरुषोनेनेति व्याम्यो [यः] पाशः । तथा यो वरुणः वरुणसंबन्धी पाशः संदेश्यः समानदेशे भवः यश्च विदेश्यः विदेशे भवः यश्च वरुणः वरुणसंबन्धी पाशो दैवः देवेषु भवः यश्च वरुणपाशो मानुषः मनुष्येषु प्रयुक्तः । तैस्त्वा सर्वैरिति वक्ष्यमाणेन संबन्धः ॥

नवमी ॥

तैस्त्वा सर्वैरभि ष्यामि पाशैरसावामुष्यायणामुष्याः पुत्र ।
तानु ते सर्वाननुसंदिशामि ॥ ९ ॥

तैः । त्वा । सर्वैः । अभि । स्यामि । पाशैः । असौ । आमुष्यायण । अमुष्याः । पुत्र ।
तान् । ऊं इति । ते । सर्वान् । अनुऽसंदिशामि ॥ ९ ॥

असावित्यस्य स्थाने संबुद्ध्या शत्रुनामग्रहणम् । आमुष्यायणेति गोत्रतो निर्देशः । अमुष्याः पुत्रेति अदःशब्दस्थाने मातृनामनिर्देशः । तद् अयम् अर्थः । हे देवदत्तायाः पुत्र गार्ग्य यज्ञशर्मन् त्वा त्वां तैः पूर्वस्याम् ऋचि उक्तैः सर्वैः पाशैः अभि ष्यामि अभिदधामि । बध्नामी-

---

१ K^m V तैष्ट्वा. We with A B B^h D K R S^m.

---

1 S' Kd विममनेन.

त्यर्थः ॥ तथा हे शत्रो ते तुभ्यं तान् सर्वान् पाशान् अनुलक्षीकृत्य संदिशामि संप्रयच्छामि ॥

इति चतुर्थकाण्डे [चतुर्थेनुवाके] प्रथमं सूक्तम् ॥

स्त्रीशूद्रकापालादिकृताभिचारदोषनिवृत्त्यर्थं दर्भापामार्गसहदेव्याद्या मन्त्रोक्ता ओषधीः शान्त्युदककलशे प्रक्षिप्य तदनुमन्त्रणविनियुक्ते महाशान्तिगणे "ईशानां त्वा" इत्यादिसूक्तत्रयम् आवपनीयम् । सूत्रितं हि । "दूष्या दूषिरसि[२.११] ये पुरस्तात्[४.४०] ईशानां त्वा[४.१७] "समं ज्योतिः[४.१८] उतो अस्य बन्धुकृत्[४.१९] सुपर्णस्त्वा[५. "१४] यां ते चक्रुः[५.३१] अयं प्रतिसरः[८.५] यां कल्पयन्ति "[१०.१] इति महाशान्तिम् आवपते" इति [कौ० ५.३] ॥

एतत्सूक्तसंघस्य कृत्याप्रतिहरणगणत्वाद्[1] अस्य गणस्य यत्रयत्र विनियोगस्तत्र सर्वत्र अस्य सूक्तत्रयस्यापि विनियोगो द्रष्टव्यः ॥

"तत्र ईशानां त्वा" इति द्वितीयसूक्ते प्रथमा ॥

ईशानां त्वा भेषजानामुज्जेषु आ रभामहे ।
चक्रे सहस्रवीर्यं[१] सर्वस्मा ओषधे त्वा ॥ १ ॥

ईशानाम् । त्वा । भेषजानाम् । उत्ऽजेषे । आ । रभामहे ।
चक्रे । सहस्रऽवीर्यम् । सर्वस्मै । ओषधे । त्वा ॥ १ ॥

हे सहदेव्याख्ये ओषधे भेषजानाम् तत्तद्रोगशान्तये भेषजत्वेन प्रयुज्यमानानाम् अन्यासाम् ओषधीनाम् ईशानाम् ईश्वरां त्वा त्वाम् उज्जेषे शत्रुकृताभिचारदोषम् उज्जेतुं निवर्तयितुम् आ रभामहे संस्पृशामः । ईशानाम् इति । ईश ऐश्वर्ये । अस्मात् लटः शानच् । अदादित्वात् शपो लुक् । अनुदात्तेच्चात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । उज्जेष इति । "तुमर्थे सेसेन्०" इति सेप्रत्ययः ॥ ईश्वरत्वमेवास्या उपपादयति । हे ओषधे सहदेवि त्वा त्वां सर्वस्मै अभिचारजनितज्वरा-

---

१ K K^m V °वीर्या. We with A B B^h D R S^m P P^2 J.

---

1 S' Kd °नन्वात् for °गणत्वात्.

दिसर्वदोषनिवृत्तये सहस्रवीर्यं चक्रे अपरिमितसामर्थ्ययुक्तां करोमि । यस्माद् एवं तस्मात् त्वम् ओषधीनाम् अधिपतिरसीत्यर्थः ॥

द्वितीया ॥

सत्यजितं शपथयावनीं सहमानां पुनःसराम् ।
सर्वाः समह्व्योषधीरितो नः पारयादिति ॥ २ ॥
सत्यऽजितम् । शपथऽयावनीम् । सहमानाम् । पुनःऽसराम् ।
सर्वाः । सम् । अह्वि । ओषधीः । इतः । नः । पारयात् । इति ॥ २ ॥

सत्यजितम् सत्येन याथार्थ्येन अभिचारादिदोषं जयति निवर्तयतीति सत्यजित् । तां शपथयोपनीम् शपथस्य परकृतस्य आक्रोशस्य पृथक्कर्त्रीं नाशयित्रीं वा सहमानाम् अभिभवनशीलां पुनःसराम् पुनःपुनः आभीक्ष्ण्येन बहुतरव्याधिनिवृत्तये सरति प्रवर्तत इति पुनःसरा ताम् ईदृशीम् ओषधिम् अन्याः सर्वा ओषधीः ओषध्यः इतः अस्माद् अभिचारदोषशमनाद्धेतोः नः अस्मान् पारयात् । ✕पार तीर कर्मसमाप्तौ✕ । असत्कर्तव्यं समापयेत् इति अनेन अभिप्रायेण समभिं* । गच्छन्तीति उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥

तृतीया ॥

या शशाप शपनेन याघं मूरमादधे ।
या रसस्य हरणाय जातमारेभे तोकमत्तु सा ॥ ३ ॥
या । शशाप । शपनेन । या । अघम् । मूरम् । आदधे ।
या । रसस्य । हरणाय । जातम् । आरेभे । तोकम् । अत्तु । सा ॥ ३ ॥

एषा प्रथमकाण्डे व्याख्याता [१२८. ३] । अक्षरार्थस्तु या पिशाची शपनेन आक्रोशेन शशाप या च मूरम् मूर्छाप्रदम् अघम् पापम् आददे* । या च शरीरगतासृगादिरसस्य हरणाय जातम् पुत्रादिम् [आरे-

१ K °योपनीं for °यावनीं with Sâyaṇa. We with A B B^{h} D K^{m} R S^{m} P P^{2} J V. २ B B^{P} समह्व्यो°. A B D K^{m} R S^{m} V K समह्वयो°. V S समभ्यो°. ३ K °योपनीम्. ४ P आह्वि. P^{2} J आह्वि. K अभि ।. ५ K V °दे with Sâyaṇa. V recognises °दधे as a variant.

भे] आलिङ्गति सा सर्वा मद्विषये अभिचरतः शत्रोः तोकम् पुत्रं भक्षयतु इति ॥

चतुर्थी ॥

यां ते चक्रुरामे पात्रे यां चक्रुर्नीललोहिते ।
आमे मांसे कृत्यां यां चक्रुस्तया[1] कृत्याकृतो[2] जहि ॥ ४ ॥
याम् । ते । चक्रुः । आमे । पात्रे[3] । याम् । चक्रुः । नीलऽलोहिते ।
आमे । मांसे । कृत्याम् । याम् । चक्रुः । तया[4] । कृत्याऽकृतः । जहि ॥ ४ ॥

हे कृत्ये ते त्वां याम् आमे अपक्के मृत्पात्रे चक्रुः कृतवन्तः अभिचारकाः । यद्वा नीललोहिते । धूमोद्गमेन नीलः ज्वालया च लोहितः अग्निः नीललोहितः । तादृशे अग्नौ अध्यायतने यां चक्रुः कृतवन्तः । आमे अपक्के मांसे कुक्कुटादिप्राणिशरीरे यां कृत्यां चक्रुः कृतवन्तः । आमपात्रम् अध्यायतनं कुक्कुटादिप्राणिशरीरं सभास्थलम् इत्येवमादीनि हि कृत्यानिधानस्थानानि । एवं कृत्याकृतः कृत्यायाः प्रयोक्तॄन् हे कृत्ये त्वं[5] या । ✠विभक्तिव्यत्ययः✠ । त्वं जहि नाशय । यद्वा ओषधिः संबोध्यते । हे ओषधे त्वया कृत्याप्रयोक्तारो हन्तव्या इत्यर्थः । ✠कर्मणि कर्तृप्रत्ययः✠ ॥

पञ्चमी ॥

दौष्वप्न्यं दौर्जीवित्यं[6] रक्षो अभ्वमरायि[1] ।
दुर्णाम्नीः सर्वा दुर्वाचस्ता अस्मन्नाशयामसि ॥ ५ ॥
दौःऽस्वप्न्यम् । दौःऽजीवित्यम् । रक्षः । अभ्वम् । अरायि[2] ।
दुःऽनाम्नीः । सर्वाः । दुःऽवाचः । ताः । अस्मत्[3] । नाशयामसि ॥ ५ ॥

दुष्टः स्वप्नो दुःष्वप्नः तत्र भवम् अरिष्टं दर्शनं दौष्वप्न्यम् । दौर्जीवित्यं

---

१ K चक्रुस्त्वया with Sâyaṇa. २ K त्वया. ३ K V °जीवत्यं with Sâyaṇa. We with A B B[P] B[h] D K[m] R S[m] P P[2] J V. ४ So we with A B B[P] B[h] D K K[m] R S[m] P P[2] J V. ५ K °जीवत्यम्. ६ So P P[2] J.

दुष्टा जीवता जीवभावो यस्य दुर्जीवतः तस्य भावो दौर्जीवत्यम्। ब्राह्मणादेराकृतिगणत्वात् ष्यञ्। रक्षः राक्षसजातिः अभ्वम्। महन्नामैतत्। यच्च अभिचारक्रियाजनितम् अन्यद् महद् भयकारणम् अस्तीत्यर्थः। यद्वा अभ्वम् महद् रक्षो ब्रह्मराक्षसादिः इति रक्षोविशेषणत्वेन योज्यम्। अत एव "द्यावा रक्षतं पृथिवी नो अभ्वात्" [ऋ० १. १८५. २] इति अभ्वस्य भयहेतुता श्रुता। अराय्यः असमृद्धिहेतवः पापलक्ष्म्यः तथा दुर्णाम्नीः छेदिका भेदिका इत्येवं दुष्टनाम्नोपेता याः पिशाच्यः दुर्वाचः नाशयामि छेदयामि भक्षयामि इत्येवं दुष्टाः शब्दा याभिः सततं प्रयुज्यन्ते तास्तथोक्ताः। इत्थं या इमाः कृत्या अनुक्रान्ताः ताः सर्वाः अस्मिन् अभिचर्यमाणपुरुषविषये नाशयामसि नाशयामः॥

षष्ठी॥

क्षुधामारं तृष्णामारमगोतामनपत्यताम।
अपामार्ग त्वया वयं सर्वं तदप मृज्महे॥ ६॥

क्षुधाऽमारम। तृष्णाऽमारम। अगोताम। अनपऽत्यताम।
अपामार्ग। त्वया। वयम। सर्वम। तत्। अप। मृज्महे।॥ ६॥

क्षुधामारम् क्षुधा क्षुत्पीडया पुरुषस्य मारणम् तृष्णामारम् तृष्णया पिपासातिशयेन पुरुषस्य मारणम्। यद्वा क्षुत्पिपासयोः पुरुषे स्वरूपतो नाशनम् अत्र विवक्षितम्। तद्विरहे पुरुषस्य स्वत एव मरणसंभवात्। अगोताम् गोराहित्यम् अनपत्यताम् अपत्यराहित्यं च। तत् एतत् सर्वं हे अपामार्ग त्वया वयम् अप मृज्महे अपमार्जयामः विनाशयामः॥

सप्तमी॥

तृष्णामारं क्षुधामारमथो अक्षपराजयम।
अपामार्ग त्वया वयं सर्वं तदप मृज्महे॥ ७॥

---

१ B B^{P} $\overset{h}{B}$ D $\overset{m}{K}$ R $\overset{m}{S}$ P $\overset{2}{P}$ J V °पद्यताम्. We with A K V and Sâyaṇa. २ B^{P} V know of मृक्ष्महे as a variant. K मृक्ष्महे. We with A B B^{P} $\overset{h}{B}$ D K R $\overset{m}{S}$ P $\overset{2}{P}$ J.

---

1 S' Kd जीवनाभावो. 2 S' Kd दुर्ना°. 3 S' Kd मरणम्.

तृष्णाऽमारम् । क्षुधाऽमारम् । अथो इति । अक्षऽपराजयम् ।
अपामार्ग । त्वया । वयम् । सर्वम् । तत् । अप । मृज्महे ॥ ७ ॥

क्षुत्तृष्णानाशयोरत्र विपर्यास एव विशेषः । अथो अपि च अक्षपराजयम् अक्षैर्द्यूतसाधनैः द्यूतक्रियानिमित्तः पराजयः । तत् एतत् सर्वं हे अपामार्गेत्यादि पूर्ववत् ॥

अष्टमी ॥

अपामार्ग ओषधीनां सर्वासामेक इद् वशी ।
तेन ते मृज्म आस्थितमथ त्वमगदश्चर ॥ ८ ॥
अपामार्गः । ओषधीनाम् । सर्वासाम् । एकः । इत् । वशी ।
तेन । ते । मृज्मः । आऽस्थितम् । अथ । त्वम् । अगदः । चर ॥ ८ ॥

सर्वासाम् अन्यासाम् ओषधीनाम् अपामार्गः एक एव वशी वशयिता । सर्वा अस्य वशे वर्तन्त इत्यर्थः । हे अभिचारदोषगृहीत ते तव आस्थितम् कृत्यादिभिरापतितं रोगादिकं तेन अपामार्गेण मृज्मः मार्जयामः अपगमयामः ॥ अथ अनन्तरं त्वम् अगदः व्याधिरहितः चर चिरकालं वर्तस्व ॥

[इति] द्वितीयं सूक्तम् ॥

"समं ज्योतिः" इति सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः । सूत्रं तु तत्रैव उदाहृतम् ॥

तत्र प्रथमा ॥

समं ज्योतिः सूर्येणाह्ना रात्री समावती ।
कृणोमि सत्यमूतयेऽरसाः सन्तु कृत्वरीः ॥ १ ॥
समम् । ज्योतिः । सूर्येण । अह्ना । रात्री । समऽवती ।
कृणोमि । सत्यम् । ऊतये । अरसाः । सन्तु । कृत्वरीः ॥ १ ॥

---

१ See note २ on the previous page. २ D तेना. ३ K V मृक्ष्म. S[m] मृष्म. ४ K मृक्ष्मः. ५ P समऽवती; K समऽआवंती. We with J P[2].

सूर्येण आदित्येन तदीयं ज्योतिः प्रभामण्डलं समम् समानमेव भवति न कदाचित् तेन वियुज्यते। रात्री। ☒"रात्रेश्चाजसौ" इति ङीप्☒। रात्रिश्च अह्ना समावती समानायामा। ☒समशब्दात् आवतुप्रत्ययः स्वार्थिकः☒। यथैवं प्रभाप्रभावतोर्दिवारात्रयोश्च समानत्वं यथार्थम् तथा सत्यम् यथार्थं कर्म कृणोमि करोमि। किमर्थम्। ऊतये अभिचर्यमाणस्य पुरुषस्य रक्षणार्थम्। तस्मात् कृत्वरीः कर्तनशीलाः कृत्याः अरसाः शुष्काः कार्यासमर्थाः सन्तु भवन्तु॥

द्वितीया॥

यो देवाः कृत्या कृत्वा हरादविदुषो गृहम्।
वत्सो धारुरिव मातरं तं प्रत्यगुप पद्यताम्॥ २॥

यः। देवाः। कृत्याम्। कृत्वा। हरात्। अविदुषः। गृहम्।
वत्सः। धारुःऽइव। मातरम्। तम्। प्रत्यक्। उप। पद्यताम्॥ २॥

हे देवाः यः शत्रुः कृत्याम् मन्त्रौषधादिभिः शत्रोः पीडाकरीं कृत्यां कृत्वा अविदुषः अजानानस्य तस्य गृहम् अरात् ऋच्छेत् कृत्यानिखननार्थं गच्छेत्। ☒ऋ गतौ इत्यस्मात् लेटि आडागमः। छान्दसः शपो लुक्☒। तम् अभिचरन्तं सा कृत्या प्रत्यक् अभिमुखं प्रतिनिवृत्य उप पद्यताम् उपगच्छतु। तत्र दृष्टान्तः। वत्स इति। [धारुः]। ☒धेट् पाने। "दाधेट्सिशदसदो रुः" इति रुप्रत्ययः☒। यथा धारुः स्तनपानं कुर्वन् वत्सः स्वमातरमेव अनुधावति एवं कृत्यापि स्वोत्पादकमेव प्रतिनिवृत्य गच्छतु इत्यर्थः॥

तृतीया॥

अमा कृत्वा पाप्मानं यस्तेनान्यं जिघांसति।
अश्मानस्तस्यां दुर्गधायां बहुलाः फट् करिक्रति॥ ३॥

---

१ K अरा° with Sâyaṇa. We with A B B^{P} B^{h} D K^{m} R S^{m} P P^{2} J V. २ So P P^{2} J. K अरात्. ३ P त्वम्. ४ So we with A B B^{P} B^{h} D K K^{m} R S^{m} P P^{2} J V.

---

1 S' Kd प्रभावतो° for प्रभाप्रभावतो°. 2 S' Kd कार्यसम°.

अमा । कृत्वा । पाप्मानम् । यः । तेन । अन्यम् । जिघांसति ।
अश्मानः । तस्याम् । दुग्धायाम् । बहुलाः । फट् । करिक्रति ॥ ३ ॥

यः शत्रुः अनुकूल इव अमा सह स्थितः सन् पाप्मानम् कृत्यानिखननलक्षणं कृत्वा तेन पाप्मना अन्यम् द्वेष्यं जिघांसति हन्तुम् इच्छति । ॥ "अज्झनगमां सनि" इति दीर्घः ॥ । तस्याम् तेन शत्रुणा कृतायां कृत्यायां दुग्धायाम् प्रतीकारेण रिक्तीकृतायां स्वकार्यकरणासमर्थायां सत्याम् अश्मानः पाषाणाः मन्त्रसामर्थ्योत्पादिता बहुलाः सन्तः फट् हिंसनं करिक्रति पुनःपुनः कुर्वन्तु । कृत्याकृतं शत्रुं हिंसन्तु इत्यर्थः । ॥ करोतेर्यङ्लुगन्तात् पञ्चमलकारे "रुग्रिकौ च लुकि" इति अभ्यासस्य रिगागमः ॥ ॥

चतुर्थी ॥

सहस्रधामन् विशिखान् विग्रीवां छायया त्वम् ।
प्रति स्म चक्रुषे कृत्यां प्रियां प्रियावते हर ॥ ४ ॥
सहस्रऽधामन् । विऽशिखान् । विऽग्रीवान् । शायय । त्वम् ।
प्रति । स्म । चक्रुषे । कृत्याम् । प्रियाम् । प्रियऽवते । हर ॥ ४ ॥

हे सहस्रधामन् । धामानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति [नि० ९. २८] [इति] यास्कवचनाद् धामशब्देन स्थानादिकम् उच्यते । सहस्रं धामानि स्थानादीनि यस्याः सा सहस्रधामा ओषधिः । ॥ "मनः" इति ङीपः प्रतिषेधः ॥ । हे सहस्रधामन् सहदेव्याख्ये ओषधे त्वम् अस्मदीयान् शत्रून् विशिखान् विच्छिन्नकेशान् विग्रीवान् विच्छिन्नग्रीवान् छिन्नशिरसः कृत्वा क्षायय क्षयं प्रापय । ॥ क्षै जै पै क्षये इति धातुः ॥ ॥ प्रियाम् शत्रूणां हितकारित्वेन अनुकूलां कृत्याम् पिशाचीं चक्रुषे कृतवते उत्पादितवते प्रियावते प्रियया कृ-

१ See note ४ on the previous page. २ So we with **A B D K K^m R S^m J V.** **B^h P P^2** सहस्रं°. ३ **P P^2** सहस्रं°. We with **J.** ४ So **P P^2 J K.** ५ **J** चक्षुषे.

1 **S' Kd** जन्यं for अन्यं. 2 **S' Kd** सहस्रधामानि for सहस्रं धामानि.

त्यया तद्वते प्रति हर स्म तां कृत्यां प्रतिनिवृत्य प्रापय । ॥ चक्रुषे । करोतेर्लिटः क्वसुः । चतुर्थ्येकवचने भसंज्ञायां "वसोः संप्रसारणम्" ॥ ॥

पञ्चमी ॥

अनयाहमोषध्या सर्वाः कृत्या अदूदुषम् ।
या क्षेत्रे चक्रुर्यां गोषु यां वां ते पुरुषेषु ॥ ५ ॥
अनया । अहम् । ओषध्या । सर्वाः । कृत्याः । अदूदुषम् ।
याम् । क्षेत्रे । चक्रुः । याम् । गोषु । याम् । वा । ते । पुरुषेषु ॥ ५ ॥

अनया सहदेव्याख्यया ओषध्या अहं सर्वाः कृत्याः वक्ष्यमाणप्रदेशेषु खाताः अदूदुषम् दूषितवान् अस्मि । कार्यासमर्थाः करोमीत्यर्थः । ॥ दुषेर्ण्यन्तात् लुङि चङि रूपम् ॥ । ताः कृत्या दर्शयति । यां कृत्यां क्षेत्रे बीजावापार्हे भूप्रदेशे चक्रुः कृतवन्तः निखातवन्तः यां कृत्यां गोषु मध्ये निखातवन्तः वांते वातसंचारप्रदेशे यां कृत्यां कृतवन्तः । कृत्यासंस्पृष्टवाय्वभिघातेनापि अभिचारदोषो जायत इत्येवम् उक्तम् । तथा पुरुषेषु मनुष्येषु तत्संचारदेशे यां कृत्यां निखातवन्तः ताः सर्वाः कृत्या अदूदुषम् इत्यन्वयः ॥

षष्ठी ॥

यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम् ।
चकार भद्रमस्मभ्यमात्मने तपनं तु सः ॥ ६ ॥
यः । चकार । न । शशाक । कर्तुम् । शश्रे । पादम् । अङ्गुरिम् ।
चकार । भद्रम् । अस्मभ्यम् । आत्मने । तपनम् । तु । सः ॥ ६ ॥

यः शत्रुः चकार कृत्यां प्रयुङ्क्ते तया कृत्यया एकं पादम् एकाम् अङ्गुलिं* वा शश्रे हिनस्ति । ॥ शृ हिंसायाम् इत्यस्मात् छान्दसो लिट् ॥ । स शत्रुः कर्तुं तथा हिंसितुं न शशाक न शक्नोतु । ॥ छान्दसो लिट् ॥ । कृत्याप्रयोगेण मारणम् अवयवहानिं वा कर्तुम् असमर्थो भवतु इत्यर्थः । तत्कृतम् अभिचारकर्म अस्मभ्यं भद्रम् मङ्गलं च-

1 S′ Kd तत्संसार°. 2 S′ Kd शिश्रे.

कार । प्रतीकारमन्त्रौषधिप्रभावेन श्रेयः करोतु इत्यर्थः । अपि तु आत्मने स्वस्मै कृत्याप्रयोक्रे सः तत्कृतोभिचारः तपनम् दहनं करोतु ॥

सप्तमी ॥

अपामार्गोऽप मार्ष्टु क्षेत्रियं शपथश्च यः ।
अपाहं यातुधानीरप सर्वा अराय्यः ॥ ७ ॥

अपामार्गः । अप । मार्ष्टु । क्षेत्रियम् । शपथः । च । यः ।
अप । अहं । यातुऽधानीः । अप । सर्वाः । अराय्यः ॥ ७ ॥

अपामार्गाख्या ओषधिः क्षेत्रियम् क्षेत्रं मातापितृशरीरम् तत्सकाशाद् आगतं सांक्रामिकं क्षयकुष्ठापस्मारादिकं रोगम् अप मार्ष्टु अस्मत्तोपगमयतु । मृजूष् शुद्धौ । अपमृज्यते रोगादिनिराकरणेन पुरुषः शोध्यते अनेनेति अपामार्गः । करणे घञ् । "चजोः कु घिण्ण्यतोः" इति कुत्वम् । "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति दीर्घः । अप मार्ष्टु । अदादित्वात् शपो लुक् । "मृजेर्वृद्धिः" इति वृद्धिः । क्षेत्रियम् इति । "क्षेत्रियच् परक्षेत्रे चिकित्स्यः" इति निपात्यते[1] । यश्च शत्रुकृतः शपथः शापः तमपि अप मार्ष्टु । तथा यातुधानीः पिशाचीः अप मार्ष्टु । अह इति विनिग्रहे । तथा अराय्यः अरायीः अलक्ष्मीः सर्वा अपामार्गः अप मार्ष्टु । अरायीशब्दात् शसि छान्दसः पूर्वसवर्णदीर्घाभावः ॥

अष्टमी ॥

अपमृज्य यातुधानानप सर्वा अराय्यः ।
अपामार्ग त्वया वयं सर्वं तदप मृज्महे ॥ ८ ॥

अपऽमृज्य । यातुऽधानान् । अप । सर्वाः । अराय्यः ।
अपामार्ग । त्वया । वयम् । सर्वम् । तत् । अप । मृज्महे ॥ ८ ॥

हे अपामार्ग त्वं यातुधानान् यक्षरक्षःप्रभृतीन् अपमृज्य अपमृड्ढि । व्यत्ययेन श्यन् । तथा सर्वा अराय्यः अलक्ष्मीकरीः

१ See note on मृज्महे in stanza 6 of the previous hymn.

पापदेवताः अप गमय। यद्वा। ॥ अपमृज्येति त्यबन्तः ॥। हे अपामार्ग त्वया प्रथमं यातुधानादीन् अपमृज्य तैः कृतं सर्वं तद् दुःखजातं त्वयैव साधनेन वयम् अप मृज्महे निराकुर्मः ॥

[इति] तृतीयं सूक्तम् ॥

"उतो असि" इति सूक्तस्य पूर्ववद् विनियोगः ॥

तत्र प्रथमा ॥

उतो अस्यबंन्धुकृदुतो असि नु जामिकृत्।
उतो कृत्याकृतः प्रजां नडमिवा च्छिन्धि वार्षिकम् ॥ १ ॥

उतो इति। असि। अबंन्धुऽकृत्। उतो इति। असि। नु। जामिऽकृत्। उतो इति। कृत्याऽकृतः। प्रऽजाम्। नडमऽइव। आ। छिन्धि। वार्षिकम् ॥ १ ॥

सहदेव्यपामार्गयोरन्यतरः संबोध्यः। उतो अपि च हे सहदेवि अपामार्ग वा अबन्धुकृत् अबन्धूनां शत्रूणां कर्तकश्छेदकोसि। ॥ कृती छेदने इत्यस्मात् किप् ॥। उतो अपि च नु क्षिप्रं जामिकृत् जामयः सहजाः शत्रवः तेषामपि कर्तयिता [असि] भवसि। इत्थं सहजासहजभेदेन शत्रुद्वैविध्यम् अन्यत्रापि श्रुतम्। "जामिम् अजामिं प्र मृणीहि शत्रून्" [ऋ० ४. ४. ५] इति ॥ उतो अपि च कृत्याकृतः कृत्यायाः प्रयोक्तुः प्रजाम् पुत्रपौत्रादिकां वार्षिकम् वर्षासु भवं नडम् एतत्संज्ञं सुच्छेदं[1] तृणविशेषमिव[2] आ छिन्धि आसमन्तात् छिन्नां वियुक्तां कुरु। ॥ छिदिर् द्वैधीकरणे। "हुझल्भ्यो हेर्धिः" इति हेर्धिरादेशः। "श्नसोरल्लोपः" इति अकारलोपः। वार्षिकम् इति। "वर्षाभ्यष्ठक्" "छन्दसि ठञ्" इति ठञ् प्रत्ययः ॥

द्वितीया ॥

ब्राह्मणेन पर्युक्तासि कण्वेन नार्षदेन।

---

१ P प्रजाम्.

---

1 S' Kd सुच्छदं. 2 S' Kd °विशेषमेव.

सेनैवैषि त्विषीमती[1] न तत्र भयमस्ति यत्र ग्रामोष्योषधे ॥ २ ॥

ब्राह्मणेन । परिऽउक्ता । असि । कण्वेन । नार्षदेन ।

सेनाऽइव । एषि । त्विषिऽमती[2] । न । तत्र । भयम् । अस्ति[3] । यत्र ।

ग्रऽआमोषि । ओषधे ॥ २ ॥

नार्षदेन नृषदस्य पुत्रेण कण्वेन एतत्संज्ञेन ब्राह्मणेन मन्त्रदृशा हे ओषधे सहदेवि पर्युक्तासि परितो विनियुक्तासि । अतः त्विषीमते[4] दीप्तिमते यजमानाय परिरक्षणार्थं सेनेव एषि गच्छसि । तादृशी त्वं यत्र यस्मिन् देशे ग्रामोषि तत्र भयम् अभिचारादिजनितभीतिर्नास्ति । अतो भयनिवारकत्वात् सेनया उपमीयस इत्यर्थः ॥

तृतीया ॥

अग्रमेष्योषधीनां ज्योतिषेवाभिदीपयन् ।

उत त्रातासि पाकस्याथो हन्तासि रक्षसः ॥ ३ ॥

अग्रम् । एषि । ओषधीनाम् । ज्योतिषाऽइव । अभिऽदीपयन् ।

उत । त्राता । असि । पाकस्य । अथो इति । हन्ता । असि । रक्षसः ॥ ३ ॥

हे सहदेवि ओषधीनाम् सर्वासां वीरुधाम् अग्रम् प्रथमम् एषि । सर्वौषधिप्रतिनिधित्वेन मुख्या भवसीत्यर्थः । तत्र दृष्टान्तः ज्योतिषेवेति । ज्योतिषा प्रकाशेन अभितः सर्वतो दीपयन् प्रकाशयन्नादित्यः यथा सर्वज्योतिषाम् अग्रगण्यो भवति तथेत्यर्थः ॥ यद्वा ज्योतिषा आत्मीयेन तेजसैव स्वसामर्थ्येन अभिदीपयन् कृत्यादोषान् संदहन् हे अपामार्ग त्वं पाकस्य पक्तव्यप्रज्ञस्य दुर्बलस्य त्रातासि रक्षिता भवसि । तद्बाधकस्य च रक्षसः राक्षसस्य हन्तासि नाशयिता भवसि ॥

चतुर्थी ॥

यद्दो देवा असुरांस्त्वयाग्रे निरकुर्वत ।

ततस्त्वमध्योषधेऽपामार्गो अजायथाः ॥ ४ ॥

---

१ K V °मते with Sâyaṇa. २ D K ग्रामोस्यो°. ३ P seems doubtful between नार्ष° and नार्स°, K नार्स°. We with P J. ४ K °मते. ५ J अस्ति. ६ B °धे अपा°.

यत्। अदः। देवाः। असुरान्। त्वया। अग्रे। निःऽअकुर्वत।
ततः। त्वम्। अधि। ओषधे। अपामार्गः। अजायथाः॥ ४॥

हे ओषधे यत् यस्माद् अदः अमुष्मिन् विप्रकृष्टे अग्रे पुरा त्वया साधनेन देवाः इन्द्रादयः असुरान् [निरकुर्वत] निराकृतवन्तः ततः तस्मात् कारणात् हे ओषधे त्वम् अन्यासाम् ओषधीनाम् अधि उपरि वर्तमानः श्रेष्ठः सन् अपामार्गो अजायथाः अपामार्गात्मना उत्पन्ना भवसि। अपमार्जनाद् अपामार्ग इति संज्ञां लब्धवतीत्यर्थः॥

पञ्चमी॥

विभिन्दती शंतशाखा विभिन्दन् नाम ते पिता।
प्रत्यग् वि भिन्धि त्वं तं यो अस्माँ अभिदासति॥ ५॥

विऽभिन्दती। शतऽशाखा। विऽभिन्दन्। नाम। ते। पिता।
प्रत्यक्। वि। भिन्धि। त्वम्। तम्। यः। अस्मान्। अभिऽदासति॥ ५॥

हे अपामार्गाख्ये ओषधे शतशाखा अपरिमितशाखा सती विभिन्दती विभेदनशीला एतत्संज्ञा भवसि। विभेदनशक्तिश्च कारणगुणायातत्वाद् दुःसहेत्याह विभिन्दन्निति। हे अपामार्ग ते तव पिता उत्पादकः विभिन्दन् [नाम] विभेदकः एतत्संज्ञो भवति। अतः त्वं तम् अस्मदीयं शत्रुं प्रत्यग् भिन्धि प्रतीपगमनेन विदारय यः शत्रुः अस्मान् अभिदासति उपक्षपयति। दसु उपक्षये। अस्मात् ण्यन्तात् लटि शपः "छन्दस्युभयथा" इति आर्धधातुकत्वात् "णेरनिटि" इति णिलोपः॥

षष्ठी॥

असद् भूम्याः समंभवत् तद्यामेति महद् व्यचः।

१ B शंतशाखा. २ B D अस्मँ अभि°. ३ Such is the reading of all our MSS. and Vaidikas. The pada MSS. and reciters divide: तत्। याम्। Sâyaṇa too explains तद् याम्. But there can be no doubt that we ought to read तद् द्याम् as proposed by Professors Roth and Whitney. The accent of एति would be a sufficient justification for the restoration of the correct reading.

1 Sâyaṇa omits वि both in his text and in his commentary.

तद् वै ततो विधूपायत् प्रत्यक् कर्तारमृच्छतु ॥ ६ ॥

असत्। भूम्याः। सम्। अभवत्। तत्। याम्। एति। महत्। व्यचः।
तत्। वै। ततः। विऽधूपायत्। प्रत्यक्। कर्तारम्। ऋच्छतु ॥ ६ ॥

हे ओषधे त्वत् सकाशाद् महत् अधिकं व्यचः व्याप्तं तेजो निष्क्रम्य यां भूमिम् एति प्राप्नोति तस्यां भूम्यां निखातम् [असत् सम् अभवत्]। बाधितुं न शक्नोतीत्यर्थः। तद् [वै] असत्कल्पं कृत्यारूपं ततः तस्माद् देशात् निर्गत्य विधूपायत् विशेषेण धूपितं प्रज्वलितं सत् कर्तारम् कृत्याकृतमेव प्रत्यग् ऋच्छतु प्रतिनिवृत्य पीडयतु। यद्वा असत् अशोभनं कृत्यारूपं समभवत् परपीडार्थं समजायत। तत्र कृत्यायुक्तां यां भूमिं त्वदीयं महद् व्यचः प्राप्नोतीत्यादि पूर्ववत्। विधूपायत्। धूप संतापे। "गुपूधूपविच्छि°" इति आयप्रत्ययः ॥

सप्तमी ॥

प्रत्यङ् हि संबभूविथ प्रतीचीनफलस्त्वम्।
सर्वान् मच्छपथाँ अधि वरीयो यावया वधम् ॥ ७ ॥

प्रत्यङ्। हि। सम्ऽबभूविथ। प्रतीचीनऽफलः। त्वम्।
सर्वान्[1]। मत्। शपथान्। अधि। वरीयः। यवय। वधम् ॥ ७ ॥

हे प्रतीचीनफल। प्रतीचीनानि आत्माभिमुखानि फलानि यस्य सः अपामार्गः प्रतीचीनफलः। हे तादृश त्वं प्रत्यङ् हि प्रत्यञ्चनः प्रतिनिवृत्तमुख एव खलु संबभूविथ उदपद्यथाः। हि शब्दो हेतौ। हि यस्माद् एवं तस्मात् सर्वान् शत्रुकृतान् शपथान् आक्रोशान् मत् सकाशाद् यवय पृथक् कुरु। अधिः पञ्चम्यर्थानुवादी। पृथक्कृत्य च शत्रारमेव प्रतीचीनं प्रापयेत्यर्थः। तथा वरीयः उरुतरं विस्तीर्णतरं वधम् तदीयं हननसाधनम् आयुधं कृत्यारूपं वा अस्मतः पृथक् कुरु ॥

अष्टमी ॥

शतेन मा परि पाहि सहस्रेणाभि रक्ष मा।

---

१ See foot-note ३ on the previous page. २ B R °छपथँ अधि. ३ P[3] सर्वाम्.

इन्द्रस्ते वीरुधां पत उग्र ओज्मानमा दधत् ॥ ८ ॥

शतेन। मा। परि। पाहि। सहस्रेण। अभि। रक्ष। मा।

इन्द्रः। ते। वीरुधाम्। पते। उग्रः। ओज्मानम्। आ। दधत्॥ ८ ॥

हे ओषधे सहदेवि अपामार्ग वा शतेन शतसंख्याकेन रक्षणोपायेन मा मां परि पाहि ॥ तथा सहस्रेण सहस्रसंख्याकेन मा माम् अभि रक्ष कृत्याकृताद् दोषात् सर्वतः पालय ॥ हे वीरुधां पते लतारूपाणाम् ओषधीनाम् अधिपते ते तव उग्रः उज्जूर्णबलः इन्द्रो देवः ओज्मानम् ओजस्वित्वम् आ दधत् आस्थापयतु। ददातु इत्यर्थः ॥

[इति] चतुर्थं सूक्तम् ॥

"आ पश्यति" इति सूक्तेन ब्रह्मग्रहादिजनितभयनिवृत्तये त्रिसंध्यामणिं संपात्य अभिमन्त्र्य बध्नीयात्। सूत्रितं हि। "आ पश्यतीति सदंपुष्पामणिं बध्नाति" इति [कौ॰ ४. ४] ॥

तथा चातनगणेपि एतत् सूक्तम्। [तद् उक्तं] कौशिकेन। "शं नो देवी पृश्निपर्णी[२. २५] आ पश्यति[४. २०] तान्तत्यौजाः[४. ३६]" इति [कौ॰ १. ८]। अतोस्य सूक्तस्य "चातनानाम् अपनोदनेन व्याख्यातम्" [कौ॰ ४. १] इत्याद्युक्तकर्मसु विनियोगः ॥

तत्र प्रथमा ॥

आ पश्यति प्रति पश्यति परा पश्यति पश्यति।

दिवमन्तरिक्षमाद् भूमिं सर्वं तद् देवि पश्यति ॥ १ ॥

आ। पश्यति। प्रति। पश्यति। परा। पश्यति। पश्यति।

दिवम्। अन्तरिक्षम्। आत्। भूमिम्। सर्वम्। तत्। देवि। पश्यति॥ १ ॥

हे देवि देवतारूपे सदंपुष्पाख्ये ओषधे त्वद्विकारमणिधारकोयं जनस्त्वत्प्रसादात् आ पश्यति आगामिभयकारणं परिहर्तुं जानाति। तथा प्रति पश्यति प्रतिमुखं स्थितं वर्तमानमपि भयकारणं निरसितुं जानाति ॥

1 S'Kd सहस्रसंख्यानिवृत्त्यपीडयसंख्याकेन for सहस्रसंख्याकेन. 2 S'Kd न तव for ते तव.

तथा परा पश्यति परागतं दूरस्थमपि भयकारणम् अवलोकयति ॥ किं बहुना । अविशेषेण[1] सर्वमपि भयकारणम् असौ पश्यति साक्षात्करोति ॥ ये खलु ब्रह्मग्रहादयो भयहेतवः ते सर्वे पृथिव्यादिलोकत्रयं व्याप्य वर्तन्ते अतस्तदपरिज्ञाने तदाश्रया ब्रह्मग्रहादयो दुष्परिज्ञाना इत्यभिप्रेत्याह दिवम् अन्तरिक्षम् इति । दिवम् स्वर्गम् अन्तरिक्षम् अन्तरा क्षान्तं मध्यमं लोकम् आत् अनन्तरं भूमिम् पृथिवीम् एतल्लोकत्रयोपलक्षितं तत् तत्रत्यं सर्वम् प्राणिजातं त्रिसंध्यामणिधारणमाहात्म्येन पश्यति साक्षात्करोति । एवं सर्वज्ञतया जागरूकं तं ब्रह्मग्रहादिर्न स्पृशतीत्यर्थः ॥

द्वितीया ॥

तिस्रो दिवस्तिस्रः पृथिवीः षट् चेमाः प्रदिशः पृथक् ।
त्वयाहं सर्वा भूतानि पश्यानि देव्योषधे ॥ २ ॥

तिस्रः । दिवः । तिस्रः । पृथिवीः । षट् । च । इमाः । प्रऽदिशः । पृथक् ।
त्वया । अहम् । सर्वा । भूतानि । पश्यानि । देवि । ओषधे ॥ २ ॥

"तिस्रो भूमीर्धारयन् त्रीँरुत द्यून्" [ऋ० २. २७. ८] इत्यादिमन्त्रवर्णात् "त्रयो वा इमे त्रिवृतो लोकाः" [ऐ० ब्रा० २. १७] इत्यादिब्राह्मणवचनाच्च पृथिव्यादिलोकानां प्रत्येकं त्र्यात्मकत्वम् अवसीयते । तद् इदम् उच्यते तिस्रो दिव इत्यादिना । तिस्रः त्रिसंख्याका दिवः द्युलोकान् [तिस्रः] त्रिसंख्याकाः पृथिवीश्च इमाः परिदृश्यमानाः प्रदिशः प्रकृष्टा दिशः प्राच्याद्या ऊर्ध्वाधोदिग्भ्यां सह षट्संख्याकाश्च[3] तथा तत्रस्थानि सर्वा सर्वाणि भूतानि भूतजातानि हे देवि देवतारूपे ओषधे त्वया मणिरूपेण धार्यमाणया अहं [पृथक्] पश्यानि साक्षात्करवाणि ॥

तृतीया ॥

दिव्यस्य सुपर्णस्य तस्य हासि कनीनिका ।
सा भूमिमा रुरोहिथ वह्यं श्रान्ता वधूरिव ॥ ३ ॥

दिव्यस्य । सुऽपर्णस्य । तस्य । ह । असि । कनीनिका ।

---

1 S′ Kd अपिविशेषेण. 2 S′ Kd omit इति. 3 S′ Kd ताः for तथा.

सा। भूमिम। आ। रुरोहिथ। वह्यम। आन्ता। वधूःइव ॥ ३ ॥

हे सदंपुष्पौषधे दिव्यस्य दिवि भवस्य देवतारूपस्य सुपर्णस्य शोभनपक्षयुक्तस्य तस्य प्रसिद्धस्य गरुत्मतः चक्षुषोर्वर्तमाना कनीनिका दर्शनसाधनं कृष्णमण्डलम् असि। हशब्दः प्रसिद्धौ। तदीयस्य पुष्पस्य कनीनिकासाधर्म्यात् तादृप्येण[2] ओषध्याः स्तुतिः। सा तादृशी त्वं सौपर्णचक्षुर्मण्डलाद् भूमिम् आ रुरोहिथ। जगद्रक्षणार्थम् ओषधिरूपेण भूमौ अवतीर्णासीत्यर्थः। तत्र दृष्टान्तः वह्यम् इति। आन्ता अध्वश्रमखिन्ना गन्तुम् असमर्था [वधूः] स्त्री यथा वह्यम् वहनसाधनम् अश्वान्दोलिकादि यानम् आरोहति तद्वद् इत्यर्थः। ॥ "वह्यं करणम्" इति वहतेर्यत् प्रत्ययो निपात्यते। आन्तेति। श्रमु तपसि खेदे च। "यस्य विभाषा[3]" इति निष्ठायाम् इडभावः। "अनुनासिकस्य क्विझलोः०" इति दीर्घत्वम् ॥ ॥

चतुर्थी ॥

तां मे सहस्राक्षो देवो दक्षिणे हस्त आ दधत्।
तयाहं सर्वं पश्यामि यश्च शूद्र उतार्यः ॥ ४ ॥

ताम। मे। सहस्रऽअक्षः। देवः। दक्षिणे। हस्ते। आ। दधत्।
तया। अहम। सर्वम। पश्यामि। यः। च। शूद्रः। उत। आर्यः ॥ ४ ॥

ताम् उक्तप्रभावां सदंपुष्पाख्याम् ओषधिं देवः दानादिगुणयुक्तः सहस्राक्षः इन्द्रो मे मम दक्षिणे हस्ते आ दधत् अधारयत्। हे तादृशि ओषधे त्वँया दक्षिणहस्ते मणिरूपेण धृतया अहं सर्वम् द्रष्टव्यं विषयं पश्यामि साक्षात्करोमि। द्रष्टव्यं विषयं निर्दिशति यश्चेति। शूद्रोपलक्षितो यस्त्रैवर्णिकव्यतिरिक्तो जनः आर्यो विद्वान् ब्राह्मणः। त्रैवर्णिकोपलक्षणम् एतत्। ये च ब्राह्मणक्षत्रियवैश्या ये च तद्व्यतिरिक्ताः शूद्रादयः तान् सर्वान् वशीकृत्य तत्कृतं रक्षःपिशाचादिकं निरसितुं पश्यामीत्यर्थः ॥

---

१ K त्वयाहं with Sâyaṇa. We with A B B^{P} B^{h} D K^{m} R S^{m} P P^{2} J V. २ K त्वया।.

1 S′ Kd शदं°. 2 S′ Kd तादृपेण. 3 S′ Kd विभाषेच for विभाषा" इति.

पञ्चमी ॥

आविष्कृणुष्व रूपाणि मात्मानमप गूहथाः ।
अथो सहस्रचक्षो त्वं प्रति पश्याः किमीदिनः ॥ ५ ॥

आविः । कृणुष्व । रूपाणि । मा । आत्मानम् । अप । गूहथाः ।
अथो इति । सहस्रचक्षो इति सहस्रऽचक्षो । त्वम् । प्रति । पश्याः । किमीदिनः ॥ ५ ॥

हे ओषधे त्वदीयानि रक्षःपिशाचादिनिवर्तकानि रूपाणि आविष्कृणुष्व प्रकाशय । आत्मानम् तव स्वरूपं माप गूहथाः संवृतं मा कार्षीः । गुहू संवरणे ॥ अथो अपि च हे सहस्रचक्षो सहस्रसंख्याकानि चक्षूंषि दर्शनसाधनानि इन्द्रियाणि यस्याः सा सहस्रचक्षुः हे तथाविधे ओषधि त्वं किमीदिनः किम् इदानीं किम् इदानीम् इति गूढं संचरतो राक्षसान् प्रतिपश्याः । अस्मद्रक्षणार्थं प्रतीक्षस्व । प्रतिपश्या इति । प्रतिपूर्वाद् दृशेर्लेटि अडागमः ॥

षष्ठी ॥

दर्शय मा यातुधानान् दर्शय यातुधान्यः ।
पिशाचान्त्सर्वान् दर्शयेति त्वा रभ ओषधे ॥ ६ ॥

दर्शय । मा । यातुऽधानान् । दर्शय । यातुऽधान्यः ।
पिशाचान् । सर्वान् । दर्शय । इति । त्वा । आ । रभे । ओषधे ॥ ६ ॥

हे सदंपुष्पौषधे यातुधानान् राक्षसान् मा मां दर्शय । गूढं यथा न बाधन्ते तथा कुरु इत्यर्थः ॥ यातुधान्यः यातुधानीः राक्षसीश्च दर्शय ॥ तथा पिशाचान् पिशिताशान् यातुधानव्यतिरिक्तान् सर्वान् रक्षोविशेषान् दर्शय इति एवमर्थम् हे ओषधे त्वा त्वाम् आ रभे धारयामि ॥

सप्तमी ॥

कश्यपस्य चक्षुरसि शुन्याश्च चतुरक्ष्याः ।

---

१ BBP °रक्षः. ABhDRSmPP2J °रक्षाः. We with Sâyaṇa and KKm.

वीध्रे सूर्यमिव सर्पन्तं मा पिशाचं तिरस्करः ॥ ७ ॥

कश्यपस्य। चक्षुः। असि। शुन्याः। च। चतुःऽअक्ष्याः।

वीध्रे। सूर्यम्ऽइव। सर्पन्तम्। मा। पिशाचम्। तिरः। करः ॥ ७ ॥

हे ओषधे त्वं कश्यपस्य महर्षेः चक्षुरसि। तादृशपुष्पोपेतत्वात् तादात्म्येन स्तुतिः। तथा चतुरक्ष्याः चत्वारि अक्षीणि यस्याः सा चतुरक्षी तादृश्याः शुन्याः देवानां संबन्धिन्याः सरमाख्यायाः। चक्षुरसीत्यनुषङ्गः। एतेन अप्रधृष्यत्वम् उक्तम्। वीध्रे। विविधम् इन्धते दीप्यन्तेऽस्मिन् ग्रहनक्षत्रादीनीति वीध्रम् अन्तरिक्षम्। वाविन्धेः [उ० २. २६] इति औणादिको रक् प्रत्ययः। तत्र सर्पन्तम् गच्छन्तं सूर्यमिव इतस्ततः सर्पणशीलं पिशाचं मा तिरस्करः अन्तर्हितं मा कार्षीः। कर इति। करोतेर्माङि लुङि "कृमृदरुहिभ्यः०" इति च्लेः अङ् आदेशः ॥

अष्टमी ॥

उदग्रभं परिपाणाद् यातुधानं किमीदिनम्।

तेनाहं सर्वं पश्याम्युत शूद्रमुतार्यम् ॥ ८ ॥

उत। अग्रभम्। परिऽपानात्। यातुऽधानम्। किमीदिनम्।

तेन। अहम्। सर्वम्। पश्यामि। उत। शूद्रम्। उत। आर्यम् ॥ ८ ॥

परिपानात् परिरक्षणात् हेतोः किमीदिनम् [किम् इदानीं] किम् इदानीम् इति चरन्तं यातुधानम् राक्षसम् उत् अग्रभम् उद्गृहीतवान् अस्मि। वशीकृतवान् अस्मीत्यर्थः। तेन यातुधानेन अहं सर्वं ग्रहं पश्यामि। उत शूद्रम् शूद्रजातियुक्तम् [उत] आर्यम् ब्राह्मणजातियुक्तं च। सर्वं ग्रहं पश्यामीत्यर्थः ॥

नवमी ॥

यो अन्तरिक्षेण पतति दिवं यश्चातिसर्पति।

भूमिं यो मन्यते नाथं तं पिशाचं प्र दर्शय ॥ ९ ॥

---

१ P P² J °अक्षाः. We with K K^m. २ K V °धिसर्पति with Sâyaṇa. We with A B B^p B^h D K^m R S^m P P² J V.

यः । अन्तरिक्षेण । पतति । दिवम् । यः । च । अतिऽसर्पति ।
भूमिम् । यः । मन्यते । नाथम् । तम । पिशाचम् । प्र । दर्शय ॥ ९ ॥

यः पिशाचः अन्तरिक्षेण द्यावापृथिव्योर्मध्यवर्तिना लोकेन पतति संचरति यश्च दिवम् अधिसर्पति द्युलोकस्योपरि गच्छति यश्च भूमिम् पृथिवीम् आत्मनो नाथम् स्वामिनं मन्यते तं सर्वं त्रैलोक्यवर्तिनं पिशाचम् प्र दर्शय चक्षुर्गोचरं कुरु । त्रिसंध्यामणिधारणेन ब्रह्मग्रहादीन् साक्षात्कृत्य मन्त्रसामर्थ्येन तान् निराकरोमीत्यर्थः ॥

पञ्चमं सूक्तम् ॥

इति सायणाचार्यविरचिते अथर्ववेदार्थप्रकाशे चतुर्थकाण्डे चतुर्थोनुवाकः ॥

पञ्चमेनुवाके पञ्च सूक्तानि । तत्र "आ गावः" इत्यादिसूक्तदशकस्य मृगारसंज्ञकत्वात् "मृगारैर्मुञ्चेत्यात्मावयति" [कौ० ४. ३] इत्यादिसूत्रविहिते सर्वभैषज्यकर्मणि होमसंपातावसेकादिषु विनियोगः । तत्र "आ गावः" इति प्रथमेन सूक्तेन गवां रोगोपशमनपुष्टिप्रजननकर्मसु सलवणं केवलं वा उदकम् अभिमन्त्र्य गाः पाययेत् । सूत्रितं हि । "ब्रह्म जज्ञा-"नम[४.१] आ गावः[४.२१] एका च मे[५.१५] इति गा लवणं "पाययत्युपतापिनीः प्रजननकामाः प्रपाम् अवरुणद्धि" इति [कौ०३.२] ॥

तथा गोपुष्टिकर्मणि अनेनैव सूक्तेन गोष्ठं प्रत्यागच्छन्तीर्गाः प्रत्युज्जच्छेत् ॥

तथा तस्मिन्नेव कर्मणि अनेनैव सूक्तेन इन्द्राय चरुं त्रिर्जुहुयात् ॥

तथा "प्रजावतीः" [७] इत्यनया अरण्यं प्रति गच्छन्तीर्गा अनुमन्त्रयेत ॥

सूत्रितं हि ॥ "आ गाव इति गा आयतीः प्रत्युत्तिष्ठति । [प्रावृषि प्रथमधारस्य] इन्द्राय त्रिर्जुहोति । प्रजावतीरिति प्रतिष्ठमाना अनुमन्त्रयते" इति [कौ० ३. ४] ॥

तथा तत्रैव कर्मणि "प्रजावतीः"[७, ८] इति द्वाभ्याम् अभिनवं पयो वत्सलालामिश्रितं संपात्य अभिमन्त्र्य अश्नीयात् ॥

तथा [अनेनैव] द्यृचेन गा अभिमन्त्र्य दद्यात् ॥

---

१ K अधि°.

---

1 S′Kd omit प्र°. 2 S′Kd omit °लाला°.

तथा उदपात्रम् अभिमन्त्र्य गोष्ठमध्ये निनयेत् ॥

एवं सारूपवत्सौदने गुग्गुलुलवणशकृत्पिण्डान् प्रक्षिप्य पश्चादग्नेस्त्रिरात्रं निखाय चतुर्थेऽहनि उद्धृत्य अनेन द्यूचेन संपात्य अभिमन्त्र्य अश्नीयात् ॥

सूत्रितं हि। "प्रजावतीः[७,८] प्रजापतिः[९.७] इति गोष्ठकर्माणि गृष्टेः पीयूषं श्लेष्ममिश्रम् अश्नाति" [कौ० ३.२] इति ॥

सोमयागे माध्यंदिनसवने दक्षिणार्थम् आगता गा हिरण्यहस्तो यजमानः अनेन सूक्तेन प्रत्युत्तिष्ठेत्। उक्तं वैताने। "हिरण्यहस्तो यजमानो बहिर्वेदि[1] दक्षिणा आयतीरा गाव इति प्रत्युत्तिष्ठति" इति [वै० ३.११] ॥

तत्र प्रथमा ॥

आ गावो॑ अग्मन्नुत भ॒द्रम॑क्रन्त्सीद॑न्तु गो॒ष्ठे र॒णय॑न्त्व॒स्मे।
प्र॒जाव॑तीः पुरु॒रूपा॑ इ॒ह स्यु॒रिन्द्रा॑य पू॒र्वीरु॒षसो॑ दुहा॑नाः ॥ १ ॥

आ। गाव॑ः। अ॒ग्म॒न्। उ॒त। भ॒द्रम्। अ॒क्र॒न्। सीद॑न्तु। गो॒ऽस्थे। र॒ण-
य॑न्तु। अ॒स्मे इति॑।
प्र॒जाऽव॑तीः। पु॒रु॒ऽरूपा॑ः। इ॒ह। स्यु॒ः। इन्द्रा॑य। पू॒र्वीः। उ॒षस॑ः। दु-
हा॑नाः ॥ १ ॥

गावः [आ] अग्मन् अस्मान् अभिलक्ष्य आगच्छन्तु। ॒"छन्दसि लुङ्लङ्लिटः" इति लोडर्थे लुङ्। "मन्त्रे घस०" इति च्लेर्लुक्। "गमहन०" इति उपधालोपः॒ ॥ उत अपि च भद्रम् कल्याणम् अक्रन् कुर्वन्तु। ॒पूर्ववल्लुङ्॒ ॥ गावस्तिष्ठन्त्यत्रेति गोष्ठम्। तस्मिन्नस्मदीये गोष्ठे सीदन्तु उपविशन्तु ॥ अस्मे अस्मान् रणयन्तु क्षीरादिप्रदानेन रमयन्तु। यद्वा अस्मे अस्मासु रमन्ताम् ॥ प्रजावतीः प्रजावत्यः बह्वपत्याः पुरुरूपाः बहुरूपाः श्वेतकृष्णारुणाद्यनेकवर्णाः इह अस्मिन् यजमानगृहे स्युः समृद्धा भवेयुः ॥ पूर्वीः बह्वीः उषसः उषःकालोपलक्षितान् दिवसान्। ॒"०अत्यन्तसंयोगे" द्वितीया॒। सर्वकालम् इन्द्राय इन्द्रार्थं सांनाय्यार्थम् आशिरार्थं च पयो दुहानाः। भवन्तु इति शेषः ॥

1 S' Kd बहिर्वहिः for बहिर्वेदि.

द्वितीया ॥

इन्द्रो यज्वने गृणते च शिक्षत उपेद् ददाति न स्वं मुषायति ।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम् ॥ २ ॥

इन्द्रः । यज्वने । गृणते । च । शिक्षते । उप । इत् । ददाति । न । स्वम् । मुषायति ।
भूयःऽभूयः । रयिम् । इत् । अस्य । वर्धयन् । अभिन्ने । खिल्ये । नि । दधाति । देवऽयुम् ॥ २ ॥

यज्वने यागं कुर्वते गृणते स्तुवते च जनाय इन्द्रो देवः शिक्षते । दानकर्मायम् । गाः प्रयच्छति । यद्वा यज्वने स्तोत्रे च शिक्षते गवां लाभोपायम् उपदिशति । शिक्ष विद्योपादाने । शिक्षानन्तरं स्वयम् उपेत्य । इच्छब्दः अवधारणे । बह्वीस्ता गाः ददात्येव । तस्य च यज्वनः स्तोतुश्च स्वम् धनं न मुषायति न मुष्णाति नापहरति । अपि तु भूयोभूयः बहुतरम् अस्य यज्वनः स्तोतुश्च रयिम् धनं वर्धयन्नित् समृद्धं कुर्वन्नेव वर्तते ॥ एवम् ऐहिकफलविषयम् उक्तम् । आमुष्मिकविषयेप्याह । तं देवयुम् देवान् आत्मन इच्छन्तं यज्वानं स्तोतारं च अभिन्ने दुःखेन असंभिन्ने खिल्ये खिलम् अप्रहतं स्थानम् तत्र भवं खिल्यम् [तस्मिन्] अयज्वभिः अगृणद्भिश्च अनाक्रान्ते नाकस्य पृष्ठे नि दधाति स्थापयति । देवयुम् इति । देवशब्दात् "सुप आत्मनः क्यच्" । "न च्छन्दस्यपुत्रस्य" इति ईत्वदीर्घयोः प्रतिषेधः । "क्याच्छन्दसि" इति उप्रत्ययः ॥

तृतीया ॥

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवांश्च याभिर्यजते ददाति च ज्योगित् ताभिः सचते गोपतिः सह ॥ ३ ॥

---

१ A R मुखायति. २ P P² J मुखायति. We with the Saṁhitâ. ३ B[h] व्यथिरा. We with A B B[p] K K[m] R S[m] P P² J V.

न। ताः। नशन्ति। न। दभाति। तस्करः। न। आसाम्। आमित्रः। व्यथिः। आ। दधर्षति।
देवान्। च। याभिः। यजते। ददाति। च। ज्योक्। इत्। ताभिः। सचते। गोऽपतिः। सह ॥ ३ ॥

ताः इन्द्रेण दत्ता गावः न नशन्ति न नश्यन्तु ॥ तस्करः चोरश्च न दभाति न हिनस्तु। ✕नश अदर्शने। दन्भु दम्भे। आभ्यां लेटि यथाक्रमम् अडागम आडागमश्च। छान्दसो विकरणस्य लुक् ✕ ॥ आसां गवाम् आमित्रः अमित्राः शत्रवः तत्संबन्धी तत्कृतो व्यथिः व्यथाजनकम् आयुधं ना दधर्षति आधर्षणं पीडां मा करोतु ॥ याभिर्गोभिः देवान् यजते क्षीरादिहविर्द्वारा याश्च गास्तत्र यज्ञे दक्षिणात्वेन ददाति ताभिर्गोभिः सह गोपतिः गोस्वामी यजमानः ज्योगित् चिरकालमेव सचते समवैति सेवते वा। न कदाचिद् वियुज्यत इत्यवधारणाभिप्रायः ॥

चतुर्थी ॥

न ता अर्वा रेणुककाटोऽश्नुते न संस्कृतत्रमुप यन्ति ता अभि।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ॥ ४ ॥

न। ताः। अर्वा। रेणुऽककाटः। अश्नुते। न। संस्कृतत्रम्। उप। यन्ति। ताः। अभि।
उरुऽगायम्। अभयम्। तस्य। ताः। अनु। गावः। मर्तस्य। वि। चरन्ति। यज्वनः ॥ ४ ॥

अर्वा हिंसको व्याघ्रादिः रेणुककाटः पादाघातेन रेणोः पार्थिवस्य रजस उच्छेदकः। ✕कटिर्भेदनकर्मा ✕। एवं क्रूरो व्याघ्रादिर्दुष्टमृगः ता गाः नाश्नुते न प्राप्नोतु ॥ तथा ता गावः संस्कृतत्रम्। संस्कृतं विशसितं त्रायते पालयतीति संस्कृतत्रो मांसपाचकः। उक्तं हि।

---

१ K $\overset{m}{K}$ R V रेणुककाटोअश्नुते. We with A B D $\overset{m}{S}$. २ Bp मर्त्यस्य. ३ P $\overset{2}{P}$ अश्नुते.

1 S′ Kd न तस्कर° for तस्कर°. 2 S′ Kd अमित्रः.

संस्कृतः स्याद् विशसितः संस्कृतत्रश्च पाचकः ।

इति । तम् अभिलक्ष्य नोप यन्ति नोपगच्छन्तु ॥ तस्य यज्वनो मर्तस्य मनुष्यस्य उरुगायम् विस्तीर्णगमनम् अभयम् भयरहितं देशम् अनुलक्ष्य ता गावो वि चरन्ति विविधं चरन्तु ॥

पञ्चमी ॥

गावो भगो गाव इन्द्रो म इच्छाद् गावः सोमस्य प्रथमस्य भक्षः ।
इमा या गावः स जनास इन्द्र इच्छामि हृदा मनसा चिदिन्द्रम् ॥ ५ ॥

गावः । भगः । गावः । इन्द्रः । मे । इच्छात् । गावः । सोमस्य । प्रथमस्य । भक्षः ।

इमाः । याः । गावः । सः । जनासः । इन्द्रः । इच्छामि । हृदा । मनसा । चित् । इन्द्रम् ॥ ५ ॥

गाव एव भगः धनं पुरुषस्य सौभाग्यं वा । ततश्च मे मह्यं गावः यथा भवन्ति तथा इन्द्र इच्छात् इच्छेत् । इषु इच्छायाम् । अस्मात् लेटि आडागमः । "इषुगमियमां छः" । प्रथमस्य मुख्यस्य हविषां मध्ये श्रेष्ठस्य सोमस्य गावः भक्षो भवन्ति । अभिषुतो हि सोमो गव्येन पयसा दध्ना च श्रीयते ॥ इमा या गावो दृश्यन्ते हे जनासः जनाः स एवेन्द्रः । प्रतिनिर्दिश्यमानापेक्षं स इत्येकवचनम् । ता एव गावः इन्द्र इति उपजीव्योपजीवकभावेन इन्द्रात्मना गवां स्तुतिः । अतस्तदीयेन पयःप्रभृतिना हविषा इन्द्रं यष्टुं हृदा हृदयेन मनसा तदन्तर्वर्तिना ज्ञानकरणेन च इच्छामि कामये । चिच्छब्दः अप्यर्थे ॥

षष्ठी ॥

यूयं गावो मेदयथा कृशं चिदश्रीरं चित् कृणुथा सुप्रतीकम् ।
भद्रं गृहं कृणुथ भद्रवाचो बृहद् वो वय उच्यते सभासु ॥ ६ ॥

यूयम् । गावः । मेदयथ । कृशम् । चित् । अश्रीरम् । चित् । कृणुथ । सुऽप्रतीकम् ।

भद्रम्। गृहम्। कृणुथ। भद्रऽवाचः। बृहत्। वः। वयः। उच्यते। सभासु ॥ ६ ॥

हे गावः यूयं कृशं चित् कृशमपि शरीरिणं मेदयथ स्नेहयथ पयोदध्यादिना आप्याययथ ॥ अश्रीरं चित् अश्रीकम् अशोभनाङ्गमपि पुरुषं सुप्रतीकम् शोभनावयवं कृणुथ कुरुथ ॥ हे भद्रवाचः भद्राः कल्याण्यः हम्भारवलक्षणा वाचो यासां तास्तथोक्ताः ईदृश्यो हे गावः अस्मदीयं गृहम् भद्रम् कल्याणम् अलंकृतं कृणुतँ कुरुत। गोसमृद्धं हि गृहं कल्याणं भवति ॥ वः युष्माकं संबन्धि वयः अन्नं क्षीरदध्यादिलक्षणं सभासु जनसमूहेषु बृहत् महद् अधिकम् उच्यते प्रशस्यते अहो गवां क्षीरं दध्याज्यम् इति ॥

सप्तमी ॥

प्रजावतीः सूयवसे रुशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः।
मा व स्तेन ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु ॥ ७ ॥

प्रजाऽवतीः। सुऽयवसे। रुशन्तीः। शुद्धाः। अपः। सुऽप्रपाने। पिबन्तीः।
मा। वः। स्तेनः। ईशत। मा। अघऽशंसः। परि। वः। रुद्रस्य। हेतिः।
वृणक्तु ॥ ७ ॥

गावः प्रजावतीः प्रजाभिः पुत्रपौत्रादिभिरुपेताः सूयवसे शोभनतृणयुक्ते देशे रुशन्तीः तृणं भक्षयन्तीः शुद्धाः कालुष्यरहिता अपः सुप्रपाणे सुखेन पातव्ये शोभनावतरणमार्गयुक्ते तटाकादौ पिबन्तीः ईदृशीर्वः युष्मान् स्तेनः तस्करः मा ईशत अपहर्तुम् ईश्वरो मा भूत। अघशंसः। अघम् पापं वधलक्षणं शंसति अभिलषतीति अघशंसो व्याघ्रादिर्दुष्टमृगः। सोपि मा ईशत ईश्वरो मा भूत। रुद्रस्य ज्वराभिमानिदेवस्य हेतिः आयुधं वः युष्मान् परि वृणक्तु परिवर्जयतु। युष्मान् परिहृत्य अन्यत्र वर्तताम् इत्यर्थः ॥

[इति पञ्चमेनुवाके] प्रथमं सूक्तम् ॥

"इमम् इन्द्र" इति सूक्तेन संग्रामजयार्थम् आज्यहोमम् सक्तुहोमम्

धनुरिध्माधानम् इषुसमिदाधानम् राज्ञे अभिमन्त्रितधनुःप्रदानं च कुर्यात्। सूत्रितं हि। "इमम् इन्द्रेति युक्तयोः प्रदानान्तानि" इति [कौ०२.५] ॥

तथा "इमम् इन्द्र" इति सूक्तेन अभिषिक्तस्य राज्ञः प्रातःप्रातरभिमन्त्रणम् उदपात्रसमासेचनं [च] कुर्यात्। तद् उक्तं कौशिकेन। ["इमम् इन्द्र वर्धय क्षत्रियं म इति क्षत्रियं प्रातःप्रातरभिमन्त्रयत उक्तं समासेचनम्" इति। कौ०२.८ ॥

तथा क्रव्याच्छमनकर्मणि अनेन सूक्तेन वृषभम् अनड्वाहं वा अभिमन्त्रयते। तद् उक्तं कौशिकेन]। "वैश्वदेवीम् इति वत्सतरीम् आलम्भयति इमम् इन्द्रेति वृषम् अनड्वाहम्" इति [कौ०९.४] ॥

तत्र प्रथमा ॥

इ॒ममि॑न्द्र वर्धय क्ष॒त्रिय॑ं म इ॒मं वि॒शामे॑कवृ॒षं कृ॑णु॒ त्वम्।
नि॒र॒मित्रा॑नक्ष्णुह्यस्य॒ सर्वा॒स्ताँन् र॑न्धयासा॒ अहमु॑त्त॒रेषु॑ ॥ १ ॥

इ॒मम्। इ॒न्द्र॒। व॒र्ध॒य॒। क्ष॒त्रिय॑म्। मे॒। इ॒मम्। वि॒शाम्। एक॑ऽवृषम्।
कृ॒णु॒। त्वम्।
निः। अ॒मित्रा॑न्। अ॒क्ष्णु॒हि॒। अ॒स्य॒। सर्वा॑न्। तान्। र॒न्ध॒य॒। अ॒स्मै॒।
अ॒हम्ऽउ॑त्त॒रेषु॑ ॥ १ ॥

हे इन्द्र त्वं मे मदीयम् इमं क्षत्रियम् राजानं वर्धय पुत्रपौत्रादिभिर्वस्तुवाहनादिभिश्च समृद्धं कुरु। वृषाम् सेचनसमर्थानां वीर्यवतां पुरुषाणां मध्ये इमं राजानम् एकवृषम् मुख्यसेक्तारम् असहायशूरं कृणु कुरु। अस्य राज्ञः सर्वान् अमित्रान् शत्रून् निरक्ष्णुहि निर्गतव्याप्तिकान् कुरु। संकुचितप्रभावान् कुरु इत्यर्थः। ✕अक्षू व्याप्तौ। स्वादित्वात् श्नुः✕। तान् तथाविधान् शत्रून् अस्मै राज्ञे रन्धय वशीकुरु। कर्मकरान् कुरु इत्यर्थः। अहमपि मन्त्रसामर्थ्येन उत्तरेषु उत्कृष्टतरेषु इन्द्रादिलोकपालेषु मध्ये इमम् एकं करोमीत्यर्थः ॥

---

१ K वृषामेक° with Sâyaṇa. We with A B B^{p} B^{h} D K^{m} R S^{m} P P^{2} J V. २ K K^{m} V °स्तां रन्धया°. We with A B B^{p} B^{h} D R S^{m} P P^{2} J have तान्. ३ K वृषाम्. ४ P^{2} अक्षुहि.

द्वितीया ॥

एमं भंज ग्रामे अश्वेषु गोषु निष्टं भंज यो अमित्रों अस्य।
वर्ष्मं क्षत्राणामयमस्तु राजेन्द्र शत्रुं रन्धय सर्वमस्मै ॥ २ ॥

आ। इमम्। भज। ग्रामे। अश्वेषु। गोषु। निः। तम्। भज। यः। अमित्रः। अस्य।
वर्ष्मं। क्षत्राणाम्। अयम्। अस्तु। राजा। इन्द्र। शत्रुम्। रन्धय। सर्वम्। अस्मै ॥ २ ॥

हे इन्द्र इमं राजानं ग्रामे जनसमूहे अश्वेषु गोषु च विषये आ भज आभक्तम् आसमन्तात् संश्लिष्टं कुरु ॥ अस्य राज्ञो यः अमित्रः शत्रुरस्ति तं निर्भज ग्रामादिभ्यो निर्भक्तं वियुक्तं कुरु ॥ तथा क्षत्राणाम् अन्येषां क्षत्रियाणां वर्ष्मन्[*] वर्ष्मणि देहे प्रशस्ते शरीरावयवे शिरसि अयम् अभिषिक्तो राजा वर्तमानोस्तु ॥ सर्वान् [शत्रून्[*]] सर्वं च राष्ट्रम् अस्मै अभिषिक्ताय राज्ञे रन्धय वशीकुरु। रध हिंसासंराद्ध्योः। "रधिजभोरचि" इति नुमागमः। रध्यतिर्वशगमने इति निरुक्तम् [नि० १०, ४०] ॥

तृतीया ॥

अयमस्तु धनपतिर्धनानामयं विशां विश्पतिरस्तु राजा।
अस्मिन्निन्द्र महि वर्चांसि धेह्यवर्चसं कृणुहि शत्रुमस्य ॥ ३ ॥

अयम्। अस्तु। धनंऽपतिः। धनानाम्। अयम्। विशाम्। विश्पतिः।
अस्तु। राजा।
अस्मिन्। इन्द्र। महि। वर्चांसि। धेहि। अवर्चसम्। कृणुहि। शत्रुम्।
अस्य ॥ ३ ॥

अयं राजा धनानाम् सुवर्णरजतमणिमुक्ताप्रवालादीनां धनपतिः स्वामी [अस्तु] भवतु। धनानां पतिर्धनपतिरित्येव धनाढ्यत्वे सिद्धे पुनर्धनानाम्

१ A K S वर्ष्मन्. २ J K K[m] R शत्रूं. We with B B[P] D S[m] V. P P[2] शत्रून्. ३ K वर्ष्मन्.

1 Sâyaṇa's text too has शत्रून्रन्धय.

इति व्यस्तनिर्देशः ईशितव्यस्य धनस्य बहुत्वख्यापनार्थः । न हि राजपुरुष इत्युक्ते राज्ञोः पुरुषः राज्ञां पुरुषः इति संख्याविशेषप्रतीतिरस्ति किं तु राजसंबन्धमात्रं प्रतीयते एवम् अत्रापि धनपतिरिति धनसंबन्धमात्रे अवगते तद्बहुत्वप्रतिपादनाय व्यस्तनिर्देश इति न पौनरुक्त्यम् । अतो वृत्त्यवृत्तिभ्यां स्वामित्वं बहुत्वं च प्रतिपाद्यते ॥ तथा अयं राजा विशाम् प्रजानां विश्पतिरस्तु स्वामी भवतु । विशां विश्पतिरिति पूर्ववद् व्याससमासयोरभिप्रायः ॥ हे इन्द्र अस्मिन् राजनि [महि] महान्ति वर्चांसि तेजांसि पराभिभवनसमर्थानि वीर्याणि धेहि स्थापय ॥ अस्य राज्ञः शत्रुम् अवर्चसं कृणुहि अतेजस्कं कुरु ॥

चतुर्थी ॥

अस्मै द्यावापृथिवी भूरिं वामं दुहाथां घर्मदुघे इव धेनू ।
अयं राजा प्रिय इन्द्रस्य भूयात् प्रियो गवामोषधीनां पशूनाम् ॥ ४ ॥

अस्मै । द्यावापृथिवी इति । भूरिं । वामम् । दुहाथाम् । घर्मदुघे इवेति घर्मदुघेऽइव । धेनू इति ।
अयम् । राजा । प्रियः । इन्द्रस्य । भूयात् । प्रियः । गवाम् । ओषधीनाम् । पशूनाम् ॥ ४ ॥

हे द्यावापृथिवी द्यावापृथिव्यौ अस्मै पुरोवर्तिने मदीयाय राज्ञे भूरि प्रभूतं वामम् वननीयं धनं दुहाथाम् प्रयच्छतम् । दुहेर्लोटि अदादित्वात् शपो लुक् । तत्र दृष्टान्तः । घर्मदुघे इवेति । घर्मः प्रवर्ग्यः । तदर्थं पयो या गौर्दोग्धि सा घर्मदुघा । "दुहः कब् घश्च" इति कब्घत्वे । यथा घर्मदुघे धेनू बहुलं क्षीरं दुहाते तद्वद् वात्सल्येन बहुलं धनं द्यावापृथिव्यौ प्रयच्छताम् इत्यर्थः ॥ एवं धनसमृद्धौ सत्यां यागाद्यनुष्ठानेन अयं राजा इन्द्रस्य यज्ञभाजो देवस्य प्रियः इष्टतरो[3] भूयात् ॥ तत्प्रियत्वाद्[4] वृष्टौ सत्यां गवाम् ओषधीनाम् व्री-

---

१ P °पृथिवी इति. २ P J घर्म°. We with $\dot{P}$ C_P.

---

1 S′ Kd वरणीयं. 2 S′ Kd बहुल°. 3 S′ Kd इष्टतनो. 4 S′ Kd तत्प्रियादृष्टौ.

ह्यियवादिसस्यानाम् अन्येषां पशूनाम् द्विपाच्चतुष्पाल्लक्षणानां प्राणिनाम् अयं राजा प्रियो भूयात् इति संबन्धः ॥

पञ्चमी ॥

युनज्मि त उत्तरावन्तमिन्द्रं येन जयन्ति न पराजयन्ते ।
यस्त्वा करदेकवृषं जनानामुत राज्ञामुत्तमं मानवानाम् ॥ ५ ॥

युनज्मि । ते । उत्तरऽवन्तम् । इन्द्रम् । येन । जयन्ति । न । पराऽजयन्ते ।
यः । त्वा । करत् । एकऽवृषम् । जनानाम् । उत । राज्ञाम् । उत्ऽउत्तमम् ।
मानवानाम् ॥ ५ ॥

हे राजन् ते तव उत्तरावन्तम् अतिशयितोत्कर्षवन्तम् इन्द्रं युनज्मि योजयामि सखित्वापादनेन समानकार्यं करोमि । येन इन्द्रेण प्रेरितास्त्वदीया भटाः शत्रुसेनां जयन्ति न पराजयन्ते पराजयं न प्राप्नुवन्ति । [x]"विपराभ्यां जेः" इति आत्मनेपदम्[x] । अपि च त्वा त्वां य इन्द्रः जनानाम् अन्येषां शूरजनानाम् एकवृषम् गोयूथे प्रधानभूतोयं वृष एकवृषः तद्वद् मुख्यं सर्वोत्कृष्टं करत् करोति । उतशब्दः अप्यर्थे । राज्ञाम् अन्येषामपि एकवृषम् एकवृषवद् अभिभवितारं करोति । मानवानाम् मनोरपत्यानां मनुष्यजातीयानाम् उत्तमम् उत्कृष्टं करोति । यद्वा मानवानाम् मनुवंश्यानाम् इलपुरूरवःप्रभृतीनां राज्ञां मध्ये उत्तमम् प्रजापरिपालनशौर्यादिगुणैरुत्कृष्टं करोति । तथाविधम् इन्द्रं युनज्मीति संबन्धः ॥

षष्ठी ॥

उत्तरस्त्वमधरे ते सपत्ना ये के च राजन् प्रतिशत्रवस्ते ।
एकवृष इन्द्रसखा जिगीवां छत्रूयतामा भरा भोजनानि ॥ ६ ॥

उत्तरः । त्वम् । अधरे । ते । सऽपत्नाः । ये । के । च । राजन् । प्रतिऽशत्रवः । ते ।
एकऽवृषः । इन्द्रऽसखा । जिगीवान् । शत्रुऽयताम् । आ । भर । भोजनानि ॥ ६ ॥

---

१ So P $\overset{2}{P}$ J K.

हे राजन् त्वम् उत्तरः सर्वोत्कृष्टतरो भव । ते त्वदीयाः सपत्नाः अधरे निकृष्टा भवन्तु । तान् विशिनष्टि । ते । द्वितीयार्थे षष्ठी । त्वां प्रति ये के च जनाः शत्रवः शत्रुभावेन प्रतिकूलम् आचरन्ति ते सर्वे अधरे भवन्तु इत्यर्थः ॥ अपि च एकवृषः प्रधानभूतः इन्द्रसखा इन्द्रेण सख्या युक्तः जिगीवान् शत्रून् जयन् शत्रूयताम् शत्रुत्वम् आत्मन इच्छतां शत्रुवद् आचरतां वा भोजनानि भोगसाधनानि धनानि आ भर आहर । सर्वान् शत्रून् विजित्य तदीयं सर्वं धनम् अपहरेत्यर्थः । जिगीवान् इति । जि जये । असाच्छान्दसो वर्तमाने लिट् । तस्य च लिटः कसुरादेशः । "सन्लिटोर्जेः" इति अभ्यासाद् उत्तरस्य कुत्वम् । शत्रूयताम् इति । "सुप आत्मनः क्यच्" । "उपमानाद् आचारे" इति वा क्यच् । तदन्तात् लटः शत्रादेशे "शतुरनुमः०" इति विभक्त्युदात्तत्वम् ॥

सप्तमी ॥

सिंहप्रतीको विशो अद्धि सर्वा व्याघ्रप्रतीकोव बाधस्व शत्रून् ।
एकवृष इन्द्रसखा जिगीवां छत्रूयतामा खिदा भोजनानि ॥ ७ ॥

सिंहऽप्रतीकः । विशः । अद्धि । सर्वाः । व्याघ्रऽप्रतीकः । अव । बाधस्व । शत्रून् ।
एकऽवृषः । इन्द्रऽसखा । जिगीवान् । शत्रुऽयताम् । आ । खिद् । भोजनानि ॥ ७ ॥

सिंहप्रतीकः सिंहशरीरः सिंहतुल्यपराक्रमः सन् आज्ञामात्रेण सर्वा विशः स्वराष्ट्रस्थाः प्रजाः अद्धि भुङ्क्ष्व । अद भक्षणे । "हुझल्भ्यो हेर्धिः" इति धित्वम् ॥ व्याघ्रप्रतीकः व्याघ्रशरीरः व्याघ्रवद् आक्रम्य पर्यन्तस्थान् शत्रून् अप बाधस्व । अन्यद् व्याख्यातम् । एतावांस्तु विशेषः । शत्रुसंबन्धीनि धनानि आ खिद आच्छिन्धि । अपहरेत्यर्थः । आङ्पूर्वः खिदिः आच्छेदने वर्तते यथा "आक्खिदते च प्रक्खिदते च" [तै० सं० ४. ५. ९. २] इति ॥

[इति] द्वितीयं सूक्तम् ॥

---

१ K °प्रतीकोप वा°, with Sâyaṇa. We with A B B^{P} B^{h} D K^{m} R S^{m} P P^{2} J V. २ K अप.

"अग्नेर्मन्वे" इति सूक्तसप्तकस्य बृहद्गणे पाठात् शान्त्युदकादौ विनियोगः। तथा च कौशिकं सूत्रम्। "उत देवाः[४. १३] मृगारसूक्ता-"नि[४. २१-३०] उत्तमं वर्जयित्वा" इति [कौ० १. ९]। अत्र उत्तम-शब्देन आ गावः[२१] इमम इन्द्र[२२] इति आदिमे द्वे अहं रुद्रेभिः [३०] इति अन्तिमं चेति सूक्तत्रयं विवक्षितम्॥

तथा अंहोलिङ्गगणे अग्नेर्मन्वे[२३-२९] इत्यादीनां सप्तानां सूक्तानां पाठात् सर्वरोगभैषज्यादिषु विनियोगो द्रष्टव्यः। सूत्रितं हि। "ओषधिवनस्पतीनाम् अनुक्तान्यप्रतिषिद्धानि भैषज्यानाम् अंहोलिङ्गाभिः" इत्यादि [कौ० ४. ८]॥

"अग्नेर्मन्वे" इति सामिधेन्यनुमन्त्रणं कुर्यात्। तद् उक्तं वैताने। "अग्नेर्मन्व इति सामिधेनीरनुमन्त्रयते" इति [वै० १. २]॥

तत्र प्रथमा॥

अग्नेर्मन्वे प्रथमस्य प्रचेतसः पाञ्चजन्यस्य बहुधा यमिन्धते।
विशोविशः प्रविशिवांसमीमहे स नो मुञ्चत्वंहसः॥ १॥

अग्नेः। मन्वे। प्रथमस्य। प्रऽचेतसः। पाञ्चऽजन्यस्य। बहुऽधा। यम्। इन्धते।
विशःऽविशः। प्रऽविशिऽवांसम्। ईमहे। सः। नः। मुञ्चतु। अंहसः॥ १॥

प्रथमस्य मुख्यस्य प्रचेतसः प्रकृष्टज्ञानस्य पाञ्चयज्ञस्य। देवयज्ञः पितृयज्ञः भूतयज्ञः मनुष्ययज्ञः ब्रह्मयज्ञः इत्येते नित्यकर्तव्याः प्रसिद्धाः पञ्चयज्ञाः। तैराराधनीयः पाञ्चयज्ञः। यद्वा पञ्चधा यज्ञा विभक्ता अग्निष्टोमादयः पञ्चयज्ञाः। "धानाः करम्भः परिवापः पुरोडाशः पयस्या तेन पङ्क्तिराप्यते तद् यज्ञस्य पाङ्क्तत्वम्" इति तैत्तिरीयश्रुतेः [तै० सं० ६. ५. ११. ४] "यो ह वै यज्ञं हविष्पङ्क्तिं वेद" [ऐ० ब्रा० २. २४] इत्यादैतरेयकश्रुतेश्च यज्ञस्य पञ्चात्मकता। तादृगग्निष्टोमादिनिर्वर्तकः पाञ्चयज्ञः।

---

१ D पांचजन्यस्य. S पांचयज्ञस्य. We with A B B^{P} B^{h} K K^{m} R S^{m} P P^{2} J V.

---

1 S′ Kd °सूक्तानित्युत्तमान्वर्ज°. We with *Kaus'ika*. 2 S′ Kd उत्तर°. We with *Kaus'ika*. 3 S′ Kd °ञ्चजन्यस्य. 4 S′ Kd पुरोळाशः. 5 S′ Kd °निवर्तकः.

यद्वा यज्ञशब्देन तन्निष्पादका जना विवक्षिताः । ते च निषादपञ्चमाश्चत्वारो वर्णाः । गन्धर्वाप्सरसो देवा असुरा रक्षांसीत्येके । तेषु भवः पाञ्चयज्ञः । तथा च तैत्तिरीयकम् "यं पाञ्चजन्यं बहवः समिन्धते" [तै० सं० ४. ७. १५. १] इति । तस्य एवंगुणविशिष्टस्य अग्नेर्माहात्म्यं मन्वे जानामि । मनु अवबोधने । तनादित्वाद् उप्रत्ययः । तदेव माहात्म्यं प्रतिपादयति बहुधा यम् इत्यादिना । बहुधा बहुप्रकारं यम् अग्निम् इन्धते गार्हपत्यादिरूपेण संदीपयन्ति । विशोविशः सर्वाः प्रजाः प्रविशिवांसम् जाठरादिरूपेण प्रविष्टवन्तं तम् अग्निम् ईमहे याचामहे । ईमहे यामि मन्महे इति याञ्चाकर्मसु पठितम् [निघ० ३. १९] । यद्वा । ईङ् गतौ । दैवादिकः । ईमहे ईयामहे स्तुतिनमस्कारादिना प्राप्नुमः । "विश्वस्यां विशि प्रविविशिवांसम् ईमहे" इति तैत्तिरीयकम् [तै० सं० ४. ७. १५. १] । स तादृशोग्निः नः अस्मान् अंहसः सर्वानर्थनिदानभूतात् पापात् मुञ्चतु मोचयतु । अस्मत्तः पापं विश्लेषयतु इत्यर्थः ॥

द्वितीया ॥

यथा॑ ह॒व्यं वह॑सि जातवेदो॒ यथा॑ य॒ज्ञं क॒ल्पय॑सि प्रजा॒नन्।
ए॒वा दे॒वेभ्य॑: सुम॒तिं न॒ आ व॑ह॒ स नो॑ मुञ्च॒त्वंह॑सः ॥ २ ॥

यथा॑। ह॒व्यम्। वह॑सि। जा॒त॒ऽवे॒दः॒। यथा॑। य॒ज्ञम्। क॒ल्पय॑सि। प्र॒ऽजा॒नन्।
ए॒व। दे॒वेभ्य॑:। सु॒ऽम॒तिम्। न॒:। आ। व॒ह॒। स:। न॒:। मु॒ञ्च॒तु। अंह॑सः॥ २॥

हे जातवेदः जातानां वेदितरग्ने यथा येन प्रकारेण हव्यम् चरुपुरोडाशादि होतव्यं हविः वहसि तत्तद्यष्टव्यदेवतां प्रापयसि यथा येन च प्रकारेण यज्ञं पाकयज्ञहविर्यज्ञसोमयागभेदेन एकाहाहीनसत्त्वात्मना च कल्पयसि विरचयसि प्रजानन् तत्तद्विदां प्रकर्षेण अवगच्छन् । एव एवं देवेभ्यः देवानाम् अर्थे नः अस्माकं सुमतिम् शोभनां बुद्धिम् आ वह प्रापय । यद्वा देवेभ्यः सकाशात् सुमतिम् अनुग्रहात्मिकां बुद्धिं नः अस्मान् प्रापय ॥ गतम् अन्यत् ॥

तृतीया ॥

यामंन्यामन्नुपंयुक्तं वंहिंष्ठं कर्मंन्कर्मन्नाभंगम्। अग्निमींडे
रक्षोहणं यज्ञवृधं घृताहुंतं स नों मुञ्चत्वंहसः ॥ ३ ॥

यामंन्ऽयामन्। उपंऽयुक्तम्। वंहिंष्ठम्। कर्मंन्ऽकर्मन्। आऽभंगम्।
अग्निम्। ईंडे।
रक्षःऽहनंम्। यज्ञऽवृधंम्। घृतऽआंहुंतम्। सः। नः। मुञ्चतु। अंहंसः ॥ ३ ॥

यामन्यामन् यामनियामनि। ऋसप्तम्या लुक्ऋ। तत्तत्फलप्रापणे निमित्तभूते सति उपयुक्तम् तत्तद्वोमाधारत्वेन विनियुक्तं वहिष्ठम् वोढृतमम्। ऋवोढृशब्दात् "तुश्छन्दसि" इति इष्ठन् प्रत्ययः। "तुरिष्ठेमेयस्सु" इति तृलोपःऋ। कर्मन्कर्मन्। ऋपूर्ववत् सप्तम्या लुक्ऋ। तत्तत्फलसाधने सर्वस्मिन् कर्मणि आभगम् आभक्तव्यम् आसेव्यम् एवंगुणविशिष्टम् अग्निम् अहम् [1]ईळे* स्तौमि। पुनर्विशेष्यते। रक्षोहणम् रक्षसां हन्तारं यज्ञवृधम् यज्ञस्य अग्निष्टोमादेर्वर्धयितारं घृताहुतम् घृतेन आज्येन आहुतम् आहुतिभिः संदीपितम् ॥ स न इत्यादि पूर्ववत् ॥

चतुर्थी ॥

सुजांतं जातवेंदसमग्निं वैश्वानरं विभुम्।
हव्यवाहं हवामहे स नों मुञ्चत्वंहसः ॥ ४ ॥

सुऽजांतम्। जातऽवेंदसम्। अग्निम्। वैश्वानरम्। विऽभुम्।
हव्यऽवाहंम्। हवामहे। सः। नः। मुञ्चतु। अंहंसः ॥ ४ ॥

---

१ A B B^{P} ^{h}B D K ^{m}K ^{m}S ^{2}P V बहिंष्टं. We with P J R. २ So we divide with A B B^{P} ^{h}B D K ^{m}K R ^{m}S P ^{2}P J V. Sâyaṇa's text puts the sign of division after ईडे, and not after °भगम्. According to V the reason why °भंगम् ends the distich is that in some rites the part so ending only is repeated and in some others the one beginning with अग्निम्. This accounts for the several questionable divisions in the Atharva Saṁhitâ. ३ ^{2}P J K बर्हिष्ठम्. We with P. ४ P °आऽहुंतम्.

1 S′ Kd ईळे.

सुजातम् शोभनजन्मानम् । मन्त्रैर्निर्मथ्य आहितत्वात् । जातवेदसम् जातानां जनिमतां वेदितारम् । यद्वा जातानि भूतजातानि एनं विंदन्ती-ति जातवेदाः । अथ वा जातमात्र एव वेदः धनं पशुलक्षणम् अलभते-ति जातवेदाः । "यत्तज्जातः पशून् अविन्दतेति तज्जातवेदसो जातवेदस्त्वम् इति हि ब्राह्मणम्" [नि० ७. १९] । वैश्वानरम् विश्वनरात्मकं विश्वनरहितं वा अत एव विभुम् व्यापकं हव्यवाहम् हव्यस्य हविषः अस्माभिर्दत्तस्य वोढारम् एवंगुणविशिष्टम् अग्निं हवामहे आह्वयामः । ‡"बहुलं छन्दसि" इति ह्वः संप्रसारणम‡ ॥ अन्यद् गतम् ॥

पञ्चमी ॥

येन॒ ऋष॑यो ब॒लमद्यौ॑तयन्॒ युजा येनासु॑राण॒मयु॑वन्त मा॒याः ।
येना॒ग्निना॑ प॒णीनिन्द्रो॑ जि॒गाय॒ स नो॑ मुञ्च॒त्वंह॑सः ॥ ५ ॥

येन॑ । ऋष॑यः । ब॒लम् । अद्यौ॑तयन् । युजा । येन॑ । असु॑राणाम् । अयु॑वन्त । मा॒याः ।
येन॑ । अ॒ग्निना॑ । प॒णीन् । इन्द्रः॑ । जि॒गाय॑ । सः । नः॒ । मु॒ञ्च॒तु॒ । अंह॑सः ॥ ५ ॥

ऋषयः अतीन्द्रियार्थदर्शिनः अङ्गिरःप्रभृतयः येन अग्निना युजा स-ख्या बलम् आत्मीयं सामर्थ्यम् *उद्द्योतयन् उद्दीप्तं पराभिभवनक्षमम् अ-कुर्वन् येन अग्निना असुराणाम् सुरविरोधिनां मायाः व्यामोहकशक्तीः अयुवन्त देवाः पृथक् कृतवन्तः तथा येन अग्निना इन्द्रो देवाधिपतिः पणीन् एतत्संज्ञान् असुरान् जिगाय जितवान् । ‡जि जये । अ-स्मात् लिटि "सनलिटोर्जेः" इति अभ्यासाद् उत्तरस्य कुत्वम‡ ॥

षष्ठी ॥

येन॑ दे॒वा अ॒मृत॑म॒न्ववि॑न्द॒न् येनौष॑धी॒र्मधु॑मती॒रकृ॑ण्वन् ।
येन॑ दे॒वाः स्व॑१॒॑राभ॑र॒न्त्स नो॑ मुञ्च॒त्वंह॑सः ॥ ६ ॥

---

१ K K^{m} V °मुद्यौत° with Sâyaṇa. Sâyaṇa's text: उद्योतयान्. २ B R यं युजा; B^{h} D °यंन्युजा. ३ K उत् । द्यो॒तय॒न् । a maladoption of Sâyaṇa's reading, as it is without regard to accents! P मद्यौतयन् J P^{2} अद्यौतयन्. ४ B B^{h} S^{m} R D स्व॒३राभं°.

---

1 S′ Kd वदंति°. 2 So S′ Kd. Sâyaṇa's reading is here inferior to our tradition.

येन। देवाः। अमृतम्। अनुऽअविन्दन्। येन। ओषधीः। मधुऽमतीः। अकृण्वन्।
येन। देवाः। स्वः। आऽअभरन्। सः। नः। मुञ्चतु। अंहसः॥ ६॥

येन अग्निना सहायेन देवाः इन्द्रादयः अमृतम् अमरणसाधनं पीयूषम् अन्वविन्दन् अलभन्त येन अग्निना जगदनुप्रविष्टेन ओषधीः व्रीहियवाद्यास्तरुगुल्माद्याश्च मधुमतीः मधुररसयुक्ताः अकृण्वन् अकुर्वन् येन अग्निना यज्ञसाधनभूतेन देवाः देवत्वकामा यजमानाः स्तोतारो वा स्वः स्वर्गम् आभरन् आहरन्। अलभन्तेत्यर्थः॥

सप्तमी॥

यस्येदं प्रदिशि यद् विरोचते यज्जातं जनित्व्यं च केवलम्।
स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वंहसः॥ ७॥

यस्य। इदम्। प्रऽदिशि। यत्। विऽरोचते। यत्। जातम्। जनित्व्यम्। च। केवलम्।
स्तौमि। अग्निम्। नाथितः। जोहवीमि। सः। नः। मुञ्चतु। अंहसः॥ ७॥

यस्य अग्नेः प्रदिशि प्रदेशने प्रशासने इदम् सर्वं जगद् वर्तते। इदम् इत्येतद् विशिनष्टि। यद् इदम् अन्तरिक्षे ग्रहनक्षत्रादिकं विरोचते विविधं दीप्यते यच्च प्राणिजातं पृथिव्यां [जातम्] उत्पन्नं जनितव्यम् जनयितव्यं जनिष्यमाणं कृत्स्नं कार्यं जगद् यद् अस्ति तत् सर्वं केवलम् अनन्यसाधारणं यस्य प्रदिशि वर्तते तथाविधम् अग्निम् अहं स्तौमि। नाथितः। ॥नाथृ याञ्चायाम्। अस्मात् कर्तरि निष्ठा॥। नाथमानः फलं कामयमानः। यद्वा नाथः स्वामी संजातोऽस्य[1] नाथितः। तेनाग्निना नाथवान् भविष्यामीति जोहवीमि पुनःपुनराह्वयामि। ॥"अभ्यस्तस्य च" इति ह्वयतेः संप्रसारणम्। "गुणो यङ्लुकोः" इति अभ्यासस्य गुणः॥॥

[इति] तृतीयं सूक्तम्॥

---

1 S′Kd omit °स्य.

"अग्नयेंहोमुचेष्टाकपालः" [तै० सं० ७.५.२१.१] इत्यादिना दशहविष्का मृगारेष्टिराध्वर्यवे विहिता । तत्र अग्नेरंहोमुचः स्तावकम् "अग्नेर्मन्वे" [२३] इति सूक्तं व्याख्यातम् । इन्द्रस्यांहोमुचः स्तावकम् "इन्द्रस्य मन्महे" इति सूक्तम् । तस्य पूर्वसूक्तेन सह उक्तो विनियोगः ॥

तत्र प्रथमा ॥

इन्द्रस्य मन्महे शश्वदिदस्य मन्महे वृत्रघ्नः स्तोमा उप मेम आगुः ।
यो दाशुषः सुकृतो हवमेति स नो मुञ्चत्वंहसः ॥ १ ॥

इन्द्रस्य । मन्महे । शश्वत् । इत् । अस्य । मन्महे । वृत्रऽघ्नः । स्तोमाः ।
उप । मा । इमे । आ । अगुः ।
यः । दाशुषः । सुऽकृतः । हवम् । एति । सः । नः । मुञ्चतु । अंहसः ॥ १ ॥

इन्द्रस्य परमैश्वर्ययुक्तस्य मन्महे महत्त्वं जानीमः । मनु अवबोधने । तनादित्वाद् उप्रत्ययः । "लोपश्चास्यान्यतरस्यां म्वोः" इति उकारलोपः । असाधारण्यं दर्शयितुम् आह शश्वदिति । इदिति अवधारणे । शश्वत् पुनःपुनः अस्यैवेन्द्रस्य तद् माहात्म्यं मन्महे अवबुध्यामहे । नान्यस्य तादृङ्माहात्म्यं दृश्यत इत्यर्थः । वृत्रघ्नः वृत्रम् असुरं हतवतस्तस्य इन्द्रस्य इमे पुरतो वक्ष्यमाणाः स्तोमाः स्तोत्राणि मा माम् उपागुः उपयन्ति उपगच्छन्ति । इन्द्रमाहात्म्यविषयाणि स्तोत्राणि उपागत्य मां स्तोतारं कुर्वन्तीत्यर्थः ॥ यः प्रसिद्ध इन्द्रो दाशुषः चरुपुरोडाशादिहवींषि दत्तवतः सुकृतः शोभनकर्मणो यजमानस्य हवम् आह्वानम् एति प्राप्नोति नोदास्ते । दाशुषः । दाशृ दाने । "दाश्वान् साह्वान् मीढ्वाञ्च" इति क्वसौ निपात्यते । "वसोः संप्रसारणम्" इति संप्रसारणम् । हवम् इति । "भावेनुपसर्गस्य" इति ह्वयतेरप् संप्रसारणं च ॥ स न इत्यादि गतम् ॥

द्वितीया ॥

य उग्रीणामुग्रबाहुर्ययुर्यो दानवानां बलमारुरोज ।

---

१ BB̂DRS^m वृत्रघ्नः. We with AKK̂^mV. २ S^m °वाहुर्युयु°.

येन॑ जि॒ताः सिन्ध॑वो येन॒ गाव॒: स नो॑ मुञ्च॒त्वंह॑सः ॥ २ ॥

यः। उ॒ग्रीणा॑म्। उ॒ग्रऽबा॑हुः। य॒युः। यः। दा॒न॒वाना॑म्। बल॑म्। आऽरु॑रोज॑। येन॑। जि॒ताः। सिन्ध॑वः। येन॑। गावः॑। सः। नः॒। मु॒ञ्च॒तु॒। अंह॑सः ॥ २ ॥

य इन्द्रः उग्रबाहुः उद्गूर्णहस्तः उग्रीणाम् उद्गूर्णानां शत्रुसेनानां युयुः यावयिता पृथक्कर्ता। ✕यौतेर्ङे च इति डुप्रत्ययः✕। य इन्द्रो दानवानाम् दनोरपत्यानाम् असुराणां बलम् सामर्थ्यम् आरुरोज सर्वतो बभञ्ज। ✕रुजो भङ्गे✕। येन इन्द्रेण सिन्धवः स्यन्दनशीला मेघस्था आपः जिताः मेघं भित्त्वा जयेन प्राप्ताः। यद्वा सिन्धवो नद्यः समुद्रा वा वृत्रवधेन जिताः। श्रूयते हि। "वज्रेण खान्यतृणन्नदीनाम्" [ऋ० २. १५. ३] "अहन्नहिं परिशयानम् अर्णोवासृजो अपो अच्छा समुद्रम्" [ऋ० ६. ३०. ४] इत्यादि। येन इन्द्रेण पणिनामकासुरवधेन तदपहृता गावो जिता लब्धाः॥ गतम् अन्यत्॥

तृतीया॥

यश्चर्षणि॒प्रो वृ॒ष॒भः स्व॒र्वित् यस्मै॒ ग्रावा॑णः प्र॒वद॑न्ति नृ॒म्णम्।
यस्याध्व॒रः स॒न्नहो॑ता॒ मदि॑ष्ठ॒: स नो॑ मुञ्च॒त्वंह॑सः ॥ ३ ॥

यः। च॒र्षणि॒ऽप्रः। वृ॒ष॒भः। स्व॒:ऽवित्। यस्मै॑। ग्रावा॑णः। प्र॒ऽवद॑न्ति। नृ॒म्णम्।
यस्य॑। अ॒ध्व॒रः। स॒न्नऽहो॑ता। मदि॑ष्ठः। सः। नः॒। मु॒ञ्च॒तु॒। अंह॑सः ॥ ३ ॥

य इन्द्रः चर्षणिप्रः। चर्षणयो मनुष्याः तान् अभिलषितफलेन प्राति पूरयतीति चर्षणिप्रः। ✕प्रा पूरणे। "आतोनुपसर्गे कः" इति [कः]✕। वृषभः वर्षिता। यद्वा वृषभवत् प्रसह्यकारी स्वर्वित् स्वर्गस्य लम्भयिता। यस्मा इन्द्राय ग्रावाणः अभिषवार्थाः पाषाणा नृम्णम् सोमरसलक्षणं धनं प्रवदन्ति अभिषवकालीनैर्ध्वनिभिः प्रकथयन्ति। "देवा ग्रावाण इन्दुरिन्द्र इत्यवादिषुः" [तै० ब्रा० ३. ७. ९. २] "प्रैते

---

१ A B K K S V मदि॑ष्ठः. We with D R P P J. २ K मदि॑ष्ठः.

---

1 S' Kd ययुः. Sâyaṇa's text also has ययुः. 2 S' Kd इ for इत्यादि. 3 S' Kd °प्राः. 4 S' Kd सोमरस°.

"वदन्तु प्र वयं वदाम" [ऋ०१०, ९४, १] इत्यादिमन्त्रवर्णाद् ग्राव्णां प्रवदितृत्वम् । यस्य इन्द्रस्य अध्वरः सोमयागः सप्तहोता सप्तभिर्होतृभिर्वषट्कर्तृभिर्युक्तः मदिष्ठः मादयितृतमो भवति । ॥ होता मैत्रावरुणः ब्राह्मणाच्छंसी पोता नेष्टा अच्छावाकः आग्नीध्रश्चेति सप्त होतारो वषट्कर्तारो यस्मिन्निति बहुव्रीहौ "नद्यृतश्च" इति प्राप्तस्य कपः "ऋतश्छन्दसि" इति प्रतिषेधः । मदिष्ठ इति । मदी हर्षे इत्यस्मात् तृच् । तदन्तात् "तुश्छन्दसि" इति इष्ठन् । "तुरिष्ठेमेयस्सु" इति तृलोपः ॥ ॥ गतम् अन्यत् ॥

चतुर्थी ॥

यस्य॑ व॒शास॑ ऋ॒षभास॑ उ॒क्षणो॒ यस्मै॑ मी॒यन्ते॒ स्वर॑वः स्व॒र्विदे॑ ।
यस्मै॑ शु॒क्रः पव॑ते॒ ब्रह्म॑शुम्भित॒ः स न॑ो मुञ्च॒त्वंह॑सः ॥ ४ ॥

यस्य॑ । व॒शास॑ः । ऋ॒षभास॑ः । उ॒क्षण॑ः । यस्मै॑ । मी॒यन्ते॑ । स्वर॑वः । स्व॒ःऽविदे॑ ।
यस्मै॑ । शु॒क्रः । पव॑ते । ब्रह्म॑ऽशुम्भितः । सः । न॒ः । मु॒ञ्च॒तु । अंह॑सः ॥४॥

वशासः वशा वन्ध्या गावः ऋषभासः ऋषभाः उक्षणः उक्षाणः सेचनसमर्थाः । ॥ "वा षपूर्वस्य निगमे" इति उपधादीर्घाभावः ॥ । एवं वशादि[1]रूपाः पशवः यस्य इन्द्रस्य यागार्थम् आलभ्यन्ते यस्मा इन्द्राय स्वर्विदे स्वर्गस्य लम्भयित्रे स्वरवः । यूपावतक्षणशकलः स्वरुः । तेन[2] तद्वन्त उपलक्ष्यन्ते । स्वरवः स्वरुमन्तो यूपा मीयन्ते अवटेषु स्थाप्यन्ते । ॥ डुमिञ् प्रक्षेपणे ॥ । यस्मा इन्द्राय शुक्रः निर्मलो[3] रसवान् सोमः ब्रह्मशुम्भितः ब्रह्मभिर्मन्त्रैः अभिषवसाधनैरलंकृतः सन् पवते दशापवित्रं[4]धारया स्रवति ॥ स न इत्यादि पूर्ववत् ॥

पञ्चमी ॥

यस्य॒ जुष्टिं॑ सो॒मिन॑ः काम॒यन्ते॒ यं हव॑न्त॒ इष्वं॑मन्तं॒ गवि॑ष्टौ ।
यस्मि॑न्न॒र्कः शि॑श्रि॒ये यस्मि॒न्नोज॒ः स न॑ो मुञ्च॒त्वंह॑सः ॥ ५ ॥

1 S′ Kd omit °दि°. 2 S′ Kd च for °न. 3 S′ Kd °नः for °लः. 4 S′ Kd °पवित्राधा°.

यस्य। जुष्टिम्। सोमिनः। कामयन्ते। यम्। हवन्ते। इषुऽमन्तम्। गोऽइष्टौ। यस्मिन्। अर्कः। शिश्रिये। यस्मिन्। ओजः। सः। नः। मुञ्चतु। अंहसः॥ ५॥

यस्य इन्द्रस्य जुष्टिम् प्रीतिं सोमिनः सोमवन्तो यजमानाः कामयन्ते अभिलषन्ति। इषुमन्तम् बाणवन्तं प्रशस्तायुधसहितं यम् इन्द्रं गविष्टौ गवां पणिभिरपहृतानां पुनरन्वेषणे अभिगमने वा हवन्ते आह्वयन्ति। यस्मिन्निन्द्रे अर्कः अर्चनसाधनभूतो मन्त्रः स्तुतशस्त्रादिलक्षणः शिश्रिये आश्रितो भवति। तथा यस्मिन्निन्द्रे ओजः बलम् अनन्यसाधारणं दृश्यते॥ स न इत्यादि पूर्ववत्॥

षष्ठी॥

यः प्रथमः कर्मकृत्याय जज्ञे यस्य वीर्यं प्रथमस्यानुबुद्धम्।
येनोद्यतो वज्रोभ्यायताहिं स नो मुञ्चत्वंहसः॥ ६॥

यः। प्रथमः। कर्मऽकृत्याय। जज्ञे। यस्य। वीर्यम्। प्रथमस्य। अनुऽबुद्धम्। येन। उत्ऽयतः। वज्रः। अभिऽआयत। अहिम्। सः। नः। मुञ्चतु। अंहसः॥ ६॥

य इन्द्रः प्रथमः मुख्यः कर्मकृत्याय कर्मणां ज्योतिष्टोमादीनां करणाय अनुष्ठानाय जज्ञे जातवान्। यस्य इन्द्रस्य प्रथमस्य मुख्यस्य वीर्यम् वीरकर्म वृत्रहननादिकम् अनुबद्धम् परस्परं संततम्। श्रूयते हि। "इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री। अहन्नहिम् "अन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम्" इत्यादि [ऋ० १. ३२. १]। येन इन्द्रेण उद्यतः उद्धृतो वज्रः अहिम् वृत्रम् अभ्यायत अभितः सर्वतः अहिंसीत्। आङ्पूर्वाद् यमेर्लुङि च्लेः सिच्। "यमो गन्धने" इति तस्य कित्त्वाद् "अनुदात्तोपदेश०" इत्यादिना अनुनासिक-

---

१ P² जुष्टिम्. २ A B^h D K K^m R S^m P P² J V यज्ञे. B B^P follow Sâyaṇa, whom we adopt. ३ B B^P V °वद्धम्. We with A B^h D K K^m R S^m P P² J V.

---

1 S′ Kd अन्यसाधा°.

लोपः । "ह्रस्वाद् अङ्गात्" इति सिज्लोपः ॥ स न इत्यादि गतम् ॥

सप्तमी ॥

यः सꣳग्रा॑मान् नय॑ति सं युधे व॒शी यः पु॒ष्टानि॑ संसृ॒जति॑ द्व॒यानि॑ ।
स्तौमीन्द्रं॑ नाधि॒तो जो॑हवीमि॒ स नो॑ मुञ्च॒त्वꣳह॑सः ॥ ७ ॥

यः । स॒मऽग्रा॑मान् । नय॑ति । सम् । युधे । व॒शी । यः । पु॒ष्टानि॑ । स॒मऽसृ॒-
जति॑ । द्व॒यानि॑ ।

स्तौमि॑ । इन्द्र॑म् । ना॒धि॒तः । जो॒ह॒वी॒मि॒ । सः । नः॒ । मु॒ञ्च॒तु॒ । अꣳह॑सः ॥ ७ ॥

वशी स्वतन्त्रो य इन्द्रः युधे योधनाय संग्रहाराय संग्रामꣳम युद्धं सं नयति सम्यक् प्रापयति । यद्वा युधे योधनाय वशी स्वतन्त्रः । योधयितुं कुशल इत्यर्थः । तथा य इन्द्रः पुष्टानि समृद्धानि द्वयानि स्त्रीपुंसात्मकानि मिथुनानि संसृजति परस्परं संसृष्टानि प्रजननसमर्थानि करोति । तम इन्द्रं स्तौमि । नाधितो जोहवीमि इत्यादि व्याख्यातम ॥

[इति] चतुर्थं सूक्तम ॥

"वायोः सवितुः" इत्यस्य सूक्तस्य "अग्नेर्मन्वे" इत्यनेन सूक्तेन सह उक्तो विनियोगः ॥

तथा "वायव्यां वातवात्यायाम्" [न० क० १७] इत्यादिविहितायां शान्तौ "वायोः सवितुः" इत्येतत् सूक्तम आवपनीयम । तद् उक्तं नक्षत्रकल्पे । "वायोः सवितुरिति वायव्यायाम्" इति [न० क० १८] ॥

तत्र मृगारेष्टौ "वायोꣳसावित्र आगोमुग्भ्यां चरुः" [तै० सं० ७, ५, २२, १] इति विहितस्य हविषो वायुसवितारौ देवता । तयोः स्तावकम "वायोः सवितुः" इति सूक्तम ॥

तत्र प्रथमा ॥

वा॒यो॒ः स॑वि॒तुर्वि॒दथा॑नि मन्महे॒ यावा॑त्म॒न्वद् वि॒शयो॒ यौ च॒ रक्ष॑थः ।
यौ विश्व॑स्य परि॒भू ब॑भू॒वथु॒स्तौ नो॑ मुञ्चत॒मꣳह॑सः ॥ १ ॥

---

१ K V °ग्रामं नयं°. We with A B B^{P} B^{h} D K^{m} R S^{m} P P^{g} J V.

---

1 S′ Kd युद्धे. 2 S′ Kd वायौ for वायो.

वायोः । सवितुः । विदथानि । मन्महे । यौ । आत्मन्ऽवत् । विशंथः । यौ । च । रक्षथः ।
यौ । विश्वस्य । परिभू इति परिऽभू । बभूवथुः । तौ । नः । मुञ्चतम् । अंहसः ॥ १ ॥

वायोः जगदाधारभूतस्य वातस्य सवितुः सर्वप्रेरकस्य च देवस्य विदथानि वेदनानि स्तुत्या[1] गुणविषयज्ञानानि । यद्वा विदथ इति यज्ञनाम । विदथानि वेदितव्यानि श्रुतिविहितकर्माणि मन्महे जानीमहे । विद ज्ञाने इत्यस्माद् औणादिकः अथप्रत्ययः । हे वायुसवितारौ यौ युवाम् आत्मन्वत् सात्मकं स्थावरजङ्गमात्मकं जगद् विशथः प्रविशथः । वायोस्तावत् प्राणात्मना प्रवेशः श्रुतिसिद्धः । "वायुः प्राणो भूत्वा नासिके प्राविशत्" [ऐ० आ० २, ४, २] इति । सविता च प्रेरकत्वेन अन्तर्यामितया सर्वं जगद् अनुप्रविष्टः । "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः" [बृ० आ० ३, ७, ७] । इत्याद्यन्तर्यामिब्राह्मणात् । आत्मन्वत् इति । आत्मनशब्दाद् मतुप् । "मादुपधायाः०" इति वत्वम् । "अनो नुट्" इति नुडागमः । प्रवेशानन्तरं यौ च युवां रक्षथः तज्जगत् पालयथः । तथा यौ युवां विश्वस्य कृत्स्नस्य जगतः परिभू[3] । परिपूर्वो भवतिः परिग्रहार्थे वर्तते । परिग्रहीतारौ बभूवथुः भवथः । परिपूर्वाद् भवतेः क्विप् प्रत्ययः । "सुपां सुलुक्" इति पूर्वसवर्णदीर्घः । हे वायुसवितारौ तौ युवां नः अस्मान् अंहसः पापाद् मुञ्चतम् । मुचॢ मोक्षणे ॥ "शे मुचादीनाम्" इति नुम ॥

द्वितीया ॥

ययोः संख्याता वरिमा पार्थिवानि याभ्यां रजो युपितमन्तरिक्षे ।
ययोः प्रायं नान्वानशे कश्चन तौ नो मुञ्चतमंहसः ॥ २ ॥

ययोः । समऽख्याता । वरिमा । पार्थिवानि । याभ्याम् । रजः । युपितम् । अन्तरिक्षे ।

---

१ P विदथः. We with $\dot{P}$ J K.

---

1 So S′ Kd. 2 S′ Kd सर्वज°. 3 S′ Kd परिभूः.

यर्योः । प्रऽअयम् । न । अनुऽआनशे । कः । चन । तौ । नः । मुञ्च-
तम् । अंहसः ॥ २ ॥

ययोर्देवयोः पार्थिवानि पृथिव्यां भवानि वरिमा उरुत्वानि महत्त्वानि संख्याता संख्यातानि जनैः सम्यक् परिगणितानि प्रख्यातानि दृश्यन्ते । पार्थिवानि "पृथिव्या ञाञौ" इति प्राग्दीव्यतीयः अञ् प्रत्ययः । वरिमेति । उरुशब्दाद् इमनिचि "प्रियस्थिर°" इत्यादिना वर् आदेशः । "शेश्छन्दसि बहुलम्" इति शेर्लोपः । याभ्यां वायुसवितृभ्याम् अन्तरिक्षे आकाशे रजः । उदकनामैतत् । उक्तं हि यास्केन । रजो रजतेः । ज्योती रज उच्यते । उदकं रज उच्यते इति [नि° ४. १९] । तद् रजःशब्दवाच्यं वृष्टिकारणम् उदकं युपितम् मूर्छितं सत् धार्यते । सवितृकिरणैर्वायुना च खलु वर्षर्तौ विमोक्तुम् आकाशे बहलतरम् उदकं ध्रियत इति श्रुतिस्मृतिप्रसिद्धिः । युपितम् इति । युंपु विमोहने । असात् कर्मणि निष्ठा । कश्चन कोपि अन्यो देवः ययोर्वायुसवित्रोः प्रायम् प्रकृष्टगमनं नान्वानशे नानुप्राप्नोति । अनुगन्तुं समर्थो न भवतीत्यर्थः । अशू व्याप्तौ । छान्दसो लिट् । "अश्नोतेश्च" इति नुडागमः । तौ नो मुञ्चतम् इत्यादि पूर्ववत् ॥

तृतीया ॥

तवं व्रते नि विशन्ते जनांसस्त्वय्युदिते प्रेरते चित्रभानो ।
युवं वायो सविता च भुवनानि रक्षथस्तौ नो मुञ्चतमंहसः ॥ ३ ॥

तवं । व्रते । नि । विशन्ते । जनांसः । त्वयि । उत्ऽइते । प्र । ईरते । चित्र-
भानो इतिं चित्रऽभानो ।
युवम् । वायो इतिं । सविता । च । भुवनानि । रक्षथः । तौ । नः । मु-
ञ्चतम् । अंहसः ॥ ३ ॥

---

१ P J K प्रऽआयम्. We with P. २ K V रक्षतस्तौ with Sâyaṇa. We with A B B^{p} B^{h} D K^{m} R S^{m} P^{2} J V. ३ K रक्षतः.

---

1 S′ Kd ध्रिय° for ध्रियत°. 2 S′ Kd युपि.

हे सवितः तव व्रते त्वत्संबन्धिनि कर्मणि परिचरणलक्षणे जनासः जनाः प्राणिनः नि विशन्ते नियमेन वर्तन्ते। "नेर्विशः" इति आत्मनेपदम्। हे चित्रभानो विचित्रदीप्ते त्वयि उदिते उदयं प्राप्ते सति प्रेरते सर्वे जनाः स्वस्वकार्यकरणाय प्रवर्तन्ते। ईर गतौ। अदादित्वात् शपो लुक्। हे वायो त्वं सविता च युवम् युवां भुवनानि भूतजातानि रक्षतः पालयथः॥ तौ नो मुञ्चतम् इत्यादि गतम्॥

चतुर्थी॥

अपेतो वायो सविता च दुष्कृतमप रक्षाँसि शिमिदां च सेधतम्।
सं ह्यूर्जया सृजथः सं बलेन तौ नो मुञ्चतमंहसः॥ ४॥

अप। इतः। वायो इति। सविता। च। दुःऽकृतम्। अप। रक्षाँसि। शिमिदाम्। च। सेधतम्।

सम्। हि। ऊर्जया। सृजथः। सम्। बलेन। तौ। नः। मुञ्चतम्। अंहसः॥४॥

हे वायो त्वं च सविता च दुष्कृतम् अस्मदीयं पापम् अपेतः अपगमयथः॥ तथा रक्षांसि उपद्रवकारिणो राक्षसान् समिधाम् संदीप्तां कृत्यां च अप सेधतम् अपगमयतम्॥ अपि च ऊर्जया ऊर्जयति बलयतीति ऊर्जा अन्नरसजनिता पुष्टिः। ऊर्ज बलप्राणनयोः। असात् पचाद्यच्। तया अस्मान् सं सृजथः बलेन तज्जनितेन संसृजथः॥ गतम् अन्यत्॥

पञ्चमी॥

रयिं मे पोषं सवितोत वायुस्तनू दक्षमा सुवतां सुशेवम्।
अयक्ष्मतातिं महे इह धत्तं तौ नो मुञ्चतमंहसः॥ ५॥

रयिम्। मे। पोषम्। सविता। उत। वायुः। तनू इति। दक्षम्। आ। सुवताम्। सुऽशेवम्।

---

१ K K̃ V समिदां. Sâyaṇa's text too has समिदां, though his commetary explains समिधाम्. We with A B Bp B̃h D R S̃m P P̃2 J V. २ A B K K̃m V have १ for ३. B̃h R S̃m D have no kampa at all. ३ A B Bp D K̃m R S̃m V सृजथ सं°. We with K V S. ४ K समिदाम्. ५ P P̃2 J सृजथं।.

अयक्ष्मऽतातिम । महः । इह । धत्तम । तौ । नः । मुञ्चतम । अंहसः ॥५॥

उतशब्दः चार्थे । सविता वायुश्च मे मह्यं रयिम् धनं पोषम् पुष्टिं समृद्धिं च आ सुवताम् प्रेरयताम् । प्रयच्छताम् इत्यर्थः । ॥ षू प्रेरणे । तुदादित्वात् शः ॥ । तथा तनू तन्वाम् । ॥ "सुपां सुलुक्०" इति सप्तम्या लुक् । "ईदूतौ च सप्तम्यर्थे" इति प्रगृह्यसंज्ञा ॥ । तन्वाम् अस्मदीये शरीरे सुशेवम् सुसुखं दक्षम् बलम् आ सुवताम् आसमन्तात् प्रेरयताम् । तथा हे वायुसवितारौ । अयक्ष्मतातिम् । ॥ अयक्ष्मशब्दात् स्वार्थिकस्तातिल् प्रत्ययः ॥ । अयक्ष्मम् अरोगं महः तेजः इह अस्मिन् यजमाने धत्तम धारयतम् ॥

षष्ठी ॥

प्र सुमतिं सवितर्वाय ऊतये महस्वन्तं मत्सरं मादयाथः ।
अर्वाग् वामस्य प्रवतो नि यच्छतं तौ नो मुञ्चतमंहसः ॥ ६ ॥

प्र । सुऽमतिम । सवितः । वायो इति । ऊतये । महस्वन्तम । मत्सरम । मादयाथः ।

अर्वाक् । वामस्य । प्रऽवतः । नि । यच्छतम । तौ । नः । मुञ्चतम । अंहसः ॥६॥

हे सवितः हे वायो ऊतये रक्षार्थं सुमतिम् शोभनाम् अनुग्रहात्मिकां बुद्धिं युवां प्र यच्छतम । ॥ "ऊतियूति०" इत्यादिना अवतेः क्तिन्नन्त उदात्तो निपातितः ॥ । महस्वन्तम् दीप्तिमन्तं मत्सरम् मदकरं सोमं मादयाथः पीत्वा माद्यथः । ॥ मत्सरम् इति । मदेरौणादिकः सरप्रत्ययः ॥ । वामस्य वननीयस्य प्रवतः प्रकर्षवतो धनस्य अर्वाक् अस्मदभिमुखं नि यच्छतम नियमयतम । ॥ वामस्येति । "क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । प्रवत इति । "उपसर्गाच्छन्दसि धात्वर्थे" इति वतिः ॥ ॥

सप्तमी ॥

उप श्रेष्ठा न आशिषो देवयोर्धामन्नस्थिरन् ।
स्तौमि देवं सवितारं च वायुं तौ नो मुञ्चतमंहसः ॥ ७ ॥

उप॑। श्रेष्ठाः। नः। आऽशिषः। दे॒वयोः॑। धाम॑न्। अ॒स्थि॒र॒न्।
स्तौमि॑। दे॒वम्। स॒वि॒तार॑म्। च॒। वा॒युम्। तौ। नः॒। मु॒ञ्च॒त॒म्। अंह॑सः॥७॥

देवयोः वायुसवित्रोः धामन् धामनि तेजसि स्थाने वा नः अस्माकं श्रेष्ठाः प्रशस्ता आशिषः फलप्रार्थना उपास्थिरन् उपस्थिता वर्तन्ते। अस्थिरन्निति। तिष्ठतेर्लुङि "अकर्मकाच्च" इति आत्मनेपदम्। "स्थाध्वोरिच्च" इति इत्त्वकित्त्वे। व्यत्ययेन झस्य रन् आदेशः। तथाविधं देवम् दानादिगुणयुक्तं सवितारं वायुं च स्तौमि प्रशंसामि। "उतो वृद्धिर्लुकि हलि" इति वृद्धिः॥ अन्यद् व्याख्यातम्॥

पञ्चमं सूक्तम्॥

[इति] चतुर्थकाण्डे पञ्चमोनुवाकः॥

षष्ठेनुवाके पञ्च सूक्तानि। तत्र "मन्वे वाम्" इति आद्यस्य सूक्तस्य पूर्ववद् विनियोगः॥

तथा सोमयागे "मन्वे वाम्" इति औदुम्बर्या[1] आज्यहोमस्य अनुमन्त्रणं कुर्यात्। उक्तं वैताने। "मन्वे वां द्यावापृथिवी इत्यौदुम्बर्या[2] आज्यहोमम्" इति [वै° ३. ५]॥

तत्र प्रथमा॥

मन्वे वां द्यावापृथिवी सुभोजसौ सचेतसौ ये अप्रथेथाममिता योजनानि।
प्रतिष्ठे ह्यभवतं वसूनां ते नो मुञ्चतमंहसः॥ १॥

मन्वे। वाम्। द्यावापृथिवी इति। सुऽभोजसौ। सऽचेतसौ। ये इति।
अप्रथेथाम्। अमिता। योजनानि।
प्रतिष्ठे इति प्रतिऽस्थे। हि। अभवतम्। वसूनाम्। ते इति। नः। मुञ्चतम्। अंहसः॥ १॥

---

१ So all our MSS. and Vaidikas except **K** who follows Sâyaṇa. २ **P J** प्रतिऽस्थे. We with **P**[2] **K C**P.

---

1 **S′ K**d °दुंवर्याम्. We with the *Vaitâna*. 2 So **S′ K**d. The *Vaitâna* and its commentator have अभि° for आज्य°. 3 **S′ K**d °दुंवर्याज्यहोम°. We with the *Vaitâna*.

हे द्यावापृथिवी द्यावापृथिव्यौ सुभोजसौ सुष्ठु भोजयित्र्यौ शोभनभोगे वा सचेतसौ समानचित्ते वाम् युवां मन्वे स्तौमि । यद्वा वां युवयोर्माहात्म्यं मन्वे अहं जानामि । किं पुनस्तद् इत्याह ये[1] अप्रथेताम् इत्यादिना[1] । ये द्यावापृथिव्यौ अमिता अमितानि अपरिमितानि योजनानि । [योजन]शब्दः अध्वपरिमाणवाची । अपरिमितान् अध्वनः अप्रथेताम्[*] प्रथिते विस्तीर्णे अभवेताम्[2] । कृत्स्नदेशव्याप्त्या सर्वगते भवत इत्यर्थः । हि यस्माद् युवां वसूनाम् निवसतां देवमनुष्यादीनाम् निवासहेतूनां धनानां वा प्रतिष्ठे प्रकृष्टावस्थित्यधिकरणे अभवतम् भवथः । तस्मात् सर्वाधारत्वेन युवयोः सर्वगतत्वम् । प्रतिपूर्वात् तिष्ठतेः "आतश्चोपसर्गे" इति अधिकरणे अङ् । "उपसर्गात् सुनोति°" इति षत्वम् । नः अस्मान् अंहसः पापाद् मुञ्चतम् ॥

द्वितीया ॥

प्रतिष्ठे ह्यभवतं वसूनां प्रविड्ढे देवी सुभगे उरूची ।
द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमंहसः ॥ २ ॥

प्रतिष्ठे इति प्रतिऽस्थे । हि । अभवतम् । वसूनाम् । प्रविड्ढे इति प्रऽविड्ढे ।
देवी इति । सुभगे इति सुऽभगे । उरूची इति ।
द्यावापृथिवी इति । भवतम् । मे । स्योने इति । ते इति । नः । मुञ्चतम् ।
अंहसः ॥ २ ॥

प्रतिष्ठे ह्यभवतं वसूनाम् इति पूर्ववत् । यस्मात् सर्वप्राणिनाम् अधिष्ठानभूते द्यावापृथिव्यौ तस्मात् प्रविड्ढे[*] प्रकर्षेण मणिसूत्रन्यायेन सूत्रवत् सर्वजगदनुप्रविड्ढे । अनुप्रविष्टे इत्यर्थः । देवी देव्यौ दानादिगुणयुक्ते सुभगे शोभनधने सौभाग्ययुक्ते वा । "आद्युदात्तं द्यच् छन्दसि" इति[4] उत्तरपदाद्युदात्तत्वम् । उरूची उरु बहुलम् अञ्चन्त्यौ व्याप्नुव-

---

१ **K V** प्राविड्ढे. We with **A B B**ᵖ **B**ʰ **D K**ᵐ **R S**ᵐ **P P**² **J V**. २ See note २ on the previous page.

---

1 **S′ K**d repeat these words again. 2 **S′ K**d भवेताम् for अभवताम्. 3 **S′ K**d °सिद्धे. 4 So **S′ K**d. The remark refers to an accent not read by our authorities.

त्यौ । उरुशब्दोपपदाद् अञ्चतेः "ऋत्विग्०" इत्यादिना क्विन् । "अनिदिताम्०" इति नलोपः । "अचः" इति अकारलोपे "चौ" इति दीर्घत्वम् । "अञ्चतेश्चोपसंख्यानम्" इति ङीप् । "सुपां सुलुक्०" इति पूर्वसवर्णदीर्घः । हे द्यावापृथिवी द्यावापृथिव्यौ इत्थं महानुभावे युवां मे मम स्योने । सुखनामैतत् । सुखहेतू भवतम् । अन्यद् गतम् ॥

तृतीया ॥

असंतापे सुतपसौ हुवेहमुर्वी गम्भीरे कविभिर्नमस्ये ।
द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमंहसः ॥ ३ ॥

असंतापे इत्यसमऽतापे । सुऽतपसौ । हुवे । अहम् । उर्वी इति । गम्भीरे इति । कविऽभिः । नमस्ये३ इति ।
द्यावापृथिवी इति । भवतम् । मे । स्योने इति । ते इति । नः । मुञ्चतम् । अंहसः ॥ ३ ॥

असंतापे संतापरहिते सर्वप्राणिनां संतापस्य हर्त्र्यौ सुतपसौ उर्वी उर्व्यौ विस्तीर्णे गम्भीरे गाम्भीर्ययुक्ते इदम् ईदृग् इति परिच्छेदरहिते कविभिः क्रान्तदर्शिभिर्महर्षिभिः नमस्ये नमस्कार्ये ईदृश्यौ युवाम् अहं हुवे रक्षणार्थम् आह्वयामि । "बहुलं छन्दसि" इति ह्वयतेः संप्रसारणम् ॥ उत्तरोर्धर्चो व्याख्यातः ॥

चतुर्थी ॥

ये अमृतं बिभृथो ये हवींषि ये स्रोत्या बिभृथो ये मनुष्यान् ।
द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमंहसः ॥ ४ ॥

ये इति । अमृतम् । बिभृथः । ये इति । हवींषि । ये इति । स्रोत्याः । बिभृथः । ये इति । मनुष्यान् ।

---

१ P² CP इत्यसमऽतापे. P J इत्यसमऽतापे.

---

1 S' Kd सर्वसर्वप्राणिनां.

द्यावा॑पृथिवी॒ इति॑ । भव॑तम् । मे॒ । स्यो॒ने इति॑ । ते इति॑ । नः॒ । मु॒ञ्च॒तम् ।
अंह॑सः ॥ ४ ॥

[हे] द्यावापृथिव्यौ ये युवाम् अमृतम् अमरणं सर्वप्राणिनाम् अमृतत्वं बिभृथः धारयथः । "नञो जरमरमित्रमृताः" इति उत्तरपदाद्युदात्तत्वम् । बिभृथ इति । "भृञाम् इत्" इति अभ्यासस्य इत्त्वम् । ये च युवां हवींषि चरुपुरोडाशादीनि धारयथः । ये च स्रोत्याः स्रोतस्विनीर्नदीः बिभृथः धारयथः । "स्रोतसो विभाषा ञ्यङ्ञ्यौ" इति ञ्यप्रत्ययः । ये च युवां मनुष्यान् धारयथः ॥ गतम् अन्यत् ॥

पञ्चमी ॥

ये उ॒स्रिया॑ बिभृथो ये वन॒स्पती॒न् ययो॑र्वां॒ विश्वा॒ भुव॑नान्यन्तः ।
द्यावा॑पृथिवी॒ भव॑तं मे स्यो॒ने ते नो॑ मुञ्चतमंह॑सः ॥ ५ ॥

ये इति॑ । उ॒स्रिया॑ः । बि॒भृ॒थः । ये इति॑ । वन॒स्पती॑न् । ययो॑ः । वा॒म् । वि॒श्वा॑ । भुव॑नानि । अ॒न्तः ।
द्यावा॑पृथिवी॒ इति॑ । भव॑तम् । मे॒ । स्यो॒ने इति॑ । ते । नः॒ । मु॒ञ्च॒तम् । अं॒ह॑सः ॥ ५ ॥

हे द्यावापृथिव्यौ ये युवाम् उस्रियाः । गोनामैतत् । गाः सर्वा बिभृथः धारयथः । ये[1] च युवां वनस्पतीन् वृक्षान् सर्वान् बिभृथः । वनस्पतिशब्दः पारस्करादिः । "उभे वनस्पत्यादिषु°" इति उभयपदप्रकृतिस्वरत्वम् । ययोर्वाम् युवयोः अन्तः मध्ये विश्वा विश्वानि उक्तानुक्तानि सर्वाणि भुवनानि भूतजातानि ते युवां स्योने मे भवतम् इति संबन्धः ॥

षष्ठी ॥

ये की॒लाले॑न त॒र्पय॑थो ये घृ॒तेन॒ याभ्यां॒ मृते न किं च॒न शं॑कु॒वन्ति॑ ।

---

१ A B̂ D R S̃ V य उस्रि°. We with K K̃ S̃ V.

---

1 S′ Kd येन for ये च.

द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमंहसः ॥ ६ ॥

ये इति। कीलालेन। तर्पयथः। ये इति। घृतेन। याभ्याम्। ऋते। न। किम्। चन। शङ्कुवन्ति।

द्यावापृथिवी इति। भवतम्। मे। स्योने इति। ते इति। नः। मुञ्चतम्। अंहसः ॥ ६ ॥

हे द्यावापृथिव्यौ ये युवां कीलालेन अन्नेन तर्पयथः कृत्स्नं जगत् पोषयथः। ये च युवां घृतेन क्षरणशीलेन उदकेन तर्पयथः। याभ्यां द्यावापृथिवीभ्याम् ऋते विना किं चन किमपि कार्यं कर्तुं न शक्नुवन्ति सर्वे जनाः। अन्यत् पूर्ववत्। ⌛याभ्याम् ऋत इति। "अन्यारादितरर्ते०" इति पञ्चमी⌛ ॥

सप्तमी ॥

यन्मेदमभिशोचति येनयेन वा कृतं पौरुषेयान्न दैवात्।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमंहसः ॥ ७ ॥

यत्। मा। इदम्। अभिऽशोचति। येनऽयेन। वा। कृतम्। पौरुषेयात्। न। दैवात्।

स्तौमि। द्यावापृथिवी इति। नाथितः। जोहवीमि। ते इति। नः। मुञ्चतम्। अंहसः ॥ ७ ॥

यद् इदम् पापं तत्फलं दुःखं वा मा माम् [अभिशोचति] अभितः सर्वतो दहति। येनयेन वा पापेन निमित्तभूतेन पुनरन्यत् पापं कृतम्। येनयेनेत्युक्तम् अर्थं विवृणोति पौरुषेयान्नेति। नशब्द उपमार्थः। पौरुषेयात् पुरुषप्रेरितात् पापादिव दैवात् देवकृतान्निमित्तात् यत् पापं दुःखं वा उत्पन्नं माम् अभिशोचतीति संबन्धः। ⌛पौरुषेयात् इति। "पुरुषाद् वधविकार०" इति ढञ् प्रत्ययः। दैवात् इति। "देवाद् यञञौ" इति अञ्⌛। तस्य सर्वस्य पापस्य तत्फलभूतदुःखस्य च

---

१ P P² J K V C^P शङ्कुऽवंति.

---

1 S′ Kd omit न°. 2 S′ Kd देवस्यय° for देवाद्य°.

अपनोदनार्थं द्यावापृथिवी द्यावापृथिव्यौ स्तौमि प्रशंसामि ॥ नाथित इत्यादि व्याख्यातम् ॥

[इति] प्रथमं सूक्तम् ॥

"मरुतां मन्वे" इति सूक्तस्य पूर्ववद् गणप्रयुक्तो विनियोगः ॥

"मारुद्गणीं बलकामस्य" इति [न०क०१७] विहितायां शान्तौ "मरुताम्" इत्येतत् सूक्तम् आवपनीयम् । तद् उक्तं नक्षत्रकल्पे । "म- "रुतां मन्वे[४.२७] प्रजापते न त्वद् एतान्यन्यः[७.८५.३] इति मा- "रुद्गणस्याम्" इति [न०क०१८] ॥

अत्र "तिग्मम् अनीकम्"[७] इत्यनया साकमेधपर्वणि गृहमेधयागम् अनुमन्त्रयेत । उक्तं वैताने । "सायं गृहमेधिनां तिग्मम् अनीकम्" इति [वै०२.५] ॥

तत्र प्रथमा ॥

मरुतां मन्वे अधि मे ब्रुवन्तु प्रेमं वाजं वाजसाते अवन्तु ।
आशूनिव सुयमानह्व ऊतये ते नो मुञ्चन्त्वंहसः ॥ १ ॥
मरुताम्। मन्वे। अधि। मे। ब्रुवन्तु। प्र। इमम्। वाजम्। वाजऽसाते। अवन्तु।
आशून्ऽइव। सुऽयमान्। अह्वे। ऊतये। ते। नः। मुञ्चन्तु। अंहसः ॥ १ ॥

मरुताम् एकोनपंचाशत्संख्याकानां गणदेवानां मन्वे माहात्म्यं जानामि । ते मरुतो मे मह्यम् अधि ब्रुवन्तु अस्मदीयोयम् अनुग्राह्य इति पक्षपातेन वदन्तु ॥ तथा वाजसाते वाजस्य अन्नस्य साते लाभे निमित्तभूते सति इमं वाजम् अन्नं प्रावन्तु प्रकर्षेण अस्मदर्थं रक्षन्तु । यद्वा वाज इति बलनाम । वाजम् इमम् आत्मीयं बलं वाजसाते । वाजसातिरिति संग्रामनाम । "अयं[1] वाजं जयतु वाजसातौ" इति हि निगमः [तै०सं०१.३.४.१; तै०ब्रा०२.४.६.१२] । वाजसातशब्देनापि सोर्थोभिधीयते । वाजसाते संग्रामे प्रावन्तु प्ररक्षन्तु । अहम् अंशूनिव

१ B omits अ°. २ K V अंशूनिव with Sâyaṇa. We with A B B^{p} B^{h} D K^{m} R S^{m} P P^{3} J V.

1 S'Kd इंद्रं for अयं.

सुयमान्। अंशवः अश्वग्रग्रहा रज्जवः। तानिव सुयमान् सुष्ठु यन्तव्यान् सेव्यान् मरुतः अहम् ऊतये रक्षायै अह्वे आह्वयामि। यद्वा अंशुशब्देन तत्संबन्धिनः अश्वा विवक्षिताः। सुशिक्षितान् अश्वानिव सुयमान्। भक्तपराधीनतया वशवर्तिन इत्यर्थः। ✕ अह्व इति। "छन्दसि लुङ्लङ्लिटः" इति लुङ्। "लिपिसिचिह्वश्च" इति च्लेः अङ् आदेशः ✕। ते मरुतो नः अस्मान् अंहसः पापाद् मुञ्चन्तु ॥

द्वितीया ॥

उत्समक्षितं व्यचन्ति ये सदा य आसिञ्चन्ति रसमोषधीषु।
पुरो दधे मरुतः पृश्निमातृंस्ते नो मुञ्चन्त्वंहसः ॥ २ ॥

उत्समम्। अक्षितम्। विऽअचन्ति। ये। सदा। ये। आऽसिञ्चन्ति। रसम्। ओषधीषु।

पुरः। दधे। मरुतः। पृश्निऽमातॄन्। ते। नः। मुञ्चन्तु। अंहसः ॥ २ ॥

ये मरुतः सदा सर्वदा। ✕ "सर्वस्य सोन्यतरस्यां दि" इति सभावः ✕। उत्सम् वर्षधारायुक्तं मेघम् अक्षितम् क्षयरहितम्। ✕ "०अण्यदर्थे" इति पर्युदस्तत्वात् क्षियो दीर्घाभावः ✕। मेघं व्यचन्ति अन्तरिक्षे विस्तारयन्ति। तदनन्तरं ये मरुतः ओषधीषु व्रीहियवाद्यासु तरुगुल्मादिषु च रसम् वृष्ट्युदकलक्षणम् आसिञ्चन्ति आ समन्तात् क्षारयन्ति। ✕ षिच क्षरणे। "शे मुचादीनाम्" इति नुम् ✕। तान् मरुतः पृश्निमातॄन्। पृश्निर्माध्यमिका वाक् माता जननी येषां ते पृश्निमातरः। ✕ "ऋतश्छन्दसि" इति कपः प्रतिषेधः ✕। "पृश्नियै वै पयसो मरुतो जाताः" [तै० सं० २. २. ११. ४] इति हि तैत्तिरीयकम्। तथाविधान् मरुतः पुरो दधे पुरस्ताद् धारयामि। भजामीत्यर्थः ॥ गतम् अन्यत् ॥

तृतीया ॥

पयो धेनूनां रसमोषधीनां जवमर्वतां कवयो य इन्वथ।

---

१ So P P[2] J K.

शं॒ग्मा भ॑वन्तु म॒रुतो॑ नः स्यो॒नास्ते नो॑ मुञ्च॒न्त्वंह॑सः ॥ ३ ॥

पयः॑ । धे॒नूना॑म् । रस॑म् । ओष॑धीनाम् । ज॒वम् । अर्व॑ताम् । क॒व॒यः॑ । ये ।
इन्व॑थ ।

शं॒ग्माः॑ । भ॒व॒न्तु॒ । म॒रुतः॑ । नः॒ । स्यो॒नाः॒ । ते । नः॒ । मु॒ञ्च॒न्तु॒ । अंह॑सः ॥ ३ ॥

हे मरुतः ये यूयं कवयः क्रान्तदर्शनाः सन्तः धेनूनाम् गवां पयः क्षीरम् इन्वथ सर्वाङ्गेषु व्यापयथ । इवि व्याप्तौ । इदित्वान्नुम् । ओषधीनां रसम् द्रवं सर्वावयवेषु व्यापयथ । अर्वताम् अश्वानां जवम् वेगं [ये] व्यापयथ । शक्माः शक्तारः सर्वकार्यसमर्थास्ते मरुतः नः अस्माकं स्योनाः सुखकरा भवन्तु ॥

चतुर्थी ॥

अ॒पः स॑मु॒द्राद् दि॒व॒मुद् व॑हन्ति दि॒वस्पृ॑थि॒वीम॒भि ये सृ॒जन्ति॑ ।
ये अ॒ङ्गिरी॑शा॒ना म॒रुत॒श्चर॑न्ति॒ ते नो॑ मुञ्च॒न्त्वंह॑सः ॥ ४ ॥

अ॒पः । स॒मु॒द्रात् । दि॒व॑म् । उत् । व॒ह॒न्ति॒ । दि॒वः । पृ॒थि॒वीम् । अ॒भि । ये ।
सृ॒जन्ति॑ ।
ये । अ॒त्ऽअ॒भिः । ईशा॑नाः । म॒रुतः॑ । चर॑न्ति । ते । नः॒ । मु॒ञ्च॒न्तु॒ । अंह॑सः ॥४॥

ये मरुतः समुद्रात् उदधेः सकाशाद् अपः उदकानि दिवम् अन्तरिक्षं प्रति उद्वहन्ति मेघैः प्रापयन्ति । तदनन्तरं दिवः अन्तरिक्षात् पृथिवीम् अभिलक्ष्य ता अपः सृजन्ति विसृजन्ति । ताभिरङ्गिः ईशानाः ईश्वराः सन्तो ये मरुतः इत्थं चरन्ति ॥ ते मरुत इत्यादि गतम् । अङ्गिरिति । "अपो भि" इति पकारस्य तकारः ॥

पञ्चमी ॥

ये की॒लाले॑न त॒र्पय॑न्ति॒ ये घृ॒तेन॒ ये वा॒ वयो॒ मेद॑सा संसृ॒जन्ति॑ ।
ये अ॒ङ्गिरी॑शा॒ना म॒रुतो॑ व॒र्षय॑न्ति॒ ते नो॑ मुञ्च॒न्त्वंह॑सः ॥ ५ ॥

---

१ So all our authorities except **V** who, while recognising **शग्मा** as a variant, recites **शक्मा** with Sâyaṇa.

ये। कीलालेन। तर्पयन्ति। ये। घृतेन। ये। वा। वयः। मेदसा। सम्ऽसृजन्ति।

ये। अत्ऽभिः। ईशानाः। मरुतः। वर्षयन्ति। ते। नः। मुञ्चन्तु। अंहसः॥५॥

ये मरुतः कीलालेन अन्नेन वृष्टिद्वारा जनांस्तर्पयन्ति ये च घृतेन उदकेन तर्पयन्ति। ये वा। वाशब्दः चार्थे। ये च मरुतः वयः पक्षिजातं मेदसा तुरीयधातुना संसृजन्ति। मेदस्वि कुर्वन्तीत्यर्थः। यद्वा वयः शरीरपरिणामविशेषः। तत् मेदसा युक्तं कुर्वन्ति। क्षितिपवनसलिलतेजःकारणकात् परिणामविशेषाद्धि पुरुषशरीरस्य मेदस्वित्वं जायते। अतो मरुतां तद्धेतुत्वम्। ये च मरुतः अद्भिः उदकैः मेघस्थैः ईशानाः सन्तो वर्षयन्ति सर्वतो वृष्टिं कुर्वन्ति॥ तेनेत्यादि पूर्ववत्॥

षष्ठी॥

यदीदिदं मरुतो मारुतेन यदि देवा दैव्येनेदृगारं।
यूयमीशिध्वे वसवस्तस्य निष्कृतेस्ते नो मुञ्चन्त्वंहसः॥ ६॥

यदि। इत्। इदम्। मरुतः। मारुतेन। यदि। देवाः। दैव्येन। ईदृक्। आरं। यूयम्। ईशिध्वे। वसवः। तस्य। निःऽकृतेः। ते। नः। मुञ्चन्तु। अंहसः॥ ६॥

इदम् अनुभूयमानं मदीयं दुःखं तद्धेतुभूतं पापं वा हे मरुतः मारुतेन। इच्छब्दः अवधारणे। मरुद्विषयेणैवापराधेन ईदृक् एवंरूपं यदि आर प्राप। हे देवाः इन्द्रादयः दैव्येन देवसंबन्धिना अपराधेन [यदि] एवंरूपं दुःखम् अस्मान् प्राप। ऋ[आर]। ऋ गतौ। अस्मात् लिट्। ईदृक् इति। इदमिव पश्यति "त्यदादिषु दृशोनालोचने कञ् च" इति दृशेः क्विन् प्रत्ययः। "इदंकिमोरीश् की" इति इदम ईश् आदेशः। तस्य दुःखस्य तद्धेतोः पाप्मनो वा निष्कृतेः निष्करणस्य परिहारस्य हे वसवः वासयितारो मरुतः यूयम् ईशिध्वे[1] ईश्वरा भवथ। ईशेर्लेटि अडागमः॥ गतम् अन्यत्॥

---

१ K V °शध्वे with Sâyaṇa. We with A B B^{P} B^{h} D K^{m} R S^{m} P P^{2} J V Cs.

सप्तमी ॥

तिग्ममनीकं विदितं सहस्वन्मारुतं शर्धः पृतनासूग्रम् ।
स्तौमि मरुतो नाधितो जोहवीमि ते नो मुञ्चन्त्वंहसः ॥ ७ ॥

तिग्मम् । अनीकम् । विदितम् । सहस्वत् । मारुतम् । शर्धः । पृतनासु ।
उग्रम् ।
स्तौमि । मरुतः । नाधितः । जोहवीमि । ते । नः । मुञ्चन्तु । अंहसः ॥ ७ ॥

तिग्मम् तीक्ष्णम् अनीकम् सप्तगणात्मना समूहीभूतं विदितम् प्रख्यातं सहस्वत् बलवत् अभिभवनयुक्तं वा मारुतम् मरुतां संबन्धि शर्धः बलं पृतनासु संग्रामेषु उग्रम् उद्गूर्णं दुःसहं भवति । तान् मरुतः स्तौमि प्रशंसामि ॥ नाधितो जोहवीमीत्यादि व्याख्यातम् ॥

[इति] द्वितीयं सूक्तम् ।

"भवाशर्वौ मन्वे वाम" इति सूक्तस्य गणविनियोग उक्तः ॥

तथा सर्वव्याधिभैषज्यकर्मणि च उदकपूर्णान् सप्त[1] काम्पीलपुटान् प्रत्यृचं संपात्य अभिमन्त्र्य व्याधितम् अवसिञ्चेत् । तद् उक्तं कौशिकेन । "भ-
"वाशर्वाविति सप्त काम्पीलपुटान् अपां पूर्णान् संपातवतः कृत्वा दक्षिणेन
"अवसिच्य पश्चाद् अपविध्यति[2]" इति [४.४] ॥

तत्र प्रथमा ॥

भवाशर्वौ मन्वे वां तस्य वित्तं ययोर्वामिदं प्रदिशि यद् विरोचते ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥ १ ॥

भवाशर्वौ । मन्वे । वाम् । तस्य । वित्तम् । ययोः । वाम् । इदम् । प्रऽदिशि । यत् । विऽरोचते ।
यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥ १ ॥

---

१ P अस्य. We with P J K C_P.

---

1 S′ Kd सकांपील°. 2 S′ Kd उपविध्यति. We with *Kaus'ika*.

भवति उत्पद्यते अस्मात् सर्वं जगद् इति भवः। शृणाति हिनस्ति सर्वम् अन्तकाले इति शर्वः। भवश्च शर्वश्च भवाशर्वौ अष्टमूर्तीनां मध्ये परमेश्वरस्य द्वे मूर्ती "भवाय देवाय स्वाहा शर्वाय देवाय स्वाहा" इति श्रुत्यन्तरप्रसिद्धे। ‡"देवताद्वन्द्वे च" इति आनङ्‡। हे भवाशर्वौ वाम् युवयोर्महत्त्वम् अहं मन्वे[2] जानामि॥ तस्य वित्तम्। ‡कर्मणि षष्ठी‡। तद् वक्ष्यमाणं जानीतम्। ययोर्वाम् युवयोः प्रदिशि प्रदेशने प्रशासने यद् इदं कृत्स्नं जगद् विरोचते प्रकाशते तद् वित्तम् इत्यन्वयः। ‡रुच दीप्तौ‡। अस्य च द्विपदः पादद्वयोपेतस्य प्राणिजातस्य यौ युवाम् ईशाथे ईश्वरौ भवथः। ‡ईश ऐश्वर्ये‡। यौ च युवां चतुष्पदः पादचतुष्टयोपेतस्य गवादेः ईशाथे। ‡"अधीगर्थदयेशां कर्मणि" इति कर्मणि षष्ठी। द्वौ पादावस्य चत्वारः पादा अस्येति बहुव्रीहौ "संख्यासुपूर्वस्य" इति पादशब्दस्यान्त्यलोपः। "पादः पत्" इति पद्भावः‡। तौ भवाशर्वौ नः अस्मान् अंहसः पापाद् मुञ्चतम्॥

द्वितीया॥

ययोरभ्यध्व उत यद् दूरे चिद् यौ विदितावसिष्ठौ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः॥ २॥

ययोः। अभिऽअध्वे। उत। यत्। दूरे। चित्। यौ। विदितौ। इषुऽभृतां। असिष्ठौ।
यौ। अस्य। ईशाथे इति। द्विऽपदः। यौ। चतुःऽपदः। तौ। नः। मुञ्चतम्। अंहसः॥ २॥

ययोः भवाशर्वयोः अभ्यध्वे। ‡अभि अध्वनः अभ्यध्वः। "उपसर्गाद् अध्वनः" इति अच् समासान्तः‡। समीपदेशे। उतश-

---

१ K V °वसिष्ठौ with Sâyaṇa. We with A B B^{p} B^{h} D K^{m} R S^{m} P P^{2} J C^{s}. २ K इषुऽभृतौ. We with P P^{2} J C^{p}. ३ P अस्य. We with P^{1} J K C^{p}.

---

1 S′ Kd सर्व for सर्व. 2 S′ Kd मन्ये.

व्दः अप्यर्थे । दूरेपि च यत् किंचिद् अस्ति तयोः प्रशासनस्य तत् सर्वं विषय एवेत्यर्थः । यौ भवाशर्वौ विदितौ सर्वैः प्रज्ञातौ इषुभृतौ* इषोर्बाणस्य धनुषि आरोपितस्य भर्तारौ । असिष्ठौ अस्तृतमौ क्षेप्तृतमौ । ॥ अस्तृशब्दात् "तुश्छन्दसि" इति इष्ठन् । "तुरिष्ठेमेयस्सु" इति तृलोपः ॥ । यावस्येशाथे इत्यादि पूर्ववत् ॥

तृतीया ॥

सहस्राक्षौ वृत्रहणा हुवेहं दूरेगव्यूती स्तुवनेम्युग्रौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥ ३ ॥

सहस्रऽअक्षौ । वृत्रऽहनौ । हुवे । अहम् । दूरेगव्यूती इति दूरेऽगव्यूती ।
स्तुवन्* । एमि* । उग्रौ ।
यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥ ३ ॥

सहस्राक्षौ सहस्रसंख्याकानि[1] अक्षीणि चक्षूंषि ययोः तौ सहस्राक्षौ सर्वतो दत्तदृष्टी । दूरसूक्ष्मादिविषयेष्वपि अप्रतिहतदर्शनावित्यर्थः । ॥ "बहुव्रीहौ सक्थ्यक्ष्णोः०" इति षच् समासान्तः ॥ । वृत्रहणा वृत्रहणौ वृत्रम् असुरं हतवन्तौ दूरेगव्यूती । गावो यूयन्ते मिश्रीभवन्ति संचरन्त्यस्मिन्निति गव्यूतिः गोसंचारभूमिः । सा दूरे विप्रकृष्टे ययोस्तौ दूरेगव्यूती । गोसंचारदेशाद् दूरदेशे वर्तमानावित्यर्थः । ॥ "ऊतियूति०" इत्यादिना अधिकरणे क्तिन्नन्तो यूतिशब्दः । "गोर्यूतौ छन्दसि" इति अव् आदेशः ॥ । ईदृशौ भवाशर्वौ अहं हुवे आह्वयामि । कीदृशोहम् । उग्रौ उद्गूर्णौ तीक्ष्णौ तावेव स्तुवन् प्रशंसन् नेमी* । ॥ त्वो नेम इत्यर्धस्य इति यास्कः [नि० ३.२०] ॥ । नेमः अर्धं[3] बलम्

---

१ P P̊ J Cp स्तुवन् । नेमि । K स्तुवत् । नेमि । Sâyaṇa स्तुवन् । नेमी ।. We in accordance with the accent of the Saṁhitâ स्तुवन्नेम्युग्रौ which is given by A B Bp Bʰ D K Kᵐ R Sᵐ V Cs.

1 S′ Kd °संख्यानि. 2 S′ Kd ईदृशो°. 3 S′ Kd अर्धवल° for अर्ध वल°.

अस्यास्तीति नेमी । असंपूर्णबल इत्यर्थः । यद्वा स्तुवन्नेमीति समुदायस्तयोरेव विशेषणम् । नेमिशब्दो रथावयववाची । तेन च तद्वान् लक्ष्यते । ॥ स्तुवन्निति कर्मणि कर्तृप्रत्ययः ॥ । प्रशस्तरथावित्यर्थः ॥ अन्यत् पूर्ववत् ॥

चतुर्थी ॥

यावारेभाथे बहु साकमग्रे प्र चेदस्राष्ट्रमभिभां जनेषु ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥ ४ ॥

यौ । आरेभाथे इत्याऽरेभाथे । बहु । साकम् । अग्रे । प्र । च । इत् । अस्राष्ट्रम् । अभिऽभाम् । जनेषु ।
यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥ ४ ॥

हे भवाश्वौ अग्रे सृष्ट्यादौ यौ युवां बहुसाकम् बहूनां प्राणिनां साकं सहभावो यस्मिन् तद् बहुसाकम् जनसंघम् आरेभाथे आरब्धवन्तौ निर्मितवन्तौ । तेषु उत्पन्नेषु जनेषु । इच्छब्दः अवधारणे । अभिभाम् अभिदीप्तिं शत्वादिलक्षणां तत्तत्पापानुसारेण युवामेव च प्रास्राष्टम् प्रकर्षेण सृष्टवन्तौ उत्पादितवन्तौ । "मा नो विदद् अभिभा मो अशस्तिः" [१.२०.१] इति परिहरणीयत्वश्रवणाद् अभिभाशब्दवाच्यस्य अनभिमतरूपतोक्ता । ॥ अस्राष्टम् इति । सृज विसर्गे । अस्मात् लुङि तसस्तम् । "सृजिदृशोर्झल्यम् अकिति" इति अम् आगमः । "वदव्रजहलन्तस्य०" इति वृद्धिः । सिज्लोपे "व्रश्च०" इत्यादिना षत्वे ष्टुत्वम् ॥ ॥ यावस्येशाथे इत्यादि पूर्ववत् ॥

पञ्चमी ॥

ययोर्वधान्नापपद्यते कश्चनान्तर्देवेषूत मानुषेषु ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥ ५ ॥

१ Such is the reading of all our MSS. and Vaidikas.

1 So S' Kd. 2 S' Kd स्वरादि° for शत्वादि°.

यथोः । वधात् । न । अपऽपद्यते । कः । चन । अन्तः । देवेषु । उत । मानुषेषु ।
यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥ ५ ॥

यथोः भवाशर्वयोः वधात् । "हनश्च वधः" इति करणे अप् प्रत्ययो वधादेशश्च । हननसाधनाद् आयुधाद् देवेषु अन्तः मध्ये उत मानुषेषु मनुष्येषु च मध्ये कश्चन कोपि नापपद्यते अपवर्जनं न प्राप्नोति अपि तु तद्विषय एव भवति ॥ यावस्येशाथे इत्यादि गतम् ॥

षष्ठी ॥

यः कृत्याकृन्मूलकृद् यातुधानो नि तस्मिन् धत्तं वज्रमुग्रौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥ ६ ॥

यः । कृत्याऽकृत् । मूलऽकृत् । यातुऽधानः । नि । तस्मिन् । धत्तम् । वज्रम् । उग्रौ ।
यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥ ६ ॥

यः शत्रुः कृत्याकृत् कृत्यया क्रियानिर्वृत्तया पिशाच्या कृन्तति छिनत्तीति कृत्याकृत् । यश्च यातुधानः राक्षसः मूलकृत् वंशाभिवृद्धेर्मूलं निदानम् अपत्यं कृन्तति छिनत्तीति मूलकृत् । तस्मिन्नुभयविधे शत्रौ हे उग्रौ उद्गूर्णबलौ भवाशर्वौ वज्रम् वर्जकम् आयुधं नि धत्तम् निक्षिपतम् । विध्यतम् इत्यर्थः ॥ अन्यत् पूर्ववत् ॥

सप्तमी ॥

अधि नो ब्रूतं पृतनासूग्रौ सं वज्रेण सृजतं यः किमीदी ।
स्तौमि भवाशर्वौ नाथितो जोहवीमि तौ नो मुञ्चतमंहसः ॥ ७ ॥

अधि । नः । ब्रूतम् । पृतनासु । उग्रौ । सम् । वज्रेण । सृजतम् । यः । किमीदी ।

---

१ P अस्य. We with $\overset{2}{P}$ J K C_P. २ B B_P $\overset{h}{B}$ D $\overset{m}{K}$ $\overset{m}{S}$ C_S C_P धत्तां. We with A R P $\overset{2}{P}$ J V.

स्तौमि। भवाशर्वौ। नाथितः। जोहवीमि। नौ। नः। मुञ्चतम्। अंहसः॥७॥

हे उग्रौ अत्यगुणयुक्तौ दुष्प्रधर्षौ भवाशर्वौ नः अस्मभ्यम् अधि ब्रूतम् श्रेयोविषये पक्षपातेन वदतम्। पृतनासु संग्रामेषु वज्रेण आयुधेन अस्मदीयान् शत्रून् सं सृजतम् संयोजयतम्। यश्च किमीदी किम् इदानीम् उत्पन्नं किम् इदानीम् उत्पन्नम् इति रन्ध्रान्वेषी हिंसको राक्षसादिः तमपि आयुधेन संयोजयतम्। एवंमहानुभावौ भवाशर्वौ अहं स्तौमि॥ गतम् अन्यत्॥

[इति] तृतीयं सूक्तम्॥

"मन्वे वां मित्रावरुणौ" इति सूक्तस्य उक्तो विनियोगः। "मित्रावरुणाभ्याम् आगोमुग्भ्यां पयस्या" इति [तै०सं०७.५.२२.१] विहितस्य मृगारहविषो मित्रावरुणौ देवते। तयोः स्तावकम् एतत् सूक्तम्॥

तत्र प्रथमा॥

मन्वे वां मित्रावरुणावृतावृधौ सचेतसौ द्रुह्वणो यौ नुदेथे।
प्र सत्यावानमवथो भरेषु तौ नो मुञ्चतमंहसः॥ १॥

मन्वे। वाम्। मित्रावरुणौ। ऋतऽवृधौ। सऽचेतसौ। द्रुह्वणः। यौ। नुदेथे इति।

प्र। सत्यऽवानम्। अवथः। भरेषु। तौ। नः। मुञ्चतम्। अंहसः॥ १॥

हे ऋतावृधा* ऋतस्य सत्यस्य उदकस्य यज्ञस्य वा वर्धयितारौ सचेतसौ समानज्ञानौ ईदृशौ हे मित्रावरुणा* मित्रावरुणौ। मित्रश्च वरुणश्च मित्रावरुणौ। "आनङ् ऋतो द्वन्द्वे" [देवताद्वन्द्वे च] इति पूर्वपदस्य आनङ्। "सुपां सुलुक्०" इति पूर्वसवर्णदीर्घः। वाम् युवयोर्महत्त्वं मन्वे स्तौमि। यौ युवां द्रुह्वणः द्रोग्धॄन् नुदेथे प्रेरयेथे स्थानात् प्रच्यावयथः। नुद प्रेरणे। अपि च सत्यावानम् सत्ययुक्तम्। "छन्दसीवनिपौ" इति मत्वर्थीयो वनिप्। सत्यप्रतिज्ञं पुरुषं भरेषु[1] संग्रामेषु प्रावथः प्रकर्षेण रक्षथः। तौ युवां नः अस्मान् अंहसः पापाद् मुञ्चतम्॥

1 S' Kd भवेषु. Sâyaṇa's text too has भवेषु. But it reads भरेषु in the following *rich*.

द्वितीया ॥

सचेतसौ दुह्वणो यौ नुदेथे प्र सत्यावानमवथो भरेषु ।
यौ गच्छथो नृचक्षसौ बभ्रुणा सुतं तौ नो मुञ्चतमंहसः ॥ २ ॥

सऽचेतसौ । दुह्वणः । यौ । नुदेथे इति । प्र । सत्यऽवानम् । अवथः । भरेषु ।
यौ । गच्छथः । नृऽचक्षसौ । बभ्रुणा । सुतम् । तौ । नः । मुञ्चतम् । अंहसः ॥ २ ॥

सचेतसौ समानज्ञानौ एकार्थकारिणौ हे मित्रावरुणौ यौ युवां दुह्वणः द्रोग्धॄन् नुदेथे सत्यवन्तं च भरेषु संग्रामेषु प्रावथः प्ररक्षथः । नृचक्षसौ नृणां संचष्टारौ सम्यग् द्रष्टारौ । अहोरात्राभिमानिनौ हि मित्रावरुणौ तत्र क्रियमाणस्य मानुषव्यापारस्य सर्वस्यापि साक्षिणावित्यर्थः । ईदृशौ यौ मित्रावरुणौ बभ्रुणा बभ्रुवर्णेन पीतवर्णेन रथादियानेन सुतम् अभिषुतं सोमं गच्छतः[*] प्राप्नुतः । नृचक्षसाविति । चक्षेरसुनि "असनयोश्च" इति ख्याजादेशाभावः ॥ तौ न इत्यादि गतम ॥

तृतीया ॥

यावङ्गिरसमवथो यावगस्तिं मित्रावरुणा जमदग्निमत्तिम् ।
यौ कश्यपमवथो यौ वसिष्ठं तौ नो मुञ्चतमंहसः ॥ ३ ॥

यौ । अङ्गिरसम् । अवथः । यौ । अगस्तिम् । मित्रावरुणा । जमत्ऽअग्निम् ।
अत्तिम् ।
यौ । कश्यपम् । अवथः । यौ । वसिष्ठम् । तौ । नः । मुञ्चतम् । अंहसः ॥ ३ ॥

अङ्गारेभ्यो जातो महर्षिरङ्गिराः । "येङ्गारा आसंस्तेङ्गिरसोभवन्" इति हि ब्राह्मणम् [ऐ० ब्रा० ३. ३४] । एतत्संज्ञं महर्षिं हे मित्रावरुणौ यौ युवाम् अवथः रक्षथः । यौ च युवाम् अगस्त्यम् कुम्भसंभवम् आत्मीयं पुत्रं रक्षथः । उक्तं हि । "मित्रावरुणयोर्दीक्षितयोरुर्वशीम् अप्सरसं दृष्ट्वा वासतीवरे कुम्भे रेतोपतत् । ततोगस्त्यवसिष्ठावजायेताम्" [स० अ० १२] इति । तथा जमदग्निम् जमन्तः ज्वलन्तः अग्नयो यस्य स तथोक्तः । ए-

---

१ Such is the reading of all our authorities except **K** who recites गच्छतो with Sâyaṇa. २ **K V** यावगस्त्यं. We with **A B** B^{p} $\overset{h}{B}$ **D** $\overset{m}{K}$ **R** $\overset{m}{S}$ **P** $\overset{2}{P}$ **J V** C^{s} C^{p}. ३ **K** अगस्त्यम्.

तत्संज्ञं महर्षिम् । अत्त्रिम् मातृपित्रात्मसंबन्धिनस्त्रिविधा दोषा न सन्ति अस्मिन्निति अत्रिः । तस्माद् अत्रिर्न त्रय इति हि निरुक्तम् [नि० ३. १७] । एतत्संज्ञं महर्षिम् अवथः । यौ च युवां कश्यपम् दूरसूक्ष्मादि-भेदभिन्नस्यापि कृत्स्नस्य जगतो द्रष्टारम् । "कश्यपः पश्यको भवति । यत् सर्वं परिपश्यतीति सौक्ष्म्यात्" इति हि तैत्तिरीयकम् [तै० आ० १. ८. ८] । कश्यपाख्यं महर्षिम् अवथः रक्षथः । यौ च वसिष्ठम् वसुमत्तमम् । वसुमच्छब्दाद् इष्ठनि "विन्मतोर्लुक्" । "टेः" इति टिलोपः । सर्वश्रेष्ठं वसिष्ठाख्यं महर्षिं रक्षथः ॥ तौ न इत्यादि गतम् ॥

चतुर्थी ॥

यौ श्यावाश्वमवथो वध्यश्वं मित्रावरुणा पुरुमीढमत्त्रिम् ।
यौ विमदमवथः सप्तवध्रिं तौ नो मुञ्चतमंहसः ॥ ४ ॥

यौ । श्यावऽअश्वम् । अवथः । वध्रिऽअश्वम् । मित्रावरुणा । पुरुऽमीढम् । अत्त्रिम् ।
यौ । विऽमदम् । अवथः । सप्तऽवध्रिम् । तौ । नः । मुञ्चतम् । अंहसः ॥ ४ ॥

श्यावाः कपिशा अश्वा यस्य श्यावाश्वः । एतत्संज्ञम् ऋषिम् हे [मित्रावरुणा] मित्रावरुणौ यौ युवाम् अवथः रक्षथः । वध्यश्वम् । वध्रयः[1] पण्डा अश्वा यस्य स वध्यश्वः । तं च रक्षथः । तथा पुरुमीढम् । मीढम् इति धननाम । पुरूणि मीढानि धनानि यस्य स तथोक्तः एतत्संज्ञं महर्षिं रक्षथः । अत्त्रिम् इति पुनर्वचनम् आदरार्थम् । यद्वा उक्तनिरुक्त्या पुरुमीढस्यैव विशेषणम् । अथ वा त्रिविधा ह्यात्रेयाः । यद् आह आपस्तम्बः । "आत्रेयाय प्रथमाय हिरण्यं ददाति । द्वितीयाय तृतीयाय वा" [आप० १३. ६. १२] इति । तद्भेदाभिप्रायम् एतत् पुनरभिधानम् । यौ युवां विमदम् एतत्संज्ञम् ऋषिं सप्तवध्रिम् । सप्त वध्रयः अश्वा यस्येति सप्तवध्रिः । एतत्संज्ञं च अवथः रक्षथः ॥ तौ न इत्यादि गतम् ॥

---

1 S' Kd वध्रयोपंडा.

पञ्चमी ॥

यौ भरद्वाजमवथो यौ गविष्ठिरं विश्वामित्रं वरुण मित्र कुत्सम् ।
यौ कक्षीवन्तमवथः प्रोत कण्वं तौ नो मुञ्चतमंहसः ॥ ५ ॥

यौ । भरतऽवाजम् । अवथः । यौ । गविष्ठिरम् । विश्वामित्रम् । वरुण । मित्र । कुत्सम् ।
यौ । कक्षीवन्तम् । अवथः । प्र । उत । कण्वम् । तौ । नः । मुञ्चतम् । अंहसः ॥ ५ ॥

हे मित्र हे वरुण यौ युवां भरद्वाजम् । भरत् पोषकं वाजो हविर्लक्षणम् अन्नं यस्य स भरद्वाजो महर्षिः । तम् अवथः रक्षथः । यौ युवां गविष्ठिरम् गवि वाचि वेदात्मिकायां स्थिरो गविष्ठिरः । "गवियुधिभ्यां स्थिरः" इति षत्वम् । "तत्पुरुषे कृति बहुलम्" इति अलुक् । एतत्संज्ञं महर्षिं रक्षथः । विश्वामित्रम् विश्वं कृत्स्नं जगत् मित्रं यस्य स तथोक्तः । "मित्रे चर्षौ" इति पूर्वपदस्य दीर्घः । "बहुव्रीहौ विश्वं संज्ञायाम्" इति पूर्वपदान्तोदात्तत्वम् । तथा कुत्सं महर्षिं च रक्षथः । कक्षीवन्तम् । अश्वस्य कक्षयोर्भवा रज्जुः कक्ष्या । "शरीरावयवाच्च" इति यत् । कक्ष्या रज्जुरश्वस्य इति हि यास्कः [नि० २, २] । सास्मिन्नस्तीति कक्षीवान् नाम उशिजः पुत्र ऋषिः । "आसन्दीवद् अष्ठीवत् कक्षीवद्०" इति निपात्यते । "कक्षीवन्तं य औशिजः" [ऋ० १, १८, १] इति हि निगमान्तरम् । एतत्संज्ञं महर्षिं कण्वाख्यं च प्रावथः प्ररक्षथः ॥ गतम् अन्यत् ॥

षष्ठी ॥

यौ मेधातिथिमवथो यौ त्रिशोकं मित्रावरुणावुशनां काव्यं यौ ।
यौ गोतममवथः प्रोतमुद्दलं तौ नो मुञ्चतमंहसः ॥ ६ ॥

यौ । मेधऽअतिथिम् । अवथः । यौ । त्रिऽशोकम् । मित्रावरुणौ । उशनाम् । काव्यम् । यौ ।

---

१ So all our MSS. and Vaidikas, $\dot{\mathrm{P}}^{2}$ alone giving the *Rig* accent **गविष्ठिरम्**.

यौ । गोतमम् । अवथः । प्र । उत । मुद्गलम् । तौ । नः । मुञ्चतम् । अंहसः ॥ ६ ॥

हे मित्रावरुणौ यौ युवां मेधातिथिम् । मेधातिथिर्मेध्यातिथिः इति निरुक्तम् । मेध्या यज्ञार्हा अतिथयो यस्मिन् तं मेधातिथिसंज्ञम् ऋषिम् अवथः रक्षथः । यौ च युवां [त्रिशोकम्] त्रिशोकाख्यम् ऋषिं रक्षथः । काव्यम् कवेः पुत्रम् उशनाम् उशनसम् । छान्दसम् आत्वम् । एतत्संज्ञं महर्षिं यौ मित्रावरुणौ रक्षथः । तथा गोतमम् ऋषिम् उत मुद्गलम् मुद्गलाख्यं च प्रावथः प्ररक्षथः ॥ तौ न इत्यादि गतम् ॥

सप्तमी ॥

ययो रथः सत्यवर्त्मर्जुरश्मिर्मिथुया चरन्तमभियाति दूषयन् ।
स्तौमि मित्रावरुणौ नाथितो जोहवीमि तौ नो मुञ्चतमंहसः ॥ ७ ॥

ययोः । रथः । सत्यवर्त्मा । ऋजुरश्मिः । मिथुया । चरन्तम् । अभिया-
याति । दूषयन् ।
स्तौमि । मित्रावरुणौ । नाथितः । जोहवीमि । तौ । नः । मुञ्चतम् । अंहसः ॥ ७ ॥

ययोः मित्रावरुणयोः स्वभूतो रथः सत्यवर्त्मा सत्यम् अवितथं वर्त्म मार्गो यस्य स सत्यवर्त्मा ऋजुरश्मिः ऋजवः अकुटिला रश्मयः प्रग्रहा यस्य स ऋजुरश्मिः । एवंगुणविशिष्टो रथः मिथुया मिथ्या चरन्तम् अविहितमार्गेण वर्तमानं पुरुषं दूषयन् बाधमानः । दुष वैकृत्ये । अस्मात् ण्यन्तात् हेतौ शतृप्रत्ययः । "दोषो णौ" इति ऊत्वम् । दूषणाङ्हेतोः अभियाति अभिमुखं गच्छति । तौ मित्रावरुणौ स्तौमि प्रशंसामि । मित्रावरुणाविति । "देवताद्वन्द्वे च" इति उभयपदप्रकृतिस्वरत्वम् ॥ नाथित इत्यादि व्याख्यातम् ॥

[इति] चतुर्थं सूक्तम् ॥

---

1 So S' Kd. 2 S' Kd गौतम°. Sâyaṇa's text also has गौतमम्.

"अहं रुद्रेभिः" इति सूक्तेन जातकर्मणि शङ्खपुष्पिकागन्धपुष्पिके पिष्ट्वा अभिमन्त्र्य हिरण्यशकलेन प्राशयेत् ॥

तथा तत्रैव कर्मणि अनेन सूक्तेन शङ्खनाभिं पिप्पलीं च पिष्ट्वा अभिमन्त्र्य हिरण्यशकलेन प्राशयेत् ॥

तथा मेधाजननार्थं प्रथमं वाग्व्यवहारं कुर्वतः शिशोर्मातुरुत्सङ्गे विहितस्य अनेन सूक्तेन आज्यं हुत्वा तालुनि संपातान् आनयेत् ॥

तथा दधिमधुनी एकत्र कृत्वा अनेन संपात्य अभिमन्त्र्य शिशुं प्राशयेत् ॥

तथा उपनयनकर्मणि दण्डप्रदानानन्तरम् एतत् सूक्तं माणवकं वाचयेत् ॥

तथा आयुष्कामोपि शङ्खपुष्पगन्धपुष्पप्राशनादीन्युक्तानि पञ्च कर्माणि कुर्यात् ॥

तथा च कौशिकं सूत्रम् । "अहं रुद्रेभिरिति शुक्लपुष्पहरितपुष्पे किं-
"ख्यनाभिपिप्पल्यौ जातरूपशकलेन प्राक् स्तनग्रहात् प्राशयति । प्रथम-
"प्रवदस्य मातुरुपस्थे तालुनि संपातान् आनयति । दधिमध्वाशयति । उ-
"पनीतं वाचयति । वार्षशतिकं कर्म" इति [कौ०२.१] ॥

तथा उपनयने अनेन सूक्तेन आज्यहोमं कुर्यात् । सूत्रितं हि । "उपनयनम्" [कौ०७.६] प्रक्रम्य "मेधाजननंायुष्यैर्जुहुयात्" इति [कौ०७.८] ॥

तथा अध्यायोत्सर्जनकर्मणि अनेन सूक्तेन आज्यं हुत्वा रसेषु संपातान् आनयेत् । तथा च कौशिकः । "उत्सर्जनम्" प्रक्रम्य "विश्वे
"देवाः[१.३०] अहं रुद्रेभिः[४.३०] सिंहे व्याघ्रे[६.३८] यशो ह-
"विः[६.३९]" इत्यादि [कौ०१४.३] ॥

तत्र प्रथमा ॥

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥ १ ॥
अहम । रुद्रेभिः । वसुऽभिः । चरामि । अहम । आदित्यैः । उत । विश्वऽदेवैः ।
अहम । मित्रावरुणा । उभा । बिभर्मि । अहम । इन्द्राग्नी इति । अहम ।
अश्विना । उभा ॥ १ ॥

1 S' Kd repeat again all these words. 2 So S' Kd. *Kaus'ika*: °जनन आयु°.

सर्वजगत्कल्पनास्पदं सच्चित्सुखात्मकं परं ब्रह्म स्वात्मत्वेन विदुषी अम्भृणाख्यस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मवादिनी स्वात्मानं सर्वात्मभावेन तुष्टाव। तद् उक्तं दाशतय्यनुक्रमणिकायाम्। "अहम् अष्टौ। वाग् आम्भृणी तुष्टावात्मानम्" [स० अ० ६३] इति। विशुद्धसत्त्वपरिणामरूपस्य अन्तःकरणस्य वृत्तिविशेषः अभिमानात्मकोहंकारः। तदुपलक्षितानवच्छिन्नात्मिका अहं रुद्रेभिः रुद्रैः एकादशभिः अष्टभिर्वसुभिः। इत्थंभावे तृतीया। तत्तद्देवात्मना चरामि। एवम् अहम् आदित्यैः इत्यादावपि योज्यम्॥ आदित्या द्वादशसंख्याका धात्रादयः। वसुरुद्रादित्यव्यतिरिक्ता गणशो वर्तमानाः विश्वेदेवाख्याः। एकस्यैव हि ब्रह्मणः तत्तदुपाध्यवच्छेदेन वस्वादिदेवतारूपेण भेदावभासात्। वस्तुतस्तु ऐक्यमेवेति तदनुसंधाना ब्रह्मवादिनी एवं ब्रूते॥ तथा मित्रावरुणा। "सुपां सुलुक्" इति द्वितीयाया आकारः। मित्रावरुणौ देवौ उभा उभौ अहमेव परब्रह्मात्मिका बिभर्मि धारयामि। इन्द्राग्नी अपि अहमेव धारयामि। उभा उभौ अश्विनावपि अहमेव धारयामि। मत्स्वरूपे अद्वितीये ब्रह्मणि सर्वं जगत् शुक्तौ रजतमिव अध्यस्तं सत् दृश्यते। माया च जगदाकारेण विवर्तते। तदाधारत्वेन असङ्गस्यापि ब्रह्मणः उक्तस्य सर्वस्योपपत्तिः॥

द्वितीया॥

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्।
ता मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीः॥ २॥

अहम्। राष्ट्री। समऽगमनी। वसूनाम्। चिकितुषी। प्रथमा। यज्ञियानाम्। ताम्। मा। देवाः। वि। अदधुः। पुरुऽत्रा। भूरिऽस्थात्राम्। भूरि। आऽवेशयन्तीः॥ २॥

अद्वितीयब्रह्मात्मिका अहं राष्ट्री। ईश्वरनामैतत्। कृत्स्नस्य दृश्यप्रपञ्चस्य राज्ञी नियन्त्री। अत एव वसूनाम् धनानां संगमनी संगमयित्री उपासकानां फलस्य प्रापयित्री। चिकितुषी यत् साक्षात्कर्तव्यं परं ब्रह्म तत्

ज्ञातवती स्वात्मतया साक्षात्कृतवती । ॥ कित ज्ञाने इत्यस्मात् लिटः क्वसुः । तदन्तात् "उगितश्च" इति ङीप् ॥ । अत एव यज्ञियानाम् यज्ञार्हाणां देवानां प्रथमा मुख्या । ॥ "यज्ञर्त्विग्भ्यां घखञौ" इति अर्हार्थे घप्रत्ययः ॥ । ताम् तादृशीं मा मां भूरिस्थात्राम् बहुभावेन प्रपञ्चात्मना कृतावस्थानां भूरि बहुलं फलम् आवेशयन्तः उपासकान् प्रापयन्तो देवाः पुरुत्रा बहुषु स्थानेषु व्यदधुः विदधति कुर्वन्ति । ॥ "देवमनुष्यपुरुषपुरुमर्त्येभ्यः०" इति सप्तम्यर्थे त्राप्रत्ययः ॥ । उक्तप्रकारेण वैश्वरूप्येण अवस्थानाद् यद्यत् कुर्वन्ति देवास्तत् सर्वं मामेव कुर्वन्तीत्यर्थः ॥

तृतीया ॥

अहमेव स्वयमिदं वदामि जुष्टं देवानामुत मानुषाणाम् ।
यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥ ३ ॥

अहम् । एव । स्वयम् । इदम् । वदामि । जुष्टम् । देवानाम् । उत । मानुषाणाम् ।
यम् । कामये । तम्ऽतम् । उग्रम् । कृणोमि । तम् । ब्रह्माणम् । तम् । ऋषिम् । तम् । सुऽमेधाम् ॥ ३ ॥

अहं स्वयमेव आत्मनैव । [एवकारः] नान्योस्ति ममोपदेष्टेति अवधारणार्थः । इदम् आपरोक्ष्येण अनुभूयमानं ब्रह्मात्मकं वस्तु वदामि लोकहितार्थम् उपदिशामि । तद् विशेष्यते । देवानाम् इन्द्रादीनां जुष्टम् प्रियम् उत मानुषाणाम् मनुष्याणामपि प्रियं परानन्दरूपत्वात् । "एतस्यैवानन्दस्य अन्यानि भूतानि मात्राम् उपजीवन्ति" इति श्रुतेः [बृ० आ० ४. १. ३१] । यद्वा देवमनुष्यादिभिः सेवितम् इदं वक्ष्यमाणं मदीयं माहात्म्यम् अहमेव स्वयं वदामि । प्रकटयामीत्यर्थः । किं पुनस्तद् इत्याह । यम् इति । यं कामये । तंतम् इति प्रतिनिर्देश्यस्य वीप्सितत्वाद् अत्रापि वीप्सा द्रष्टव्या । यंयं पुरुषं रक्षितुम् अहं वाञ्छामि तंतं कृत्स्नं पुरुषम् उग्रं कृणोमि । सर्वेभ्योधिकं दुष्प्रधर्षं करोमि । यद्वा उग्रः ईश्वरः । जगन्नि-

1 S' Kd °र्देशस्य.

र्माणसमर्थम् ईश्वरं करोमि । तमेव ब्रह्माणम् स्रष्टारं करोमि । तथा तम् ऋषिम् अतीन्द्रियार्थदर्शिनं करोमि । तमेव सुमेधाम् शोभनप्रज्ञं च करोमि । एवं सर्वजगन्नियन्तृब्रह्मात्मकत्वं स्वात्मनि[1] आविष्कृतम् ॥

चतुर्थी ॥

मया सोऽन्नमत्ति यो विपश्यति यः प्राणति य ईं शृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धेयं ते वदामि ॥ ४ ॥

मया । सः । अन्नम् । अत्ति । यः । विऽपश्यति । यः । प्राणति । यः । ईम् । शृणोति । उक्तम् ।
अमन्तवः । माम् । ते । उप । क्षियन्ति । श्रुधि । श्रुत । श्रत्ऽधेयम् । ते । वदामि ॥ ४ ॥

यो भोक्तृजनः अन्नम् अत्ति स भोक्तृशक्तिरूपया मयैव अन्नम् अत्ति । यश्च जनो विपश्यति विविधं जगत् चक्षुषा साक्षात्करोति । यश्च प्राणिति[*] श्वासोच्छ्वासादिव्यापारं करोति । अन प्राणने । अदादित्वात् शपो लुक् । "रुदादिभ्यः सार्वधातुके" इति इडागमः । "अनितेः" इति णत्वम । ईम् इदम् उक्तम् स्वरूपं[2] यश्च पुरुषः शृणोति श्रोत्रेन्द्रियेण गृह्णाति ते सर्वेपि तत्तच्छक्त्यात्मना अवस्थितया मयैव तत्तद्व्यापारं कुर्वन्तीत्यर्थः । शृणोतीति । श्रु श्रवणे । "श्रुवः शृ च" इति श्नुप्रत्ययः धातोः शृभावश्च । ये ईदृशीम् अन्तर्यामिरूपेण स्थितां मां[3] न जानन्ति ते माम् अमन्तवः अमन्यमानाः अजानानाः मद्विषयज्ञानरहिताः उप क्षियन्ति उपक्षीणाः संसारेण निहीना भवन्ति । मनेरौणादिकस्तुप्रत्ययः । नञ्समासेन अन्तोदात्तत्वम् ॥ यद्वा भावे तुप्रत्ययः । ततो बहुव्रीहौ "नञ्सुभ्याम्" इति उत्तरपदान्तोदात्तत्वम । हे श्रुत विश्रुत हे सखे[4] श्रुधि मया उक्तं शृणु । छान्दसो विकरणस्य लुक् । "श्रुशृणुपृकृवृभ्यः०" इति हेर्धिभावः । अहं ते तुभ्यं श्रद्धेयम् श्रद्धातव्यम् । श्रद्धा भक्तिः ।

1 S' Kd स्वात्मन्. 2 S' Kd सरूपं. 3 S' Kd मां ये for मां. 4 S' Kd सुखे.

तया प्राप्यं परतत्त्वस्वरूपं वदामि उपदिशामि । ⁙ अङ्ग्येयम् इति । "अचो यत्" इति धात्वो यत् प्रत्ययः । "ईद्यति" इति ईकारः ⁙ ॥

पञ्चमी ॥

अ॒हं रु॒द्राय॒ धनु॒रा त॑नोमि ब्रह्म॒द्विषे॒ शर॑वे॒ हन्त॒वा उ॑ ।
अ॒हं जना॑य स॒मदं॑ कृणोम्य॒हं द्यावा॑पृथि॒वी आ वि॑वेश ॥ ५ ॥

अ॒हम् । रु॒द्राय॑ । धनुः॑ । आ । त॒नो॒मि॒ । ब्र॒ह्म॒ऽद्विषे॑ । शर॑वे । हन्त॒वै । ऊं॒ इति॑ । अ॒हम् । जना॑य । स॒ऽमद॑म् । कृ॒णो॒मि॒ । अ॒हम् । द्यावा॑पृथि॒वी इति॑ । आ । वि॒वे॒श॒ ॥ ५ ॥

पुरा त्रिपुरविजयसमये रुद्राय । ⁙ षष्ठ्यर्थे चतुर्थी ⁙ । रुद्रस्य महादेवस्य धनुः अहम् आ तनोमि आततज्यं करोमि । किमर्थम् । ब्रह्मद्विषे ब्राह्मणानां द्वेष्ट्रे शरवे । ⁙ शॄ हिंसायाम् शॄस्वृस्निहीत्यादिना [उ० १. १०] उप्रत्ययः ⁙ । हिंसकाय । ⁙ उभयत्र "क्रियाग्रहणं कर्तव्यम्" इति कर्मणः संप्रदानत्वात् [चतुर्थी] ⁙ । ब्रह्मद्विषं शरुं त्रिपुरनिवासिनम् असुरगणं हन्तवै हन्तुं हिंसितुम् । ⁙ हन्तेः "तुमर्थे सेसेन्०" इति तवैप्रत्ययः । "अन्तश्च तवै युगपत्" इति आद्यन्तयोर्युगपद् उदात्तत्वम् ⁙ । उशब्दः पूरणः । अहमेव जनाय स्तोतृजनार्थं समदम् । समानं माद्यन्त्यस्मिन्निति समत् संग्रामः । तं कृणोमि करोमि । तथा द्यावापृथिवी द्यावापृथिव्यौ अहम् आ विवेश अन्तर्यामित्वेन प्रविष्टवती ॥

षष्ठी ॥

अ॒हं सोम॑माहनसं॑ बिभर्म्य॒हं त्वष्टा॑रमु॒त पू॒षण॒ं भग॑म् ।
अ॒हं द॑धामि॒ द्रवि॑णा॑ हवि॒ष्मते॑ सु॒प्राव्या॑३ यज॑मानाय सुन्व॒ते ॥ ६ ॥

---

१ K द्रविणं with Sâyaṇa. R द्रविणां. We with A B B^{p} B^{h} D K^{m} S^{m} P P^{2} J V. २ A D read १ for ३. K °प्राव्ये° with Sâyaṇa. We with A B B^{p} B^{h} D K^{m} R S^{m} P P^{2} J.

---

1 S′ Kd त्रिपुरविवा°. 2 S′ Kd समत् समत् for समत्.

अहम्। सोमम्। आहनसम्। बिभर्मि। अहम्। त्वष्टारम्। उत। पूषणम्। भगम्।
अहम्। दधामि। द्रविणम्। हविष्मते। सुप्रऽअव्यम्। यजमानाय। सुन्वते॥ ६॥

आहनसम् आहन्तव्यम् अभिषोतव्यं सोमम् यद्वा शत्रूणाम् आहन्तारं दिवि वर्तमानं देवतात्मानं सोमम् अहमेव बिभर्मि धारयामि पोषयामि वा। तथा त्वष्टारम् उत अपि च पूषणं भगं च एतत्संज्ञान् देवान् अहमेव बिभर्मि॥ तथा हविष्मते हविर्भिर्युक्ताय सुप्राव्ये शोभनहविर्भिर्देवानां प्राचित्रे तर्पयित्रे। ✕ अवतेस्तर्पणार्थात् अवितृस्तृतन्त्रिभ्यः०" [उ० ३. १५८] इति ईकारप्रत्ययः। चतुर्थ्येकवचने यणि "उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य" इति अनुदात्तस्य सुपः स्वरितत्वम✕। सुन्वते सोमाभिषवं कुर्वते। ✕"शतुरनुमः०" इति विभक्त्युदात्तत्वम✕। ईदृशाय यजमानाय द्रविणम्[*] धनं यागफलरूपम् अहमेव दधामि प्रयच्छामि। "फलम् अत उपपत्तेः" [बा० ३. २. ३८] इति न्यायेन परब्रह्मणः फलदातृत्वस्य निर्णीतत्वात्॥

सप्तमी॥

अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वन्तः समुद्रे।
ततो वि तिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि॥ ७॥

अहम्। सुवे। पितरम्। अस्य। मूर्धन्। मम। योनिः। अप्ऽसु। अन्तः। समुद्रे।
ततः। वि। तिष्ठे। भुवनानि। विश्वा। उत। अमूम्। द्याम्। वर्ष्मणा। उप। स्पृशामि॥ ७॥

अस्य दृश्यमानस्य प्रपञ्चस्य मूर्धन् मूर्धनि उपरिभागे सत्यलोके पितरम् प्रपञ्चस्य जनकं विधातारम् अहं सुवे जनयामि। ✕ षूङ्

१ See note १ on the previous page. २ K सुप्रऽअव्यं. We with P P̂ J. ३ K चष्टे with Sâyaṇa.

प्राणिगर्भविमोचने । अदादित्वात् शपो लुक् ॥ । स्रष्टृसहितस्य जगतः कारणभूताया मम योनिः कारणं समुद्रे । समुद् द्रवन्ति अस्माद् भूतजातानीति समुद्रः परमात्मा । "समुद्र एवास्य बन्धुः समुद्रो योनिः" इति वाजसनेयकश्रुत्या समुद्रशब्दवाच्यत्वं परमात्मनो दर्शितम् । तस्मिन् परमात्मनि अप्सु व्यापनशीलासु धीवृत्तिषु अन्तः मध्ये यद् ब्रह्मचैतन्यं तत् मम कारणम् इत्यर्थः । यद्वा समुद्रे जलधौ अप्सु उदकेषु अन्तः मध्ये वाडववैद्युतरूपेण यत् तेजो वर्तते तदेव माध्यमिकवाग्रूपाया मम योनिः कारणम् ॥ ततः तेजःकारणकत्वाद्धेतोः विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि [वि] चष्टे प्रकाशयामि ॥ उत अपि च अमूं द्याम् विप्रकृष्टां दिवम् । उपलक्षणम् एतत् । एतदुपलक्षितं कृत्स्नं ब्रह्मणि अध्यस्तं विकारजातं वर्ष्मणा देहेन कारणभूतमायात्मकेन[1] उप स्पृशामि ॥ यद्वा अस्य भूलोकस्य मूर्धन् मूर्धनि उपरि पितरम् आकाशम् । "द्यौः पिता पृथिवी माता" [तै० ब्रा० ३. ७. ५. ५] इति श्रुतेः । सुवे प्रेरयामि । तथा समुद्रे अन्तरिक्षे अप्सु अब्विकारेषु देवशरीरेषु मम कारणभूतं ब्रह्म व्याप्य वर्तत इत्यर्थः । शेषं पूर्ववत् ॥

अष्टमी ॥

अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिम्ना सं बभूव ॥ ८ ॥

अहम । एव । वातःऽइव । प्र । वामि । आऽरभमाणा । भुवनानि । विश्वा ।
परः । दिवा । परः । एना । पृथिव्या । एतावती । महिम्ना । सम् । बभूव ॥ ८ ॥

विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कार्यरूपेण उत्पादयन्ती अहमेव अनन्यसहाया प्र वामि प्रवर्ते । वा गतिगन्धनयोः । अदादित्वात् शपो लुक् । तत्र दृष्टान्तः वात इव । यथा वायुः परेण अप्रेरितः स्वेच्छयैव प्रवाति तद्वद् इत्यर्थः ॥ उक्तं सार्वात्म्यं निगमयति उत्तरार्धेन । परो दिवा । परस् इति

1 S' Kd °मायात्मिकेन.

सकारान्तं परस्तात् इत्यर्थे वर्तते । यथा अध इति अधस्तादर्थे । तद्योगे च तृतीया सर्वत्र दृश्यते । दिवा आकाशस्य परस्तात् एना पृथिव्या । "द्वितीयाटौस्स्वेनः" इति इदम एनादेशः । "सुपां सुलुक्०" इति तृतीयाया आच् आदेशः । अस्याः पृथिव्याः परः परस्तात् । द्यावापृथिव्योरुपादानम् उपलक्षणम् । एतदुपलक्षितात् सर्वस्माद् विकारजातात् परस्ताद् वर्तमाना असङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपा अहं महिम्ना माहात्म्येन एतावती सं बभूव । एतत्परिमाणा उदीरितसकलजगदात्मना संभूतास्मि । एतच्छब्दात् "यत्तदेतेभ्यः०" इति वतुप् । "आ सर्वनाम्नः" इति आत्वम् ॥

पञ्चमं सूक्तम् ॥

इति सायणार्यविरचिते अथर्ववेदार्थप्रकाशे षष्ठोनुवाकः ॥

सप्तमेनुवाके पञ्च सूक्तानि । तत्र "त्वया मन्यो" "यस्ते मन्यो" इति सूक्तद्वयं स्वपरसेनयोर्मध्ये स्थित्वा सेने निरीक्षमाणो जपेत् ॥

तथा आभ्यां सूक्ताभ्यां भाङ्गपाशान् मौञ्जपाशान् आमपात्राणि वा संपात्य अभिमन्त्र्य परसेनासंचारस्थलेषु प्रक्षिपेत् ॥

तथा जयपराजयविज्ञानकर्मणि शरतृणानि सेनयोर्मध्ये निधाय आभ्याम् अभिमन्त्र्य आङ्गिरसाग्निना दहेत् । यां सेनां धूमो व्याप्नोति तस्याः पराजयो भवतीति विजानीयात् ॥

सूत्रितं हि । "त्वया मन्यो यस्ते मन्यो इति संरम्भणानि सेने समीक्षमाणो जपति" इत्यादि "यां धूमोवतनोति[2] तां जयन्ति" इत्यन्तम् [कौ० २. ५] ॥

ग्रहयज्ञे "त्वया मन्यो" "यस्ते मन्यो" इत्याभ्याम् अङ्गारकस्य ह्विराज्ययोर्होमं समिदाधानम् उपस्थानं च कुर्यात् । तद् उक्तं शान्तिकल्पे । "त्वया मन्यो यस्ते मन्यो इत्यङ्गारकाय" इति [शा० क० १५] ॥

तत्र प्रथमा ॥

त्वया॑ मन्यो स॒रथ॑मारु॒जन्तो॒ हर्ष॑माणा॒सो॑ धृषि॒ता॑सो॑ मरुत्वन् ।

1 So S'Kd. 2 S'Kd धूमोयतनोति.

तिग्मेषव आयुधा संशिशाना उप प्र यन्तु नरो अग्निरूपाः ॥ १ ॥
त्वया। मन्यो इति। सऽरथम्। आऽरुजन्तः। हर्षमाणाः। हृषितासः। मरुत्वन्।
तिग्मऽइषवः। आयुधा। सम्ऽशिशानाः। उप। प्र। यन्तु। नरः। अ-
ग्निऽरूपाः ॥ १ ॥

मन्युः क्रोधाभिमानी देवः । मन्युर्मन्यतेः कान्तिकर्मणः इति निरुक्तम् [नि० १०.२९] । हे मन्यो त्वया साधनेन सरथम् रथसहितं शत्रुम् आरुजन्तः आभञ्जन्तः पीडयन्तः । यास्कस्त्वाह । सरथं समानं रथम् आरुह्य रुजन्त इति [नि० १०.३०] । रुजो भङ्गे । तुदादित्वात् शः । हर्षमाणाः हृष्टाः [1*]रुषितासः [1]रुषिताः संजातरोषाः तिग्मेषवः तीक्ष्णशराः आयुधा आयुधानि खड्गादीनि संशिशानाः संश्यन्तस्तीक्ष्णीकुर्वन्तः । शो तनूकरणे इत्यस्मात् छान्दसस्य लिटः कानच् । एवंभूता अस्मदीया नरः नराः हे मरुत्वन् मरुद्भिर्गैर्युक्त त्वत्प्रसादात् अग्निरूपाः अग्निवद् दुष्प्रधर्षा उप प्र यन्तु शत्रून् उपगच्छन्तु । अग्निवद् उपप्राप्य दहन्तु इत्यर्थः ॥

द्वितीया ॥

अग्निरिव मन्यो विषितः सहस्व सेनानीर्नः सहुरे हूत एधि ।
हत्वाय शत्रून् वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥ २ ॥
अग्निःऽइव । मन्यो इति । विषितः । सहस्व । सेनाऽनीः । नः । सहुरे ।
हूतः । एधि ।
हत्वाय । शत्रून् । वि । भजस्व । वेदः । ओजः । मिमानः । वि । मृधः ।
नुदस्व ॥ २ ॥

हे मन्यो अग्निरिव विषितः प्रदीप्तः सन् सहस्व शत्रून् अभिभव । हे सहुरे सहनशील । सहेः औणादिक उरिन् प्रत्ययः । नः

---

१ B B[P] D सहस्व. We with A B[h] K K[m] R S[m] P P[2] J V. २ A D S[m] °नीर्णः. We with B B[P] B[h] K K[m] R V. ३ K हुत°.

---

1 S′ Kd ऋषि°.

अस्माकं सेनानीः सेनाया नेता सेनाधिपतिः सन् हूत एधि संग्रामे सं-
हायार्थम् आहूतो भव । ॥ अस्तेर्लोटि "ध्वसोरेद्धौ०" इति ए-
त्वम् । तस्य च "असिद्धवद् अत्रा भात्" इति असिद्धत्वात् झलन्तल-
क्षणो धिभावः ॥ । अस्मदीयान् शत्रून् [हत्वाय] हत्वा तदीयं वे-
दः धनं वि भजस्व अस्मभ्यं विभज्य प्रयच्छ । पुनरपि ओजः बलं मि-
मानः कुर्वन् मृधः संग्रामकारिणः शत्रून् वि नुदस्व । विजहि ॥

तृतीया ॥

सहस्व मन्यो अभिमातिमस्मै रुजन् मृणन् प्रमृणन् प्रेहि शत्रून् ।
उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयासा एकज त्वम् ॥ ३ ॥

सहस्व । मन्यो इति । अभिऽमातिम् । अस्मै । रुजन् । मृणन् । प्रऽमृणन् ।
प्र । इहि । शत्रून् ।
उग्रम् । ते । पाजः । ननु । आ । रुरुध्रे । वशी । वशम् । नयासै । ए-
कऽज । त्वम् ॥ ३ ॥

हे मन्यो अस्मै अस्य राज्ञः अभिमातिम् अभिमन्तारं शत्रुं सहस्व अभिभव । किं कुर्वन् । रुजन् हस्त्यश्वादिकं तदीयं बलं रुजन् भञ्जन् आमर्दयन् । मृणन् हिंसन् । प्रमृणन् प्रकर्षेण हिंसन् नाशयन् । ॥ मृ-
ण हिंसायाम् ॥ । एवं कुर्वन् शत्रून् अस्मदीयान् प्रेहि प्रगच्छ हन्तुं प्रामुहि । कस्माद् एवम् उच्यसे इति तत्राह उग्रम् इति । उग्रम् उ-
ज्जूर्णं तीक्ष्णम् हे मन्यो ते त्वदीयं पाजः बलं ननु आ रुरुध्रे केचिदपि नैव आरुद्धम् आवृतं कुर्वन्ति । ॥ आङ्पूर्वाद् रुधेश्छान्दसे लिटि "इरयो रे" इति रेभावः ॥ । अपि तु हे एकज असहायोत्पन्न वशी सर्वस्य वशयिता स्वतन्त्रस्त्वं वशं नयासै कृत्स्नं जनं स्वाधीनतां प्रापयसि ॥

---

१ So all our MSS. and Vaidikas. See Rw. २ Such is the reading of all our authorities. Rw read रुरुध्रे like Sâyaṇa. ३ P मन्यो इति. We with P² J K. ४ P P² रु-
रुद्रे. We with J.

---

1 So S′ Kd. 2 S′ Kd तस्मा°.

चतुर्थी ॥

एकॊ वहूनामसि मन्य ईड्ितो विशंविशं युद्धाय सं शिशाधि ।
अकृत्तरुक्त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्मसि ॥ ४ ॥

एकः । वहूनाम । असि । मन्यो इति । ईड्ितो । विशंमऽविशम । युद्धाय ।
सम । शिशाधि ।
अकृत्तऽरुक् । त्वया । युजा । वयम । द्युऽमन्तम । घोषम । विऽजयाय ।
कृण्मसि ॥ ४ ॥

हे मन्यो ईळितः अस्माभिः स्तुतस्त्वम एक एव वहूनां शत्रूणां निरसने पर्याप्तः असि भवसि । विशंविशम सर्वाः प्रजा आविश्य युद्धाय आयोधनाय सं शिशाधि संशासय । ॒शासु अनुशिष्टौ इत्यस्मात् लोटो हिः । "शा हौ" इति शासः शाभावः । छान्दसो विकरणस्य श्लुः । "असिद्धवद् अत्रा भात्" इति शाभावस्य असिद्धवद्भावात् "हुझल्भ्यो हेर्धिः" इति झलक्षणं धित्वं भवति । "बहुलं छन्दसि" इति अभ्यासस्य इत्त्वम ॒ । यद्वा विशंविशम् अस्मदीयां सेनां सं शिशाधि संशितां तीक्ष्णीभूतां कुरु । ॒शो तनूकरणे इत्यस्मात् कृत्वात् पूर्ववद् विकरणस्य श्लुः । "वा छन्दसि" इति हेरपित्त्वस्य विकल्पनात् ङित्त्वाभावात् "अङितश्च" इति धित्वम् । "बहुलं छन्दसि" इति अभ्यासस्य इत्त्वम ॒ । हे अकृत्तरुक् अच्छिन्नदीप्ते मन्यो त्वया युजा सहायेन वयं द्युमन्तम् दीप्तिमन्तं घोषम् सिंहनादात्मकं विजयाय विजयार्थं कृण्मसि कृण्मः कुर्मः । ॒"इदन्तो मसिः" ॒ ॥

पञ्चमी ॥

विजेषकृदिन्द्र इवानवब्रवोऽस्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ ॥ ५ ॥

विजेषऽकृत् । इन्द्रःऽइव । अनवऽब्रवः । अस्माकम् । मन्यो इति । अधिऽपाः । भव । इह ।

---

१ K ईड्ितो. We with A B B^{p} B^{h} D K^{m} R S^{m} P P^{2} J V. २ P मन्यो इतिं. ३ K ईड्ितः. ४ P मन्यो इतिं.

प्रियम्। ते। नाम। सहुरे। गृणीमसि। विद्म। तम्। उत्सम्। यतः। आडबभूथ ॥ ५ ॥

हे मन्यो त्वं विजेषकृत् विजयस्य कर्ता इन्द्र इव अनवब्रवः अनवाना पुरातनानां जयोपायानां वक्ता इह अस्मिन् संग्रामे अस्माकम् अधिपाः अधिकं पालको भव। हे सहुरे सहनशील ते तव प्रियम् आह्लादकं नाम गृणीमसि गृणीमः स्तुमः। गृ शब्दे। "ष्वादीनां ह्रस्वः" इति ह्रस्वत्वम्। यतः यस्मात् स्थानात् त्वम् आबभूथ आभवसि आजायसे तम् उत्सम् अमृतधारायुक्तं स्थानं विद्म जानीमः ॥

षष्ठी ॥

आभूत्या सहजा वज्र सायक सहो बिभर्षि सहभूत उत्तरम्।
ऋत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥ ६ ॥

आऽभूत्या। सहऽजाः। वज्र। सायक। सहः। बिभर्षि। सहऽभूते। उत्ऽतरम्।
ऋत्वा। नः। मन्यो इति। सह। मेदी। एधि। महाऽधनस्य। पुरुऽहूत।
सम्ऽसृजि ॥ ६ ॥

आभूतिः अभिभवः। तया सह जायते प्रादुर्भवतीति सहजाः हे वज्र वज्रवद् अकुण्ठितशक्ते हे सायक शत्रूणाम् अन्तकर। षो अन्तकर्मणि इत्यस्मात् घञि सायः। तस्मिन्नुपपदे "डोन्यत्रापि दृश्यते" इति करोतेर्डप्रत्ययः। एवंभूत मन्यो सहः बलं बिभर्षि धारयसि। "भृञाम इत्" इति अभ्यासस्य इत्त्वम्। कीदृशं सहः। उत्तरम् उन्नततरम् ॥ हे सहभूते आत्मना सह भूतिः उत्पत्तिर्यस्य सः। आत्माविनाभूतो मन्युरित्यर्थः। ईदृश हे मन्यो ऋत्वा ऋतुना कर्मणा सह नः अस्माकं मेदी स्निग्धः एधि भव। जिमिदा स्नेहने इत्यस्मात्---------। कस्मिन् विषये इत्याह। हे पुरुहूत बहुभिर्यजमानैराहूत महाधनस्य महान्ति धनानि अस्मिन् प्राप्यन्ते

१ B मेधोधि. २ P सायक. ३ P मन्यो इति.

इति महाधनः संग्रामः । तस्य संसृजि संसर्गे संयोजने । विषये इत्यर्थः ॥

सप्तमी ॥

संसृ॑ष्टं धन॑मुभयं॑ स॒माकृ॑तम॒स्मभ्यं॑ धत्तां वरु॑णश्च म॒न्युः ।
भियो॒ दधा॑ना हृद॑येषु॒ शत्र॑वः परा॑जितासो॒ अप॒ नि ल॑यन्ताम् ॥ ७ ॥

सम॑ऽसृ॑ष्टम् । धन॑म् । उ॒भय॑म् । स॒म॑ऽआकृ॑तम् । अ॒स्मभ्य॑म् । ध॒त्ता॒म् ।
वरु॑णः । च॒ । म॒न्युः ।
भिय॑ः । दधा॑नाः । हृद॑येषु । शत्र॑वः । परा॑ऽजितासः । अप॑ । नि । ल॒य॒न्ता॒म् ॥७॥

वरुणो मन्युश्च उभौ उभयम् उभयविधम् आत्मीयं धनं संसृष्टम् मिश्रितं कृत्वा समाकृतम् समानीतम् अस्मभ्यं दत्ताम् प्रयच्छताम् । मदीयाः शत्रवः हृदयेषु मनःसु भियः भीतिं दधानाः पराजितासः पराजिताः पराजयं प्राप्ताः अप निलयन्ताम् स्वस्थानाद् अपक्रम्य प्रच्छन्नं वर्तन्ताम् । ☒अय पय गतौ । "उपसर्गस्यायतौ" इति लत्वम्☒ ॥

इति प्रथमं सूक्तम् ।

"यस्ते मन्यो" इति सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः ॥

तत्र प्रथमा ॥

यस्ते॑ म॒न्योविधद् वज्र सायक॒ सह॒ ओज॒ः पुष्यति॒ विश्वमानुषक् ।
साह्याम॒ दास॒मार्यं॒ त्वया॑ यु॒जा व॒यं सह॑स्कृतेन॒ सह॑सा॒ सह॑स्वता ॥ १ ॥

यः । ते॒ । म॒न्यो इति॑ । अविधत् । व॒ज्र॒ । सा॒यक॒ । सह॑ः । ओज॑ः । पुष्यति ।
विश्व॑म् । आ॒नुष॑क् ।
सह्या॑म । दास॑म् । आर्य॑म् । त्वया॑ । यु॒जा । व॒यम् । सह॑ःऽकृतेन । सह॑सा ।
सह॑स्वता ॥ १ ॥

हे मन्यो यः पुरुषः ते त्वाम अविधत् । विधतिः परिचरणकर्मा । परिचरति । ☒विध विधाने । तुदादित्वा[1]च्छान्दसो लङ्☒ । हे

१ P मन्यो इति.

1 So S'Kd. Is not तौदादिकात् meant ?

वज्र वज्रवद् अकुण्ठितशक्ते हे सायक शत्रूणाम् अन्तकर हे मन्यो स पुरुषः सहः शत्रूणाम् अभिभवनम् ओजः बलं च विश्वम् सर्वम् अन्यत् शत्रुजयादिलक्षणं कार्यजातम् आनुषक् अनुषक्तं संततं पुष्यति वर्धयति। ✕पुष पुष्टौ✕। त्वया युजा सहायेन दासम् उपक्षपयितारम् असुरम् आर्यम् तद्व्यतिरिक्तम् असुरशत्रुं वयं सह्याम अभिभवेम। कीदृशेन त्वया। सहस्कृतेन सहसा बलेनोत्पादितेन। सहसा सहमानेन अभिभवित्रा। सहस्वता बलवता॥

द्वितीया॥

मन्युरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः।
मन्युर्विश ईडते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः॥ २॥

मन्युः। इन्द्रः। मन्युः। एव। आस। देवः। मन्युः। होता। वरुणः। जातऽवेदाः।
मन्युः। विशः। ईडते। मानुषीः। याः। पाहि। नः। मन्यो इति। तपसा। सऽजोषाः॥ २॥

यद् इन्द्रादीनाम् इन्द्रत्वं तत् पराभिभवनिमित्ताद् मन्युप्रसादादेवेति सार्वात्म्येन स्तौति। मन्युरेव इन्द्रः। मन्युरेव सर्वः अन्यो देवः आस भवति। ✕अस्तेर्लिटि छान्दसो भूभावाभावः✕। होता देवानाम् आह्वाता अग्निरपि मन्युरेव। जातवेदाः जातप्रज्ञो वरुणोपि मन्युरेव। मानुषीः मनोरपत्यभूता या विशः प्रजाः सन्ति ता अपि मन्युमेव[*] ईडते स्तुवन्ति नेन्द्रादीन्। तस्यैव इन्द्रादिरूपेण अवस्थानात्। हे मन्यो स त्वं नः अस्मान् तपसा संतापेन सजोषाः संगतः सन् [पाहि] रक्ष पालय॥

तृतीया॥

अभी[1]हि मन्यो तवस्तवीयान् तपसा युजा वि जहि शत्रून्।
अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः॥ ३॥

---

१ K मन्युं वि° with Sâyaṇa. २ K मन्युम्. ३ P मन्यो इति.

अभि । इहि । मन्यो इति । तवसः । तवीयान् । तपसा । युजा । वि । जहि । शत्रून् ।
अमित्रऽहा । वृत्रऽहा । दस्युऽहा । च । विश्वा । वसूनि । आ । भर । त्वम् । नः ॥ ३ ॥

हे मन्यो अभीहि अभिमुखं गच्छ ॥ तवसस्तवीयान् । तव इति महन्नाम । प्रवृद्धादपि प्रवृद्धतरः स त्वं तपसा संतापेन त्वज्जन्मकारणेन युजा सहायेन अस्मदीयान् शत्रून् वि जहि विनाशय ॥ अमित्रहा अमित्रः स्नेहरहितः तस्य हन्ता । वृत्रहा [वृत्र] आवेष्टकः शत्रुः तस्य हन्ता । दस्युहा दस्युः उपक्षपयिता शत्रुः तस्य हन्ता । एवम् अमित्रादीन् हत्वा विश्वा विश्वानि सर्वाणि वसूनि नः अस्मभ्यं त्वम् आभर आहर ॥

चतुर्थी ॥

त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अभिमातिषाहः ।
विश्वचर्षणिः सहुरिः सहीयानस्मास्वोजः पृतनासु धेहि ॥ ४ ॥

त्वम् । हि । मन्यो इति । अभिभूतिऽओजाः । स्वयमऽभूः । भामः । अभिमातिऽसहः ।
विश्वऽचर्षणिः । सहुरिः । सहीयान् । अस्मासु । ओजः । पृतनासु । धेहि ॥ ४ ॥

हे मन्यो त्वं हि त्वं खलु अभिभूत्योजाः अभिभूतिः अभिभावुकम ओजो बलं यस्य स तथोक्तः । स्वयंभूः स्वयमेव आत्मनि उत्पद्यमानः । भामः क्रुद्धः । अभिमातिषाहः अभिमातीनां शत्रूणां सोढा । विश्वचर्षणिः विश्वस्य सर्वस्य द्रष्टा । यद्वा विश्वे चर्षणयो मनुष्या यस्य वशे वर्तन्ते स तथोक्तः । सहुरिः सहनशीलः । सहीयान् सोढृतमः । एवंगुणविशिष्टः त्वं पृतनासु संग्रामेषु ओजः बलम् अस्मासु धेहि स्थापय ॥

पञ्चमी ॥

अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।

---

१ P मन्यो इति. २ P सहूरिः.

तं त्वा मन्यो अक्रतुर्जिहीडाहं स्वा तनूर्बलदावा न एहि ॥ ५ ॥

अभागः। सन्। अप। परांऽइतः। अस्मि। तव। क्रत्वा। तविषस्य। प्रऽचेतः।

तम्। त्वा। मन्यो इति। अक्रतुः। जिहीडे। अहम्। स्वा। तनूः। बलऽदावा। नः। आ। इहि ॥ ५ ॥

हे प्रचेतः प्रकृष्टज्ञान हे मन्यो तविषस्य महतः तव क्रत्वा कर्मणा अभागः भागरहितः सन्। त्वाम् अयजमान इत्यर्थः। एवंभूतः सन् युद्धाद् अप परेतो अस्मि अपक्रम्य परागतो भवामि। हे मन्यो तं तादृशं [त्वा] त्वाम् अक्रतुः त्वत्तोषकरकर्मवर्जितः अहं जिहीळँ क्रोधितवान्। हेडतिः क्रुध्यतिकर्मा ॥ अथ इदानीं मम स्वा तनूः स्वकीयशरीरभूतस्त्वं नः अस्माकं बलदावा बलस्य दाता सन् एहि आगच्छ। यद्वा। स्वा तनूः इत्युभयत्र "सुपां सुलुक्०" इति सप्तम्या लुक्। स्वायां तन्वाम् अस्माकं स्वभूते शरीरे बलस्य दाता सन् आगच्छेति। बलदावेति। डुदाञ् दाने। "आतो मनिन्क्वनिब्वनिपश्च" इति वनिप्॥

षष्ठी ॥

अयं ते अस्म्युप न एह्यर्वाङ् प्रतीचीनः सहुरे विश्वदावन्।

मन्यो वज्रिन्नभि न आ ववृत्स्व हनाव दस्यूँरुत बोध्यापेः ॥ ६ ॥

अयम्। ते। अस्मि। उप। नः। आ। इहि। अर्वाङ्। प्रतीचीनः। सहुरे। विश्वऽदावन्।

मन्यो इति। वज्रिन्। अभि। नः। आ। ववृत्स्व। हनाव। दस्यून्। उत। बोधि। आपेः ॥ ६ ॥

हे मन्यो ते तव स्वभूतः अयं कर्मकरः अहम् अस्मि भवामि। नः

---

१ A B B^{P} $\overset{h}{B}$ D $\overset{m}{K}$ $\overset{m}{S}$ V (though $\overset{m}{K}$ formerly read °जि°) °जी°. We with R P $\overset{2}{P}$ J.

२ P जिहीडा. ३ D अस्युप. ४ $\overset{h}{B}$ D $\overset{m}{S}$ दस्यूरुत, omitting the anusvâra. We with A K $\overset{m}{K}$ R V.

अस्मान् उपेहि उपागच्छ । अर्वाङ् अस्मदभिमुखः सन् प्रतीचीनः शत्रून् प्रत्यञ्चन् गच्छन् हे सहुरे सहनशील हे विश्वदावन् विश्वस्य सर्वस्य फलस्य दातः हे वज्रिन् । वज्रं वर्जकम् आयुधं बलं वा । तद्वन् हे मन्यो नः अस्मान् अभ्या ववृत्स्व अभिमुखम् आवर्तस्व । छान्दसः शपः श्लुः । आवाम् अस्मदीयान् दस्यून् उपक्षपयितॄन् हनाव हिनसाव । "आडुत्तमस्य पिच्च" इति आडागमः । उत अपि च आपेः आपिम् आप्तं बन्धुभूतं मां बोधि रक्षणीयोयम् इति बुध्यस्व ॥

सप्तमी ॥

अभि प्रेहि दक्षिणतो भवा नोधा वृत्राणि जङ्घनाव भूरि ।
जुहोमि ते धरुणं मध्वो अग्रमुभावुपांशु प्रथमा पिबाव ॥ ७ ॥

अभि । प्र । इहि । दक्षिणतः । भव । नः । अध । वृत्राणि । जङ्घनाव । भूरि ।
जुहोमि । ते । धरुणम् । मध्वः । अग्रम् । उभौ । उपऽअंशु । प्रथमा ।
पिबाव ॥ ७ ॥

हे मन्यो अस्मदभिमुखं प्रेहि प्रगच्छ ॥ नः अस्माकं दक्षिणतः दक्षिणभागे भव साचिव्यं कर्तुम् अवतिष्ठस्व । "व्यचोतस्तिङः" इति दीर्घत्वम् ॥ अथ अनन्तरं भूरि भूरीणि बहूनि वृत्राणि शत्रून् जङ्घनाव अत्यर्थं हनाव । हन्तेर्यङ्लुगन्तात् लोटि "आडुत्तमस्य०" इति आडागमः । हे मन्यो ते तुभ्यं धरुणम् धारकं मध्वः मधुररसस्य सोमस्य अग्रम् अग्र्यं सारभूतं रसं जुहोमि प्रयच्छामि । उभौ आवां प्रथमा प्रथमौ सर्वेभ्यः पूर्वभाविनौ सन्तौ उपांशु अप्रकाशं यथा अन्यैर्न ज्ञायते तथा पिबाव सोमपानं करवाव ॥

[इति] द्वितीयं सूक्तम् ॥

"अप नः शोशुचद् अघम्" इत्यस्य सूक्तस्य "अप नः शोशुचद् अघम्[४.३३] पुनन्तु मा[६.१९] सस्रुषीः[६.२३]" इति [कौ० १.९] बृहज्जपे पाठात् शान्त्युदकादौ विनियोगः ॥

तथा स्त्रीणां पुरुषविषयाभिरतिनिवृत्तये पुरुषाणां च स्त्रीविषयाभिरति-निवृत्तये च अनेन सूक्तेन असंख्याताः शर्करा अभिमन्त्र्य काम्यमानपरगृहं स्त्रीगृहं वा प्रकिरन् व्रजेत् । हस्ते धारयन् वा जपेत् । सूत्रितं हि । "कामं विनेष्यमाणोऽपाघेनासंख्याताः शर्कराः परिकिरन् व्रजति" इत्यादि [कौ० ४. १२] ॥

तथा दुःशकुनदर्शने काकमैथुनादिविरुद्धदर्शने अद्भुतदर्शने च एतत् सूक्तं जपेत् । सूत्रं च । "अपनोदनापाघाभ्याम [१. २६, ४. ३३] अन्वीक्षं[2] प्रतिजपति" इति [कौ० ५. ६] ॥

तथा चरमसंस्कारे शवदहनानन्तरम् अनवेक्ष्यमाणः[3] सबान्धवो गच्छन् कर्ता जपेत् ॥

तथा तत्रैव कर्मणि स्नानसमये ब्रह्मा एतत् सूक्तं जपेत् । स्नानानन्तरं गृहम् आगत्य अनेन सूक्तेन कर्ता श्यामाकीः समिध आदध्यात् ॥

तत्र प्रथमा ॥

अप॑ नः शोशुचद॒घमग्ने॑ शुशु॒ग्ध्या र॒यिम् ।
अप॑ नः शोशुचद॒घम् ॥ १ ॥
अप॑ । नः॒ । शोशु॑चत् । अ॒घम् । अग्ने॑ । शुशु॒ग्धि । आ । र॒यिम् ।
अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ १ ॥

हे अग्ने त्वत्प्रसादात् नः अस्माकम् अघम् पापम् अप शोशुचत् अत्यर्थम् अपगतशोकं भवतु । नश्यतु इत्यर्थः । ॒शुचेर्यङ्लुगन्तात् लेटि अडागमः॒ । त्वं च रयिम् धनम् अस्माकम् आ शुशुग्धि समन्तात् प्रज्वलितं समृद्धं कुरु । ॒शुशुग्धीति । छान्दसः शपः श्लुः॒ । आदरार्थम् उक्त एवार्थः पुनरनूद्यते ॥

द्वितीया ॥

सु॒क्षे॒त्रि॒या सु॑गातु॒या व॑सू॒या च॑ यजामहे ।
अप॑ नः शोशुचद॒घम् ॥ २ ॥

---

1 So S′Kd. 2 S′Kd °नेक्ष्यमाणो°. 3 So S′Kd and *Kaus'ika*. The *Kes'avî*: अन्वीक्षं दृष्ट्वा. 4 S′Kd अवनेक्षमाणः. We with the *Kes'avî*. *Kaus'ika*: अनवेक्षमाणाः, XI. 3.

सुऽक्षेत्रिया । सुऽगातुया । वसुऽया । च । यजामहे ।
अपं । नः । शोशुचत् । अघम् ॥ २ ॥

सुक्षेत्रिया शोभनं क्षेत्रं सुक्षेत्रम् । ॥ "इयाडियाजीकाराणाम् उपसंख्यानम्" इति तृतीयैकवचनस्य डियाजादेशः । तथा सुगातुयेत्यत्रापि तृतीयाया याजादेशः । उभयत्रापि हेतौ तृतीया ॥ । सुक्षेत्रेण शोभनमार्गेण च हेतुना । तद् उभयं यथा स्याद् इत्यर्थः । यद्वा शोभनक्षेत्रेच्छा सुक्षेत्रिया । ॥ क्यचि छान्दसं ह्रस्वत्वम् । "अ प्रत्ययात्" इति अकारप्रत्ययः । तृतीयाया लुक् ॥ । शोभनक्षेत्रलाभेच्छया । ॥ सुगातुया । सुगातुशब्दात् पूर्ववत् क्यच् । "न च्छन्दस्यपुत्रस्य" इति दीर्घप्रतिषेधः । पूर्ववत् तृतीयाया लुक् ॥ । शोभनमार्गेच्छया वसूया धनेच्छया च हे अग्ने त्वां यजामहे हविर्भिस्तोषयामः । तत्प्रसादाद् अस्मदीयम् अघं नश्यतु ॥

तृतीया ॥

प्र यद् भन्दिष्ठ एषां प्रास्माकांसश्च सूरयः ।
अपं नः शोशुचद्घम् ॥ ३ ॥

प्र । यत् । भन्दिष्ठः । एषाम् । प्र । अस्माकांसः । च । सूरयः ।
अपं । नः । शोशुचत् । अघम् ॥ ३ ॥

एषाम् स्तोतृणां मध्ये अहं प्र प्रकर्षेण यत् यस्माद् भन्दिष्ठः स्तोतृतमः । ॥ भदि कल्याणे सुखे च । भन्दना भन्दतेः स्तुतिकर्मण इति यास्कः [नि० ५.२] । भन्दितृशब्दात् "तुश्छन्दसि" इति इष्ठन् । "तुरिष्ठेमेयस्सु" इति तृलोपः ॥ । अस्माकासः अस्माकाः । ॥ "तस्येदम्" इत्यर्थे अणि "तस्मिन्नणि च युष्माकास्माकौ" इति अस्माकादेशः । छान्दस आदिवृद्ध्यभावः । "आज्जसेरसुक्" ॥ । अस्मत्संबन्धिनः सूरयः अभिज्ञाः पुत्रादयश्च [प्र] प्रकर्षेण स्तोतृतमाः । तस्मात् हे अग्ने त्वत्प्रसादाद् अस्माकं पापं नश्यतु इति संबन्धः ॥

चतुर्थी ॥

प्र यत् ते अग्ने सूरयो जायेमहि प्र ते वयम् ।
अप नः शोशुचदघम् ॥ ४ ॥

प्र । यत् । ते । अग्ने । सूरयः । जायेमहि । प्र । ते । वयम् ।
अप । नः । शोशुचत् । अघम् ॥ ४ ॥

हे अग्ने ते तव स्तोतारो यत् यस्मात् त्वदनुग्रहेण प्रजायन्ते तस्मात् सूरयः विद्वांसो वयमपि ते तव स्तुत्या प्र जायेमहि पुत्रपौत्रादिभिः समृद्धा भवेम ॥ अन्यत् पूर्ववत् ॥

पञ्चमी ॥

प्र यदग्नेः सहस्वतो विश्वतो यन्ति भानवः ।
अप नः शोशुचदघम् ॥ ५ ॥

प्र । यत् । अग्नेः । सहस्वतः । विश्वतः । यन्ति । भानवः ।
अप । नः । शोशुचत् । अघम् ॥ ५ ॥

सहस्वतः सहनवतः अभिभवनवतो बलवतो वा अग्नेः भानवः दीप्तयो विश्वतः सर्वतः यत् यस्मात् प्र यन्ति असद्धितार्थं प्रवर्तन्ते तस्माद् आग्नेयेन तेजसा अस्मदीयम् [अघम्] पापं नश्यतु इत्यर्थः ॥

षष्ठी ॥

त्वं हि विश्वतोमुख विश्वतः परिभूरसि ।
अप नः शोशुचदघम् ॥ ६ ॥

त्वम् । हि । विश्वतःऽमुख । विश्वतः । परिऽभूः । असि ।
अप । नः । शोशुचत् । अघम् ॥ ६ ॥

हे विश्वतोमुख सर्वतोमुख अग्ने त्वं हि त्वं खलु विश्वतः सर्वतः परिभूः परिग्रहीता व्यापकः असि भवसि । सर्वम् इदं जगत् त्वद्वशे वर्तते । अतस्त्वदाज्ञया अस्मदीयं पापं नश्यत्विति ॥

सप्तमी ॥

द्विषो नो विश्वतोमुखाति नावेव पारय ।
अप नः शोशुचदघम् ॥ ७ ॥

द्विषः । नः । विश्वतःऽमुख । अति । नावाऽइव । पारय ।
अप । नः । शोशुचत् । अघम् ॥ ७ ॥

हे विश्वतोमुख सर्वतोमुख अग्ने द्विषः द्वेष्टॄन् शत्रून् नावा समुद्रमिव नः अस्मान् अति पारय अतिक्रामय । त्वत्प्रसादाद् भयकारणम् अस्मदीयं पापं नश्यत्विति ॥

अष्टमी ॥

स नः सिन्धुमिव नावाति पर्षा स्वस्तये ।
अप नः शोशुचदघम् ॥ ८ ॥

सः । नः । सिन्धुमऽइव । नावा । अति । पर्ष । स्वस्तये ।
अप । नः । शोशुचत् । अघम् ॥ ८ ॥

हे अग्ने सः उक्तगुणस्त्वं नावा सिन्धुम् समुद्रमिव स्वस्तये क्षेमाय [नः अस्मान्] अति पर्ष दुरितस्य पारं प्रापय । ॒पॄ पालनपूरणयोः । अस्मात् लेटि अडागमः । "सिब्बहुलम्°" इति सिप् ॒ ॥ गतम् अन्यत् ॥

[इति] द्वितीयं सूक्तम् ॥

"ब्रह्मास्य शीर्षम्" इति सूक्तं ब्रह्मास्योदनसवे निरुप्तहविरभिमर्शनादिकर्मणि विनियुक्तम् ॥

तत्रैवानेन सूक्तेन चतसृषु दिक्षु ह्रदकरणम् कुल्याकरणम् तासां रसैः पूरणम् ह्रदेषु आण्डीकादिमन्त्रोक्तद्रव्यविधानं च कुर्यात् । सूत्रितं हि । "ब्रह्मास्येत्योदने ह्रदान् प्रतिदिशं करोति" इत्यादि [कौ° ८.७] ॥

---

१ P नावाऽइव. २ D परिषा; P P पॄरिष. We with A B B^{p} B^{h} K K^{m} R S^{m} J V.

---

1 So S' Kd and *Kaus'ika*. 2 S' Kd तत्रौदनेन for तत्रैवानेन.

तत्र प्रथमा ॥

ब्रह्मास्य शीर्षं बृहदस्य पृष्ठं वामदेव्यमुदरमोदनस्य ।
छन्दाँसि पक्षौ मुखमस्य सत्यं विष्टारी जातस्तपसोधि यज्ञः ॥ १ ॥

ब्रह्म । अस्य । शीर्षम् । बृहत् । अस्य । पृष्ठम् । वामऽदेव्यम् । उदरम् । ओदनस्य ।
छन्दाँसि । पक्षौ । मुखम् । अस्य । सत्यम् । विष्टारी । जातः । तपसः । अधि । यज्ञः ॥ १ ॥

अस्यौदनस्य दीयमानस्य शिरःप्रभृत्यवयवकल्पनया स्तुतिः क्रियते । ब्राह्मणजात्या सह प्रजापतिमुखाद् उत्पन्नत्वाद् ब्रह्मशब्देनात्र रथंतरं साम विवक्षितम् । अत एव तस्य ब्रह्मवर्चसरूपता समाम्नाता । "रथंतरं साम भवति ब्रह्मवर्चसं वै रथंतरम" इति । तद् ब्रह्मशब्दवाच्यं रथंतरं साम अस्य ओदनस्य शीर्षम् शिरः । तथा बृहत् साम अस्यौदनस्य पृष्ठम् पृष्ठभागः उपरिभागः । तथा वामदेव्यम् वामदेवेन दृष्टं साम उदरम् । "वामदेवाड्ड्यड्ड्यौ" इति ड्यप्रत्ययः । छन्दांसि गायत्र्यादीनि पक्षौ । तथा सत्यम् सत्याख्यं[1] साम परं ब्रह्म वा अस्यौदनस्य मुखम् । एवं विष्टारी विस्तीर्यमाणावयवः । विपूर्वात् स्तृणातेः कर्मणि णिनिप्रत्ययः । अथवा[2] "प्रथने वावशब्दे" इति घञ् । ततो मत्वर्थीय इनिः । तादृशोयं सवयज्ञः तपसः तप्यमानाद् ब्रह्मणः अधि उपरि जातः उत्पन्नः । यज्ञदानादिलक्षणाद् अन्यस्मात् तपसो वा आधिक्येनोत्पन्न इत्यर्थः ॥

द्वितीया ॥

अनस्थाः पूताः पवनेन शुद्धाः शुचयः शुचिमपि यन्ति लोकम् ।
नैषां शिश्नं प्र दहति जातवेदाः स्वर्गे लोके बहु स्त्रैणमेषाम् ॥ २ ॥

अनस्थाः । पूताः । पवनेन । शुद्धाः । शुचयः । शुचिम् । अपि । यन्ति । लोकम् ।

1 S' Kd सत्याखं. 2 S' Kd णिप्रत्ययः यथा.

न । एषाम् । शिश्नम् । प्र । दहति । जातऽवेदाः । स्वःऽगे । लोके । बहु ।
स्त्रैणम् । एषाम् ॥ २ ॥

अनस्थाः । न विद्यते [illegible]क्षितं षाढ्कौशिकं शरीरम् एषाम् इति अनस्थाः । [illegible]यते" इति अस्थिशब्दस्य अनङ् आदेशः[1] । अमृत[illegible] । अत एव पवनेन पवनसाधनेन पूताः । यद्वा पवनेन [illegible]ग्युना पवित्रीकृताः शुद्धाः निर्मलाः शुचयः दीप्यमानाः [illegible] कर्तारः शुचिम् दीप्यमानं ज्योतिर्मयं लोकम् अपि या[illegible]ेषावसाने प्राप्नुवन्ति ॥ अपि च एषाम् स्वर्गे लोके अव[illegible]ोगसाधनम् इन्द्रियं जातवेदाः जातानां वेदिता अग्निः [illegible]र्वीर्यं करोति । प्रदाहप्रसक्तिम् आह बहु स्त्रैणम् इति । तत्र भोगस्थाने एषां सुकृतिनां [बहु] बहुलं स्त्रैणम् स्त्रीणां समूह[illegible]द्यते । एवं स्त्रीसमूहं भुञ्जानानामपि न निर्वीर्यत्वशङ्केत्यर्थः । [illegible] इति । "स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्" इति समूहेर्थे नञ् प्रत्ययः[2] तृतीया ॥

विष्टारिणमोदनं ये पचन्ति नैनानवर्तिः सचते कदा चन ।
आस्ते यम उप याति देवान्त्सं गन्धर्वैर्मदते सोम्येभिः ॥ ३ ॥

विष्टारिणम् । ओदनम् । ये । पचन्ति । न । एनान् । अवर्तिः । सचते ।
कदा । चन ।
आस्ते । यमे । उप । याति । देवान् । सम । गन्धर्वैः । मदते । सोम्येभिः ॥ ३ ॥

विष्टारिणम् उदीरितरीत्या विस्तीर्यमाणावयवम् ओदनं ये यजमानाः पचन्ति । पक्त्वा ब्राह्मणेभ्यः प्रयच्छन्तीत्यर्थः । एनान् यजमानान् वर्तिः वृत्तिः वृत्तिर्जीवनम् तदभावः अवर्तिः दारिद्र्यं कदा चन कदाचिदपि न सचते न समवैति । [illegible]पच समवाये[illegible] । बहुवद् उक्तम् एक-

1 S′ Kd षाढ्कौशिक्यं. 2 So S′ Kd. 3 S′ Kd and Sâyaṇa's text: शश्नं.

वद् आह। यः [पचति] स च सवयज्ञानुष्ठाता देहविश्लेषानन्तरं यमे पितृणाम् अधिपतौ पूजितः सन् आस्ते सुखेन वसति। तेन अनुज्ञातः सन् देवान् उप याति उपगच्छति। तथा सोम्येभिः सोम्यैः सोमार्हैः गन्धर्वैः विश्वावसुप्रभृतिभिः सोमपालैः सह मदते अमृतमयसोमपानेन माद्यति ॥

चतुर्थी ॥

विष्टारिणमोदनं ये पचन्ति नैनान् यमः परि मुष्णाति रेतः।
रथी ह भूत्वा रथयानं ईयते पक्षी ह भूत्वाति दिवः समेति ॥ ४ ॥

विष्टारिणम् । ओदनम् । ये । पचन्ति । न । एनान् । यमः । परि । मुष्णाति । रेतः ।

रथी । ह । भूत्वा । रथऽयाने । ईयते । पक्षी । ह । भूत्वा । अति । दिवः । सम । एति ॥ ४ ॥

नैनानित्यन्तं पूर्ववत्। यमः नियन्ता जीवनापहारी एनान् सवयज्ञानुष्ठातॄन् रेतः परि [न] मुष्णाति नापहरति। रेतोहीनान् न करोतीत्यर्थः। स च सवयज्ञानुष्ठाता रथयाने रथेन यातव्ये भूलोके यावज्जीवं रथी [ह भूत्वा] रथाधिरूढ एव ईयते संचरति। ✕ईङ् गतौ। दिवादिः ✕। अन्तरिक्षमार्गे च पक्षी पक्षवान् भूत्वा दिवः अन्तरिक्षप्रभृतीन् उपरितनान् लोकान् अतिक्रम्य समेति तत्तद्भोगस्थानेषु भोगैः संगच्छते ॥

एष यज्ञानां वितंतो बहिष्ठो विष्टारिणं पक्वा दिवमा विवेश।
आण्डीकं कुमुदं सं तनोति बिसं शालूकं शफको मुलाली।
एतास्त्वा धारा उप यन्तु सर्वाः स्वर्गे लोके मधुमत् पिन्वमाना उप त्वा तिष्ठन्तु पुष्करिणीः समन्ताः ॥ ५ ॥

एषः। यज्ञानाम्। विऽततः। बहिष्ठः। विष्टारिणम्। पक्वा। दिवम्। आ। विवेश।

---

१ P मुष्णाति.

आण्डीकम् । कुमुदम् । सम् । तनोति । बिसम् । शालूकम् । शफकः । मुलाली ।

एताः । त्वा । धाराः । उप । यन्तु । सर्वाः । स्वःऽगे । लोके । मधुऽमत् । पिन्वमानाः । उप । त्व[illegible]न्तु । पुष्करिणीः । समऽअन्ताः ॥ ५ ॥

घृतह्रदा मधुकूलाः सुरे[illegible] पूर्णा उदकेन दध्ना ।

एतास्त्वा धारा उप यन्तु [illegible] मधुमत् पिन्वमाना उप त्वा तिष्ठन्तु पुष्करिणीः समन्ता[illegible]

घृतऽह्रदाः । मधुऽकूलाः । सुराऽउदका[illegible] । उदकेन । दध्ना । एताः । त्वा । धाराः । उप । यन्तु । सर्वाः [illegible] । मधुऽमत् । पिन्वमानाः । उप । त्वा । तिष्ठन्तु । पुष्करिणीः [illegible] ॥

पञ्चमी ॥ एष विततः विस्तृतः सवयज्ञः यज्ञानां मध्[illegible] तमः ॥ विष्टारिणम् शिरःपृष्ठाद्यवयवकल्पनया उदीरितविस्तारोप[illegible] पक्ता यजमानस्तत्फलभूतं दिवम् स्वर्गम् आ विवेश प्राप्नोति ॥ अ[illegible] कम् अण्डाकृतेः कन्दाद् उत्पन्नं कुमुदम् कैरवं दिश्येषु ह्रदेषु सं तनोति संयोजयति ॥ तथा विसम् पद्मकन्दम् । शालूकम् उत्पलकन्दम् । शफकः शफाकृतिः जलोत्पन्नः । मुलालीति मृणाली विवक्षिता । एतानि सर्वाणि परितो ह्रदेषु स्थापनीयानि । एवम् इदानीम् अनुष्ठितत्वात् एतत्फलभोगस्थाने स्वर्गे कुमुदोत्पलकमलोपेतानि मधुरोदकानि नित्यपूर्णानि क्रीडासरांसि एनं परितः सेवन्त इत्यर्थः । एतदेवोत्तरत्र[1] विशदीक्रियते "उप त्वा तिष्ठन्तु पुष्करिणीः समन्ताः" इति ॥

षष्ठी ॥ दधिमधुघृतादिलक्षणस्य दिश्यासु कुल्यासु पूर्यमाणस्य रसस्य एताः सर्वा धाराः प्रवाहाः फलभूते स्वर्गे लोके मधुमत् मधुयुक्तं माधुर्यवद् वा पिन्वमानाः सिञ्चन्त्यः त्वा त्वाम् उप यन्तु उपगच्छन्तु ॥ तथा समन्ताः पर्यन्तवर्तिन्यः पुष्करिणीः पुष्करिण्यः सरस्यः हे सवयज्ञानुष्ठातः त्वा त्वाम् उप तिष्ठन्तु उपस्थिताः संगता भवन्तु । कीदृश्यस्ताः । घृ-

1 S′Kd omit °त्र.

तह्रदाः घृतपूर्णह्रदयुक्ताः। मधुकूलाः मधुना माक्षिकेण युक्तानि कूलानि यासां ताः। सुरोदकाः सुरा मद्यमेव उदकं यासां ताः। तथा क्षीरेण उदकेन दध्ना च पूर्णाः॥ एतेषु घृतादिद्रव्येषु यद्यत् कामयसे तेन तेन पूर्णा बहुविधाः पुष्करिण्यः त्वां सेवन्ताम् इत्यर्थः। ✕दध्नेति। "अस्थिदधिसक्थ्यक्ष्णाम् अनङ् उदात्तः" इति अनङ् आदेश उदात्तश्च। अल्लोपे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्॥

सप्तमी॥

चतुरः कुम्भांश्चतुर्धा ददामि क्षीरेण पूर्णाँ उदकेन दध्ना।
एतास्त्वा धारा उप यन्तु सर्वाः स्वर्गे लोके मधुमत् पिन्वमाना उप त्वा तिष्ठन्तु पुष्करिणीः समन्ताः॥ ७॥

चतुरः। कुम्भान्। चतुःऽधा। ददामि। क्षीरेण। पूर्णान्। उदकेन। दध्ना। एताः। त्वा। धाराः। उप। यन्तु। सर्वाः। स्वःऽगे। लोके। मधुऽमत्। पिन्वमानाः। उप। त्वा। तिष्ठन्तु। पुष्करिणीः। समऽअन्ताः॥ ७॥

क्षीरादिद्रव्येण पूर्णान् चतुरः कुम्भान् चतुर्धा प्रागादिदिग्भेदेन चतुष्प्रकारं दधामि दिक्षु निदधामि। एताः क्षीरादिधाराः त्वाम् उप यन्तु इत्यादि योज्यम्॥

अष्टमी॥

इममोदनं नि दधे ब्राह्मणेषु विष्टारिणं लोकजितं स्वर्गम्।
स मे मा क्षेष्ट स्वधया पिन्वमानो विश्वरूपा धेनुः कामदुघा मे अस्तु॥८॥

इमम्। ओदनम्। नि। दधे। ब्राह्मणेषु। विष्टारिणम्। लोकऽजितम्। स्वःऽगम्। सः। मे। मा। क्षेष्ट। स्वधया। पिन्वमानः। विश्वऽरूपा। धेनुः। काम्ऽदुघा। मे। अस्तु॥ ८॥

---

१ D दंधामि. ^{m}S ददामि changed to दंधामि. We with A B B^{P} ^{h}B K ^{m}K R P ^{2}P J V Cs C^{P}.

1 Sâyaṇa omits from mantra 6 the galanta **एतास्त्वा** &c. and thus mixes up mantras 5 and 6.

इमम् पक्वम् ओदनं ब्राह्मणेषु अग्र्यजन्मसु भोक्तृषु नि दधे निक्षिपामि । कीदृशम् । विष्टारिणम् प्रागुक्तविस्तारोपेतं लोकजितम् लोक्यत इति लोकः कर्मफलं तज्जयसाधनम् अत एव स्वर्ग्यम्[1*] स्वर्गशब्दाभिधेयदुःखासंभिन्ननिरतिशयसुखस[2]धनम् ॥ स ओदनः तस्मिन् स्वर्गे लोके स्वधया क्षीरादिरसेन [illegible]र्धमानः मा क्षेष्ट क्षयं मा प्रामोतु । ✕क्षि क्षये । [illegible]मान इति । पिवि मिवि णिवि सेचने । इदित्त्वान्नुम् ✕ । [illegible]नः विश्वरूपा नानाविधफलप्रदरूपा धेनुः सती मे मम [illegible]नफलस्य दोग्ध्री अस्तु भवतु । ✕कामान् दुग्धे इति [illegible]" कब् घश्च" इति कब्घत्वे ✕ ॥

[इति] चतुर्थं सूक्तम् ॥

"यम ओदनम्" इति सूक्तम् अतिमृत्युसवे निरुप्तहविरा[illegible] विनियुक्तम् । सूत्रितं हि । "यम ओदनम् इत्यतिमृत्युम्" इति [८.७] ॥

तथा गोर्यमलजननलक्षणाद्भुतशान्तौ अनेन सूक्तेन गोरभ्युक्षणं होमं च कुर्यात् । सूत्रितं हि । "अथ यत्रैतद् यमसूः[3] यमोदनम् इति तां "शान्त्युदकेन अभ्युक्ष्य [दोहयित्वा] तस्या एव गोर्दुग्धे[4] स्थालीपाकं श्र-"पयित्वा" इत्यादि [कौ°१३.१७] ॥

तत्र प्रथमा ॥

यमौदनं प्रथमजा ऋतस्य प्रजापतिस्तपसा ब्रह्मणेऽपचत् ।
यो लोकानां विधृतिर्नाभिरेपात् तेनौदनेनाति तराणि मृत्युम् ॥ १ ॥

यम् । ओदनम् । प्रथमऽजाः । ऋतस्य । प्रजाऽपतिः । तपसा । ब्रह्मणे । अपऽचत् ॥

---

१. Such is the accent of all our authorities except P̈, which has ब्रह्मणे. This ought to give us तपसा ब्रह्मणेऽप° in the Saṁhitâ.

---

1 S′ Kd स्वर्गम्, but Sâyaṇa's text: स्वर्ग्यम्. 2 S′ Kd °मघ° for °मल°. 3 So S′ Kd. *Kausika*: यमसूर्यमौ जनयति for यमसूः यमोदनम् इति. 4 S′ Kd °दुग्धस्थाली°.

यः। लोकानाम्। विऽधृतिः। न। अभिऽरेषात्। तेन। ओदनेन। अति। तराणि। मृत्युम् ॥ १ ॥

ऋतस्य परब्रह्मणः प्रथमजाः तत्सकाशात् प्रथमम् उत्पन्नो हिरण्यगर्भाख्यः प्रजापतिः तपसा दीक्षादिनियमेन यम् ओदनं ब्रह्मणे स्वकारणभूताय देवाय अपचत्। यश्च ओदनो लोकानाम् पृथिव्यादीनां विधृतिः विधारयिता एकः मुख्या नाभिः शरीरस्य नाभिरिव लोकानां बन्धकः। [नहो भश्च [उ० ४. १२५] इति इञ् प्रत्ययः]। तेनौदनेन दीयमानेन मृत्युम् मरणं तद्धेतुभूतं वा देवम् अति तराणि अतिक्रामामि ॥

द्वितीया ॥

येनातरन् भूतकृतोति मृत्युं यमन्वविन्दन् तपसा श्रमेण।
यं पपाच ब्रह्मणे ब्रह्म पूर्वं तेनौदनेनाति तराणि मृत्युम् ॥ २ ॥

येन। अतरन्। भूतऽकृतः। अति। मृत्युम्। यम्। अनुऽअविन्दन्। तपसा। श्रमेण।
यम्। पपाच। ब्रह्मणे। ब्रह्म। पूर्वम्। तेन। ओदनेन। अति। तराणि। मृत्युम् ॥ २ ॥

भूतकृतः भूतानां प्राणिनां कर्तारो देवाः येन ओदनेन मृत्युम् अत्यतरन् अतिक्रान्तवन्तः। यम् ओदनं तपसा उपवासादिनियमेन श्रमेण शरीरक्लेशेन च अन्वविन्दन् अन्वलभन्त। तथा पूर्वम् प्रथमोत्पन्नं हिरण्यगर्भाख्यं ब्रह्म ब्रह्मणे स्वकारणभूताय यम् ओदनं पपाच। तद्देवत्यं पक्त्वा ब्राह्मणेभ्यः प्रादाद् इत्यर्थः। तेनौदनेनेत्यादि गतम् ॥

तृतीया ॥

यो दाधारं पृथिवीं विश्वभोजसं यो अन्तरिक्षमापृणाद् रसेन।
यो अस्तभ्नाद् दिवमूर्ध्वो महिम्ना तेनौदनेनातितराणि मृत्युम् ॥ ३ ॥

---

१ P P^2 अनुऽअविंदन्. We with J C_P. २ P अभिं.

यः । दाधारं । पृथिवीम् । विश्वऽभोजसम् । यः । अन्तरिक्षम् । आऽअ-
पृणात् । रसेन ।
यः । अस्तभ्नात् । दिवं मह्ना । तेन । ओदनेन । अति ।
तराणि । मृत्युम् ॥ २

य ओदनो विश्वभोजसम् । [illegible] गणिजातस्य भोग्यभूतां पृथिवीम् भूमिं दाधार धृतवान् । [illegible] पालयतीति विश्वभोजाः । भुज पालनाभ्यवहारयोः । अ[illegible]ः ॥ । तथा य ओदनः आहुत्यात्मना परिणतेन स्वक[illegible]क्षम् दिवम् आपृणात् आपूरयति । ॥ पॄ पालनपूरण[illegible] ह्रस्वः ॥ । तथा य ओदनः महिम्ना महत्त्वेन दि[illegible] र्ध्वः अस्तभ्नात् । यथाऽधो न पतति तथा ऊर्ध्वः सन् [illegible] र्थः । एवं विराडात्मना तस्य स्तुतिः ॥ तेनौदनेनेत्यादि गतम् ।

चतुर्थी ॥

यस्मान्मासा निर्मितास्त्रिंशदरा संवत्सरो यस्मान्निर्मितो द्वादशारः ।
अहोरात्रा यं परियन्तो नापुस्तेनौदनेनाति तराणि मृत्युम् ॥ ४ ॥

यस्मात् । मासाः । निःऽमिताः । त्रिंशत्ऽअराः । सम्ऽवत्सरः । यस्मात् ।
निःऽमितः । द्वादशऽअरः ।
अहोरात्राः । यम् । परिऽयन्तः । न । आपुः । तेन । ओदनेन । अति ।
तराणि । मृत्युम् ॥ ४ ॥

यस्मात् ब्रह्मात्मकाद् ओदनाद् मासा द्वादश निर्मिता उत्पन्नाः त्रिंशदराः । रथचक्रावयवाः कीलका अराः । चक्रवद् आवर्तमानत्वाद् मासास्तथा अनेन रूप्यन्ते । त्रिंशत्संख्याकानि दिनानि अरा येषां ते तथोक्ताः । अपि च द्वादशारः द्वादशमासात्मकः संवत्सरो यस्मात् ब्रह्मा-

---

१ So all our authorities. २ $\overset{h}{\mathbf{B}}$ K R $\overset{2}{\mathbf{P}}$ नापुस्ते°. We with A B B^{P} D $\overset{m}{\mathbf{K}}$ $\overset{m}{\mathbf{S}}$ P J V C^{S} C^{P}. ३ P $\overset{2}{\mathbf{P}}$ J K C^{P} अहोरात्रा, without the visarga. ४ K अपुः. $\overset{2}{\mathbf{P}}$ आपुः.

त्मकाद् ओदनाद् निर्मितः उत्पादितः। अहानि च रात्रयश्च अहोरात्राः। ॥"अहः सर्वैकदेश०" इति समासान्तः अच् प्रत्ययः॥। ते च पर्यन्तः[1] पर्यावर्तमानाः यं ब्रह्मात्मकम् ओदनं [नापुः] न प्रापुः। तेनौदनेन इत्योदनस्य माससंवत्सराहोरात्रातिवर्तित्वेन स्तुतिः ॥

पञ्चमी ॥

यः प्राणदः प्राणदवान् बभूव यस्मै लोका घृतवन्तः क्षरन्ति।
ज्योतिष्मतीः प्रदिशो यस्य सर्वास्तेनौदनेनाति तराणि मृत्युम् ॥ ५ ॥

यः। प्राणदः। प्राणदवान्। बभूव। यस्मै। लोकाः। घृतवन्तः। क्षरन्ति। ज्योतिष्मतीः। प्रदिशः। यस्य। सर्वाः। तेन। ओदनेन। अति। तराणि। मृत्युम् ॥ ५ ॥

यः ओदनः प्राणदवान्* प्राणैर्जिगमिषुभिर्दूयन्ते परितप्यन्ते इति प्राणाः मुमूर्षवः। तेषां प्राणदः प्राणप्रदो बभूव भवति। ॥प्राणदवान्* इति। दूङ् परितापे। अस्मात् प्राणशब्दोपपदात् क्विप्। अकारोपजनश्छान्दसः॥। यस्मै ब्रह्मात्मकाय ओदनाय सर्वे लोकाः घृतवन्तः घृतधारायुक्ताः क्षरन्ति स्रवन्ति। यस्य ओदनस्य तेजसा सर्वाः प्रदिशः प्रकृष्टाः प्राच्याद्या ज्योतिष्मतीः प्रशस्ततेजस्का भवन्ति ॥ तेनौदनेनेत्यादि गतम् ॥

षष्ठी ॥

यस्मात् पक्वादमृतं संबभूव यो गायत्र्या अधिपतिर्बभूव।
यस्मिन् वेदा निहिता विश्वरूपास्तेनौदनेनाति तराणि मृत्युम् ॥ ६ ॥

यस्मात्। पक्वात्। अमृतम्। सम्ऽबभूव। यः। गायत्र्याः। अधिऽपतिः। बभूव। यस्मिन्। वेदाः। निऽहिताः। विश्वऽरूपाः। तेन। ओदनेन। अति। तराणि। मृत्युम् ॥ ६ ॥

---

१ K °दवां बभूव with Sâyaṇa. We read प्राणदवान् ब° with A B B^{p} B^{h} D K^{m} R S^{m} P P^{2} J V C^{s}. २ So P P^{2} J K C^{p}.

---

1 So S′ Kd. पर्यतः. Sâyaṇa's text also reads: पर्यतः.

पक्वात् पाकोत्पन्नाद् यस्माद् ओदनाद् अमृतम् द्युलोकस्थं संबभूव उत्पन्नम् । यश्च गायत्र्याः छन्दसाम् अग्रिमाया अधिपतिः अधिदेवता बभूव भवति । यस्मिन् ओदने वेदाः ऋग्यजुःसामाद्याः विश्वरूपाः शाखाभेदेन आसादितवैश्वरूप्या निहिताः निक्षिप्ताः । अन्तरवस्थिता इत्यर्थः । पक्वात् इति । "पचो वः" इति निष्ठातकारस्य वत्वम् ॥

सप्तमी ॥

अव बाधे द्विषन्तं देवपीयुं सपत्ना ये मेप ते भवन्तु ।
ब्रह्मौदनं विश्वजितं पचामि शृण्वन्तु मे श्रद्धानस्य देवाः ॥ ७ ॥

अव । बाधे । द्विषन्तम् । देवऽपीयुम् । सऽपत्नाः । ये । मे । अप । ते । भवन्तु ।
ब्रह्मऽओदनम् । विश्वऽजितम् । पचामि । शृण्वन्तु । मे । श्रत्ऽदधानस्य ।
देवाः ॥ ७ ॥

द्विषन्तम् हिंसन्तं शत्रुम् अहम् अव बाधे अपहन्मि । तथा देवपीयून्* । पीयतिर्वधकर्मा । "पीयति त्वो अनु त्वो गृणाति" [ऋ० १. १४७. २] इति हि निगमः । देवानां हिंसकान् अप अपहन्मि । अतो मे मम ये सपत्नाः शत्रवः ते अपहता भवन्तु । तदर्थम् अहं विश्वजितम् सर्वस्य जेतारं ब्रह्मौदनम् । ब्राह्मणेभ्यो देय ओदनो ब्रह्मौदनः । तं पचामि संस्करोमि । श्रद्दधानस्य श्रद्धायुक्तस्य मे मम वाक्यं देवा यष्टव्याः शृण्वन्तु आकर्णयन्तु ॥

[इति] पञ्चमं सूक्तम् ॥

सप्तमोनुवाकः ॥

अष्टमेनुवाके पञ्च सूक्तानि । तत्र "तान्तसत्यौजाः" [४. ३६] "त्वया पूर्वम" [४. ३७] इति द्वयोः सूक्तयोश्चातनगणे पाठात् "चातनानाम् अपनोदनेन व्याख्यातम" [कौ० ४. १] इति विहितेषु भूतग्रहाद्युच्चाटनकर्मसु विनियोगः ॥

---

१ D °पीयं; K °पीयून् with Sâyaṇa. We with A B Bp B^{h} K^{m} R S^{m} P P^{2} J V Cs Cp.

1 S′ Kd °मेदन. 2 S′ Kd अंतरप्रस्थि°.

तत्र प्रथमा ॥

तान्त्सत्यौजाः प्र दहत्वग्निर्वैश्वानरो वृषा ।
यो नो दुरस्याद् दिप्साच्चाथो यो नो अरातियात् ॥ १ ॥

तान् । सत्यऽओजाः । प्र । दहतु । अग्निः । वैश्वानरः । वृषा ।
यः । नः । दुरस्यात् । दिप्सात् । च । अथो इति । यः । नः । अरा-
तिऽयात् ॥ १ ॥

सत्यौजाः सत्यम् अवितथम् ओजो बलं यस्य तादृशो वैश्वानरः विश्वनरहितः वृषा सेचनसमर्थः पुंस्त्वोपेतः अग्निः तान् शत्रून् प्र दहतु प्रकर्षेण भस्मीकरोतु । तच्छब्दनिर्दिष्टानेव दर्शयति उत्तरार्धेन । यः शत्रुः नः अस्मान् दुरस्यात् दुष्टानिव आचरेत् । असासु अविद्यमानं दोषम् उद्भावयेद् इत्यर्थः । दुष्टशब्दात् "उपमानाद् आचारे" इति क्यच् "दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति" इति निपातनात् क्यचि दुष्टशब्दस्य दुरस्भावः । तदन्तात् लेटि आडागमः । तथा यश्च शत्रुः अस्मान् दिप्सात् धिप्सेत् हिंसितुम् इच्छेत् । दन्भु दम्भे । "सनीवन्तर्ध०" इति इटो विकल्पनाद् अभावः । "दम्भ इच्च" इति इत्त्वम् । भष्भावाभावश्छान्दसः । पूर्ववत् लेटि आडागमः । अथो अपि च यः शत्रुः [नः] अस्मान् [अरातियात्] अरातिवद् आचरेत् अस्मद्विषये शत्रुभावम् अनुतिष्ठति । तान् सर्वान् प्र दहतु इति संबन्धः ॥

द्वितीया ॥

यो नो दिप्साददिप्सतो दिप्सतो यश्च दिप्सति ।
वैश्वानरस्य दंष्ट्रयोरग्नेरपि दधामि तम् ॥ २ ॥

यः । नः । दिप्सत् । अदिप्सतः । दिप्सतः । यः । च । दिप्सति ।
वैश्वानरस्य । दंष्ट्रयोः । अग्नेः । अपि । दधामि । तम् ॥ २ ॥

---

१ P $\overset{2}{\text{P}}$ अरातिऽयत्. We with J K Cr. २ So all our MSS. and Vaidikas.

---

1 S′ Kd अमे ओजो for ओजो.

यः शत्रुः अदिप्सतः दम्भितुं[1] हिंसितुम् अनिच्छतः नः अस्मान् दिप्सात्[2] हिंसितुम् इच्छेत्। ॥पूर्ववद् दन्भेः सन्नन्तात् लेटि आडागमः[3]॥ तथा दिप्सतः हिंसितुम् इच्छतः अस्मान् यः शत्रुः दिप्सति दम्भितुम् इच्छति। जिहिंसिषतीत्यर्थः। वैश्वानरस्य विश्वनरहितस्य अग्नेः दंष्ट्रयोः खादनसाधनयोर्दन्तविशेषयोः आस्यमध्यस्थयोः तम् उभयविधं शत्रुम् अपि दधामि प्रक्षिपामि। ताभ्यां पीडितो विनश्यतु इत्यर्थः॥

तृतीया॥

य आगरे मृगयन्ते प्रतिक्रोशेमावास्ये।
क्रव्यादो अन्यान् दिप्सतः सर्वांस्तान्त्सहसा सहे॥ ३॥

ये। आडगरे। मृगयन्ते। प्रतिऽक्रोशे[2]। अमाऽवास्ये।
क्रव्यऽअदः। अन्यान्। दिप्सतः। सर्वान्। तान्। सहसा। सहे॥ ३॥

आगीर्यते समन्ताद् भज्यते मांसशोणितादिकम् अत्रेति आगरो युद्धरङ्गः। ॥गॄ निगरणे। "ऋदोरप्" इति अधिकरणे अप्॥। तत्र [ये] क्रव्यादः मांसभक्षकाः पिशाचादयः मृगयन्ते अस्मान् हिंसितुम् अन्विच्छन्ति। ॥मृग अन्वेषणे। चुरादिरदन्तः॥। तथा प्रतिक्रोशे प्रतिकूलैः शत्रुभिः कृते आक्रोशे अमावास्ये। अमा सूर्येण सह चन्द्रमा वसत्यस्यां तिथौ इति अमावास्या। ॥अधिकरणे ण्यत्॥। तत्र जातः उत्पन्नः अर्धरात्रकालः अमावास्यः। ॥"अमावास्याया वा" "अ च" इति अकारप्रत्ययः॥। तादृशे अमावास्यासंबन्धिनि अर्धरात्रकाले क्रव्यादः पिशाचाः अन्यान् दिप्सन्तिं हिंसितुम् इच्छन्ति। नष्टचन्द्रायास्तस्या अर्धरात्रे हि रक्षसां संचरकालः। तथा च तैत्तिरीयकम्। "निशितायां हि रक्षांसि प्रेरते संप्रेर्णान्येवैनानि हन्ति" [तै० सं० २.२.२.३] इति। एतच्च आपस्तम्बेन स्पष्टीकृतम्। "अग्नये रक्षोघ्ने

---

१ So all our authorities. २ P P[2] J C[P] प्रतिऽक्रोशे. We with K.

---

1 S′ Kd दन्भितुं. 2 S′ Kd दिप्सत्. See, however, his grammatical note. 3 S′ Kd wrongly अडा°. 4 S′ Kd °गीर्यते. 5 S′ Kd भज्यंते. 6 S′ Kd आगारो. 7 S′ Kd आ for अमा. 8 S′ Kd वस्यां for वसत्यस्यां.

पुरोडाशम् अष्टाकपालम् अमावास्यायां निशाया निर्वपेत्" इति । तान् सर्वान् पिशाचादीन् सहसा बलेन मन्त्रप्रभावजनितेन सहे अभिभवामि ॥

चतुर्थी ॥

सहे॑ पिशा॒चान्त्सह॑सै॒षां द्रवि॑णं ददे ।
सर्वा॑न् दुरस्य॒तो ह॑न्मि॒ सं मे॒ आकू॑तिर्ऋध्यताम् ॥ ४ ॥
सहे॑ । पिशा॒चान् । सह॑सा । ए॒षाम् । द्रवि॑णम् । द॒दे॒ ।
सर्वा॑न् । दुः॒ऽय॒तः । ह॒न्मि॒ । सम् । मे॒ । आऽकू॑तिः । ऋ॒ध्य॒ता॒म् ॥ ४ ॥

सहसा बलेन पिशाचान् पिशिताशिनो राक्षसान् सहे अभिभवामि । एषाम् रक्षसां द्रविणम् बलम् आ॑ ददे स्वीकरोमि । नष्टवीर्यान् करोमीत्यर्थः । दुरस्यतः अस्मद्विषयं दुष्टत्वम् इच्छतः सर्वान् शत्रून् हन्मि हिनस्मि नाशयामि । नः॑ अस्माकम् आकूतिः इष्टफलविषयः संकल्पः शं॑ सुखं यथा भवति तथा [ऋध्यताम्] समृध्यताम् । समृद्धफला भवतु इत्यर्थः । ऋधु वृद्धौ ॥

पञ्चमी ॥

ये दे॒वास्तेन॒ हास॑न्ते॒ सूर्ये॑ण मिमते ज॒वम् ।
न॒दीषु॒ पर्व॑तेषु॒ ये सं तैः प॒शुभि॑र्विदे ॥ ५ ॥
ये । दे॒वाः । तेन॑ । हास॑न्ते । सूर्ये॑ण । मि॒म॒ते॒ । ज॒वम् ।
न॒दीषु॑ । पर्व॑तेषु । ये । सम् । तैः । प॒शुऽभिः॑ । वि॒दे॒ ॥ ५ ॥

देवाः दीव्यन्तो ये पिशाचाद्याः तेन प्रसिद्धेन विकारेण हासन्ते आविष्टं पुरुषं हासयन्ति । हसे हसने । अस्माद् ण्यन्तात् लटि "णिचश्च" इति आत्मनेपदम् । "छन्दस्युभयथा" इति शप आर्धधातुकत्वात् "णेरनिटि" इति णिलोपः । तथा सूर्येण समानं जवम् वेगं मिमते कुर्वन्ति । सूर्यप्रभावत् शीघ्रं व्याप्नुवन्तीत्यर्थः । तथा नदीषु पर्वतेषु च विजनस्थाने ये संचरन्ति तैः सर्वैर्वियुक्तोहं तत्कृतप्रति-

१ So A B D K K S Cs. P P J K CP omit the आ of Sâyaṇa in the pada text. २ K न् with Sâyaṇa.

बन्धविरहात् पशुभिः गोमहिषाद्यैः सं विदे संजाने । तान् प्राप्नोमीत्यर्थः । "समो गम्यृच्छि°" इति आत्मनेपदम् ॥ यद्वा हे देवा अघ्न्यादयः ये पशवः तेन रक्षःपिशाचादिना हासन्ते जिहास्यन्ते । ओहाक् त्यागे इत्यस्मात् सन् । "छन्दसि वेति वक्तव्यम्" इति वचनाद् द्विर्वचनाभावः । कर्मणि कर्तृप्रत्ययश्छान्दसः । परित्यज्य पलायमानाश्च [ये] पशवः सूर्येण साकं वेगं कुर्वन्ति । शीघ्रं धावन्ति । ये च पशवो नदीषु पर्वतेषु च संचरन्ति युष्मत्प्रसादात् तन्निरोधकान् राक्षसादीन् अपहत्य तैः सर्वैः पशुभिरहं सं विदे इति सामानाधिकरण्येन संबन्धः ॥

षष्ठी ॥

तपनो अस्मि पिशाचानां व्याघ्रो गोमतामिव ।
श्वानः सिंहमिव दृष्ट्वा ते न विन्दन्ते न्यञ्चनम् ॥ ६ ॥

तपनः । अस्मि । पिशाचानाम् । व्याघ्रः । गोमतामऽइव ।
श्वानः । सिंहमऽइव । दृष्ट्वा । ते । न । विन्दन्ते । निऽअञ्चनम् ॥ ६ ॥

पिशाचानाम् रक्षसाम् अहं तपनः मन्त्रसामर्थ्येन तापकोस्मि गोमताम् गोस्वामिनां व्याघ्र इव । यथा व्याघ्रो गवां हिंसकत्वेन तत्स्वामिनां तापको भवति तथेत्यर्थः । यथा सिंहं दृष्ट्वा श्वानो भीत्या निलीयन्ते तथा ते पिशाचाः अस्मन्मन्त्रप्रभावं दृष्ट्वा न्यञ्चनम् न्यग्भवनम् अधोगतिम् अनु विन्दन्ते अनुलक्ष्य लभन्ते ॥

सप्तमी ॥

न पिशाचैः सं शक्नोमि न स्तेनैर्न वनर्गुभिः ।
पिशाचास्तस्मान्नश्यन्ति यमहं ग्राममाविशे ॥ ७ ॥

न । पिशाचैः । सम् । शक्नोमि । न । स्तेनैः । न । वनर्गुऽभिः ।
पिशाचाः । तस्मात् । नश्यन्ति । यम् । अहम् । ग्रामम् । आऽविशे ॥ ७ ॥

नाहं पिशाचैः सं शक्नोमि संशक्तः अनुप्रविष्टो न भवामि । तथा स्तेनैश्चोरैः प्रच्छन्नवृत्तिभिर्ग्रामगतैः न सं शक्नोमि न संगतो भवामि ।

1 S' Kd प्राप्नोती°.

न वनर्गुभिः । वनर्गुशब्दश्चोरनाम । वनर्गू वनगामिनौ इति यास्कः [नि० ३. १४] । वनगामिभिश्चोरैरपि न संशक्तोसि । तथा पिशाचा राक्षसाः तस्माद् ग्रामान्निर्गत्य नश्यन्तु नष्टा भवन्तु । यं ग्रामम् अहम् आविशे अनुविश्य वसामि । तस्माद् मदधिष्ठिताद् देशात् पलायन्ताम् इत्यर्थः ॥

अष्टमी ॥

यं ग्रामंमाविशति इदमुग्रं सहो मम ।
पिशाचास्तस्मान्नश्यन्ति न पापमुप जानते ॥ ८ ॥

यम् । ग्रामंम् । आऽविशति । इदम् । उग्रम् । सहः । मम ।
पिशाचाः । तस्मात् । नश्यन्ति । न । पापम् । उप । जानते ॥ ८ ॥

मम मदीयम् इदम् उग्रम् तीक्ष्णं मन्त्रप्रभावजनितं सहः बलं यं ग्रामम् आविशते अनुप्रविश्य वर्तते तस्माद् ग्रामात् पिशाचा नश्यन्ति तत्र न प्रविशन्ति । यदि प्रविविक्षन्ति नश्यन्त्येवेत्यर्थः । अतो न तद्विषयं पापम् हिंसारूपम् उप जानते तत्रत्या जनाः । रक्षःपिशाचादिकृतम् उपद्रवं नावबुध्यन्त इत्यर्थः ॥

नवमी ॥

ये मा क्रोधयन्ति लपिता हस्तिनं मशका इव ।
तानहं मन्ये दुर्हितान् जने अल्पशयूनिव ॥ ९ ॥

ये । मा । क्रोधयन्ति । लपिताः । हस्तिनम् । मशकाःऽइव ।
तान् । अहम् । मन्ये । दुःऽहितान् । जने । अल्पशयून्ऽइव ॥ ९ ॥

ये पिशाचाद्या लिपिताः उपदिग्धाः संक्रान्ताः मा मां क्रोधयन्ति । मशकाः दंशकाः क्षुद्रजन्तवो हस्तिशरीरम् आश्रिता हस्तिनम् गजमिव । तान् सर्वान् दुर्हितान् दुष्टहननेन विषयीकृतान् अहं मन्ये जानामि । तत्र

---

१ K V लिपिता with Sâyaṇa. We with A B Bp B^h D K^m R S^m P P^2 J V Cs Cp. २ A D K^m R Cs दुर्हितां जने. B^h S^m V दुर्हितान् जने. ३ P P^2 J Cp लुपिता, without the visarga. We with Sâyaṇa. ४ K दुःऽहंतान्. We with P P^2 J Cp.

निदर्शनम् आह जन इति । जंने जनसंघे[1] तत्संचारस्थले अवस्थितान् अल्पशयून् परिमाणतः अल्पकायाः शयनस्वभावाः संचाराक्षमाः कीटा अल्पशयवः । ते यथा प्राणिसंचारेण हन्यन्ते तद्वद् अहम् अनायासेन अपुनरुद्भवं हन्मीत्यर्थः ॥

दशमी ॥

अभि तं निर्ऋतिर्धत्तामश्वमिवाश्वाभिधान्या ।
मल्वो यो मह्यं क्रुध्यति स उ पाशान्न मुच्यते[1] ॥ १० ॥

अभि । तम् । निःऽऋतिः । धत्ताम् । अश्वमऽइव । अश्वऽअभिधान्या ।
मल्वः । यः । मह्यम् । क्रुध्यति । सः । ऊं इति । पाशात् । न । मुच्यते[2] ॥ १० ॥

तं शत्रुं निर्ऋतिः पापदेवता अभि धत्ताम् स्वकीयैः पाशैर्बध्नातु । तत्र दृष्टान्तः अश्वमिवेति । अश्वम्[2] अभिदधाति बध्नात्यनया इति अश्वाभिधानी रज्जुः । ॥ करणे ल्युट् । टित्त्वाद् ङीप् ॥ । तया यथा दुष्टम् अश्वं बध्नन्ति तद्वद् इत्यर्थः । तथा यो मल्वः शत्रुः मह्यं क्रुध्यति मद्विषयं कोपं करोति । ॥ "क्रुधद्रुहेर्ष्यासूयार्थानाम्°" इति मह्यम् इति चतुर्थी ॥ । स उ स एव शत्रुः पाशात् निर्ऋतिसंबन्धिनः न मुच्यसे* मुक्तो न भवतु । बद्ध एव वर्तताम् इत्यर्थः ॥

[इति] अष्टमेनुवाके प्रथमं सूक्तम् ॥

"त्वया पूर्वम्" इति सूक्तस्य गणप्रयुक्तो विनियोगः पूर्वसूक्तेन सह उक्तः ॥

तथा सर्वभूतग्रहभैषज्यार्थं शमीपर्णचूर्णं शमीफलमध्ये कृत्वा अनेन सूक्तेन अभिमन्त्र्य आविष्टग्रहं पुरुषं भोजयेत् । अलंकारेण सह धारयेत् ॥

तथा व्याधितगृहं परिकिरेत् ॥

सूत्रितं हि । "त्वया पूर्वम् इति कोशेन शमीचूर्णानि भक्तेलंकारे शालां परितनोति" इति [कौ° ४. ४] ॥

---

१ K मुच्यसे with Sâyaṇa. We with A B Bᵖ B[h] D K[m] R S[m] P P[2] J V Cˢ Cᵖ. २ K मुच्यसे.

---

1 S′ Kd जनेजनेसंघे. 2 S′ Kd अश्ववत्. 3 S′ Kd अभिधाति. 4 S′ Kd शमीपूर्णानिभक्तो° for शमीचूर्णानि भक्ते° which we with *Kaus'ika*.

"गान्धर्वीम् अश्वक्षये" इति [न० क० १७] विहितायां गान्धर्व्याख्याया महाशान्तौ गणप्रयुक्तेनानेन[1] सूक्तेन गुल्गुल्वादिद्रव्यहोमोभिहितः। यथा।

शिग्रुं हुत्वा जलं चैव गल्गुलुं विषमेव च।
पिप्पलीं कृष्णलीं चैव जुहुयाच्चातनेन तु॥
ओषधीं सहमानां तु पृश्निपर्णीं तथापराम्।
अजशृङ्गीं समस्यैताम् अमन्तं जुहुयात् सकृत्॥

इति [न० क० २१]॥

तत्र प्रथमा॥

त्वया पूर्वमथर्वाणो जघ्नू रक्षांस्योषधे।
त्वया जघान कश्यपस्त्वया कण्वो अगस्त्यः॥ १॥

त्वया। पूर्वम्। अथर्वाणः। जघ्नुः। रक्षांसि। ओषधे।
त्वया। जघान। कश्यपः। त्वया। कण्वः। अगस्त्यः॥ १॥

अत्र सहमानादीनां विनियोगोक्तानाम् अन्यतमा संबोध्यते। हे ओषधे त्वया साधनेन पूर्वम् पुरा अथर्वाणः महर्षयः रक्षांसि जघ्नुः हतवन्तः। हन्तेर्लिटि उसि "गमहन०" इति उपधालोपः। तस्य स्थानिवत्त्वाद् द्विर्वचनम्। तथा कश्यपः महर्षिः त्वयैव साधनेन तदनन्तरं रक्षांसि जघान कण्वो अगस्त्यश्च। अतः अहमपि त्वद्धारणहोमादिना रक्षांसि हन्मीत्यर्थः॥

द्वितीया॥

त्वया वयमप्सरसो गन्धर्वाञ्चातयामहे।
अजशृङ्गयज रक्षः सर्वान् गन्धेन नाशय॥ २॥

त्वया। वयम्। अप्सरसः। गन्धर्वान्। चातयामहे।
अजऽशृङ्गि। अज। रक्षः। सर्वान्। गन्धेन। नाशय॥ २॥

अजशृङ्गी विषाणी स्यात् इत्यभिधानकोशप्रसिद्धा अजशृङ्गी। सात्र संबोध्या। अजशृङ्गाकृतिफलयुक्तत्वाद् अजशृङ्गीत्युच्यते। हे तादृशि ओषधे

---

१ P अजशृंगि. We with P² J K Cp.

---

1 S' Kd °प्रयुक्त्यानेन.

त्वया साधनेन वयम् अप्सरसो गन्धर्वांश्च अस्मदुपद्रवकारिणः चातयामहे नाशयामः । ‡चातयतिर्नाशने इति यास्कः [नि° ६.३०]‡ । हे अजशृङ्गि त्वं रक्षः राक्षसजातिम् अज अस्मात् स्थानात् क्षिप मच्यावय । ‡अज गतिक्षेपणयोः‡ ॥ किं बहुना । सर्वान् रक्षःपिशाचादीन् त्वदीयेन उग्रेण गन्धेन नाशय अदर्शनं प्रापय ॥

नदीं यन्त्वप्सरसोपां तारमवंश्वसम् ।
गुल्गुलूः पीला नलद्यौ३क्षगंन्धिः प्रमंन्दनी ।
तत् परेताप्सरसः प्रतिबुद्धा अभूतन ॥ ३ ॥

नदीम् । यन्तु । अप्सरसः । अपाम् । तारम् । अंवऽश्वसम् ।
गुल्गुलूः । पीला । नलदी । औक्षऽगंन्धिः । प्रऽमन्दनी ।
तत् । परा । इत । अप्सँरसः । प्रतिऽबुद्धाः । अभूतन ॥ ३ ॥

यत्रांश्वत्था न्यग्रोधा महावृक्षाः शिखण्डिनः ।
तंत् परेताप्सरसः प्रतिबुद्धा अभूतन ॥ ४ ॥

यत्र । अश्वत्थाः । न्यग्रोधाः । महाऽवृक्षाः । शिखण्डिनः ।
तत् । परा । इत । अप्सरसः । प्रतिऽबुद्धाः । अभूतन ॥ ४ ॥

यत्र वः प्रेङ्खा हरिता अर्जुना उत यत्रांघाटाः [10]कंर्कर्यः संवदन्ति ।
तत् परेताप्सरसः प्रतिबुद्धा अभूतन ॥ ५ ॥

यत्र । वः । प्रऽईङ्खाः । हरिताः । अर्जुनाः । उत । यत्र । आघाटाः ।
[11]कंर्कर्यः । समऽवदन्ति ।
तत् । परा । इत । अप्सरसः । प्रतिऽबुद्धाः । अभूतन ॥ ५ ॥

---

१ $^{h\,m}$B S नदी. २ So all our MSS. and Vaidikas. ३ A J K गुग्गुलूः. We with B B^{P} ^{h}B ^{m}D ^{m}K R ^{m}S P ^{2}P V C^{s} C^{P}. ४ ^{h}B C^{s} प्रमोदनी. We with A B B^{P} D K ^{m}K R ^{m}S P ^{2}P J V. ५ K °वद्धा with Sâyaṇa. We with all the rest of our authorities. ६ So we with ^{2}P J K C^{P}. ७ P अप्सरसः. We with ^{2}P J K C^{P}. ८ K °वद्धाः. ९ We repeat this line with A B B^{P} ^{h}B D K ^{m}K R ^{m}S P ^{2}P J V. १० B B^{P} ^{h}B D R P J कर्कर्यः. We with K ^{m}K A ^{m}S ^{2}P V. ११ J P कर्कयः. We with ^{2}P K C^{P}. १२ P ^{3}P अप्सरसः. We with J K C^{P}. १३ K °वद्धाः.

तृतीया ॥ अप्सरसः गन्धर्वाणां स्त्रियः अस्मदीयात् स्थानात् प्रच्यावि-ताः नदीम् नद्युपलक्षितं स्वावासस्थानं यन्तु गच्छन्तु । तत्र [दृष्टान्तः] । नादेयीनाम् अपां तारम् तारयितारं स्वसम् [इव] सुष्ठु नौप्रेरणकुशलं यथा तितीर्षवो जना उपगच्छन्ति । एतत् केन साधनेन इति चेत् त-त्राह गुल्गुलूरिति । गुल्गुल्वादीनि पञ्च होमद्रव्याणि विनियोगशास्त्रम-सिद्धानि । तेषां हवनेन भीता भवन्त्य इत्यर्थः ॥

चतुर्थी ॥ हे अप्सरसः तत् प्रसिद्धं स्वावासस्थानं परेत परागच्छत पराङ्मुख्यः अस्मान् अनवेक्षमाणाः प्रामुत । गत्वा च तत्रैव प्रतिबद्धाः निरुद्धगतयः अभूतन भवत । छान्दसो भवतेर्लुङ् । "तप्तनप्तन-थनाश्च" इति तस्य तनादेशः । स्थानं विशेष्यते । यत्र यस्मिन् स्थाने अश्वत्था न्यग्रोधा अन्ये च प्लक्षादयो महावृक्षाः शिखण्डिनः म-यूराश्च सन्ति । शिखण्डिसद्भावेन विजनत्वं सूचितम् । तत् स्थानं ग-च्छतेति संबन्धः । अश्वत्थादीनां तदावासस्थानता तैत्तिरीये समाम्नाता । "नैयग्रोध औदुम्बर आश्वत्थः प्लाक्ष इतीध्मो भवत्येते वै गन्धर्वाप्सर-सां गृहाः" इति [तै° सं° ३. ४. ८. ४] । महावृक्षा इति । म-हान्तश्च ते वृक्षा महावृक्षाः । "आन्महतः°" इति आत्वम् ॥

पञ्चमी ॥ हे अप्सरसः वः युष्माकं क्रीडनाय प्रेङ्खा दोला यत्र य-स्मिन् स्थाने निबद्धा वर्तन्ते । हरिताः हरिद्वर्णा अर्जुनाः धवलाश्चेति प्रे-ङ्खानां विशेषणम् । यद्वा हरिद्वर्णाः श्यामला वृक्षाः अर्जुनाख्याश्च य-स्मिन् देशे सन्ति । तथा यत्र यस्मिन् देशे आघाटाः । आङ्पू-र्वात् हन्तेः कर्मणि घञ् । छान्दसं टत्वम् । आहन्यमाना वाद्य-माना: कर्कर्यः वाद्यविशेषाः संवदन्ति युष्मन्नृत्तानुगुण्येन समानं ध्वनन्ति तत् स्थानं परेतेत्यादि पूर्ववद् योज्यम् ॥

षष्ठी ॥

एयमंगन्नोषधीनां वीरुधां वीर्यावती ।
अजशृङ्ग्यृराट्की तीक्ष्णशृङ्गी व्यृषतु ॥ ६ ॥

---

1 S′ Kd नोप्रेर°. 2 S′ Kd °शास्त्रानिप्रसि°. 3 S′ Kd डोला. 4 S′ Kd हरितो.

आ । इयम् । अगन् । ओषधीनाम् । वीरुधाम् । वीर्यवती ।
अजशृङ्गी । अराटकी । तीक्ष्णशृङ्गी । वि । वृषतु ॥ ६ ॥

ओषधीनाम् । ओषः पाकः आसु धीयत इति ओषधयः । तासाम् ओषधीनां वीरुधाम् विरोहणस्वभावानाम् अन्यासां च लतानां मध्ये वीर्यावती अतिशयितसामर्थ्ययुक्ता इयम् अजशृङ्गी ओषधिः आगन् आगमत् । अस्मदुपद्रवं नाशयितुम् आगता । गमेर्लुङि "मन्त्रे घस०" इति च्लेर्लुक् । "हल्ङ्या०" इत्यादिलोपे "मो नो धातोः" इति नत्वम । सा च अजशृङ्गी अराटकी । अरा अदातारो हिंसकाः तान् अस्मात् स्थानात् आटयति उच्चाटयतीति अराटकी । तीक्ष्णशृङ्गी तीक्ष्णे उग्रगन्धे शृङ्गाकृती फले यस्याः एवंगुणविशिष्टा सा रक्षःपिशाचादीन् व्यृषतु हिनस्तु ॥

सप्तमी ॥

आनृत्यतः शिखण्डिनो गन्धर्वस्याप्सरापतेः ।
भिनद्मि मुष्कावपि यामि शेपः ॥ ७ ॥
आऽनृत्यतः । शिखण्डिनः । गन्धर्वस्य । अप्सराऽपतेः ।
भिनद्मि । मुष्कौ । अपि । यामि । शेपः ॥ ७ ॥

आनृत्यतः समन्ताद् नर्तनं कुर्वतः शिखण्डिनः शिखण्डाश्चूडाः तद्वतः । यद्वा शिखण्डी मयूरः । लुप्तोपमम् एतत् । तद्वद् आनृत्यतः । गन्धर्वस्य । गीतिरूपा वाचो गाः धारयतीति गन्धर्वः । "गवि गन् धृञो वः" इति धृञो वप्रत्ययो गोशब्दस्य गन्भावश्च । ईदृशस्य अप्सरापतेः । अप्सरस्शब्द आकारान्तो वेदे प्रसिद्धः । अप्सरसाम् अधिपतेः अस्मान् जिघांसतो गन्धर्वराजस्य मुष्कौ आण्डौ भिनद्मि विदारयामि संचूर्णयामि । तन्मध्यवर्तिं शेपः पुंस्प्रजननं च अपि यामि अपिगतं निरुद्धं करोमि । रिरंसवो हि गन्धर्वाः । तत्साधनत्रिकभेदनेन भीता अस्मात् स्थानात् पलायन्ताम् इत्यर्थः ॥

१ So we read with all our authorities, none of which give the यामि of Rw.

1 S′Kd आराटकी. 2 S′Kd कुर्वतः. 3 S′Kd अकारा°. 4 S′Kd अस्मान्.

अष्टमी ॥

भीमा इन्द्रस्य हेतयः शतमृष्टीरयस्मयीः।
ताभिर्हविरदान् गन्धर्वानवकादान् व्यृषतु ॥ ८ ॥

भीमाः। इन्द्रस्य। हेतयः। शतम्। ऋष्टीः। अयस्मयीः।
ताभिः। हविःऽअदान्। गन्धर्वान्। अवकाऽअदान्। वि। ऋषतु ॥ ८ ॥

भीमाः बिभ्यत्येभ्य इति भीमाः। भिय: षुग्वा [उ० १. १४५] इति औणादिको मक्प्रत्ययः "भीमादयोपादाने" इति अपादानेर्थे भवति। शतपृष्टीः शतस्पर्शनाः शतधाराः अयस्मयीः अयस्मय्यः अयोविकारा एवंभूताः इन्द्रस्य या हेतयः हननसाधनानि आयुधानि सन्ति ताभिर्हेतिभिः [अभि]ह्रदान् अभिगताह्लादान् प्राप्तजलाशयान् वा अवकादान्। अवका जलोपरिस्थाः शैवालविशेषाः तान् अदन्ति भक्षयन्तीति अवकादाः। तान् गन्धर्वान् व्यृषतु इन्द्रो हिनस्तु ॥

नवमी ॥

भीमा इन्द्रस्य हेतयः शतमृष्टीर्हिरण्ययीः।
ताभिर्हविरदान् गन्धर्वानवकादान् व्यृषतु ॥ ९ ॥

भीमाः। इन्द्रस्य। हेतयः। शतम्। ऋष्टीः। हिरण्ययीः।
ताभिः। हविःऽअदान्। गन्धर्वान्। अवकाऽअदान्। वि। ऋषतु ॥ ९ ॥

हिरण्ययीः हिरण्मय्यः हिरण्यस्य विकाराः स्वर्णनिर्मिताः। इत्येतावानेव विशेषः। अन्यत् पूर्ववद् व्याख्येयम् ॥

दशमी ॥

अवकादानभिशोचान्प्सु ज्योतय मामकान्।
पिशाचान् सर्वानोषधे प्र मृणीहि सहस्व च ॥ १० ॥

---

१ K शतपृष्टी° with Sâyaṇa. We with A B Bp B^{h} D K^{m} R S^{m} P P^{2} J V Cs. २ B Bp B^{h} D K K^{m} V Cs °पत. We with A R S^{m}. ३ So we with P P^{2} J K Cp. ४ So we with P P^{2} J K. J corrects its °तु to °त्. Cp °त. ५ K द्योतय with Sâyaṇa. We with A B Bp B^{h} D K^{m} R S^{m} P P^{2} J V Cs.

अवकाऽअदान् । अभिऽशोचान् । अप्ऽसु । ज्योतय । मामकान् ।
पिशाचान् । सर्वान् । ओषधे । प्र । मृणीहि । सहस्व । च ॥ १० ॥

अवकादान् अवकाभक्षकान् अभिशोचान् अभितः शोचमानान् दीप्यमानान् शोकस्य प्रापकान् वा मामकान् मत्संबन्धिनो गन्धर्वान् अप्सु उदकेषु द्योतय प्रकाशय । हे ओषधे अजशृङ्गि उपद्रवकारिणः पिशाचान् सर्वान् प्र मृणीहि प्रजहि सहस्व अभिभव च ॥

एकादशी ॥

श्वैवैकः कपिरिवैकः कुमारः सर्वकेशकः ।
प्रियो दृश ईव भूत्वा गन्धर्वः सचते स्त्रियस्-
तमितो नाशयामसि ब्रह्मणा वीर्यावता ॥ ११ ॥

श्वाऽईव । एकः । कपिःऽईव । एकः । कुमारः । सर्वऽकेशकः ।
प्रियः । दृशेऽईव । भूत्वा । गन्धर्वः । सचते । स्त्रियः ।
तम् । इतः । नाशयामसि । ब्रह्मणा । वीर्यऽवता ॥ ११ ॥

एकः गन्धर्वः मायावितया श्वेव श्वाकृतिरिव भवति । एकः अपरो गन्धर्वः कपिरिव मर्कटाकृतिर्भवति । अन्यस्तु गन्धर्वः सर्वकेशकः सर्वतः उत्पन्नाः केशा यस्य तादृशः सन् [कुमारः] कुमारावस्थ इव भवति । एवं मायावशात् विचित्राकृतिः सन् दृशे द्रष्टुम दर्शनाय वा प्रिय इव भूत्वा [गन्धर्वः] गन्धर्वरूपो ग्रहः स्त्रियः सचते समवैति । तं गन्धर्वम इतः अस्मात् स्त्रीसकाशात् नाशयामसि नाशयामः । [२] "इदन्तो मसिः" [२] । केन साधनेन इति चेत् उच्यते । वीर्यावता अतिशयितवीर्ययुक्तेन ब्रह्मणा मन्त्रेण ॥

द्वादशी ॥

जाया इद् वो अप्सरसो गन्धर्वाः पतयो यूयम् ।

---

१ K द्योतय. २ So all our authorities. The *Panchapaṭalikâ*, the *Sarvânukramaṇikâ*, the Vaidikas and Sâyaṇa all regard the stanza as **द्यवसाना.**

---

1 S' Kd अवकभ°.

अप धावतामर्त्या मर्त्यान् मा सचध्वम ॥ १२ ॥

जायाः। इत्। वः। अप्सरसः। गन्धर्वाः। पतयः। यूयम्।
अप। धावत। अमर्त्याः। मर्त्यान्। मा। सचध्वम ॥ १२ ॥

हे गन्धर्वाः वः युष्माकम अप्सरसः जाया इत् जाया एव उपभोग्याः स्त्रिय एव खलु। यूयं च तासां पतयः भर्तारः। अतः संघीभूय [अप धावत]। अमर्त्याः अमरणधर्माणः देवजातीया यूयं मर्त्यान् मरणधर्मणो मनुष्यान् भिन्नजातीयान्[1] मा सचध्वम समवेत। संगता मा भूत ॥

[इति] द्वितीयं सूक्तम ॥

"उद्भिन्दतीं संजयन्तीम" इति सूक्तेन द्यूतजयकर्मणि अक्षान् अभिमन्त्र्य देवनं कुर्यात्। सूत्रितं हि। "पूर्वास्वषाढासु गर्तं खनति" इति प्रक्रम्य "उद्भिन्दतीं संजयन्तीम[४.३८] यथा वृक्षम अशनिः[७.५२] इदम उग्राय[७.११४] इति वासितान् अक्षान् निवपति" इति [कौ० ५. ५] ॥

तथा "सूर्यस्य रश्मीन्" इत्यादिभिः "कर्कीन्[2] वत्सान् इह रक्ष वाजिन्" इत्येवमन्ताभिस्तिसृभिर्ऋग्भिर्गोपुष्टिकर्मणि द्वादशदाम्नीं रज्जुं संपाताज्येन संस्कुर्यात्। "अयं घासः" इति पादेन गोभ्यो घासं प्रयच्छेत्। "इह वत्सान्" इति पादेन तस्यां[3] द्वादशदाम्न्यां रज्वां वत्सान् बध्नीयात्। सूत्रितं हि। "कर्कीप्रवादानां[4] द्वादशदाम्न्यां संपातवत्याम अयं घास इह वत्सान्[5] इति मन्त्रोक्तम" इति [कौ० ३. ४] ॥

तथा "सूर्यस्य रश्मीन्" इति तिसृभिः कर्कीसवं[6] दद्यात्। सूत्रितं हि। "सूर्यस्य रश्मीन् इति कर्कीं[7] सानूबन्ध्यां ददाति" इति [कौ० ८. ७] ॥

---

१ P P[2] J K Cp. मर्त्याः, omitting the अ०.

---

1 S′ Kd inserts मनुष्यान् after this as before it. 2 S′ Kd कर्कीन्वत्सां इह. 3 S′ Kd तस्या for तस्यां. 4 S′ Kd कर्किप्रदानानां for कर्कीप्रवादानां. We with *Kaus'ika*. 5 S′ Kd वत्सानिति. We with *Kaus'ika*. 6 S′ Kd कर्किसवं. 7 S′ Kd कर्कि. We with *Kaus'ika*.

तत्र प्रथमा ॥

उ॒द्भि॒न्द॒तीं सं॒जय॑न्तीमप्स॒रां सा॑धुदे॒विनी॑म् ।
ग्लहे॑ कृ॒तानि॑ कृण्वा॒नाम॑प्स॒रां ताम॒ह हु॑वे ॥ १ ॥

उ॒त्ऽभि॒न्द॒तीम् । सम्ऽजय॑न्तीम् । अ॒प्स॒राम् । सा॒धुऽदे॒विनी॑म् ।
ग्लहे॑ । कृ॒तानि॑ । कृ॒ण्वा॒नाम् । अ॒प्स॒राम् । ताम् । इ॒ह । हु॒वे॒ ॥ १ ॥

उद्भिन्दतीम् पणबन्धेन धनस्य उच्छेदनं कुर्वतीं संजयन्तीम् सम्यक् जयं प्राप्नुवतीं साधुदेविनीम् जयोपायपरिज्ञानेन अक्षशलाकादिभिः शोभनं क्रीडन्तीम् एवंगुणविशिष्टाम् अप्सराम् द्यूतक्रियाधिदेवताम् अप्सरोजातीयाम् । अहं स्तौमीति शेषः । अपि च ग्लहे । गृह्यते पणबन्धेन कल्प्यत इति द्यूतक्रियाजेयोऽर्थो ग्लहः । ‘‘ग्रहवृदृनिश्चिगमश्च’’ इति कर्मणि अप् । ‘‘अक्षेषु ग्लहः’’ इति अक्षविषये निपातनात् लत्वम् । तस्मिन् ग्लहे निमित्ते कृतानि द्यूतजयचिह्नानि कृतत्रेतादिशब्दवाच्यानि अयसंज्ञकानि कृण्वानाम् कुर्वाणाम् । कृतायलाभो हि महान् द्यूतजयः । तद् उक्तं द्यूतक्रियाम् अधिकृत्य आपस्तम्बेन । ‘‘कृतं यजमानो विजिनाति’’ इति [आप० ५. २०. १] । एवंभूतां ताम् अप्सराम् इह अस्मिन् द्यूतजयकर्मणि अहं हुवे आह्वयामि । आगत्य सा मम जयं करोतु इत्यर्थः ॥

द्वितीया ॥

वि॒चि॒न्व॒तीमा॑कि॒रन्ती॑मप्स॒रां सा॑धुदे॒विनी॑म् ।
ग्लहे॑ कृ॒तानि॑ गृ॒ह्णा॑नाम॑प्स॒रां ताम॒ह हु॑वे ॥ २ ॥

वि॒ऽचि॒न्व॒तीम् । आ॒ऽकि॒रन्ती॑म् । अ॒प्स॒राम् । सा॒धुऽदे॒विनी॑म् ।
ग्लहे॑ । कृ॒तानि॑ । गृ॒ह्णा॒नाम् । अ॒प्स॒राम् । ताम् । इ॒ह । हु॒वे॒ ॥ २ ॥

विचिन्वतीम् एकत्र निर्बाधे कोष्ठे त्रिचतुरान् अक्षान् विशेषेण समु-

---

१ P °दे॒वनी॑म्; J °दे॒वीनी॑म्. We with P̈ K C$_P$. २ So all our authorities.

---

1 S′ Kd °क्रियाजयो°. 2 S′ Kd °चिन्वंतीम्. 3 S′ Kd काष्ठे.

क्षिन्वतीं संधीकुर्वतीम्। पुनस्तानेव जयार्थं बहुषु कोष्ठेषु आकिरन्तीम् समन्ताद् विक्षिपन्तीम्। ✕कृ विक्षेपे। तुदादित्वात् शः। "ऋत इङ्गातोः" इति इत्वम्✕। अन्यद् व्याख्यातम्॥

यायैः परिनृत्यत्यादद्दाना कृतं ग्लहात्।
सा नः कृतानि सीषंती प्रहामाप्नोतु मायया।
सा नः पर्यस्वत्यैतु मा नो जैषुरिदं धनम्॥ ३॥

या। अयैः। परिऽनृत्यति। आऽददाना। कृतम्। ग्लहात्।
सा। नः। कृतानि। सीषंती। प्रऽहामं। आप्नोतु। मायया।
सा। नः। पर्यस्वती। आ। एतु। मा। नः। जैषुः। इदम्। धनम्॥ ३॥

या अक्षेषु प्रमोदन्ते शुचं क्रोधं च बिभ्रती।
आनन्दिनीं प्रमोदिनीमप्सरां तामिह हुवे॥ ४॥

याः। अक्षेषु। प्रऽमोदन्ते। शुचम्। क्रोधम्। च। बिभ्रती।
आऽनन्दिनीम्। प्रऽमोदिनीम्। अप्सराम्। ताम्। इह। हुवे॥ ४॥

सूर्यस्य रश्मीननु याः संचरन्ति मरीचीर्वा या अनुसंचरन्ति।
यासामृषभो दूरतो वाजिनीवान्त्सद्यः सर्वान् लोकान् पर्येति रक्षन्।
स न ऐतु होममिमं जुषाणोऽन्तरिक्षेण सह वाजिनीवान्॥ ५॥

सूर्यस्य। रश्मीन्। अनु। याः। सम्ऽचरन्ति। मरीचीः। वा। याः। अनुऽसंचरन्ति।

---

१ K °दधाना with Sâyaṇa. We with A B Bᵖ B̂ D K̂ R Ŝ P P̂ J V. २ K शेषन्ती with Sâyaṇa. We with A B Bᵖ B̂ D K̂ R Ŝ P P̂ J V Cs Cᵖ. ३ K ग्रहाना° with Sâyaṇa. We with the rest of our authorities. ४ K °दधाना. ५ K शेषन्ती. ६ K °हान्. ७ A प्रमोदंते. ८ So all our MSS. and Vaidikas except K who follows Sâyaṇa. ९ So we with P P̂ J Cᵖ. K या।. १० K °मोदंते. ११ So all our authorities except K̂ which has सर्वां लो°. १२ So A B̂ D K K̂ R Ŝ V Cs; P P̂ Cᵖ परिऽएति, J परिऽएतिं changed into परिऽएतिं.

---

1 S′ Kd समुच्चिन्वंतीं 2 S′ Kd °कुर्वंतीम्.

यासाम् । ऋषभः । दूरतः । वाजिनीऽवान् । सद्यः । सर्वान् । लोकान् ।
परिऽएति । रक्षन् ।
सः । नः । आ । एतु । होमम् । इमम् । जुषाणः । अन्तरिक्षेण । सह ।
वाजिनीऽवान् ॥ ५ ॥

तृतीया ॥ या गन्धर्वस्त्री अयैः अक्षगतसंख्याविशेषैः कृतादिशब्दवाच्यैः परिनृत्यति अभिमतजयप्राप्त्या परितुष्टा नर्तनं करोति । कीदृशी । ग्लहात् गृह्यमाणात् पणबन्धात् कृतम् एतत्संज्ञम् अयम् आदधानः[1][*] आदधाना कुर्वाणा । कृतग्लहत्वं तस्या असाधारणो गुणः । सा तादृशी नः अस्माकं कृतानि[2] कृतशब्दवाच्यान् चतुःसंख्यायुक्तान् अयान् शेषयन्ती[3][*] अवशेषयन्ती प्रहान्[4][*] प्रहन्तव्यान् अक्षान् मायया व्यामोहकशक्त्या आमोतु अधितिष्ठतु । एकादयः पञ्चसंख्यान्ता अक्षविशेषा अयाः[5] । तत्र चतुर्णां कृतम् इति संज्ञा । तथा च तैत्तिरीयकम् । "ये वै चत्वारः स्तोमाः कृतं तत् । अथ ये पञ्च कलिः सः" इति [तै० ब्रा० १. ५. ११. १] । तस्य च कृतस्य[6] लाभाद् द्यूतजयो भवति । अत एव दाशतय्यां लब्धकृतायात् कितवाद् भीतिरास्नाता । "चतुरश्चिद् ददमानाद् बिभीयाद् आ निधातोः" इति [ऋ० १. ४१. ९] । तत्र[7] च निरुक्तम् । चतुरोक्षान् धारयत इति तद् यथा कितवाद् बिभीयात् इति [नि० ३. १६] ॥

चतुर्थी ॥ सा द्यूताधिदेवता पयस्वती द्यूतजितेन[7] पयउपलक्षितेन गवादिधनेन तद्वती नः अस्मान् ऐतु आगच्छतु । नः अस्माकम् इदम् पणितव्यत्वेन कल्पितं धनम् अन्ये कितवा मा जैषुः मापहार्षुः । ॥ जयतेर्माङि लुङि "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः ॥ । या गन्धर्वस्त्री द्यूतक्रियासु उक्ता अक्षेषु द्यूतसाधनेषु प्रमोदते[4][*] प्रहृष्यति । ॥ मुद हर्षे ॥ । किं कुर्वती । शुचम् इष्टजयवियोगात् शोकं पुनर्जिगी-

१ See foot-note १२ on the previous page.

1 So S′ Kd. Sâyaṇa's text too has: °दधानः कृतं. 2 S′ Kd कृताभि. 3 So S′ Kd. 4 S′ Kd प्रयाः. 5 S′ Kd कृतस्य च. 6 S′ तच for तत्र च. Kd तृच for तत्र च. 7 S′ Kd द्यूतवजितन. The emendation is conjectural.

षया क्रोधम् कोपं च बिभ्रती धारयन्ती। डुभृञ् धारणपोषणयोः। लटः शत्रादेशः। शपः श्लौ "भृञामित्" इति अभ्यासस्य इत्त्वम्। "अभ्यस्तानाम् आदिः" इति उदात्तत्वम्॥

पञ्चमी॥ आनन्दिनीम् द्यूतजनितहर्षयुक्तां प्रमोदिनीम् द्यूतासक्तान् अन्यानपि प्रमोदयन्तीम्। यद्वा आनन्दिनीम् सुखवतीं प्रमोदिनीम् प्रहर्षवतीम् ईदृशीं ताम् प्रागुक्ताम् अप्सराम् इह द्यूतकर्मणि जयार्थम् अहं हुवे आह्वयामि। या अप्सरसः सूर्यस्य रश्मीन् किरणान् अनु। लक्षणे अनोः कर्मप्रवचनीयत्वम्। रश्मयो यत्र निर्गच्छन्ति तस्मिन् प्रदेशे संचरन्ति वर्तन्ते। मरीचीर्वा मरीचिशब्देन प्रभा विवक्षिता। सूर्यकिरणसंबन्धिनीः मरीचीः प्रभा अनुलक्ष्य या अप्सरसः संचरन्ति। यासाम् ऋषभ इत्युत्तरमन्त्रेण संबन्धः। "तस्य मरीचयोप्सरसः" [तै० सं० ३. ४. ७. १] इत्यादि तैत्तिरीयकम् अनुसंधेयम्॥

षष्ठी॥ यासाम् अप्सरसाम् ऋषभः वृषभः सेचनसमर्थः पतिः दूरतः दूरे विप्रकृष्टे अन्तरिक्षदेशे संचरन् वाजिनीवान् वाजः अन्नम् अस्याम् अस्तीति व्युत्पत्त्या वाजिनी उषाः। ततो नित्ययोगे मतुप्। सर्वदा उषसा संबद्ध इत्यर्थः। स च सद्यः शीघ्रं सर्वान् लोकान् रक्षन् पालयन्। हेतौ शतृप्रत्ययः। पालनाद्धेतोः पर्येति प्रतिदिवसं पर्यावर्तते स वाजिनीवान् सूर्यः अन्तरिक्षेण। उपलक्षणम् एतत्। अन्तरिक्षगताभिस्ताभिरप्सरोभिः सह इमम् अस्मदीयं होमम् हूयमानं हविः जुषाणः सेवमानः नः अस्मान् एतु आगच्छतु॥

सप्तमी॥

अन्तरिक्षेण सह वाजिनीवन् कर्कीं वत्सामिह रक्ष वाजिन्।
इमे ते स्तोका बहुला एह्यर्वाङियं ते कर्कीह ते मनोस्तु॥ ६॥

अन्तरिक्षेण। सह। वाजिनीऽवन्। कर्कीम्। वत्साम्। इह। रक्ष। वाजिन्।

---

१ Bp एह्य°. २ K K^m V कर्की इह. We with A B Bp B^h D R S^m Cs. ३ K कर्कीन्. We with P P^2 J Cp. ४ P वाजिन्.

---

1 S' Kd द्यूतहर्षजनितहर्ष°. 2 S' Kd प्रमोदनीम्.

इ॒मे । ते॒ । स्तो॒काः । ब॒हु॒लाः । आ । इ॒हि॒ । अ॒र्वाङ् । इ॒यम् । ते॒ । क॒र्की । इ॒ह । ते॒ । मनः॑ । अ॒स्तु॒ ॥ ६ ॥

हे वाजिन् । वाजः अन्नं बलं वा । तद्वन् अन्तरिक्षेण अन्तरिक्षदेशोपलक्षिताप्सरोगणेन सह वाजिनीवा॑न् [उषसा तद्वान्] । हविर्लक्षणं वा अन्नं वा[जिनी तद्वा]न् । इह अस्मिन् स्थाने कर्की॑नँ कर्कवर्णान् शुभ्रान् वत्सा॑नँ रक्ष पालय समृद्धान् कुरु ॥ ते त्वदीया इमे स्तोकाः क्षीराज्यादिबिन्दवो धाराः बहुलाः समृद्धा अस्माकं भवन्तु । त्वं च अर्वाङ् अस्मदभिमुखः सन् एहि आगच्छ । कर्की कर्कवर्णा शुभ्रा इयं गौः ते तव स्वभूता इह अस्मिन् गोष्ठे वर्तते । ते तुभ्यं नँमः । अस्माभिः कृतो नमस्कारः अस्तु भवतु ॥

अष्टमी ॥

अ॒न्तरि॑क्षेण स॒ह वा॑जिनीवन् क॒र्की॑ं व॒त्सामि॒ह र॑क्ष वाजिन् ।
अयं घासो अयं व्रज इह व॒त्सां नि ब॑भ्नीमः ।
यथा॒ना॒म व॑ ईशमहे स्वाहा॑ ॥ ७ ॥

अ॒न्तरि॑क्षेण । स॒ह । वा॒जि॒नी॒ऽव॒न् । क॒र्की॑म् । व॒त्सा॑म् । इ॒ह । र॒क्ष॒ । वा॒जि॒न् ।
अ॒यम् । घा॒सः । अ॒यम् । व्र॒जः । इ॒ह । व॒त्सा॑म् । नि । ब॒भ्नी॒मः॒ ।
यथा॑ऽनाम । वः॒ । ईश्महे । स्वाहा॑ ॥ ७ ॥

पूर्वोऽर्धर्चः पूर्ववद् योज्यः । अयं प्रदीयमानो घासः अदनीयस्तृणसंघातः पुष्टिकरो भवतु । ॒अदेः कर्मणि घञ् । "घञपोश्च" इति घस्लृ आदेशः ॒ । अयम् अस्मदीयो व्रजः गोष्ठः गोपुष्टिकरो भवतु ॥ इह अस्मिन् व्रजे द्वादशदाम्न्या तन्त्या वत्सान् नि बभ्नीमः नितरां ब-

---

१ **P P² J** नमः. We with **C**P. २ **K** व॒त्सानि॒ह with Sâyaṇa. We with all the rest of our authorities. ३ **K** व॒त्सान् निब° with Sâyaṇa. We with **A B B**P $\overset{h}{\text{B}}$ **D** $\overset{m}{\text{K}}$ **R** $\overset{m}{\text{S}}$ **P** $\overset{2}{\text{P}}$ **J V C**s **C**P. ४ So we divide with **A B B**P $\overset{h}{\text{B}}$ **D K** $\overset{m}{\text{K}}$ **R** $\overset{m}{\text{S}}$ **P** $\overset{2}{\text{P}}$ **J V C**s, the *Sarvânukrama* and the *Panchapaṭalikâ*. ५ **K** व॒त्सान्. We with **P** $\overset{2}{\text{P}}$ **J C**P.

ङ्गान् कुर्मः । [वः युष्माकं] यथानाम येन प्रकारेण खलु ईश्महे स्वामिनो भवामः तथा नि बध्नीमः । ईश ऐश्वर्ये । अदादित्वात् शपो लुक् । स्वाहा इदं हविः स्वाहुतम् अस्तु ॥

[इति] तृतीयं सूक्तम् ॥

"पृथिव्याम् अग्नये" इति सूक्तेन सर्वसंपत्कामः मान्त्रवर्णिकीः पृथिव्याद्या देवता यजत उपतिष्ठते वा । सूत्रितं हि । काम्यकर्माणि प्रक्रम्य "समाख्याग्ने[२.६] अभ्यर्चत[७.८७] इत्यग्निं संपत्कामः । पृथिव्याम् इति[४.३९] मन्त्रोक्तम्" इति [कौ० ७.१०] ॥

तथा पाकयज्ञतन्त्रेषु "पृथिव्याम् अग्नये" इत्यष्टाभिः प्रधानहोमोत्तरकालं संनतिहोमान् जुहुयात् । सूत्रितं हि । "पृथिव्याम् अग्नये समनमन्निति संनतिभिश्च" इति [कौ० १.५] ॥

तत्रैव कर्मणि "अग्नावग्निः" इति द्वाभ्यां पुरस्ताद्धोमौ कुर्यात् । सूत्रितं हि । "अग्नावग्निः[९] हृदा पूतम्[१०] पुरस्ताद् युक्तः[५.२९.१] "यज्ञस्य चक्षुः[२.३५.५] इति जुहोति पश्चाद् अग्नेर्मध्यदेशे समान् "अत्र पुरस्ताद्धोमान्" इति [कौ० १.३] ॥

तथा चातुर्मास्ये वैश्वदेवपर्वणि "अग्नावग्निः" इति मन्थ्याभिहोमम् अनुमन्त्रयते । तद् उक्तं वैताने । "वैश्वदेवे निर्मथ्यं ग्रहतं भवतं नः समनसौ [वा० सं० ५.३] इत्यनुमन्त्रयते । अग्नावग्निः[९] इति होमम्" इति[वै० २.४] ॥

तत्र प्रथमा ॥

पृथिव्यामग्नये समनमन्त्स आर्भोत् ।
यथा पृथिव्यामग्नये समनमन्नेवा मह्यं संनमः सं नमन्तु ॥ १ ॥

पृथिव्याम् । अग्नये । सम् । अनमन् । सः । आर्भोत् ।
यथा । पृथिव्याम् । अग्नये । समऽअनमन् । एव । मह्यम् । समऽनमः ।
सम् । नमन्तु ॥ १ ॥

---

1 S′ is torn off here, and some six or seven letters are illegible. In Kd a space is left for as many letters. 2 S′ Kd उपतिष्ठे for उपतिष्ठते. 3 S′ Kd यथा. 4 S′ Kd भ्यश्च for संनतिभिश्च. 5 S′ Kd वैश्वदेवनिर्मथ्यं for वैश्वदेवे निर्मथ्यं.

प्रथनात् पृथिवी भूमिः । तस्याम् अधिदेवतात्वेन अवस्थिताय अग्नये समनमन् सर्वाणि भूतानि संनतानि उपसन्नानि भवन्ति । स च अग्निः आभौंत् संनतैर्भूतजातैः समृद्धो भवति । यथा खलु पृथिव्याम् अग्नये भूतानि समनमन् एव एवं संनमः । ङ संपूर्वान्नमेर्भावे क्विप् ङ । अभिलषितफलस्य संनतयः संप्राप्तयः मह्यं सं नमन्तु संप्राप्नुवन्तु ॥

द्वितीया ॥

पृथिवी धेनुस्तस्या अग्निर्वत्सः ।
सा मेऽग्निना वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ २ ॥

पृथिवी । धेनुः । तस्याः । अग्निः । वत्सः ।
सा । मे । अग्निना । वत्सेन । इषम् । ऊर्जम् । कामम् । दुहाम् ।
आयुः । प्रथमम् । प्रजाम् । पोषम् । रयिम् । स्वाहा ॥ २ ॥

पृथिवी धेनुः दोग्ध्री गौः । तस्या धेन्वा अग्निर्वत्सः पयसः प्रदापयिता । सा पृथिवी अग्निना वत्सेन वत्सस्थानीयेन अग्निना इषम् अन्नम् ऊर्जम् बलकरम् अन्नरसं कामम् काम्यमानम् अन्यत् सर्वं फलं मे मह्यं दुहाम् दुग्धाम् । प्रयच्छतु इत्यर्थः । कामशब्देन सामान्योक्तं फलं विशिनष्टि । प्रथमम् पुत्रपश्वादीनां फलानाम् आदिमं प्रथितं विस्तीर्णं वा शतसंवत्सरम् अपरिमितम् आयुः जीवनं दुग्धाम् । प्रजाम् प्रजायते उत्पद्यत इति प्रजा पुत्रादिरूपा । ङ "उपसर्गे च संज्ञायाम्" इति डप्रत्ययः ङ । [ताम्] पोषम् पुष्टिम् अविशेषात् सर्वस्य फलस्य अभिवृद्धिं रयिम् गवादिलक्षणं धनं च प्रयच्छतु । स्वाहा इदं हविः स्वाहुतम् अस्तु ॥

तृतीया ॥

अन्तरिक्षे वायवे समनमन्त्स आभौंत् ।
यथान्तरिक्षे वायवे समनमन्नेवा मह्यं संनमः सं नमन्तु ॥ ३ ॥

---

१ A आयुष्प्रथ°. We with B B^P $\overset{h}{B}$ D K $\overset{m}{K}$ R $\overset{m}{S}$ V.

---

1 S′ Kd काम्यं.

अन्तरिक्षे। वायवे। सम्। अनमन्। सः। आप्नोत्।
यथा। अन्तरिक्षे। वायवे। समऽअनमन्। एव। मह्यम्। समऽनमः।
सम्। नमन्तु ॥ ३ ॥

[अन्तरिक्षे] अन्तरिक्षलोके तदधिपत्वेन अवस्थिताय वायवे तत्रत्यानि भूतजातानि यक्षगन्धर्वादीनि समनमन् सम्यक् प्रह्वीभवन्ति। स आप्नोत् इत्यादि पूर्ववद् योज्यम् ॥

चतुर्थी ॥

अन्तरिक्षं धेनुस्तस्या वायुर्वत्सः।
सा मे वायुना वत्सेनेषमूर्जं कामं दुहाम्।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ ४ ॥

अन्तरिक्षम्। धेनुः। तस्याः। वायुः। वत्सः।
सा। मे। वायुना। वत्सेन। इषम्। ऊर्जम्। कामम्। दुहाम्।
आयुः। प्रथमम्। प्रजाम्। पोषम्। रयिम्। स्वाहा ॥ ४ ॥

अन्तरिक्षम् अन्तरिक्षलोक एव इष्टफलप्रदत्वाद् धेनुः दोग्ध्री गौः। तस्यँ धेनुत्वेन रूपितस्य अन्तरिक्षस्य तदविनाभूतस्तत्र संचरन् वायुर्वत्सः। सा अन्तरिक्षरूपा धेनुः [वायुना] वाय्वात्मना स्वकीयेन वत्सेन इषम् ऊर्जम् इत्यादि पूर्ववद् योज्यम् ॥

पञ्चमी ॥

दिव्यादित्याय समनमन्त्स आप्नोत्।
यथा दिव्यादित्याय समनमन्नेवा मह्यं संनमः सं नमन्तु ॥ ५ ॥

दिवि। आदित्याय। सम्। अनमन्। सः। आप्नोत्।
यथा। दिवि। आदित्याय। समऽअनमन्। एव। मह्यम्। समऽनमः।
सम्। नमन्तु ॥ ५ ॥

दिवि द्युलोके अवस्थिताय तदधिपतये आदित्याय अदितेः पुत्राय सू-

र्याय द्युलोकवासिनो जनाः समनमन् सम्यक् प्रह्वीभवन्ति । तं सेवन्त इत्यर्थः । स च द्युलोकस्य आदित्यः आभ्रौत् इत्यादि पूर्ववद् योज्यम् ॥

षष्ठी ॥

द्यौर्धेनुस्तस्या आदित्यो वत्सः ।
सा म आदित्येन वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ ६ ॥

द्यौः । धेनुः । तस्याः । आदित्यः । वत्सः ।
सा । मे । आदित्येन । वत्सेन । इषम् । ऊर्जम् । कामम् । दुहाम् ।
आयुः । प्रथमम् । प्रजाम् । पोषम् । रयिम् । स्वाहा ॥ ६ ॥

द्युलोक एव अभिमतफलप्रदानेन दोग्ध्री धेनुः । तत्र संचरन्नादित्य एव तस्या वत्सः । सा म इत्यादि पूर्ववद् योज्यम् ॥

सप्तमी ॥

दिक्षु चन्द्राय समनमन्त्स आभ्रौत् ।
यथा दिक्षु चन्द्राय समनमन्नेवा मह्यं संनमः सं नमन्तु ॥ ७ ॥

दिक्षु । चन्द्राय । सम् । अनमन् । सः । आभ्रौत् ।
यथा । दिक्षु । चन्द्राय । समऽअनमन् । एव । मह्यम् । समऽनमः । सम् ।
नमन्तु ॥ ७ ॥

दिक्षु प्राच्यादिषु तदधिदेवतात्वेन अवस्थिताय चन्द्राय चन्द्रमसे तत्रत्याः सर्वे जनाः समनमन् प्रह्वीभवन्ति । [स] आभ्रौत् इत्यादि पूर्ववत् ॥

अष्टमी ॥

दिशो धेनवस्तासां चन्द्रो वत्सः ।
ता मे चन्द्रेण वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ ८ ॥

---

१ See note १ on stanza 2 above.

दिशः। धेनवः। तासाम्। चन्द्रः। वत्सः।
ताः। मे। चन्द्रेण। वत्सेन। इषम्। ऊर्जम्। कामम्। दुहाम्।
आयुः। प्रथमम्। प्रऽजाम्। पोषम्। रयिम्। स्वाहा॥ ८॥

दिशः प्राच्याद्या अभिमतफलप्रदानाद् धेनवः दोग्ध्यो गावः। तासाम् अधिपतित्वेन संनिहितः चन्द्र एव वत्सः। ता मे चन्द्रेण वत्सेनेत्यादि पूर्ववद् योज्यम्॥

नवमी॥

अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपा उ।
नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्म भागम॥ ९॥

अग्नौ। अग्निः। चरति। प्रऽविष्टः। ऋषीणाम्। पुत्रः। अभिशस्तिऽपाः।
ऊं इति।
नमःऽकारेण। नमसा। ते। जुहोमि। मा। देवानाम्। मिथुया। कर्म।
भागम्॥ ९॥

अग्नौ लौकिके अङ्गारात्मके देवतारूपः अग्निः मन्त्रसामर्थ्येन प्रविष्टः सन् चरति वर्तते। यद्वा मथितः अग्निः आहवनीये अग्नौ प्रविष्टश्चरति। स विशेष्यते। ऋषीणाम् द्रष्टृणां चक्षुरादीनां पुत्रः। तद्व्यापारेण मथनात्मना जातत्वात्। "प्राणा वा ऋषयः" [बृ० आ० २. २. ५] इति वाजसनेयकम्। यद्वा ऋषीणाम् मन्त्राणाम् अग्निमन्थिनां पुत्रः। अथवा अथर्वाङ्गिरःप्रभृतीनाम् ऋषीणां पुत्रः। "त्वाम् अग्ने पुष्करात् अध्यथर्वा निरमन्थत" इति हि निगमः [ऋ० ६. १६. १३]। अभिशस्तिपाः अभिशस्तेः अभिशस्यमानाद् आरोपितात् पापात् पालयिता। उशब्दः पूरणः। ईदृशाय ते तुभ्यं नमस्कारेण त्रिविधा करणानां प्रह्वीकरणेन त्वद्विषयसमर्पणेन नमसा। अन्ननामैतत्। हविर्लक्षणेन अन्ने-

---

१ ^{m}S मनंसा. We with A B B^{P} ^{h}B D K ^{m}K R P ^{2}P J V C^{s}. २ P ^{2}P मनंसा. We with J C^{P}.

---

1 S′ Kd °मंथनां. 2 So Kd distinctly. S′ is much torn away in the place.

न जुहोमि । ⌛"तृतीया च होश्छन्दसि" इति कर्मणि तृतीया⌛ । नमस्कारसहितं हविर्जुहोमीत्यर्थः । तथा च देवानां भागम् हविर्भागं मिथुया मिथ्या मा कर्म मा कार्ष्म । ⌛कृञो माङि लुङि "मन्त्रे घस०" इति च्लेर्लुक्⌛ ॥

दशमी ॥

हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान् ।
सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यम् ॥ १० ॥

हृदा । पूतम् । मनसा । जातऽवेदः । विश्वानि । देव । वयुनानि । विद्वान् ।
सप्त । आस्यानि । तव । जातऽवेदः । तेभ्यः । जुहोमि । सः । जुषस्व ।
हव्यम् ॥ १० ॥

हृदा हृदयेन मनसा तदन्तर्वर्तिज्ञानकरणेन पूतम् शुद्धं हविस्तुभ्यं जुहोमि । हे जातवेदः जातानां वेदितः हे देव दानादिगुणयुक्त अग्ने विश्वानि सर्वाणि वयुनानि । वयुनम् इति ज्ञाननाम । इह तु ज्ञातव्ये वर्तते । ⌛वयुनं वेतेः इति यास्कः [नि० ५.१४]⌛ । सर्वाणि ज्ञातव्यानि विद्वान् जानन् भवसि । हे जातवेदः तव सप्त आस्यानि सप्तसंख्याका जिह्वाः । ताश्च उत्तरत्र उपनिषदि आम्नायन्ते ।

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुचीति चैता[1] लेलायमाना इति सप्त जिह्वाः ॥

इति [मु० १.२.४] । तेभ्य आस्येभ्यः । ⌛तादर्थ्ये चतुर्थी⌛ । तेषाम् उद्घाटनाय आज्यं जुहोमि । प्रक्षिपामीत्यर्थः । स त्वं हव्यम् होतव्यम् अस्मदीयं हविः जुषस्व सेवस्व ॥

[इति] चतुर्थं सूक्तम् ॥

"ये पुरस्तात्" इति सूक्तस्य "दूष्या दूषिरसि[२.११] ये पुरस्तात् [४.४०] ईशानां त्वा[४.१७]" इत्यादिकृत्याप्रतिहरणगणे [कौ० ५.३] पाठात् कृत्यानिर्हरणकर्मणि शान्त्युदकादौ विनियोगः ॥

---

1 S′ Kd चेता for चैता.

तत्र प्रथमा ॥

ये पुरस्ताज्जुह्वति जातवेदः प्राच्यां दिशोऽभिदासन्त्यस्मान् ।
अग्निमृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ १ ॥

ये । पुरस्तात् । जुह्वति । जातऽवेदः । प्राच्याः । दिशः । अभिऽदासन्ति ।
अस्मान् ।

अग्निम् । ऋत्वा । ते । पराञ्चः । व्यथन्ताम् । प्रत्यक् । एनान् । प्रतिऽस-
रेण । हन्मि ॥ १ ॥

हे जातवेदः जातानाम् उत्पन्नानां वेदितरग्ने ये शत्रवः पुरस्तात् पूर्वस्यां दिशि । यद्वा पूर्वस्या दिशः सकाशात् । ✠ "पूर्वाधरावराणाम०" इति अधिकृत्य[1] पञ्चम्यर्थे सप्तम्यर्थे वा "अस्तांति च" इति अस्तातिप्रत्ययः ✠ । जुह्वति होमेन अस्मान् अभिचरन्ति तस्मात् होमात् प्राच्या दिशः सकाशाद् अस्मान्[2] अभिदासन्ति उपक्षपयन्ति हिंसन्ति । ✠ दसु उपक्षये । अस्मात् ण्यन्तात् परस्य शपः "छन्दस्युभयथा" इति आर्धधातुकत्वात् "णेरनिटि" इति णिलोपः ✠ । ते शत्रवः तस्या दिशः अधिपतिम् अग्निम् ऋत्वा गत्वा अग्नौ निपतिताः पराञ्चः पराङ्मुखाः अस्मदनभिमुखाः सन्तो व्यथन्ताम् व्यथिताः संतप्ताः प्रदग्धा भवन्तु । ✠ व्यथ भयचलनयोः ✠ । एनान् अभिचरितॄन् शत्रून् प्रतिसरेण । प्रतिसरति प्रतिमुखं निवर्तते आभिचारिकं कर्म अनेनेति प्रतिसरः । [प्रतिसर]शब्देन एतद् रक्षाकर्म विवक्षितम् । तेन प्रत्यक् प्रतिमुखं निवृत्तेन तदीयेनैव अभिचारकर्मणा तान् हन्मि हिनस्मि । यद्वा अभिचारकर्मणा उत्पादिताम् एनां कृत्याम् अनेन प्रतिसरेण रक्षाकरणेन प्रतीचीनं निवर्त्य नाशयामीत्यर्थः ॥

द्वितीया ॥

ये दक्षिणतो जुह्वति जातवेदो दक्षिणाया दिशोऽभिदासन्त्यस्मान् ।
यममृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ २ ॥

1 S′Kd अविकृत्य for अधिकृत्य. 2 S′Kd अस्मादभिदासंति.

ये । दक्षिणतः । जुह्वति । जातऽवेदः । दक्षिणायाः । दिशः । अभिऽदासन्ति । अस्मान् ।

यमम् । कृत्वा । ते । पराञ्चः । व्यथन्ताम् । प्रत्यक् । एनान् । प्रतिऽसरेण । हन्मि ॥ २ ॥

ये शत्रवो दक्षिणतः अस्मदावासस्थानाद् दक्षिणस्यां दिशि दक्षिणस्या दिशो वा अवस्थिता जुह्वति होमेन अस्मान् अभिचरन्ति । ॥ "दक्षिणोत्तराभ्याम् अतसुच्" । "चितः" इति अन्तोदात्तत्वम् । जुह्वतीति । "अभ्यस्तानाम् आदिः" इति आद्युदात्तः । यद्वृत्तयोगाद् अनिघातः ॥ । दक्षिणाया दिश इत्यादि पूर्ववद् योज्यम् । अग्निम इत्यस्य स्थाने दक्षिणदिशः अधिपतिं यमम् इत्येतावानेव विशेषः ॥

तृतीया ॥

ये पश्चाज्जुह्वति जातवेदः प्रतीच्या दिशोऽभिदासन्त्यस्मान् ।
वरुणमृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ ३ ॥

ये । पश्चात् । जुह्वति । जातऽवेदः । प्रतीच्याः । दिशः । अभिऽदासन्ति । अस्मान् ।

वरुणम् । कृत्वा । ते । पराञ्चः । व्यथन्ताम् । प्रत्यक् । एनान् । प्रतिऽसरेण । हन्मि ॥ ३ ॥

पश्चात् प्रतीच्यां दिशि ये शत्रुजना अस्मदभिचारार्थं जुह्वति । ॥ "उपर्युपरिष्टात्" "पश्चात्" इति सप्तम्यर्थे निपात्यते ॥ । अन्यत् पूर्ववद् योज्यम् । प्रत्यग्दिशोधिपतिं वरुणम् कृत्वा इति तु विशेषः ॥

चतुर्थी ॥

य उत्तरतो जुह्वति जातवेद उदीच्या दिशोऽभिदासन्त्यस्मान् ।
सोममृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ ४ ॥

---

१ A B B^{P} B^{h} D R S^{m} P P^{2} J C^{s} C^{P} सोममृत्वा. We with K K^{m} V.

ये । उत्तरतः । जुह्वति । जातऽवेदः । उदीच्याः । दिशः । अभिऽदासन्ति । अस्मान् ।
सोमम् । ऋत्वा । ते । पराञ्चः । व्यथन्ताम् । प्रत्यक् । एनान् । प्रतिऽसरेण । हन्मि ॥ ४ ॥

ये शत्रवः उत्तरतः उत्तरस्यां दिशि । ×पूर्ववद् अतसुच्×। अन्यद् व्याख्यातप्रायम् । सोमम् तद्दिशोधिपतिम् ऋत्वा इति अत्र विशेषः ॥

पञ्चमी ॥

येऽधस्ताज्जुह्वति जातवेदो ध्रुवायां दिशोऽभिदासन्त्यस्मान् ।
भूमिमृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ ५ ॥

ये । अधस्तात् । जुह्वति । जातऽवेदः । ध्रुवायाः । दिशः । अभिऽदासन्ति । अस्मान् ।
भूमिम् । ऋत्वा । ते । पराञ्चः । व्यथन्ताम् । प्रत्यक् । एनान् । प्रतिऽसरेण । हन्मि ॥ ५ ॥

ये शत्रवः अधस्तात् अधरायां दिशि । ×पूर्ववद् अधरशब्दाद् अस्तातिप्रत्ययः× । अन्यत् पूर्ववद् व्याख्येयम् । सैव अधरा दिक् पृथिव्यात्मना स्थिरत्वाद् ध्रुवेत्युच्यते । अधराया दिश इत्यर्थः । तस्या दिशो भूमिरेवाधिदेवतेति तां प्राप्य व्यथिता [भवन्तित्यादि पूर्ववद् योज्यम] ॥

षष्ठी ॥

येऽन्तरिक्षाज्जुह्वति जातवेदो व्यध्वायां दिशोऽभिदासन्त्यस्मान् ।
वायुमृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ॥ ६ ॥

ये । अन्तरिक्षात् । जुह्वति । जातऽवेदः । विऽअध्वायाः । दिशः । अभिऽदासन्ति । अस्मान् ।

---

१ See the foregoing note. २ **A K K^{m} V** १ for ३. We with **D S^{m} R** Cs. ३ **A B^{h} D S^{m} P P^{2} J** Cs Cp भूमिमृत्वा. We with **K K^{m} V**. ४ **A B B^{h} K K^{m} R S^{m} V** Cs १ for ३. ५ **P** °अध्वयाः. We with **P^{2} J K** Cp.

वायुम् । ऋत्वा । ते । परांञ्चः । व्यथन्ताम् । प्रत्यक् । एनान् । प्रतिऽसरेणं । हन्मि ॥ ६ ॥

[अन्तरा द्यावापृथिव्यावीक्षितम् अन्तरा]क्षान्तं वा यक्षगन्धर्वादिगणसेवितम् अवकाशात्मकम् अन्तरिक्षम् । ॥ सप्तम्यर्थे पञ्चमी ॥ । अन्तरिक्षलोके ये शत्रवो जुह्वतीत्यादि पूर्ववद् योज्यम् । ॥ व्यध्वाया दिश इति । विगता अध्वानो यस्याम् इति व्यध्वा । "उपसर्गाद् अध्वनः" इति अच् समासान्तः ॥ । तत्र संचरन् वायुस्तस्याधिदेवतेति वायुम् ऋत्वा इत्युक्तम् ॥

सप्तमी ॥

य उपरिष्टाज्जुह्वति जातवेद ऊर्ध्वायां दिशोऽभिदासन्त्यस्मान् ।
सूर्यमृत्वा ते परांञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेणं हन्मि ॥ ७ ॥

ये । उपरिष्टात् । जुह्वति । जातऽवेदः । ऊर्ध्वायाः । दिशः । अभिऽदासन्ति । अस्मान् ।
सूर्यम् । ऋत्वा । ते । परांञ्चः । व्यथन्ताम् । प्रत्यक् । एनान् । प्रतिऽसरेणं ।
हन्मि ॥ ७ ॥

ये शत्रवः उपरिष्टात् ऊर्ध्वायां दिशि द्युलोकवर्तिन्यां जुह्वति अस्मान् अभिचरन्तीत्यादि पूर्ववत् । द्युलोकस्योर्ध्वदिगधिपतिं सूर्यम् ऋत्वा इत्येतावानेव विशेषः ॥

अष्टमी ॥

ये दिशामन्तर्देशेभ्यो जुह्वति जातवेदः सर्वाभ्यो दिग्भ्योऽभिदासन्त्यस्मान् ।
ब्रह्मर्त्वा ते परांञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेणं हन्मि ॥ ८ ॥

ये । दिशाम् । अन्तःऽदेशेभ्यः । जुह्वति । जातऽवेदः । सर्वाभ्यः । दिक्ऽभ्यः । अभिऽदासन्ति । अस्मान् ।

---

1 S′ is altogether torn away in this part which is at the top of a leaf. Kd has a *lacuna* long enough to contain about twelve letters.

ब्रह्म। कृत्वा। ते। पराञ्चः। व्यथन्ताम्। प्रत्यक्। एनान्। प्रतिऽसरेण।
हन्मि॥ ८॥

हे जातवेदः ये शत्रवः दिशाम् प्राच्यादीनाम् उक्तानाम् अन्तर्देशेभ्यः अन्तरालदेशेभ्यः सकाशाद् अस्मदभिचारार्थं जुह्वति ये च ताभ्यः सर्वाभ्यो दिग्भ्यः अस्मान् अभिदासन्ति उपक्षपयन्ति ते सर्वे पराञ्चः पराङ्मुखाः कुण्ठितशक्तयः सन्तः ब्रह्म सर्वगतं भूतभौतिकप्रपञ्चकल्पनास्पदम् "महद् भयं वज्रम् उद्यतम्" [क० व० ६. २] "भीषास्माद् वातः पवते" [तै० आ० ८. ८. १] इत्यादित्रय्यन्तप्रसिद्धनियमनशक्तियुक्तं परं ब्रह्म कृत्वा प्राप्य व्यथन्ताम् व्यथिताः संतप्ता भवन्तु। एनान् शत्रून् प्रतिसरेण अनेन रक्षा-कर्मणा प्रत्यक् प्रतीचीनं हन्मि॥

पञ्चमं सूक्तम्॥

अष्टमोनुवाकः॥

श्रीमद्राजाधिराजराजपरमेश्वरश्रीवीरहरिहरमहाराजसाम्राज्यधुरं-
धरेण सायणार्येण विरचिते अथर्वसंहिताभाष्ये
चतुर्थकाण्डे अष्टमोनुवाकः॥

समाप्तश्चतुर्थः काण्डः॥

---

1 S′Kd त्रैयन्त°.

पञ्चमे काण्डे षडनुवाकाः । तत्र प्रथमेनुवाके पञ्च सूक्तानि । तत्र "ऋधञ्जत्रः" "तदिद् आस" इति सूक्ताभ्यां हस्तिपृष्ठे पुरुषशिरसि वा निहितायाम् आश्वत्थ्यां पात्र्यां त्रिवृति गोमयपरिचये अग्निं प्रज्वाल्य आज्यं जुह्वत् शत्रून् अभिक्रामति संग्रामजयकामः ॥

तथा तस्मिन्नेव कर्मणि वराहखातमृत्तिकाम् आनीय राजानो वेदिं कुर्वन्ति । ततः पुरोधा आभ्यां सूक्ताभ्याम् आज्यं सक्तूंश्च जुहुयात् । धनुरिध्मे तन्त्रे धनुःसमिधः इष्विध्मे तन्त्रे इषुसमिधश्च आदधाति । अपि च धनुः संपातवद् विमृज्य अभिमन्त्र्य राज्ञे प्रयच्छति ॥

तथा तस्मिन्नेव कर्मणि युद्धे एकपाणेन मृतस्य पुरुषस्य इध्मम् उपसमाधाय उपरि चक्रं धारयित्वा दीर्घदण्डेन स्रुवेण आभ्यां चक्रच्छिद्रे अग्नौ आज्यं जुहोति । उत्तिष्ठ संनह्य प्रहर युध्यस्वेत्यादिकां प्रोत्साहनवाचं श्रुत्वा युद्धे योजयेत् ॥

"यदि चिन्नु त्वा" [५. २. ४] इति ऋचं परसैनिकान् अनुब्रूयात् ॥

एतेषां कर्मणां विकल्पः । कृतैरवश्यं जयो भवति ॥ राजा वैश्यश्चेद् उक्तानि कर्माणि "यदि चिन्नु त्वा" [५. २. ४] इति ऋचा कार्याणि । जयकामः सेनापतिश्चेद् उक्तान्येव कर्माणि "त्वया वयम्" [५. २. ५] इत्येकया ऋचा कार्याणि । युद्धयोग्यत्वपरीक्षणकर्मणि "नि तद् दधिषे" [५. २. ६] इति ऋचा उदपात्रम् अभिमन्त्र्य तस्मिन् द्वौ द्वौ योद्धारौ राजा अवेक्षयेत् । तयोर्मध्ये यं यं न पश्येत् तं तं युधि न योजयेत् ॥ "नि तद् दधिषे" इति ऋचा नवे रथे ससारथिं राजानम् आस्थापयति ॥

सूत्रितं हि । "ऋधञ्जत्रस्तदिदासेत्याश्वत्थ्यां पात्र्यां त्रिवृति गोमयपरिचये हस्तिपृष्ठे पुरुषशिरसि वाऽमित्रान् जुह्वद् अभि-
"क्रम्य निवपति । वराहविहिताद् राजानो वेदिं कुर्वन्ति । तस्यां प्रदानान्तानि । एकेष्वा हतस्यादहन उपसमाधाय दीर्घदण्डेन
"स्रुवेण रथचक्रस्य खेन समया जुहोति । योजनीयां श्रुत्वा योजयेत् । यदि चिन्नु त्वा [५. २. ४] नमो देववधेभ्यः [६. १३]
"इत्यन्वाह" इत्यादि [कौ. २. ६] ॥

तथा पुष्टिकर्मसु आभ्यां सूक्ताभ्यां मैश्रधान्यं भ्रष्टपिष्टं सक्तुम् अजालोहितमिश्रितं रसमिश्रितं च संपात्य अभिमन्त्र्य अश्नीयात् ॥

तथा तेष्वेव कर्मसु आभ्यां सूक्ताभ्यां त्रिषु उदुम्बरचमसेषु प्लक्षचमसेषु वा मैश्रधान्यं प्रक्षिप्य रसांश्च संपात्य अभिमन्त्र्य अश्नीयात् । तत्र सूत्रोक्तमन्त्रैः पूर्वाह्णमध्याह्नापराह्णकाले एकैकचमसभक्षणम् ॥

तथा तत्रैव कर्मसु आभ्यां सूक्ताभ्याम् ऋतुमत्याः स्त्रिया लोहितं रसमिश्रितं कृत्वा संपात्याभिमन्त्र्य प्रादेशिनीमध्यमाङ्गुलिभ्यां प्राश्नीयात् ॥

तद् उक्तं कौशिकेन । "ऋधञ्जत्रस्तदिदासेति मैश्रधान्यं भ्रष्टपिष्टं लोहितालंकृतं रसमिश्रम् अश्नाति । अभ्रष्टं
"प्लक्षोदुम्बरस्योत्तरतोग्नेस्त्रिषु चमसेषु पूर्वाह्णस्य तेजसाग्रम् अन्नस्य प्राशिषम् इति पूर्वाह्णे । मध्यंदिनस्य तेजसा मध्यम्
"अन्नस्य प्राशिषम् इति मध्यंदिने । अपराह्णस्य तेजसा सर्वम् अन्नस्य प्राशिषम् इत्यपराह्णे । ऋतुमत्याः स्त्रिया अङ्गुलिभ्यां लो-
"हितम्" इति [कौ० ३. ५] ॥

तथा क्षेत्रं कामयमानः काम्यमाने क्षेत्रे आभ्यां सूक्ताभ्यां भक्तं दधिमधुमिश्रं संपात्य अभिमन्त्र्य अश्नीयात् । तद् उक्तं कौशिकेन । "यत् क्षेत्रं कामयते तस्मिन् कीलालं दधिमधुमिश्रम्" [कौ० ३. ५] इति ॥

तथा सप्तग्रामलाभकर्मणि अस्य सूक्तस्य विनियोगः । तद् उक्तं कौशिकेन । "संवत्सरं स्त्रियम् अनुपेत्य शुक्लयां रेत आनीय तण्डुलमिश्रम्" इति [कौ० ३. ५] । संवत्सरं ब्रह्मचर्यं कृत्वा ततो मैथुनं कृत्वा रेतस्तण्डुलमिश्रं कृत्वा संपात्य अभिमन्त्र्य अश्नातीति तस्यार्थः ॥

तथा समृद्धिकर्मण्यपि विनियुज्यते सूक्तद्वयम् एतत् । "निशायाम् आग्रयणतण्डुलान् उदङ्क्यां मधुमिश्रान् निदधाति आ य-

वानां पक्तेः । एवं यवान् उभयान् समोप्य । त्रिवृति गोमयपरिचये श्रृतम् अश्नाति" इति [कौ० ३. ५] । शरदि व्रीहितण्डुलान् मधुमिश्रितांश्चर्मभाण्डे निधाय निखन्यात् आ यवपचनमासात् । तथैव यवपचनतौ यवानपि तादृश एव भाण्डे व्रीहिपचनकालपर्यन्तं निधाय निखन्यात् । अनन्तरम् उभयान् मिश्रीकृत्य त्रिगुणिते गोमयपरिचये श्रपयित्वा संपात्याभिमन्त्र्य अश्नातीति तस्यार्थः ॥

तथा गर्भदंदणकर्मणि "ऋधञ्जत्रः" इति सूक्तस्य प्रथमाया ऋचो विनियोगः । स च "यथेयं पृथिवी मही" [६. १७] इति सूक्तस्य प्रस्तावनायाम् अनुसंधेयः ॥

ऋधञ्जत्रो योनिं य आबभूवामृतासुर्वर्धमानः सुजन्मा ।
अदब्धासुर्भ्राजमानोहैव त्रितो धर्ता दाधार त्रीणि ॥ १ ॥

ऋधक्ऽमन्त्रः । योनिम् । यः । आऽबभूव । अमृतऽअसुः । वर्धमानः । सुऽजन्मा ।
अदब्धऽअसुः । भ्राजमानः । अहाऽइव । त्रितः । धर्ता । दाधार । त्रीणि ॥ १ ॥

आ यो धर्माणि प्रथमः ससाद ततो वपूंषि कृणुषे पुरूणि ।
धास्युर्योनिं प्रथम आ विवेशा यो वाचमनुदितां चिकेत ॥ २ ॥

आ । यः । धर्माणि । प्रथमः । ससाद । ततः । वपूंषि । कृणुषे । पुरूणि ।
धास्युः । योनिम् । प्रथमः । आ । विवेश । आ । यः । वाचम् । अनुदिताम् । चिकेत ॥ २ ॥

यस्ते शोकाय तन्वं रिरेच क्षरद्धिरण्यं शुचयोनु स्वाः ।
अत्रा दधेते अमृतानि नामास्मे[1] वस्त्राणि विश एरयन्ताम[2] ॥ ३ ॥

यः । ते । शोकाय । तन्वम् । रिरेच । क्षरत् । हिरण्यम् । शुचयः । अनु । स्वाः ।
अत्र । दधेते इति । अमृतानि । नाम । अस्मे[1] इति । वस्त्राणि । विशः । आ । ईरयन्ताम् ॥ ३ ॥

प्र यदेते प्रतरं पूर्व्यं गुः सदःसद आतिष्ठन्तो अजुर्यम् ।
कविः शुषस्य मातरा रिहाणे जाम्यै धुर्यं पतिमेरयेथाम ॥ ४ ॥

प्र । यत् । एते । प्रऽतरम् । पूर्व्यम् । गुः । सदःऽसदः । आऽतिष्ठन्तः । अजुर्यम्
कविः । शुषस्य । मातरा । रिहाणे इति । जाम्यै । धुर्यम् । पतिम् । आ । ईरयेथाम् ॥ ४ ॥

तदू षु ते महत् पृथुज्मन् नमः कविः काव्येना कृणोमि ।
यत् सम्यञ्चावभियन्तावभि क्षामत्रा मही रोधचक्रे वावृधेते ॥ ५ ॥

तत् । ऊं इति । सु । ते । महत् । पृथुऽज्मन् । नमः । कविः । काव्येन । कृणोमि ।

---

१ So all our authorities. २ R एरं°.

यत्। सम्यञ्चौ। अभिऽयन्तौ। अभि। क्षाम्। अत्र। मही इति। रोधंचक्रे इति रोधंऽचक्रे। ववृधेते इति ॥ ५ ॥

सप्त मर्यादाः कवयस्ततक्षुस्तासामिदेकामभ्यंहुरो गात्।
आयोर्ह स्कम्भ उपमस्य नीडे पथां विसर्गे धरुणेषु तस्थौ ॥ ६ ॥

सप्त। मर्यादाः। कवयः। ततक्षुः। तासाम्। इत्। एकाम्। अभि। अंहुरः। गात्।
आयोः। ह। स्कम्भः। उपमस्य। नीडे। पथाम्। विऽसर्गे। धरुणेषु। तस्थौ ॥ ६ ॥

उतामृतासुर्वत एमि कृण्वन्नसुरात्मा तन्वः१स्तत् सुमङ्गुः।
उत वा शक्रो रत्नं दधात्यूर्जया वा यत् सचते हविर्दाः ॥ ७ ॥

उत। अमृतऽअसुः। व्रतः। एमि। कृण्वन्। असुः। आत्मा। तन्वः। तत्। सुमत्ऽअङ्गुः।
उत। वा। शक्रः। रत्नम्। दधाति। ऊर्जया। वा। यत्। सचते। हविःऽदाः ॥ ७ ॥

उत पुत्रः पितरं क्षत्रमीडे ज्येष्ठं मर्यादमह्वयन्त्स्वस्तये।
दर्शन् नु ता वरुण यास्ते विष्ठा आवर्वर्तत[4]तः कृणवो वपूंषि ॥ ८ ॥

उत। पुत्रः। पितरम्। क्षत्रम्। ईडे। ज्येष्ठम्। मर्यादम्। अह्वयन्। स्वस्तये।
दर्शन्। नु। ताः। वरुण। याः। ते। विऽस्थाः। आऽवर्वर्ततः। कृणवः। वपूंषि ॥ ८ ॥

अर्धमर्धेन पयसा पृणक्ष्यर्धेन शुष्म वर्धसे अमुर[5]।
अविं वृधाम शग्मियं सखायं वरुणं पुत्रमदित्या इषिरम्।
कविशस्तान्यस्मै वपूंष्यवोचाम रोदसी सत्यवाचा ॥ ९ ॥

अर्धम्। अर्धेन। पयसा। पृणक्षि। अर्धेन। शुष्म। वर्धसे। अमुर।
अविम्। वृधाम। शग्मियम्। सखायम्। वरुणम्। पुत्रम्। अदित्याः। इषिरम्।

---

१ So **A B B**[h] **D K K**[m] **R S**[m] **V** Dc Cs. **P P**[2] **J** Cp उपमस्य। ² **A B B**[h] Bp **D K K**[m] **R S**[m] **V** Dc Cs नीडे. **K V P J** Cp नीडे। We with **P**[2]. ³ **D** Cs तन्व३तत्. **B** Bp **R S**[m] तन्वा३स्तत्. **A B**[h] तन्व३स्तत्. We with **K K**[m]. ⁴ So all our authorities. Rw आवर्वृततः. ⁵ **P** कृण्वः। ⁶ **B B**[h] **K K**[m] **V** Dc Cs Cp पृ°. We with **A D R S**[m]. **P J** पृणक्षि changed from पृणक्षि। **P**[2] **V** पृणक्षि। ⁷ **S**[m] Cs अमूर. We with **A B**[h] **D K K**[m] **R** Dc **P P**[2] **J** Cp. ⁸ So **A B B**[h] **D K K**[m] **R S**[m] **V** Dc Cs **J**. **P** अविंवृधाम्। **P**[2] अविंऽवृधाम्। **J** अविम्। वृधाम। changed to अविंवृधाम। **K** Cp अविंवृधाम। **V** अविम्। वृधाम।

कविऽशस्तानि । अस्मै । वपूंषि । अवोचाम । रोदसी इति । सत्यऽवाचा ॥ ९ ॥

इति प्रथमेनुवाके प्रथमं सूक्तम् ॥

"तदिद् आस" इति सूक्तस्य विनियोगः पूर्वसूक्तेन सह उक्तः ॥
तथा सर्वफलकामोऽनेन सूक्तेन इन्द्राग्नी यजते उपतिष्ठते वा । तद् उक्तं कौशिकेन । "तदिद् आस [५. २] धीती वा [७. १] इतीन्द्राग्नी" इति [कौ० ७. १०] ॥

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यदेनं मदन्ति विश्व ऊमाः ॥ १ ॥

तत् । इत् । आस । भुवनेषु । ज्येष्ठम् । यतः । जज्ञे । उग्रः । त्वेषऽनृम्णः ।
सद्यः । जज्ञानः । नि । रिणाति । शत्रून् । अनु । यत् । एनम् । मदन्ति । विश्वे । ऊमाः ॥ १ ॥

ववृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ॥ २ ॥

ववृधानः । शवसा । भूरिऽओजाः । शत्रुः । दासाय । भियसम् । दधाति ।
अविऽअनत् । च । विऽअनत् । च । ससनि । सम् । ते । नवन्त । प्रऽभृता । मदेषु ॥ २ ॥

त्वे इति क्रतुम् । अपि । पृञ्चन्ति । भूरि । द्विः । यत् । एते । त्रिः । भवन्ति । ऊमाः ।
स्वादोः । स्वादीयः । स्वादुना । सृज । सम् । अदः । सु । मधु । मधुना । अभि ।
योधीः ॥ ३ ॥

स्वादोः स्वादीयः स्वादुनासृजा समदः सु मधु मधुनाभि योधीः ॥३॥

यदि चिनु त्वा धना जयन्तं रणेरणे अनुमदन्ति विप्राः ।
ओजीयः शुष्मिन्तिस्थिरमा तनुष्व मा त्वा दभन् दुरेवासः कशोकाः ॥४॥

यदि । चित् । नु । त्वा । धना । जयन्तम् । रणेऽरणे । अनुऽमदन्ति । विप्राः ।
ओजीयः । शुष्मिन् । स्थिरम् । आ । तनुष्व । मा । त्वा । दभन् । दुःऽएवासः । कशोकाः॥४॥

त्वया वयं शाशदीमहे रणेषु प्रपश्यन्तो युधेन्यानि भूरि ।
चोदयामि त आयुधा वचोभिः सं ते शिशामि ब्रह्मणा वयांसि ॥ ५ ॥

---

१ D Cs सस्ति. P[2] सस्ति । We with A B[h] K K[m] R S[m] V De P J Cp. २ Cs पृचंति.
३ K K[m] V शुष्मिंमस्थि°. We with A B[h] D R S[m] De Cs. P शुष्मिन् ।.

त्वया। वयम्। शाशद्महे। रणेषु। प्रऽपश्यन्तः। युधेन्यानि। भूरि।
चोदयामि। ते। आयुधा। वचःऽभिः। सम्। ते। शिशामि। ब्रह्मणा। वयांसि ॥ ५ ॥

नि तद् दधिषेवरे परे च यस्मिन्नाविथावसा दुरोणे।
आ स्थापयत मातरं जिगत्नुमतः इन्वत कर्वराणि भूरि ॥ ६ ॥

नि। तत्। दधिषे। अवरे। परे। च। यस्मिन्। आविथ। अवसा। दुरोणे।
आ। स्थापयत। मातरम्। जिगत्नुम्। अतः। इन्वत। कर्वराणि। भूरि ॥ ६ ॥

स्तुष्व वर्ष्मन् पुरुवर्मानं समृभ्वाणमिनतममाप्तमाप्त्यानाम्।
आ दर्शति शवसा भूर्योजाः प्र सक्षति प्रतिमानं पृथिव्याः ॥ ७ ॥

स्तुष्व। वर्ष्मन्। पुरुऽवर्मानम्। सम्। ऋभ्वाणम्। इनऽतमम्। आप्तम्। आप्त्यानाम्।
आ। दर्शति। शवसा। भूरिऽओजाः। प्र। सक्षति। प्रतिऽमानम्। पृथिव्याः ॥ ७ ॥

इमा ब्रह्म बृहद्दिवः कृणवदिन्द्राय शूषमग्रियः स्वर्षाः।
महो गोत्रस्य क्षयति स्वराजा तुरश्चिद् विश्वमर्णवत् तपस्वान् ॥ ८ ॥

इमा। ब्रह्म। बृहत्ऽदिवः। कृणवत्। इन्द्राय। शूषम्। अग्रियः। स्वःऽसाः।
महः। गोत्रस्य। क्षयति। स्वऽराजा। तुरः। चित्। विश्वम्। अर्णवत्। तपस्वान् ॥ ८ ॥

एवा महान् बृहद्दिवो अथर्वावोचत् स्वां तन्वमिन्द्रमेव।
स्वसारौ मातरिश्वरी अरिप्रे हिन्वन्ति चैने शवसा वर्धयन्ति च ॥ ९ ॥

एव। महान्। बृहत्ऽदिवः। अथर्वा। अवोचत्। स्वाम्। तन्वम्। इन्द्रम्। एव।
स्वसारौ। मातरिश्वरी इति। अरिप्रे इति। हिन्वन्ति। च। एने इति। शवसा। वर्धयन्ति। च ॥ ९ ॥

इति प्रथमेनुवाके द्वितीयं सूक्तम् ॥

---

१ P V दधिषे। C^{P} दधिषे। changed to दधिषे। We with $\overset{2}{P}$ J. २ $\overset{m}{K}$ °मास्यमा°. We with A $\overset{h}{B}$ D K R $\overset{m}{S}$ V De Cs P $\overset{2}{P}$ J C^{P}. ३ P तुरः। $\overset{2}{P}$ तुरम्। We with K V J C^{P}. ४ A B D तन्व ३°. $\overset{m}{S}$ तन्व ३°. De तन्वा ३°. R Cs $\overset{m}{K}$ तन्वा ३°. We with $\overset{h}{B}$ K V. ५ So we with A B B^{P} D K $\overset{m}{K}$ R $\overset{m}{S}$ V De Cs P $\overset{2}{P}$ J C^{P}. See Rw. ६ K adds मातरिश्वरी after इति. We with P $\overset{2}{P}$ J V C^{P}.

दर्शपूर्णमासयोः समिदाधाने "ममाग्ने वर्चः" इति सूक्तस्य विनियोगः । तद् उक्तं कौशिकेन । "ममाग्ने वर्च इति समिध आधाय" इति [कौ० १. १] ॥

तथा वर्चस्यकर्मणि अस्य सूक्तस्य विनियोगः । "पूर्वस्य ममाग्ने वर्च इति वर्चस्यानि" इत्यादि [कौ० २. ३] सूत्रम् । एतद्विस्तरः "ये त्रिषप्ताः" इति सूक्ते [१. १] द्रष्टव्यः ॥

तथा पुष्टिकर्मणि अस्य सूक्तस्य विनियोगः । तत्र "ममाग्ने वर्च इति सात्त्विकान्" इत्यादि सूत्रम् [कौ० ३. ५] ॥

तथा विभागकर्मणि कलहाभावम् इच्छन् पिता अनेन सूक्तेन तैलिकस्य रज्जुम् अभिमन्त्र्य धारयति हस्तेन । "ममाग्ने वर्च इति विभुङ्क्ष्माणः प्रमत्तरज्जुं धारयति" [कौ० ५. २] इति सूत्रात् ॥ विभुङ्क्ष्माणः विभागं करिष्यन् । प्रमत्तरज्जुश्चाक्रिकाणाम् अवलम्बनरज्जुः ॥

तथा आभिचारिके कर्मणि अनेन सूक्तेन बृहस्पतिशिरसम् ओदनं पृषातकेनोपसिञ्चेत् । तद् उक्तं कौशिकेन । "ममाग्ने वर्च इति बृहस्पतिशिरसं पृषातकेनोपसिच्य" इति [कौ० ६. ३] ॥

तथा "कौबेरीं धनकामस्य धनक्षये च" इति [न० क० १७] विहितायां कौबेर्यां महाशान्तौ एतत् सूक्तं योजयेत् । तद् उक्तं नक्षत्रकल्पे । "ममाग्ने वर्च इति कौबेर्याम्" इति [न० क० १८] ॥

तथा हस्यश्वदीक्षाख्ये कर्मणि अनेन सूक्तेन जुहुयात् । तद् उक्तं परिशिष्टे । "ममाग्ने वर्चः इति जुहुयात्" [प० १६] इति ॥ अन्यत्रापि व्रतग्रहणादौ अस्य सूक्तस्य विनियोगः ॥

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥ १ ॥

मम । अग्ने । वर्चः । विऽहवेषु । अस्तु । वयम् । त्वा । इन्धानाः । तन्वम् । पुषेम ।
मह्यम् । नमन्ताम् । प्रऽदिशः । चतस्रः । त्वया । अधिऽअक्षेण । पृतनाः । जयेम ॥ १ ॥

अग्ने मन्युं प्रतिनुदन् परेषां त्वं नो गोपाः परि पाहि विश्वतः ।
अपाञ्चो यन्तु निवता दुरस्यवोमैषां चित्तं प्रबुधां वि नेशत् ॥ २ ॥

अग्ने । मन्युम् । प्रतिऽनुदन् । परेषाम् । त्वम् । नः । गोपाः । परि । पाहि । विश्वतः ।
अपाञ्चः । यन्तु । निऽवता । दुरस्यवः । अमा । एषाम् । चित्तम् । प्रऽबुधाम् । वि ।
नेशत् ॥ २ ॥

मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामायास्मै ॥ ३ ॥

मम । देवाः । विऽहवे । सन्तु । सर्वे । इन्द्रऽवन्तः । मरुतः । विष्णुः । अग्निः ।
मम । अन्तरिक्षम् । उरुऽलोकम् । अस्तु । मह्यम् । वातः । पवताम् । कामाय । अस्मै ॥ ३ ॥

मह्यं यजन्तां मम यानीष्टाकूतिः सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवा अभि रक्षन्तु मेह ॥ ४ ॥

---

१ $\overset{m}{K}$ R °पत्. We with A $\overset{h}{B}$ D K $\overset{m}{S}$ V Dc Cs P $\overset{s}{P}$ J CP.

मह्यम्। यजन्ताम्। मम। यानि। इष्टा। आऽकूतिः। सत्या। मनसः। मे। अस्तु।
एनः। मा। नि। गाम्। कतमत्। चन। अहम्। विश्वे। देवाः। अभि। रक्षन्तु। मा।
इह ॥ ४ ॥

मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहूतिः।
दैवा होतारः सनिषन् न एतदरिष्टाः स्याम तन्वा सुवीराः ॥ ५ ॥

मयि। देवाः। द्रविणम्। आ। यजन्ताम्। मयि। आऽशीः। अस्तु। मयि। देवऽहूतिः।
दैवाः। होतारः। सनिषन्। नः। एतत्। अरिष्टाः। स्याम। तन्वा। सुऽवीराः ॥ ५ ॥

दैवीः षडुर्वीरुरु नः कृणोत विश्वे देवास इह मादयध्वम्।
मा नो विददभिभा मो अशस्तिर्मा नो विदद् वृजिना द्वेष्या या ॥ ६ ॥

दैवीः। षट्। उर्वीः। उरु। नः। कृणोत। विश्वे। देवासः। इह। मादयध्वम्।
मा। नः। विदत्। अभिऽभाः। मो इति। अशस्तिः। मा। नः। विदत्। वृजिना।
द्वेष्या। या ॥ ६ ॥

तिस्रो देवीर्महि नः शर्म यच्छत प्रजायै नस्तन्वे३ यच्च पुष्टम्।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥ ७ ॥

तिस्रः। देवीः। महि। नः। शर्म। यच्छत। प्रऽजायै। नः। तन्वे। यत्। च। पुष्टम्।
मा। हास्महि। प्रऽजया। मा। तनूभिः। मा। रधाम। द्विषते। सोम। राजन् ॥ ७ ॥

उरुव्यचा नो महिषः शर्म यच्छत्वस्मिन् हवे पुरुहूतः पुरुक्षु।
स नः प्रजायै हर्यश्व मृडेन्द्र मा नो रीरिषो मा परा दाः ॥ ८ ॥

उरुऽव्यचाः। नः। महिषः। शर्म। यच्छतु। अस्मिन्। हवे। पुरुऽहूतः। पुरुऽक्षु।
सः। नः। प्रऽजायै। हरिऽअश्व। मृड। इन्द्र। मा। नः। रिरिषः। मा। परा। दाः ॥ ८ ॥

धाता विधाता भुवनस्य यस्पतिर्देवः सविताभिमातिषाहः।
आदित्या रुद्रा अश्विनोभा देवाः पान्तु यजमानं निर्ऋत्याः ॥ ९ ॥

---

१ $\overset{m}{S}$ सनिषन्. २ B $\overset{h}{B}$ D K $\overset{m}{K}$ $\overset{m}{S}$ Cs °रिष्टा स्याम. We with A R V Dc. ३ Dc देवीः. $\overset{2}{P}$ देवीः।. ४ A D $\overset{m}{K}$ R $\overset{m}{S}$ णः. We with $\overset{h}{B}$ K Dc V. ५ K P षट्।. We with $\overset{2}{P}$ J V Cp. ६ So all our authorities. ७ P सोमऽराजन्।. We with K $\overset{2}{P}$ J Cp.

धाता । विऽधाता । भुवनस्य । यः । पतिः । देवः । सविता । अभिमातिऽसहः ।
आदित्याः । रुद्राः । अश्विना । उभा । देवाः । पान्तु । यजमानम् । निःऽकृथात् ॥ ९ ॥

ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामह एनान् ।
आदित्या रुद्रा उपरिस्पृशो न उग्रं चेत्तारमधिराजमक्त ॥ १० ॥

ये । नः । सऽपत्नाः । अप । ते । भवन्तु । इन्द्राग्निऽभ्याम् । अव । बाधामहे । एनान् ।
आदित्याः । रुद्राः । उपरिऽस्पृशः । नः । उग्रम् । चेत्तारम् । अधिऽराजम् । अक्त ॥ १० ॥

अर्वाञ्चमिन्द्रममुतो हवामहे यो गोजिद् धनजिदश्वजिद् यः ।
इमं नो यज्ञं विहुवे शृणोत्वस्माकमभूर्हर्यश्व मेदी ॥ ११ ॥

अर्वाञ्चम् । इन्द्रम् । अमुतः । हवामहे । यः । गोऽजित् । धनऽजित् । अश्वऽजित् । यः ।
इमम् । नः । यज्ञम् । विऽहुवे । शृणोतु । अस्माकम् । अभूः । हरिऽअश्व । मेदी ॥ ११ ॥

इति प्रथमेनुवाके तृतीयं सूक्तम् ॥

"यो गिरिष्वजायथाः" इति सूक्तेन राजयक्ष्मकुष्ठादिरोगशान्त्यर्थं कुष्ठाख्यौषधिमिश्रितं नवनीतम् अभिमन्त्र्य प्रतिलोमं व्याधितशरीरं प्रलिम्पेत् । "कुष्ठलिङ्गाभिर्नवनीतमिश्रेणाप्रतीहारं प्रलिम्पति" इति [कौ० ४. ४] सूत्रात् ॥

यो गिरिष्वजायथा वीरुधां बलवत्तमः ।
कुष्ठेहि तक्मनाशन तक्मानं नाशयन्नितः ॥ १ ॥

यः । गिरिषु । अजायथाः । वीरुधाम् । बलवत्ऽतमः ।
कुष्ठ । आ । इहि । तक्मऽनाशन । तक्मानम् । नाशयन् । इतः ॥ १ ॥

सुपर्णसुवने गिरौ जातं हिमवत्परि ।
धनैरभि श्रुत्वा यन्ति विदुर्हि तक्मनाशनम् ॥ २ ॥

सुपर्णऽसुवने । गिरौ । जातम् । हिमऽवतः । परि ।
धनैः । अभि । श्रुत्वा । यन्ति । विदुः । हि । तक्मऽनाशनम् ॥ २ ॥

अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि ।
तत्रामृतस्य चक्षणं देवाः कुष्ठमवन्वत ॥ ३ ॥

अश्वत्थः । देवऽसदनः । तृतीयस्याम् । इतः । दिवि ।
तत्र । अमृतस्य । चक्षणम् । देवाः । कुष्ठम् । अवन्वत ॥ ३ ॥

---

१ D °स्पशो. २ P तक्मऽनाशन ।.

हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि।
तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत ॥ ४ ॥

हिरण्ययी। नौः। अचरत्। हिरण्यऽबन्धना। दिवि।
तत्र। अमृतस्य। पुष्पम्। देवाः। कुष्ठम्। अवन्वत ॥ ४ ॥

हिरण्ययाः पन्थान आसन्नरित्राणि हिरण्ययाः।
नावो हिरण्ययीरासन् याभिः कुष्ठं निरावहन् ॥ ५ ॥

हिरण्ययाः। पन्थानः। आसन्। अरित्राणि। हिरण्ययाः।
नावः। हिरण्ययीः। आसन्। याभिः। कुष्ठम्। निःऽआवहन् ॥ ५ ॥

इमं मे कुष्ठ पूरुषं तमा वह तं निष्कुरु।
तमु मे अगदं कृधि ॥ ६ ॥

इमम्। मे। कुष्ठ। पुरुषम्। तम्। आ। वह। तम्। निः। कुरु।
तम्। ऊं इति। मे। अगदम्। कृधि ॥ ६ ॥

देवेभ्यो अधि जातोऽसि सोमस्यासि सखा हितः।
स प्राणाय व्यानाय चक्षुषे मे अस्मै मृड ॥ ७ ॥

देवेभ्यः। अधि। जातः। असि। सोमस्य। असि। सखा। हितः।
सः। प्राणाय। विऽआनाय। चक्षुषे। मे। अस्मै। मृड ॥ ७ ॥

उदङ् जातो हिमवतः स प्राच्यां नीयसे जनम्।
तत्र कुष्ठस्य नामान्युत्तमानि वि भेजिरे ॥ ८ ॥

उदङ्। जातः। हिमऽवतः। सः। प्राच्याम्। नीयसे। जनम्।
तत्र। कुष्ठस्य। नामानि। उत्ऽउत्तमानि। वि। भेजिरे ॥ ८ ॥

उत्तमो नाम कुष्ठास्युत्तमो नाम ते पिता।
यक्ष्मं च सर्वं नाशयत्तक्मानं चारसं कृधि ॥ ९ ॥

उत्ऽउत्तमः। नाम। कुष्ठ। असि। उत्ऽउत्तमः। नाम। ते। पिता।

---

१ R हिरण्मयी. २ J पुष्प्य°।. ३ B̂ R पुरुषं. ४ A R जातोसि. We with B̂ D K K^m S V Dc Cs. ५ Such is the accent of all our authorities.

यक्ष्मम् । च । सर्वम् । नाशय । तक्मानम् । च । अरसम् । कृधि ॥ ९ ॥

शीर्षामयमुपहत्यामक्ष्योस्तन्वो३ रपः ।
कुष्ठस्तत् सर्वं निष्करद् दैवं समह वृष्ण्यम् ॥ १० ॥

शीर्षऽआमयम् । उपऽहत्याम् । अक्ष्योः । तन्वः । रपः ।
कुष्ठः । तत् । सर्वम् । निः । करत् । दैवम् । समह । वृष्ण्यम् ॥ १० ॥

इति प्रथमेनुवाके चतुर्थं सूक्तम् ॥

शस्त्राद्यभिघाते "रात्री माता" इति सूक्तेन दुग्धे लाक्षां क्वाथयित्वा अभिमन्त्र्य पाययति । तथा च सूत्रम् । "लाक्षालिङ्गाभिर्दुग्धे फाण्टान् पाययति" [कौ० ४.४] इति ॥

रात्री माता नभः पितार्यमा ते पितामहः ।
सिलाची नाम वा असि सा देवानामसि स्वसा ॥ १ ॥

रात्री । माता । नभः । पिता । अर्यमा । ते । पितामहः ।
सिलाची । नाम । वै । असि । सा । देवानाम् । असि । स्वसा ॥ १ ॥

यस्त्वा पिबति जीवति त्रायसे पुरुषं त्वम् ।
भर्त्री हि शश्वतामसि जनानां च न्यञ्चनी ॥ २ ॥

यः । त्वा । पिबति । जीवति । त्रायसे । पुरुषम् । त्वम् ।
भर्त्री । हि । शश्वताम् । असि । जनानाम् । च । निऽअञ्चनी ॥ २ ॥

वृक्षंवृक्षमा रोहसि वृष्ण्यन्तीव कन्यला ।
जयन्ती प्रत्यातिष्ठन्ती स्परणी नाम वा असि ॥ ३ ॥

वृक्षम्ऽवृक्षम् । आ । रोहसि । वृष्ण्यन्तीऽइव । कन्यला ।
जयन्ती । प्रतिऽआतिष्ठन्ती । स्परणी । नाम । वै । असि ॥ ३ ॥

यद् दण्डेन यदिष्वा यद् वारुर्हरसा कृतम् ।

---

१ **A B** $\overset{h}{\mathbf{B}}$ **D R** $\overset{m}{\mathbf{S}}$ **Cs** °मक्षो°. **P** $\overset{2}{\mathbf{P}}$ **J Cp** अक्षोः ।. **Dc** °मक्षो° changed to °मक्ष्यो°. We with **K** $\overset{m}{\mathbf{K}}$ **V** and **Dc**. २ **K** $\overset{m}{\mathbf{K}}$ **V** १ for ३. We with **A** $\overset{h}{\mathbf{B}}$ **D R** $\overset{m}{\mathbf{S}}$ **Dc Cs**. ३ **R Dc** निःक°. We with **A** $\overset{h}{\mathbf{B}}$ **D K** $\overset{m}{\mathbf{K}}$ $\overset{m}{\mathbf{S}}$ **V Cs**. ४ **P** अस्ति ।. We with **V** $\overset{2}{\mathbf{P}}$ **J Cp**. ५ **B Bp K** $\overset{m}{\mathbf{K}}$ **V Dc P** स्यरंणी. **Cs** स्य° changed to स्प°. We with **D R** $\overset{2}{\mathbf{P}}$ **J Cp**.

तस्य त्वमसि निष्कृतिः सेमं निष्कृधि पूरुषम् ॥ ४ ॥

यत्। दण्डेन। यत्। इष्वा। यत्। वा। अरुः। हरसा। कृतम्।

तस्य। त्वम्। असि। निःऽकृतिः। सा। इमम्। निः। कृधि। पुरुषम् ॥ ४ ॥

भद्रात् प्रक्षान्निस्तिष्ठस्यश्वत्थात् खदिराद्धवात्।

भद्रान्न्यग्रोधात् पर्णात् सा न एह्यरुन्धति ॥ ५ ॥

भद्रात्। प्रक्षात्। निः। तिष्ठसि। अश्वत्थात्। खदिरात्। धवात्।

भद्रात्। न्यग्रोधात्। पर्णात्। सा। नः। आ। इहि। अरुन्धति ॥ ५ ॥

हिरण्यवर्णे सुभगे सूर्यवर्णे वपुष्टमे।

रुतं गच्छासि निष्कृते निष्कृतिर्नाम वा असि ॥ ६ ॥

हिरण्यऽवर्णे। सुऽभगे। सूर्यऽवर्णे। वपुःऽतमे।

रुतम्। गच्छासि। निःऽकृते। निःऽकृतिः। नाम। वै। असि ॥ ६ ॥

हिरण्यवर्णे सुभगे शुष्मे लोमशवक्षणे।

अपामसि स्वसा लाक्षे वातो ह्यात्मा बभूव ते ॥ ७ ॥

हिरण्यऽवर्णे। सुऽभगे। शुष्मे। लोमशऽवक्षणे।

अपाम्। असि। स्वसा। लाक्षे। वातः। ह। आत्मा। बभूव। ते ॥ ७ ॥

सिलाची नाम कानीनोऽजबभ्रुः पिता तव।

अश्वो यमस्य यः श्यावस्तस्य ह स्नास्युक्षिता ॥ ८ ॥

सिलाची। नाम। कानीनः। अजऽबभ्रुः। पिता। तव।

अश्वः। यमस्य। यः। श्यावः। तस्य। ह। स्नाः। असि। उक्षिता ॥ ८ ॥

अश्वस्यास्नः संपतिता सा वृक्षाँ अभि सिष्यदे।

सरा पतत्रिणी भूत्वा सा न एह्यरुन्धति ॥ ९ ॥

---

१ R Dc निःकृतिः. We with A B D K K^m S^m V Cs. २ R Dc निःकृधि. We with A B^h D K K^m S^m V Cs. ३ R Dc निःकृते. We with A B^h D K K^m S^m V Cs. ४ R Dc निःकृति°. We with A B^h D K K^m S^m V Cs. ५ S^m नाम. B^h नाम changed to नामं. ६ R °वभ्रुः. ७ Cs शाव°. ८ K अजबभ्रु।. ९ K P आस्ना।. १० B R S^m वृक्षं. We with A B^h D K K^m V Dc Cs.

अश्वस्य । अस्नः । समऽपतिता । सा । वृक्षान् । अभि । सिस्यदे ।
सरा । पतत्रिणी । भूत्वा । सा । नः । आ । इहि । अरुन्धति ॥ ९ ॥

प्रथमेनुवाके पञ्चमं सूक्तम् ॥

इति प्रथमोनुवाकः ॥

रोगिण आरोग्यविज्ञानकर्मणि "ब्रह्म जज्ञानम्" इति सूक्तेन तिस्रः स्नावरज्रूरभिमन्त्र्य अङ्गारेषु निदधाति । यदि अङ्गारस्थास्ता ऊर्ध्वं गच्छन्ति ततो जीविष्यतीति ज्ञेयम् । तद् उक्तं कौशिकेन । "ब्रह्म जज्ञानम् इति जीवितविज्ञानम् । तिस्रः स्नावरज्रूरङ्गारेष्ववधायोत्कुचतीषु कल्याणम्" इति [कौ० २. ६] ॥

तथा सांग्रामिकविज्ञानकर्मणि अनेन सूक्तेन तिस्रः स्नावरज्रूरभिमन्त्र्य एका आत्मसेना रज्जुः द्वितीया मध्ये मृत्युः तृतीया रज्जुः परसेनेति संकल्प्य अङ्गारेषु निदधाति । यस्या उपरि मृत्युर्गच्छति तस्याः पराजयो भवति । या मृत्योरुपरि पतति तस्या जयो भवति । या संमुखा याति तस्या अपि जयो भवति ॥

तथा तत्रैव कर्मणि रज्जुम् एकाम् अभिमन्त्र्य अङ्गारेषु निदधाति । एवम् इषीकाः ॥

तद् उक्तं कौशिकेन । "सांग्रामिकम् । एता व्यादिशति । मध्ये मृत्युरितरे सेने । पराजेष्यमाणां मृत्युरतिवर्तते । जेष्यन्ती "मृत्युम् । अग्रेपूत्कुचत्सु मुख्या हन्यन्ते मध्येषु मध्या अन्तेष्ववरे । एवम् इषीकाः" इति [कौ० २. ६] ॥

सलिलगणे अस्य सूक्तस्य पाठः । तद् "आपो हि ष्ठा" इति सूक्ते [१.५] द्रष्टव्यम् ॥

तथा प्रवत्स्यन् अनेन सूक्तेन हवींषि जुहुयात् । आज्यपालाशादिसमित्पुरोडाशपयउदौदनपायसपशुव्रीहियवतिलधानाकरम्भशष्कुल्यः एतानि हवींषि विकल्पेन जुहुयाद् इत्यर्थः । तद् उक्तं कौशिकेन । "द्वितीयेन प्रवत्स्यन् हविषाम् उपदधीत" इति [कौ० ३. १] ॥

तथा स्त्रीप्रसवदोषे सूतिकारोगे च अनेन सूक्तेन भक्तम् अभिमन्त्र्य ददाति । तथा सक्तुमन्थम् अभिमन्त्र्य पाययति । अनेनैव सूक्तेन उपस्थानम् आदित्यस्य । तद् उक्तं कौशिकेन । "ब्रह्म जज्ञानम् इति सूतिकारिष्टकौ प्रपादयति । मन्थाचमनोपस्थानम् आदित्यस्य" इति [कौ० ४. ४] ॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥ १ ॥

ब्रह्म । जज्ञानम् । प्रथमम् । पुरस्तात् । वि । सीमतः । सुऽरुचः । वेनः । आवः ।
सः । बुध्न्याः । उपऽमाः । अस्य । विऽस्थाः । सतः । च । योनिम् । असतः । च । वि ।
वः ॥ १ ॥

अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे ।
वीरान् नो अत्र मा दभन् तद् व एतत् पुरो दधे ॥ २ ॥

अनाप्ताः । ये । वः । प्रथमाः । यानि । कर्माणि । चक्रिरे ।
वीरान् । नः । अत्र । मा । दभन् । तत् । वः । एतत् । पुरः । दधे ॥ २ ॥

सहस्रधार एव ते समस्वरन् दिवो नाके मधुजिह्वा असश्चतः।
तस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवे ॥ ३ ॥

सहस्रऽधारे। एव। ते। सम्। अस्वरन्। दिवः। नाके। मधुऽजिह्वाः। असश्चतः।
तस्य। स्पशः। न। नि। मिषन्ति। भूर्णयः। पदेऽपदे। पाशिनः। सन्ति। सेतवे ॥ ३ ॥

पर्यू षु प्र धन्वा वाजसातये परि वृत्राणि सक्षणिः।
द्विषस्तदध्यर्णवेनेयसे सनिस्रसो नामासि त्रयोदशो मास इन्द्रस्य गृहः॥४॥

परि। ऊं इति। सु। प्र। धन्व। वाजऽसातये। परि। वृत्राणि। सक्षणिः।
द्विषः। तत्। अधि। अर्णवेन। ईयसे। सनिस्रसः। नाम। असि। त्रयःऽदशः। मासः।
इन्द्रस्य। गृहः ॥ ४ ॥

न्वे३तेनारात्सीरसौ स्वाहा।
तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृडतं नः ॥ ५ ॥

नु। एतेन। अरात्सीः। असौ। स्वाहा।
तिग्मऽआयुधौ। तिग्महेती इति तिग्मऽहेती। सुऽशेवौ। सोमारुद्रौ। इह। सु। मृड-
तम्। नः ॥ ५ ॥

अवैतेनारात्सीरसौ स्वाहा। तिग्मा० ॥ ६ ॥

अव। एतेन०। ० ॥ ६ ॥

अपैतेनारात्सीरसौ स्वाहा।
तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृडतं नः ॥ ७ ॥

अप। एतेन। अरात्सीः। असौ। स्वाहा।
तिग्मऽआयुधौ। तिग्महेती इति तिग्मऽहेती। सुऽशेवौ। सोमारुद्रौ। इह। सु। मृड-
तम्। नः ॥ ७ ॥

मुमुक्तमस्मान्दुरितादवद्याज्जुषेथां यज्ञममृतमस्मासु धत्तम् ॥ ८ ॥

---

१ P अश्वरन्। २ P सनिस्रसः। ३ A K K V न्वे १. S न्वे १. We with B D R Dc Cs. ४ B Dc °मस्मादु°. A °मस्मान्दु° changed to °मस्माद्दु°. Cs °सांद्दु°. K K R V °मस्माद्दु°. P P J CP अस्मात्। We with D S. ५ S धत्ताम्. P धत्ताम्। We with A B D K K R Dc Cs P J CP.

मुमुक्तम् । अस्मान् । दुःऽइतात् । अवद्यात् । जुषेथाम् । यज्ञम् । अमृतम् । असासु ।
धत्तम् ॥ ८ ॥

चक्षुषो हेते मनसो हेते ब्रह्मणो हेते तपसश्च हेते ।
मेन्या मेनिरस्यमेनयस्ते सन्तु ये३ऽस्माँ अभ्यघायन्ति ॥ ९ ॥

चक्षुषः । हेते । मनसः । हेते । ब्रह्मणः । हेते । तपसः । च । हेते ।
मेन्याः । मेनिः । असि । अमेनयः । ते । सन्तु । ये । अस्मान् । अभिऽअघायन्ति ॥ ९ ॥

यो३ऽस्मांश्चक्षुषा मनसा चित्त्याकूत्या च यो अघायुरभिदासात् ।
त्वं तान्नग्ने मेन्यामेनीन् कृणु स्वाहा ॥ १० ॥

यः । अस्मान् । चक्षुषा । मनसा । चित्त्या । आऽकूत्या । च । यः । अघऽयुः । अभिऽदासात् ।
त्वम् । तान् । अग्ने । मेन्या । अमेनीन् । कृणु । स्वाहा ॥ १० ॥

इन्द्रस्य गृहोऽसि । तं त्वा प्र पद्ये तं त्वा प्र विशामि सर्वगुः सर्वपूरुषः
सर्वात्मा सर्वतनूः सह यन्मेस्ति तेन ॥ ११ ॥

इन्द्रस्य । गृहः । असि ॥ तम् । त्वा । प्र । पद्ये । तम् । त्वा । प्र । विशामि । सर्वऽगुः ।
सर्वऽपुरुषः । सर्वऽआत्मा । सर्वऽतनूः । सह । यत् । मे । अस्ति । तेन ॥ ११ ॥

इन्द्रस्य शर्मासि ।० ॥ १२ ॥

इन्द्रस्य । शर्म । असि ॥० ॥ १२ ॥

इन्द्रस्य वर्मासि ।० ॥ १३ ॥

इन्द्रस्य । वर्म । असि ॥० ॥ १३ ॥

इन्द्रस्य वरूथमसि । तं त्वा प्र पद्ये तं त्वा प्र विशामि सर्वगुः सर्वपूरुषः
सर्वात्मा सर्वतनूः सह यन्मेस्ति तेन ॥ १४ ॥

इन्द्रस्य । वरूथम् । असि ॥ तम् । त्वा । प्र । पद्ये । तम् । त्वा । प्र । विशामि । सर्वऽगुः ।
सर्वऽपुरुषः । सर्वऽआत्मा । सर्वऽतनूः । सह । यत् । मे । अस्ति । तेन ॥ १४ ॥

इति द्वितीयेनुवाके प्रथमं सूक्तम् ॥

---

१ See foot-note ४ on the previous page. २ **K** ^{m}**K** यो १. ^{m}**S** ये १. We with **D R Dc Cs.** ३ **K P** omit अ°. ४ ^{h}**B K** ^{m}**K V** यो १. **Dc** यो ½. ^{m}**S** यो १. **Cs** योस्मां°. We with **D.** ५ ^{2}**P** आकूत्या ।. We with **P J V** C_P.

निर्ऋतिकर्मणि "आ नो भर" इति सूक्तेन शर्करामिश्रा धानाः सकृज्जुहोति। "आ नो भरेति धानाः" [कौ० ३. १] इत्यादि सूत्रम्॥

तथा अर्थोत्थापनविघ्नशमनकर्मणि अस्य सूक्तस्य विनियोगः। सूत्रादिकम् "अयं ते योनिः" इति सूक्ते [३. २०] द्रष्टव्यम्॥

अग्निचयने वनीवाहने क्रियमाणे इदं सूक्तं यजमानं वाचयति। तद् उक्तं वैताने। "आ नो भरेति वनीवाहने वाचयति" इति [वै० ५. १]॥ वनीवाहनम् ऋत्विजां भृत्यर्थं वचनम्॥

आ नो भर मा परि ष्ठा अराते मा नो रक्षीर्दक्षिणां नीयमानाम्।
नमो वीत्सायाऽसंमृज्ञये नमो अस्त्वरातये॥ १॥

आ। नः। भर। मा। परि। स्थाः। अराते। मा। नः। रक्षीः। दक्षिणाम्। नीयमानाम्।
नमः। वि-ऽइत्सायै। असम्-ऽऋज्ञये। नमः। अस्तु। अरातये॥ १॥

यमराते पुरोधत्से पुरुषं परिरापिणम्।
नमस्ते तस्मै कृण्मो मा वनिं व्यथयीर्मम॥ २॥

यम्। अराते। पुरः-ऽधत्से। पुरुषम्। परि-ऽरापिणम्।
नमः। ते। तस्मै। कृण्मः। मा। वनिम्। व्यथयीः। मम॥ २॥

प्र णो वनिर्देवकृता दिवा नक्तं च कल्पताम्।
अरातिमनुप्रेमो वयं नमो अस्त्वरातये॥ ३॥

प्र। नः। वनिः। देव-ऽकृता। दिवा। नक्तम्। च। कल्पताम्।
अरातिम्। अनु-ऽप्रेमः। वयम्। नमः। अस्तु। अरातये॥ ३॥

सरस्वतीमनुमतिं भगं यन्तो हवामहे।
वाचं जुष्टां मधुमतीमवादिषं देवानां देवहूतिषु॥ ४॥

सरस्वतीम्। अनु-ऽमतिम्। भगम्। यन्तः। हवामहे।
वाचम्। जुष्टाम्। मधु-ऽमतीम्। अवादिषम्। देवानाम्। देव-ऽहूतिषु॥ ४॥

यं याचाम्यहं वाचा सरस्वत्या मनोयुजा।
श्रद्धा तमद्य विन्दतु दत्ता सोमेन वभ्रुणा॥ ५॥

यम्। याचामि। अहम्। वाचा। सरस्वत्या। मनः-युजा।

---

१ **A B B**^{h} **D K K**^{m} **R S**^{m} **C**s अरातिमनु°. **D**e अरातिमनु° changed to अरातिमनु°. **P J K C**r अरातिम्। अनु-ऽप्रेमः। **P**^{2} अरातिम्। अनु-ऽप्रेमः। We with **D**e **P**^{2}. But should not we read अरातिमनु प्रेमो (*pad.* अरातिम्। अनु। प्र। इमः।)?

श्रद्धा । तम् । अद्य । विन्दतु । दत्ता । सोमेन । वभ्रुणा ॥ ५ ॥

मा वनिं मा वाचं नो वीत्सीरुभाविन्द्राग्नी आ भरतां नो वसूनि ।
सर्वे नो अद्य दित्सन्तोरातिं प्रति हर्यत ॥ ६ ॥

मा । वनिम् । मा । वाचम् । नः । वि । ईत्सीः । उभौ । इन्द्राग्नी इति । आ । भरताम् ।
नः । वसूनि ।
सर्वे । नः । अद्य । दित्सन्तः । अरातिम् । प्रति । हर्यत ॥ ६ ॥

परोपेह्यसमृद्धे वि ते हेतिं नयामसि ।
वेद त्वाहं निमीवन्तीं नितुदन्तीमराते ॥ ७ ॥

परः । अप । इहि । असम्ऽऋद्धे । वि । ते । हेतिम् । नयामसि ।
वेद । त्वा । अहम् । निऽमीवन्तीम् । निऽतुदन्तीम् । अराते ॥ ७ ॥

उत नग्ना बोभुवती स्वप्नया सचसे जनम् ।
अराते चित्तं वीत्सन्त्याकूतिं पुरुषस्य च ॥ ८ ॥

उत । नग्ना । बोभुवती । स्वप्नऽया । सचसे । जनम् ।
अराते । चित्तम् । विऽईत्सन्ती । आऽकूतिम् । पुरुषस्य । च ॥ ८ ॥

या महती महोन्माना विश्वा आशा व्यानशे ।
तस्यै हिरण्यकेश्यै निर्ऋत्या अकरं नमः ॥ ९ ॥

या । महती । महाऽउन्माना । विश्वाः । आशाः । विऽआनशे ।
तस्यै । हिरण्यऽकेश्यै । निःऽऋत्यै । अकरम् । नमः ॥ ९ ॥

हिरण्यवर्णा सुभगा हिरण्यकशिपुर्मही ।
तस्यै हिरण्यद्रापयेरात्या अकरं नमः ॥ १० ॥

हिरण्यऽवर्णा । सुऽभगा । हिरण्यऽकशिपुः । मही ।
तस्यै । हिरण्यऽद्रापये । अरात्यै । अकरम् । नमः ॥ १० ॥

इति द्वितीयेनुवाके द्वितीयं सूक्तम् ॥

---

१ **A B B**^{P} **B**^{h} **R S**^{m} णो. **D**c णो changed to नो. We with **D K K**^{m} **V C**^{s}. २ **K** वि। ईत्सीः। **V** विऽईत्सीः. We with **P P**^{2} **J C**^{P}.

अभिचारकर्मणि "वैकङ्कतेन" इति सूक्तेन जुहोति। "वैकङ्कतेति मन्त्रोक्तम्" इति [कौ॰ ६. २] सूत्रात्॥

वैकङ्कतेनेध्मेन देवेभ्य आज्यं वह।
अग्ने तांँ इह मादय सर्व आ यन्तु मे हवम्॥ १॥

वैकङ्कतेन। इध्मेन। देवेभ्यः। आज्यम्। वह।
अग्ने। तान्। इह। मादय। सर्वे। आ। यन्तु। मे। हवम्॥ १॥

इन्द्रा याहि मे हवमिदं करिष्यामि तच्छृणु।
इम ऐन्द्रा अतिसरा आकूतिं सं नमन्तु मे।
तेभिः शकेम वीर्यै[1] जातवेदस्तनूवशिन्॥ २॥

इन्द्र। आ। याहि। मे। हवम्। इदम्। करिष्यामि। तत्। शृणु।
इमे। ऐन्द्राः। अतिऽसराः। आऽकूतिम्। सम्। नमन्तु। मे।
तेभिः। शकेम। वीर्यभिः। जातऽवेदः। तनूऽवशिन्॥ २॥

यदसावमुतो देवा अदेवः संश्चिकीर्षति।
मा तस्याग्निर्हव्यं वाक्षीद्धवं देवा अस्य मोप गुर्ममैव हवमेतन॥ ३॥

यत्। असौ। अमुतः। देवाः। अदेवः[3]। सन्। चिकीर्षति।
मा। तस्य। अग्निः। हव्यम्। वाक्षीत्। हवम्। देवाः। अस्य। मा। उप। गुः। मम।
एव। हवम्। आ। इतन॥ ३॥

अतिं धावतातिसरा इन्द्रस्य वचसा हत।
अविं वृक इव मथीत स वो जीवन्मा मोचि प्राणमस्यापि नह्यत॥४॥

अतिं। धावत। अतिऽसराः। इन्द्रस्य। वचसा। हत।
अविम्। वृकःऽइव। मथीत। सः। वः। जीवन्। मा। मोचि। प्राणम्। अस्य।
अपि। नह्यत॥ ४॥

यमग्नी पुरोदधिरे ब्रह्माणमपभूतये।
इन्द्र स तेंऽअधस्पदं तं प्रत्यस्यामि मृत्यवे॥ ५॥

---

१ R तं. २ A B $\overset{h}{B}$ D $\overset{m}{S}$ C ३ for १. We with K $\overset{m}{K}$ V. ३ $\overset{2}{P}$ अदेवः।. ४ Cs °सरा.
५ $\overset{2}{P}$ अविम्।.

यम् । अमी इति । पुरःऽदधिरे । ब्रह्माणम् । अपऽभूतये ।
इन्द्रं । सः । ते । अधःऽपदम् । तम् । प्रति । अस्यामि । मृत्यवे ॥ ५ ॥

यदि प्रेयुर्देवपुरा ब्रह्म वर्माणि चक्रिरे ।
तनूपानं परिपाणं कृण्वाना यदुपोचिरे सर्वं तदरसं कृधि ॥ ६ ॥

यदि । प्रऽईयुः । देवऽपुराः । ब्रह्म । वर्माणि । चक्रिरे ।
तनूऽपानम् । परिऽपानम् । कृण्वानाः । यत् । उपऽऊचिरे । सर्वम् । तत् । अरसम् ।
कृधि ॥ ६ ॥

यानसावतिसरांश्चकार कृणवच्च यान् ।
त्वं तानिन्द्र वृत्रहन् प्रतीचः पुनरा कृधि यथामुं तृणहां जनम् ॥७॥

यान् । असौ । अतिऽसरान् । चकार । कृणवत् । च । यान् ।
त्वम् । तान् । इन्द्र । वृत्रऽहन् । प्रतीचः । पुनः । आ । कृधि । यथा । अमुम् । तृण-
हान् । जनम् ॥ ७ ॥

यथेन्द्र उद्वाचनं लब्ध्वा चक्रे अधस्पदम् ।
कृण्वे ३ हमधरांस्तथामूं२ छश्वतीभ्यः समाभ्यः ॥ ८ ॥

यथा । इन्द्रः । उत्ऽवाचनम् । लब्ध्वा । चक्रे । अधःऽपदम् ।
कृण्वे । अहम् । अधरान् । तथा । अमून् । शश्वतीभ्यः । समाभ्यः ॥ ८ ॥

अत्रैनानिन्द्र वृत्रहन्नुग्रो मर्मणि विध्य ।
अत्रैवैनानभि तिष्ठेन्द्र मेद्यहं तव ।
अनु त्वेन्द्रा रभामहे स्याम सुमतौ तव ॥ ९ ॥

अत्र । एनान् । इन्द्र । वृत्रऽहन् । उग्रः । मर्मणि । विध्य ।
अत्र । एव । एनान् । अभि । तिष्ठ । इन्द्र । मेदी । अहम् । तव ।
अनु । त्वा । इन्द्र । आ । रभामहे । स्याम । सुऽमतौ । तव ॥ ९ ॥

इति द्वितीयेनुवाके तृतीयं सूक्तम् ॥

---

१ **K V** १ for ३. २ **Cs** °मून्छं°. ३ **P J** C^{P} कृण्वे]. $\overset{2}{P}$ कृण्व ।. We with **K V**. ४ $\overset{m}{K}$ $R\overset{m}{S}$ De अत्रैणानिन्द्र. We with **A** $\overset{h}{B}$ **D K V Cs**. ५ **A B** $\overset{h}{B}$ **D R** $\overset{m}{S}$ ३ for १. We with **K** $\overset{m}{K}$ **V**. ६ **P** इन्द्रं ।.

"दिवे स्वाहा" इति सूक्तेन सर्वरोगभैषज्यार्थम् आज्यं हुत्वा सयवे केवले वा उदपात्रे चतुरः संपातान् द्वौ पृथिव्याम् आनीय संपातितमृत्सहितोदकेन सूक्ताभिमन्त्रितेन व्याधितम् आप्लावयेत्। सूत्रितं हि। "दिवे स्वाहा [५.९] इमं यवम् [६.९१] इति चतुर उदपात्रे संपातान् आनयति। द्वौ पृथिव्याम्। तौ प्रत्याहृत्याप्लावयति सयवे च" इति [कौ० ४.४.] ॥

दि॒वे स्वाहा॑ ॥ १ ॥

दि॒वे। स्वाहा॑ ॥ १ ॥

पृ॒थि॒व्यै स्वाहा॑ ॥ २ ॥

पृ॒थि॒व्यै। स्वाहा॑ ॥ २ ॥

अ॒न्तरि॑क्षाय॒ स्वाहा॑ ॥ ३ ॥

अ॒न्तरि॑क्षाय। स्वाहा॑ ॥ ३ ॥

अ॒न्तरि॑क्षाय॒ स्वाहा॑ ॥ ४ ॥

अ॒न्तरि॑क्षाय। स्वाहा॑ ॥ ४ ॥

दि॒वे स्वाहा॑ ॥ ५ ॥

दि॒वे। स्वाहा॑ ॥ ५ ॥

पृ॒थि॒व्यै स्वाहा॑ ॥ ६ ॥

पृ॒थि॒व्यै। स्वाहा॑ ॥ ६ ॥

सूर्यो॑ मे॒ चक्षु॒र्वातः॑ प्रा॒णो३॑न्तरि॑क्षमा॒त्मा पृ॑थि॒वी शरी॑रम्।
अ॒स्तृ॒तो नामा॒हम॒यम॑स्मि॒ स आ॒त्मान॒ं नि द॑धे॒ द्यावा॑पृथि॒वीभ्यां॑
गोपी॒थाय॑ ॥ ७ ॥

सूर्यः॑। मे॒। चक्षुः॑। वातः॑। प्रा॒णः॑। अ॒न्तरि॑क्षम्। आ॒त्मा। पृ॒थि॒वी। शरी॑रम्।
अ॒स्तृ॒तः। नाम॑। अ॒हम्। अ॒यम्। अ॒स्मि॒। सः। आ॒त्मान॑म्। नि। द॒धे॒। द्यावा॑पृथि-
वीभ्या॑म्। गो॒पी॒थाय॑ ॥ ७ ॥

उदायु॑रुद् बल॒मुत् कृ॒तमुत् कृ॒त्यामुन्म॑नी॒षामुदि॑न्द्रि॒यम्।
आयु॑ष्कृ॒दायु॑ष्पत्नी॒ स्वधा॑वन्तौ गो॒पा मे॑ स्तं गोपा॒यत॑ं मा।
आ॒त्म॒सदौ॑ मे स्तं॒ मा मा॑ हिंसिष्टम् ॥ ८ ॥

उत्। आयुः॑। उत्। बल॑म्। उत्। कृ॒तम्। उत्। कृ॒त्याम्। उत्। म॒नी॒षाम्। उत्।
इ॒न्द्रि॒यम्।
आयु॑ःऽकृत्। आयु॑ष्पत्नीत्यायुः॑ऽपत्नी। स्वधा॑ऽवन्तौ। गो॒पा। मे॒। स्तम्। गो॒पा॒यत॑म्। मा।
आ॒त्मऽसदौ॑। मे॒। स्तम्। मा। मा॒। हिंसिष्टम् ॥ ८ ॥

द्वितीयेनुवाके चतुर्थं सूक्तम् ॥

"अश्मवर्म मेसि" इति सूक्तेन पत्तनग्रामगृहस्वस्त्ययनार्थं षड् अश्मनः संपातवतः कृत्वा अभिमन्त्र्य चतुर्षु पत्तनादिकोणेषु चतुरो निखनति एकं मध्ये निखनति एकं पत्तनाद्युपरि निदधाति। तद् उक्तं कौशिकेन। "अश्मवर्म मेति षड् अश्मनः संपा-

---

१ ^{h}BD K ^{m}K ^{m}S V Cs १ for ३. २ A आयुःकृदा°. ३ A °युःपत्नी.

ततः स्रक्तिपूपर्यधस्तान्निखनति" इति [कौ° ७. २] ॥ "°यो मा दिशाम्" इति सप्तमी ऋक् पूर्वासाम् ऋचां प्रत्येकं द्वितीया कार्या । एवं षड्भिः षट् संपाताः कार्या इत्यर्थः ॥

अश्मवर्म मेसि यो मा प्राच्या दिशोघायुरभिदासात् ।
एतत् स ऋच्छात् ॥ १ ॥

अश्मऽवर्म । मे । असि । यः । मा । प्राच्याः । दिशः । अघऽयुः । अभिऽदासात् ।
एतत् । सः । ऋच्छात् ॥ १ ॥

अश्मवर्म मेसि यो मा दक्षिणाया दिशः ०।० ॥ २ ॥

०मा । दक्षिणायाः । दिशः ०।० ॥ २ ॥

अश्मवर्म मेसि यो मा प्रतीच्या दिशः ०।० ॥ ३ ॥

०मा । प्रतीच्याः । दिशः ०।० ॥ ३ ॥

अश्मवर्म मेसि यो मोदीच्या दिशः ०।० ॥ ४ ॥

०मा । उदीच्याः । दिशः ०।० ॥ ४ ॥

अश्मवर्म मेसि यो मा ध्रुवाया दिशः ०।० ॥ ५ ॥

०मा । ध्रुवायाः । दिशः ०।० ॥ ५ ॥

अश्मवर्म मेसि यो मोर्ध्वाया दिशोघायुः ०।० ॥ ६ ॥

०मा । ऊर्ध्वायाः । दिशः ०।० ॥ ६ ॥

अश्मवर्म मेसि यो मा दिशामन्तर्देशेभ्योघायुरभिदासात् ।
एतत् स ऋच्छात् ॥ ७ ॥

अश्मऽवर्म । मे । असि । यः । मा । दिशाम् । अन्तःऽदेशेभ्यः । अघऽयुः । अभिऽदासात् ।
एतत् । सः । ऋच्छात् ॥ ७ ॥

बृहता मन उप ह्वये मातरिश्वना प्राणापानौ ।
सूर्याच्चक्षुरन्तरिक्षाच्छ्रोत्रं पृथिव्याः शरीरम् ।
सरस्वत्या वाचमुप ह्वयामहे मनोयुजा ॥ ८ ॥

बृहता । मनः । उप । ह्वये । मातरिश्वना । प्राणापानौ ।

१ A R दिशोघा°.

सूर्यात्। चक्षुः। अन्तरिक्षात्। श्रोत्रम्। पृथिव्याः। शरीरम्।
सरस्वत्या। वाचम्। उप। ह्वयामहे। मनःऽयुजा ॥ ८ ॥

द्वितीयेनुवाके पञ्चमं सूक्तम् ॥

इति द्वितीयोनुवाकः ॥

सर्वसंपत्कर्मसु "कथं महे" इति सूक्तेन मादानकाष्टघृतं क्षीरौदनं संपात्य अभिमन्त्र्य अश्नाति ॥
तथा तत्रैव अनेन सूक्तेन चमसे सरूपवत्साया दुग्धे व्रीहियवावबधाय मूर्छयित्वा मध्वासिच्य संपात्याभिमन्त्र्य आशयति ॥
तद् उक्तं कौशिकेन। "कथं मह इति मादानकघृतं क्षीरौदनम् अश्नाति। चमसे सरूपवत्साया दुग्धे व्रीहियवावबधाय मूर्छयित्वा मध्वासिच्याशयति" इति [कौ° २. ३] ॥ मूर्छयित्वा चूर्णीकृत्वा ॥

कथं महे असुरायाब्रवीरिह कथं पित्रे हरये त्वेषनृम्णः।
पृश्निं वरुण दक्षिणा ददावान् पुनर्मघ त्वं मनसाचिकित्सीः ॥ १ ॥

कथम्। महे। असुराय। अब्रवीः। इह। कथम्। पित्रे। हरये। त्वेषऽनृम्णः।
पृश्निम्। वरुण। दक्षिणाम्। ददावान्। पुनःऽमघ। त्वम्। मनसा। अचिकित्सीः ॥ १ ॥

न कामेन पुनर्मघो भवामि सं चक्षे कं पृश्निमेतामुपाजे।
केन नु त्वमथर्वन् काव्येन केन जातेनासि जातवेदाः ॥ २ ॥

न। कामेन। पुनःऽमघः। भवामि। सम्। चक्षे। कम्। पृश्निम्। एताम्। उप। अजे।
केन। नु। त्वम्। अथर्वन्। काव्येन। केन। जातेन। असि। जातऽवेदाः ॥ २ ॥

सत्यमहं गभीरः काव्येन सत्यं जातेनास्मि जातवेदाः।
न मे दासो नार्यो महित्वा व्रतं मीमाय यदहं धरिष्ये ॥ ३ ॥

सत्यम्। अहम्। गभीरः। काव्येन। सत्यम्। जातेन। अस्मि। जातऽवेदाः।
न। मे। दासः। न। आर्यः। महिऽत्वा। व्रतम्। मीमाय। यत्। अहम्। धरिष्ये ॥ ३ ॥

न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन्।
त्वं ता विश्वा भुवनानि वेत्थ स चिन्नु त्वज्जनो मायी बिभाय ॥ ४ ॥

न। त्वत्। अन्यः। कविऽतरः। न। मेधया। धीरऽतरः। वरुण। स्वधाऽवन्।
त्वम्। ता। विश्वा। भुवनानि। वेत्थ। सः। चित्। नु। त्वत्। जनः। मायी। बिभाय ॥ ४ ॥

---

१ A D R $\overset{m}{S}$ Cs °मथर्वन्. De °मथ° changed to °मंथ°. P J Cp अथर्वन्।. We with $\overset{h}{B}$ K $\overset{m}{K}$ V $\overset{2}{P}$. २ D R $\overset{m}{S}$ Cs भुवनानि. De भुवनानि changed to भुवनानि. P वेत्थ।. We with A $\overset{h}{B}$ K $\overset{m}{K}$ V, and $\overset{2}{P}$ J Cp.

त्वं ह्यङ्ग वरुण स्वधावन् विश्वा वेत्थ जनिमा सुप्रणीते ।
किं रजस एना परो अन्यदस्त्येना किं परेणावरमुर ॥ ५ ॥

त्वम् । हि । अङ्ग । वरुण । स्वधाऽवन् । विश्वा । वेत्थ । जनिम । सुऽप्रनीते ।
किम् । रजसः । एना । परः । अन्यत् । अस्ति । एना । किम् । परेण । अवरम् । अमुर ॥ ५ ॥

एकं रजस एना परो अन्यदस्त्येना पर एकेन दुर्णशं चिदर्वाक् ।
तत् ते विद्वान् वरुण प्र ब्रवीम्यधोवचसः पणयो भवन्तु नीचैर्दासा उप
सर्पन्तु भूमिम् ॥ ६ ॥

एकम् । रजसः । एना । परः । अन्यत् । अस्ति । एना । परः । एकेन । दुःऽनशम् । चित् ।
अर्वाक् ।
तत् । ते । विद्वान् । वरुण । प्र । ब्रवीमि । अधःऽवचसः । पणयः । भवन्तु । नीचैः । दासाः ।
उप । सर्पन्तु । भूमिम् ॥ ६ ॥

त्वं ह्यङ्ग वरुण ब्रवीषि पुनर्मघेष्ववद्यानि भूरि ।
मो षु पणीँरभ्येतावतो भून्मा त्वा वोचन्नराधसं जनासः ॥ ७ ॥

त्वम् । हि । अङ्ग । वरुण । ब्रवीषि । पुनःऽमघेषु । अवद्यानि । भूरि ।
मो इति । सु । पणीन् । अभि । एतावतः । भूत् । मा । त्वा । वोचन् । अराधसम् । जनासः ॥ ७ ॥

मा मा वोचन्नराधसं जनासः पुनस्ते पृश्निं जरितर्ददामि ।
स्तोत्रं मे विश्वमा याहि शचीभिरन्तर्विश्वासु मानुषीषु दिक्षु ॥ ८ ॥

मा । मा । वोचन् । अराधसम् । जनासः । पुनः । ते । पृश्निम् । जरितः । ददामि ।
स्तोत्रम् । मे । विश्वम् । आ । याहि । शचीभिः । अन्तः । विश्वासु । मानुषीषु । दिक्षु ॥ ८ ॥

आ ते स्तोत्राण्युद्यतानि यन्त्वन्तर्विश्वासु मानुषीषु दिक्षु ।
देहि नु मे यन्मे अदत्तो असि युज्यो मे सप्तपदः सखासि ॥ ९ ॥

---

१ $\overset{h}{\text{B}}$ D R $\overset{m}{\text{S}}$ Cs ह्यांग. We with A K $\overset{m}{\text{K}}$ V Dc. २ A K $\overset{m}{\text{K}}$ R $\overset{m}{\text{S}}$ V Dc अन्यदस्त्येना. $\overset{2}{\text{P}}$ J V Cr अस्ति ।. We with $\overset{h}{\text{B}}$ D Cs P. B D, however, have °स्त्येना changed to °स्तेना in this as well as the next verse. ३ A $\overset{h}{\text{B}}$ D K $\overset{m}{\text{K}}$ $\overset{m}{\text{S}}$ Dc अन्यदस्त्येना. V $\overset{2}{\text{P}}$ J Cr अस्ति ।. P अस्ति changed to अस्ति ।. We with R Cs P.

आ । ते । स्तोत्राणि । उत्ऽयतानि । यन्तु । अन्तः । विश्वासु । मानुषीषु । दिक्षु ।
देहि । नु । मे । यत् । मे । अदत्तः । असि । युज्यः । मे । सप्तऽपदः । सखा । असि ॥ ९ ॥

समा नौ बन्धुर्वरुण समा जा वेदाहं तद्यन्नावेषा समा जा ।
ददामि तद् यत् ते अदत्तो अस्मि युज्यस्ते सप्तपदः सखास्मि ॥ १० ॥

समा । नौ । बन्धुः । वरुण । समा । जा । वेद । अहम् । तत् । यत् । नौ । एषा । समा । जा ।
ददामि । तत् । यत् । ते । अदत्तः । अस्मि । युज्यः । ते । सप्तऽपदः । सखा । अस्मि ॥ १० ॥

देवो देवाय गृणते वयोधा विप्रो विप्राय स्तुवते सुमेधाः ।
अजीजनो हि वरुण स्वधावन्नथर्वाणं पितरं देवबन्धुम् ।
तस्मा उ राधः कृणुहि सुप्रशस्तं सखा नो असि परमं च बन्धुः ॥११॥

देवः । देवाय । गृणते । वयःऽधाः । विप्रः । विप्राय । स्तुवते । सुऽमेधाः ।
अजीजनः । हि । वरुण । स्वधाऽवन् । अथर्वाणम् । पितरम् । देवऽबन्धुम् ।
तस्मै । ऊं इति । राधः । कृणुहि । सुऽप्रशस्तम् । सखा । नः । असि । परमम् । च । बन्धुः ॥११॥

इति तृतीयेनुवाके प्रथमं सूक्तम् ॥

वशाशमनकर्मणि वपायाश्चत्वारि खण्डानि कृत्वा "समिद्धो अद्य" इति सूक्तेन एकं खण्डं जुहोति । "ऊर्ध्वा अस्य" [५. २७] इति सूक्तेन द्वितीयं खण्डं जुहोति । युक्ताभ्यां सूक्ताभ्यां तृतीयं खण्डम् । अनुमतये स्वाहेति चतुर्थं खण्डं जुहोति । तथा च सूत्रम् । "समिद्ध ऊर्ध्वा अस्येति जुहोति । युक्ताभ्यां तृतीयाम् । आनुमतीं चतुर्थीम्" इति [कौ॰ ५. ९] ॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान् त्वं दूतः कविरसि प्रचेताः ॥ १ ॥

सम्ऽइद्धः । अद्य । मनुषः । दुरोणे । देवः । देवान् । यजसि । जातऽवेदः ।
आ । च । वह । मित्रऽमहः । चिकित्वान् । त्वम् । दूतः । कविः । असि । प्रऽचेताः ॥ १ ॥

तनूनपात् पथ ऋतस्य यानान् मध्वा समञ्जन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः ॥ २ ॥

तनूऽनपात् । पथः । ऋतस्य । यानान् । मध्वा । सम्ऽअञ्जन् । स्वदय । सुऽजिह्व ।
मन्मानि । धीभिः । उत । यज्ञम् । ऋन्धन् । देवऽत्रा । च । कृणुहि । अध्वरम् । नः ॥ २ ॥

---

१ $\overset{h}{B}$ नो. २ All our authorities स्तुवते सुमेधाः. ३ **A D** omit अ°. ४ **P** मित्रऽमहः ।. ५ **A B** $\overset{h}{B}$ B^p **D** $\overset{m}{K}$ **R** $\overset{m}{S}$ **V** D^c C^s स्वदया for स्वदया. **K** स्वधया. **P** $\overset{2}{P}$ **J** C^p **V** स्वदय ।. ६ **P** ऋन्धन् ।. $\overset{2}{P}$ ऋधन् ।. We with **K V J** C^p.

आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान् यक्षीषितो यजीयान् ॥ ३ ॥

आऽजुह्वानः । ईड्यः । वन्द्यः । च । आ । याहि । अग्ने । वसुऽभिः । सऽजोषाः ।
त्वम् । देवानाम् । असि । यह्व । होता । सः । एनान् । यक्षि । इषितः । यजीयान् ॥ ३ ॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् ।
व्युं प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥ ४ ॥

प्राचीनम् । बर्हिः । प्रऽदिशा । पृथिव्याः । वस्तोः । अस्याः । वृज्यते । अग्रे । अह्नाम् ।
वि । ऊं इति । प्रथते । विऽतरम् । वरीयः । देवेभ्यः । अदितये । स्योनम् ॥ ४ ॥

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ५ ॥

व्यचस्वतीः । उर्विया । वि । श्रयन्ताम् । पतिऽभ्यः । न । जनयः । शुम्भमानाः ।
देवीः । द्वारः । बृहतीः । विश्वम्ऽइन्वाः । देवेभ्यः । भवत । सुऽप्रायनाः ॥ ५ ॥

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने ॥ ६ ॥

आ । सुस्वयन्ती इति । यजते इति । उपाके इति । उपसानक्ता । सदताम् । नि । योनौ ।
दिव्ये इति । योषणे इति । बृहती इति । सुरुक्मे इति सुऽरुक्मे । अधि । श्रियम् । शुक्रऽपिशम् । दधाने इति ॥ ६ ॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ ७ ॥

दैव्या । होतारा । प्रथमा । सुऽवाचा । मिमाना । यज्ञम् । मनुषः । यजध्यै ।
प्रऽचोदयन्ता । विदथेषु । कारू इति । प्राचीनम् । ज्योतिः । प्रऽदिशा । दिशन्ता ॥ ७ ॥

आ नो यज्ञं भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ।

---

१ All our authorities वृज्यसे. २ J वर्हिः ।. P वर्हिः changed to वर्हिः ।. But neither reads प्राचीनम् ।. We with $\overset{2}{P}$ V Cp. ३ $\overset{2}{P}$ विश्वम्ऽइन्वाः ।. ४ So P $\overset{2}{P}$ J K V Cp. ५ $\overset{m}{S}$ मिमान. De Cs मिमानो changed to मिमाना. ६ All our authorities मनुष्यदिह.

तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वतीः स्वपसः सदन्ताम् ॥ ८ ॥

आ। नः। यज्ञम्। भारती। तूयम्। एतु। इडा। मनुष्वत्। इह। चेतयन्ती।
तिस्रः। देवीः। बर्हिः। आ। इदम्। स्योनम्। सरस्वतीः। सुऽअपसः। सदन्ताम् ॥ ८ ॥

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद् भुवनानि विश्वा।
तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् ॥ ९ ॥

यः। इमे इति। द्यावापृथिवी इति। जनित्री इति। रूपैः। अपिंशत्। भुवनानि। विश्वा।
तम्। अद्य। होतः। इषितः। यजीयान्। देवम्। त्वष्टारम्। इह। यक्षि। विद्वान् ॥ ९ ॥

उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवींषि।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥ १० ॥

उपऽअवसृज। त्मन्या। समऽअञ्जन्। देवानाम्। पाथः। ऋतुऽथा। हवींषि।
वनस्पतिः। शमिता। देवः। अग्निः। स्वदन्तु। हव्यम्। मधुना। घृतेन ॥ १० ॥

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत् पुरोगाः।
अस्य होतुः प्रशिष्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ॥ ११ ॥

सद्यः। जातः। वि। अमिमीत। यज्ञम्। अग्निः। देवानाम्। अभवत्। पुरःऽगाः।
अस्य। होतुः। प्रऽशिषि। ऋतस्य। वाचि। स्वाहाऽकृतम्। हविः। अदन्तु। देवाः ॥ ११ ॥

इति तृतीयेनुवाके द्वितीयं सूक्तम् ॥

"ददिहि" इति सूक्तं विषभैषज्यकर्मणि विनियुज्यते। तत्र "ददिहि" इति प्रथमर्चः सर्वविषभैषज्यकर्मणि विनियोगः। तद् उक्तं कौशिकेन। "ददिहीति तक्षकायेत्युक्तम्" इति [कौ० ४. ५] ॥ ददिहि इत्येतस्या विनियोगस्तक्षकाय [कौ० ४. ४] इति सूत्रे प्रोक्त इति तस्यार्थः। तद्विनियोगविस्तरस्तु "ब्राह्मणो जज्ञे" इति सूक्ते [४. ६] द्रष्टव्यः ॥

द्वितीयादीनाम् ऋचां प्रत्यृचं विषापहरण एव विनियोगः। तथा च सूत्रम्। "द्वितीयया ग्रहणी। सव्यं परिक्रामति। शिखा-
"सिचि स्तम्बान् उद्बध्नाति। तृतीयया प्रसर्जनी। चतुर्थ्या दक्षिणम् अपेहीति दंशम तृणैः प्रकर्ष्याहिम् अभि निरस्यति यतो
"दष्टः। पञ्चम्या वल्मीकपलललज्वालेन। षष्ठ्यार्बीज्यापाशेन। द्वाभ्यां मधूदापान् पाययति। नवम्या श्वावित्पुरीषम्। त्रिःशु-
"ष्क्या मांसं प्राशयति। दशम्यालाबुनाचमयति। एकादश्या नाभिं बध्नाति" इति [कौ० ४. ५] ॥ अस्यार्थः। ग्रहणी कट-
कबन्धः। मृदादितोऽप्रदक्षिणं रेषां करोति बन्धः। तद् विषस्तम्भनभैषज्यम्। शिखां दष्टस्य बध्नाति तदपि विषस्तम्भनम्। श्वेतवस्त्रे शणस्तम्बे वा ग्रन्थिं बध्नाति। विषं स्तभ्यते शरीरे न सर्पति। तृतीयया दष्टं स्थानं पीडयति। तेन विषम् अन्यत्र गच्छति। चतुर्थ्या आचार्यस्ततः प्रदक्षिणं परिक्रामति। "अपेहि" [७. ९३.] इत्यृचं जपित्वा तृणानि प्रज्वाल्य अहेरभिमुखं प्रक्षिपति दष्टस्थाने वा। वल्मीकेति गृहतृणावज्वालितम् उदकम् अभिमन्त्र्य दष्टं पाययति प्रोक्षति च। षष्ठ्या आर्बीज्यापाशम् अभिमन्त्र्य बध्नाति। सप्तम्यष्टम्याभ्यां मधुमक्षिकां मधुवृक्षमृत्तिकां चाभिमन्त्र्य पाययति। पुरीषम् अभिमन्त्र्य पाययतीति शेषः।

---

१ See note ६, preceding page. २ P ऋतुथा। ३ P K प्रऽदिषि।.

त्रिःशुक्लया श्वाविच्छलाकया । मांसं श्वावित्संबन्धि । अलाबुना अलाबुन्युदकं कृत्वा अभिमन्त्र्य आचमयति विषव्याधितम् । अलाबुवृन्तं संपात्याभिमन्त्र्य बध्नाति । इति ॥

तथा आभिचारिके कर्मणि अस्य सूक्तस्य विनियोगः । तद् उक्तं कौशिकेन । "ददिर्हीति साग्नीनि । देशकपटु प्रक्षिणाति" इति [कौ° ६. २] ॥ देशकपटु सर्पच्छत्रम् अहिच्छत्रम् ॥

ददिर्हि मह्यं वरुणो दिवः कविर्वचोभिरुग्रैर्नि रिणामि ते विषम् ।
खातमखातमुत सक्तमग्रभमिरेव धन्वन्नि जजास ते विषम् ॥ १ ॥

ददिः । हि । मह्यम् । वरुणः । दिवः । कविः । वचःऽभिः । उग्रैः । नि । रिणामि । ते । विषम् ।

खातम् । अखातम् । उत । सक्तम् । अग्रभम् । इरांऽइव । धन्वन् । नि । जजास । ते । विषम् ॥ १ ॥

यत् ते अपोदकं विषं तत् त एतास्वग्रभम् ।
गृह्णामि ते मध्यममुत्तमं रसमुतावमं भियसा नेशदादु ते ॥ २ ॥

यत् । ते । अपऽउदकम् । विषम् । तत् । ते । एतासु । अग्रभम् ।

गृह्णामि । ते । मध्यमम् । उत्ऽतमम् । रसम् । उत । अवमम् । भियसा । नेशत् । आत् । ऊं इति । ते ॥ २ ॥

वृषा मे रवो नभसा न तन्यतुरुग्रेण ते वचसा बाध आदु ते ।
अहं तमस्य नृभिरग्रभं रसं तमस इव ज्योतिरुदेतु सूर्यः ॥ ३ ॥

वृषा । मे । रवः । नभसा । न । तन्यतुः । उग्रेण । ते । वचसा । बाधे । आत् । ऊं इति । ते ।

अहम् । तम् । अस्य । नृऽभिः । अग्रभम् । रसम् । तमसःऽइव । ज्योतिः । उत् । एतु ।

सूर्यः ॥ ३ ॥

चक्षुषा ते चक्षुर्हन्मि विषेण हन्मि ते विषम् ।
अहेर्म्रियस्व मा जीवीः प्रत्यगभ्येतु त्वा विषम् ॥ ४ ॥

चक्षुषा । ते । चक्षुः । हन्मि । विषेण । हन्मि । ते । विषम् ।

अहेः । म्रियस्व । मा । जीवीः । प्रत्यक् । अभि । एतु । त्वा । विषम् ॥ ४ ॥

---

१ $\overset{2}{P}$ धन्वन् ।. २ **A B** $\overset{h}{B}$ **B**^{p} **D K** $\overset{m}{K}$ **R** $\overset{m}{S}$ **V D**^{c} **C**^{s} अहेर्म्रि° (**P** $\overset{2}{P}$ **J K V C**^{p} अहेः ।), doubtless the traditional ancient reading, due to the ignorance of grammar on the part of the Vaidikas. Conf. the vernacular **द्रुष्ट** for **दुष्ट, उच्छ्राप** for **उच्छाप, श्राप** for **शाप, प्रण** for **पण** (in Hindi).

कैरात॒ पृश्न॒ उप॑तृण्य॒ बभ्र॒ आ मे॑ शृणुतासि॒ता अली॑काः।
मा मे॒ सख्यु॑ स्ता॒मान॒मपि॑ ष्ठाताश्रावय॑न्तो नि॒ वि॒षे र॑मध्वम् ॥ ५ ॥

कैरा॑त। पृश्ने॑। उप॑ऽतृण्य। बभ्रो॒ इति॑। आ। मे॒। शृ॒णु॒त॒। अ॒सि॒ताः। अली॑काः।
मा। मे॒। सख्युः॑। स्ता॒मान॑म्। अपि॑। स्था॒त॒। आऽश्रा॑वय॑न्तः। नि। वि॒षे। र॒म॒ध्व॒म्॥ ५॥

असि॑तस्य॒ तैमा॑तस्य॒ बभ्रो॑रप॒ऽउ॑दकस्य च।
सा॒त्रा॒सा॒हस्या॒हं म॒न्योर॑व॒ ज्यामि॑व॒ धन्व॑नो॒ वि मु॑ञ्चामि॒ रथाँ॑ इव ॥ ६ ॥

अ॒सि॒तस्य॑। तै॒मा॒तस्य॑। ब॒भ्रोः॑। अप॑ऽउदकस्य। च॒।
सा॒त्रा॒ऽस॒ह॒स्य॑। अ॒हम्। म॒न्योः॑। अव॑। ज्याम्ऽइ॑व। धन्व॑नः। वि। मु॒ञ्चा॒मि॒। रथा॑न्ऽइव॥६॥

आलि॑ङ्गी च॒ विलि॑ङ्गी च पि॒ता च॑ मा॒ता च॑।
विश्म॑ वः॒ सर्व॑तो ब॒न्धुर॑सा॒ः किं क॑रिष्यथ ॥ ७ ॥

आऽलि॑ङ्गी। च॒। विऽलि॑ङ्गी। च॒। पि॒ता। च॒। मा॒ता। च॒।
विश्म॑। वः॒। सर्व॑तः। ब॒न्धु॒। अ॒र॑साः। किम्। क॒रि॒ष्य॒थ॒॥ ७॥

उ॒रु॒गूला॑या दुहि॒ता जा॒ता दा॒स्यसि॑क्न्याँ।
प्र॒त॒ङ्कं द॒द्रुषी॑णां॒ सर्वी॑सामर॒सं वि॒षम् ॥ ८ ॥

उ॒रु॒ऽगूला॑याः। दु॒हि॒ता। जा॒ता। दा॒सी। असि॑क्न्या।
प्र॒ऽत॒ङ्कम्। द॒द्रुषी॑णाम्। सर्वी॑साम्। अ॒र॒सम्। वि॒षम्॥ ८॥

कर्ण॑ श्वावित् तद॑ब्रवीद् गि॒रेर॑वचर॒न्तिका।
याः काश्चे॒माः ख॑नि॒त्रिमा॒स्तासा॑मर॒सत॑मं वि॒षम् ॥ ९ ॥

कर्ण॑। श्वा॒वित्। तत्। अ॒ब्र॒वी॒त्। गि॒रेः। अव॑ऽचर॒न्तिका।
याः। काः। च॒। इ॒माः। ख॒नि॒त्रिमाः॑। तासा॑म्। अ॒र॒सऽत॑मम्। वि॒षम्॥ ९॥

ता॒बुव॑ं न ता॒बुव॑ं न घेत् त्वमसि ता॒बुव॑म्।
ता॒बुवे॑नार॒सं वि॒षम् ॥ १० ॥

ता॒बुव॑म्। न। ता॒बुव॑म्। न। घ॒। इत्। त्वम्। अ॒सि॒। ता॒बुव॑म्।

---

१ A D R Cs P मि॒षे. We with ^{h}B K ^{m}K ^{m}S V Dc ^{2}P J. २ D Cs र॑मध्वम्. ३ Cp ब॒भ्रो इति॑। ४ ^{m}S °सिक्न्यां. ^{h}B °सिक्न्याः.

तावुवैन । अरसम् । विषम् ॥ १० ॥

तस्तुवं न तस्तुवं न घेत् त्वमसि तस्तुवम् ।
तस्तुवैनारसं विषम् ॥ ११ ॥

तस्तुवम् । न । तस्तुवम् । न । घ । इत् । त्वम् । असि । तस्तुवम् ।
तस्तुवैन । अरसम् । विषम् ॥ ११ ॥

इति तृतीयेनुवाके तृतीयं सूक्तम् ॥

"सुपर्णस्त्वा" इति सूक्तस्य कृत्याप्रतिहरणगणे पाठाद् यत्रयत्र कृत्याप्रतिहरणगणो विनियुज्यते तत्रतत्रास्य सूक्तस्य विनियोगः । सूत्रादिकं "दूष्या दूषिरसि" इति [२. ११] सूक्ते द्रष्टव्यम् ॥

सुपर्णस्त्वान्वविन्दत् सूकरस्त्वाखनन्नसा ।
दिप्सौषधे त्वं दिप्सन्तमव कृत्याकृतं जहि ॥ १ ॥

सुऽपर्णः । त्वा । अनु । अविन्दत् । सूकरः । त्वा । अखनत् । नसा ।
दिप्स । ओषधे । त्वम् । दिप्सन्तम् । अव । कृत्याऽकृतम् । जहि ॥ १ ॥

अव जहि यातुधानानव कृत्याकृतं जहि ।
अथो यो अस्मान् दिप्सति तमु त्वं जह्योषधे ॥ २ ॥

अव । जहि । यातुऽधानान् । अव । कृत्याऽकृतम् । जहि ।
अथो इति । यः । अस्मान् । दिप्सति । तम् । ऊं इति । त्वम् । जहि । ओषधे ॥ २ ॥

रिश्यस्येव परीशासं परिकृत्य परि त्वचः ।
कृत्यां कृत्याकृते देवा निष्कमिव प्रति मुञ्चत ॥ ३ ॥

रिश्यस्यऽइव । परिऽशासम् । परिऽकृत्य । परि । त्वचः ।
कृत्याम् । कृत्याऽकृते । देवाः । निष्कम्ऽइव । प्रति । मुञ्चत ॥ ३ ॥

पुनः कृत्यां कृत्याकृते हस्तगृह्य परा णय ।
समक्षमस्मा आ धेहि यथा कृत्याकृतं हनत् ॥ ४ ॥

पुनः । कृत्याम् । कृत्याऽकृते । हस्तऽगृह्य । परा । नय ।
सम्ऽअक्षम् । अस्मै । आ । धेहि । यथा । कृत्याऽकृतम् । हनत् ॥ ४ ॥

---

१ Cs तस्तु°. २ P घ ।. ३ P ओषधे ।. ४ A B D R S Cs P P Cp ऋश्य°. We with B K K V Dc J. ५ P परिशासम् ।. We with P J K Cr. ६ K नय.

कृत्याः सन्तु कृत्याकृते शपथः शपथीयते।
सुखो रथ इव वर्ततां कृत्या कृत्याकृते पुनः ॥ ५ ॥

कृत्याः। सन्तु। कृत्याऽकृते। शपथः। शपथिऽयते।
सुऽखः। रथःऽइव। वर्तताम्। कृत्या। कृत्याऽकृतम्। पुनः ॥ ५ ॥

यदि स्त्री यदि वा पुमान् कृत्यां चकार पाप्मने।
तामु तस्मै नयामस्यश्वमिवाश्वाभिधान्या ॥ ६ ॥

यदि। स्त्री। यदि। वा। पुमान्। कृत्याम्। चकार। पाप्मने।
ताम्। ऊं इति। तस्मै। नयामसि। अश्वम्ऽइव। अश्वऽअभिधान्या ॥ ६ ॥

यदि वासि देवकृता यदि वा पुरुषैः कृता।
तां त्वा पुनर्णयामसीन्द्रेण सयुजा वयम् ॥ ७ ॥

यदि। वा। असि। देवऽकृता। यदि। वा। पुरुषैः। कृता।
ताम्। त्वा। पुनः। नयामसि। इन्द्रेण। सऽयुजा। वयम् ॥ ७ ॥

अग्ने पृतनाषाट् पृतनाः सहस्व।
पुनः कृत्यां कृत्याकृते प्रतिहरणेन हरामसि ॥ ८ ॥

अग्ने। पृतनाषाट्। पृतनाः। सहस्व।
पुनः। कृत्याम्। कृत्याऽकृते। प्रतिऽहरणेन। हरामसि ॥ ८ ॥

कृतव्यधनि विध्य तं यश्चकार तमिज्जहि।
न त्वामचक्रुषे वयं वधाय सं शिशीमहि ॥ ९ ॥

कृतऽव्यधनि। विध्य। तम्। यः। चकार। तम्। इत्। जहि।
न। त्वाम्। अचक्रुषे। वयम्। वधाय। सम्। शिशीमहि ॥ ९ ॥

पुत्र इव पितरं गच्छ स्वज इवाभिष्ठितो दश।
बन्धमिवावक्रामी गच्छ कृत्ये कृत्याकृतं पुनः ॥ १० ॥

पुत्रःऽइव। पितरम्। गच्छ। स्वजःऽइव। अभिऽस्थितः। दश।
बन्धम्ऽइव। अवऽक्रामी। गच्छ। कृत्ये। कृत्याऽकृतम्। पुनः ॥ १० ॥

उदेणीव वारण्यभिस्कन्दं मृगीव। कृत्या कर्तारमृच्छतु ॥ ११ ॥

उत्। एणीऽइव। वारणी। अभिऽस्कन्दम्। मृगीऽइव॥ कृत्या। कर्तारम्। ऋच्छतु॥ ११॥

इष्वा ऋजीयः पततु द्यावापृथिवी तं प्रति।
सा तं मृगमिव गृह्णातु कृत्या कृत्याकृतं पुनः॥ १२॥

इष्वाः। ऋजीयः। पततु। द्यावापृथिवी इति। तम्। प्रति।
सा। तम्। मृगम्ऽइव। गृह्णातु। कृत्या। कृत्याऽकृतम्। पुनः॥ १२॥

अग्निरिवैतु प्रतिकूलमनुकूलमिवोदकम्।
सुखो रथ इव वर्ततां कृत्या कृत्याकृतं पुनः॥ १३॥

अग्निःऽइव। एतु। प्रतिऽकूलम्। अनुकूलम्ऽइव। उदकम्।
सुऽखः। रथःऽइव। वर्तताम्। कृत्या। कृत्याऽकृतम्। पुनः॥ १३॥

इति तृतीयेनुवाके चतुर्थं सूक्तम्॥

गवां रोगोपशमनपुष्टिप्रजननकर्मसु "एका च मे" इति सूक्तेन अभिमन्त्रितं सलवणं केवलं वा उदकं गाः पाययेत्। तद् उक्तं कौशिकसूत्रे। "एका च म इति गा लवणं पाययति" इत्यादि [कौ°३.२]॥

दुष्टवक्तृमुखस्तम्भनकर्मणि "एका च मे" [५.१५] "यद्येकवृषोसि" [५.१६] इति सूक्ताभ्यां खलतुलपर्णीं मधुना लोडितेषु सक्तुषु जर्जरीकृत्वा अभिमन्त्र्य पाययति॥ "यद्येकवृषोसि" इत्यभिमन्त्र्य अन्नं भुङ्क्ते शापभैषज्यार्थम्॥

तथा तत्रैव कर्मणि "यद्येकवृषोसि" इत्यनेन गृहद्वारम् अभिमन्त्र्य अपिदधाति। तद् उक्तं कौशिकेन। "मधुलावृषलिङ्गाभिः खलतुलपर्णीं संक्षुद्य मधुमन्थे पाययति। उत्तराभिर्भुङ्क्ते। द्वारं स्रजति" इति [कौ°४.५]॥ "एका च" मे इति मधुलाशब्दवत्यः। "यद्येकवृषोसि" इति वृषलिङ्गाः॥

एका च मे दश च मेपवक्तारं ओषधे।
ऋतंजात ऋतावरि मधु मे मधुला करः॥ १॥

एका। च। मे। दश। च। मे। अपऽवक्तारः। ओषधे।
ऋतंऽजाते। ऋतंऽवरि। मधु। मे। मधुला। करः॥ १॥

द्वे च मे विंशतिश्च ०।०॥ २॥

द्वे इति। च। मे। विंशतिः। च॥०॥ २॥

तिस्रश्च मे त्रिंशच्च ०।०॥ ३॥

तिस्रः। च। मे। त्रिंशत्। च॥०॥ ३॥

चतस्रश्च मे चत्वारिंशच्च ०।०॥ ४॥

---

१ P °पृथिवी°।.

चतस्रः । च । मे । चत्वारिंशत् । च ॥०॥ ४ ॥

पञ्च च मे पञ्चाशच्च ०।० ॥ ५ ॥

पञ्च । च । मे । पञ्चाशत् । च ॥०॥ ५ ॥

षट् च मे षष्टिश्च ०।० ॥ ६ ॥

षट् । च । मे । षष्टिः । च ॥०॥ ६ ॥

सप्त च मे सप्ततिश्च ०।० ॥ ७ ॥

सप्त । च । मे । सप्ततिः । च ॥०॥ ७ ॥

अष्ट च मेशीतिश्च ०।० ॥ ८ ॥

अष्ट । च । मे । अशीतिः । च ॥०॥ ८ ॥

नव च मे नवतिश्च ०।० ॥ ९ ॥

नव । च । मे । नवतिः । च ॥०॥ ९ ॥

दश च मे शतं च मेपवक्तारः ०।० ॥ १० ॥

दश । च । मे । शतम् । च । मे । अपऽवक्तारः ॥०॥ १० ॥

शतं च मे सहस्रं चापवक्तार ओषधे ।
ऋतंजात ऋतावरि मधु मे मधुला करः ॥ ११ ॥

शतम् । च । मे । सहस्रम् । च । अपऽवक्तारः । ओषधे ।
ऋतऽजाते । ऋतऽवरि । मधु । मे । मधुला । करः ॥ ११ ॥

तृतीयेनुवाके पञ्चमं सूक्तम् ॥

इति तृतीयोनुवाकः ॥

"यद्येकवृषोसि" इति सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः । सूत्रमपि पूर्वसूक्ते उदाहृतम् ॥

यद्येकवृषोसि सृजारसोसि ॥ १ ॥

यदि । एकऽवृषः । असि । सृज । अरसः । असि ॥१॥

यदि द्विवृषोसि० ॥ २ ॥

यदि । द्विऽवृषः । असि ॥०॥ २ ॥

यदि त्रिवृषोसि० ॥ ३ ॥

यदि । त्रिऽवृषः । असि ॥०॥ ३ ॥

यदि चतुर्वृषोसि० ॥ ४ ॥

यदि । चतुःऽवृषः । असि ॥०॥ ४ ॥

यदि पञ्चवृषोसि० ॥ ५ ॥

यदि षड्वृषोसि० ॥ ६ ॥

यदि॑ । प॒ञ्च॒ऽऋ॒षभः । असि॑ ॥०॥ ५ ॥

यदि॑ सप्तऋ॒षोसि॑० ॥ ७ ॥

यदि॑ । स॒प्त॒ऽऋ॒षभः । असि॑ ॥०॥ ७ ॥

यदि॑ नवऋ॒षोसि॑० ॥ ९ ॥

यदि॑ । न॒व॒ऽऋ॒षभः । असि॑ ॥०॥९॥

यदि॑ । प॒ट्ऽऋ॒षभः । असि॑ ॥०॥ ६ ॥

यद्य॑ष्टऋ॒षोसि॑० ॥ ८ ॥

यदि॑ । अ॒ष्ट॒ऽऋ॒षभः । असि॑ ॥०॥ ८ ॥

यदि॑ दशऋ॒षोसि॑ सृ॒जार॒सो॑सि ॥१०॥

यदि॑ । द॒श॒ऽऋ॒षभः । असि॑ । सृ॒ज । अ॒र॒सः । अ॒सि॒ ॥१०॥

यद्येकाद॒शोसि॒ सोपो॑दकोसि ॥ ११ ॥

यदि॑ । एका॑द॒शः । असि॑ । सः । अप॑ऽउदकः । अ॒सि॒ ॥ ११ ॥

इति चतुर्थेनुवाके प्रथमं सूक्तम् ॥

गोहरणेभिचारकर्मणि "तेवदन्" इति सूक्तेन नेतॄणां पदं वृश्चति ॥
तथा अनेन सूक्तेन चौरान् अन्वाह ॥
तद् उक्तं कौशिकेन । "तेवदन्निति नेतॄणां पदं वृश्चति । अन्वाह" इति [कौ° ६.२] ॥

ते॑ विदन् प्रथ॒मा ब्र॑ह्मकिल्बि॒षेकू॑पारः सलि॒लो मा॑त॒रिश्वा॑ ।
वी॒डुह॑रास्तप॑ उ॒ग्रं म॑यो॒भूरापो॑ दे॒वीः प्र॑थम॒जा ऋ॒तस्य॑ ॥ १ ॥

ते । अ॒व॒द॒न् । प्र॒थ॒माः । ब्र॒ह्म॒ऽकि॒ल्बि॒षे । अ॒कू॒पा॒रः । स॒लि॒लः । मा॒त॒रिश्वा॑ ।
वी॒डु॒ऽह॒राः । तपः॑ । उ॒ग्रम् । म॒यः॒ऽभूः । आपः॑ । दे॒वीः । प्र॒थ॒म॒ऽजाः । ऋ॒तस्य॑ ॥ १ ॥

सोमो॒ राजा॑ प्रथ॒मो ब्र॑ह्मजा॒यां पुनः॑ प्रा॒य॑च्छ॒दह्ण॑ीयमानः ।
अ॒न्वर्ति॑ता॒ वरु॑णो मि॒त्र आ॑सीद॒ग्निर्होता॑ हस्तगृ॒ह्या नि॑नाय ॥ २ ॥

सोमः॑ । राजा॑ । प्र॒थ॒मः । ब्र॒ह्म॒ऽजा॒याम् । पुनः॑ । प्र । अ॒य॒च्छ॒त् । अह्ण॑ीयमानः ।
अ॒नु॒ऽअ॒र्ति॒ता । वरु॑णः । मि॒त्रः । आ॒सी॒त् । अ॒ग्निः । होता॑ । ह॒स्त॒ऽगृ॒ह्या । आ । नि॒ना॒य॒ ॥ २ ॥

हस्तेनैव ग्राह्यो॑[1] आधिर॑स्या ब्रह्मजा॒येति॒ चेदवो॑चत् ।
न दू॒ताय॑ प्रहे॒या॑ तस्थ॒ एषा तथा॑ रा॒ष्ट्रं गु॑पि॒तं क्ष॒त्रिय॑स्य ॥ ३ ॥

हस्ते॑न । एव । ग्राह्यः॑ । आऽधिः॑ । अ॒स्याः॒ । ब्र॒ह्म॒ऽजा॒या । इति॑ । च॒ । इत् । अवो॑चत् ।
न । दू॒ताय॑ । प्रऽहे॒या॑ । त॒स्थे॒ । एषा । तथा॑ । रा॒ष्ट्रम् । गु॒पि॒तम् । क्ष॒त्रिय॑स्य ॥ ३ ॥

यामा॑हुस्तार॑कैषा वि॑केशी॒ति दु॒च्छुना॑ ग्रा॒म॑मवपद्य॑मानाम् ।
सा ब्र॑ह्मजा॒या वि दु॑नोति रा॒ष्ट्रं यत्र॒ प्रापा॑दि श॒श उ॑ल्कु॒षीमा॑न् ॥ ४ ॥

---

१ R ग्राह्य आधि°. P C_P ग्राह्यः ।.

याम्। आहुः। तार्कां। एषां। विऽकेशी। इति। दुच्छुनाम्। ग्रामम्। अवऽपद्यमानाम्।
सा। ब्रह्मऽजाया। वि। दुनोति। राष्ट्रम्। यत्र। प्रऽअर्पादि। शशः। उल्कुषीऽमान्॥ ४॥

ब्रह्मचारी चरति वेविषद् विषः स देवानां भवत्येकमङ्गम्।
तेन जायामन्वविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं[1] न देवाः॥ ५॥

ब्रह्मऽचारी। चरति। वेविषत्। विषः। सः। देवानाम्। भवति। एकम्। अङ्गम्।
तेन। जायाम्। अनु। अविन्दत्। बृहस्पतिः। सोमेन। नीताम्। जुह्वम्। न। देवाः॥ ५॥

देवा वा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसा ये निषेदुः।
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन्॥ ६॥

देवाः। वै। एतस्याम्। अवदन्त। पूर्वे। सप्तऽऋषयः। तपसा। ये। निऽसेदुः।
भीमा। जाया। ब्राह्मणस्य। अपऽनीता। दुःऽधाम्। दधाति। परमे। विऽओमन्॥ ६॥

ये गर्भा अवपद्यन्ते जगद् यच्चापलुप्यते।
वीरा ये तृह्यन्ते मिथो ब्रह्मजाया हिनस्ति तान्॥ ७॥

ये। गर्भाः। अवऽपद्यन्ते। जगत्। यत्। च। अपऽलुप्यते।
वीराः। ये। तृह्यन्ते। मिथः। ब्रह्मऽजाया। हिनस्ति। तान्॥ ७॥

उत यत् पतयो दश स्त्रियाः पूर्वे अब्राह्मणाः।
ब्रह्मा चेद्धस्तमग्रहीत् स एव पतिरेकधा॥ ८॥

उत। यत्। पतयः। दश। स्त्रियाः। पूर्वे। अब्राह्मणाः।
ब्रह्मा। च। इत्। हस्तम्। अग्रहीत्। सः। एव। पतिः। एकऽधा॥ ८॥

ब्राह्मण एव पतिर्न राजन्यो[2] न वैश्यः।
तत् सूर्यः प्रब्रुवन्नेति पञ्चभ्यो मानवेभ्यः॥ ९॥

ब्राह्मणः। एव। पतिः। न। राजन्यः। न। वैश्यः।
तत्। सूर्यः। प्रऽब्रुवन्। एति। पञ्चऽभ्यः। मानवेभ्यः॥ ९॥

पुनर्वै देवा अददुः पुनर्मनुष्या अददुः।

---

१ J एषाम्। २ D C^{s} ३ for १. We with A $\overset{h}{B}$ K $\overset{m}{K}$ R $\overset{m}{S}$ V D^{c}. ३ So we with A $\overset{h}{B}$ $\overset{h}{B}$ B^{p} D K $\overset{m}{K}$ R $\overset{m}{S}$ V D^{c} C^{s} P $\overset{2}{P}$ J C^{p}. ४ A १ for ३.

राजानः सत्यं गृह्णाना ब्रह्मजायां पुनर्ददुः ॥ १० ॥

पुनः । वै । देवाः । अददुः । पुनः । मनुष्याः । अददुः ।
राजानः । सत्यम् । गृह्णानाः । ब्रह्मऽजायाम् । पुनः । ददुः ॥ १० ॥

पुनर्दाय ब्रह्मजायां कृत्वा देवैर्निकिल्बिषम् ।
ऊर्जं पृथिव्या भक्तोरुगायमुपासते ॥ ११ ॥

पुनःऽदाय । ब्रह्मऽजायाम् । कृत्वा । देवैः । निऽकिल्बिषम् ।
ऊर्जम् । पृथिव्याः । भक्ता । उरुऽगायम् । उप । आसते ॥ ११ ॥

नास्य जाया शतवाही कल्याणी तल्पमा शये ।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्त्या ॥ १२ ॥

न । अस्य । जाया । शतऽवाही । कल्याणी । तल्पम् । आ । शये ।
यस्मिन् । राष्ट्रे । निऽरुध्यते । ब्रह्मऽजाया । अचित्त्या ॥ १२ ॥

न विकर्णः पृथुशिरास्तस्मिन् वेश्मनि जायते ।
यस्मिन्० ॥ १३ ॥

न । विऽकर्णः । पृथुऽशिराः । तस्मिन् । वेश्मनि । जायते ॥०॥ १३ ॥

नास्य क्षत्ता निष्कग्रीवः सूनानामेत्यग्रतः ।
यस्मिन्० ॥ १४ ॥

न । अस्य । क्षत्ता । निष्कऽग्रीवः । सूनानाम् । एति । अग्रतः ॥०॥ १४ ॥

नास्य श्वेतः कृष्णकर्णो धुरि युक्तो महीयते ।
यस्मिन्० ॥ १५ ॥

न । अस्य । श्वेतः । कृष्णऽकर्णः । धुरि । युक्तः । महीयते ॥०॥ १५ ॥

नास्य क्षेत्रे पुष्करिणी नाण्डीकं जायते बिसम् ।
यस्मिन्० ॥ १६ ॥

न । अस्य । क्षेत्रे । पुष्करिणी । न । आण्डीकम् । जायते । बिसम् ॥०॥ १६ ॥

नास्मै पृश्निं वि दुहन्ति येस्या[1] दोहमुपासते ।

---

१ A $\overset{m}{K}$ R येस्या. We with $\overset{h}{B}$ D K $\overset{m}{S}$ V Dc Cs.

यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्त्या ॥ १७ ॥

न। अस्मै। पृश्निम्। वि। दुह्न्ति। ये। अस्याः। दोहम्। उपऽआसते।

यस्मिन्। राष्ट्रे। निऽरुध्यते। ब्रह्मऽजाया। अचित्त्या ॥ १७ ॥

नास्य धेनुः कल्याणी नानड्वान्त्सहते धुरम्।

विजानिर्यत्र ब्राह्मणो रात्रिं वसति पापया ॥ १८ ॥

न। अस्य। धेनुः। कल्याणी। न। अनड्वान्। सहते। धुरम्।

विऽजानिः। यत्र। ब्राह्मणः। रात्रिम्। वसति। पापया ॥ १८ ॥

इति चतुर्थेनुवाके द्वितीयं सूक्तम् ॥

गोहरणमारणविशसनाधिश्रयणपचनभक्षणादिषु क्रियमाणेषु अभिचारकामो ब्रह्मचारी "नैतां ते देवाः" "अतिमात्रम् अवर्धन्त" इति सूक्तद्वयं "श्रमेण तपसा" इत्यनुवाकं च [१२.५] शत्रून् अन्वाह। द्वेष्यं मनसि कृत्वा जपतीत्यर्थः। तदुक्तं कौशिकसूत्रे। "ब्रह्मगवीभ्याम् अन्वाह। चेष्टाम्। विचृतति। ऊवध्ये। श्मशाने। त्रिरमून् हनस्वेत्याह। द्वितीययाश्मानम् ऊवध्ये गृह्णाति। द्वादशरात्रं सर्वव्रत उपश्राम्यति। द्विरुदिते स्नुतः। अवागग्रेण निवर्तयति" इति [कौ० ६. २]॥ "नैतां ते देवाः" "अतिमात्रम् अवर्धन्त" इति द्वे सूक्ते एका ब्रह्मगवी। "श्रमेण तपसा" इत्यनुवाकोऽन्या॥ चेष्टाम्। अन्वाहेति शेषः। चेष्टा हरणमारणविशसनाद्याः॥ विचृतति ऊवध्ये हविःकृतेत्यर्थः॥ अमून् शत्रून्॥ द्विरुदिते द्वादशरात्राद् ऊर्ध्वं द्विः सवितर्युद्गते नष्टः शत्रुरिति ज्ञेयम्॥ अवागग्रेण दण्डेन अश्मानम् ऊवध्यग्रहाद् अपनयति॥

नैतां ते देवा अददुस्तुभ्यं नृपते अत्तवे।

मा ब्राह्मणस्य राजन्य गां जिघत्सो अनाद्याम् ॥ १ ॥

न। एताम्। ते। देवाः। अददुः। तुभ्यम्। नृऽपते। अत्तवे।

मा। ब्राह्मणस्य। राजन्य। गाम्। जिघत्सोः। अनाद्याम् ॥ १ ॥

अक्षद्रुग्धो राजन्यः पाप आत्मपराजितः।

स ब्राह्मणस्य गामद्याद्य जीवानि मा श्वः ॥ २ ॥

अक्षऽद्रुग्धः। राजन्यः। पापः। आत्मऽपराजितः।

सः। ब्राह्मणस्य। गाम्। अद्यात्। अद्य। जीवानि। मा। श्वः ॥ २ ॥

आविष्टिताघविषा पृदाकूरिव चर्मणा।

सा ब्राह्मणस्य राजन्य तृष्टैषा गौरनाद्या ॥ ३ ॥

आऽविष्टिता। अघऽविषा। पृदाकूःऽइव। चर्मणा।

---

१ R S[m] ब्रह्मणो. २ P जिघत्सः।. ३ A B B[h] K K[m] R S[m] Dc Cs आविष्ठि°. P P[2] J K Cp आऽविस्थिता।. We with D. ४ So we with all our authorities.

सा॑ । ब्राह्म॒णस्य॑ । राज॒न्य॒ । तृ॒ष्टा । ए॒षा । गौः । अ॒ना॒द्या॑ ॥ ३ ॥

निर्वै क्ष॒त्रं नय॑ति॒ हन्ति॒ वर्चो॒ऽग्निरि॒वार॑ब्धो॒ वि दु॑नोति॒ सर्व॑म् ।
यो ब्राह्म॒णं मन्य॑ते अन्न॒मेव स वि॒षस्य॑ पिबति॒ तैमा॒तस्य॑ ॥ ४ ॥

निः । वै । क्ष॒त्रम् । नय॑ति । हन्ति॑ । वर्चः॑ । अ॒ग्निःऽइ॑व । आऽर॑ब्धः । वि । दु॒नो॒ति॒ । सर्व॑म् ।
यः । ब्राह्म॒णम् । मन्य॑ते । अन्न॑म् । ए॒व । सः । वि॒षस्य॑ । पि॒ब॒ति॒ । तैमा॒तस्य॑ ॥ ४ ॥

य ए॑नं॒ हन्ति॑ मृदु॒ं मन्य॑मानो देवपी॒युर्ध॑नका॒मो न चि॒त्तात् ।
सं तस्येन्द्रो॑ हृद॒येऽग्नि॑मिन्ध उ॒भे ए॑नं द्वि॒ष्टो नभ॑सी॒ चर॑न्तम् ॥ ५ ॥

यः । ए॒न॒म् । हन्ति॑ । मृ॒दु॒म् । मन्य॑मानः । दे॒व॒ऽप॒ीयुः । धन॑ऽकामः । न । चि॒त्तात् ।
सम् । तस्य॑ । इन्द्रः॑ । हृ॒द॒ये । अ॒ग्नि॒म् । इ॒न्धे॒ । उ॒भे इति॑ । ए॒न॒म् । द्वि॒ष्टः । नभ॑सी इति॑ ।
चर॑न्तम् ॥ ५ ॥

न ब्राह्म॒णो हिं॑सितव्यो॒ऽग्निः प्रि॒यत॑नोरिव ।
सोमो॒ ह्य॑स्य दायाद इन्द्रो॑ अस्याभिशस्ति॒पाः ॥ ६ ॥

न । ब्राह्म॒णः । हिं॒सि॒त॒व्यः॑ । अ॒ग्निः । प्रि॒यत॑नोःऽइव ।
सोम॑ः । हि । अ॒स्य॒ । दा॒या॒दः । इन्द्रः॑ । अ॒स्य॒ । अ॒भि॒श॒स्ति॒ऽपाः ॥ ६ ॥

श॒ताप॑ाष्ठां॒ नि गि॑रति॒ तां न श॑क्नोति॒ निःख॑िद॒न् ।
अन्न॒ं यो ब्र॒ह्मणां॑ म॒ल्वः॑ स्वा॒द्व॑ी॒ऽग्नीति॒ मन्य॑ते ॥ ७ ॥

श॒तऽअ॑पाष्टाम् । नि । गि॒र॒ति॒ । ताम् । न । श॒क्नो॒ति॒ । निः॒ऽख॑िद॒न् ।
अन्न॑म् । यः । ब्र॒ह्मणा॑म् । म॒ल्वः॑ । स्वा॒दु । अ॒ग्नि॒ । इति॑ । मन्य॑ते ॥ ७ ॥

जि॒ह्वा ज्या भव॑ति॒ कुल्म॑लं॒ वाङ्ना॒॑ड॑ीका दन्ता॒स्तप॑सा॒भिदि॑ग्धाः ।
तेभि॑र्ब्र॒ह्मा वि॑ध्यति देवपी॒यून् ह॒ढ॒लैर्ध॑नु॒भिर्दे॒वजू॑तैः ॥ ८ ॥

जि॒ह्वा । ज्या । भव॑ति । कुल्म॑लम् । वाक् । ना॒ड॑ीकाः । दन्ता॑ः । तप॑सा । अ॒भि॒ऽदि॑ग्धाः ।

---

१ See note ४, preceding page. २ **P** $\overset{2}{\text{P}}$ **J** अ॒ना॒द्याम् । We with **K V** C^{r}. ३ **K** °द्ध्वो. ४ **A B** B^{r} **D K R** $\overset{\text{m}}{\text{S}}$ D^{c} C^{s} उ॒भ ए॑°. We with $\overset{\text{h}}{\text{B}}$ $\overset{\text{m}}{\text{K}}$ **V**. ५ **P** $\overset{3}{\text{P}}$ **J** C^{r} ये । We with **V**. ६ So we with all our authorities. ७ **A D** C^{s} म॒ल्वः॑. D^{c} $\overset{\text{m}}{\text{S}}$ **R P J** C^{r} म॒ल्व॒ः॑. We with $\overset{\text{h}}{\text{B}}$ **K** $\overset{\text{m}}{\text{K}}$ **V** D^{c} $\overset{2}{\text{P}}$. ८ **B** $\overset{\text{h}}{\text{B}}$ **D R** $\overset{\text{m}}{\text{S}}$ C^{s} ३ for १. We with **A K** $\overset{\text{m}}{\text{K}}$ **V** D^{c}. ९ C^{s} °र्धनु॑भिर्दे॒व°.

तेभिः। ब्रह्मा। विध्यति। देवऽपीयून्। हृत्ऽवलैः। धनुःऽभिः। देवऽजूतैः॥ ८॥

तीक्ष्णेषवो ब्राह्मणा हेतिमन्तो यामस्यन्ति शरव्यां[1] न सा मृषा।
अनुहाय तपसा मन्युना चोत दूरादव भिन्दन्त्येनम्॥ ९॥

तीक्ष्णऽइषवः। ब्राह्मणाः। हेतिऽमन्तः। याम्। अस्यन्ति। शरव्याम्। न। सा। मृषा।
अनुऽहाय। तपसा। मन्युना। च। उत। दूरात्। अव। भिन्दन्ति। एनम्॥ ९॥

ये सहस्रमराजन्नासन् दशशता उत।
ते ब्राह्मणस्य गां जग्ध्वा वैतहव्याः पराभवन्॥ १०॥

ये। सहस्रम्। अराजन्। आसन्। दशऽशताः। उत।
ते। ब्राह्मणस्य। गाम्। जग्ध्वा। वैतऽहव्याः। परा। अभवन्॥ १०॥

गौरेव तान्[3] हन्यमाना वैतहव्याँ अवातिरत्।
ये केसरप्राबन्धायाश्चरमाजामपेचिरन्॥ ११॥

गौः। एव। तान्। हन्यमाना। वैतऽहव्यान्। अव। अतिरत्।
ये। केसरऽप्रावन्धायाः। चरमऽअजाम्। अपेचिरन्॥ ११॥

एकंशतं ता जनता या भूमिर्व्यधूनुत।
प्रजां हिंसित्वा ब्राह्मणीमसंभव्यं पराभवन्॥ १२॥

एकंऽशतम्। ताः। जनताः। याः। भूमिः। विऽअधूनुत।
प्रऽजाम्। हिंसित्वा। ब्राह्मणीम्। असम्ऽभव्यम्। परा। अभवन्॥ १२॥

देवपीयुश्चरति मर्त्येषु गरगीर्णो भवत्यस्थिभूयान्।
यो ब्राह्मणं देवबन्धुं हिनस्ति न स पितृयाणमप्येति लोकम्॥ १३॥

देवऽपीयुः। चरति। मर्त्येषु। गरऽगीर्णः। भवति। अस्थिऽभूयान्।
यः। ब्राह्मणम्। देवऽबन्धुम्। हिनस्ति। न। सः। पितृऽयानम्। अपि। एति। लो-
कम्॥ १३॥

अग्निर्वै नः पदवायः सोमो दायाद उच्यते।

---

१ **A** १ for ३. २ **P P J** शरव्या∫। **K V** शरव्यम्। **Cp** शरव्याम्। changed to शरव्यम्।
३ **K** तां. ४ Such is the accent of all our authorities.

हन्ताभिशस्तेन्द्रस्तथा तद् वेधसो विदुः ॥ १४ ॥

अग्निः । वै । नः । पदऽवायः । सोमः । दायादः । उच्यते ।
हन्ता । अभिऽशस्ता । इन्द्रः । तथा । तत् । वेधसः । विदुः ॥ १४ ॥

इषुरिव दिग्धा नृपते पृदाकूरिव गोपते ।
सा ब्राह्मणस्येषुर्घोरा तया विध्यति पीयतः ॥ १५ ॥

इषुःऽइव । दिग्धा । नृऽपते । पृदाकूःऽइव । गोऽपते ।
सा । ब्राह्मणस्य । इषुः । घोरा । तया । विध्यति । पीयतः ॥ १५ ॥

इति चतुर्थेनुवाके तृतीयं सूक्तम् ॥

"अतिमात्रम् अवर्धन्त" इति सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः ॥

अतिमात्रमवर्धन्त नोदिव दिवमस्पृशन् ।
भृगुं हिंसित्वा सृञ्जया वैतहव्याः पराभवन् ॥ १ ॥

अतिऽमात्रम् । अवर्धन्त । न । उत्ऽइव । दिवम् । अस्पृशन् ।
भृगुम् । हिंसित्वा । सृन्ऽजयाः । वैतऽहव्याः । परा । अभवन् ॥ १ ॥

ये बृहत्सामानमाङ्गिरसमार्पयन् ब्राह्मणं जनाः ।
पेत्वस्तेषामुभयादमविस्तोकान्यावयत् ॥ २ ॥

ये । बृहत्ऽसामानम् । आङ्गिरसम् । आर्पयन् । ब्राह्मणम् । जनाः ।
पेत्वः । तेषाम् । उभयादम् । अविः । तोकानि । आवयत् ॥ २ ॥

ये ब्राह्मणं प्रत्यष्ठीवन् ये वास्मिन्छुल्कमीषिरे ।
अस्रंस्ते मध्ये कुल्यायाः केशान् खादन्त आसते ॥ ३ ॥

ये । ब्राह्मणम् । प्रतिऽअष्ठीवन् । ये । वा । अस्मिन् । शुल्कम् । ईषिरे ।
अस्रः । ते । मध्ये । कुल्यायाः । केशान् । खादन्तः । आसते ॥ ३ ॥

ब्रह्मगवी पच्यमाना यावत् सा भि विजङ्घहे ।

---

१ A D R $\overset{m}{S}$ C$_s$ P J C$_P$ हंता°. We with $\overset{h}{B}$ K $\overset{m}{K}$ V D$_c$ $\overset{2}{P}$. २ K °वर्धयन्त. ३ C$_s$ सृजंया. ४ So we with B $\overset{h}{B}$ B$_P$ D K $\overset{m}{K}$ V D$_c$ C$_s$ P $\overset{3}{P}$ J C$_P$. A R $\overset{m}{S}$ °शुक्र° for शुल्क°. ५ B अस्रस्ते. P ते ।.

तेजो॑ रा॒ष्ट्रस्य॒ नि ह॑न्ति॒ न वी॒रो जा॑यते॒ वृषा॑ ॥ ४ ॥

ब्र॒ह्म॒ऽउ॒ग्वी । प॒च्यमा॑ना । याव॑त् । सा । अ॒भि । वि॒ऽज॒ङ्घ॒हे ।
तेजः॑ । रा॒ष्ट्रस्य॑ । निः । ह॒न्ति॒ । न । वी॒रः॑ । जा॒य॒ते॒ । वृषा॑ ॥ ४ ॥

क्रू॒रम॑स्या आ॒शस॑नं तृ॒ष्टं पिशि॒तम॑स्यते ।
क्षी॒रं यद॑स्याः पी॒यते॒ तद् वै पि॒तृषु॑ किल्बि॒षम् ॥ ५ ॥

क्रू॒रम् । अ॒स्याः॒ । आ॒ऽशस॑नम् । तृ॒ष्टम् । पिशि॒तम् । अ॒स्य॒ते॒ ।
क्षी॒रम् । यत् । अ॒स्याः॒ । पी॒यते॑ । तत् । वै । पि॒तृषु॑ । किल्बि॒षम् ॥ ५ ॥

उ॒ग्रो राजा॒ मन्य॑मानो ब्राह्म॒णं यो जिघ॑त्सति ।
परा॒ तत् सिं॑च्यते रा॒ष्ट्रं ब्रा॑ह्म॒णो यत्र॑ जी॒यते॑ ॥ ६ ॥

उ॒ग्रः । राजा॑ । मन्य॑मानः । ब्रा॒ह्म॒णम् । यः । जिघ॑त्सति ।
परा॑ । तत् । सि॒च्य॒ते॒ । रा॒ष्ट्रम् । ब्रा॒ह्म॒णः । यत्र॑ । जी॒यते॑ ॥ ६ ॥

अ॒ष्टाप॑दी चतुरक्षी चतुः॒श्रोत्रा॒ चतु॑र्हनुः ।
द्व्या॒स्या॒ द्विजि॑ह्वा भू॒त्वा सा रा॒ष्ट्रमव॑ धूनुते ब्रह्म॒ज्यस्य॑ ॥ ७ ॥

अ॒ष्टाऽप॑दी । च॒तुः॒ऽअ॒क्षी । चतुः॑ऽश्रोत्रा । चतुः॑ऽहनुः ।
द्वि॒ऽआ॑स्या । द्वि॒ऽजि॑ह्वा । भू॒त्वा । सा । रा॒ष्ट्रम् । अव॑ । धू॒नु॒ते॒ । ब्र॒ह्म॒ऽज्यस्य॑ ॥ ७ ॥

तद् वै रा॒ष्ट्रमा स्र॑वति॒ नावं॑ भि॒न्नामि॑वोद॒कम् ।
ब्रह्मा॑णं॒ यत्र॒ हिंस॑न्ति॒ तद् रा॒ष्ट्रं ह॑न्ति दुच्छु॒ना ॥ ८ ॥

तत् । वै । रा॒ष्ट्रम् । आ । स्र॒व॒ति॒ । नाव॑म् । भि॒न्नाम्ऽइ॑व । उ॒द॒कम् ।
ब्रह्मा॑णम् । यत्र॑ । हिंस॑न्ति । तत् । रा॒ष्ट्रम् । ह॒न्ति॒ । दु॒च्छु॒ना ॥ ८ ॥

तं वृ॒क्षा अप॑ सेधन्ति छा॒यां नो॒ मोप॑गा॒ इति॑ ।
यो ब्रा॑ह्म॒णस्य॒ सद्ध॑नम॒भि नार॑द॒ मन्य॑ते ॥ ९ ॥

तम् । वृ॒क्षाः । अप॑ । से॒ध॒न्ति॒ । छा॒याम् । नः॒ । मा । उप॑ । गाः॒ । इति॑ ।
यः । ब्रा॒ह्म॒णस्य॑ । सत् । ध॒नम् । अ॒भि । नार॑द । मन्य॑ते ॥ ९ ॥

वि॒ष॒मेत॑द् दे॒वकृ॑तं॒ राजा॒ वरु॑णोब्रवीत् ।

न ब्राह्मणस्य गां जग्ध्वा राष्ट्रे जागार कश्चन ॥ १० ॥

विषम् । एतत् । देवऽकृतम् । राजा । वरुणः । अब्रवीत् ।

न । ब्राह्मणस्य । गाम् । जग्ध्वा । राष्ट्रे । जागार । कः । चन ॥ १० ॥

नवैव ता नवतयो या भूमिर्व्यधूनुत ।

प्रजां हिंसित्वा ब्राह्मणीमसंभव्यं पराभवन् ॥ ११ ॥

नव । एव । ताः । नवतयः । याः । भूमिः । विऽअधूनुत ।

प्रऽजाम् । हिंसित्वा । ब्राह्मणीम् । असम्ऽभव्यम् । परा । अभवन् ॥ ११ ॥

यां मृतायानुबध्नन्ति कूच्यं पद्योपनीम् ।

तद् वै ब्रह्मज्य ते देवा उपस्तरणमब्रुवन् ॥ १२ ॥

याम् । मृताय । अनुऽबध्नन्ति । कूच्यम् । पदऽयोपनीम् ।

तत् । वै । ब्रह्मऽज्य । ते । देवाः । उपऽस्तरणम् । अब्रुवन् ॥ १२ ॥

अश्रूणि कृपमाणस्य यानि जीतस्य वावृतुः ।

तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ॥ १३ ॥

अश्रूणि । कृपमाणस्य । यानि । जीतस्य । ववृतुः ।

तम् । वै । ब्रह्मऽज्य । ते । देवाः । अपाम् । भागम् । अधारयन् ॥ १३ ॥

येन मृतं स्नपयन्ति श्मश्रूणि येनोन्दते ।

तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ॥ १४ ॥

येन । मृतम् । स्नपयन्ति । श्मश्रूणि । येन । उन्दते ।

तम् । वै । ब्रह्मऽज्य । ते । देवाः । अपाम् । भागम् । अधारयन् ॥ १४ ॥

न वर्ष मैत्रावरुणं ब्रह्मज्यमभि वर्षति ।

नास्मै समितिः कल्पते न मित्रं नयते वशम् ॥ १५ ॥

न । वर्षम् । मैत्रावरुणम् । ब्रह्मऽज्यम् । अभि । वर्षति ।

न । अस्मै । सम्ऽइतिः । कल्पते । न । मित्रम् । नयते । वशाम् ॥ १५ ॥

इति चतुर्थेनुवाके चतुर्थं सूक्तम् ॥

---

१ Such is the accent of all our authorities. २ P अश्रुणि ।. ३ P विशम् ।.

"उच्चैर्घोषः" इति सूक्तेन त्रासनपरसेनाविद्वेषणकर्मणि भेर्यादिवादित्राणि प्रक्षाल्य तगरोशीरेण लेपयित्वा संपात्य त्रिस्ताडयित्वा वादकाय पुरोधाः प्रयच्छेत्। सूत्रितं हि। "उच्चैर्घोषः [५. २०] उप श्वासय [६. १२६] इति सर्ववादित्राणि प्रक्षाल्य तगरोशीरेण संधाव्य संपातवन्ति त्रिराहत्य प्रयच्छति" इति [कौ० २. ७]॥

तथा महाव्रते अनेन सूक्तेन भूमिदुन्दुभिं ताडयेत्। तद् उक्तं वैताने। "भूमिदुन्दुभिम् औक्षेणापिनद्धं पुच्छेनाघ्नन्त्युच्चैर्घोष उप श्वासय" इति [वै० ६. ४]॥

उच्चैर्घोषो दुन्दुभिः सत्वनायन् वानस्पत्यः संभृत उस्रियाभिः।
वाचं क्षुणुवानो दमयन्त्सपत्नान्त्सिंह इव जेष्यन्नभि तंस्तनीहि ॥ १ ॥

उच्चैःऽघोषः। दुन्दुभिः। सत्वनाऽयन्। वानस्पत्यः। सम्ऽभृतः। उस्रियाभिः।
वाचम्। क्षुणुवानः। दमयन्। सऽपत्नान्। सिंहःऽइव। जेष्यन्। अभि। तंस्तनीहि ॥१॥

सिंह इवास्तानीद् द्रुवयो विबद्धोभिक्रन्दन्नृषभो वासितामिव।
वृषा त्वं वध्रयस्ते सपत्ना ऐन्द्रस्ते शुष्मो अभिमातिषाहः ॥ २ ॥

सिंहःऽइव। अस्तानीत्। द्रुवयः। विऽबद्धः। अभिऽक्रन्दन्। ऋषभः। वासिताम्ऽइव।
वृषा। त्वम्। वध्रयः। ते। सऽपत्नाः। ऐन्द्रः। ते। शुष्मः। अभिमातिऽसहः ॥ २ ॥

वृषेव यूथे सहसा विदानो गव्यन्नभि रुव संधनाजित्।
शुचा विध्य हृदयं परेषां हित्वा ग्रामान् प्रच्युता यन्तु शत्रवः ॥ ३ ॥

वृषाऽइव। यूथे। सहसा। विदानः। गव्यन्। अभि। रुव। संधनाऽजित्।
शुचा। विध्य। हृदयम्। परेषाम्। हित्वा। ग्रामान्। प्रऽच्युताः। यन्तु। शत्रवः ॥ ३ ॥

संजयन् पृतना ऊर्ध्वमायुर्गृह्या गृह्णानो वहुधा वि चक्ष्व।
दैवीं वाचं दुन्दुभ आ गुरस्व वेधाः शत्रूणामुप भरस्व वेदः ॥ ४ ॥

सम्ऽजयन्। पृतनाः। ऊर्ध्वऽमायुः। गृह्याः। गृह्णानः। वहुऽधा। वि। चक्ष्व।
दैवीम्। वाचम्। दुन्दुभे। आ। गुरस्व। वेधाः। शत्रूणाम्। उप। भरस्व। वेदः ॥ ४ ॥

दुन्दुभेर्वाचं प्रयतां वदन्तीमाशृण्वती नाथिता घोषबुद्धा।
नारीं पुत्रं धावतु हस्तगृह्यामित्री भीता समरे वधानाम् ॥ ५ ॥

दुन्दुभेः। वाचम्। प्रऽयताम्। वदन्तीम्। आऽशृण्वती। नाथिता। घोषऽबुद्धा।

---

१ **A D K $\overset{m}{K}$ R $\overset{m}{S}$ Dc P $\overset{2}{P}$** ज्येष्य°. We with $\overset{h}{B}$ **V** Cs **J** CP. २ **B $\overset{h}{B}$** BP **D K $\overset{m}{K}$ $\overset{m}{S}$ V** Dc Cs ध्रुवयो. We with **A R P $\overset{2}{P}$ J** CP. ३ So we with all our authorities.

नारी॑ । पु॒त्रम् । धाव॑तु । ह॒स्त॒ऽआदा॑य । आ॑मि॒त्री । भी॒ता । स॒म्ऽअ॑रे । व॒धाना॑म् ॥ ५ ॥

पूर्वी॑ दुन्दुभे॒ प्र व॑दासि॒ वाचं॑ भूम्या॑: पृ॒ष्ठे व॑द॒ रोच॑मानः ।
अ॒मि॒त्र॒से॒नाम॑भि॒जङ्घ्न॑भा॑नो द्यु॒मद् व॑द दुन्दुभे सू॒नृता॑वत् ॥ ६ ॥

पूर्वी॑: । दु॒न्दु॒भे॒ । प्र । व॒दा॒सि॒ । वाच॑म् । भूम्या॑: । पृ॒ष्ठे । व॒द॒ । रोच॑मानः ।
अ॒मि॒त्र॒ऽसे॒नाम् । अ॒भि॒ऽजङ्घ्न॑भानः । द्यु॒ऽमत् । व॒द॒ । दु॒न्दु॒भे॒ । सू॒नृता॑ऽवत् ॥ ६ ॥

अ॒न्तरे॒मे नभ॑सी॒ घोषो॑ अस्तु पृथ॑क् ते ध्व॒नयो॑ यन्तु शी॒भ॑म् ।
अ॒भि क्र॑न्द स्त॒नयो॑त्पिपा॑नः श्लोककृन्मित्र॒तूर्या॑य स्व॒र्धी ॥ ७ ॥

अ॒न्त॒रा । इ॒मे इति॑ । नभ॑सी इति॑ । घोषः॑ । अ॒स्तु॒ । पृथ॑क् । ते॒ । ध्व॒नयः॑ । य॒न्तु॒ । शी॒भ॑म् ।
अ॒भि । क्र॒न्द॒ । स्त॒नय॑ । उ॒त्ऽपिपा॑नः । श्लो॒कऽकृ॑त् । मि॒त्र॒ऽतूर्या॑य । सु॒ऽअ॒र्धी ॥ ७ ॥

धी॒भिः कृ॒तः प्र व॑दाति॒ वाच॒मुद्ध॑र्षय॒ सत्व॑नामायु॒धानि ।
इन्द्र॑मेदी॒ सत्व॑नो नि ह्व॑यस्व मि॒त्रैर॒मित्रा॑ँ अव॑ जङ्घनीहि ॥ ८ ॥

धी॒भिः॑ । कृ॒तः॑ । प्र । व॒दा॒ति॒ । वाच॑म् । उत् । हर्ष॑य । सत्व॑नाम् । आ॒यु॒धानि ।
इन्द्र॑ऽमेदी । सत्व॑नः । नि । ह्व॒य॒स्व॒ । मि॒त्रैः॑ । अ॒मित्रा॑न् । अव॑ । ज॒ङ्घ॒नी॒हि॒ ॥ ८ ॥

सं॒क्र॒न्द॑नः प्रव॒दो धृ॒ष्णु॑षेणः प्रवेद॒कृद् ब॑हु॒धा ग्रा॑मघो॒षी ।
श्रेयो॑ वन्वा॒नो व॒युना॑नि वि॒द्वान् की॒र्तिं ब॒हुभ्यो॒ वि ह॑र द्विरा॒जे ॥ ९ ॥

स॒म्ऽक्र॒न्द॑नः । प्र॒ऽव॒दः । धृ॒ष्णुऽसे॑नः । प्र॒वे॒द॒ऽकृ॑त् । ब॒हु॒ऽधा । ग्रा॒म॒ऽघो॒षी ।
श्रेय॑: । व॒न्वा॒नः । व॒युना॑नि । वि॒द्वान् । की॒र्ति॑म् । ब॒हु॒ऽभ्य॑: । वि । ह॒र॒ । द्वि॒ऽरा॒जे ॥ ९ ॥

श्रेय॑:केतो वसुजित् सही॑यान्त्संग्रामजित् संशि॑तो ब्रह्म॑णासि ।
अं॒शूनि॑व॒ ग्रावा॑धिषव॒णे अ॑द्रि॒र्गव्यन् दु॑न्दु॒भेधि॑ नृत्य॒ वेद॑: ॥ १० ॥

श्रेय॑:ऽकेतः । व॒सु॒ऽजित् । सही॑यान् । सं॒ग्रा॒म॒ऽजित् । स॒म्ऽशि॑तः । ब्रह्म॑णा । अ॒सि॒ ।
अं॒शून्ऽइ॑व । ग्रावा॑ । अ॒धि॒ऽसव॑ने । अ॒द्रिः॑ । गव्य॑न् । दु॒न्दु॒भे॒ । अधि॑ । नृ॒त्य॒ । वेद॑: ॥१०॥

श॒त्रू॒षाण्नी॒षाड॑भिमाति॒षाहो॑ ग॒वेष॑ण॒: सह॑मान उ॒द्भित् ।

---

१ K आमि॒त्री ।. २ P स॒म्ऽअ॒रे ।. ३ So we with A D R $\overset{m}{S}$ Dc Cs $\overset{2}{P}$ J Cp. P °जङ्घ॑नानः ।. $\overset{h}{B}$ K $\overset{m}{K}$ V °मानो. ४ $\overset{h}{B}$ $\overset{m}{K}$ V घोष॑. We with A D R $\overset{m}{S}$ Dc Cs. ५ P °पिया॑नः ।. ६ A °रमित्रँ. ७ Dc अधि॑° corrected from अद्रि॑°. R अधि॑°. Cs अद्द॑°. ८ P सम्ऽशी॑तः ।. We with $\overset{2}{P}$ J V Cp.

वाग्वीव मन्त्रं प्र भरस्व वाचं सांग्रामजित्यायेषमुद् वदेह ॥ ११ ॥

शत्रुषाट्। नीषाट्। अभिमातिऽसहः। गोऽएषणः। सहमानः। उत्ऽअभित्।
वाग्वीऽइव। मन्त्रम्। प्र। भरस्व। वाचम्। सांग्रामऽजित्याय। इषम्। उत्। वद। इह ॥ ११ ॥

अच्युतच्युत् समदो गमिष्ठो मृधो जेता पुरएतायोध्यः।
इन्द्रेण गुप्तो विदथा निचिक्यद्द्योतनो द्विषतां याहि शीभम् ॥ १२ ॥

अच्युतऽच्युत्। सऽमदः। गमिष्ठः। मृधः। जेता। पुरःऽएता। अयोध्यः।
इन्द्रेण। गुप्तः। विदथा। निऽचिक्यत्। द्योतनः। द्विषताम्। याहि। शीभम् ॥ १२ ॥

इति चतुर्थेनुवाके पञ्चमं सूक्तम् ॥

"विहृदयम्" इति सूक्तेन परसेनात्रासनविद्वेषणकर्मणि सर्ववादित्राणि प्रक्षाल्य तगरोशीरेण लेपयित्वा संपातवन्ति त्रिराहत्य वादकाय प्रयच्छति ॥

तथा अनेन सूक्तेन सोमाङ्कुरमणिं हरिणचर्मणा वेष्टितं कृत्वा संपात्य अभिमन्त्र्य बध्नाति ॥

तद् उक्तं कौशिकसूत्रे। "विहृदयम् इत्युच्चैस्तरां हुत्वा स्रुवम् उद्वर्तयन् सोमांशू हरिणचर्मण्युत्सीव्य क्षत्रियाय बध्नाति" इति [कौ० २. ७] ॥ "विहृदयम्" इति सूक्तस्य सर्वत्र उच्चैःस्वरेण प्रयोगः ॥ उद्वर्तयन् ऊर्ध्वं परिवर्तयन् ॥

विहृदयं वैमनस्यं वदामित्रेषु दुन्दुभे।
विद्वेषं कश्मशं भयममित्रेषु नि दध्मस्यवैनान् दुन्दुभे जहि ॥ १ ॥

विऽहृदयम्। वैमनस्यम्। वद। अमित्रेषु। दुन्दुभे।
विऽद्वेषम्। कश्मशम्। भयम्। अमित्रेषु। नि। दध्मसि। अव। एनान्। दुन्दुभे। जहि ॥ १ ॥

उद्वेपमाना मनसा चक्षुषा हृदयेन च।
धावन्तु विभ्यतोमित्राः प्रत्रासेनाज्ये हुते ॥ २ ॥

उत्ऽवेपमानाः। मनसा। चक्षुषा। हृदयेन। च।
धावन्तु। विभ्यतः। अमित्राः। प्रऽत्रासेन। आज्ये। हुते ॥ २ ॥

वानस्पत्यः संभृत उस्रियाभिर्विश्वगोत्र्यः।
प्रत्रासममित्रेभ्यो वदाज्येनाभिघारितः ॥ ३ ॥

---

१ P संग्रामऽजित्याय। २ P हृऽद्योतनः। K $\dot{P}$ J C^{P}. हृऽद्यो°. ३ P $\dot{P}$ J C^{P} °माना।
We with V.

वानस्पत्यः । सम्ऽभृतः । उस्रियाभिः । विश्वऽगोंत्र्यः ।
प्रऽत्रासम् । अमित्रेभ्यः । वद् । आज्येन । अभिऽघारितः ॥ ३ ॥

यथा मृगाः संविजन्ता आरण्याः पुरुषादधि ।
एवा त्वं दुन्दुभेमित्रानभि क्रन्द प्र त्रासयाथो चित्तानि मोहय ॥ ४ ॥

यथा । मृगाः । सम्ऽविजन्ते । आरण्याः । पुरुषात् । अधि ।
एव । त्वम् । दुन्दुभे । अमित्रान् । अभि । क्रन्द । प्र । त्रासय । अथो इति । चित्तानि ।
मोहय ॥ ४ ॥

यथा वृकादजावयो धावन्ति बहु बिभ्यतीः । एवा० ॥ ५ ॥

यथा । वृकात् । अजऽअवयः । धावन्ति । बहु । बिभ्यतीः ॥०॥ ५ ॥

यथा श्येनात् पतत्रिणः संविजन्ते अहर्दिवि सिंहस्य स्तनथोर्यथा ।
एवा त्वं दुन्दुभेमित्रानभि क्रन्द प्र त्रासयाथो चित्तानि मोहय ॥ ६ ॥

यथा । श्येनात् । पतत्रिणः । सम्ऽविजन्ते । अहःऽदिवि । सिंहस्य । स्तनथोः । यथा ।
एव । त्वम् । दुन्दुभे । अमित्रान् । अभि । क्रन्द । प्र । त्रासय । अथो इति । चित्तानि ।
मोहय ॥ ६ ॥

परामित्रान् दुन्दुभिना हरिणस्याजिनेन च ।
सर्वे देवा अतित्रसन् ये संग्रामस्येशते ॥ ७ ॥

परा । अमित्रान् । दुन्दुभिना । हरिणस्य । अजिनेन । च ।
सर्वे । देवाः । अतित्रसन् । ये । सम्ऽग्रामस्य । ईशते ॥ ७ ॥

यैरिन्द्रः प्रक्रीडते पद्घोषैश्छायया सह ।
तैरमित्रास्त्रसन्तु नोमी ये यन्त्यनीकशः ॥ ८ ॥

यैः । इन्द्रः । प्रऽक्रीडते । पत्ऽघोषैः । छायया । सह ।
तैः । अमित्राः । त्रसन्तु । नः । अमी इति । ये । यन्ति । अनीकऽशः ॥ ८ ॥

ज्याघोषा दुन्दुभयोभि क्रोशन्तु या दिशः ।
सेनाः परांजिता यतीरमित्राणामनीकशः ॥ ९ ॥

ज्याऽघोषाः । दुन्दुभयः । अभि । क्रोशन्तु । याः । दिशः ।

सेनाः। पराऽजिताः। यतीः। अमित्राणाम्। अनीकऽशः॥ ९॥

आदित्य चक्षुरा दत्स्व मरीचयोनु धावत।
पत्सङ्गिनीरा सजन्तु विगते बाहुवीर्ये॥ १०॥

आदित्य। चक्षुः। आ। दत्स्व। मरीचयः। अनु। धावत।
पत्ऽसङ्गिनीः। आ। सृजन्तु। विऽगते। बाहुऽवीर्ये॥ १०॥

यूयमुग्रा मरुतः पृश्निमातर इन्द्रेण युजा प्र मृणीत शत्रून्।
सोमो राजा वरुणो राजा महादेव उत मृत्युरिन्द्रः॥ ११॥

यूयम्। उग्राः। मरुतः। पृश्निऽमातरः। इन्द्रेण। युजा। प्र। मृणीत। शत्रून्।
सोमः। राजा। वरुणः। राजा। महाऽदेवः। उत। मृत्युः। इन्द्रः॥ ११॥

एता देवसेनाः सूर्यकेतवः सचेतसः।
अमित्रान् नो जयन्तु स्वाहा॥ १२॥

एताः। देवऽसेनाः। सूर्यऽकेतवः। सऽचेतसः।
अमित्रान्। नः। जयन्तु। स्वाहा॥ १२॥

चतुर्थेनुवाके षष्ठं सूक्तम्॥

इति चतुर्थोनुवाकः॥

ज्वरभैषज्यकर्मणि "अग्निस्तक्मानम्" इति सूक्तेन लाजान् पाययति॥
तथा तत्रैव कर्मणि दावाग्निप्रणयनं कृत्वा अनेन सूक्तेन ताम्रस्रुवेण मूर्ध्नि संपातान् आनयति॥
तथा च सूत्रम्। "अग्निस्तक्मानम् इति लाजान् पाययति। दावे लोहितपात्रेण मूर्ध्नि संपातान् आनयति" इति [कौ० ४. ५]॥ लाजाः कृष्णा व्रीहयः। तान् अभिमन्त्र्य पाययति मण्डं कृत्वा॥

अग्निस्तक्मानमप बाधतामितः सोमो ग्रावा वरुणः पूतदक्षाः।
वेदिर्बर्हिः समिधः शोशुचाना अप द्वेषांस्यमुया भवन्तु॥ १॥

अग्निः। तक्मानम्। अप। बाधताम्। इतः। सोमः। ग्रावा। वरुणः। पूतऽदक्षाः।
वेदिः। बर्हिः। सम्ऽइधः। शोशुचानाः। अप। द्वेषांसि। अमुया। भवन्तु॥ १॥

अयं यो विश्वान् हरितान् कृणोप्युच्छोचयन्नग्निरिवाभिदुन्वन्।
अधा हि तक्मन्नरसो हि भूया अधा न्यङ्धराङ् वा परेहि॥ २॥

---

१ K V Dc न्यङ् धरा°. A B K R न्यङ्धरा°. D S Cs न्यङ्धरा°.

अयम् । यः । विश्वान् । हरितान् । कृणोपि । उत्ऽशोचयन् । अग्निःऽइव । अभिऽदुन्वन् ।
अध । हि । तक्मन् । अरसः । हि । भूयाः । अध । न्यङ् । अधराङ् । वा । परा । इहि ॥ २ ॥

यः पुरुषः पारुषेयोविध्वंस इवारुणः ।
तक्मानं विश्वधावीर्याधराञ्चं परा सुवा ॥ ३ ॥

यः । पुरुषः । पारुषेयः । अवध्वंसःऽइव । अरुणः ।
तक्मानम् । विश्वधाऽवीर्य । अधराञ्चम् । परा । सुव ॥ ३ ॥

अधराञ्चं प्र हिणोमि नमः कृत्वा तक्मने ।
शकुम्भरस्य मुष्टिहा पुनरेतु महावृषान् ॥ ४ ॥

अधराञ्चम् । प्र । हिनोमि । नमः । कृत्वा । तक्मने ।
शकुम्ऽभरस्य । मुष्टिऽहा । पुनः । एतु । महाऽवृषान् ॥ ४ ॥

ओकौ अस्य मूजवन्त ओकौ अस्य महावृषाः ।
यावज्जातस्तक्मांस्तावानसि बल्हिकेषु न्योचरः ॥ ५ ॥

ओकः । अस्य । मूजऽवन्तः । ओकः । अस्य । महाऽवृषाः ।
यावत् । जातः । तक्मन् । तावान् । असि । बल्हिकेषु । निऽओचरः ॥ ५ ॥

तक्मन् व्याल वि गद व्यङ्ग भूरि यावय ।
दासीं निष्टक्करीमिच्छ तां वज्रेण समर्पय ॥ ६ ॥

तक्मन् । विऽआल । वि । गद । विऽअङ्ग । भूरि । यवय ।
दासीम् । निःऽतक्करीम् । इच्छ । ताम् । वज्रेण । सम् । अर्पय ॥ ६ ॥

तक्मन् मूजवतो गच्छ बल्हिकान् वा परस्तराम ।
शूद्रामिच्छ प्रफर्व्यं[1]तां[4] तक्मन् वीव धूनुहि ॥ ७ ॥

तक्मन् । मूजऽवतः । गच्छ । बल्हिकान् । वा । परःऽतराम् ।
शूद्राम् । इच्छ । प्रऽफर्व्यम् । ताम् । तक्मन् । विऽइव । धूनुहि ॥ ७ ॥

महावृषान् मूजवतो बन्ध्वंद्धि परेत्य ।

---

१ Cs हिणामि. २ B $\overset{h}{B}$ D K $\overset{m}{S}$ V Cs °स्तक्मं°. V P $\overset{2}{P}$ Cp तक्मन् । We with A $\overset{m}{K}$ J Dc. ३ B $\overset{h}{B}$ Bp D $\overset{m}{S}$ ३ for १. We with K $\overset{m}{K}$ R V Dc Cs. ४ Dc तांस्त° for तां त°.

प्रैतानि तक्मने ब्रूमो अन्यक्षेत्राणि वा इमा ॥ ८ ॥

मह्राऽवृषान्। मूजऽवतः। वन्धुं। अद्धि। पराऽइत्यं।

प्र। एतानि। तक्मने। ब्रूमः। अन्यऽक्षेत्राणि। वै। इमा ॥ ८ ॥

अन्यक्षेत्रे न रमसे वशी सन् मृडयासि नः।

अभूदु प्रार्थस्तक्मा स गमिष्यति बल्हिकान् ॥ ९ ॥

अन्यऽक्षेत्रे। न। रमसे। वशी। सन्। मृडयासि। नः।

अभूत्। ऊं इति। प्रऽअर्थः। तक्मा। सः। गमिष्यति। बल्हिकान् ॥ ९ ॥

यत् त्वं शीतोथो रूरः सह कासावेपयः।

भीमास्ते तक्मन् हेतयस्ताभिः स्म परि वृङ्धि नः ॥ १० ॥

यत्। त्वम्। शीतः। अथो इति। रूरः। सह। कासा। अवेपयः।

भीमाः। ते। तक्मन्। हेतयः। ताभिः। स्म। परि। वृङ्धि। नः ॥ १० ॥

मा स्मैतान्त्सखीन् कुरुथा वलासं कासमुद्युगम्।

मा स्मातोर्वाङैः पुनस्तत् त्वा तक्मन्नुप ब्रुवे ॥ ११ ॥

मा। स्म। एतान्। सखीन्। कुरुथाः। वलासम्। कासम्। उत्ऽयुगम्।

मा। स्म। अतः। अर्वाङ्। आ। ऐः। पुनः। तत्। त्वा। तक्मन्। उप। ब्रुवे ॥ ११ ॥

तक्मन् भ्रात्रा वलासेन स्वस्रा कासिकया सह।

पाप्मा भ्रातृव्येण सह गच्छामुमरणं जनम् ॥ १२ ॥

तक्मन्। भ्रात्रा। वलासेन। स्वस्रा। कासिकया। सह।

पाप्मा। भ्रातृव्येण। सह। गच्छ। अमुम्। अरणम्। जनम् ॥ १२ ॥

तृतीयकं वितृतीयं सदन्दिमुत शारदम्।

तक्मानं शीतं रूरं ग्रैष्मं नाशय वार्षिकम् ॥ १३ ॥

तृतीयकम्। विऽतृतीयम्। सदम्ऽदिम्। उत। शारदम्।

तक्मानम्। शीतम्। रूरम्। ग्रैष्मम्। नाशय। वार्षिकम् ॥ १३ ॥

गन्धारिभ्यो मूजवद्भ्योऽङ्गेभ्यो मगधेभ्यः।

---

१ A B ^{h}B D K ^{m}K ^{m}S V Cs °स्ताभिस्स्म. We with R Dc. २ ^{2}P J ऐः।. V CP एः।. K एुः।. We with P.

प्रैष्यन् जनमिव शेवधिं तक्मानं परि दद्मसि ॥ १४ ॥

गन्धारिभ्यः । मूजवत्भ्यः । अङ्गेभ्यः । मगधेभ्यः ।

प्रऽएष्यन् । जनम्ऽइव । शेवऽधिम् । तक्मानम् । परि । दद्मसि ॥ १४ ॥

इति पञ्चमेनुवाके प्रथमं सूक्तम् ॥

कृमिभैषज्यकर्मणि "ओते मे द्यावापृथिवी" इति सूक्तेन करीरमूलं संपात्य अभिमन्त्र्य बध्नीयात् ॥
तथा अनेन सूक्तेन गोवालैः करीरकाष्ठं वेष्टयित्वा सूक्तं जपित्वा पाषाणेन चूर्णयति । ततः सूक्तेनाग्नौ प्रतपति । ततः सूक्तेनादधाति ॥

तथा अनेन सूक्तेन ग्रामपांशून् अभिमन्त्र्य सव्येन हस्तेन दक्षिणामुखो भूत्वा पांशून् परिकिरति ॥

तथा अनेन सूक्तेन पांशून् अभिमन्त्र्य हस्तेन मथित्वा कृमेरुपरि क्षिपति ॥

तथा अनेन सूक्तेन शान्तिवृक्षसमिध आदधाति । कृमिभञ्जनम् ॥

तथा अनेन सूक्तेन पश्चाद् अग्नेर्मातुरुत्सङ्गे बालं कृत्वा नवनीतान्वक्तेन मुसलबुध्नेन तालुनि तापयति । त्रिः सूक्तप्रयोगः ॥

तथा अनेन सूक्तेन शिग्रुबीजेन नवनीतमिश्रेण अभिमन्त्र्य व्याधिदेशं प्रलिम्पति ॥

तथा अनेन सूक्तेन एकविंशत्युशीराणां मूलान्यभिमन्त्र्य पाषाणेन कुट्टयति । ततः सूक्तं जपित्वा उशीराणि अग्निना दहति ॥

तथा अनेन सूक्तेन एकविंशत्युशीराणि अभिमन्त्र्य व्याधिताय समर्पयति ॥

तथा अनेन सूक्तेन उदकघटम् एकविंशत्युशीरपिञ्जूलीसहितं संपात्य अभिमन्त्र्य व्याधितम् आप्लावयति ॥

तद् उक्तं कौशिकसूत्रे । "ओते म इति करीरमूलं काण्डैकदेशम् । ग्रामात् पांशून् । पश्चाद् अग्नेर्मातुरुपस्थे मुसलबुध्नेन "नवनीतान्वक्तेन त्रिः प्रतीहारं तालुनि तापयति । शिग्रुभिर्नवनीतमिश्रैः प्रदेग्धि । एकविंशतिम् उशीराणि भिनद्मि [१३] इति "मन्त्रोक्तम् । उशीराणि प्रयच्छति । एकविंशत्या सहाप्लावयति" इति [कौ° ४.५] ॥

ओते मे द्यावापृथिवी ओता देवी सरस्वती ।
ओतौ म इन्द्रश्चाग्निश्च क्रिमिं जम्भयतामिति ॥ १ ॥

ओते इत्याऽउते । मे । द्यावापृथिवी इति । आऽउता । देवी । सरस्वती ।
आऽउतौ । मे । इन्द्रः । च । अग्निः । च । क्रिमिम् । जम्भयताम् । इति ॥ १ ॥

अस्येन्द्र कुमारस्य क्रिमीन् धनपते जहि ।
हता विश्वा अरातय उग्रेण वचसा मम ॥ २ ॥

अस्य । इन्द्र । कुमारस्य । क्रिमीन् । धनऽपते । जहि ।
हताः । विश्वाः । अरातयः । उग्रेण । वचसा । मम ॥ २ ॥

यो अक्ष्यौ परिसर्पति यो नासे परिसर्पति ।
दतां यो मध्यं गच्छति तं क्रिमिं जम्भयामसि ॥ ३ ॥

---

१ A प्रैष्यं. २ B दध्मसि. ३ P गन्धादिऽभ्यः ।. ४ Cs क्रमिं.

यः। अक्ष्यौ। परिऽसर्पति। यः। नासे इति। परिऽसर्पति।
दताम्। यः। मध्यम्। गच्छति। तम्। क्रिमिम्। जम्भयामसि ॥ ३ ॥

सरूपौ द्वौ विरूपौ द्वौ कृष्णौ द्वौ रोहितौ द्वौ।
बभ्रुश्च बभ्रुकर्णश्च गृध्रः कोकश्च ते हताः ॥ ४ ॥

सऽरूपौ। द्वौ। विऽरूपौ। द्वौ। कृष्णौ। द्वौ। रोहितौ। द्वौ।
बभ्रुः। च। बभ्रुऽकर्णः। च। गृध्रः। कोकः। च। ते। हताः ॥ ४ ॥

ये क्रिमयः शितिकक्षा ये कृष्णाः शितिबाहवः।
ये के च विश्वरूपास्तान् क्रिमीन् जम्भयामसि ॥ ५ ॥

ये। क्रिमयः। शितिऽकक्षाः। ये। कृष्णाः। शितिऽबाहवः।
ये। के। च। विश्वऽरूपाः। तान्। क्रिमीन्। जम्भयामसि ॥ ५ ॥

उत् पुरस्तात् सूर्य एति विश्वदृष्टो अदृष्टहा।
दृष्टांश्च घ्नदृष्टांश्च सर्वांश्च प्रमृणन् क्रिमीन् ॥ ६ ॥

उत्। पुरस्तात्। सूर्यः। एति। विश्वऽदृष्टः। अदृष्टऽहा।
दृष्टान्। च। घ्नन्। अदृष्टान्। च। सर्वान्। च। प्रऽमृणन्। क्रिमीन् ॥ ६ ॥

येवाषासः कप्कषास एजत्काः शिपविल्वकाः।
दृष्टश्च हन्यतां क्रिमिरुतादृष्टश्च हन्यताम् ॥ ७ ॥

येवाषासः। कप्कषासः। एजत्ऽकाः। शिपविल्वकाः।
दृष्टः। च। हन्यताम्। क्रिमिः। उत। अदृष्टः। च। हन्यताम् ॥ ७ ॥

हतो येवाषः क्रिमीणां हतो नदनिमोत।
सर्वान् नि मप्मषाकरं दृषदा खल्वाँ इव ॥ ८ ॥

हतः। येवाषः। क्रिमीणाम्। हतः। नदनिमा। उत।
सर्वान्। नि। मप्मषा। अकरम्। दृषदा। खल्वान्ऽइव ॥ ८ ॥

त्रिशीर्षाणं त्रिककुदं क्रिमिं सारङ्गमर्जुनम्।
शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः ॥ ९ ॥

---

१ S[m] C[S] कोकश्च ते. P C[P] ते।. २ B नदंनिमोत. ३ A K K[m] S[m] V D[C] पृष्ठी°.

त्रिऽशीर्षाणम् । त्रिऽककुदम् । क्रिमिम् । सारङ्गम् । अर्जुनम् ।
शृणामि । अस्य । पृष्टीः । अपि । वृश्चामि । यत् । शिरः ॥ ९ ॥

अत्त्रिवद् वः क्रिमयो हन्मि कण्ववज्जमदग्निवत् ।
अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन् ॥ १० ॥

अत्त्रिऽवत् । वः । क्रिमयः । हन्मि । कण्वऽवत् । जमदग्निऽवत् ।
अगस्त्यस्य । ब्रह्मणा । सम् । पिनष्मि । अहम् । क्रिमीन् ॥ १० ॥

हतो राजा क्रिमीणामुतैषां स्थपतिर्हतः ।
हतो हतमाता क्रिमिर्हतभ्राता हतस्वसा ॥ ११ ॥

हतः । राजा । क्रिमीणाम् । उत । एषाम् । स्थपतिः । हतः ।
हतः । हतऽमाता । क्रिमिः । हतऽभ्राता । हतऽस्वसा ॥ ११ ॥

हतासो अस्य वेशसो हतासः परिवेशसः ।
अथो ये क्षुल्लुका इव सर्वे ते क्रिमयो हताः ॥ १२ ॥

हतासः । अस्य । वेशसः । हतासः । परिऽवेशसः ।
अथो इति । ये । क्षुल्लुकाःऽइव । सर्वे । ते । क्रिमयः । हताः ॥ १२ ॥

सर्वेषां च क्रिमीणां सर्वासां च क्रिमीणाम् ।
भिनद्म्यश्मना शिरो दहाम्यग्निना मुखम् ॥ १३ ॥

सर्वेषाम् । च । क्रिमीणाम् । सर्वासाम् । च । क्रिमीणाम् ।
भिनद्मि । अश्मना । शिरः । दहामि । अग्निना । मुखम् ॥ १३ ॥

इति पञ्चमेनुवाके द्वितीयं सूक्तम् ॥

पौरोहित्यं करिष्यन् "सविता प्रसवानाम्" इति सूक्तेन शूद्रेणाहृताः समिध आदधातीति केशवः । तथा च सूत्रम् । "सविता प्रसवानाम् इति पौरोहित्ये वत्सन् वैश्वलोपीः समिध आधाय" इति [कौ° २. ८] । विश्वो लुप्यते चन्द्रोस्याम् इति विश्वलोपा अमावास्या । तस्यां भवा एतादृशीः समिधः । चन्द्रमसः सर्वलोपाद् अमावास्या विश्वलोपेति हि दारिलः ॥

तथा अस्य सूक्तस्य विवाहे आज्यहोमे विनियोगः । तथा च सूत्रम् । "सविता प्रसवानाम् इति" इति [कौ° १०. ४] ॥

तथा चातुर्मास्ये वैश्वदेवपर्वणि सावित्रं यागं "सविता प्रसवानाम्" इति ब्रह्मा अनुमन्त्रयेत । तद् उक्तं वैताने । "सविता प्रसवानाम्" इति [वै° २. ४] ॥

सविता प्रसवानामधिपतिः स मावतु ।

---

१ **J V** C^{P} **पृष्टीः** I. We with **P** $\overset{3}{\text{P}}$. २ See II. 32. 5 and foot-note. The MSS. here do not give the three verses 10-12 but refer to II. 32, 3-5. ३ **P J क्रिमीणाम्** I. We with $\overset{3}{\text{P}}$ C^{P}.

अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥ १ ॥

सविता । प्रऽसवानाम् । अधिऽपतिः । सः । मा । अवतु ।
अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥ १ ॥

अग्निर्वनस्पतीनामधिपतिः स मावतु ।० ॥ २ ॥

अग्निः । वनस्पतीनाम् । अधिऽपतिः । सः । मा । अवतु ।० ॥ २ ॥

द्यावापृथिवी दातॄणामधिपत्नी ते मावताम् ।० ॥ ३ ॥

द्यावापृथिवी इति । दातॄणाम् । अधिपत्नी इत्यधिऽपत्नी । ते इति । मा । अवताम् ।० ॥ ३ ॥

वरुणोपामधिपतिः स मावतु ।० ॥ ४ ॥

वरुणः । अपाम् । अधिऽपतिः । सः । मा । अवतु ।० ॥ ४ ॥

मित्रावरुणौ वृष्ट्या[1] अधिपती तौ । मा । अवताम् ।० ॥ ५ ॥

मित्रावरुणौ । वृष्ट्याः । अधिपती इत्यधिऽपती । तौ । मा । अवताम् ।० ॥ ५ ॥

मरुतः पर्वतानामधिपतयस्ते मावन्तु ।० ॥ ६ ॥

मरुतः । पर्वतानाम् । अधिऽपतयः । ते । मा । अवन्तु ।० ॥ ६ ॥

सोमो वीरुधामधिपतिः स मावतु ।० ॥ ७ ॥

सोमः । वीरुधाम् । अधिऽपतिः । सः । मा । अवतु ।० ॥ ७ ॥

वायुरन्तरिक्षस्याधिपतिः स ०।० ॥ ८ ॥

वायुः । अन्तरिक्षस्य । अधिऽपतिः ।० ॥ ८ ॥

सूर्यश्चक्षुषामधिपतिः स ०।० ॥ ९ ॥

सूर्यः । चक्षुषाम् । अधिऽपतिः ।० ॥ ९ ॥

चन्द्रमा नक्षत्राणामधिपतिः स ०।० ॥ १० ॥

चन्द्रमाः । नक्षत्राणाम् । अधिऽपतिः ।० ॥ १० ॥

---

१ So we with all our authorities. The pada-version should read वृष्ट्याः ।.

इन्द्रो दिवोधिपतिः स ०।० ॥ ११ ॥

इन्द्रः । दिवः । अधिऽपतिः ।० ॥ ११ ॥

मरुतां पिता पशूनामधिपतिः स ०।० ॥ १२ ॥

मरुताम् । पिता । पशूनाम् । अधिऽपतिः ।० ॥ १२ ॥

मृत्युः प्रजानामधिपतिः स ०।० ॥ १३ ॥

मृत्युः । प्रऽजानाम् । अधिऽपतिः ।० ॥ १३ ॥

यमः पितॄणामधिपतिः स मावतु ।० ॥ १४ ॥

यमः । पितॄणाम् । अधिऽपतिः । सः । मा । अवतु ।० ॥ १४ ॥

पितरः परे ते मावन्तु ।० ॥ १५ ॥

पितरः । परे । ते । मा । अवन्तु ।० ॥ १५ ॥

तता अवरे ते ०।० ॥ १६ ॥

ततः । अवरे । ते ।० ॥ १६ ॥

ततस्ततामहास्ते मावन्तु ।

अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्या प्रतिष्ठायामस्या चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥१७॥

ततः । ततामहाः । ते । मा । अवन्तु ।

अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥ १७ ॥

इति पञ्चमेनुवाके तृतीयं सूक्तम् ॥

गर्भाधानाख्ये कर्मणि "पर्वताद् दिवः" इति सूक्तेन आगमकुशरं चरुद्वयं श्रपयित्वा संपात्य अभिमन्त्र्य द्वितीयं चरुं युग्च्छिद्रेण संपात्य अभिमन्त्र्य आशयति ॥

तथा तत्रैव कर्मणि केलूनांश्च पलाशत्सरूनिवृत्ते निघृष्य "पर्वताद् दिवः" इति सूक्तेन अभिमन्त्र्य शिश्ने आधाय ततो मैथुनं करोति ॥

तद् उक्तं कौशिकेन । "पर्वताद् दिव इत्यागमकुशरम् आशयति । युगतर्ध्नेना संपातवन्तं द्वितीयम् । केलूनांश्च पलाशत्सरूनिवृत्ते निकर्त्याधाय शिश्ने ग्रामं प्रविशति" इति [कौ° ४. ११] ॥

पर्वताद् दिवो योनेरङ्गादङ्गात् समाभृतम ।

शेपो गर्भस्य रेतोधाः सरौ पर्णमिवा दधत् ॥ १ ॥

पर्वतात्। दिवः। योनेः। अङ्गात्ऽअङ्गात्। सम्ऽआभृतम्।

शेपः। गर्भस्य। रेतःऽधाः। सरौ। पर्णम्ऽइव। आ। दधत् ॥ १ ॥

यथेयं पृथिवी मही भूतानां गर्भमादधे।

एवा दधामि ते गर्भं तस्मै त्वामवसे हुवे ॥ २ ॥

यथा। इयम्। पृथिवी। मही। भूतानाम्। गर्भम्। आऽदधे।

एव। आ। दधामि। ते। गर्भम्। तस्मै। त्वाम्। अवसे। हुवे ॥ २ ॥

गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति।

गर्भं ते अश्विनोभा धत्तां पुष्करस्रजा ॥ ३ ॥

गर्भम्। धेहि। सिनीवालि। गर्भम्। धेहि। सरस्वति।

गर्भम्। ते। अश्विना। उभा। आ। धत्ताम्। पुष्करऽस्रजा ॥ ३ ॥

गर्भं ते मित्रावरुणौ गर्भं देवो बृहस्पतिः।

गर्भं त इन्द्रश्चाग्निश्च गर्भं धाता दधातु ते ॥ ४ ॥

गर्भम्। ते। मित्रावरुणौ। गर्भम्। देवः। बृहस्पतिः।

गर्भम्। ते। इन्द्रः। च। अग्निः। च। गर्भम्। धाता। दधातु। ते ॥ ४ ॥

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु।

आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ ५ ॥

विष्णुः। योनिम्। कल्पयतु। त्वष्टा। रूपाणि। पिंशतु।

आ। सिञ्चतु। प्रजाऽपतिः। धाता। गर्भम्। दधातु। ते ॥ ५ ॥

यद् वेद राजा वरुणो यद् वा देवी सरस्वती।

यदिन्द्रो वृत्रहा वेद तद् गर्भकरणं पिब ॥ ६ ॥

यत्। वेद। राजा। वरुणः। यत्। वा। देवी। सरस्वती।

यत्। इन्द्रः। वृत्रऽहा। वेद। तत्। गर्भऽकरणम्। पिब ॥ ६ ॥

गर्भो अस्योषधीनां गर्भो वनस्पतीनाम्।

---

१ So our MSS. Should we perhaps read गर्भस्य रेतो धाः? २ S[m] वेद. P वेद।.

गर्भो विश्वस्य भूतस्य सो अग्ने गर्भमेह धाः ॥ ७ ॥

गर्भः । असि । ओषधीनाम् । गर्भः । वनस्पतीनाम् ।

गर्भः । विश्वस्य । भूतस्य । सः । अग्ने । गर्भम् । आ । इह । धाः ॥ ७ ॥

अधि स्कन्द वीर्यस्व गर्भमा धेहि योन्याम् ।

वृषासि वृष्ण्यावन् प्रजायै त्वा नयामसि ॥ ८ ॥

अधि । स्कन्द् । वीर्यस्व । गर्भम् । आ । धेहि । योन्याम् ।

वृषा । असि । वृष्ण्यऽवन् । प्रऽजायै । त्वा । आ । नयामसि ॥ ८ ॥

वि जिहीष्व बार्हत्सामे गर्भस्ते योनिमा शयाम् ।

अदुष्टे देवाः पुत्रं सोमपा उभयाविनम् ॥ ९ ॥

वि । जिहीष्व । बार्हत्ऽसामे । गर्भः । ते । योनिम् । आ । शयाम् ।

अदुः । ते । देवाः । पुत्रम् । सोमऽपाः । उभयाविनम् ॥ ९ ॥

धातः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः ।

पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ॥ १० ॥

धातः । श्रेष्ठेन । रूपेण । अस्याः । नार्याः । गवीन्योः ।

पुमांसम् । पुत्रम् । आ । धेहि । दशमे । मासि । सूतवे ॥ १० ॥

त्वष्टः श्रेष्ठेन ०।० ॥ ११ ॥

त्वष्टः । श्रेष्ठेन ।० ॥ ११ ॥

सवितः श्रेष्ठेन ०।० ॥१२ ॥

सवितः । श्रेष्ठेन ।० ॥ १२ ॥

प्रजापते श्रेष्ठेन रूपेणास्या नार्या गवीन्योः ।

पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ॥ १३ ॥

प्रजाऽपते । श्रेष्ठेन । रूपेण । अस्याः । नार्याः । गवीन्योः ।

पुमांसम् । पुत्रम् । आ । धेहि । दशमे । मासि । सूतवे ॥ १३ ॥

इति पञ्चमेनुवाके चतुर्थं सूक्तम् ॥

---

१ A B K K^{m} S^{m} V De Cr. वीडयस्व. We with D R Cs and P P$^{\ddot{o}}$ J. २ C^{s} जिहीष्व.
३ P °सामे ।.

"यजूंषि यज्ञे" इति सूक्तेन नवशालायां पुष्टिकामो घृतं मधुमिश्रं जुहुयात्। तथा च सूत्रम्। "यजूंषि यज्ञे [५. २६] इति नवशालायां सर्पिर्मधुमिश्रं जुहोति। दोषो गाय [६. १] इति द्वितीयाम्। युक्ताभ्यां तृतीयाम्" इति [कौ० ३. ६]॥ आहुतिम् इति शेषः॥

ज्योतिष्टोमे "यजूंषि यज्ञे" इति सूक्तेन आज्यं जुहोति। "यजूंषि यज्ञ इति च" [वै० ३. ६] इति वैतानसूत्रात्॥

यजूंषि यज्ञे समिधः स्वाहाग्निः प्रविद्वानिह वो युनक्तु ॥ १ ॥

यजूंषि। यज्ञे। सम्ऽइधः। स्वाहा। अग्निः। प्रऽविद्वान्। इह। वः। युनक्तु ॥ १ ॥

युनक्तु देवः सविता प्रजानन्नस्मिन् यज्ञे महिषः स्वाहा ॥ २ ॥

युनक्तु। देवः। सविता। प्रऽजानन्। अस्मिन्। यज्ञे। महिषः। स्वाहा ॥ २ ॥

इन्द्र उक्थामदान्यस्मिन् यज्ञे प्रविद्वान् युनक्तु सुयुजः स्वाहा ॥ ३ ॥

इन्द्रः। उक्थऽमदानि। अस्मिन्। यज्ञे। प्रऽविद्वान्। युनक्तु। सुऽयुजः। स्वाहा ॥ ३ ॥

प्रैषा यज्ञे निविदः स्वाहा शिष्टाः पत्नीभिर्वहतेह युक्ताः ॥ ४ ॥

प्रऽएषाः। यज्ञे। निऽविदः। स्वाहा। शिष्टाः। पत्नीभिः। वहत। इह। युक्ताः ॥ ४ ॥

छन्दाँसि यज्ञे मरुतः स्वाहा मातेव पुत्रं पिपृतेह युक्ताः ॥ ५ ॥

छन्दाँसि। यज्ञे। मरुतः। स्वाहा। माताऽइव। पुत्रम्। पिपृत। इह। युक्ताः ॥ ५ ॥

एयमगन् बर्हिषा प्रोक्षणीभिर्यज्ञं तन्वानादितिः स्वाहा ॥ ६ ॥

आ। इयम्। अगन्। बर्हिषा। प्रऽउक्षणीभिः। यज्ञम्। तन्वाना। अदितिः। स्वाहा ॥ ६ ॥

विष्णुर्युनक्तु बहुधा तपाँस्यस्मिन् यज्ञे सुयुजः स्वाहा ॥ ७ ॥

विष्णुः। युनक्तु। बहुऽधा। तपाँसि। अस्मिन्। यज्ञे। सुऽयुजः। स्वाहा ॥ ७ ॥

त्वष्टा युनक्तु बहुधा नु रूपा अस्मिन् यज्ञे सुयुजः स्वाहा ॥ ८ ॥

त्वष्टा। युनक्तु। बहुऽधा। नु। रूपाः। अस्मिन्। यज्ञे। सुऽयुजः। स्वाहा ॥ ८ ॥

भगो युनक्ताशिषो न्वस्मा[1] अस्मिन् यज्ञे प्रविद्वान् युनक्तु सुयुजः स्वाहा॥ ९

भगः। युनक्तु। आऽशिषः। नु। अस्मै। अस्मिन्। यज्ञे। प्रऽविद्वान्। युनक्तु। सुऽयुजः। स्वाहा ॥ ९ ॥

सोमो युनक्तु बहुधा पयाँस्यस्मिन् यज्ञे सुयुजः स्वाहा ॥ १० ॥

सोमः। युनक्तु। बहुऽधा। पयाँसि। अस्मिन्। यज्ञे। सुऽयुजः। स्वाहा ॥ १० ॥

इन्द्रो युनक्तु बहुधा वीर्याण्यस्मिन् यज्ञे सुयुजः स्वाहा ॥ ११ ॥

---

१ So **P** $\hat{\mathbf{P}}^{2}$ **J C**r. Only **J** once read रूपा।. २ **B** $\hat{\mathbf{B}}^{h}$ **D** $\hat{\mathbf{S}}^{m}$ **C**s ३ for १.

इन्द्रः । युनक्तु । बहुऽधा । वीर्याणि । अस्मिन् । यज्ञे । सुऽयुजः । स्वाहा ॥ ११ ॥

अश्विना ब्रह्मणा यातमर्वाञ्चौ वषट्कारेण यज्ञं वर्धयन्तौ ।
बृहस्पते ब्रह्मणा याह्यर्वाङ् यज्ञो अयं स्वरिदं यजमानाय स्वाहा ॥१२॥

अश्विना । ब्रह्मणा । आ । यातम् । अर्वाञ्चौ । वषट्ऽकारेण । यज्ञम् । वर्धयन्तौ ।
बृहस्पते । ब्रह्मणा । आ । याहि । अर्वाङ् । यज्ञः । अयम् । स्वरिति । इदम् । यजमानाय ।
स्वाहा ॥ १२ ॥

पञ्चमं सूक्तम् ॥

इति पञ्चमोनुवाकः ॥

पुष्टिकामः "ऊर्ध्वा अस्य" इति सूक्तेन अग्नौ मन्थाकारम् औदुम्बरं दत्त्वा आज्यं जुहोति ॥

तथा असंख्याता आगमशष्कुलीरधिधिन्य अनेन सूक्तेन सप्त शष्कुलीरग्नौ दत्त्वा आज्यं जुहोति । शेषाः शष्कुलीः कर्त्रे ददाति ॥

तद् उक्तं कौशिकेन । "ऊर्ध्वा अस्येति वार्ष्मणम् औदुम्बरं मन्थप्रतिरूपम् अभि जुहोति । असंख्याता अधिधिन्य सप्तागमशष्कुलीः" इति [कौ° ३. ६] ॥ प्रतिग्रहोपात्तेन द्रव्येण कृताः शष्कुल्य आगमशष्कुल्यः ॥

तथा वशाशमनकर्मणि अस्य सूक्तस्य विनियोग उक्तः । सूत्रादिकं "समिद्धो अद्य" इति सूक्ते [५. १२] द्रष्टव्यम् ॥

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः ।
द्युमत्तमा सुप्रतीकः ससूनुस्तनूनपादसुरो भूरिपाणिः ॥ १ ॥

ऊर्ध्वाः । अस्य । सम्ऽइधः । भवन्ति । ऊर्ध्वा । शुक्रा । शोचींषि । अग्नेः ।
द्युमत्ऽतमा । सुऽप्रतीकः । सऽसूनुः । तनूऽनपात् । असुरः । भूरिऽपाणिः ॥ १ ॥

देवो देवेषु देवः पथो अनक्ति मध्वा घृतेन ॥ २ ॥

देवः । देवेषु । देवः । पथः । अनक्ति । मध्वा । घृतेन ॥ २ ॥

मध्वा यज्ञं नक्षति मैणानो नराशंसो अग्निः सुकृद् देवः सविता विश्ववारः ॥ ३ ॥

मध्वा । यज्ञम् । नक्षति । मैणानः । नराशंसः । अग्निः । सुऽकृत् । देवः । सविता । विश्वऽवारः ॥ ३ ॥

अच्छायमेति शवसा घृता चिदीडानो वह्निर्नमसा ॥ ४ ॥

अच्छ । अयम् । एति । शवसा । घृता । चित् । ईडानः । वह्निः । नमसा ॥ ४ ॥

---

१ A नरा°. P Cp नराशंसः ।.

अग्निः स्रुचो अध्वरेषु प्रयक्षु स यक्षदस्य महिमानमग्नेः ॥ ५ ॥

अग्निः। स्रुचः। अध्वरेषु। प्रऽयक्षु। सः। यक्षत्। अस्य। महिमानम्। अग्नेः ॥ ५ ॥

तुरी मन्द्रासु प्रयक्षु वसवश्चातिष्ठन् वसुधातरश्च ॥ ६ ॥

तुरी। मन्द्रासु। प्रऽयक्षु। वसवः। च। अतिष्ठन्। वसुऽधातरः। च ॥ ६ ॥

द्वारो देवीरन्वस्य विश्वे व्रतं रक्षन्ति विश्वहा ॥ ७ ॥

द्वारः। देवीः। अनु। अस्य। विश्वे। व्रतम्। रक्षन्ति। विश्वहा ॥ ७ ॥

उरुव्यचसाग्नेर्धाम्ना पत्यमाने।

आ सुष्वयन्ती यजते उपाके उषासानक्तेमं यज्ञमवतामध्वरं नः ॥ ८ ॥

उरुऽव्यचसा। अग्नेः। धाम्ना। पत्यमाने इति।

आ। सुस्वयन्ती इति। यजते इति। उपाके इति। उपसानक्ता। इमम्। यज्ञम्। अव-
तम्। अध्वरम्। नः ॥ ८ ॥

दैवा होतार ऊर्ध्वमध्वरं नोग्नेर्जिह्वयाभि गृणत गृणता नः स्विष्टये।

तिस्रो देवीर्बर्हिरेदं सदन्तामिडा सरस्वती मही भारती गृणाना ॥ ९ ॥

दैवाः। होतारः। ऊर्ध्वम्। अध्वरम्। नः। अग्नेः। जिह्वया। अभि। गृणत। गृणत। नः।
सुऽइष्टये।

तिस्रः। देवीः। बर्हिः। आ। इदम्। सदन्ताम्। इडा। सरस्वती। मही। भारती।
गृणाना ॥ ९ ॥

तन्नस्तुरीपमद्भुतं पुरुक्षु। देव त्वष्टा रायस्पोषं वि ष्य नाभिमस्य ॥ १० ॥

तत्। नः। तुरीपम्। अत्ऽभुतम्। पुरुऽक्षु ॥ देव। त्वष्टः। रायः। पोषम्। वि। स्य।
नाभिम्। अस्य ॥ १० ॥

वनस्पतेव सृजा ररांणः। त्मना देवेभ्यो अग्निर्हव्यं शमिता स्वदयतु ॥ ११ ॥

वनस्पते। अव। सृज। ररांणः ॥ त्मना। देवेभ्यः। अग्निः। हव्यम्। शमिता। स्वदयतु ॥ ११ ॥

अग्ने स्वाहा कृणुहि जातवेदः। इन्द्राय यज्ञं विश्वे देवा हविरिदं जुषन्ताम् ॥ १२ ॥

---

१ Cs रजते. २ K दैव्या. ३ K दैव्याः ।. ४ P P̂ तुरीयम् ।. ५ P P̂ अत्ऽभूतम् ।. Cp अद्भूतम् ।. ६ P J पुरुक्षु ।. We with K V P̂ Cp. ७ P अस्य ।.

अग्ने । स्वाहा । कृणुहि । जातऽवेदः ॥ इन्द्राय । यज्ञम् । विश्वे । देवाः । हविः । इदम् । जुषन्ताम् ॥ १२ ॥

इति षष्ठेनुवाके प्रथमं सूक्तम् ॥

सर्वसंपत्कर्मसु "नव प्राणान्" इति सूक्तस्य विनियोगः ॥

तथा आयुष्कामस्य हिरण्यमणिबन्धने अस्य विनियोगः ॥ एतदुभयविस्तरः "यदाबध्नन्" इति सूक्ते [१. ३५] द्रष्टव्यः ॥

उपनयनकर्मण्यपि आयुष्कामस्य ब्रह्मचारिण आज्यहोमे एतद् विनियुक्तम् अस्य आयुष्यगणे पाठात् । सूत्रितं हि । "मेधाजननायुष्यैर्जुहुयात्" इति [कौ० ७. ८] ॥

तथा अनेन सूक्तेन उपनयनानन्तरम् आयुष्कामस्य माणवकस्य सुवर्णरजतलोह[मयानि] त्रीणि शकलान्येकत्र कृत्वा नवशलाकं मणिं त्रिवृतं कृत्वा संपात्याभिमन्त्र्य बध्नाति इति केशवः । तद् उक्तं कौशिकेन । "उपनयनम्" [कौ० ७. ६] प्रक्रम्य "नव प्राणान् इति मन्त्रोक्तम्" इति [कौ० ७. ९] ॥

तथा "वैष्णवीम् अन्नकामस्य अन्नक्षये च" इति [न० क० १७] विहितायां वैष्णव्याख्यायां महाशान्तौ त्रिवृन्मणिबन्धनेपि अस्य सूक्तस्य विनियोगः । तद् उक्तं नक्षत्रकल्पे । "नव प्राणान् इति त्रिवृतं वैष्णव्याम्" इति [न० क० १९] ॥

नव प्राणान्नवभिः सं मिमीते दीर्घायुत्वाय शतशारदाय ।
हरिते त्रीणि रजते त्रीण्ययसि त्रीणि तपसाविष्ठितानि ॥ १ ॥

नव । प्राणान् । नवऽभिः । सम् । मिमीते । दीर्घायुऽत्वाय । शतऽशारदाय ।
हरिते । त्रीणि । रजते । त्रीणि । अयसि । त्रीणि । तपसा । आऽविस्थितानि ॥ १ ॥

अग्निः सूर्यश्चन्द्रमा भूमिरापो द्यौरन्तरिक्षं प्रदिशो दिशश्च ।
आर्तवा ऋतुभिः संविदाना अनेना मा त्रिवृता पारयन्तु ॥ २ ॥

अग्निः । सूर्यः । चन्द्रमाः । भूमिः । आपः । द्यौः । अन्तरिक्षम् । प्रऽदिशः । दिशः । च ।
आर्तवाः । ऋतुऽभिः । सम्ऽविदानाः । अनेन । मा । त्रिऽवृता । पारयन्तु ॥ २ ॥

त्रयः पोषास्त्रिवृति[2] श्रयन्तामनक्तु पूषा पयसा घृतेन ।
अन्नस्य भूमा पुरुषस्य भूमा भूमा पशूनां त इह श्रयन्ताम् ॥ ३ ॥

त्रयः । पोषाः । त्रिऽवृति । श्रयन्ताम् । अनक्तु । पूषा । पयसा । घृतेन ।
अन्नस्य । भूमा । पुरुषस्य । भूमा । भूमा । पशूनाम् । ते । इह । श्रयन्ताम् ॥ ३ ॥

इममादित्या वसुना समुक्षतेमममग्ने वर्धय वावृधानः ।

---

१ So we with **A B B[h] D K K[m] S[m] V** Dc Cs **P P[2] J** Cp. **R** °विष्ठितानि. २ **B** °वृतिँ. **A B[h] D K R S[m]** Cs °वृतिः. **A** has cancelled the visarga. We with **K[m] V** Dc **P P[2] J** Cp. ३ **K K[m]** °दित्या.

इममिन्द्र सं सृज वीर्येण्यसिन् त्रिवृच्छ्रयतां पोषयिष्णु ॥ ४ ॥

इमम्। आदित्याः। वसुना। सम्। उक्षत। इमम्। अग्ने। वर्धय। ववृधानः।

इमम्। इन्द्र। सम्। सृज। वीर्येण। असिन्। त्रिऽवृत्। श्रयताम्। पोषयिष्णु ॥ ४ ॥

भूमिष्ट्वा पातु हरितेन विश्वभृद्‌ग्निः पिपर्त्वयसा सजोषाः।
वीरुद्भिष्टे अर्जुनं संविदानं दक्षं दधातु सुमनस्यमानम् ॥ ५ ॥

भूमिः। त्वा। पातु। हरितेन। विश्वऽभृत्। अग्निः। पिपर्तु। अयसा। सऽजोषाः।

वीरुत्ऽभिः। ते। अर्जुनम्। सम्ऽविदानम्। दक्षम्। दधातु। सुऽमनस्यमानम् ॥ ५ ॥

त्रेधा जातं जन्मनेदं हिरण्यमग्नेरेकं प्रियतमं बभूव सोमस्यैकं हिंसितस्य परापतत्।
अपामेकं वेधसां रेत आहुस्तत् ते हिरण्यं त्रिवृदुस्त्वायुषे ॥ ६ ॥

त्रेधा। जातम्। जन्मना। इदम्। हिरण्यम्। अग्नेः। एकम्। प्रियऽतमम्। बभूव। सोमस्य। एकम्। हिंसितस्य। परा। अपतत्।

अपाम्। एकम्। वेधसाम्। रेतः। आहुः। तत्। ते। हिरण्यम्। त्रिऽवृत्। अस्तु। आयुषे ॥ ६ ॥

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्।
त्रेधामृतस्य चक्षणं त्रीण्यायूंषि तेकरम् ॥ ७ ॥

त्रिऽआयुषम्। जमत्ऽअग्नेः। कश्यपस्य। त्रिऽआयुषम्।

त्रेधा। अमृतस्य। चक्षणम्। त्रीणि। आयूंषि। ते। अकरम् ॥ ७ ॥

त्रयः सुपर्णास्त्रिवृता यदायन्नेकाक्षरमभिसंभूय शक्राः।
प्रत्यौहन्मृत्युममृतेन साकमन्तर्दधाना दुरितानि विश्वा ॥ ८ ॥

त्रयः। सुऽपर्णाः। त्रिऽवृता। यत्। आयन्। एकऽअक्षरम्। अभिऽसंभूय। शक्राः।

प्रति। औहन्। मृत्युम्। अमृतेन। साकम्। अन्तःऽदधानाः। दुःऽइतानि। विश्वा ॥ ८ ॥

दिवस्त्वा पातु हरितं मध्यात् त्वा पात्वर्जुनम्।

---

१ P कस्यपस्य। २ P आयुंषि। ३ By त्रिवृत् it seems we have to take the gold head consisting of three kinds of gold, or gold believed to come from three sources.

४ P J K V C^{P} °दधाना। We with $\overset{3}{P}$.

भूम्या अयस्मयं पातु प्रागाद् देवपुरा अयम् ॥ ९ ॥

दिवः । त्वा । पातु । हरितम् । मध्यात् । त्वा । पातु । अर्जुनम् ।
भूम्याः । अयस्मयम् । पातु । प्र । अगात् । देवऽपुराः । अयम् ॥ ९ ॥

इमास्तिस्रो देवपुरास्तास्त्वा रक्षन्तु सर्वतः ।
तास्त्वं बिभ्रद् वर्चस्व्युत्तरो द्विषतां भव ॥ १० ॥

इमाः । तिस्रः । देवऽपुराः । ताः । त्वा । रक्षन्तु । सर्वतः ।
ताः । त्वम् । बिभ्रत् । वर्चस्वी । उत्तरः । द्विषताम् । भव ॥ १० ॥

पुरं देवानाममृतं हिरण्यं य आबेधे प्रथमो देवो अग्रे ।
तस्मै नमो दश प्राचीः कृणोम्यनु मन्यतां त्रिवृदाबधे मे ॥ ११ ॥

पुरम् । देवानाम् । अमृतम् । हिरण्यम् । यः । आऽबेधे । प्रथमः । देवः । अग्रे ।
तस्मै । नमः । दश । प्राचीः । कृणोमि । अनु । मन्यताम् । त्रिऽवृत् । आऽबधे । मे ॥ ११ ॥

आ त्वा चृतत्वर्यमा पूषा बृहस्पतिः । अहर्जातस्य यन्नाम तेन त्वाति चृतामसि ॥ १२ ॥

आ । त्वा । चृततु । अर्यमा । आ । पूषा । आ । बृहस्पतिः ॥ अहःऽजातस्य । यत् । नाम ।
तेन । त्वा । अति । चृतामसि ॥ १२ ॥

ऋतुभिष्ट्वार्तवैरायुषे वर्चसे त्वा । संवत्सरस्य तेजसा तेन संहनु कृणमसि ॥ १३ ॥

ऋतुऽभिः । त्वा । आर्तवैः । आयुषे । वर्चसे । त्वा ॥ सम्ऽवत्सरस्य । तेजसा । तेन ।
सम्ऽहनु । कृणमसि ॥ १३ ॥

घृतादुल्लुप्तं मधुना समक्तं भूमिहंहमच्युतं पारयिष्णु ।
भिन्दत् सपत्नानधरांश्च कृण्वदा मा रोह महते सौभगाय ॥ १४ ॥

---

१ P देवऽपुरः ।. २ B B̂ °स्व्युत्तरो changed to °स्युत्तरो. K °स्युत्तरो. A D °स्युत्तरो corrected from °स्व्युत्तरो. We with R S^m V Dc Cs P̂^2 J CP. ३ A B̂^h D K K̂^m R S^m V Dc मन्यंतां. P P̂^2 J V CP मन्यंताम् ।. We with Cs. ४ B doubtful between चृ° and वृ°. K K̂^m V P̂^2 वृ°. We with A B̂^h D R S^m Dc Cs P J CP. ५ A B S^m भिंदन्स°. B̂^h D K K̂^m R V Dc भिंदंत्स°. P P̂^2 J V CP भिंदन् ।. We with Cs.

घृतात्। उत्ऽउलुंपम्। मधुना। सम्ऽअक्तम्। भूमिऽइंहम्। अच्युतम्। पारयिष्णु।
भिन्दत्। सऽउपब्दान्। अधरान्। च। कृण्वत्। आ। मा। रोह। महते। सौभगाय ॥ १४ ॥

इति षष्ठेनुवाके द्वितीयं सूक्तम् ॥

"पुरस्ताद् युक्तः" इति सूक्तस्य चातनगणे पाठाद् यत्रयत्र चातनगणस्य विनियोगस्तत्रतत्रास्य सूक्तस्य विनियोगः। विस्तरस्तु "स्तुवानम् अग्ने" इति [१. ७] सूक्ते कृतः ॥

पुरस्तांद् युक्तो वह जातवेदोग्ने विद्धि क्रियमांणं यथेदम्।
त्वं भिषग् भेषजस्यांसि कर्ता त्वया गामश्वं पुरुषं सनेम ॥ १ ॥

पुरस्तांत्। युक्तः। वह। जातऽवेदः। अग्ने। विद्धि। क्रियमांणम्। यथा। इदम्।
त्वम्। भिषक्। भेषजस्य। असि। कर्ता। त्वया। गाम्। अश्वम्। पुरुषम्। सनेम ॥ १ ॥

तथा तदंग्ने कृणु जातवेदो विश्वेभिर्देवैः सह संविदानः।
यो नो दिदेव यतमो जघास यथा सो अस्य परिधिष्पतांति ॥ २ ॥

तथा। तत्। अग्ने। कृणु। जातऽवेदः। विश्वेभिः। देवैः। सह। सम्ऽविदानः।
यः। नः। दिदेव। यतमः। जघास। यथा। सः। अस्य। परिऽधिः। पतांति ॥ २ ॥

यथा सो अस्य परिधिष्पतांति तथा तदंग्ने कृणु जातवेदः।
विश्वेभिर्देवैः सह संविदानः ॥ ३ ॥

यथा। सः। अस्य। परिऽधिः। पतांति। तथा। तत्। अग्ने। कृणु। जातऽवेदः।
विश्वेभिः। देवैः। सह। सम्ऽविदानः ॥ ३ ॥

अक्ष्यौ३ नि विंध्य हृदयं नि विंध्य जिह्वां नि तृन्द्धि प्र दतो मृणीहि।
पिशाचो अस्य यंतमो जघासाग्ने यविष्ठ प्रति तं शृणीहि ॥ ४ ॥

अक्ष्यौ। नि। विध्य। हृदयम्। नि। विध्य। जिह्वाम्। नि। तृन्द्धि। प्र। दतः। मृणीहि।
पिशाचः। अस्य। यतमः। जघास। अग्ने। यविष्ठ। प्रति। तम्। शृणीहि ॥ ४ ॥

यदंस्य हृतं विहृतं यत् परांभृतमात्मनो जग्धं यंतमत् पिशाचैः।
तदंग्ने विद्वान् पुनरा भंर त्वं शरीरे मांसमसुमेरयामः ॥ ५ ॥

---

१ P कृण्वत्। We with $\overset{2}{P}$ J V Cp. २ P V असि। ३ P भस्य। We with $\overset{2}{P}$ J Cp.
४ $\overset{h}{B}$ D K $\overset{m}{K}$ Dc Cs यविष्ट. $\overset{2}{P}$ यविष्ठ। ५ P अस्य।

यत्। अस्य। हुतम्। विऽहुतम्। यत्। पराऽभृतम्। आत्मनः। जग्धम्। यतमत्। पिशाचैः।
तत्। अग्ने। विद्वान्। पुनः। आ। भर। त्वम्। शरीरे। मांसम्। असुम्। आ। ईरयामः ॥ ५ ॥

आमे सुपक्के शबले विपक्के यो मा पिशाचो अशने ददम्भ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदोऽयमस्तु ॥ ६ ॥

आमे। सुऽपक्के। शबले। विऽपक्के। यः। मा। पिशाचः। अशने। ददम्भ।
तत्। आत्मना। प्रऽजया। पिशाचाः। वि। यातयन्ताम्। अगदः। अयम्। अस्तु ॥ ६ ॥

क्षीरे मा मन्थे यतमो ददम्भाकृष्टपच्ये अशने धान्ये[1] यः। तदा० ॥ ७ ॥

क्षीरे। मा। मन्थे। यतमः। ददम्भ। अकृष्टऽपच्ये। अशने। धान्ये[1]। यः ॥०॥ ७ ॥

अपां मा पाने यतमो ददम्भ क्रव्याद् यातूनां शयने शयानम्। तदा०॥८॥

अपाम्। मा। पाने। यतमः। ददम्भ। क्रव्यऽअत्। यातूनाम्। शयने। शयानम् ॥०॥ ८ ॥

दिवा मा नक्तं यतमो ददम्भ क्रव्याद् यातूनां शयने शयानम्।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो[2]ऽयमस्तु ॥ ९ ॥

दिवा। मा। नक्तम्। यतमः। ददम्भ। क्रव्यऽअत्। यातूनाम्। शयने। शयानम्।
तत्। आत्मना। प्रऽजया। पिशाचाः। वि। यातयन्ताम्। अगदः। अयम्। अस्तु ॥ ९ ॥

क्रव्यादमग्ने रुधिरं पिशाचं मनोहनं जहि जातवेदः।
तमिन्द्रो वाजी वज्रेण हन्तु च्छिनत्तु सोमः शिरो अस्य धृष्णुः ॥ १० ॥

क्रव्यऽअदम्। अग्ने। रुधिरम्। पिशाचम्। मनःऽहनम्। जहि। जातऽवेदः।
तम्। इन्द्रः। वाजी। वज्रेण। हन्तु। छिनत्तु। सोमः। शिरः। अस्य। धृष्णुः ॥ १० ॥

सनादग्ने मृणसि यातुधानान् न त्वा रक्षांसि पृतनासु जिग्युः।
सहमूराननु दह क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥ ११ ॥

सनात्। अग्ने। मृणसि। यातुऽधानान्। न। त्वा। रक्षांसि। पृतनासु। जिग्युः।
सहऽमूरान्। अनु। दह। क्रव्यऽअदः। मा। ते। हेत्याः। मुक्षत। दैव्यायाः ॥ ११ ॥

समाहर जातवेदो यद्धृतं यत् पराभृतम्।
गात्राण्यस्य वर्धन्तामंशुरिवा प्यायतामयम् ॥ १२ ॥

---

१ R १ for ३. २ R १ for ३.

सम्ऽआहर। जातऽवेदः। यत्। हृतम्। यत्। परांऽभृतम्।
गात्राणि। अस्य। वर्धन्ताम्। अंशुःऽइव। आ। प्यायताम्। अयम् ॥ १२ ॥

सोमस्येव जातवेदो अंशुरा प्यायतामयम्।
अग्ने विरप्शिनं मेध्यमयक्ष्मं कृणु जीवतु ॥ १३ ॥

सोमस्यऽइव। जातऽवेदः। अंशुः। आ। प्यायताम्। अयम्।
अग्ने। विऽरप्शिनम्। मेध्यम्। अयक्ष्मम्। कृणु। जीवतु ॥ १३ ॥

एतास्ते अग्ने समिधः पिशाचजम्भनीः।
तास्त्वं जुषस्व प्रति चैना गृहाण जातवेदः ॥ १४ ॥

एताः। ते। अग्ने। सम्ऽइधः। पिशाचऽजम्भनीः।
ताः। त्वम्। जुषस्व। प्रति। च। एनाः। गृहाण। जातऽवेदः ॥ १४ ॥

तार्ष्टार्घीरग्ने समिधः प्रति गृह्णाह्यर्चिषा।
जहातु क्रव्याद्रूपं यो अस्य मांसं जिहींर्षति ॥ १५ ॥

तार्ष्टऽअर्घीः। अग्ने। सम्ऽइधः। प्रति। गृह्णाहि। अर्चिषा।
जहातु। क्रव्यऽअत्। रूपम्। यः। अस्य। मांसम्। जिहींर्षति ॥ १५ ॥

इति षष्ठेनुवाके तृतीयं सूक्तम् ॥

"आवतस्ते" इति सूक्तस्य अंहोलिङ्गणे पाठात् तस्य गणस्य यत्रयत्र सर्वभैषज्यादिषु विनियोग उक्तस्तत्र सर्वत्र विनियोगोनुसंधेयः। अस्य विस्तरस्तु "अक्षीभ्याम्" इत्यत्र [२.३३] उक्तः ॥

तथा अनेन सूक्तेन उपनयनानन्तरम् आयुष्कामं माणवकम् अभिमृश्य अभिमन्त्रयेत। सूत्रितं हि। "उत देवाः [४.१३] आवतस्ते" [५.३०] इत्यादि "इत्यभिमन्त्रयते ब्राह्मणोक्तम्" इत्यन्तम् [कौ० ७.९] ॥

तथा ऋषिहस्ते माणवकशरीराभिमन्त्रणेपि एतत् सूक्तम्। सूत्रितं हि। "उत देवाः [४.१३] आवतस्ते" [५.३०] इत्यादि "इत्यभिमन्त्रयते" इत्यन्तम् [कौ० ७.९] ॥

तथा अस्य सूक्तस्य पिष्टरात्रीकल्पे सर्षपाभिमन्त्रणानन्तरं जपे विनियोगः। तद् उक्तं परिशिष्टे। "अथातः पिष्टरात्र्याः कल्पं व्याख्यास्यामः" इति प्रक्रम्य "सर्षपान् अभिमन्त्र्य आवतस्ते इति जपन्" इति [प० ६] ॥

आवतस्त आवतः परावतस्त आवतः।
इहैव भव मा नु गा मा पूर्वाननु गाः पितॄनसुं बध्नामि ते दृढम् ॥ १ ॥

---

१ $\overset{h}{B}$ °धीरग्ने changed to °धीरग्ने. K $\overset{m}{K}$ $\overset{m}{S}$ V °धीरग्ने. We with A B D R Dc Cs P $\overset{2}{P}$ J Cr. २ B D $\overset{m}{S}$ Cs पितृणसुं. We with A $\overset{h}{B}$ K $\overset{m}{K}$ R V Dc.

आऽवर्तः । ते । आऽवर्तः । पराऽवर्तः । ते । आऽवर्तः ।
इह । एव । भव । मा । नु । गाः । मा । पूर्वान् । अनु । गाः । पितॄन् । असुम् । वधामि ।
ते । दृढम् ॥ १ ॥

यत् त्वाभिचेरुः पुरुषः स्वो यदरणो जनः ।
उन्मोचनप्रमोचने उभे वाचा वदामि ते ॥ २ ॥

यत् । त्वा । अभिऽचेरुः । पुरुषः । स्वः । यत् । अरणः । जनः ।
उन्मोचनप्रमोचने इत्युन्मोचनऽप्रमोचने । उभे इति । वाचा । वदामि । ते ॥ २ ॥

यद् दुद्रोहिथ शेपिषे स्त्रियै पुंसे अचित्त्या । उन्मो० ॥ ३ ॥

यत् । दुद्रोहिथ । शेपिषे । स्त्रियै । पुंसे । अचित्त्या ॥० ॥ ३ ॥

यदेनसो मातृकृताच्छेषे पितृकृताच्च यत् ।
उन्मोचनप्रमोचने उभे वाचा वदामि ते ॥ ४ ॥

यत् । एनसः । मातृऽकृतात् । शेषे । पितृऽकृतात् । च । यत् ।
उन्मोचनप्रमोचने इत्युन्मोचनऽप्रमोचने । उभे इति । वाचा । वदामि । ते ॥ ४ ॥

यत् ते माता यत् ते पिता जामिर्भ्राता च सर्जतः ।
प्रत्यक् सेवस्व भेषजं जरदष्टिं कृणोमि त्वा ॥ ५ ॥

यत् । ते । माता । यत् । ते । पिता । जामिः । भ्राता । च । सर्जतः ।
प्रत्यक् । सेवस्व । भेषजम् । जरत्ऽअष्टिम् । कृणोमि । त्वा ॥ ५ ॥

इहैधि पुरुष सर्वेण मनसा सह ।
दूतौ यमस्य मानु गा अधि जीवपुरा इहि ॥ ६ ॥

इह । एधि । पुरुष । सर्वेण । मनसा । सह ।
दूतौ । यमस्य । मा । अनु । गाः । अधि । जीवऽपुराः । इहि ॥ ६ ॥

अनुऽहूतः पुनरेहि विद्वानुदयनं पथः ।
आरोहणमाक्रमणं जीवतोजीवतोयनम् ॥ ७ ॥

अनुऽहूतः । पुनः । आ । इहि । विद्वान् । उत्ऽअयनम् । पथः ।

---

१ K K^{m} V omit अ°. We with A B^{h} D R S^{m} Dc Cs.

आऽरोहणम्। आऽक्रमणम्। जीवतःऽजीवतः। अयनम्॥ ७॥

मा बिभेर्न मरिष्यसि जरदष्टिं कृणोमि त्वा।
निरवोचमहं यक्ष्ममङ्गेभ्यो अङ्गज्वरं तव॥ ८॥

मा। विभेः। न। मरिष्यसि। जरत्ऽअष्टिम्। कृणोमि। त्वा।
निः। अवोचम्। अहम्। यक्ष्मम्। अङ्गेभ्यः। अङ्गऽज्वरम्। तव॥ ८॥

अङ्गभेदो अङ्गज्वरो यश्च ते हृदयामयः।
यक्ष्मः श्येन इव प्रापप्तद् वाचा साढः परस्तराम्॥ ९॥

अङ्गऽभेदः। अङ्गऽज्वरः। यः। च। ते। हृदयऽआमयः।
यक्ष्मः। श्येनःऽइव। प्र। अपप्तत्। वाचा। साढः। परःऽतराम्॥ ९॥

ऋषी बोधप्रतीबोधावस्वप्नो यश्च जागृविः।
तौ ते प्राणस्य गोप्तारौ दिवा नक्तं च जागृताम्॥ १०॥

ऋषी इति। बोधऽप्रतीबोधौ। अस्वप्नः। यः। च। जागृविः।
तौ। ते। प्राणस्य। गोप्तारौ। दिवा। नक्तम्। च। जागृताम्॥ १०॥

अयमग्निरुपसद्य इह सूर्य उदेतु ते।
उदेहि मृत्योर्गम्भीरात् कृष्णाच्चित् तमसस्परि॥ ११॥

अयम्। अग्निः। उपऽसद्यः। इह। सूर्यः। उत्। एतु। ते।
उत्ऽएहि। मृत्योः। गम्भीरात्। कृष्णात्। चित्। तमसः। परि॥ ११॥

नमो यमाय नमो अस्तु मृत्यवे नमः पितृभ्य उत ये नयन्ति।
उत्पारणस्य यो वेद तमग्निं पुरो दधेसा अरिष्टतातये॥ १२॥

नमः। यमाय। नमः। अस्तु। मृत्यवे। नमः। पितृऽभ्यः। उत। ये। नयन्ति।
उत्ऽपारणस्य। यः। वेद। तम्। अग्निम्। पुरः। दधे। असौ। अरिष्टऽतातये॥ १२॥

आ एतु प्राण ऐतु मन ऐतु चक्षुरथो बलम्।
शरीरमस्य सं विदां तत् पद्भ्यां प्रति तिष्ठतु॥ १३॥

आ। एतु। प्राणः। आ। एतु। मनः। आ। एतु। चक्षुः। अथो इति। बलम्।

---

१ So A B $\overset{h}{B}$ D K $\overset{m}{K}$ R $\overset{m}{S}$ V De Cs. P $\overset{2}{P}$ J CP K V उत्ऽएहि। See समाहर, V. 29. 12.

शरीरम् । अस्य । सम् । विदाम् । तत् । पत्ऽभ्याम् । प्रति । तिष्ठतु ॥ १३ ॥

प्राणेनाग्ने चक्षुषा सं सृजेमं समीरय तन्वा३ सं बलेन ।
वेत्थामृतस्य मा नु गान्मा नु भूमिगृहो भुवत् ॥ १४ ॥

प्राणेन । अग्ने । चक्षुषा । सम् । सृज । इमम् । सम् । ईरय । तन्वा३ । सम् । बलेन ।
वेत्थ । अमृतस्य । मा । नु । गात् । मा । नु । भूमिऽगृहः । भुवत् ॥ १४ ॥

मा ते प्राण उप दसन्मो अपानोपि धायि ते ।
सूर्यस्त्वाधिपतिर्मृत्योरुदायच्छतु रश्मिभिः ॥ १५ ॥

मा । ते । प्राणः । उप । दसत् । मो इति । अपानः । अपि । धायि । ते ।
सूर्यः । त्वा । अधिऽपतिः । मृत्योः । उत्ऽआयच्छतु । रश्मिऽभिः ॥ १५ ॥

इयमन्तर्वदति जिह्वा बद्धा पनिष्पदा ।
त्वया यक्ष्मं निरवोचं शतं रोपीश्च तक्मनः ॥ १६ ॥

इयम् । अन्तः । वदति । जिह्वा । बद्धा । पनिष्पदा ।
त्वया । यक्ष्मम् । निः । अवोचम् । शतम् । रोपीः । च । तक्मनः ॥ १६ ॥

अयं लोकः प्रियतमो देवानामपराजितः ।
यस्मै त्वमिह मृत्यवे दिष्टः पुरुष जज्ञिषे ।
स च त्वानु ह्वयामसि मा पुरा जरसो मृथाः ॥ १७ ॥

अयम् । लोकः । प्रियऽतमः । देवानाम् । अपराऽजितः ।
यस्मै । त्वम् । इह । मृत्यवे । दिष्टः । पुरुषे । जज्ञिषे ।
सः । च । त्वा । अनु । ह्वयामसि । मा । पुरा । जरसः । मृथाः ॥ १७ ॥

इति षष्ठेनुवाके चतुर्थं सूक्तम् ॥

"यां ते चक्रुः" इति सूक्तस्य कृत्याप्रतिहरणगणे पाठाद् यत्रयत्र तस्य गणस्य विनियोगस्तत्र सर्वत्रास्य सूक्तस्य विनियोगोनुसंधेयः । विस्तरस्तु "दूष्या दूषिरसि" इति सूक्ते [२. ११] कृतः ॥

यां ते चक्रुरामे पात्रे यां चक्रुर्मिश्रधान्ये ।
आमे मासे कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥ १ ॥

---

१ B R नु. २ B ^{h}B K ^{m}K A D R V Cs P ^{2}P J CP तु. We with ^{m}S Dc. ३ P भवत् ।.
४ ^{m}K मो. ५ P ^{2}P J V CP पुरुषऽजज्ञिषे ।.

याम्। ते। चक्रुः। आमे। पात्रे। याम्। चक्रुः। मिश्रऽधान्ये।
आमे। मांसे। कृत्याम्। याम्। चक्रुः। पुनः। प्रति। हरामि। ताम्॥ १॥

यां ते चक्रुः कृकवाकावजे वा यां कुरीरिणि।
अव्यां ते कृत्यां यां०॥ २॥

याम्। ते। चक्रुः। कृकवाकौ। अजे। वा। याम्। कुरीरिणि।
अव्याम्। ते। कृत्याम्।०॥ २॥

यां ते चक्रुरेकशफे पशूनामुभयादति।
गर्दभे कृत्यां यां०॥ ३॥

याम्। ते। चक्रुः। एकऽशफे। पशूनाम्। उभयादति[1]।
गर्दभे। कृत्याम्।०॥ ३॥

यां ते चक्रुरमूलायां वलगं वा नराच्याम्।
क्षेत्रे ते कृत्यां यां०॥ ४॥

याम्। ते। चक्रुः। अमूलायाम्। वलगम्। वा। नराच्याम्।
क्षेत्रे। ते। कृत्याम्।०॥ ४॥

यां ते चक्रुर्गार्हपत्ये पूर्वाग्नावुत दुश्चितः।
शालायां कृत्यां यां०॥ ५॥

याम्। ते। चक्रुः। गार्हऽपत्ये। पूर्वऽअग्नौ। उत। दुःऽचितः।
शालायाम्। कृत्याम्।०॥ ५॥

यां ते चक्रुः सभायां यां चक्रुरधिदेवने।
अक्षेषु कृत्यां यां०॥ ६॥

याम्। ते। चक्रुः। सभायाम्। याम्। चक्रुः। अधिऽदेवने।
अक्षेषु। कृत्याम्।०॥ ६॥

यां ते चक्रुः सेनायां यां चक्रुरिष्वायुधे।
दुन्दुभौ कृत्यां यां०॥ ७॥

---

१ P उभयादिति।.

याम् । ते । चक्रुः । सेनायाम् । याम् । चक्रुः । इषुऽआयुधे ।
दुन्दुभौ । कृत्याम् ।० ॥ ७ ॥

यां ते कृत्यां कूपेऽवदधुः श्मशाने वा निचख्नुः ।
सभ्रनि कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥ ८ ॥

याम् । ते । कृत्याम् । कूपे । अवऽदधुः । श्मशाने । वा । निऽचख्नुः ।
सभ्रनि । कृत्याम् । याम् । चक्रुः । पुनः । प्रति । हरामि । ताम् ॥ ८ ॥

यां ते चक्रुः पुरुषास्थे अग्नौ संकसुके च याम् ।
म्रोकं निर्दाहं क्रव्यादं पुनः प्रति हरामि ताम् ॥ ९ ॥

याम् । ते । चक्रुः । पुरुषऽअस्थे । अग्नौ । सम्ऽकसुके । च । याम् ।
म्रोकम् । निःऽदाहम् । क्रव्यऽअदम् । पुनः । प्रति । हरामि । ताम् ॥ ९ ॥

अपथेना जभारैणां तां पथेतः[1] प्र हिण्मसि ।
अधीरो मर्याधीरेभ्यः सं जभाराचित्त्या ॥ १० ॥

अपथेन । आ । जभार । एनाम्[2] । ताम् । पथा । इतः । प्र । हिण्मसि ।
अधीरः । मर्याऽधीरेभ्यः । सम् । जभार[3] । अचित्त्या ॥ १० ॥

यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम् ।
चकारं भद्रमस्मभ्यमभगो भगवद्भ्यः ॥ ११ ॥

यः । चकारं । न । शशाकं । कर्तुम् । शश्रे । पादम् । अङ्गुरिम् ।
चकारं । भद्रम् । अस्मभ्यम् । अभगः । भगवत्ऽभ्यः ॥ ११ ॥

कृत्याकृतं वलगिनं मूलिनं शपथेय्यम् ।
इन्द्रस्तं हन्तु महता वधेनाग्निर्विध्यत्वस्तया ॥ १२ ॥

कृत्याऽकृतम् । वलगिनम् । मूलिनम् । शपथेय्यम् ।
इन्द्रः । तम् । हन्तु । महता । वधेन । अग्निः । विध्यतु । अस्तया ॥ १२ ॥

षष्ठेनुवाके पञ्चमं सूक्तम् ॥

षष्ठोनुवाकः ॥

इति पञ्चमं काण्डं समाप्तम् ॥

---

१ Cs पथेत प्र हिण्मसि. २ P एनाम् ।. ३ P जभारा ।.

Bayerische
Staatsbibliothek
MÜNCHEN